सम्पूर्णानन्द-ग्रन्थमाला

(२)

अर्वाचीनं मनोविज्ञानम्

श्रीनामराजकपिलेन विरचितम्

वाराणसेय-संस्कृत-विश्वविद्यालयः

1-1

SAMPŪRṆĀNANDA GRANTHAMĀLĀ

Vol. 3

GENERAL EDITOR :—

Kshetresachandra Chattopadhyaya
Director, Research Institute,
Varanaseya Sanskrit Vishvavidyalaya,
Varanasi.

ARVĀCĪNAṀ MANOVIJÑĀNAM

by

Māmarāja Datta Kapila

VARANASI

1964

Published by :—
Director, Research Institute,
Varanaseya Sanskrit Vishvavidyalaya,
Varanasi.

Printed by—
Kedaranath Khatri
Parijata Press
Ramakatora, Varanasi.

सम्पूर्णानन्द-ग्रन्थमाला

(३)

अर्वाचीनं मनोविज्ञानम्

श्रीमामराजदत्तकपिलेन विरचितम्

प्रकाशितं

वाराणस्याम्

१८८६ तमे शकाब्दे

प्राप्तिस्थानम्—
प्रकाशनविभाग:
वाराणसेयसंस्कृतविश्वविद्यालय:
वाराणसी—२

मूल्यम्—द्वादश रूप्यकाणि

विज्ञप्तिः

मनोतीतं परं ब्रह्म
मायया सृष्टिकारणम् ।
ध्यात्वा प्रकाशयाम्यद्य
मनोविज्ञानपुस्तकम् ॥
मनसो वृत्तयो नाना
पाश्चात्त्यैः सुपरीक्षिताः ।
प्रवृत्तिपरकैश्चापि
बहु तथ्यं तथाहृतम् ॥
पतञ्जलिकृते योगे
न्याये वैशेषिके तथा ।
बौद्धतन्त्रे मनः श्रित्वा
लिखितं सारवद् बहु ॥
तथापि नूतना दृष्टिः
पाश्चात्त्यैर्या प्रवर्तिता ।
मनःस्वरूपबोधार्थं
नूनमुपकरिष्यति ॥
इत्यस्मात् पुस्तकमेत-
ल्लिखितं शासनाज्ञया ।
श्रीमामराजदत्तेन
कपिलेन विपश्चिता ॥
अर्वाचीनं समाख्यानं
मनोविज्ञानम् अस्य वै ।
विद्वत्समाजदौर्भाग्या-
ल्लेखकोऽयं दिवं गतः ॥
सम्पूर्णानन्दमालाया-
स्तृतीयं कुसुमं बुधाः ।
पश्यन्तु स्निग्धया दृष्ट्या
क्षेत्रेशो याचते नतः ॥

---

* ॐ *

भूमिका

अयि भगवति सरस्वति !

तत्रभवत्यै भवत्यै सपर्यापर्युत्सुकेन मयोपहृतं खल्विदं प्रथमं प्रसूनम्। निर्गन्धं वा सुरभि वा यथा भवेदिदं परमश्रद्धयोपहृतं त्वच्चरणकमलचञ्चरीकेण मया । स्वीकृत्यानुगृह्णातु माम् !

अये विविधविद्याविद्योतितस्वान्ता विद्वद्वरिष्ठाः !

गीर्वाणवाण्यामर्वाचीनवैज्ञानिकसरणिमवलम्ब्य लिखितोऽयम् 'अर्वाचीनमनोविज्ञानम्' इति नाम्ना द्वितीयः प्रबन्धः; प्रथमस्तु महामहोपाध्यायश्रीगणनाथसेनसरस्वतिमहाभागानां सुकृतीनां 'प्रत्यक्षशारीरम्' इति विदाङ्कुर्वन्तु तत्रभवन्तः । अद्यतनेषु विविधविज्ञानेषु हि खलु मनोविज्ञानमतिरमणीयं विज्ञानानां सुप्रथितस्फीतवाङ्मयानां मूर्धन्यमवतिष्ठते । अत्रार्वाचीनस्य मनोविज्ञानस्य बहुशाखस्य सामान्यासामान्यमनोविज्ञानभेदाभ्यां साङ्गोपाङ्गं विवेचनमभिनिर्वृत्तम् । अन्यासां शाखानां विवेचनीयतत्त्वानामपि समावेशो यथावसरमस्माभिः सम्पादित एव ।

ग्रन्थोऽयं षोडशाध्यायेषु प्रविभक्तः । प्रथमपञ्चदशाध्यायेषु सामान्यमनोविज्ञानमनुव्याख्यातम् । अन्तिमे षोडशेऽध्यायेऽसामान्यमनोविज्ञानविवेचनीये फ्रायडमहोदयप्रवर्तितमनोविश्लेषणवादनाम्नः सम्प्रदायविशेषस्य मतम्, एडलर-युङ्ग प्रभृतिभिरुपबृंहितम्, सपरिकरं पल्लवितम्। सर्वप्रथममस्मिन् प्रबन्धेऽस्माभिरिदं प्रयतितं यदर्वाचीनं मनोविज्ञानं न केवलं प्रतीच्यमनोविज्ञानपारदृश्वनामेव मतानामाकरग्रन्थो भवेत्, अपि तु अस्यैकैकस्मिन्नध्याये पौरस्त्यमतानां विवेचनमपि तुलनात्मकं समीक्षात्मकरीत्योपनिबध्येत, येन गीर्वाणवाण्यां मनोविज्ञानैतिहासिकविचारशृङ्खला अव्यवच्छिन्नरूपेणाकलयितुं शक्येत । अस्मिन् दुःसाध्ये महतानुसन्धानेन सम्पादनीये कर्मणि कियदस्माकं साफल्यमिति निर्णयाय निर्धूतसकलान्तर्ध्वान्ता हंसवन्नीरक्षीरविवेकिपरमसहृदयाः सुधिय एव प्रमाणम् ।

एतदप्यत्रावधेयं भवति यदस्मिन् ग्रन्थे संस्कृतमहाविद्यालयानामाङ्ग्लमहाविद्यालयानामुच्चैस्तमश्रेण्युपयोगिमनोविज्ञानपदार्थानां सविशेषं विवेचनोपक्रमो जातः ।

अस्य ग्रन्थस्य प्रणयनाय संस्कृतोद्धारबद्धपरिकरेण उत्तरप्रदेशीयसर्वकारेण यथोचितं प्रोत्साहनं प्रदाय परमश्लाघ्या परम्परा प्रवर्तिता । एतदर्थं वयमुत्तरप्रदेशस्य जनप्रियं सर्वकारं प्रति

बहून् धन्यवादानुपहरामः। सर्वकारेणादिष्टावधेरस्माभी रुग्णताद्यपरिहार्यपरिस्थितिवशादतिक्रमणं कृतम्, एतदर्थं वयं क्षन्तव्याः। नूनमनेन विलम्बेनास्य ग्रन्थस्य श्रीवृद्धिरेव जाता।

येषां प्राच्यप्रतीच्यतत्त्वदर्शिनां विद्वद्धौरेयाणां च ग्रन्थानां परिशीलनेनास्माकं चेतसि मनोविज्ञानानुसन्धित्सा प्रस्फुरिता, तेषां कृते वयं हार्दमाभारं मन्यामहे। पादटिप्पणीषु यत्र तत्र तेषामुल्लेखः 'द्रष्टव्यम्' इति निर्देशपूर्वकः कृतः।

अस्य ग्रन्थस्य प्रणयने प्राध्यापकवरेण्यैः काशिकहिन्दूविश्वविद्यालयस्य दर्शनमनोविज्ञानधर्मसंस्कृतिविभागाध्यक्षैः श्रीमद्भिः डाक्टरभीखनलाल-आत्रेयमहाभागैः सर्वदा भूयिष्ठं प्रोत्साहनं पथप्रदर्शनं च प्रदत्तम्। तेषां गुरुवर्याणां सविधेऽस्माकं मनोविज्ञानस्य सविशेषमध्ययनं प्रवृत्तम्। अतोऽपरिमितैरपि शब्दैर्वयं तेषां कृते कृतज्ञताप्रकाशं कर्तुं नैव प्रभवामः।

वाराणसेयराजकीयसंस्कृतमहाविद्यालयाध्यक्षैः श्रीमद्भिः पण्डितकुबेरनाथशुक्लमहोदयैरप्यस्य ग्रन्थस्य प्रणयने सततं वयं प्रोत्साहिताः। पाण्डुलिपिसमवलोकनेन चास्माकमुत्साहस्तैर्नितरां संवर्धितः। तेषां कृते कृतज्ञताप्रकाशनमस्माकं हार्दिकं कर्तव्यमिति वयं मन्यामहे।

अस्य ग्रन्थस्य परिशोधने भाषापरिष्कारदृष्ट्या विशेषतो याभ्यां पण्डितप्रवराभ्यां भूयिष्ठं साहाय्यमस्मभ्यं निःसङ्कोचं निरन्तरं प्रदत्तम्, तौ वयं स्मारं स्मारमभिनन्दयामः। तयोः कृते यावत् कृतज्ञताप्रकाशनं वयं कर्तुमभिलषामस्तावन्नह्यस्माकं दुर्बला वाणी हृदयोद्गारमुखेनाऽभिव्यञ्जयितुमुत्सहते। एतौ महाशयौ—पण्डितप्रवरा व्याकरणाचार्यश्रीलक्ष्मीप्रसादवाजपेयिमहोदया बाँदास्थितराजकीयोत्तरमाध्यमिकविद्यालयीयाध्यापकाः; काशिकविद्वन्मण्डलीमण्डनाश्च वाराणसेयसंस्कृतमहाविद्यालयस्य प्रधानाध्यापकाः सहयोगिवर्या न्यायवेदान्ताचार्यपण्डितप्रवरश्रीबदरीनाथशुक्लमहोदयाः—इति नामधेयौ। श्रीलक्ष्मीप्रसादवाजपेयिमहोदयास्तु गतवर्षे छात्राध्यापकत्वेनात्र राजकीयसंस्कृतमहाविद्यालयसंस्कृतप्रशिक्षणसत्रे समागताः। अस्माकं सविधे तैः शिक्षामनोविज्ञानमधीतम्। नितरां स्नेहेन तैरस्य ग्रन्थस्य पूर्वार्द्धमतीव कष्टं सोढ्वा संशोधितम्। उत्तरार्द्धं च विद्वद्वरेण्यैः पण्डितबदरीनाथशुक्लमहाभागैः संशोधितम्। अस्य ग्रन्थस्य पर्यालोचनविषयिणीं तेषां सम्मतिं वयं नितरामाद्रियामहे। यथाह कविकुलगुरुः कालिदासः—"प्रायः प्रत्ययमाधत्ते स्वगुणेषूत्तमादरः" (कुमार० ६।२०) इति। ग्रन्थारम्भादेवास्य ग्रन्थस्य पाण्डुलिपिस्तैर्महानुभावैर्महतायासेन समवलोकिता। यादृशी समालोचनास्य ग्रन्थस्य तैः सम्पादिता, तादृश्यास्माकं समुत्साहो नूनमत्यर्थं संवर्धितः। अस्फुटैरेव भावोद्गारैस्तेषां कृते कृतज्ञताप्रकाशनं कर्तुं शक्यते, नेतरथा।

नहि वयं काँश्चनान्यानपि विदुषो विस्मर्तुमत्र प्रभवेम, यद्यपि खलु सम्प्रत्यस्य ग्रन्थस्य प्रणयने तेषां सहयोगः साक्षान्नहि सम्प्राप्तः, तथापि नूनमस्माकं संस्कृतानुरागस्योत्पादने संवर्धने

च तेषां नितरां साहाय्यं सम्प्राप्तमेव। अत एवैतदप्यस्य ग्रन्थस्य प्रणयने आराढुपकारकं कारणमस्तीति निःसंशयम्। ते च महाभागा अस्माकमाद्यगुरुवर्य्याः पण्डितप्रवरवेदव्रतविद्यालङ्काराः सहारनपुरनगरस्थकाशीरामोत्तरमाध्यमिकविद्यालयस्य प्रधानसंस्कृताध्यापकाः, यैः सर्वप्रथममस्मासु सुदृढसंस्कृतानुरागोन्मेषोऽभिनिर्वर्तितः। अमलनेरस्थभारतीयतत्त्वज्ञानमन्दिरस्य आचार्य्यप्रवरश्रीपण्डित-आत्मारामजेरेमहाभागा वेदान्ताचार्य्यन्यायाचार्य्याः, येषां सविधेऽस्माभिर्ब्रह्मसिद्धिर्नैष्कर्म्यसिद्धिश्चानुपूर्व्या अधीते। तत्रस्था एव वेदान्ताचार्याः पण्डितप्रवराः श्रीरघुपतिब्रह्मचारिमहाशयाः, येषां हस्तामलकवद्वेदान्तादिशास्त्राणामवबोध आसीत्, येषां च सविधेऽस्माभिः शाङ्करभाष्यादिग्रन्थानामध्ययनं सम्पादितम्। परमश्रद्धेयाः काशिकहिन्दूविश्वविद्यालयस्य भारतीयदर्शनसंस्कृतिविभागस्य गायकवाडप्राध्यापकपदमलङ्कुर्वाणा डाक्टरश्रीयुतवेङ्कटाचलमूर्तिमहाभागाः, येषां सकाशेऽस्माभिर्बौद्धदर्शनस्याकरग्रन्थानां महायानसूत्रालङ्कार-मूलमाध्यमिककारिका-प्रभृतीनामानुपूर्व्या विशिष्टमध्ययनमितरेषां प्राच्यप्रतीच्यदर्शनाचार्य्यमतानां परिशीलनं च कृतम्।

काशिकराजकीयसंस्कृतमहाविद्यालस्य व्याकरणप्राध्यापकपदमलङ्कुर्वाणाः सर्वतन्त्रस्वतन्त्रा निखिलविद्यास्थानपारावारीणा सहयोगिवर्या गुरुवर्याश्च परमश्रद्धेयाः पण्डितप्रवराः श्रीमद्रघुनाथशर्माणः, येषां सविधेऽस्माभिर्ब्रह्मसूत्रशाङ्करभाष्यभामतीप्रस्थानस्य, इतरेषां ग्रन्थानां च सविशेषमध्ययनमनुष्ठितम्, साम्प्रतमपि प्रवर्तते च; तैर्महाशयैरप्यस्मदीयप्रार्थनानुसारमस्य ग्रन्थस्य भाषासंस्कारः सम्पादितः। किमेतेषां गुरुवर्याणामार्षमृणमहमनेन दुर्बलेन शरीरेणोद्धर्तुं कथमप्यर्होऽस्मि! अस्यां दिशि 'अर्वाचीनं मनोविज्ञानम्' इति नाम्नाऽयं सन्दर्भो लघुरुपक्रमः। आशासे यदयं तेषां परितोषाय कल्पिष्यत इति।

राजकीयसरस्वतीभवनपुस्तकालयाध्यक्षैरप्यस्माकं बहु साहाय्यं कृतम्। एतदर्थं खल्वेते महाभागा अपि धन्यवादार्हाः। इयं चास्माकमभ्यर्थना यद्गुणैकपक्षपातिनो विद्वांसो विभावयन्तु यदस्मिन् ग्रन्थे याः का अपि त्रुट्योऽवशिष्टा लभ्येरन्, ताः सर्वा अस्माकमेव, न तूपर्युक्तानां केषाञ्चनापि विदुषां विद्वद्विशेषस्य वेति। अस्माकमेवोत्तरदायित्वमत्रैकैकपङ्क्तिविषये वर्तते। ये करुणार्द्रचेतसो महाशया अस्य पठनानन्तरं मानवनिसर्गसुलभान् प्रमादान् लभेरन्, ते कृपया सूचयन्तु, मर्षयन्तु चास्माकं स्खलितानि कुमारिलभट्टोक्तनयानुसारेण। तथा हि —

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः॥ इति।

किञ्च—

प्रमाणसिद्धान्तविरुद्धमत्र, यत्किञ्चिदुक्तं मतिमान्द्यदोषात्।
मात्सर्यमुत्सार्य तदार्यचित्ताः प्रसादमाधाय विशोधयन्तु॥ इति।

टङ्कणप्रतिकर्त्रा प्रमादाद् यास्त्रुट्यः कृता भवेयुः, तदर्थमपि वयं सहृदयैः क्षन्तव्याः ।

अन्ते च वयं भूतभावनमाशुतोषं भगवन्तं विश्वनाथं सर्वज्ञानगुणाकरमभ्यर्थयामहे यद्गीर्वाणवाण्याः पुरातनी प्रवहमाणा ज्ञानविज्ञानधाराऽप्रतिहतगतिरद्याप्यभिनिर्वर्तेत, वयं च निरन्तरं वाग्देवतार्चनाय समुत्साहं बलं योग्यतां च प्राप्नुयाम इति ॥

काशी
गणेशचतुर्थी, २०१३ वैक्रमसंवत्सरः ।
१६–१–१९५७.

विदुषां वशंवदः
मामराजदत्तः कापिलः

अर्वाचीनं मनोविज्ञानम्

सविस्तरविषयानुक्रमणिका

प्रथमोऽध्यायः

द्वितीयोऽध्यायः

तृतीयोऽध्यायः

चतुर्थोऽध्यायः

पञ्चमोऽध्यायः

षष्ठोऽध्यायः

सप्तमोऽध्यायः

अष्टमोऽध्यायः

६. प्रत्यक्षविषये समष्टिवादिनां मतम्, ७. प्रत्यक्षबाधकानि—(१) अतिदूरात्, (२) सामीप्यात्, (३) इन्द्रियाभिघातात्, (४) मनोऽनवस्थानात्, (५) सौक्ष्म्यात्; (६) व्यवधानात्, (७) अभिभवात्, (८) समानाभिहारात्, ८. अद्वैतवेदान्ताभिमतं वृत्तिनिर्गमनम्, ९. हेल्महोल्ट्ज़मतम्, १० हेल्महोल्ट्ज़-वुडवर्थमहोदययोर्मतभेदः, ११. द्व्यादर्शकयन्त्रेण 'स्टीरियोस्कोप' इति संज्ञकेन प्रयोगः, १२. भ्रमस्वरूपम्, १३. आत्मख्यातिवादः, १४. सत्ख्यातिवादः, १५. अख्यातिवादः, १६. अन्यथाख्यातिवादः, १७. विपरीतख्यातिवादः, १८. शून्यख्यातिवादः, १९. अनिर्वचनीयख्यातिः, २०. भ्रमस्वरूपविषये निर्गलितं मतम्, अर्वाचीनानां मतम्, २१. म्यूलरलायरस्य भ्रमोदाहरणम्, २२. पौगेनडोर्फज़ूल्नरमहोदययोर्भ्रमोदाहरणानि, २३. विभ्रमोदाहरणम्।

नवमोऽध्यायः

अभ्यासशिक्षणादिविवेचनम् पृ० २०५–२२३

१. कोऽयमभ्यासो नाम? २. मूलप्रवृत्त्यभ्यासयोर्भेदः, ३. सहजक्रियाभ्यासयोर्विशेषः, ४. अभ्यासनिर्माणप्रकारः, ५. अभ्यासपदार्थः, ६. अभ्यासभेदाः—(अ) चेष्टाभ्यासाः, (आ) चिन्तनाभ्यासाः, (इ) आचरणाभ्यासाः ७. अभ्यासविशेषाः, ८. अभ्यासनिर्माणार्थे नियमविशेषाः (१) सङ्कल्पदृढिमा, (२) शुभस्य शीघ्रम्, (३) अभ्यासपरिपाकं यावन्नियमेन शुभकार्यं सम्पादनीयम्, (४) अध्यवसायोऽपि समाश्रयणीयः, ९. दुष्टाभ्यासोपशमनम्, १०. दुष्टाभ्यासपरित्यागाय दण्डोपयोगित्वम्, ११. शिक्षणस्वरूपम्, १२. पशूनामध्ययनम्, १३. मानुषीयमध्ययनम्, १४. प्रतिनियता प्रतिक्रिया, १५. अन्तर्दृष्टिजन्यं शिक्षणम्, १६. शिक्षणनियमाः, १७. कर्मानुभवप्रभवं शिक्षणम्, १८. अनुकरणेन शिक्षणम्, १९. अन्तर्दृष्टिप्रभवं ज्ञानम्, २०. प्रतिनियतप्रतिक्रियाप्रभवं शिक्षणम्, २१. शिक्षणानुगतनाडीतन्त्रक्रियाविवेचनम्, २२. स्थायिशिक्षणविशेषाः।

दशमोऽध्यायः

विचारस्वरूपविवेचनम् पृ० २२४–२४८

१. चिन्तनक्रियास्वरूपम्, २. कल्पनाप्रतिमास्वरूपम्, ३. प्रत्ययस्वरूपम्, ४. प्रत्ययभेदाः, ५. सामान्यप्रत्ययप्रादुर्भावः—(अ) निरीक्षणम्, (आ) सन्तुलनम्, (इ) पृथक्करणम्, (ई) जातिनिर्देशनम्, (उ) लक्षणनिर्धारणम्, ६. अन्विताभिधानवादाभिहितान्वयवादमतसादृश्यम्, ७. प्रत्ययसम्बन्धनियमाः—(अ) सान्निध्यनियमः, (आ) सादृश्यनियमः, (इ) वैषम्यनियमः, (ई) तारतम्यनियमः, ८. प्रत्ययसम्बन्धनियमविमर्शः, ९. स्वच्छन्द-

एकादशोऽध्यायः

द्वादशोऽध्यायः

त्रयोदशोऽध्यायः

चतुर्दशोऽध्यायः

पञ्चदशोऽध्यायः

षोडशोऽध्यायः

अर्वाचीनं मनोविज्ञानम्

प्रथमोऽध्यायः

मनोविज्ञानस्वरूपम्

प्रणम्य जगदाधारं सर्वज्ञाननिधिं गुरुम् ।
मनोऽधिकृत्य विज्ञानमर्वाचीनं वितन्यते ॥

१. मनोविज्ञानस्य परिभाषाः

ग्रन्थारम्भ एव नितान्तगम्भीरविषयस्य मनोविज्ञानस्य सौकर्य्येण परिभाषानिरूपणं प्रायशः दुःसाध्यम् । यतो ह्यग्रिमाऽध्यायेषु विवेचनीयानां बहुविधसमस्यानां सम्यङ् निरूपणं परिमितेषु वाक्येषु दुर्वहं भवति । प्राचीनकाले मनोविज्ञानमध्यात्मदर्शनस्याङ्गभूतमासीत्, न केवलं भारतवर्ष एवाऽपि तु यवनादिदेशेष्वपि । श्रूयते हि बृहदारण्यकोपनिषदि मैत्रेयीं प्रति याज्ञवल्क्योक्तिः— "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः, मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्"[1] इति । भगवता श्रीकृष्णेनापि—"अध्यात्मविद्या विद्यानाम्"[2] इत्युक्त्वा अध्यात्मविद्याया महद् गौरवं प्रदर्शितम् । उपनिषत्सु अध्यात्मविद्या महता समादरेण सर्वविद्याप्रतिष्ठेत्युक्ता । प्राचीनयवनदेशेऽपि 'डेल्फी'मन्दिरस्य मुख्यद्वार इयं सूक्तिः लिखिता आसीत्—"आत्मानं विद्धि"[3] इति । महामुनिसुकरातमहोदयेनाऽपि स्वकीयान्तेवासिन आत्मस्वरूपविज्ञानार्थं बहु प्रेरिता आसन् । प्राचीनयवनवाङ्मये मनोविज्ञानस्य पर्यायवाचकः शब्दः 'साइकोलॉजी' इत्यासीत् । किन्तु सोऽपि वस्तुतोऽध्यात्मविद्याया एव समानार्थकः । यतो हि यवनानीभाषायाम् 'साइके' इति शब्दस्यार्थ आत्मेति वर्तते । 'लॉगस' इति यवनानीशब्दस्य सुसम्बद्धं प्रवचनं व्याख्यानमित्यर्थोऽस्ति । आभ्यामेव शब्दाभ्यां 'साइकोलॉजी' इति समस्तपदं निर्वक्तुं शक्यते । महदाश्चर्यं यदधुना आङ्ग्लभाषायामयमेव शब्दो मनोविज्ञानस्यार्वाचीनं महत्परिणतं विषयकलेवरमप्यभिव्यनक्ति । प्राचीनकालेऽध्यात्मविद्यायां सुमहत्यां गवेषणायां सत्यामर्वाचीनस्य मनोविज्ञानस्य समारम्भो वस्तुतस्तु षट्त्रिंशदुत्तरैकोनविंशतितमाद् (१९३६) वैक्रमाब्दाद् आरभ्यते । तदा हि प्राध्यापकवण्टमहोदयेन लीपजिगनगरेऽखिलविश्वस्य प्रथमा मनोवैज्ञानिकप्रयोगशाला

---

१. बृहदा० २ । ४ । ५

२. भगवद्गीता १० । ३२

३. तुलनार्थम्—Know Thyself.

स्थापितासीत् । तेषां ह्याचार्यप्रवराणां कुल्पेटिचनरप्रभृतयः शतशो विश्वविश्रुताः शिष्या अभूवन् । तैरेव प्रयोगात्मकमनोविज्ञानस्य सर्वप्रथमानुसन्धानपत्रिका संस्थापितासीत् । त एवार्वाचीनस्य मनोविज्ञानस्य जन्मदातारो मनोवैज्ञानिकैर्मन्यन्ते । तदनन्तरं मनोविज्ञानस्य या बहुविधाशातीता प्रगतिः संजाता, सा सर्वैरेवार्वाचीनपदेन मनोविज्ञानविशेषणेनाभिव्यज्यते ।

मनोविज्ञानस्य परिभाषायां विचार्यमाणायां संक्षेपत इदमुच्यते—मनोऽधिकृत्य यद् विज्ञानं प्रवर्तते तन्मनोविज्ञानम् । किन्त्वनेनैव मनोविज्ञानस्य व्याख्या न तावत् स्फुटीभवति यावद् वयं समस्तपदयोर्मनोविज्ञानयोः पृथक्तः सविस्तरं विचारं न कुर्मः ।

प्रथमतोऽन्त्यं विज्ञानपदमेव विचार्यते । प्राचीनदर्शनसाहित्ये विज्ञानशब्दो बहुष्वर्थेषु प्रयुक्तो दरीदृश्यते, यथा आत्मज्ञानम्, बुद्धिः, क्षणिकचैतन्यसन्तानमित्यादयः । प्रथमार्थद्वये विज्ञानपदमुपनिषत्सु प्रयुक्तं लभ्यते । तृतीयार्थे च बौद्धदर्शने विज्ञानपदस्य प्रयोगः संलक्ष्यते, यथा हि आलयविज्ञानम्, प्रवृत्तिविज्ञानम्, विज्ञानवाद इति[1] । किन्तु मनोविज्ञानपदे विज्ञानपदस्य एभ्योऽर्थेभ्यो सर्वथैव विलक्षणो विशिष्टोऽर्थः सूच्यते । अयमर्थः किञ्चिच्छास्त्रपदेन सह साम्यं लभते । विशिष्टं ज्ञानं विज्ञानमिति निर्वचनम् । ग्राम्याणामशिक्षितानां जनानां ज्ञानं विशृङ्खलं कार्यकारणसम्बन्धविरतं प्रायशोऽन्धविश्वासपुरस्सरं दरीदृश्यते । अतस्तेषां ज्ञानाद्विलक्षणमेव विज्ञानम् । ज्ञानं तु सामान्यमेव विदुषां प्राकृतानाञ्च । तदापि विदुषां ज्ञानेऽस्त्येव महद् वैशिष्ट्यम् । किं तर्हि ? विदुषां ज्ञानं पूर्वापरसम्बन्धयुक्तमन्धविश्वासरहितं कार्यकारणभावसमन्वितं शृङ्खलाबद्धं भवति । तेषामेव ज्ञानं विज्ञानपदवीं लभते, न तु प्राकृतानाम् । अथवा परिष्कृतं ज्ञानं विज्ञानम् । अस्ति हि विज्ञानस्य स्वकीया विशिष्टा परिष्कारशैली । तया यः सुपरिष्कृतो ज्ञानराशिः स विज्ञानपदेन संसूच्यते । वयमप्यग्रे एतां विज्ञानसरणिं विस्तरतो व्याख्यास्यामः । विज्ञानपदस्य समानार्थक आङ्ग्लभाषायाम् 'सायंस' इति शब्दो व्यवह्रियते ।

ननु किं मनोविज्ञानं शास्त्रं न भवति ? अत्रोच्यते—नास्ति मनोविज्ञानं शास्त्रम् । सर्वाणि शास्त्राणि विज्ञानपदवीं भजन्ते, न तु सर्वाणि विज्ञानानि शास्त्रपदेन व्यवहर्तुं शक्यन्ते । विज्ञानपदस्येदं वैशिष्ट्यमग्रे वक्ष्यामः । प्रथमतः शास्त्रशब्दस्यैव व्याख्या क्रियते । शासनाच्छास्त्रम् । मूलमाध्यमिककारिकायाष्टीकायां चन्द्रकीर्तिनोक्तम्—"तच्छासनात् त्राणगुणाच्च शास्त्रमेतद्द्वयं चान्यमतेषु नास्ति"[2] इति । एतस्मात् स्पष्टमिदं यच्छास्त्रस्य प्रयोजकद्वयम्—उचितानुचितकर्मणां विधिनिषेधनिर्देशनम्, संसाररूपदुःखपारावारान्निर्वाणपदप्राप्त्यर्थे पथप्रदर्शनञ्चेति । आचार्यकुमारिलभट्टेनापि शास्त्रशब्दस्येत्थं स्पष्टीकरणं कृतम् । तथा हि—

प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा ।
पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते ॥ [3]इति ।

तेषामयमभिप्रायः—शास्त्रस्य विनिगमकं तु कर्मपरत्वम्, न तु सिद्धार्थाऽभिधायकत्वम् । विहितकर्मसु प्रवृत्तिः, निषिद्धकर्मभ्यो निवृत्तिश्च यैर्वाक्यैरुपदिष्टा भवति, तान्येव शास्त्रपदवीमारोहन्ति, न त्वन्यानि सिद्धवस्तुबोधकानि वाक्यानि । एतस्मादेवेदमपि सिद्धं यच्छास्त्रं पौरुषेयम्,

१. द्रष्टव्या—विज्ञप्तिमात्रतासिद्धिः, वसुबन्धुकृता ।
२. द्रष्टव्या—मूलमाध्यमिककारिकाटीका १ । ३
३. द्रष्टव्यम्—श्लोकवार्त्तिकम् ।

अपौरुषेयमपि भवितुमर्हति । अस्मादर्थशैथिल्यादेव शास्त्रशब्दस्य पारिभाषिकमर्थं स्थिरीकर्तुमस्य व्याख्यानमनेन प्रकारेण कुर्वन्ति । विज्ञानवच्छास्त्रमपि तज्ज्ञानं यत् सुसम्बद्धम्, पूर्वापरसम्बन्धयुक्तम्, निरस्तसमस्तान्धविश्वासम्, वैयक्तिकपूर्वसञ्चितमिथ्यादृष्टिदोषरहितम्, कार्यकारणसम्बन्धसमन्वितं ज्ञानम् । शास्त्रीयज्ञानमपि विज्ञानसरणिमपेक्षते । शास्त्रीयविषयाध्ययनेष्वपि सङ्कलितसामग्रयाः परिष्कारोऽपि वैज्ञानिकशैल्यैव सम्पादनीयः । किन्त्वेकमेव वैशिष्ट्यं विज्ञानस्य । विज्ञानं प्रयोगात्मकं भवति । स्वनिर्धारितान् सिद्धान्तान् नियमान् वा परीक्षितुं विविधयन्त्रसाहाय्यं प्रयोगशालाञ्च विज्ञानमपेक्षते । यान्त्रिकसाधनजातं तु विज्ञानसम्बन्धिप्रयोगार्थमपरिहार्यमेव । अपरञ्च, विज्ञानं स्वकीयप्रयोगाय प्रस्तुतसामग्रयामन्वेषकेच्छानुसारं परिवर्तनं सूक्ष्मातिसूक्ष्मसंख्याकप्रतिमानाकलनार्थं सांख्यिकी[1]समाश्रयणञ्च समीहते । विज्ञानस्य प्रयोगः सार्वभौमः सार्वकालिकश्च भवति । यदनुसन्धानं कस्मिन्नपि विज्ञाने, उदाहरणतो भौतिकविज्ञाने रसायनविज्ञाने वाधुना काश्यां प्रयोगद्वारेण कर्तुं शक्यते, तदेव आङ्गलदेशे किं वा जापानदेशेऽप्येवंविधप्रयोगशालायां वर्षशतानन्तरमपि सर्वथैव सम्भाव्यम् । मनोविज्ञानमपि रसायनविज्ञानवद् भौतिकविज्ञानवद्वाऽनयैव विज्ञानपदव्या अलङ्क्रियते । अर्थशास्त्रराजशास्त्रतर्कशास्त्रादीनि तु शास्त्रपदवीमेव भजन्ते । स्मरणीयमत्र यद् विज्ञानस्याऽप्यस्मिन् विवेचनेऽर्थद्वैविध्यं सञ्जातम् । प्रथमोऽर्थस्तु विज्ञानसामान्यमेव यद् विज्ञानशब्देनाऽभिव्यज्यते, द्वितीयोऽर्थस्तु विशिष्टवस्तुतन्त्रात्मकानि विज्ञानानि द्योतयति, यथा प्राणिविज्ञानम्, आयुर्वेदविज्ञानम्, भौतिकविज्ञानमिति । विज्ञानशब्दस्य प्रथमार्थं गृहीत्वेदं वक्तुं शक्यते यत् सर्वशास्त्रं विज्ञानमेव, द्वितीयार्थञ्च स्वीकृत्येदं कथनमुररीकृतं भवति यत् सर्वं विज्ञानं शास्त्रपदं न लभते, किं वा सर्वं शास्त्रं विज्ञानं नास्ति । विज्ञानपदन्तु शास्त्रपदापेक्षया व्यापकं भवति । पारिभाषिकशब्दार्थशैथिल्यापनोदायैवाऽस्माभिरुपर्युक्तो दिङ्निर्देशः कृतः ।

सामान्यार्थसम्प्रयुक्तं विज्ञानं शास्त्रापरपर्यायं बहुशाखम् । तासां शाखानां वर्गीकरणं वर्गद्वये कर्तुं शक्यम् । प्रथमं तावत् सिद्धार्थपरम्, द्वितीयञ्च प्रतिमानात्मकम् ।[2] सिद्धार्थपरं विज्ञानं शास्त्रं वा तदेव यद्वस्तुस्वरूपावधारणे वैज्ञानिकसरणिमनुसृत्य नियमान् निश्चिनोति । वैज्ञानिकस्तु निःस्पृहो भूत्वा स्वमनोगतप्रभावाकलङ्कं विवेच्यवस्तुनः सङ्कलितसामग्रीजातस्य वा विवेचनं करोति । नहीदृशमध्ययनं प्रतिमानात्मके विज्ञाने शास्त्रे वा भवितुमर्हति । प्रतिमानात्मकं शास्त्रं त्रिविधम्—तर्कशास्त्रम्, औचित्यमीमांसा, सौन्दर्यशास्त्रञ्चेति । तर्कशास्त्रं न्यायशास्त्रापरपर्यायं सत्यत्वस्य प्रतिमानं स्थिरीकरोति, किमुताऽबाध्यत्वं सत्यत्वस्य प्रयोजकं किमुताऽनधिगताऽबाधितार्थविषयकत्वं किमुतार्थक्रियाकारित्वं वेति । अत्र नास्ति लक्ष्यं सिद्धार्थवस्तुस्वरूपान्वेषणम्, किन्तु सत्यत्वस्य किं प्रतिमानम्, येन मिते सति कस्यचिद्वस्तुनः सदसत्स्वरूपावधारणं सुकरं भवेदिति । औचित्यमीमांसाया नीतिशास्त्रापरनामधेयायाः प्रधानविषयस्तु शुभाशुभानामुचितानुचितानां पुण्यपापानां कर्मणां किं प्रतिमानं निश्चायकमिति यावत् । सौन्दर्यशास्त्रस्यापि लक्ष्यं सौन्दर्यासौन्दर्यनिकषगवेषणमेव । प्रकृतं मनोविज्ञानं तु प्रथमवर्ग एवं सन्निवेष्टुं शक्यते । नह्यस्याऽनुसन्धानविषयः प्रतिमानावधारणात्मकोऽपि तु सिद्धार्थपरः । अस्माकं मनस्तु सिद्धवस्तु । विविधानां मनसो वृत्तीनां क्रियाकलापो यथा भवति तथैव तस्य निरूपणम् । तस्य च पुरुषेतरप्रतिक्रियासु यः प्रभावः

१. तुलनार्थम्—Statistics.

२. तुलनार्थम्—Normative.

सञ्जायते, तस्यापि कार्यकारणभावविधिना सम्यग् विवेचनञ्च मनोविज्ञानविषयः। भगवत्पादश्रीमच्छङ्कराचार्येणापि शारीरकभाष्ये द्विविधं शास्त्रं सङ्केतितम्—[1] वस्तुतन्त्रं पुरुषतन्त्रं चेति। पुरुषतन्त्रं तु कर्तव्यशास्त्रम्, पुरुषाधीनात्मलाभत्वाद् भूतवस्तुस्वरूपानुभवानपेक्षत्वाच्च कर्तव्यस्य। नीतिशास्त्रे यत् कर्तव्यप्रतिमानं निश्चितं जातं तस्य पालनं कर्तुमकर्तुमन्यथाकर्तुं वा पुरुषेण शक्यम्। भाविक्रियादिक् सर्वथैव पुरुषबुद्ध्यधीना भवति। वस्तुतन्त्रे शास्त्रे वस्तुयाथात्म्यज्ञानं नहि पुरुषबुद्ध्यपेक्षम्। किं तर्हि वस्तुतन्त्रमिति भगवताऽपि स्पष्टीकृतम्—"नहि स्थाणावेकस्मिन् स्थाणुर्वा पुरुषोऽन्यो वेति तत्त्वज्ञानं भवति। तत्र पुरुषोऽन्यो वेति मिथ्याज्ञानम्, स्थाणुरेवेति तत्त्वज्ञानम् वस्तुतन्त्रत्वात्। एवं भूतवस्तुविषयाणां प्रामाण्यं वस्तुतन्त्रम्" इति। वस्तुतन्त्रे शास्त्रे विज्ञाने वा पुरुषो यथेच्छं कर्तुमकर्तुमन्यथाकर्तुं न सम्भवति। एवम्प्रकारेण मनोविज्ञानमपि वस्तुतन्त्रात्मकं विज्ञानम्। यथा हि लोके मनुष्याणां पशूनां वा व्यवहारो वृत्तं वा दृश्यते, तदनुसार्येव तस्य याथात्म्यनिरूपणं मनोविज्ञानस्य विषयो भवति। अस्माभिः पुरुषतन्त्रमिति शब्दस्थाने प्रतिमानात्मकमिति शब्दोऽङ्गीकृतः, तत्तु स्थान एव पारिभाषिकशब्दावलिपरिष्कारदृष्ट्या। भगवत्पादैस्तु पुरुषतन्त्रमितिशब्दः कर्मकाण्डस्य विगर्हणायै प्रयुक्तः, अस्माभिश्च प्रतिमानात्मकमितिशब्दः शास्त्रोत्कर्षप्रदर्शनाय।

सङ्कीर्णेऽर्थे सम्प्राप्ते विज्ञानानामपरेणाऽपि प्रकारेण वर्गीकरणं कर्तुं शक्यते। तद्धि प्राकृतं चैतन्यात्मकञ्चेति। भौतिकविज्ञानं रसायनविज्ञानमित्यादीनि स्वविषयं प्रकृतिविकारजातं महाभूतात्मकं जडपदार्थकलापमेव मन्यन्ते। नाऽत्रास्माकमयमाग्रहो यत् प्रकृतेरिदं स्वरूपं महाभूतानां मौलिकभूततत्त्वानां किं वा स्वरूपं कियती संख्या वा। अस्माकं त्वयमेवाभिप्रायो यद्धि प्राकृतविज्ञानानां चैतन्यव्यतिरिक्तपदार्थविवेचनं लक्ष्यं भवति। तैस्तु चितिशक्तेः क्रिया वृत्तयो वा, तेषाञ्च लोकानां पारस्परिकव्यवहारे प्रतिक्रिया न विवेच्यन्ते। चैतन्यस्वरूपविवेचनं तस्य च चैतन्यस्य व्यवहारानुगतप्रतिक्रियाणामध्ययनं मनोविज्ञानस्य प्रधानो विवेच्यविषयः। इदमेव ह्यर्वाचीनमनोविज्ञानस्येतरमनोविज्ञानेभ्यो वैशिष्ट्यम्। चैतन्यं नास्ति प्रकृतेर्विकारः, नाऽपि महाभूतपरिणामः। तद्गतवैलक्षण्यं मनोविज्ञानस्यापि वैशिष्ट्यं सुष्ठुतरमावहति।

वयमिदानीं मनोविज्ञानाभिमतं मनसः स्वरूपं विचारयामः। उक्तमेवास्माभिर्यत्प्राचीनैः महर्षिप्रवरैश्चैतन्यतत्त्वस्य सुमहती गवेषणा वेदेषूपनिषत्सु दर्शनेषु च गुम्फिता आसीत्। सा च अध्यात्मविद्याब्रह्मविद्यावेदान्ताद्यभिधानैर्व्यवहृता दृश्यते। विषये किञ्चित् सादृश्ये सत्यपि नास्ति मनोविज्ञानमध्यात्मविद्याङ्गभूतं विज्ञानम्। तस्य कस्मिन्नपि विज्ञाने विलयनं मनोवैज्ञानिकाः सोढुं न शक्नुवन्ति। अध्यात्मविद्या बाह्यलौकिकवृत्तनिरपेक्षा भवति। तदध्ययनस्य प्रणाल्यपि रहस्यगर्भिता प्रयोगशालीयप्रयोगनिबन्धनव्यावृत्ता च भवति। बाढं यद्धि अध्यात्मविद्यायाः विवेच्यं चैतन्यतत्त्वमेव। परन्तु मनोवृत्तीनां सुविस्तृतं लोकव्यवहारानुगतमध्ययनं तस्या न लक्ष्यम्, यादृशमर्वाचीनस्य मनोविज्ञानस्य दृश्यते। ब्रह्मविद्यायाश्चैतन्यतत्त्वं तु निरस्तसमस्तविशेषं त्रिगुणातीतमतीन्द्रियम्। लक्ष्यमपि मोक्षस्वरूपाऽपरोक्षानुभूतिः। श्रूयते हि तलवकारोपनिषदि[2]—

१. शारीरकभाष्यम् १।२
२. केनोपनिषद् १।५

यन्मनसा न मनुते येनाहुर्मनो मतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥

अपि च कठोपनिषदि[1] —

यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह ।
बुद्धिश्च न विचेष्टते तामाहुः परमां गतिम् ॥

अर्वाचीनानां मनोवैज्ञानिकानान्तु लक्ष्यमैहिकं लघीय एव । तेष्वद्यावधि कापि पारलौकिकी महत्त्वाकाङ्क्षा न लक्षिता । यदपि लक्ष्यं तैर्निर्धारितम्, तत्सर्वं रहस्यनिरस्तं प्रायः प्रयोगगम्यं सार्वदैशिकं सार्वकालिकं सर्वेषामेव सन्तोषप्रदम् । यद्यपि विज्ञानं स्वार्थाकलङ्कितमेव ज्ञानं भवति, तादृशञ्च मनोविज्ञानमप्यस्त्येतदनवद्यमेव, तथापि मनोविज्ञानगवेषणाभिः सुमहती लोकसेवा ऐहिकजीवनस्य विविधेषु क्षेत्रेष्वपि कृता । मनोवैज्ञानिका ऐहिकं लौकिकजीवनं सांवृतिकं न मन्यन्ते । तैरभिमतं तु सर्वलोकवृतं कल्पनाऽपोढं यादृशं जगति समुपलभ्यते, तत्तु पूर्णतः सत्यमेव । कल्पनाऽपि निजस्वरूपे मनोवृत्तिरूपे सर्वथा सत्यैव । महती च लोकोपकारिणी हि सा । अनेन विवेचनेन मनोवैज्ञानिकानां तुरीयात्मतत्त्वं प्रत्युपेक्षाभावः स्पष्टीकृतः । इदमपि निदर्शितं यन्मनोविज्ञानं स्वतन्त्रं विज्ञानम्, तस्याध्यात्मविद्यायामन्तर्भावमर्वाचीना मनोवैज्ञानिका नोत्सहन्ते । चैतन्यतत्त्वमपि नास्त्यात्मा तेषां मते, अपि तु मन एव । किं तावन्मनसः स्वरूपं यदधिकृतं विज्ञानं मनोविज्ञानमुच्यते ? भारतीयदार्शनिकाः प्रायो मनः प्राकृतं जडमचेतनं दृश्यान्तर्गतमेवामन्यन्त । ईश्वरकृष्णेन सांख्यकारिकायामप्येतदेव स्पष्टीकृतम् । तथाहि—

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥

मूलप्रकृतिर्जडा सावयवा, कस्यापि विकारो नास्ति । प्रकृतेस्तु विकारो महद्यद् बुद्धिरिति शब्देनापि व्यपदिश्यते । महतो विकारोऽहङ्कारः । अहङ्कारस्य परिणतावस्था षोडशविधा भवति—पञ्चतन्मात्राणि, पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, मनश्च । स्मरणीयमत्र यत् सांख्याचार्याभिमतसत्कार्यवादानुसारं प्रकृतेः सर्वे व्यक्तपर्यन्ता विकाराः स्वभावतो जडा एव । चैतन्यतत्त्वन्तु पुरुष एव । तस्य कोऽपि विकारो न भवति । न च स कस्यापि विकारोऽस्ति । मनोऽपि सांख्यैरिन्द्रियेतरवद् इन्द्रियमेवाभिमतम्[2] । तदनुसारं यत् किञ्चिन्मनसः क्रियासु चैतन्यं दृश्यते तत्सर्वं चिदुपरागादेव । विशेषत उल्लेखनीयमत्रेदमपि यद्धि सांख्यैर्बुद्ध्यहङ्कारमनांसि त्रीणि तत्त्वान्यभिमतानि, न त्वेकमेव तत्त्वं यादृशमर्वाचीना मनोवैज्ञानिका मन्यन्ते ।

न्यायदर्शनेऽपि मनो जडमेव । तच्च नित्यं निरवयवं परमाणुरूपमनन्तञ्च, स्वसंयोगाच्चात्मनि चैतन्यं जनयति । यतो हि नैयायिकानामात्मापि जड एवेत्यभिमतम् । चैतन्यं त्वागन्तुकम् । चैतन्यं ज्ञानं वा नास्त्यात्मस्वरूपं यादृशं ब्रह्मवादिनो मन्यन्ते । नापि मनोधर्मः । स्पष्टीकृतमिदं भगवता गौतमेन न्यायसूत्रे[3]—इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गमिति । ज्ञानं त्वत्रात्मनो लिङ्गमित्युट्टङ्कितं न तु धर्म इति । मनःस्वरूपविवेचनेऽपि महर्षिणोक्तम्—

१. कठोपनिषद् १ । २ । १०
२. सांख्यकारिका १३
३. न्यायसूत्रम् १ । १ । २; १४

युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति[१]। अत्रापि ज्ञानं न मनोधर्मत्वेनोक्तमपि तु लिङ्गमात्रत्वेनैव[२]। वस्तुतस्तु नैयायिका आत्मेन्द्रियार्थमनःसन्निकर्षजन्यत्वमेव चैतन्यं मन्यन्ते। यथोक्तं जयन्तभट्टेनापि न्यायमञ्जर्याम्—

सचेतनश्चिता योगात्तद् योगेन विना जडः।
नार्थावभासादन्यद्धि चैतन्यं नाम मन्महे॥

युगपज्ज्ञानानुत्पत्तिं लिङ्गं तु वयमपि ध्यानप्रकरणे विवेचयामः। अस्माभिर्न्यायाभिमत-ज्ञानमीमांसा विस्तरेण अद्वैतज्ञानमीमांसायां विवेचितेत्यलमतिविस्तरेण।

वेदान्तिभिरपि मनो जडं सावयवमेव च मन्यते। मनसः पर्यायवाच्यन्तःकरणं तैर्वर्णितम्। मनस्तु अन्तःकरणस्य सङ्कल्पात्मिका वृत्तिः। एकमेवान्तःकरणं बुद्धिमनश्चित्ताहङ्कारादिभिर्नामभिस्तत्तद्वृत्त्यनुसारमेव व्यवह्रियते। तदुक्तं धर्मराजाध्वरीन्द्रेण वेदान्तपरिभाषायाम्[३]—"वृत्तिभेदेन एकमप्यन्तःकरणं मन इति बुद्धिरिति अहङ्कार इति चित्तमिति चाख्यायते। तदुक्तम्—

मनो बुद्धिरहङ्कारश्चित्तं करणमान्तरम्।
संशयो निश्चयो गर्वः स्मरणं विषया इमे॥" इति।

अद्वैतब्रह्मसिद्धौ सदानन्दयतिनाऽपि मनसो सावयवत्वं भौतिकत्वं जडत्वं च प्रदर्शितम्। तथाहि—तस्मादपञ्चीकृतवक्ष्यमाणपञ्चमहाभूतारम्य सत्त्वप्रधानं सङ्कोचविकाशशालि स्वच्छं द्रव्यं चक्षुर्वन्मूर्तद्रव्याभिघातयोग्यं देहपरिमाणपरिमितं मनोऽभ्युपगन्तव्यमिति।[४] आचार्यप्रवरमधुसूदनसरस्वतीमहोदयेनापि सिद्धान्ततत्त्वबिन्दौ मनसो भौतिकत्वमेवमुपन्यस्तम्—"तानि च सूक्ष्माण्यपञ्चीकृतानि पञ्चमहाभूतान्यमूर्ताख्यानि कारणैक्यात् सत्त्वरजस्तमोगुणात्मकानि, सत्त्वांशप्राधान्येन ज्ञान-क्रिया-शक्त्यात्मकमेकं स्वच्छद्रव्यं चित्ररूपमिव मिलित्वा जनयन्ति। तस्य च ज्ञानशक्तिप्रधानोंऽशोऽन्तःकरणम्, तच्च बुद्धिर्मन इति चोच्यते। क्रियाशक्तिप्रधानोंऽशः प्राणः। स च पञ्चधा—प्राणोऽपानो व्यान उदानः समान, इति[५]।

अस्माकं मुख्यं प्रष्टव्यमत्रास्ति—किं तर्हि मनः वेदान्तिभिश्चैतन्यशक्तिसम्पन्नमभिमतम्? आहोस्वित् चैतन्यसन्निधानादुत्पन्नचिच्छायापत्त्या तस्मिंश्चैतन्यसम्भवो भवति? प्रथमो विकल्पस्तु तैरपास्तः। द्वितीये विकल्पे चेष्टापत्तिः। तदुक्तं विवरणे प्रकाशात्मयतिना—"एवं विषयासङ्गेऽपि जीवः स्वभावादन्तःकरणेन संसृज्यते"[६] इति। प्राभाकरा मनसो विभुत्वम्, अद्वैतब्रह्मवादिनो मध्यमपरिमाणत्वम्, नैयायिकाश्चाणुत्वमङ्गीकुर्वन्ति। अलमतिविस्तरेणेति दिक्।

---

१. न्यायसूत्रम् १।१।१६

२. भाष्यकारेणैतान्यन्यानि लिङ्गान्यपि संग्रथितानि—"स्मृत्यनुमानागमसंशयप्रतिभास्वप्नज्ञानोहाः सुखादिप्रत्यक्षमिच्छादयश्चेति।" वात्स्यायनभाष्यम् १।१।१६

३. वेदान्तपरिभाषा, अड्यारसंस्करणम्, पृ० २६

४. अद्वैतब्रह्मसिद्धिः, कलिकाताविश्वविद्यालयीयसंस्करणम्, पृ० १२५

५. सिद्धान्ततत्त्वबिन्दुः, भारतीयतत्त्वज्ञानमन्दिरप्रकाशितं संस्करणम्, पृ० २७–२८,

६. पञ्चपादिकाविवरणम्

वैनाशिका नैरात्म्यवादिनो बौद्धा मनोविज्ञानपर्यायं क्षणिकं चैतन्ययुक्तमिति, स्वीकुर्वन्ति बुद्धेन मनसो महत्त्वमित्थं प्रदर्शितम्—

मनो पुब्बङ्गमा धम्मा मनोसेट्ठा मनोमया ।
मनसा च पदुट्ठेन भासति वा करोति वा ॥
ततो नं दुःखमन्वेति चक्कं व वहतो पदं ।[1]

अस्याऽयमभिप्रायः—मनस्तु सर्वासां प्रवृत्तीनां पूर्वगामि, तदेव तासु श्रेष्ठमस्ति । अथवा सर्वे धर्माः पदार्था मनोमया एव । यदा चायं पुरुषः प्रदुष्टेन रागद्वेषाभिभूतेन मनसा किञ्चित् कर्म करोति, अथवा ब्रवीति; तदा स चक्रनेमिक्रमेण दुःखमवश्यमेव भोक्ष्यत इति । अत्रैव विज्ञानवादस्याऽपि बीजं तथागतेन निक्षिप्तम् । क्षणिकं मनः स्मृतिप्रत्ययसम्बन्धदृष्ट्याऽकिञ्चित्करमिति सर्वमवदातमेव ।

अस्माभिर्वाजसनेयिसंहितायां मनःस्वरूपं विशदतः सम्यग् वर्णितं लक्ष्यते । श्रूयते हि[2]—

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति ।
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु ॥
येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः ।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥
यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ।
यस्मान्न ऋते किञ्चन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु ॥
येनेदं भूतं भुवनं भविष्यत् परिगृहीतममृतेन सर्वम् ।
येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्तु ॥
यस्मिन्नृचः साम यजूंषि यस्मिन् प्रतिष्ठिता रथनाभाविवाराः ।
यस्मिंश्चित्तं सर्वमोतं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥
सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव ।
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु ॥

उपर्युक्तेषु मन्त्रेषु मनसः क्रियाणामुल्लेखः प्रायशोऽर्वाचीनमनोवैज्ञानिकाभिमत एव विद्यते । मनस्त्वत्र चैतन्यात्मकं वर्णितम् । ज्योतिषां प्रकाशकानां श्रोत्रादीनामेकमेव ज्योतिः प्रकाशकमिति महीधरः । जाग्रद्दशायां मनो दूरं गच्छति । दूरस्थान् विषयान् पश्यति चिन्तयति वा । यच्च "अतीतानागतवर्तमानव्यवहितविप्रकृष्टग्रहीतृ" इत्युव्वटः । यथागतं तथैव स्वापकाले पुनरागच्छति विश्राम्यतीत्यर्थः । मनश्च प्रज्ञानं विशेषेण ज्ञानजनकम्, चेतः चेतयति सम्यग् ज्ञापयतीति महीधरः, सामान्यप्रतिपत्तिश्चेत इत्युव्वटः, धृतिश्च धैर्यरूपञ्चेति । अर्थान्मनः सामान्यविशेषेण ज्ञानजनकम् । तच्च मनः प्रजासु प्राणिषु अन्तर्वर्तमानं सत् ज्योतिः प्रकाशकं सर्वेन्द्रियाणामस्ति । तच्च मनोऽमृतं भूतभविष्यद्वर्तमानज्ञानानां मणिगणानां सूत्रमिवानुसन्धातृ गृहीतृ चास्ति । तच्च मनो वेदानां ज्ञातृ स्मरणकर्तृ च, यस्मिँश्च ते रथनाभौ अरा इव प्रतिष्ठिताः । यथा कुशलः सारथिरश्वान् अत्यर्थं स्वेच्छानुसारं नयति, तथैव मनोऽपि मनुष्यान् भृशं नयति प्रेरयतीत्यर्थः । तच्च मनो

---

१. धम्मपद, १

२. यजुर्वेदः, अध्याय ३४ मं० १–६

न केवलं मनुष्यान् प्रेरयत्येवापि तु तान् नियमयत्यपि, यथा सारथिरभीशुभिः प्रग्रहैर्वाजिनो नियमनं करोति । तच्च मनोऽजविष्ठमतिशयेन गन्तृ अजिरं जरारहितं हृत्प्रतिष्ठं तत्रोपलब्धेरित्युव्वटः[1] ।

नास्त्यत्र मन आत्मार्थकः, यथा जर्मनदेशीयः 'शेफ्टेलोविट्ज़्' नामा विद्वान् मन्यते[2]। मनस्तु गीर्वाणवाण्यां स्वार्थ एव प्रसिद्धम्, न त्वात्मा। स्पष्टतोऽत्र मनस्तदेव यदधिकृत्य मनोविज्ञानं प्रवर्तते। द्वितीयमन्त्रस्य विदथशब्दव्याख्यानावसरे प्राध्यापकज्वालाप्रसादेनास्यार्थो युद्धमपि गृहीतम्[3] । तत्तु नोचितं प्रतिभाति । महर्षियास्कप्रणीतनिघण्टौ षट्चत्वारिंशत् संग्रामपर्यायिव्यवहृतेषु शब्देषु विदथेति शब्दो नोपलभ्यते । अस्यार्थस्तु स्पष्टतो यज्ञ एव । उव्वटेनापि यज्ञविधिविधानेषु इत्येवमुक्तम् । वेत्तेरौणादिकोऽथ प्रत्ययः, प्रत्ययोदात्तत्वेन मध्योदात्तं पदम्, "प्रत्ययः परश्च, आद्युदात्तश्च" (पाणिनि ५।२। २१) इति पाणिन्युक्तेर्यज्ञसंबन्धिनां हविरादिपदार्थानां ज्ञानेषु सत्स्विति महीधरः । तेनैव महानुभावेन चेतःशब्दस्य तृतीयमन्त्रवर्णितस्यापि कदर्थः स्वीकृतः । चेतसोऽर्थो नास्ति संवेदनम्[4] । अपि तु महीधरोव्वटाऽभिमता सामान्यप्रतिपत्तिरेव । एवमस्माभिर्व्याख्यातेन श्रुत्यर्थो यथाभूतः संरक्षितो भवति । मनसोऽविकलस्वरूपप्रदर्शनाय तैरयं श्रुतेरनर्थो विद्वद्भिरसम्मतः स्वीकृतः । तत्तु नेष्टम् । यदेवात्र मनसो निरूपणं विद्यते तदेव पर्याप्तमस्ति ।

भारतीयदर्शनपारावारमहोदधौ तितीर्षुभिरस्माभिर्मनःस्वरूपमधिकृत्य तटादेव कांश्चन वालुकाकणान् संगृह्याऽत्र दिङ्मात्रमेव प्रदर्शितम् । विशदविवेचनाया नास्त्यत्रावकाशः। अपि च तद्विवेचनमस्मान् मनोविज्ञानादाकृष्य दर्शनमूलायां ज्ञानमीमांसायां प्रवेष्टुमर्हति। अतो वयं विरमामः ।

अतः परमस्माभिः पाश्चात्त्यदर्शनानुसारं मनसः स्वरूपविकासः प्रदर्श्यते । उक्तमेवास्माभिर्यन्महामुनिः सुकरातः स्वशिष्यवर्गमात्मविद्याजिज्ञासार्थे प्रेरितवान्। तस्य विश्वविश्रुतो दार्शनिकप्रवरः 'प्लैटो'नामा अध्यात्मवादी महान् शिष्य आसीत्। किन्तु आङ्गलभाषीयमनोविज्ञानपर्यायिशब्दस्य 'साइकोलोजी' इत्यस्य प्रथमप्रयोगश्रेयस्तु प्लैटोमहोदयानां 'अरिस्टाटल' नाम्ने शिष्यायैव । तेनाऽप्यस्य प्रयोगोऽध्यात्मविद्यार्थ एव कृतः। वैक्रमसंवत्सरस्य सप्तदशशताब्याः प्रागित्थमेव आत्मार्थे मनोविज्ञानं प्रयुक्तमासीत्। सप्तदशशताब्यां (वैक्रम० १६५३–१७०७) फ्रांसदेशीयडेकार्टदार्शनिकेन मनसश्चेतनत्वं जडभूतपदार्थव्यतिरिक्तत्वञ्च प्रतिपादितम् । तेनैव मनःशरीरयोः[5] सहस्रारे इतरेतरप्रतिक्रियाऽपि प्रतिपादितासीत् । यदा प्राध्यापकवण्टो लीपज़िगविश्वविद्यालये १९३६ वैक्रमाब्दे सर्वप्रथमां प्रयोगशालां स्थापितवान्, तदैवार्वाचीनं मनोविज्ञानं दर्शनकक्षं विहाय स्वतन्त्रतां प्राप्तवान्। प्राध्यापकवण्टटिच्नरप्रभृतिभिर्मनोविज्ञानप्रतिपाद्यं चैतन्यस्य सङ्कल्पसंवेदनकल्पनारूपस्य निर्माणस्य मानसप्रत्यक्षद्वारमध्ययनमेव

१. द्रष्टव्या, शुक्लयजुःसंहिता उव्वटभाष्यसंवलिता, निर्णयसागरप्रेससंस्करणम्, पृ० ५६०–५६२।

२. द्रष्टव्या शिवसङ्कल्पोपनिषद् Z. D. M. G. १९७८ वै० पृ० २०१

३. द्रष्टव्यम्—Indian Epistemology, पृ० ३०

४. तुलनार्थम्—'Fceling' इति आङ्गलशब्दोः द्रष्टव्यः, पृ० ३० (पूर्ववत्)

५. तुलनार्थम्—Pineal gland

निश्चितम्। तेषां विचारधारा चैतन्यनिर्मितिवाद[1] इत्युच्यते। तदनन्तरं विलियमजेम्समहोदयेन अमेरिकनदार्शनिकप्रवरेणेदं प्रतिपादितं यद्धि मनोविज्ञानं विज्ञानसन्तानस्य वैज्ञानिकमनुशीलनमस्ति। वैक्रमसंवत्सरे १९७१ वाटसननामा मनोवैज्ञानिकः अमेरिकादेशे प्रतिपादितवान् यद्धि मनोविज्ञानस्य विवेच्यविषयस्तु लोकव्यवहारस्य वैज्ञानिकमध्ययनम्, न तु चैतन्यसन्तानस्यानुशीलनम्, यथा जेम्सो मनोविज्ञानस्य प्रतिपाद्यं मन्यते। एवमेव तैर्मानसक्रियाणां मानसप्रत्यक्षमपि भृशमालोचितम्। तन्मते वाह्यव्यवहारस्याध्ययनमेव मनोविज्ञानस्य विज्ञानेषु पदरक्षार्थमलम्, मानसप्रत्यक्षावलम्बनन्तु तिरस्कारायैव।

अस्तु तावन्मनोविज्ञानस्य परिभाषा। प्राध्यापकवुडवर्थमहोदयेन मनोविज्ञानस्य परिभाषा एवं स्वीकृता—मनोविज्ञानं व्यक्तेः क्रियाणामध्ययनमिति[2]। किन्त्वियं परिभाषा अतिव्याप्तिदोषसंकुला वर्तते। यतो हि व्यक्तेः क्रिया न केवलं मनोविज्ञानस्य विषयो भवितुमर्हन्ति नीतिशास्त्रसमाजशास्त्रशरीरविज्ञानादयोऽपि व्यक्तेः क्रियाणामेवाध्ययनं कुर्वन्ति। यावन्नाध्ययनस्य दिङ्निर्देशो भवेत्तावन्न कस्याऽपि विज्ञानस्य वैशिष्ट्यं प्रकाशयेत। नीतिशास्त्रन्तु व्यक्तेः क्रियाणामौचित्यानौचित्यदृष्ट्यानुशीलनमुपक्रमते। समाजशास्त्रं व्यक्तेः सामाजिकसङ्घटनसामूहिककल्याणादिभावनयाऽध्ययनं कुरुते। एवमेव शरीरविज्ञानमपि शरीरस्य विभिन्नश्वासरक्तसञ्चालनप्रजननादिसंस्थानानामध्ययनं करोति, येन तेषां क्रियाप्रकारः सुगमो भवेत्। सर्वं एव वैज्ञानिकानुसन्धानप्रणालीमनुसरन्ति। लक्ष्यभेदेन तेषामुत्तरोत्तरवैशिष्ट्यं सुष्ठुतरं बुद्धिपथमारोहति। व्यवहारवादिनः कथञ्चिदपि मनोविज्ञानक्षेत्रान्मनस आन्तरक्रियाः, तासां मानसप्रत्यक्षेणाध्ययनं नैव परिहातुं शक्यम्। अतो वयं मनोविज्ञानमित्थं व्याख्यास्यामो यद्विज्ञानं मनस आन्तरक्रियाणां सर्वास्वेवावस्थासु घटितानां वाह्यव्यवहारेण साकं कार्यकारणभावापेक्षया सम्बन्धं स्थापयति निश्चिनोति वा, तदेव मनोविज्ञानमित्युच्यते। मनस आन्तरक्रियाः संवेदनम्, प्रत्यक्षम्, कल्पना, मूलप्रवृत्तिः, संवेगादयः सन्ति। मनसोऽवस्था अपि बह्व्यः सन्ति, यथा जाग्रत्स्वप्नसुषुप्त्यादयस्तु सर्वविदिता एव। तदतिरिक्तमपि फ्रायडप्रभृतयः सामान्यमनोविज्ञानविशारदाः संस्कारावस्थां[3] वासनावस्थां[4] चाऽवस्थाद्वयं स्वीकुर्वन्ति। यद्यपि पाश्चात्त्यमनोवैज्ञानिकैः पातञ्जलब्रह्मवादिभिरभिमता तुरीयाख्यावस्था जिज्ञास्यसूचौ न परिगणिता, तथाऽपि साऽपि मनसोऽवस्थेतरसदृशी एव। मनोविज्ञानस्य वर्तमानक्षेत्रेऽक्षुण्णे सत्यपि तस्य विवेचनं वैज्ञानिकपराकाष्ठां न प्राप्स्यति, यावन्न परमापरोक्षानुभूतिरूपां धर्ममेघसमाधिं तुरीयावस्थागवेषणामपि तस्य न शिरोऽलङ्कुर्यात्। अत एव मनसः सर्वास्वेवावस्थासु मनोविक्रियाणां सम्यगध्ययनं मनोविज्ञानस्य प्रतिपाद्यमस्ति। न तेषां मानसप्रत्यक्षेण[5] अनुशीलनमेव मनोविज्ञानस्याध्ययनार्थमलम्। दृश्यते हि मनोगतानां

---

१. तुलनार्थम्—Structuralism.

२. द्रष्टव्यम्—साइकोलॉजी पृ० ३—"Psychology can be defined as the science of the activities of the individual."

३. तुलनार्थम्—Sub-conscious.

४. तुलनार्थम्—Unconscious.

५. तुलनार्थम्—introspection.

भावानां क्रोधकामादीनामस्माकं बाह्यक्रियासु बहुलः प्रभावः। अन्येषां बाह्यव्यवहारस्याप्यसमदाकृतिमनोगतविक्रियास्वपि सुमहान् प्रभावो दरीदृश्यते। अत एव मनोविज्ञानं व्यक्तेर्मनोगतसंवेदनसंवेगप्रवृत्त्यादीनां विकाराणां तस्य स्वकीयबाह्यव्यवहारेण सह कार्यकारणसम्बन्धं निश्चिनोति, इतरेषां मनुष्याणां बाह्यव्यवहारेषु तेषां च मुखमुद्रादिषु तस्य प्रभावमपि कार्यकारणसम्बन्धदृष्ट्यैवावधारयति। व्यक्तिः सामाजिकवातावरणेन प्रभाविता भवति, स्वकीयं सामाजिकं वातावरणं प्रभावयत्यपि च। तस्य प्रभावस्य कीदृशः प्रकारः, अयमपि यथाशक्यं सामान्यनियमान् स्थापयित्वैव मनोविज्ञानं निश्चिनोति। नेदं यत्सर्वासामेवावस्थानां प्रभावोऽञ्जसैवाऽभिव्यक्तिमाप्नोति। उदाहरणतो वासनावस्थायाः संस्कारावस्थाया वा प्रभावो नाऽचिरादेव बाह्यव्यवहारेषु प्राकट्यं लभते। अत एव बाह्यव्यवहारस्यापि तात्कालिकमेवाऽध्ययनं न पर्याप्तमपि तु यथावश्यकमतीतजीवनचर्यासामाजिकप्रभावादीनामनुसन्धानमप्यपरिहार्यं भवति, विशेषतो मनसोऽसामान्यास्ववस्थासु। सुतरां मनोविज्ञानस्य साङ्गोपाङ्गमध्ययनं मनसः सर्वास्वेवावस्थासु मनस आन्तरबाह्यसमग्रक्रियाणां तासां चेतरपुरुषेषु प्रतिक्रियापुरस्सरमेव चिरमध्ययनमपेक्षते। अध्ययनसाधनमपि परिस्थितिवशाद् विविधं भवति—मानसं प्रत्यक्षम्, बाह्यनिरीक्षणम्, अतीतवृत्ताऽध्ययनम्, मनोविश्लेषणं प्रयोगो वा। एतत्सर्वमध्ययनं वस्तुतन्त्रात्मकमेव भवति। यदा हि मनोवैज्ञानिकेन वैज्ञानिकप्रणालीमनुसरता गवेषणीयमनोगतभावाः प्रतिक्रियाः परिस्थितिर्वा कर्तुमकर्तुमन्यथाकर्तुं वा न शक्यन्ते, तेषां निरूपणं याथात्म्यमेव कर्तव्यं भवति। तत्र स्वमनोगतभावपूर्वसञ्चितसंस्काराऽन्धविश्वासादयः सर्वथैव निरसनीयाः। यतो हि मनोविज्ञानमन्यभौतिकविज्ञानैः सह विज्ञानपदव्यां राजतेतराम्।

२. मनोविज्ञानस्याऽध्ययनविधिः[1]

अस्माभिर्मनोविज्ञानं संक्षेपतो व्याख्यातम्। परिभाषायाः सम्यगवबोधार्थं मनोविज्ञानस्याऽध्ययनविधीनां क्षेत्रगतविविधशाखानां सम्प्रदायानां चानुशीलनमप्यनिवार्यम्, अतो वयमिदानीमेतानेव विषयान् क्रमशो विचारयिष्यामः। प्रथमतो मनोविज्ञानाध्ययनविधिनिरूपणमावश्यकं प्रतिभाति, यतो ह्यस्य विवेचनेन मनोविज्ञानस्य परिभाषा विशेषतः स्फुटतरा भविष्यति। मनोविज्ञानाध्ययनार्थं के विषयः सन्ति ? कानि च साधनानि ? इति च प्रश्नस्य समाधानार्थमुच्यते—मनोविज्ञानं प्रमाणरूपेण मुख्यतः प्रत्यक्षमेवावलम्बते मानसप्रत्यक्षं बाह्यप्रत्यक्षं चेति। विशेषाऽध्ययनार्थमनुमानात्मकप्रयोगतुलनात्मकाध्ययनमनोविश्लेषणादिभिरपि प्रचुरं साहाय्यं प्राप्नोति। अस्माभिरत्र मनोविज्ञानविधिवैशिष्ट्यमुद्दिश्य एतेषां साधनानां विशदं विवेचनमुपक्रम्यते।

(अ) मानसप्रत्यक्षम्—मानसक्रिया मनोवृत्तयोऽप्युच्यन्ते। तासामध्ययनं द्वेधा कर्तुं शक्यते। प्रथमतो मानसप्रत्यक्षेण मनोऽन्तर्गतकामक्रोधमूलप्रवृत्तीच्छाद्वेषादिवृत्तीनामध्ययनं क्रियते। द्वितीयं तु बाह्यनिरीक्षणम्, येनान्यपुरुषान्तर्गतभावप्रतिक्रिया मुखादिमुद्रादर्शनेन ज्ञायते। आन्तरभावा एव मनोवृत्तिपदेनाऽभिधीयन्ते। बाह्यप्रतिक्रियाः किं वा शरीरविक्रिया व्यवहार इति पदेनोच्यन्ते। मनोगतभावानां सर्वोपरि प्रामाणिकं ज्ञानं मानसप्रत्यक्षेणैवाऽवाप्तुं शक्यते। मानसप्रत्यक्षं च प्राचीनार्वाचीनैः प्राच्यप्रतीच्यैः सर्वैरेव दार्शनिकैर्मनोविज्ञानविशारदैर्मनोविज्ञाना-

---

१. तुलनार्थम्—Methods of the study of psychology.

वगमार्थमवलम्बितम् । किन्तु मानसप्रत्यक्षं बुद्ध्युत्कर्षमपेक्षते । विवेकिभिरेव विद्वद्भिरिदमाश्रयितुं शक्यम् । सामान्यतो जनानां स्वगतमनोविकाराणामारोहावरोहाऽध्ययने रुचिर्न लक्ष्यते । उक्तं हि यमेन नचिकेतसं प्रति—"पराञ्चि खानि व्यतृणत् स्वयम्भूस्तस्मात् पराङ् पश्यति नान्तरात्मन्"[1] इति । धीरेण सदसद्विवेकिना आन्तरविक्रियाणामध्ययनं कर्तुं शक्यम् । अपरञ्च सर्वे संयतेन्द्रियेणैव मानसं प्रत्यक्षं निरीक्षणं भवितुमर्हति । नितरामीक्षणं निरीक्षणमिति ।

ताटस्थ्येन क्रियमाणं मनोवृत्तीनामध्ययनं निरीक्षणरूपतां प्रपद्यते । सामान्यप्रत्यक्षे तु साधारणो जनो मनःसंवेगे कामक्रोधादौ निमग्नो भवति । संवेगप्रवृत्त्यादिपूराध्ययनं संवेगतो मनाक् पृथग्भावं धैर्यमात्मनियन्त्रणं चापेक्षते । अपि च, निरीक्षणं परितो बहुपार्श्वतो वस्तुनोऽध्ययनं भवति । मनोविज्ञाने विज्ञानेतरवन्निरीक्षणमेवावलम्बनीयं भवति ।

व्यवहारवादिनो वाट्सनप्रभृतयो मनोवैज्ञानिका मानसप्रत्यक्षं मनोविज्ञानसाधनं समीचीनं न मन्यन्ते । तन्मते मानसप्रत्यक्षमेकवृत्तेरपि कामादेः प्रतिपुरुषं भिन्नमेव भवति । अतो मानसं प्रत्यक्षमवलम्ब्य सार्वदेशिकः सार्वकालिकः प्रयोगोऽपि कर्तुं न शक्यते । मानसं प्रत्यक्षं बालैरपरिपक्वबुद्धिभिर्नरैरपि कर्तुं न शक्यते । तदवलम्ब्य अत एव सामान्यनियमावधारणमप्यसम्भवमेव । अपरञ्च क्रोधादिसंवेगे विगाहमानः प्रमाता यदा तटस्थीभूय संवेगाध्ययनं कर्तुमुत्सहते, तदा क्रोधादिसंवेगोत्कर्षोऽपि विलीयते, ह्रासं वा प्राप्नोति । न केवलमेतावतैव मानसप्रत्यक्षस्यासमीचीनता पारयितुं शक्यते । यदा प्रमाता स्वगतकामक्रोधादिनिरूपणमुपक्रमते, न तत्सम्यग् भवति । यतो हि स स्वप्रतिष्ठानैतिकमर्यादादिविचारशतैः प्रभावितो भवति । तेन प्रदत्तं विवरणं प्रायशश्छलेनाभ्युपेतं पुरुषेतरप्रवञ्चनायैव भवति, आत्मोत्कर्षाभिव्यञ्जनाय च । अतो न मानसं प्रत्यक्षं मनोविज्ञानस्य समीचीनं साधनं विधिर्वा । अपि तु व्यवहार एव मनोविज्ञानस्य विश्वसनीयः पन्थाः । व्यवहारस्य निरीक्षणं प्रयोगश्चापि सुकरं भवति । अत एव सर्वैर्मनोविज्ञानविशारदैर्बाह्यव्यवहाराध्ययनमेवाश्रयणीयमिति व्यवहारवादिनां मतम् ।

अत्रोच्यते—बाढं व्यवहारस्याध्ययनं पुरुषशरीरगतमुखादिविक्रियाणां पुरुषेतरैः सह व्यवहारस्य चाध्ययनं मनोविज्ञानस्याऽध्ययनार्थे परमावश्यकम् । अस्माभिरपि पूर्वमेव मनोविज्ञानपरिभाषाव्याख्यानावसरे एतदङ्गीकृतम् । किन्त्वनेन मानसप्रत्यक्षस्य प्रभाव आवश्यकता वा निवारयितुं न शक्यते । ननु बाह्यव्यवहारस्याऽध्ययनार्थं किं प्रतिमानम् ? यद्यस्माकं मानसप्रत्यक्षसंवलितं स्वमनोगतवृत्तीनामेवाध्ययनं न भवेत्, तर्हि इतरेषां व्यवहारस्य मनःसंवेगानुगतमुखाद्याकृतिविकाराणां चाध्ययनमपि सर्वथैवासम्भाव्यं भविष्यति । व्यवहारवादिनामैकान्तिकोऽयं डिण्डिमघोषो व्यवहारमूलं न लक्ष्यते । व्यवहारमूलं तु साक्षान्मनोवृत्तय एव । तासां मानसप्रत्यक्षेणाऽध्ययनं व्यवहारावगमार्थे दुर्निवारम् । मानसप्रत्यक्षस्य बहिष्कारस्तु न मनोविज्ञानोत्कर्षाय भवितुमर्हति । चैतन्याऽध्ययनतिरस्कारस्तु तादृगेव मौर्ख्यपूर्णं कर्म भविष्यति, यादृक् तस्य बालिशस्य यो मूलमुच्छिनत्ति, शाखां च परिरक्षितुमिच्छति । व्यवहारस्य काऽपि व्याख्या, या अस्माकं स्वकीयाऽपरोक्षानुभूत्याऽनुमोदिता न भवेत्, अस्मासु विश्वासं नावहति । मानसं प्रत्यक्षं चापरोक्षाऽनुभूतेश्चरमं विश्वसनीयं साधनम् । अत एवैतन्मनोविज्ञानाऽध्ययनविधिषु सर्वथैव परिरक्षणीयम् ।

ननु किं भविष्यति तासां त्रुटीनां या मानसप्रत्यक्षावसरे आपतिता भवन्ति । मन्ये ताः

---

१. द्रष्टव्या—कठोपनिषद् २ । १ । १

सर्वा एव त्रुट्यो निवारयितुं परिष्कर्तुं वा शक्याः। मनुष्यस्वभावगतवैचित्र्यमभिलक्ष्य पदे पदे स्खलितानि भवितुं शक्नुवन्ति। सावधानतयैव तेषां निवारणं कर्तुं शक्यते। अपि चान्ये विषयः बाह्यनिरीक्षणप्रयोगादयो मानसप्रत्यक्षविधेः परिवर्धनायैव भवन्ति। अतीतकाले मानसप्रत्यक्षमेव मनोविज्ञानस्य राजपथ आसीत्, किन्त्वधुना अन्यसाधनान्यप्यपेक्षितानि सन्तीति विषयमधिकृत्य मनोवैज्ञानिकानां सर्वत्रैव मतैक्यं विद्यते। यद्धि उक्तं यदपरिपक्वबुद्धिभिर्बालकस्त्रीसामान्यपुरुषादिभिर्मानसं प्रत्यक्षं कर्तुं न शक्यते, तत्तु अकिञ्चित्करमेव। सर्वमेव विज्ञानम्, न केवलं मनोविज्ञानमपि तु रसायनविज्ञानप्राणिविज्ञानादीन्यपि, बुद्धिपरिपाकं त्ववश्यमेवापेक्षन्ते। तटस्थाध्ययनविषये व्यवहारवादिभिर्यदुक्तं तत्तु अधिकृतमांशे समीचीनमेव। नास्त्यत्र सन्देहो यद् यदैव वयं कस्मिंश्चिदपि क्रोधादिसंवेगे मानसप्रत्यक्षेणाऽवगाहितुमिच्छामः, तस्मिन्नेव क्षणे क्रोधादिसंवेगो ह्रासोन्मुखो दृश्यते। अस्मिन् विषये यदि मनागपि सावधानता भवेत्तर्हि या काचिदपि स्खलिताशङ्का भवेत् साऽपि वारयितुं शक्या। अपि च तस्या एव मनोवृत्तेरन्यस्मिन् काले स्थानान्तरे च पुनः निरीक्षणं न केनाऽपि निवारितम्।

(आ) बाह्यनिरीक्षणम्—दैनिकजीवनस्य विविधपरिस्थितिष्वन्येषां पुरुषाणां मनसां मुखाद्याकृतिभेदेन, शब्दाभिव्यक्तहृदयोद्गारैर्वा, प्रतिक्रियारूपव्यवहारेण वा, यदध्ययनं भवति तद् बाह्यनिरीक्षणमिति नाम्नावगम्यते। मानसं प्रत्यक्षन्तु प्रायो निरीक्षणमेव भवति, यतो यदा मनोवृत्तयो ज्ञानविषयकोटिं लभन्ते, तदा ताटस्थ्यभावोऽनिवार्य्य एव भवति। किन्तु मनोवैज्ञानिकाय बाह्यव्यवहारस्याऽध्ययने ताटस्थ्यभावस्य महत्तरापेक्षा भवति। ताटस्थ्यभावादृते निष्पक्षं मनोवैज्ञानिकतथ्यसङ्कलनं न सम्भवति। यदा मनोवैज्ञानिको बालकानामध्ययनं करोति, तदा मनोवैज्ञानिकबालकयोर्मानसिकस्तरभेदो विद्यते। सम्यगध्ययनार्थं बालकस्य मानसिकस्तरे स्थित्वैव तस्य मनोगतविकाराणां व्यवहाराऽभिव्यक्तानां ज्ञानं कर्तुं शक्यते। अपि चेदमपि स्मरणीयमत्र यन्मनोवैज्ञानिकस्योपस्थित्या बालकस्य व्यवहारे कापि कृत्रिमता न प्रविशेत्। अतस्तेषामध्ययनं स्वकीयं व्यक्तित्वं मनोरथं चाप्रकटयित्वा यदि भवेत्, तर्हि तेषां व्यवहारे कृत्रिमतालेशनिरासो भवितुमर्हति। अस्य नियमस्य पालनं मनोविश्लेषणविधावपि करणीयम्।

(इ) प्रयोगः—वस्तुतः प्रयोगः, तुलनात्मकमध्ययनम्, मनोविश्लेषणं चेति त्रयोऽप्ये विधयो बाह्यनिरीक्षणस्य प्रकारभेदाः सन्ति। प्रयोगस्य प्रयोगात्मकनिरीक्षणस्येदमेव वैशिष्ट्यं सामान्यान्निरीक्षणाद् यदत्र पूर्वनिर्दिष्टपरिस्थितौ व्यक्तेः पशोर्वा प्रतिक्रियात्मकव्यवहारस्य निरीक्षणं भवति। प्रयोगात्मकं निरीक्षणं प्रयोगशालामावश्यकयन्त्रादिसाधनानि चापेक्षते। प्रयोगात्मके निरीक्षणे व्यक्तेः प्रतिक्रियाणां सुसूक्ष्मतमसंख्याकमाकलनं सम्भवति। यथा हि कस्यचिदुत्तेजकपदार्थस्य[1] ध्यानभङ्गक्षमता किं वा चित्तैकाग्र्ये विरोधिप्रभावः प्रयोगात्मकनिरीक्षणेनैवावधारयितुं शक्यते। अथवा स्मरणक्रियाया उपरि श्रमक्लान्तिप्रभावः सम्यक् परिस्थितिनियमनपुरःसरेण प्रयोगात्मकनिरीक्षणेन सुसूक्ष्मसंख्याकाकलनानुमापसंवलितेनैव निश्चेतुं शक्यते। प्रयोगे तु पदे पदे प्राप्तपरिणामाङ्कानामनुलेखः क्रियते, येन यथासम्भवं त्रुट्यवकाशनिवारणं सुकरं भवेत्।

(ई) तुलनात्मकध्ययनम्—अयं विधिर्बाह्यनिरीक्षणाऽभिन्न एव। परन्तु अस्यास्यैकं वैशिष्ट्यम्। वयमत्र पशूनां तिरश्चाञ्च स्वभावस्य सम्यगध्ययनं कृत्वा मनुष्याणां व्यवहारस्य

---

१. तुलनार्थम्—**Stimulus.**

स्वभावस्य गतिविधिं तुलनात्मकेनाऽध्ययनेन निर्धारितुं शक्नुमः । पशुमनोविज्ञानं मनुष्याणां मानसिकरहस्योद्घाटनवेलायामतीव सहायकं भवति, यतो हि पशूनां व्यवहारः प्रायशः सरलतरो निम्नस्तरीयः पुरुषव्यवहारापेक्षयाऽधिकतरं प्रकृतिप्रदत्तमूलप्रवृत्त्याद्यनुसारी भवति। पशुस्वभावे वयं मूलप्रवृत्तीनां साधारणाऽध्ययनप्रकाराणां च वातावरणानुकूलप्राप्तिसाधनानां च सर्वोपरि-बोधगम्यं मौलिकमादर्शरूपं लभामहे । मनुष्याणां स्वभावो व्यवहारश्च प्रायशः शिक्षासंस्कृतो जटिलतरः प्रौढिं गतः सभ्यताशिष्टाचारप्रभावविकृतो दरीदृश्यते । बालकेष्वपि तस्य मौलिकं स्वरूपं दुर्लभमेव, वयस्कानां तु जनानां वार्ता कुतः ? उदाहरणतः प्रतिद्वन्द्विनं दृष्ट्वा वृषभो रणायाऽऽसोद्यतो भवति, किन्तु सभ्यः पुरुषो वैरिणमवमन्तारं वा दृष्ट्वा सहसा मनोगतां प्रतिक्रियां न प्रकाशयति । विचारानुरूढां नीतिं गृह्णाति, प्रतिपक्षिप्रतिहिंसार्थं न्यायालयेऽभियोगं प्रवर्तयति । अपरञ्च पशवः कामोद्वेगं सोढुं न शक्नुवन्ति, किन्तु शिष्टाचारसम्पन्नः पुरुषो यथावसरं यथापात्रमेव रहसि कामपूर्त्यर्थं प्रवर्तते । महर्षिदधीचिवन्महामुनिसुकरातवद्वा आदर्शानुप्राणितो नरो हसन्नेव स्वप्राणान् त्यक्तुं समर्थो भवति । न तु तथा पशवः, येषां प्राणरक्षणात्मिका मूलप्रवृत्तिरत्युग्रतरा भवति, यैश्च लोकसंग्रहार्थं सत्यनिष्ठायै वा प्राणत्यागस्य पाठः कुत्रापि न गृहीतः । अत एव पशुमनोविज्ञाना-ध्ययनसाहाय्येन तुलनात्मकसरणिं गृहीत्वा मानुषीयं मनोविज्ञानं सुबोधतरं भवतीति नास्त्यत्र शङ्कावकाशः । स्मरणीयमत्र यन्मनुष्यो मूलतः पशुरेव । अस्ति चोभयोर्महत्साम्यम् । तथाहि—
"आहारनिद्राभयमैथुनञ्च सामान्यमेतत्पशुभिर्नराणाम्" इति ।

तुलनात्मकमध्ययनमन्यक्षेत्रेष्वपि निरीक्षणसौकर्यमावहति । उदाहरणतो जातिभेदशास्त्रं[1] मानवविकासविज्ञानं[2] च यन्मनोविकासस्य प्रारम्भिकविकासोन्मुखावस्थासु रूपमुद्घाटयतः, तन्मानवमनःस्वरूपावधारणे सुमहदुपकारकं सिद्ध्यति । जातिभेदशास्त्रं तु मनुष्याणां विभिन्न-देशस्थजातीनां भेदस्वरूपवैशिष्ट्योद्गमप्रसारमिश्रणादिसमन्वितं शास्त्रीयं विवेचनं शास्त्रीयपद्धत्या प्रकुरुते । मानवविकासविज्ञानमपि मानवस्य प्रागैतिहासिककालादारभ्य अद्यावधि सामाजिकविकासं गवेषणालक्ष्यं करोति । मानवविकासविज्ञानमेव असभ्यार्धसभ्यवन्यजातिचरित्रादारभ्य विविधसामा-जिकसंस्थाविकासानुगतमानवीयसंस्कृतेर्बौद्धिकविकासस्य साङ्गोपाङ्गं शृङ्खलाबद्धमितिहाससमुत्खननादि-प्रक्रियाद्वारेणान्वेषयति । सुविदितमेवेदं तथ्यं सर्वेषां मानवानां यद्धि शैशवं प्रौढचरित्रस्योषो भवति, पूर्वानुगामि भवति । एवमेव सभ्यमानवस्य पूर्ववर्तिनोऽसभ्या वन्यमानुषद्रविडादिजातय एवासन् । तेषां स्वभावाचरणादिगवेषणायां सत्यां मनोविज्ञानस्याऽपि कासाञ्चिज्जटिलसमस्याना-मध्ययनं सुकरं भविष्यतीति नास्त्यत्र सन्देहः ।

(उ) **मनोविश्लेषणम्**—मनसः सामान्याऽवस्थानां ज्ञानं मनोविश्लेषणादिभिः साधनैः सम्पाद्यते । यद्यपि निरीक्षणेनाऽप्यसामान्याऽवस्थानामध्ययनं महदुपकारकं भवति, यतो ह्यनेन स्वस्थमनुष्याणां व्यवहारावगमः परम्परया, न तु साक्षात्, ज्ञातुं शक्यते । किन्त्व-सामान्यावस्थानां विक्षिप्तोन्मत्ताद्यानामध्ययनं दुष्करं भवति । तासामवस्थानां निदानं स्वरूपं चिकित्सा च कुशलमनोवैज्ञानिकैर्मनोविश्लेषणादिभिरुपायैरवगन्तुं शक्यन्ते । अर्वा-चीनमनोविज्ञानस्य सप्ततिवर्षपरिमिते काले यादृशी समुन्नतिः सञ्जाता, विज्ञानपरिषदि यादृशं च गौरवान्वितं स्थानं मनोविज्ञानेनार्जितम्, तस्य श्रेयोऽसामान्यमनोविज्ञानाय नाल्पतरमस्ति ।

---

१. तुलनार्थम्—**Ethnology.**
२. तुलनार्थम्—**Anthropology.**

असामान्यमनोविज्ञानेन उन्मत्तविक्षिप्तादिपुरुषाणां ता मनोऽवस्थास्तज्जनितविक्रियाश्च गवेष्यन्ते, यासां ज्ञानं तेषामपि न भवति, यासाञ्च ज्ञानं साधारणनिरीक्षणविधिना प्राप्तुं प्रायशोऽसम्भवमेव। मनोवैज्ञानिकोऽतीतजीवनवृत्तेतिहासाध्ययनेन, सम्मोहनेन, मनोविश्लेषणेन विक्षिप्तस्यान्तर्गतान् भावानुद्घाटयति, तेषां च बाह्याऽसामान्यव्यवहारेण साकं कारणकार्यभावसम्बन्धं निश्चिनोति। अनेन तासामवस्थानां प्रतीकारोऽपि सुकरो भवति। वयमग्रे इमं विधिं विस्तरतो विवेचयिष्यामः। अयं विधिर्न केवलं विक्षिप्तानामध्ययनार्थमेव प्रयुज्यते, किन्तु जटिलबालकान्, येषां व्यवहारोऽन्यबालकेभ्यो विलक्षणो दुर्बोधश्च भवति, सन्मार्गं प्रत्यानेतुमप्याधुनिकैर्मनोविज्ञानविशारदैः प्रचुरतया आश्रीयते। उक्तं ह्यस्माभिर्यन्मनोवैज्ञानिकशिरोलङ्कारभूताः फ्रायड्महोदया जाग्रत्स्वप्नसुषुप्तिभ्योऽतिरिक्तं मनसोऽवस्थाद्वयमपि स्वीकुर्वन्ति—वासनाऽवस्था, संस्कारावस्था चेति। वासनावस्था तु अचेतनावस्थाऽभिन्नैव। तथापि साऽस्माभिर्मनोऽवस्था स्वीक्रियत एव, यतो हि तस्या अपरिमितप्रभावो यद्यपि जाग्रद्दशायां न दृष्टिगोचरो भवति, तथापि विक्षिप्ताद्यसामान्यास्ववस्थासु प्रचुरं दरीदृश्यते। संस्कारावस्थाप्यर्धचैतन्याऽवस्था, किं वा निम्नस्तरीया चैतन्यावस्था। साऽपि जाग्रद्दशायां न दृष्टिगोचरीभवति, किन्तु स्वप्नेषु स्वकीयं प्रभावं द्योतयति। एकान्तविश्रामे स्वगतवार्तास्वपि कदाचित्तस्याः क्रियाकलापं ज्ञातुं शक्यते। विशेषत एतयोरेव चैतन्यावस्थयोः सम्यक्परिज्ञानार्थं मनोविश्लेषणसम्मोहनादीनि साधनानि प्रयुज्यन्ते। अलमतिविस्तरेण।

३. वैज्ञानिकप्रणालीस्वरूपम्

अस्माभिरितः पूर्वं मनोविज्ञानस्याध्ययनस्य विशिष्टा विषयो व्याख्याताः। तेषां व्याख्यानेन मनोविज्ञानस्य प्रतिपाद्यं तत्साधनानि च विशदीकृतानि। अधुनाऽस्माभिर्विवेचनीयमस्ति—ननु का हि सा वैज्ञानिकप्रणाली यया संस्कृतो ज्ञानराशिर्विज्ञानमित्यभिधानेनाऽलङ्क्रियत इति। इत वैज्ञानिकप्रणाली षट्सोपाना भवति। यथा हि—

(अ) निरीक्षणप्रयोगादिभिः सामग्रीसङ्कलनम्।
(आ) विश्लेषणम्, वर्गीकरणञ्च।
(इ) अनुपयुक्तपरित्यागः।
(ई) व्याप्तिकल्पनम्।
(उ) नियमनिर्धारणम्।
(ऊ) पुनः परीक्षणम्।[१]

अतः परं वयं क्रमशः प्रत्येकं सोपानं विवेचयामः।

---

१. तुलनार्थम्—(अ) Collection of data through observation and experiment.
(आ) Analysis and classification.
(इ) Elimination.
(ई) Formation of hypotesis.
(उ) Generalisation.
(ऊ) Verification.

(अ) सामग्रीसङ्कलनम्—निरीक्षणेन प्रयोगैश्च सामग्रीसञ्चयः सम्पाद्यते। निरीक्षण-मप्यौदासीन्यसमन्वितं नाऽपेक्ष्यते। यदृच्छाप्राप्तसामग्री तु अकिञ्चित्करा भवति। सर्वोपरि महत्त्वपूर्णावश्यकता गवेष्यविषयलक्षणस्पष्टीकरणस्य विद्यते। उक्तं हि पूर्वाचार्यैः—"लक्षण-प्रमाणाभ्यां हि वस्तुसिद्धिः" इति। यदि लक्षणं स्पष्टं भवेत्, तर्हि गवेषणामार्गः प्रशस्तः सञ्जायते। निरीक्षणे धैर्यं सततपरिश्रमश्च महत्तरमपेक्ष्यते। प्रकृते रहस्यानामुद्घाटनं दुष्करं भवति। "त्याज्यं न धैर्यं विधुरेऽपि काले धैर्यात् कदाचिद्गतिमाप्नुयात् सः" इति सर्वदैव वैज्ञानिकानुसन्धाननैराश्य-वेलायां स्मर्तव्यम्। अपि च, प्रकृतिर्यदृच्छयैव समस्तां सामग्रीं न वैज्ञानिकाय प्रदत्ते। अपि तु वैज्ञानिकस्य जिज्ञासां स्फुटप्रश्नरूपलक्ष्यामभिमुखीकृत्यैव प्रकृतिः स्वरहस्यान्युद्घाटयति। उक्तं हि जर्मनदेशीयदार्शनिकशिरोमण्याचार्य-इमैनुअलकांटमहोदयेन—"बुद्धया प्रकृतेः सकाशं तथ्यानां ज्ञानार्थमवश्यमेवागन्तव्यम्, किन्तु तत्र शिष्यवत्; यतो हि शिष्यः स्वाचार्येच्छानुसारमुक्तं भाषणं श्रद्धयैव शृणोति, किन्तु तया विचारपतिरीत्या प्रकृतिरुपसर्पणीया, यथा हि विचारपतिः स्वेच्छानुकूलान् प्रश्नान् साक्षिणः पृच्छति, यान् हि स स्वयं जिज्ञासितुं समीचीनान् मन्यते"[१] इति। अत एव गवेषणार्थं विवेच्यपदार्थविषयकाणि सर्वाण्येव तथ्यानि पूर्वापरपरिस्थितिभ्यः संगृह्य वैज्ञानिकेन कार्यकारणसम्बन्धोऽपि गवेषणीयः।

(आ) विश्लेषणं वर्गीकरणञ्च—किन्तु संकलितसामग्र्या न तावत् कार्यकारणसम्बन्धनिर्धारणं कर्तुं शक्यम्, यावन्न जिज्ञास्यविषयापेक्षया तस्या विश्लेषणं वर्गीकरणञ्च सम्भवेत्। अतो हि विवेच्यविषयो विविधाङ्गेषु विभाजनीयः, विविधाङ्गोपाङ्गविभाजनानुसारं सङ्कलितसामग्र्या वर्गीकरणमप्यनायासेन भविष्यति, महांश्चानेन लाभो भविष्यति। यतो ह्यनुपयुक्तान्यनावश्यकानि तथ्यानि, येषां प्रतिपाद्यविषयाङ्गोपाङ्गेष्वन्तर्भावः कर्तुं न शक्यते, स्वत एव निरस्तानि भविष्यन्ति।

(इ) अनुपयुक्तपरित्यागः—सङ्कलितसामग्रीराशौ विवेच्यविषयमधिकृत्य यदुपयुक्तं विषया-नुकूलमभूत् तद्वर्गीकृतमेव। अनुपयुक्तानां कारणानामिव प्रतीयमानानां तथ्यानां निरासोऽपि करणीय एव। अन्यथा व्याप्तिकल्पनं गौरवादिदोषदुष्टं भविष्यति। हेत्वाभासानां तथ्यानां निरसनमतीव दुष्करं भवति। केषुचित् स्थलेषु परिस्थितिपरिवर्तनेन कार्यकारणसम्बन्धनिश्चयः सम्पाद्यते। याः काश्चित् परिस्थितयः कार्योत्पत्त्यर्थमनिवार्या भवन्ति, तासामेव कारणसामग्रीषु समावेशः कर्तव्योऽ-न्याश्च निरसनीयाः। यासां परित्यागेन कार्योत्पत्तौ न काऽपि क्षतिः सञ्जायते, ता एव परिस्थितयः कारणसामग्र्यपेक्षया नावश्यिका वैज्ञानिकैर्मन्यन्ते। परिस्थितिपरिवर्तनञ्च प्रयोगसापेक्षं भवति।

---

१. द्रष्टव्यम् —Immanuel kant: critique of Pure Reason, Preface to the second edition, page II, (Everymen's libray edition)

"Reason must approach nature, with a view, indeed, of receiving information from it not, however, in the character of a pupil, who listens to all that his master chooses to tell him, but in that of a judge, who compells the witness to reply to those questions which he himself thinks fit to propose."

यतो हि प्रयोगस्य निरीक्षणादिदमेवाऽस्ति वैशिष्ट्यं यद्धि प्रयोगात्मके परीक्षणे परिस्थितिपरिवर्तनं वैज्ञानिकेच्छाधीनं भवति । वैज्ञानिकस्येच्छाऽपि नोच्छृङ्खला भवति,अपि त्वनुसन्धानविषयकयोजनानुसारिणी हि सा । अतः प्रयोगो निरीक्षणादतिरिच्यते । अनावश्यकसामग्रीजातस्य परित्यागः प्रयोगेणैव सुष्ठु साध्यो भवति ।

(ई) व्याप्तिकल्पनम्—व्याप्तिकल्पनञ्च कारणकार्यसम्बन्धस्थापनार्थमावश्यकमेव, तद्धि प्रतिभामपेक्षते । "यत्र यत्र धूमस्तत्र तत्र वह्निः", यद्वा "भूमावाम्रपतनं पृथिवीगुरुत्वाकर्षणजन्यम्" इति व्याप्तिकल्पनं प्रतिभां विना निश्चेतुं न शक्यम् । प्रतिभेयं दूरदर्शित्वानुभवायत्ता भवति । आचार्यप्रवरा मन्यन्ते—"भगवत्प्रसादात् प्रतिभां पुरुषा लभन्ते" इति । जिज्ञासाया उत्कर्ष एव भगवत्प्रसादाय कल्पत इति वयं मन्यामहे । दैनन्दिनं चिन्तनं व्याप्तिकल्पनक्षमतां प्रदत्ते । नेदं व्याप्तिकल्पनं सर्वदैव समीचीनं भवति । यदा तु व्याप्तिकल्पनं सञ्चितसामग्रयाऽनुमोदितं भवति, तदा हि तद् विद्वद्भिः समीचीनं मन्यते । यदि तत्कल्पनं भावितथ्यानि व्याख्यातुं न शक्नोति, कार्यकारणसम्बन्धस्थापनपुरस्सरस्पष्टीकरणक्षमतां न भजते, तर्हि तत्कल्पनमपि त्याज्यमेव भवति । प्रगतिशीलविज्ञानचिन्तायां नैतद् विगर्हितं मन्यते । यद्धि आवश्यकं तद् विज्ञानस्य याथातथ्यम् । यथा हि वस्तुनः स्वरूपं तथैव तस्य निर्धारणं व्याख्यानञ्च विज्ञानस्य महल्लक्ष्यम् । एतदर्थमेव व्याप्तिकल्पन माश्रीयते ।

(उ) नियमनिर्धारणम्—नियमश्च सामान्यसिद्धान्तः, येन स्वक्षेत्रान्तर्गतविभिन्नघटनानां कार्यकारणसम्बन्धपुरस्सरं व्याख्यानं कर्तुं शक्यते । यदा हि नियमप्रतिकूलाः केचनापवादा भवेयुस्तदा तन्नियमः परिष्कारमपेक्षते । सिद्धान्तस्तु[1] नियमादतिरिच्यते । सर्वे सिद्धान्ता नियमाः, न तु सर्वे नियमाः सिद्धान्ता भवितुं प्रभवन्ति । वैज्ञानिकनियमानां परिष्कारः कर्तुं शक्यः, किन्तु सिद्धान्तः सार्वत्रिकः सार्वकालिको भवति । एतावता परिष्कारपरीक्षणप्रयोगादिकोटिमतीत्यैव नियमः[2] सिद्धान्तपदेनाभिव्यक्तं चिरन्तनं गौरवं लभते । यदा हि व्याप्तिकल्पनं व्याप्त्यतिव्याप्तिदोषादिविनिर्मुक्तं भवति, तदैतन्नियमपदमारोहति, न त्वन्यथा । नियमादप्येका निम्नकोटिर्वर्तते, सा हि मान्यतेति, मतमिति[3] वा शब्देनाभिव्यज्यते । यदा केनचिल्लब्धप्रतिष्ठेन वैज्ञानिकेन प्रतिपादितः कोऽपि सामान्यो नियमः परीक्षणावस्थायामेव तिष्ठति । यद्यपि साक्षात्तस्य कोऽप्यपवादः सुगमतया नोपलभ्यते, यावच्च स न सर्वैर्मनीषिभिः समाद्रियते, तावत्स नियमो मान्यतेति किं वा मतमिति संज्ञया व्यवह्रियते । न च स तावन्नियमकोटिं भजते, यावन्न तस्य सिद्धिर्लब्धावकाशा भवेत् । उदाहरणतो न्यूटनमहोदयैः प्रतिपादितो गुरुत्वाकर्षणवादो नियमोऽस्ति, फ्रायडमहोदयैः प्रतिपादितः कामेच्छावादोऽद्यावधि मान्यतैवास्ति । इत्थमेव डारविनमहोदयानां विकासवादोऽपि मतमेवाख्यायते । सत्कार्यवादस्तु नियमः, कारणे सत्येव कार्योद्भव इति नियमः शाश्वतिकी नियमपदवीं स्वत एव विभूषयति । सर्वे वादा मान्यतापर्याया एव । प्रकृतिसामरस्यसिद्धान्तस्तु[4]

१. तुलनार्थम्—Principle.

२. तुलनार्थम्—Law.

३. तुलनार्थम्—Theory.

४. तुलनार्थम्—Uniformity of natute,

शाश्वतिको नियमवदेव सार्वकालिकः। अतो नियमात् सिद्धान्तस्याऽस्ति किञ्चिद् गौरवम्। अनेन सिद्धान्तेन प्रतिपाद्यते यद्धि प्रकृतिर्नियतकारणसङ्घातपरिस्थितौ नियतफलमेवोत्पादयति, न त्वन्यथेति।

(ऊ) पुनः परीक्षणम्—नियमनिर्धारणानन्तरमपि तन्नियमस्य परीक्षणमावश्यकं भवति। सत्यत्वं हि त्रिकालाबाधितत्वम्। यदि कोऽपि नियमोऽधुना तु निर्धार्यते, निश्चीयते, घोष्यते च, किन्त्ववान्तरकालिकानि कानिचित्तथ्यानि स सम्यक्तया व्याख्यातुं न प्रभवति, तर्हि तन्नियमः परिष्कारमपेक्षते। यदि परिष्कारस्य सम्भावना न भवति, तर्हि तस्य तिरस्कारोऽपि विज्ञानेतिहासे लक्ष्यत एव। न्यूटनमहोदयैः प्रतिपादितः प्रकाशविषयककाणविकवादो[1] नैवास्मिन् युगे वैज्ञानिकैः समाद्रियते। अस्य स्थाने प्रकाशोर्मिवादः समीचीनतरः प्रतिभाति। मन्ये कालान्तरेऽयमेव नियमपदवीं प्राप्स्यति। अतो भाविपुष्कलघटनानिकषप्रमाणित एव नियमः स्वप्रतिष्ठासंरक्षणे समर्थो भवति। पुनः परीक्षणेन प्रयोगात्मकेनाऽपि यः प्रमाणितो घोष्यते, स एव नियमो विद्वद्वरेण्यैः सुप्रतिष्ठितो मन्यते।

उदाहरणम्—वैज्ञानिकप्रणाल्या विवेचनमिदमेकेनोदाहरणेन स्फुटीक्रियते। मलेरियेति प्रकारको ज्वरः केन कारणेनोत्पद्यत इति प्रश्ने विचार्यमाणे बहूनि कारणानि कल्पयितुं शक्यानि। उदाहरणतो दुष्टं भोजनं रात्रिजागरणं मर्यादातीतमध्ययनं पाचनक्रियादौर्बल्यं शीतप्रकोप इत्यादीनि कारणानि भवितुमर्हन्ति। सर्वासामेव ज्वरपरिस्थितिघटितानां कारणसामग्रीणां प्रथमतः सङ्कलनं क्रियते। तदनन्तरं तस्याः सामग्र्या ज्वरलक्षणमभिमुखीकृत्य वर्गीकरणं क्रियते। ज्वरग्रस्तानां पुरुषाणां जीवनचर्याजलवायुनिवासस्थानवर्षर्तुदेशायुर्वस्त्रादीनि सम्यक्तया निरीक्ष्यन्ते। ज्वरस्य निदानमप्यवधार्यते। यथा हि ज्वरात्पूर्वं शीतप्रकम्पनं शिरःशूलं जलपिपासा शारीरिकतापमानवृद्धिरित्यादीनि लक्षणानि भवन्ति। तृतीयसोपानानुसारं परिस्थितिपरिवर्तनेनेतराणि सर्वाणि कादाचित्कानि कारणजातानि निरसितुं शक्यन्ते। व्याप्तिकल्पनमपि बहुप्रकारकं भवितुमर्हति। यथा हि ज्वरकारणं भोजनद्वारा संक्रामककीटाणुप्रभावोऽथवा मशकप्रकारेण केनाऽपि कीटेन दंशनमिति। प्रयोगेण तदनन्तरं साधितं भवति—ज्वरकारणन्तु एनोफीलनाम्नः कीटस्य दंशनमेव, न त्वन्यत्। औषधप्रयोगेणाऽपि दंशनप्रभावं शमयित्वा ज्वरप्रतीकारोऽपि साध्यते। न केवलमेतावतैव व्याप्तिनियमः प्रतिष्ठापितो भवति। गृहनिकटस्थजलाशयोत्पन्नतन्नामककीटविनाशनेन मशकप्रतीकारार्थं स्वापकाले मशकहरीप्रयोगेण च ज्वरस्य सम्भावनाऽपि निवारयितुं शक्या भवति। अत एव सिद्धं पुनः परीक्षणेनाऽपि यद्धि ज्वरस्य कारणम् 'एनोफील' इति नाम्नः कीटस्य दंशोत्पन्नं विषमेवेति।

स्मरणीयमत्र यद्धि वैज्ञानिकप्रणाल्यानुमोदितं कारणं लक्षणपञ्चकान्वितं भवति। तथा ह्युक्तं केशवमिश्रेण तर्कभाषायाम्[2]—"एतेषाम् अन्वयव्यतिरेकि-केवलान्वयि-केवलव्यतिरेकिहेतूनां मध्ये यो हेतुरन्वयव्यतिरेकी स पञ्चरूपोपपन्न एव स्वसाध्यं साधयितुं क्षमते, न त्वेकेनाऽपि रूपेण हीनः। तानि पञ्चरूपाणि तु पक्षधर्मत्वम्, सपक्षसत्त्वम्, विपक्षाद् व्यावृत्तिः, अबाधितविषयत्वम्, असत्प्रतिपक्षत्वं च" इति। स्पष्टमेव यद् वैज्ञानिकाभिमतो हेतुरन्वयव्यतिरेकी एव

१. तुलनार्थम्—Corpuscular Theory.

२. द्रष्टव्यम्—पण्डितसुरेन्द्रशर्मकृतचिदानन्दीविलसितं तर्कभाषासंस्करणम्, पृ० २४

भवति। अस्माभिर्वैज्ञानिकप्रणाल्या उपर्युक्तं विवेचनं सङ्क्षेपत एव कृतम्। अनया प्रणाल्या साधितो ज्ञानराशिर्विज्ञानपदवीं समारोहति। अस्या प्रणाल्या विशदविवेचनं वैज्ञानिकप्रवरैः कार्लपियर्सनमहोदयैः 'विज्ञानस्य व्याकरणम्'[1] इत्याख्ये ग्रन्थे कृतं समुपलभ्यते, जिज्ञासुभिः पाठकैस्तत्रैव पठनीयम्। न्यायग्रन्थेष्वपि निर्दुष्टहेतुस्वरूपमवलोकनीयम्। मनोविज्ञानमपि वैज्ञानिकप्रणालीमनुसरति। अत एवार्वाचीनमनोविज्ञानस्य विज्ञानाभिधानं सिद्धं भवति।

४. मनोविज्ञानशाखाः

अधुनाऽस्माभिर्मनोविज्ञानस्य क्षेत्रस्वरूपप्रदर्शनार्थं तस्य शाखानां विवरणमुपस्थाप्यते। मनोविज्ञानस्य समासतो विभाजनं द्विधा कर्तुं शक्यते—सामान्यं मनोविज्ञानम्, असामान्यं मनोविज्ञानं चेति। सामान्यं मनोविज्ञानं साधारणतया स्वस्थमनुष्याणां पशूनाञ्च मनोविकाराणां संवेदनविचारमूलप्रवृत्तिसंवेगेच्छाप्रयत्नादीनां वैज्ञानिकमध्ययनं लक्ष्यीकरोति। असामान्यं मनोविज्ञानं तु विलक्षणव्यक्तित्वविशिष्टानां विक्षिताद्यवस्थाजन्यमानसिकरोगिणामध्ययनं समाश्रयते। लोकोत्तराणां पुरुषाणां वीतरागाणां वा सम्यगध्ययनमप्येतावता सामान्यमनोविज्ञानान्तर्गतमेव भवति। स्वप्नाद्यवस्थानामध्ययनं मनोविश्लेषणमप्यसामान्यमनोविज्ञान एव समावेशमर्हति। अस्माभिरयमेव विभागोऽस्मिन् ग्रन्थेऽङ्गीकृतः।

अपरथाऽपि मनोविज्ञानस्य विभाजनं क्रियते। विवेचनात्मकं सैद्धान्तिकं वा मनोविज्ञानम्, व्यावहारिकं मनोविज्ञानं चेति। विवेचनात्मकं मनोविज्ञानं तु विशुद्धविज्ञानमेव। निःस्वार्थज्ञानमात्रायार्जितं ज्ञानं विशुद्धविज्ञानमित्युच्यते। व्यावहारिकं मनोविज्ञानं त्वैहिकस्वार्थसमुपोढं भवति। उपयोगितानुकूललक्ष्यसाधनेऽनुरक्तं हि खलु व्यावहारिकं मनोविज्ञानं भवति। विशुद्धविज्ञानं स्वार्थनिरपेक्षं स्वामिवत् सामान्यनियमानुसन्धानपरायणं भवति। व्यावहारिकं विज्ञानं तु भृत्यवद् लोकसेवासाधनं करोति। उदाहरणतः सामान्यमनोविज्ञानमसामान्यमनोविज्ञानं पशुमनोविज्ञानं बालमनोविज्ञानं काममनोविज्ञानमित्यादीनि विवेचनात्मकमनोविज्ञानाङ्गानि भवितुमर्हन्ति। व्यावहारिके मनोविज्ञाने खलु शिक्षामनोविज्ञानम् अपराधिमनोविज्ञानं व्यापारिकमनोविज्ञानं वैज्ञानिकमनोविज्ञानमसामान्यचिकित्सामनोविज्ञानमित्यादीनां समावेशः करणीयः।

विनिगमकद्वयमाश्रित्यैवाऽस्माभिरत्र प्रकारद्वयेन मनोविज्ञानान्तर्गतशाखानां विभाजनं स्फुटीकृतम्। वयमधुना विशिष्टविषयक्षेत्रनिर्देशपुरस्सरं विविधशाखानां परिचयमारभामहे।

(१) **शारीरकं मनोविज्ञानम्**—मनोविज्ञानस्येयं शाखा नाडीसंस्थानस्य निर्मितिस्वरूपं क्रियाकलापञ्च मनोविकारैः सह इतरेतरप्रभावपुरस्सरमध्ययनं विषयीकरोति। अस्ति हि मस्तिष्कस्य का रचना ? किं मस्तिष्कं मन एव ? केन्द्रीयनाडीसंस्थानं काः क्रियाः सम्पादयति ? केन प्रकारेण तासां सम्पादनं कुरुते ? विभिन्नज्ञानेन्द्रियाणां क्रियाकलापं किंप्रकारकं भवति ? किमन्तर्ग्रन्थीनामपि कश्चन प्रभावो मनोविकारेषु संलक्ष्यते ? इत्यादीनि प्रश्नशतानि मनोविज्ञानस्येयं शाखा स्वविषयीकरोति। अर्वाचीनमनोविज्ञानस्य शैशवे वैक्रमसंवत्सरस्य विंशतितमशताब्द्या द्वितीयचरणे प्रयोगात्मकमध्ययनमनयैव शाखया समुत्साहेन प्रारब्धमासीत्। अद्यावध्यप्यायुर्वेदविज्ञानाध्ययनसहकृतमेवास्यां शाखायां महत्त्वपूर्णमनुसन्धानं क्रियते। प्रारम्भकाल आसीदयमभिनिवेशः केषाञ्चिन्मनोवैज्ञानिकानां यद्धि मस्तिष्कमेव मनः। मस्तिष्कस्य रचनाक्रियासम्पादनादिरहस्यो-

---

१. द्रष्टव्यम्—Karl pearson, 'Grammar of Science'.

द्घाटनेनैव मनसः स्वरूपमुद्घाटयितुं शक्यत इति। तदा तु भौतिकवादस्य प्रचण्डतमो वैज्ञानिकक्षेत्रेषु प्रभाव आसीत्। किन्तु नायमैकान्तिक आग्रहो मनोवैज्ञानिकेष्वधुना दरीदृश्यते। तथापि मस्तिष्कमनसोरितरेतरप्रभावो महत्सहकारित्वञ्च तैरपि स्वीक्रियत एव। अस्माभिरस्याः शाखाया विवेच्यविषयान्तर्गतसमस्यानामध्ययनं समासतो द्वितीयाऽध्याये करिष्यते।

(२) तुलनात्मकं मनोविज्ञानम्—मनोविज्ञानस्येयं विशिष्टा शाखा पशूनां मनुष्याणाञ्च मानसिकक्रियासमन्वितव्यवहारणामध्ययनं तुलनात्मकपद्धत्या उपक्रमते। अस्ति हि महत्साम्यं पशूनां मनुष्याणां च व्यवहारे मूलप्रकृतिषु च। वयमप्यग्रिमाध्यायेषु विशेषतः मूलप्रवृत्त्यध्ययनविधिसंवेगादिविषयविवेचनाऽवसरेऽस्याः शाखायाः प्रतिपादिततत्त्वानां विवेचनं करिष्यामः।

(३) विकासान्वितमुत्पत्तिमूलकं वा मनोविज्ञानम्[1]—मनोविज्ञानस्येयं शाखा मनोवृत्तीनां व्यवहारानुगतं विकासं जन्मन आरभ्य शैशव-कैशोर-पौगण्ड-यौवन-किञ्चित्परिहाणि-वार्धक्याद्यवस्थासु मरणपर्यन्तं गवेषयति। कथं हि मनसः क्रियाणां वृत्तीनां शक्तीनां वा विकासः क्रमशश्चरमां प्रौढावस्थामवाप्नोति, कथञ्च तासां क्रमशो ह्रासो भवतीत्यनया मनोविज्ञानशाखया निर्धार्यते। अस्माभिरप्यस्याः केषाञ्चित् समुपलब्धनिष्कर्षाणां विवेचनं व्यक्तेर्बुद्धिविकासानुसन्धानावसरे वातावरणवंशानुक्रमप्रभावविवेचनाद्यवसरे च करिष्यत एव।

(४) बालमनोविज्ञानम्—मनोविज्ञानस्येयं शाखा महती लोकोपकारिणी। अस्मिन् युगे शिक्षणपद्धतेर्यादृशी प्रगतिः सर्वत्र संलक्ष्यते, तस्याः श्रेयो बालमनोविज्ञानायैव। अनया शाखया मूलप्रवृत्ति-रुचि-संवेदन-संवेग-विचार-प्रयत्नेच्छाकल्पनादिविषयानधिकृत्य जन्मन आरभ्य चतुर्दशवर्षं यावत् किं वा अष्टादशवर्षपर्यन्तं बालकानां मनोविकासस्य व्यवहारसापेक्षं वैज्ञानिकमध्ययनं सम्पाद्यते। यौवने व्यक्तित्वस्य सम्यग्विकासो बाल्यकाल एव समुचितशिक्षणमन्तरा न सम्भवति। शिक्षणशब्दस्य प्रकृतसन्दर्भे व्यापकोऽर्थो ग्रहणीयः। शिक्षणं न खलु बालकस्य पाठशालायामेव सम्भवति, अपि तु गृहे मातृपितृसन्निधानेऽपि, क्रीडास्थले मित्रसकाशेऽपि च भवत्येव। बालकस्य मनोवृत्तिविकासार्थे रुचिवैचित्र्यानुसन्धानार्थे न तदुपेक्षणीयमस्ति। वयमपि बालमनोविज्ञानस्य यथावसरेऽग्रिमेष्वध्यायेषु किञ्चिद्विवेचनं करिष्यामः।

(५) व्यक्तित्वात्मकं मनोविज्ञानम्[2]—मनोविज्ञानस्येयं शाखा विशिष्टव्यक्तित्वस्याध्ययनं सम्यग्रीत्या करोति। कथं हि खलु व्यक्तित्वं विकसति? का च कारणसामग्री व्यक्तित्वे वैशिष्ट्यमावहति? किञ्च व्यक्तित्वस्य प्रतिमानं भवितुमर्हति? कथं नु विभज्यमानं व्यक्तित्वं मनुष्यं विक्षिप्ताद्यसामान्यावस्थामानयति? अस्माभिरप्येताः समस्या बुद्धिमापन-कल्पना-विकास-वंशानुक्रमवातावरणप्रभाव-संवेग-मनोविश्लेषणादिविवेचनावसरे विचारयिष्यन्ते।

(६) सामाजिकं मनोविज्ञानम्[3]—मनोविज्ञानस्येयं शाखा मनुष्योपरि पुरुषेतरजन्यसामाजिकप्रभावमन्वेषयति। केन प्रकारेण च समाजस्याङ्गीभूतव्यक्तिरन्यान् पुरुषान् प्रभावयतीत्यपि सामाजिकं मनोविज्ञानमवधारयति। सामूहिकं[4] मनोविज्ञानमप्यस्यैव मनोविज्ञानस्य

१. तुलनार्थम्—Developmental or genetic psychology.

२. तुलनार्थम्—Psychology of personality.

३. तुलनार्थम्—Social psychology,

४. तुलनार्थम्—Mass psychology.

प्रशाखा। यतो हि व्यक्तिर्धार्मिकराजनीतिकव्यावसायिकसमुदायेषु नेतृगणप्रेरितं व्यवहारमेव जनयति, न तु स्वबुद्धिनिर्णीतं व्यवहारम्। अत एव तद्व्यवहारप्रेरकाणां कारणानामालोचनमप्यपेक्ष्यत एव। तत्तु सामूहिकमनोविज्ञानेन सामाजिकमनोविज्ञानेन च सम्पाद्यते।

(७) व्यावहारिकं मनोविज्ञानम्[1]—अस्माभिरुक्तमेव यद्धि मनोविज्ञानस्य महती लोकोपयोगितां विज्ञायास्य प्रयोगः सामाजिकजीवनस्य बहुषु क्षेत्रेष्वधुना विद्वद्भिः क्रियते। सामाजिकं मनोविज्ञानं खलु सामाजिकजीवनानुभूतजटिलतमसमस्यानां समाधानमन्वेषयति। व्यावहारिकमनोविज्ञानस्याधुना बहुलाः शाखा विद्यन्ते। उदाहरणतः शिक्षामनोविज्ञानं व्यावसायिकं मनोविज्ञानमसामान्यचिकित्सामनोविज्ञानं चिकित्सामनोविज्ञानमपराधिमनोविज्ञानं विक्रयात्मकं मनोविज्ञानं वैज्ञापनिकं मनोविज्ञानमित्यादयः। एतेषामपि यत्र तत्र किञ्चिद्विशेषतोऽन्तिमेऽध्याये विवेचनं करिष्यत एव। यद्यपि विशिष्टं व्याख्यानमेतेषामस्माकं प्रतिपाद्यं नास्त्यत्र स्थानाभावात्तथापि किञ्चिद्दिङ्निर्देशं वयं करिष्यामः।

(८) भेदान्वितं मनोविज्ञानम्[2]—मनोविज्ञानस्येयं शाखा अमेरिकादेशे प्रथमतः संवर्धिता। अनया शाखयैकस्या व्यक्तेरन्यव्यक्तेर्भेदप्रकारो गवेष्यते। महिलानां पुरुषेभ्यः पुरुषाणाञ्च महिलाभ्यो भेदः कस्मिन् कस्मिन् विषये वर्तते, अथचैकजातीयानां पुरुषाणामितरजातीयपुरुषेभ्यः किम्प्रकारकं वैलक्षण्यमित्यादीन् विषयानधिकृत्येदं भेदान्वितं मनोविज्ञानं स्वकीयानुसन्धानं वितनोति। अस्त्यस्य मनोविज्ञानस्य व्यक्तित्वात्मकेन मनोविज्ञानेन पूर्वनिर्दिष्टेन साकं महत्साम्यम्। बुद्धिमापकं व्यक्तित्वमापकमित्यादीनि व्यवसायक्षेत्रेषु शिक्षाक्षेत्रेषु महता साफल्येन प्रयुक्तानि सन्ति। तेषां सर्वेषामन्वेषणमिदं भेदान्वितं मनोविज्ञानमपि करोति।

ननु किमस्त्यस्माकं प्रतिपाद्यम्? अस्मिन् ग्रन्थेऽस्माभिर्यत् प्रतिपाद्यं विवेचयिष्यते तत्त्वर्वाचीनं मनोविज्ञानं सामान्यं मनोविज्ञानमसामान्यं मनोविज्ञानं चेति। अस्माभिरयं प्रथमो ग्रन्थः सुरभारत्यर्चनाय अर्वाचीनस्य मनोविज्ञानस्य विशालक्षेत्रस्य भूमिकारूपेणैव प्रस्तूयते। यद्यप्यस्माकं लक्ष्यं वयस्कानां मनोविज्ञानस्य विवेचनमेव, किन्तु वयमावश्यकतानुसारं मनोविज्ञानस्य विविधशाखाभ्योऽपि समन्वयात्मकरूपेण पुष्कलसामग्र्युपयोगं करिष्यामः। नैतावता वयं सन्तुष्टा भविष्यामः। यद्यपि मनोविज्ञानमधुना स्वतन्त्रं गौरवपदमलङ्करोति, तथापि यथावसरं दार्शनिकमतानां विवेचनं समालोचनं चास्माभिः समादरेण नूनं समासतः करिष्यत एव।

५. मनोविज्ञानस्य सम्प्रदायाः

मनोविज्ञान इवोदीयमाने विज्ञान आन्तरिकमतभेदास्तु सन्त्येव। यद्यपि मनोविज्ञानं विशालक्षेत्रं बहुनुसन्धानकायम्, तथाप्यस्येदानीं शैशवमेव। अस्य प्रगतिशीलत्वेनैवैतादृशी समुन्नतिन्यूनेऽपि काले सञ्जाता। मनोवैज्ञानिकानामपि मनोविज्ञानस्य प्रतिपाद्यमधिकृत्य नूनमेव बहवो भेदाः सन्ति। कस्य विषयस्य मनोविज्ञानस्य विवेचने प्राधान्यं भवितुमर्हति, कस्य च गौणत्वमित्यधिकृत्यापि दृष्टिभेदाः सञ्जाताः। को हि खलु मनोविज्ञानस्य समीचीनो विधिः, कानि वा अनुसन्धानसाधनानि, यान्यनुसृत्य मनोविज्ञानं स्वगन्तव्यं प्राप्तुमर्हतीत्यस्मिन्नपि विषये

१. तुलनार्थम्—Applied psychology.

२. तुलनार्थम्—Diherential psychology.

तेषां मनोवैज्ञानिकानां नैव सर्वेषां सर्वदा मतैक्यमासीत् । यदा बहवो विद्वांस एकमेव मतमनुमोदयन्ति, तदा तेषां वर्गविशेषः सम्प्रदायपदेनाऽभिधीयते । काऽपि विशिष्टा विचारधारा विचारपरम्परा वा, यया आचार्य्यविशेषो दृष्टिविशेषो वा समाद्रियते, सम्प्रदायसंज्ञया व्यवहर्तुं शक्यते । मनोविज्ञानक्षेत्रे तु साम्प्रतं नैव कोऽप्येको विशिष्टः सम्प्रदायः सँल्लक्ष्यते । किन्तु वैक्रमसंवत्सरस्य विंशतितमायाः शताब्द्या अन्तिमचरणद्वये, विशेषतः सप्तपञ्चाशदुत्तरैकोनविंशतितम(१९५७)वर्षादारभ्य सप्ताशीत्युत्तरैकोनविंशतितम(१९८७)वर्षपर्यन्तं बहवो मनोवैज्ञानिकसम्प्रदायाः प्रादुरभवन् । तेषां संक्षिप्तं विवरणमत्रास्माभिरुपस्थाप्यते ।

(अ) निर्मितिवादः[1]—अयं सम्प्रदाय आचार्यप्रवराभ्यां प्राध्यापकवण्ट-टिचनरमहोदयाभ्यां[2] प्रारब्ध आसीत् । आचार्यप्रवरेण वण्टमहोदयेन लीपजिग्विश्वविद्यालये जर्मनीप्रदेशे या प्रथमा प्रयोगात्मकमनोविज्ञानानुसन्धानार्थं प्रयोगशाला स्थापिताऽभूत् , तस्यामध्ययनार्थं विविधदेशेभ्यः समुत्साहसम्पन्नाः टिचनरप्रभृतयः बहवो विद्यार्थिनः समागतवन्तः । सर्वेषु तेष्वेको महामतिराङ्गलदेशीयः टिचनरोऽप्यासीत् । सोऽध्ययनानन्तरम् अमेरिकां गत्वा कार्नेलविश्वविद्यालये मनोविज्ञानविभागाध्यक्षपदमलङ्करोति स्म ।

प्राध्यापकवण्टप्रतिपादितविचाराननुसृत्य टिचनरमहोदयेन निर्मितिवाद इति सम्प्रदायः स्थापितः । तेनेदं प्रतिपादितं यद्धि मनोविज्ञानस्य प्रतिपाद्यं कल्पनाविचारभावनारूपत्रिविधतत्त्वैर्निर्मितं चैतन्यमेव[3] । अस्य चोपयुक्तमध्ययनसाधनं मानसं प्रत्यक्षमेव, यत् कुशलैः प्रशिक्षितैर्निरीक्षकैराश्रीयते । सामाजिकव्यवहारसामान्यव्यवहारप्रयत्नव्यक्तित्वादीनि तेन मनोविज्ञानप्रतिपाद्यक्षेत्रे न समावेशितानि । तेन तच्छिष्यैश्च बहवः प्रयोगाः साफल्येन सम्पादिताः ।

(आ) क्रियावादः[4]—अयं सम्प्रदायो निर्मितिवाद इव नास्ति सुदृढो नैव च शृङ्खलाबद्धोऽपि । अस्योद्भवस्तु निर्मितिवादस्याऽनेकमनोवैज्ञानिकानां समालोचनारूपेणाभवत् । डेन्मार्कदेशीयहार्फडिंगमहोदयेन अमेरिकादेशीयप्राध्यापकविलियमजेम्समहोदयेन च प्राध्यापकटिचनरप्रभृतिभिः प्रतिपादितो निर्मितिवादो नाङ्गीकृतः । ताभ्यां मानसिकक्रियाणां परिवर्तनशीलं स्वरूपमभिमुखीकृत्येदं साधितं यद्धि चैतन्यस्य निर्मितिस्तरेषु पृथक्तो विभाजनं कर्तुं न शक्यते । एकोनविंशतिशततमवर्षा(१९००)दनन्तरं नाऽतिचिराद् अमेरिकादेशीयशिकागोविश्वविद्यालयस्य प्राध्यापकाभ्यां श्रीडिवे-एंजेलमहोदयाभ्यां[5] प्राणिनः स्ववातावरणेन सह सामञ्जस्यस्थापनप्रकारा विशेषतः समुल्लिखिताः । मानसिकक्रियाणामध्ययनेन तेषां त्वयमभिप्राय आसीद् यत्केन प्रकारेण विचारसंवेगादिमानसिकक्रियाः प्राणिनः प्राणधारणार्थावश्यकतापूर्त्यर्थं व्यवहारसौकर्यं सम्पादयन्तीति । क्रियावादिनां मनोवैज्ञानिकानां प्रतिपादितमतानामयं प्रभावोऽभवद् यद्धि प्राणिविज्ञानेऽपि

---

१. तुलनार्थम्—Structuralism.

२. तुलनार्थम्—Wilhelm wundt, edWard bradford titchner.

३. तुलनार्थम्—Psychology is conercned with the study of images, thoughts, and feelings the three elements forming the structure of consciousness.

४. तुलनार्थम्—Functionalism.

५. तुलनार्थम्—(Stimulus) John Dewey & James Rowland Angell.

मनोवैज्ञानिकानां विशेषरुचिः समजायत, मनोविज्ञानस्य समस्यानामध्ययने च विकासान्वितायाः पद्धत्याः प्रयोगो बहुलतरः प्रवर्तितः।

(इ) व्यवहारवादः—व्यवहारवादनामा मनोविज्ञानसम्प्रदायस्तु हापकिन्सविश्वविद्यालयस्य पशुमनोविज्ञानविशारदेन प्राध्यापकवाट्सनमहोदयेन प्रवर्तितः। सोऽपि निर्मितिवादस्य दृष्टिकोणं सङ्कुचितमेव मन्यते स्म। तदनुसारं क्रियावादिभिः कृतं समालोचनमपि निर्मितिवादस्य फल्गुताप्रदर्शनं कर्तुं क्षमं नासीत्। प्राध्यापकवाट्सनेन विशेषतो मानसप्रत्यक्षस्य निरर्थकताऽवैज्ञानिकता च प्रदर्शिता। तन्मते मनोविज्ञानस्य विवेच्यं तु व्यवहाराध्ययनमेव, न तु चैतन्यं चैतन्यसन्तानं वा। प्रकृते सम्प्रदाये मनोविज्ञानस्यार्वाचीनस्य प्रतिपादने च व्यवहारपदप्रयोगो नीतिशास्त्राभिमतौचित्यानौचित्यसंसर्गनिरस्त एव भवति। कमपि पुरुषं पशुं वा कस्याप्युत्तेजकस्य सविधे प्रयोगशालायां समुपस्थाप्य तस्य प्रतिक्रियाया वस्तुतन्त्रात्मकवैज्ञानिकविधिनाकलनात्मकं निरीक्षणमेव वस्तुतो वैज्ञानिकीं सामग्रीं प्रदातुं प्रभवति। वाट्सनमहोदयस्तच्छिष्याश्चाऽध्ययनसंवेगप्रवृत्तिव्यक्तिविकासादिक्षेत्रेषु महत्त्वपूर्णान् प्रयोगान् कृतवन्तः।

(ई) समष्टिवादः[1]—अयं सम्प्रदायः निर्मितिवादव्यवहारवादयोः प्रतिक्रियारूपेण समजनि। अस्य प्रवर्तका जर्मनदेशीयमनोवैज्ञानिकवरेण्याः प्राध्यापककोहलर-कोफ्को-वर्दीमरमहोदया[2] आसन्। तेषां मतेऽनुभवव्यवहारयोर्घटकद्वये प्रविभाजनं नैव साम्प्रतं प्रतिभाति। उदाहरणतो निर्मितिवादश्चैतन्यस्य पृथक् पृथग् निर्मितिघटकेषु प्रविभाजनं समीचीनं मन्यते। व्यवहारवादोऽपि उत्तेजकप्रतिक्रियारूपे घटकद्वये प्रविभाज्य मनोविज्ञानस्याऽध्ययनमुपक्रमते। द्वे एव मते न समीचीने। समष्टिवादिनां मतेऽनुभवश्च व्यवहारश्चेति स्वत एव पूर्णा समष्टिः, न तयोः पार्थक्येन प्रविभक्तेषु घटकेषु विभाजनं कर्तुं शक्यते, यद्यपि किञ्चित्सम्बन्धस्थापनं समष्ट्यवयवयोरवगन्तुं शक्यते। अस्य सम्प्रदायस्य केचित् प्रयोगा अस्माभिः प्रत्यक्षाध्ययनविचारादिविवेचनावसरे प्रदर्शयिष्यन्ते।

(उ) मनोविश्लेषणम्—अन्येभ्यः सम्प्रदायेभ्यो विशिष्टं पदमधितिष्ठति। अस्य प्रवर्तका आस्ट्रियादेशस्थवियनानगरस्य प्रतिभाशालिनश्चिकित्सकप्रवराः फ्रायड्महाशया[3] आसन्। असामान्यमानसिकरोगस्नायविकामयपरिपीडितानां जनानां चिकित्सायामनुरक्तैनैव तेनाऽयं मनोविज्ञानस्य महत्त्वपूर्णः सम्प्रदायः प्रादुर्भावितः। शतद्वयोत्तरविंशतिसहस्ररोगिणामसामान्यमानसिकरोगाणामध्ययनेन तेषाञ्च सफलचिकित्सया फ्रायड्महोदयो मनोविज्ञानक्षेत्रेऽभूतपूर्वस्य मनोविश्लेषणविधेराविष्कारमकरोत्। आश्चर्यजनकसाफल्यसमन्वितोऽयं मनोविश्लेषणविधिर्व्यक्तित्वविकासस्याऽसामान्यव्यवहारस्य च जटिलतमानां कासाञ्चित् समस्यानां समाधानं साफल्येन कर्तुमर्हति। फ्रायड्महोदयानां तेषाञ्च प्रमुखानुयायिनां मतमस्माभिः पञ्चदशेऽध्याये विवेचयिष्यते।

६. मनोविज्ञानस्येतरविज्ञानैः सम्बन्धः

(अ) प्राणिविज्ञानेन सह सम्बन्धः—अस्मिन् युगे प्राणिविज्ञानस्य मनोविज्ञानस्याऽध्ययनविधौ महान् प्रभावो दृश्यते। ननु किं मनोविज्ञानं प्राणिविज्ञानाङ्गभूतम्! अत्रोच्यते—मनोविज्ञानं प्राणिविज्ञानस्याङ्गभूतं विज्ञानं नास्ति। इदं तु स्वतन्त्रं विज्ञानम्। यद्यपि

---

१. तुलनार्थम्—Gestalt school.

२. तुलनार्थम्—wolfang kohler, kurt koffka, & warthemer.

३. तुलनार्थम्—Sigmund freud.

स्वकीयानुसन्धानावश्यकतानुसारं प्राणिविज्ञानेन निर्णीततथ्यानां सिद्धान्तानां वा समादरोऽत्राऽपि क्रियत एव। प्राणिविज्ञानं खलु जीवनधारिणां प्राणिनां पशूनाञ्च यथा जीवनं प्रादुर्भवति, यथा चाऽस्याऽनुकूलपरिस्थितौ संरक्षणं भवितुमर्हतीति विचारयति। प्राणिविज्ञानेनाऽपि मानवजीवनरहस्योद्घाटने महान् प्रयत्नः क्रियते। केन प्रकारेण कोषाणुकश्रृङ्खलायां मनोविकासः सञ्जायते? केन प्रकारेण विषमपरिस्थितावुपस्थितायां कथं जीवनरक्षार्थं प्राणिना प्रतिक्रियाभेदेन सामञ्जस्यस्थापनं क्रियते। प्राणिविज्ञानविशारदा विकासवादमतमनुसृत्येदमङ्गीकुर्वन्ति यद्धि मानसिकोच्चस्तरीयक्रियाणां विचारविवेकप्रयत्नेच्छादीनां विकासस्तदा समुद्भवति, यदा तस्यावश्यकता परिस्थित्या सह सामञ्जस्यसंस्थापनेऽनिवार्या सञ्जायते। किञ्च, विविधेन्द्रियाणां विकासोऽपि परिस्थित्यनुगृहीतसामञ्जस्येनैव संसिद्ध्यति। प्राणिविज्ञानन्तु जडभूतादिभ्य एव चैतन्यविकासमवधारयति। मनोवैज्ञानिकास्तु विकासवादीयामनुसन्धानपद्धतिमेवानुसरन्ति। किन्तु तेषामियं चिन्ता नास्ति कथं हि खलु चैतन्यतत्त्वोद्भवो जडभूतादिसङ्घटनेन सम्भवतीति। मनोवैज्ञानिकास्तु उत्पन्नं चैतन्यं किं वा वस्तुभूतं चैतन्यमेवाऽध्ययनविषयत्वेनाऽङ्गीकुर्वन्ति। ते तु सिद्धवस्तुचैतन्येन मनोरूपेण जनितानां क्रियाणामिच्छासंवेगादीनां यथाभूतानां वाह्यव्यवहाराणां चाध्ययनं गवेषणालक्ष्यमवधारयन्ति। अतोऽस्ति सुदृढो दृष्टिभेदः प्राणिविज्ञानमनोविज्ञानयोः। अपि च, सन्ति हि बहवोऽर्वाचीना मनोवैज्ञानिका विशेषतो व्यवहारवादानुसारिणो ये प्राणिविज्ञाननिदर्शितां प्राणिविकासपद्धतिं मनोविकाससरणिञ्च स्वीकुर्वन्ति। ते चोच्चस्तरीयमानसिकक्रिया जीवनधारणार्थसमुपयुक्तप्रतिक्रियारूपेणैवाङ्गीकुर्वन्ति। अस्माभिरपि चैतन्यविकासो मनोविकासश्च तेषां मतं पुरस्कृत्यैवाऽत्र द्वितीयेऽध्याये वर्णितः। किन्तु नैतेनैव विवेचनेन मनोविज्ञानस्य कथा परिसमाप्यते। वस्तुतस्तु प्राणिविज्ञानस्य गवेषणायाः परिसमाप्तावेव मनोविज्ञानस्य प्रमुखसमस्या स्वच्छक्षितिजे समुद्भवति। यत्तु प्राणिविज्ञानविशारदैरुक्तं यद्धि चैतन्यं जडभूतपरिणाममात्रमिति। नास्त्यत्र मतैक्यं मनोवैज्ञानिकानाम्। सन्ति हि प्राध्यापकवार्डप्रभृतय आचार्या ये आत्माऽस्तित्वमङ्गीकुर्वन्ति। सन्ति चान्येऽस्माकं गुरव आत्रेयमहोदया इव, ये हि खलु चैतन्यस्य पारलौकिकजीवनसत्तामङ्गीकुर्वन्ति। इदमपि वक्तुं न शक्यते यद्धि तेषां गवेषणाप्रणाली वैज्ञानिकी नास्ति। वस्तुतस्तु मनोविज्ञानस्याऽस्त्येकोऽध्यात्मवादनामा सम्प्रदायः, यस्य विवरणमस्माभिः पूर्वं यद्यपि न समुपस्थापितम्। अस्तु, तावन्मनोविज्ञानप्राणिविज्ञानयोर्लक्ष्यभेदः सुस्थापितः। अस्मिन् युगे वस्तुतः किमपि विज्ञानं स्वतन्त्रं भवितुं नार्हति, किमुत मानवस्वरूपनिर्धारणसन्नद्धानि विज्ञानानि। यत्तु स्वातन्त्र्यमस्माभिरुक्तं मनोविज्ञानस्य तत्तु लक्ष्यमभिसन्धायैव। अनुसन्धानमार्गे विद्वद्भिरन्यविज्ञानेषु पारङ्गतानामाचार्याणां निर्णीततत्त्वानां समुपयोगस्तु क्रियत एव। एवमेव मनोविज्ञानेनाऽपि प्राणिविज्ञानगवेषितमान्यतानां समुपयोगः स्वविज्ञाननिरूपणे क्रियत एव। अतस्तत्स्वातन्त्र्यमपि गवेषणायां सम्प्रस्तुतायां सापेक्षमेव भवितुमर्हति। महदिदं हि खलु प्राणिविज्ञानस्य गौरवं यदनेन प्रतिपादितो विकासवादः साम्प्रतं सर्वैर्विज्ञानैर्वैज्ञानिकसरणिश्रृङ्खलारूपेण मन्यते। मनोविज्ञानमपि सुतरां प्राणिविज्ञानेनानुगृहीतं भवति, किन्तु नास्ति तस्याङ्गभूतं विज्ञानम्। अयमुपजीव्योपजीवकसम्बन्धो नास्माभिराद्रियते। प्राणिविज्ञानमपीतरथा सुविकसितमानवस्य प्रतिक्रियाणां प्रौढेऽध्ययने मनोविज्ञानस्याध्ययनेनानुगृहीतं भवितुमर्हति।

(आ) शारीरविज्ञानेन साकं सम्बन्धः—मनोविज्ञानस्य शारीरविज्ञानौचित्यमीमांसादिभिः सम्बन्धनिर्देशोऽस्माभिः पूर्वमेव कृतः। किन्तु स तु समासत एवासीत्। अत एवात्र

विशदविवेचनस्यावसरः। अस्ति हि मनोविज्ञानस्य प्रतिपाद्यं मनोविक्रियाणामध्ययनम्। मनोविकाराणां मस्तिष्कक्रियाभिः सह नितान्तं घनिष्ठः सम्बन्धो वर्तते। नास्त्येकोऽपि मनोविकारो यस्याऽनुयोगिनी नाडीप्रतिक्रिया न भवेत्। अस्तु तर्हि मनोविज्ञानं शारीरविज्ञानस्याऽङ्गभूतम्, यतो हि मस्तिष्कजनितनाडीक्रियाणामध्ययनं शारीरविज्ञानस्य प्रतिपाद्यमेवास्ति। पूर्वपक्षेऽस्मिन् सम्प्राप्तेऽस्माभिरुच्यते--नैतन्मतं समीचीनम्। शारीरशास्त्रं समस्तशरीरस्य रचनाया अध्ययनं करोति, न केवलं मस्तिष्कसम्बन्धिक्रियाणामेव। शारीरशास्त्रस्य दृष्टिर्यन्त्रवच्छरीररचनायाः सम्यगध्ययन एव। इदं हि साधारणतया वक्तुं शक्यते यच्छारीरविज्ञानेन प्राणिनामध्ययनं निर्जीवपदार्थानामिव सम्पद्यते। शारीरविज्ञाने विभिन्नानामङ्गानां प्रतिक्रियाः पार्थक्यादेवाध्ययनपथमारोहन्ति। अपि च, तासामध्ययनं प्रयोजनवर्जमेव भवति। न तथाऽस्ति मनोविज्ञानतन्त्रे। मनोविज्ञानं प्राणिनो मस्तुलुङ्गस्य क्रियाणामेवाध्ययनं करोति, न तु सर्वस्य शरीरस्य रचनायाः। शारीरविज्ञानेन यन्मस्तुलुङ्गस्याध्ययनं क्रियते तत्तु संक्षेपत एव। यतो हि दशसंस्थानेषु शारीरविज्ञानस्य विषयीभूतेषु नाडीसंस्थानं कोणैकनिक्षिप्तमेवास्ति। अपि च, मनोविज्ञानं मनसः क्रियाणां मस्तिष्कक्रियाणाञ्च प्रयोजनात्मकमध्ययनं करोति। उक्तं ह्यभियुक्तैः "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति।

मनोविज्ञानं हि खलु मानसिकक्रियाणां तत्सहकारिनाडीसंस्थानगतप्रतिक्रियाणां चाध्ययनमेवं करोति यदनेन पूर्ववर्तिपरिस्थितीनां कारणभूतानामुत्तरभाविनीनां सामाजिकव्यवहारानुगतप्रतिक्रियाणाञ्च कार्यभूतानामवगमः सूत्रबद्धमनोवैज्ञानिकेतिहासशृङ्खलासमन्वितः सम्भवेत्। नेदमध्ययनं प्रयोजनव्यतिरिक्तं कर्तुं शक्यते। अपि च, मनोविज्ञानाऽधिकृता गवेषणा न निर्जीवपदार्थजातस्य गवेषणेव; किं वा यन्त्रानुसन्धानमिव सम्भवति, नैव चेयं यन्त्राङ्गानां पृथक्कृतानामध्ययनमिव भवति। मनोविज्ञानचिन्ता तु प्राणिनो निखिलप्रतिक्रिया अध्ययनलक्ष्यं स्वीकुरुते। समग्रप्राणिनः प्रतिक्रिया विवेकान्विताः प्रयोजनान्विता वा भवन्ति। अत एव सिद्धो हि दृष्टिभेदः शारीरविज्ञानमनोविज्ञानयोः। एतावतेदमपि साधितं यन्नास्ति मनोविज्ञानं शारीरविज्ञानाङ्गमात्रम्। मनोविज्ञानं तु स्वतन्त्रं विज्ञानमिति सुनिश्चितमेव।

अस्ति खलु हि मनोविज्ञानस्यैका विशिष्टा शाखा, या मस्तिष्कस्य विशदमध्ययनं स्वलक्ष्यं निश्चिनोति। इदन्तु शारीरकं मनोविज्ञानम्। अस्माभिरस्योल्लेखः पूर्वमेव कृतः, लक्ष्यमपि च निर्दिष्टम्। यद्यप्यधुना मनोविज्ञानपारङ्गतैरियमाशा तु परित्यक्तेव वर्तते यद्धि मस्तिष्कसंस्थानस्य सम्यगनुसन्धानेन वयं मनःस्वरूपमुद्घाटयितुं सफला भविष्याम इति, तथाप्युत्तरोत्तराध्ययनेन मनोविज्ञानस्येदं स्फुटतरं प्रतिभाति यन्मनोविकाराणां शरीरान्तर्गतक्रियाणाञ्च महत्तरमन्योन्याश्रयत्वं विद्यते। मूलतश्चेतनः प्राणी त्वेक एव। तस्यैव प्राणशक्तिर्द्विविधकार्यसम्पादने क्षमा भवति, मनोव्यापारं शरीरव्यापारञ्चेति। प्राणिविज्ञानस्येदं मौलिकं तथ्यमर्वाचीनैर्मनोविज्ञानविशारदैरङ्गीक्रियते। अस्माभिरप्यस्य ग्रन्थस्याऽग्रिमे विवेचनेऽस्य मौलिकतत्त्वस्याङ्गीकरणमनुमन्स्यते। मनोविज्ञानं नाडीविज्ञानस्य विशिष्टमध्ययनं करोत्येव। तस्मिन्नध्ययने शारीरविज्ञानानुसन्धानेभ्योऽपि महत्साहाय्यमवाप्यते। शारीरविज्ञानेनाऽपि किं वायुर्वेदविज्ञानेनाऽपि मनोविज्ञानगवेषणाभिश्चिकित्सापद्धतिपरिष्कारे महत्साहाय्यं यथाऽवाप्तुं शक्यते, तथाऽस्माभिरसामान्यमनोविज्ञानप्रदर्शितमनोविश्लेषणादिसमन्वितचिकित्साप्रणालीनिर्देशनवेलायां प्रतिपादयिष्यत एव। मनोविज्ञानाङ्गभूतं विज्ञानद्वयमस्ति--परिचर्यामनोविज्ञानमसामान्यचिकित्सामनो

विज्ञानं चेति। अतः[१] सिद्धं मानवसेवादक्षयोरायुर्वेदमनोविज्ञानयो रुचिसाम्यम्, किन्तु नानेन मनोविज्ञानस्योपजीवकत्वं सिद्धं भवति।

(इ) न्यायशास्त्रेण सम्बन्धः—न्यायशास्त्रं तर्कशास्त्रापरपर्यायं सर्वशास्त्रोपकारकं भवति। उक्तं हि विद्यासमुद्देशप्रकरणे आचार्यप्रवरेण विष्णुगुप्तेनाऽपि—

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता[२]॥

एवम्भूतं न्यायशास्त्रं मनोविज्ञानस्यापि महदुपकारकं सिद्धं भवति। न्यायशास्त्रस्य प्रतिपाद्यमस्ति सत्यासत्यानुसन्धानम्। प्रमायाः किं लक्षणम्? प्रमाणस्य किं लक्षणम्? कति वा भेदाः? कानि च प्रमाणानि? किमस्ति हि प्रमायाः प्रमात्वलक्षणमित्यादयः प्रश्ना न्यायशास्त्रेण मीमांस्यन्ते। सत्यत्वनिकषं निर्धार्य्य प्रतिकूलमतानां निवारणमप्यत्र क्रियते। युक्तिपुरस्सरं पञ्चावयववाक्यप्रयोगविधिञ्च न्यायशास्त्रमेव निश्चिनोति। कस्या अपि विचाराभिव्यक्तेः सम्यक्पद्धतेः परीक्षा न्यायशास्त्रस्य लक्ष्यं भवति। एवं मनोविज्ञानमपि न्यायशास्त्रस्य ऋणि भवत्येव। तथाप्यस्ति लक्ष्यभेदः पद्धतिभेदश्च मनोविज्ञानन्यायशास्त्रयोः। मनोविज्ञानस्य प्रतिपाद्यं सर्वा एव मानसक्रियास्तासामभिव्यक्तिरूपव्यवहारश्च। मानसक्रियाश्चानन्ताः। तासां वर्गीकरणं संक्षेपतश्चिन्तनम्, संवेदनम्, प्रयतनञ्चेति त्रिधा कर्तुं शक्यते। चिन्तनं हि विचारपर्यायमेव। विचारमात्रं न्यायशास्त्रस्य विवेच्यं क्षेत्रम्। किन्तु मनोविज्ञानस्याध्ययनक्षेत्रे विचारातिरिक्तसंवेदनप्रयतनादीनामप्यन्तर्भावो भवति। अत एव मनोविज्ञानस्य विषयक्षेत्रं न्यायशास्त्रस्य विषयक्षेत्रादस्ति हि बृहत्तरम्। अपि च, मनोविज्ञानं वस्तुतन्त्रात्मकं विज्ञानम्। अस्य लक्ष्यं तु धारावाहिकचैतन्यस्य क्रियाणां सम्यङ्निरूपणं पूर्वापरसम्बन्धसमन्वितं व्याख्यानञ्च। नास्ति न्यायशास्त्रं वस्तुतन्त्रात्मकमपि तु प्रतिमानात्मकम्। सत्यत्वप्रतिमाननिर्धारणपरायणं न्यायशास्त्रं न विचाररूपविवेच्यतत्त्वस्य यथावस्तुभूतं विवरणं समुपस्थापयति, अपि तु यथा सत्यो विचारो भवितुमर्हस्तथात्मकस्य विचारस्यैव स्वरूपान्वेषणं न्यायशास्त्रैकलक्ष्यं भवति। अतो हि सिद्धो दृष्टिभेदो लक्ष्यभेदश्च। वस्तुतस्तु मनोविज्ञाननिर्भरं न्यायशास्त्रं न्यायशास्त्रनिर्भरं मनोविज्ञानञ्च भवति। मनोविज्ञानं चिन्तनक्रमं यथाभूतं मानसप्रत्यक्षेण सोद्देशं प्रकटयितुं प्रभवति। न्यायशास्त्रमपि मनोविज्ञानान्वेषिततत्त्वानां प्रमात्वं यथाभूतत्वं वाऽप्रमात्वं भ्रमत्वं वा निश्चेतुं प्रभवति।

(ई) औचित्यमीमांसया, (उ) सौन्दर्यशास्त्रेण च सम्बन्धः—एवमेवौचित्यमीमांसायाः सौन्दर्यशास्त्राच्चापि मनोविज्ञानस्य वैलक्षण्यं प्रतिपादयितुं शक्यते। औचित्यमीमांसासौन्दर्यशास्त्रे प्रतिमानात्मके तन्त्रे। औचित्यमीमांसा औचित्यानौचित्यगवेषणायामनुरक्ता भवति। सौन्दर्यशास्त्रं च सौन्दर्यासौन्दर्यनिकषनिर्धारणे संलग्नं भवति। यद्यपि प्रतिमाननिर्धारणे स्वतन्त्रे हीमे तन्त्रे, किन्तु काभ्यां परिस्थितिभ्यां सौन्दर्यप्रतिमाननिर्धारणमौचित्यस्य निर्धारणं वा विवेकान्वितमविवेकान्वितं वा भवतीति समस्यायाः समाधानं मनोविज्ञानाश्रितमेव भवति। बहुशो दृश्यते यच्छलच्छद्मपरायणैरौचित्यनिर्धारणमारोपात्मकं प्रतिपाद्यते। स्वार्थपरायणाः स्वात्मानमनेकवारं परमार्थानुरागिणमिव प्रकटयन्ति द्योतयन्ति च। सुप्रथितमिदं यत्—

परोपदेशवेलायां शिष्टाः सर्वे भवन्ति वै।
विस्मरन्तीह शिष्टत्वं स्वकार्ये समुपस्थिते॥ इति।

---

१. तुलनार्थम्—Psychology of Nursing and psychopathology.

२. कौटिलीयमर्थशास्त्रम् १।२ तुलनार्थम्—वात्स्यायनकृतन्यायसूत्रभाष्यम् १।१।१

एतादृशां छद्मयुक्तानामौचित्यव्याख्यानप्रयोजनोद्घाटनसामर्थ्यं मनोविज्ञानमन्तरौचित्यमीमांसायाः कथमपि नास्ति। अत एव सिद्धा खलु मनोविज्ञानस्याऽध्ययनस्य महत्त्यावश्यकता कर्तव्यशास्त्रस्य विवेचकेभ्यः। एवमेव सौन्दर्यनिरूपणमपि पुरुषतन्त्रं भवति। प्रतिमाननिर्धारणे विकारसम्भावना भवत्येव, पुरुषेच्छाधीनत्वात्। उक्तं ह्यभियुक्तैः—

दधि मधुरं मधु मधुरं द्राक्षा मधुरा सिताऽपि मधुरैव।
तस्य तदेव हि मधुरं यस्य मनो यत्र संलग्नम्॥

प्रायशः पुरुषा आदर्शप्रतिमानं गृहीत्वाऽपि रागद्वेषाऽभिभूताः सुन्दरमसुन्दरं वक्तुं प्रभवन्ति, न तु प्रभवन्त्येवाऽपि तु निर्धारयन्त्यपि। सुतरां तेषां छलच्छद्माभ्युपेतदृष्टिकोणाऽभिव्यक्त्यर्थं मनोविज्ञानस्य प्रौढमध्ययनं नितरामपेक्ष्यत एव।

(ऊ) दर्शनेन मनोविज्ञानस्य सम्बन्धः—मनोविज्ञानस्य दर्शनेन सह सर्वाधिकप्रगाढतमः सम्बन्धो वर्तते। दर्शनपितुः कनिष्ठतमा पुत्रीभूता हि खलु मनोविज्ञानविद्या। आ-एकोनविंशतिशताब्दि मनोविज्ञानस्य विवेचनं दर्शनाङ्गभूतमेवासीत्। किन्तु तदनन्तरम् 'अर्थो हि कन्या परकीय एव' इति काण्वन्यायमनुस्मृत्य मनोविज्ञानविद्या स्वकीयं नवं गृहं स्थापयति स्म। ननु दर्शनशब्दस्य कोऽर्थः? अत्रोच्यते-दृश्यतेऽनेन इति दर्शनम्। दर्शनस्यार्थद्वयम्-चाक्षुषी, दर्शनविद्या च। यया विद्यया तत्त्वस्य चरमवस्तुस्वरूपस्य ज्ञानं भवेत् सा दर्शनाख्यां भजते। अस्ति हि दर्शनस्य षड्विधं लक्ष्यम्। प्रत्येकविधस्य लक्ष्यस्य पूर्तिरेकेन विशिष्टेन दर्शनाङ्गेन क्रियते। यथा हि—

(अ) तत्त्वमीमांसा—किं वा तत्त्वज्ञानमस्य ब्रह्माण्डस्य मौलिकतत्त्वस्य स्वरूपनिरूपणमधिकृत्य प्रवर्तते। अस्याः प्रश्नोऽपि पुरातन एव। अस्य प्रश्नस्य स्वरूपं नासदीये सूक्तेऽपि लक्षितं विद्यते—"को अद्धा वेद क इह प्रवोचत् कुत आजाता कुत इयं विसृष्टिः" इति[1]। ननु सृष्टेर्मूलतत्त्वं प्रकृतिरस्ति? आहोस्विद् ब्रह्म? किमस्ति ब्रह्मणः स्वरूपमित्यादिप्रश्नशतानि जटिलतमानि तत्त्वमीमांसा गवेषयति।

(आ) ज्ञानमीमांसा—दर्शनस्य द्वितीया दुरूहतमा समस्या ज्ञानस्वरूपं वर्तते। इदन्तु ज्ञानमीमांसया विवेच्यते। ननु किमस्ति ज्ञानस्वरूपम्? किमस्ति प्रमात्वप्रयोजकम्? कानि प्रमाणान्युपादेयानि? कियती वा तेषां संख्या? कानि च ज्ञाननिबन्धनानि? किमस्ति खल्वपरोक्षानुभूतेस्तात्त्विकं स्वरूपमित्यादिप्रश्नशतोद्भावनं समाधानञ्च ज्ञानमीमांसा विवेचयति।

(इ) अध्यात्मविद्या—दर्शनस्य तृतीयं प्रष्टव्यमस्ति, ननु किमस्त्यात्मनः स्वरूपमिति? किन्तु खलु मनःस्वरूपम्? किमात्माऽस्ति ज्ञानाधिष्ठाता, ज्ञानप्रकाशक आहोस्विन्मनः? एतादृशानि प्रश्नशतानि या विद्या यद्दर्शनाङ्गमनुसन्दधाति, सा अध्यात्मविद्येति नाम्ना प्रथते। अस्माकं मनोविज्ञानमप्यस्याऽध्यात्मदर्शनस्य सन्ततिरेव। सम्प्रति तु मनोविज्ञानेनाऽर्वाचीनेन स्वपितुः कक्षं विहाय स्वकीयं स्वतन्त्रं गौरवास्पदं स्थानं विज्ञानश्रेण्यां सम्प्राप्तम्। किन्तु मनोविज्ञानस्य मूलतस्तात्त्विकी समस्याऽध्यात्मदर्शनाऽभिन्नैव।

(ई) औचित्यमीमांसा—चतुर्थी दर्शनस्य शाखा औचित्यमीमांसाख्यया अभिहिता भवति। तस्याः प्रतिपाद्यं तु कर्तव्याकर्तव्यप्रतिमाननिर्धारणमेव।

(उ) न्यायशास्त्रम्—पञ्चमन्तु दर्शनाङ्गं न्यायशास्त्रमित्यभिधानेन सुप्रथितमेव विदुषां

---

१. द्रष्टव्यः ऋग्वेदः १० । १२९

भारतीयतत्त्वपारदर्शिनाम् । अस्य तात्त्विकं स्वरूपं तु सत्याऽसत्यत्वप्रतिमानगवेषणमस्ति । प्रमात्वस्य किं विनिगमकम् ? किं लोकोत्तरं ज्ञानमपि प्रमा भवितुमर्हति ? पञ्चावयववाक्यस्य हेतूनां प्रमाणानाञ्च स्वरूपस्य विशदं विवेचनं न्यायशास्त्रेणैव विविच्यते ।

(ऊ) सौन्दर्यशास्त्रम्—दर्शनस्य षष्ठमङ्गम् सौन्दर्यशास्त्रमस्ति । अनेन तन्त्रेण सौन्दर्यासौन्दर्यस्य प्रतिमाननिर्धारणं क्रियते ।

न्यायशास्त्रौचित्यमीमांसासौन्दर्यशास्त्रमिति शास्त्रत्रयं प्रतिमानात्मकं भवति । प्रथमत्रयन्तु तत्त्वज्ञानज्ञानमीमांसाऽध्यात्मदर्शनमिति तु प्रायशो वस्तुतन्त्रात्मकं भवति । अस्माभिरत्र प्रायश इति पदं साभिप्रायं प्रदत्तम्, यतो हि ज्ञानमीमांसायाः कलेवरे कतिपयसमस्यानां विवेचनं प्रतिमानात्मकमपि भवत्येव ।

अस्ति हि खलु सप्तममप्यङ्गं दर्शनस्य । उपर्युक्तानि षडङ्गानि तु दर्शनस्य प्राच्यपाश्चात्य-दर्शनेषु समानतयोपलभ्यन्ते, किन्तु सप्तममङ्गं तु भारतीयदर्शनस्य वैशिष्ट्यमेवावहति । इदं तु तत्त्वसाधनेति किं वा साधनेति योग इतिपदेन वा वक्तुं शक्यते । साधना तु मोक्षपरा । आमुष्मिकं पुरुषार्थं स्वनिर्णीततत्त्वानुसारं साक्षात्कर्तुं हि खलु साधना प्रवर्तते । अस्या लक्ष्यं त्वपरोक्षानुभूतिस्तत्त्वसाक्षात्काराख्या । साधना तु साम्परायचिन्तनसमन्वितयोगसाधनपरा हि खलु भवति । भारतीयदर्शनस्य गौरवं त्विदमेव यदत्र विचारोत्कर्षसहकारित्वेन शमदमादिसाधन-सम्पत्तिरप्यनिवार्या सर्वैर्दर्शनसम्प्रदायैरेवाऽभिमन्यते । नेदं यत्साधनाया विवेच्यं नीतिशास्त्रप्रतिपा-द्यान्तर्गतमेवास्ति । नीतिशास्त्रमैहिकपुरुषार्थविनिश्चयं करोति । आमुष्मिकपुरुषार्थस्य मोक्षरूपात्मकस्य नास्ति नीतिशास्त्रे काऽपि विचारणा । यदुचितं तत्रैहिकं कर्म । यन्नोचितं तदप्यैहिकमेव कर्म । सुतरां साधनापि दर्शनस्य मौलिकीमावश्यकतां पूरयति । अस्या निरूपणं मैत्रेय्याः परम-पवित्रशब्देष्वतिरमणीयतरमुपलभ्यते—"किं तेनाहं कुर्यां येन नाहममृता स्याम्" इति[1] । अमर-त्वपदगवेषणन्तु मानवहृदयस्य पुरातनोऽभिलाषः । कथन्नु खलु दुःखस्याऽत्यन्तिकं प्रहाणं भवितु-मर्हति ? अयमेव चरमः प्रश्नः परमकारुणिकसांख्याचार्यानुयायिभिरीश्वरकृष्णैरप्येवमुट्टङ्कितः—

दुःखत्रयाभिघाताज्जिज्ञासा तदभिघातके हेतौ ।
दृष्टे सापार्था चेन्नैकान्ताऽत्यन्ततोऽभावात्[2] ॥ इति ।

अत एव सिद्धं हि सुष्ठु साधनाया योगशास्त्रस्य वा दर्शनाङ्गत्वम् । पाश्चात्याः साधना-दर्शनं योगशास्त्रापरनामधेयं धर्माङ्गत्वेन स्वीकुर्वन्ति । किन्तु यदि धर्मस्य कल्पना रूढिविरहिता दर्शनोद्भाविता भवेन्मन्ये नास्ति कोऽप्यवकाशः सार्वभौमधर्मदर्शनयोर्वैषम्यप्रतिपादनाय । अपि च साधनाया दर्शनाङ्गत्वमप्यापाततो निःसन्दिग्धं सिद्ध्यति । दर्शनस्यैकमन्यदपि प्रतिपाद्यं भवति । तद्धि विभिन्नेषु विज्ञानेषु विरोधिष्ववभासमानेषु सामञ्जस्यस्थापनमिति । नैतदर्थं किमपि स्वतन्त्रमङ्गमस्ति । अस्माभिरिदं दर्शनस्वरूपं मनोविज्ञानवैशिष्ट्यप्रदर्शनार्थं स्थालीपुलाकन्यायेनो-ल्लिखितम् । ननु किमस्ति मनोविज्ञानस्य स्वातन्त्र्यविनिगमकम् ? अत्रोच्यते—अध्यात्मदर्शनं तु विवेचनात्मकं विशेषतोऽन्तर्मुखं रहस्यगर्भितं भवति । मनोविज्ञानन्तु प्रयोगात्मकनिरीक्षणसमुपोढं बहिर्मुखं बाह्यव्यवहाराध्ययनसमन्वितं रहस्यान्धविश्वासनिरस्तवैज्ञानिकप्रणाल्यनुसारि भवति । मनो-

---

१. द्रष्टव्या—बृहदारण्यकोपनिषद्

२. द्रष्टव्या—सांख्यकारिका १

विज्ञानं मानवस्वरूपस्योद्घाटनपरायणं भवति। अस्यां गवेषणायामर्वाचीनस्य मनोविज्ञानस्य बाह्यव्यवहारमभिमुखीकृत्य मानसिकक्रियाणामध्ययनमेव लक्ष्यं वर्तते। मनोविज्ञानमद्यावधि आत्मतत्त्वं चैतन्याधिष्ठानं नाङ्गीकरोति। तैरभिमतं मन एव चैतन्याधिष्ठानमस्ति। अपि च, यत्किञ्चित्साम्यं मनोविज्ञानाध्यात्मदर्शनयोर्विद्यते, महच्चेदं साम्यम्। तत्तु मनसः किं वा चैतन्याऽधिष्ठानस्यामुष्मिकसत्त्वविषयानुसन्धानमस्ति। अस्ति हि खलु मनोविज्ञानस्यैका नवीनतमा शाखा 'वैज्ञानिकाध्यात्मानुसन्धानम्' इति नाम्नी[1], यया चैतन्यतत्त्वस्य साम्परायिकसत्त्वविनिश्चयं कर्तुं मनोवैज्ञानिकानामनुसन्धित्सा प्रथते। अस्या अपि प्रणाली प्रयोगात्मिका, वैज्ञानिकप्रणाल्यनुसारिण्येव। अतः सिद्धं मनोविज्ञानस्य दर्शनात् स्वातन्त्र्यं पार्थक्यञ्च। सुनिष्पन्नमेतद् यद्यध्यात्मतत्त्वगवेषणायां मनोविज्ञानस्य विवेच्यं दर्शनोपबृंहितं भवत्येव। अपि च, मनोविज्ञानस्यानुसन्धानजातैरध्यात्मदर्शनस्याऽपि महत् साहाय्यं भविष्यतीत्यत्र नास्ति सन्देहावकाशः। सम्प्रति तु मनोवैज्ञानिकानां केन्द्रीभूतं लक्ष्यं मनोविक्रियाभिः सह मानवस्य बाह्यव्यवहारस्य साङ्गोपाङ्गमध्ययनमेव। एतदर्थमर्वाचीनेभ्यो मनोवैज्ञानिकेभ्यो दर्शनाङ्गभूतं मनोविज्ञानस्वरूपनिर्धारणं नातिरोचते।

(७) मनोविज्ञानाऽध्ययनस्योपयोगित्वम्

यद्यपि विशुद्धं विज्ञानं ज्ञानोपार्जनार्थमेव प्रयुज्यते, तस्योपयोगित्वानुपयोगित्वकल्पनं विज्ञानक्षेत्राद्बहिरेवावतिष्ठते, तथापि मनोविज्ञानस्य विशुद्धविज्ञानस्योपयोगित्वविवेचनमत्रास्माभिः सन्निवेशितम्। तत्तु प्रपञ्चनं केवलं प्रारम्भिकपाठकस्य रुचिसंवर्धनायैव, यतो हि रुचिसंवर्धनं मनोवैज्ञानिकशिक्षणपद्धतेर्निरतिशयं वैशिष्ट्यमावहति। मनोविज्ञानं हि खलु सम्प्रति पदे पदे मानसिकद्वन्द्वोपेतानां सभ्यतासङ्घर्ष-सामाजिकप्रतिद्वन्द्विता-युद्धविभीषिकादिजन्यजटिलतमपरिस्थितिषु वर्तमानानां मानवानां स्वस्थसन्तुलितजीवनयापन-विधिप्रदर्शनक्षमः सुमहान् कल्पवृक्षः। जन्मन आरभ्य मरणपर्यन्तं यदि किमपि विज्ञानं मानवसेवायां परायणमस्ति तत्तु मनोविज्ञानमेव। शैशवे बाल्ये च पालनपोषणशिक्षणप्रकारं प्रदर्श्य चरित्रविकासस्य भूमिकां मूलप्रवृत्तीनामुदात्तीकरणेन द्रढयति, विकृतानां बालकानां परिष्कारपद्धतिमपि द्योतयति, वयःसन्धिकाले यौवनप्रभाते च बालकबालिकानां कथं पथप्रदर्शनं कर्तव्यमित्यपि द्योतयति। शिक्षण-विधावपराधिबालकानां दण्डं विहाय सन्मार्गप्रदर्शनविधौ च मनोविज्ञानेनामूलचूलं परिवर्तनं सम्पादितम्। अमानुषिकाऽमनोवैज्ञानिकदण्डप्रकारान् प्रति विरोधिमतमुत्पाद्य मानवस्वभावं प्रति नितरामुदारं सहिष्णु मानवीयं दृष्टिकोणं प्रेर्य संहितानां परिष्कारं मनोविज्ञानमेव करोतिस्म। सर्वोत्तमा ह्यर्वाचीनस्य मनोविज्ञानस्य सेवा असामान्यमनोविज्ञानक्षेत्रे लक्ष्यन्ते। असामान्यावस्थां नीयमानानां कारणानामनुसन्धानं मनोविश्लेषणादिसाधनैः सम्पाद्य तस्या निवारणप्रकारमपि सुचारुतरं मनोविज्ञानं निर्दिष्टवत्। आयुर्वेदचिकित्साप्रणालीसमकक्षैवेत्थं मनोवैज्ञानिकचिकित्साप्रणाली प्रचलिता सञ्जाता, या खलु प्रणाली साम्प्रतमौषधविज्ञानपरायणैः सुचिकित्सकैरपि भृशमाद्रियते। सुमहत्सु औद्योगिकसंस्थानेषु दैनन्दिनं श्रमिककार्यक्षमताकौशलस्तरक्लान्तिकारणादिसम्बन्धिन्योऽनेकविधाः समस्याः समुत्पद्यन्ते। मनोवैज्ञानिकास्तासां समाधाने प्रायशः सर्वेष्वेव देशेषु संलग्ना दरीदृश्यन्ते। युद्धविभीषिकाऽपि प्रतिदिनं राष्ट्रेष्वविश्वासं परस्परमुत्पाद्य सर्वत्र शान्तिप्रियाणां मानवानां हृदयं

१. तुलनार्थम्—Psychic Research Society.

दहति। नैवं शक्यते युद्धविभीषिकानिवारणं युद्धलिप्तराष्ट्रनागरिकाणां शिक्षायामन्तर्ग्रन्थिभेदनक्षमाद् मनोवैज्ञानिकप्रदर्शितसुधाराहते। अपि च, मनोविज्ञानं वस्तुतन्त्रात्मकं विज्ञानम्। येऽनेन प्रदर्शितमार्गं नानुसृत्य स्वैरिणो भवन्ति,तेषां स्वकीयं जीवनं द्वन्द्वोद्वेलितमसंयतं दुःखावलिप्तञ्च भवत्येव, ते समाजशरीरेऽपि कुष्ठवदेवावतिष्ठन्ते। अयन्तु समानो न्यायः सामान्यनागरिकेभ्यः समाजनेतृभ्यश्च। अत एव येषामभिलाषः स्वव्यक्तित्वोत्थानाय महत्त्वपूर्णपदलाभाय वा समाजसेवायै वा भवेत्, तेषां कृते मानवस्वभावपरिचयदक्षस्य मनोविज्ञानस्य गम्भीरमध्ययनं नितान्तमनिवार्यं भवतीति॥

इति अर्वाचीने मनोविज्ञाने मनोविज्ञानस्वरूपविवेचनीयः प्रथमोऽध्यायः॥

द्वितीयोऽध्यायः

अथ मनोविकाससहितं नाडीतन्त्रम्

१—विषयोपोद्घातः-

अस्माभिर्मनोविज्ञानस्वरूपं प्रथमाऽध्याये संक्षेपतो व्याख्यातम्। वयमधुना मनोविकासं नाडीतन्त्रञ्च व्याख्यास्यामः। मनोविकासस्य विवेचनेन मानसिकक्रियाणां प्रारम्भिकं स्वरूपं स्फुटतरं भविष्यति। नाडीतन्त्रस्य विवेचनेन मानसिकक्रियानुगतमस्तुलुङ्गजनितक्रियाणां स्वरूपमपि स्पष्टतरं भविष्यति। मस्तुलुङ्गं हि खलु मानसिकक्रियाणां शारीरकं यन्त्रम्। तस्य संक्षिप्तविवरणेन मानसिकक्रियाभिः सह घनिष्ठसाहचर्यसम्बन्धोऽपि सुगमो भविष्यतीत्याशास्यते।

मनोविकासनिरूपणावसरे स्मर्तव्यमिदं यदाधुनिकविज्ञानेषु स्वनामधन्य 'डारविन'-महोदयैः प्रतिपादितस्य विकासवादस्य महान् प्रभावः समुपलभ्यते। श्रीस्पेन्सरमहोदयैरपि विकासवादो दर्शनक्षेत्रे सम्यक्तया प्रतिष्ठापितः। अत एवास्माकं विवेचनमपि न केवलमस्मिन्नेवाऽध्यायेऽपि तु समग्रेऽपि ग्रन्थे विकासवादप्रभावान्वितो भविष्यति। उत्पत्तिमूलकं मनोविज्ञानमस्मान् प्रारम्भिकं मूलतमं मानसिकक्रियाणां स्वरूपं निर्देशयति, अथवा मनोविकासस्य प्रथमामवस्थामवगमयति।

२—बुद्धिमद्व्यवहारस्य किं लक्षणम्?

ननु किमस्ति बौद्धिकक्रियाया विनिगमकम्? अथवा केन लक्षणेन बुद्धेरस्तित्वबोधो भवितुमर्हति? कथं वा प्राणिनः क्रिया मानसिकक्रियाः सन्ति न वेति निश्चेतव्यम्? प्राध्यापक-टॉमसनमहोदयेनाऽस्य प्रश्नस्योत्तरमेवं प्रदत्तम्—"प्राणिनां तत्त्वतो व्यवहारस्तदैव भवति यदा तस्य व्यवहारस्य कर्ता स एव प्राणी, यस्मिंश्च व्यवहारे सुसम्बद्धानां क्रमयुक्तानां कर्मणामन्तर्भाव उपलभ्यते, यश्च निश्चितं कञ्चिद्व्यवहारमुद्दिश्य प्रवर्तितः, यश्च जीवनधारणार्थं सामञ्जस्यस्थापनार्थं नितान्तमपेक्षितो भवति[1]" इति। प्राणिनः क्रिया यदा उद्देश्यपूर्त्यर्थं प्रवर्तिता भवन्ति, यदा च स वातावरणं प्रति स्वकीयां प्रतिक्रियामेवंरूपेण प्रवर्तयति, येनास्य व्यक्तित्वमविच्छिन्नं संरक्षितञ्च भवेत्, येन चास्य प्राणधारणक्षमाणां स्वोद्देश्यानां पूर्तिरपि निर्बाधा भवेत्। एवम्भूताः क्रिया वस्तुतो बौद्धिक्यः क्रियाः। यः प्राणी एवम्भूतां प्रतिक्रियां व्यवहर्तुं क्षमः, तस्य मानसिकक्रियान्वितत्वं बुद्धिमत्त्वं वा सुनिष्पन्नमेव।

---

१. तुलनार्थम्—Prof. J. A. Thompson—"Only in or ganisms, is thre true behaviour in which the creature is an agent and exhipits a correlated and concatenated serice of acts, effective towards some definite results, favourable to the continuance and harmony of vital processes."

ननु किं वृक्षाणामुद्भिज्जानामप्यस्ति एवम्भूतो मानसिकव्यवहारः ? अथवा किमस्ति तेषामपि एवम्भूता बुद्धिमयी प्रतिक्रिया ? लक्षितं हि तेषामौद्भिज्जं कर्म । यथा हि खाद्यग्रहणं रससञ्चारणं रासायनिकान्तःक्रियान्वितत्वं प्रजननञ्चेति । डाक्टरेत्युपाध्यलङ्कृतेन विश्वविश्रुतप्राणिशास्त्रविशारदेन श्रीजगदीशचन्द्रवसुनेदमपि साधितं यद्धि तेषां सुखदुःखानुभूतिमत्त्वमपि विद्यते । स्थावरत्वान्नास्ति तेषां गतिशीलत्वम् । अतस्तेषां बुद्धिसमन्विताः प्रतिक्रिया न भवन्ति, यासां लक्षणमस्माभिरुपरि स्पष्टीकृतम्, यतो हि प्रतिक्रियारूपव्यवहाराय गतिशीलत्वं नितान्तमपेक्षितं भवति । यत्किञ्चिद्धि तेषां सुखदुःखाद्यनुभूतिमत्त्वं वसुमहोदयेन वर्णितम्, तदपि विशिष्टेन्द्रियाभावादनभिव्यक्तस्वरूपत्वादगतिशीलत्वाच्च न मनोविज्ञानप्रतिपाद्यान्तर्भावमर्हति । बुद्धिमद्व्यवहाराय व्यक्तेर्विशिष्टव्यक्तित्वप्रदर्शकाय समग्रशरीरप्रतिक्रियारूपाय समन्वितायेदमनिवार्यं निबन्धनं भवति यद् गतिमत्त्वम् तदनुबन्धिक्रियाशालित्वमपि तस्यैव प्राणिनः सम्भवेत् । प्रतिक्रियोत्तेजकौ वस्तुतः स्थावरजीवने फल्वेव भवतः । अतो वयं बुद्धिमत्क्रियासम्बन्धि इदं विवेचनं पश्वादिप्राणिप्रतिक्रियापरिसीमितमेव करिष्यामः । पशुषु चेमाः प्रतिक्रिया बुद्धिसमन्विताः केवलशारीरिकरासायनिकप्रतिक्रियाभ्योऽतीवोच्चस्तरीया भवन्ति, यतो हि रासायनिकशारीरिकमात्रक्रिया उद्भिज्जादिप्राणिनामिव तत्तत्स्थानमितास्तदङ्गपरिमिता वा भवन्ति, मानसिकक्रियासमन्वितो व्यवहारश्चापरथा पदार्थेतरेषु प्राणीतरेषु वा स्वकीयं प्रभावमप्यावहति । या काचित् क्रिया उत्तेजकप्रतिक्रिययोर्मध्ये संवेदनप्रतिक्रिययोर्वा मध्ये संघटते, सैव मानसिकक्रियेति नाम्ना सञ्चच्छते ।

सुतरां बुद्धिजन्या क्रिया, किं वा मानसिकक्रिया सप्रयोजना भवति । किमप्युद्देश्यमवाप्तुं बुद्धिजन्या क्रिया प्रवर्तते । [1]प्राध्यापकविलियमजेम्समहोदयेनाऽप्युक्तम्—"भाविप्रयोजनप्राप्त्यर्थं प्रवर्तितत्वं लक्ष्यसिद्ध्यनुकूलसाधनावचयत्वं चेति कस्यामपि परिस्थितौ बुद्धिमत्त्वस्य मनःसत्त्वस्य वा लक्षणद्वयम्" इति । दृश्यते हीदं सर्वत्र यद् वयमेतेन लक्षणद्वयेनैव यान्त्रिकमात्रक्रियाभ्यो बुद्ध्यन्वितक्रिया व्यावर्तामहे । जडपदार्थेषु दण्डचत्वरादिषु वयं कदापि बुद्ध्यन्वितत्वं न व्यवहरामः । निष्प्राणः पदार्थस्तु जडः, किन्तु प्राणिनामुद्भिज्जव्यतिरिक्तानामिदं खलु वैशिष्ट्यं भवति यत्ते स्वेच्छानुकूलमन्यक्रियापेक्षया कामपि प्रतिक्रियां कर्तुमकर्तुमन्यथाकर्तुं वा प्रभवन्ति ।

३—निम्नस्तरीयप्राणिनां व्यवहाराध्ययनम्—

अद्यत्वे निम्नस्तरीयसूक्ष्मतमप्राणिनां जीवनवृत्तमपि मनोवैज्ञानिकदृष्ट्या पर्यालोचितं वर्तते। एतेषु निम्नस्तरीयप्राणिषु केचन कीटाणवः सन्ति, येषां नामान्याङ्गलभाषायाम् अमीबा-पैरेमीशिया-स्टेण्टरप्रभृतयः प्रथिताः सन्ति । वयमत्र अमीवेति नाम्नः कीटाणुकस्य जीवनवृत्तं किञ्चिदुपस्थापयामः येन तेषां प्रारम्भिकतमे व्यवहारेऽपि मानसिकक्रियाणां सद्भावो बोधगम्यो भवेत् ।

अमीबम्—सूक्ष्मतमं हीदं कीटाणुकम् । इदन्तु नाडीकोषाणुकैकनिर्मितं भवति[2] । अस्य

---

१. तुलनार्थम्—Willam James. "The pursuance of future ends and choice of means for their attain ment are thies the mark and criterion of the presence of mentality in a phenomenon."

२. तुलनार्थम्—नाडीकोषाणुकम्—Nerve cell

परिमाणमपि सूक्ष्मतमवीर्यैकविन्दु समं भवति । अस्य स्वरूपमपि नाडीकोषाणुकवदेव भवति, यथा हि अस्यैका केन्द्रकणिका भवति, सूक्ष्मतमप्रतानयुतं च भवति, कोमलतमकोषसंरक्षितश्चेदं वर्तत इति । इदं कीटाणुकं जीवनोपयोगीनि खाद्यग्रहणमलत्यागरक्तसञ्चारण-प्रजननादिकर्माण्यपि करोति । एतेभ्यः सर्वेभ्य उपरितमं वयमस्य गमनशीलत्वं संवेदनग्राहित्वञ्चापि पश्यामः । इदं कीटाणुकं प्राणिवदु-त्तेजकं प्रति प्रतिक्रियां कर्तुं समर्थं भवति, अपि चानेनोत्तेजकस्य संवेदनं यथाकथञ्चित्सम्पाद्यते । महदाश्चर्यमिदं यदनेनैतानि कर्माणि विशिष्टेन्द्रियाङ्गं विनैव मस्तुलुङ्गादिनाड़ी तन्त्रमन्तरैव क्रियन्ते ।

अमीवस्य जीवनवृत्तं विशेषतः खाद्यानुसन्धानवेलायां कष्टप्रदोत्तेजकनिवारणक्रियासु च दर्श-नीयं भवति । यदीदं कष्टप्रदं किञ्चिदुत्तेजकमवाप्नोति, तदेदं स्वकीयमुत्तेजकसम्पृक्ताङ्गं सङ्कोचयति । यदि चोत्तेजकमुग्रतरं भवति, तदेदं स्वकीयमितरप्रतानं विकाशयति, उत्तेजकसम्पृक्ताङ्गं च संकोचयति । यद्यनेन सह सम्प्रत्यपि उग्रतरस्योत्तेजकस्य सम्पर्को भवत्येव, तदेदमन्यदि-शमुपसर्पति । अस्य प्रतिक्रियमेदं स्पष्टतरं ज्ञातुं शक्यते, यदिदं कष्टप्रदोत्तेजकवारणार्थं व्यवहाररूपप्रतिक्रियायां संलग्नं भवति । सुखदप्रतिक्रियायाः प्रभावो विशेषतो नोल्लेखनीयो भवति, किन्तु कष्टप्रदोत्तेजकादात्मानं संरक्षितुमस्य सततप्रयत्नशीलत्वं दृश्यत एव । अमीवस्य क्षुधार्त्तत्वमपि यदा कदा द्रष्टुं शक्यते । इदमशान्तं सञ्जायते, क्रियाशीलञ्च भवति, स्वकीयं खाद्यमनुसन्दधातुमपि प्रयतते । यदेदं भोज्यमवाप्नोति, तदेदं तं लिम्पति, तमात्मसाच्च कुरुते । प्राध्यापक-जैनिङ्गस-महोदयेनास्यामीवस्य वृत्तस्याऽध्ययनं कृत्वा तदित्थं वर्णितम्—"अस्यामीवेति नाम्नः प्राणिनश्चिरमध्ययनं कृत्वाऽयं लेखकः सुनिश्चितं मन्यते यद्धि यदि अमीवं किंचिन्मध्यम-परिमाणशाली प्राण्यभूत्, येनाऽस्य साक्षात्कारः दैनिकजीवनेऽपि सर्वसुलभो भवेत्तर्हि अस्य वृत्तं कुक्कुरवदेव सुखदुःखक्षुधाप्रयत्नेच्छादिसमन्वितं सुप्रथितमेव सम्भवेदिति[1] !" संक्षेपत इदं वक्तुं शक्यते यदस्यामीवस्य यस्य दर्शनमप्यणुवीक्षणयन्त्रसाहाय्येनैव सुलभं भवति, जीवनवृत्तं सुनिश्चित-मेव बुद्धिमद्व्यवहारस्य प्रारम्भिकतमस्वरूप-लक्षणान्वितं भवतीति ।

एवमेव पैरेमीशियास्टैण्टरेत्याङ्गलभाषीयसंज्ञाप्रथितं कीटाणुकद्वयमपि प्रारम्भिकतमं मानसिक-क्रियापरिचालितं व्यवहारस्य रूपं दिग्दर्शयति । तयोः कीटाणुकयोः प्रतिक्रिये अपि सप्रयो-

---

नाडीकन्दाणुकम्—Neuron केन्द्रकणिका—Nucleus

द्रष्टव्यम्—म० म० गणनाथसेनविरचितं प्रत्यक्षशारीरम्, नाडीखंडम्, पृ० १०-११

अमीवम्—अमीबा—Omoeba

१. तुलनार्थम्—Prof. Jennings—"The writer is thoroughly convinced after long study of the behaviour of this organism. that if amoeba were a lerge amimal, so as to come wittnin the every day experience of human berings, its behaviour would at once call forth the attribution to it of states of pleasure and pain, of hunger, desire and the like, on preasely the same basis as we attribute things to the dog.

जके वातावरणस्थोत्तेजकेन साकं सामञ्जस्यस्थापनक्षमे भवतः। प्राध्यापकजैनिङ्गमहोदयेन स्टैण्टर-नामककीटाणुकस्याऽपि पर्यवेक्षणं कृतम्। तेषां मते इदं कीटाणुकं न केवलमुत्तेजकानुकूलप्रतिक्रियां कर्तुं क्षमं भवत्यपि तु पूर्वानुभवात् शिक्षणसामर्थ्यमपि धार्यते, यतो ह्यस्योत्तरकालिक्यां प्रतिक्रियायां पूर्वानुभवानां प्रभावः संलक्ष्यत एव। सुतरां मनोविकासस्य प्रारम्भिकतमा सुसूक्ष्मा सप्रयोजनव्यवहारक्षमाऽवस्था सिद्धा भवतीति महानाश्चर्यस्य विषयः।

४. मनोविकासस्य तदुत्तरं विवरणम्—विकासवादरहस्यञ्च—

अतः प्रभृतीदं कीटाणुकानां निम्नस्तरीयपशूनाञ्चावलोकनेन मानसिकक्रियाणां विकासावगमं कर्तुं शक्यते। मनोविकासानुसारमेव तत्सहकृतशरीररचनाविकासोऽपि क्रमशः संवर्धते। एककोषात्मकस्यामीबकीटाणुकस्याऽस्माभिः परीक्षणं कृतमेव। तस्यैककोषात्मकत्वाद्विभिन्नेन्द्रियाणां विशिष्टसंवेदनानुभूतिर्विविधेन्द्रियैर्नैव सम्पद्यते। तस्य तु सर्वं शरीरमेव सर्वेन्द्रियालोचनक्षमतामव्याकृतरूपेण बिभर्त्ति। विकासशृङ्खलायामेककोषात्मकं कीटाणुकं क्रमशो बहुकोषात्मकं सञ्जायते। दृश्यते हि खलु कोट्यधिककोषात्मकं मानुषं शरीरम्। यावन्ति कोषाणुकानि वर्धन्ते, तावन्त्येव तेषां विशिष्टकार्याण्यप्याविर्भवन्ति। कोषाणुकमेकन्तु एकमेव विशिष्टं कार्यं सम्पादयति। कोषाणुकानां वृद्ध्या सहकृत एवेन्द्रियाणां विशिष्टकार्याणां विकासोऽपि सञ्जायते। मानसिकक्रियाणां विकाससमकालमेव शरीररचनायामपि क्रमशो विकासो जाटिल्यञ्च भवत्येव। कोषाणुकानां क्रियावैविध्यं क्रियावैशिष्ट्यमप्यावहति। विकासवादस्य मूलभूतमिदं मतद्वयम्। परिस्थितिवैषम्ये केवलं शक्तिशालिन एव स्वसत्तासंरक्षणे समर्था भवन्ति। निर्बलानां मरणादतिरिक्तं कुत्रापि गतिर्न विद्यते संघर्षमयेऽस्मिन् संसारे। इदन्तु प्रथमं मतं विकासवादिनाम्। व्यासेनाप्यस्य व्याख्यानमेवं कृतमासीत् —

> अहस्तानि सहस्तानामपदानि चतुष्पदाम्।
> फल्गूनि तत्र महतां जीवो जीवस्य जीवनम्॥

इदमेव मात्स्यन्यायमिति नाम्ना प्रथते। डारविन-महोदयैरिदं साम्प्रतं प्रतिपादितम्। स्वसत्तायै अनवरतं प्रवर्तमाने संघर्षे केवलं शक्तिमत एव योग्यतमस्य जीवनक्षमत्वं सम्भवति नान्येषामिति। योग्यतमस्य लक्षणं हि खलु विकासवादेऽस्ति शक्तिमत्त्वम्। द्वितीयं विकासवादिनां डारविनप्रभृतीनां मतमस्ति, यद्धि ये प्राणिनो वातावरणेन साकं स्वारस्यं भजन्ते, परिस्थित्यनुकूलं स्वजीवनयापनविधौ परिवर्तनं कुर्वन्ति, त एव जीवनरक्षणे समर्था भवन्ति। अन्ये च ये वातावरणेन सह सामञ्जस्यस्थापने योग्यं परिवर्तनं कर्तुमसमर्था भवन्ति, त एव नूनं विनश्यन्ति। आवश्यकता आविष्कारस्य जननी भवति। वातावरणेन साकं स्वारस्यस्थापनवेलायामावश्यकतानुसारं यानि परिवर्तनानि प्राणिभिर्गृहीतानि भवन्ति, तान्येव उत्तरकालिकानां तेषां सन्ततीनामविभाज्यशरीरलक्षणं भविष्यन्ति। अलमनेनात्र विकासवादव्याख्यानेन। अवशिष्टां तु वयं विकासवादव्याख्यां वातावरण-प्रभाव-पैतृकगुण-संक्रमणविचारावसरे विस्तरतोऽनुव्याख्यास्यामः। प्रकृते तु विकासवादाभिमतां द्वितीयां प्रतिज्ञामवलम्ब्येदं वक्तव्यं भवति यत्सूक्ष्मतमानि कोषाणुकानि परिस्थितिसम्प्राप्तोत्तेजक-प्रतिक्रियामनेकविधामनुभूय तदनुसारमेव कोषेतरवर्धनेन स्वकीयां जीवनधारणक्षमतां संरक्षन्ति। यदि च वातावरणानुकूलोत्तेजकजनितप्रतिक्रियानुसारिणी तेषामभिवृद्धिर्न भवेत्, तर्हि तेषां विनाशोऽप्यवश्यम्भाव्येव वातावरणमभिमुखीकृत्यैव प्राणिनां प्रतिक्रियावैविध्यं

सञ्जायते। प्रतिक्रियावैविध्यानुसारमेव प्राणिनामिन्द्रियाणां शरीरावयवानाञ्च विकासोऽपि सञ्जायते। शरीरावयवानामिन्द्रियाणां विशिष्टकर्मणां चाभिवृद्धिर्विशिष्टकोषाणुकाभिवृद्धिं समाश्रित्यैव जायते। यदि विभिन्नानि कोषाणुकानि स्वकीयानि विशिष्टकर्माणि प्रतिक्रियाङ्गीभूतानि न सम्पादयेयुः, तर्हि जीवनसङ्घर्षे तस्य प्राणिनोऽयोग्यत्वं सिद्धं भविष्यति, वातावरणेन सह सामञ्जस्यस्थापन-क्षमत्वात्तस्य नाशोऽप्यचिरादेव नूनं भविष्यति। अत एव प्रतिक्रियावैविध्यं शरीरावयव-विकासाश्रितम्, शरीरावयवविकासोऽपि कोषाणुकाभिवृद्धिमित एव भवति। कोषाणुकेष्वपि सततं संघर्षो भवत्येव। अतः स्वकीयं वैशिष्ट्यमन्तरा किमपि कीटाणुकं स्वसत्तामभिरक्षितुं न शक्नोति। कोषाणुकबाहुल्यमात्रेणैव विकासो न सम्भवति, यदि तेषां सङ्घटनं[1] सुष्ठुरिचालनं वैशिष्ट्यानुकारित्वं न[2] भवेत्। सङ्घटनं विना, वैशिष्ट्यादृते, जीवनं धारयितुं प्राणी न प्रभवति। केवलं कोषाणुकबाहुल्यं तु जीवनं मरणञ्चापि द्वयमेव सूचयति। नैतेन जीवनधारणक्षमत्वं प्रभवति। अत एवेदमावश्यकं यत्तानि सर्वाणि कोषाणुकान्यसंख्याकानि प्राणिनः समग्रशरीररक्षार्थं स्वकीय-कर्त्तव्यं सम्पादयन्तु। एतावतैव सङ्घटनेन सामूहिकी प्रतिक्रिया समग्रशरीरस्य प्रतिक्रिया विभिन्नैः कोषाणुकैः सम्पाद्यते। ननु सङ्घटनस्य कोऽर्थः ? यदि बहूनि कोषाणुकानि स्वरक्षार्थं स्वकीयसमग्र-समूहरूपशरीरसंरक्षणार्थञ्च प्रयतन्ते, तदैव तेषां सङ्घटनं भवति। नहि कोषबाहुल्येन प्राणी प्राणी भवत्यपि तु कोषाणुकानां सङ्घटनेन। सर्वेषां पारस्परिककलहेन नैव समग्रशरीरस्य स्थायित्वं धारणं वा सम्भवति। अतः सङ्घटनार्थं केन्द्रीकरणमप्यावश्यकम्। केन्द्रीकरणेन[3] यथा राजकीय-प्रशासनेऽराजकताप्रशमनं क्रियते, तथैव विविधानां कोषाणुकानामपि केन्द्रीकरणं शरीररक्षार्थं जीवनधारणार्थमपेक्ष्यम्। केन्द्रीकरणं सञ्चालनार्थमनिवार्यं भवति। यदि सर्वाणि कोषाणुकानि विभिन्नदिशि कार्यं यथेच्छं कुर्वन्ति, तर्हि शरीरयात्राऽपि दुर्वहा भवेत्, तेषामुच्छृङ्खलत्वान्मरणमपि नूनमापद्येत। प्राणिन एकमप्यङ्गं तत्स्वरूपकमस्ति, केवलं समग्रशरीरकार्यसम्पादने स्वकीय-स्वकीययोगदानेन स्वकार्यनिर्वहणेन च। समग्राय शरीरायाङ्गम्, अङ्गाय च समग्रं शरीरमितीदमेव सङ्घटनसञ्चालनकेन्द्रीकरणादिपदैराकूतम्। अत एव यथा यथा प्राणिनां मानसिकक्रियाणां व्यवहाराभिव्यक्तप्रतिक्रियाणाञ्च विकासो जाटिल्यञ्चाभिवर्धते, उच्चतरीयामवस्थामवाप्नुतः, तथा तथा प्राणिनां शरीरावयवानामप्यभिवृद्धिः समकालमेव भवति। शरीरावयवानामन्यतमं समस्तुङ्गं नाडीतन्त्रमस्ति। मानसिकक्रियाणां सौकर्यं नाडीतन्त्रमन्तरा, विविधेन्द्रियविकासं विना नैव भवति। आमीबान्मनुष्यपर्यन्तं प्राणिनां वातावरणजनितावश्यकतानुकूलमेवाऽङ्गानां विकास आविर्भावो वा विविधविकासस्तरेषु समजनि।

५. मनोविकासस्य द्विधा प्रगतिः

अतः प्रभृति मनोविकासस्य शृङ्खला मार्गद्वयमनुसरति। प्रथमो मार्गस्तु कीटाणुकानां[4] विकासशृङ्खलां नयति। द्वितीयश्च पृष्ठवंशवतां प्राणिनां[5] विकासशृङ्खलायां पल्लवितो भवति।

१. तुलनार्थम्—Organisation

२. तुलनार्थम्—Differentiation.

३. तुलनार्थम्—Centralisation.

४. तुलनार्थम्—Insects.

५. तुलनार्थम्—Vertebrates.

अत्र विकासक्रमोऽपि दर्शनीयः। कीटाणुकानां प्राणिनां शरीरयन्त्रं तु प्रकृतिजनितवातावरणानुकूल-प्रतिक्रियाप्रदानक्षमं स्वभावत एव भवति। तेषां प्रतिक्रियासाफल्यकारणं चास्ति मूलप्रवृत्तीनां जन्मत एव सम्यग्विकासवत्त्वम्। निम्नस्तरीया हि खलु कीटाणुकादिप्राणिनः प्रायशो नियत-प्रतिक्रियावन्तो भवन्ति। प्रकृतिप्रदत्तवातावरणे यदि किञ्चिदकस्मात् परिवर्तनं भवेत्, तर्हि नास्ति तेषां तादृशी क्षमता यादृशी वातावरणपरिवर्तनेन मूलप्रवृत्तीनां परिष्कारेण परिवर्तनेन वाऽपेक्ष्यते। वैषम्यसंवलितपरिस्थितौ हि ते त्रस्ता भवन्ति। किन्तु पृष्ठवंशवतां मनुष्यादिप्राणिनां शरीरयन्त्रं न केवलं मूलप्रवृत्तिमात्रनियन्त्रितं भवति, तेषां शारीररचनाऽपि सुकुमारतरा भवति। बुद्धि-विकासमार्ग एवेदृशो यस्मिन् नियतमूलप्रवृत्तिजन्यप्रौढप्रतिक्रियायाः क्रमशो ह्रासः प्रादुर्भवति, यस्मिंश्च नियतप्रतिक्रियायाः स्थाने परिवर्तनशीलं वातावरणानुकूलं प्राणिवृत्तं सम्भवति। पृष्ठवंश-वतां प्राणिनां शरीररचनावैशिष्ट्यमिदमेव भवति यद्धि समुपस्थिते वैषम्ये ते वातावरणेन सह स्वजीवनसामञ्जस्यं प्राप्तुं शक्नुवन्ति। गवेषणशीलत्वमनुभूतविषयोपयोगकारित्वञ्च सामञ्जस्यस्य स्थापने नितरामपेक्ष्यम्। कीदृशमिदं पृष्ठवंशवतां शरीररचनायाः सौकुमार्यम्? केन प्रकारेण चास्यानुभूतविषयोपयोगसामर्थ्यं वर्धते, इत्यस्माभिरग्रे विचार्यते। अत्र तु केवलमेतावदेव वक्तव्यं यदनियतप्रतिक्रियामच्छरीरान्तर्गतनाडीतन्त्रं पृष्ठवंशवतां प्राणिनां महदुपकारकं भवति। नख-दंशचञ्चुदन्तविषग्रन्थिविरहितोऽपि मानवः प्रकृत्या स्वामी भवति, प्रौढसंवेदनशक्तिमत्त्वात्, केन्द्रितनाडीतन्त्रसहितत्वात्, स्वोद्देश्यप्राप्त्यर्थं चेष्टावाहिसंस्थानविलसितत्वाच्च।

किं तर्हि शरीरपरिमाणविकास एव पृष्ठवंशवतां[1] प्राणिनां बुद्ध्युत्कर्षप्रयोजकम्? अत्रोच्यते, नहि शरीरपरिमाणमात्रविकासेन बुद्ध्युत्कर्षो द्योत्यते। अस्ति खलु गजराजो यः प्राणिनां शरीर-विकासस्य चरमां कोटिं भजते। किन्तु तस्य मस्तुलुङ्गपरिणामं नैव शरीरपरिमाणानुपातमनुसरति। अपि चाल्पशरीरवानयं मनुष्यः पीठस्थस्तमनुशास्ति। अपि चाल्पीयसैव शरीरपरिमाणेनायं वानरो मनोविकासशृङ्खलापेक्षया मानवसन्निकृष्टतमपूर्वगामिविकासशृङ्खलां विराजते। बुद्ध्युत्कर्षस्य नास्ति मस्तुलुङ्गपरिमाणमेव शरीरपरिमाणं वा विनिगमकम्। अपि तु मस्तुलुङ्गस्थसीतानां प्रौढत्वं नाडीनाञ्चेतरेतराश्लिष्टत्वमिति बुद्ध्युत्कर्षमावहति विकासशृङ्खलायाम्। एतत्सर्वमस्माभिर्नाडीतन्त्रमग्रे विशदीक्रियते।

६. नाडीतन्त्रम्

महदिदं खलु सुरभारतेः सौभाग्यं यत्साम्प्रतं प्राणाचार्या महामहोपाध्यायाः श्रीगणनाथ-सेनशर्म्मसरस्वतीमहाशयाः प्रत्यक्षशारीरं नाडीखण्डविलसितं प्रणीतवन्तः। तैस्तु स्वकीय-निबन्धेऽर्वाचीनतमा सर्वा नाडीतन्त्रविषयकसामग्री विशदत्वेन तत्र विवेचिता। अस्माभिरत्र तैरभिमता एव शारीरशास्त्रपारिभाषिकपदावल्यङ्गीकृता। अस्माकं विवेचनमपि तान् भिषग्वर्या-ननुसरति, यत्र तत्रार्वाचीनमनोवैज्ञानिकानामनुसन्धानमवलम्ब्याऽपि गुम्फितमस्ति। समग्रं नाडी-तन्त्रमस्माभिर्विवेचनसौकर्याय निम्नलिखितवर्गेषु विभज्यते—

१—(त्वगाच्छन्नं) परिसरीयं नाडीतन्त्रम्—(अ) संज्ञावाहि-नाडी-समूहः।
(आ) चेष्टावाहिनाडीजालम्।

---

१. तुलनार्थम्—Vertebrates.

२—मस्तुलुङ्गम्— (अ) मस्तिष्कम्, बृहन्मस्तिष्कं वा।
अथवा, मस्तिष्कसौषुम्निक-नाडीतन्त्रम् (आ) अणुमस्तिष्कम् } धम्मिल्लकम्।
(इ) सेतुमस्तिष्कम् } उष्णीक्कम्।
(ई) सुषुम्णाशीर्षकम्।
(उ) सौषुम्णकतन्त्रम्।

३—स्वतन्त्रं नाडीतन्त्रम्— (अ) स्वतन्त्रनाडीमण्डलम्।
(आ) परिस्वतन्त्रनाडीमण्डलम्।
(इ) विकीर्णा नाडीग्रन्थयः।

एतानि विविधाङ्गानि विशदतोऽग्रे विवर्ण्यन्ते। तेषां च क्रियाकलापस्य मनोगताऽवस्थासु बाह्यव्यवहारेषु च कः प्रभावः समुत्पद्यत इत्यपि विवेचनास्पदं नूनं प्राप्स्यते।

७. हृदयमस्तिष्कयोः स्वरूपम्

प्राचीनशास्त्राणामवलोकनेनेदं प्रतिभाति यन्मस्तिष्कस्य स्वरूपावधारणे कश्चन महान् बुद्धि-विभ्रम आसीत्। चैतन्याधिष्ठानस्य वर्णनावसरे हृदयस्यैव निर्देशो दरीदृश्यते प्रायशो न तु मस्तिष्कस्य। वयमप्यत्र हृदयन्यावर्तकमस्तिष्कस्वरूपविवेचनावसरे मस्तुलुङ्गपर्यायमेव मस्तिष्कं मन्यामहे। मस्तिष्कं हि खलु मस्तुलुङ्गस्य सर्वोपरि महत्त्वपूर्णमङ्गमस्ति, यथाऽस्माभिरग्रे प्रदर्श्यत एव। अत एव प्रायशो जनैः मस्तिष्कशब्द एव मस्तुलुङ्गस्थाने प्रयुज्यते सामान्यग्रन्थेषु। परन्तु आयुर्वेदविज्ञानं मनोविज्ञानञ्च मस्तिष्कं मस्तुलुङ्गाङ्गत्वेनैव स्वीकुरुतः। अस्तु। किं हृदयमेव प्राचीनाचार्यैश्चैतन्याश्रयत्वेन विदितमासीत्? अथवा किं हृदयमेव मस्तुलुङ्गस्यापरनामास्ति? आहोस्वित् किमप्यन्यत्तस्य कार्यं विद्यते? एतत्सर्वमस्माभिरत्र विचारणीयम्। "चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः" इत्यमरः। अत्र हृदयं मानसपर्यायवाचकत्वेन वर्णितममरसिंहाचार्यैः। भवभूतिरचितमालतीमाधवे कपालकुण्डलाया [1]इयमुक्तिर्भारतीय-योगतन्त्रायुर्वेदाचार्याणां विचार-सरणिं स्फुटयति। तथाहि—

> [2]षडधिकदशनाडीचक्रमध्यस्थितात्मा
> हृदि विनिहितरूपः सिद्धिदस्तद्विदां यः।
> अविचलितमनोभिः साधकैर्मृग्यमाणः
> स जयति परिणद्धः शक्तिभिः शक्तिनाथः॥

अत्रेदं स्पष्टमेव यद् हृदयं नाडीचक्रमध्यम्, तदेवात्मरूपचैतन्याधिष्ठानम्। व्याख्यातमपि चेत्थं त्रिपुरारिसूरिणा भावप्रदीपिकायाम्—

"षडधिका दश षोडश या नाड्यस्तासां यच्चक्रं मण्डलं पिण्डरूपं तस्य मध्यं हृदयं तत्र स्थित आत्मा स्वरूपं यस्य सः। नाडीनामनन्तत्वेऽपि प्रधाननाडीनामिडादीनां षोडशसंख्या-त्वात् षडधिकदशेत्युक्तम्। इडादयो नाड्यश्च—

> इडा च पिङ्गला चैव सुषुम्णा चापरा स्मृता।
> गान्धारी हस्तिजिह्वा च पूषा वसुवशा तथा॥

१—द्रष्टव्यम्—मालतीमाधवम्, ५।१, पृष्ठ १०६, नि० सा० प्रे० संस्करणम्।

२—"समाधिकदशनाडी" इत्यपि पाठः कुत्रचिदुपलभ्यते।

अलम्बुषा कुहूश्चैव शङ्खिनी दशमी स्मृता ।
तालुजिह्वेभजिह्वा च विजया कामदा परा ॥
अमृता बहुला नाम नाड्यो वायुसमीरिताः[1] । इति ।

महाकविर्भवभूतिर्योगतन्त्रादीनां प्रगाढपण्डित आसीत् । न केवलं तेनैवेदं मतमित्थं प्रदर्शितम्, भगवता श्रीकृष्णेनाऽप्येवमुक्तम्—"ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन ! तिष्ठति[2]" इति । श्रूयते चापि तैत्तिरीयोपनिषदि—"स य एषोऽन्तर्हृदय आकाश तस्मिन्नयं पुरुषो मनोमयः[3]" इति । ऋग्वेदीयनासदीयसूक्तेऽप्येवं हृदयं मनीषायतनत्वेन वर्णितं श्रूयते—

कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत् ।
सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा[4] ॥ इति ।

सुश्रुतेनाऽपि हृदयं चेतनास्थानमिति मतं स्वीकृतम्[5] । वैद्यकेषु ग्रन्थेषु—"बुद्धेर्निवासं हृदयं प्रदूष्य" इत्यादीनि वाक्यानि दरीदृश्यन्ते[6] । चरकेणाऽपि भगवतामात्रेयमहर्षीणां मतमेवमुपस्थापितम्—

अर्थे दश महामूलाः सिराः सक्ता महाफलाः ।
महच्चार्थश्च हृदयं पर्यायैरुच्यते बुधैः ॥ ३ ॥
षडङ्गमङ्गं विज्ञानमिन्द्रियाण्यर्थपञ्चकम् ।
आत्मा च सगुणश्चेताश्चिन्त्यं च हृदि संश्रितम् ॥ ४ ॥
प्रतिष्ठार्थं हि भावानामेषां हृदयमिष्यते ।
गोपानसीनामागारकर्णिकेवार्थचिन्तकैः ॥ ५ ॥
तस्योपघातान्मूर्च्छायं भेदान्मरणमृच्छति ।
यद्धि तत् स्पर्शविज्ञानं धारि तत्तत्र संश्रितम् ॥ ६ ॥
तत् परस्यौजसः स्थानं तत्र चैतन्यसंग्रहः ।
हृदयं महदर्थश्च तस्मादुक्तं चिकित्सकैः[7] ॥ ७ ॥ इति ।

---

१. द्रष्टव्या—टिप्पणी १, पृष्ठं २६, पूर्ववत् ।

२. द्रष्टव्या—श्रीमद्भगवद्गीता, १८।६१

३. द्रष्टव्या—तैत्तिरीयोपनिषद्, वल्ली १, अनु० ६, मन्त्रः १

४. द्रष्टव्यः—ऋग्वेदः १०।१२९।४

५. द्रष्टव्या—सुश्रुतसंहिता, शारीरस्थानम्, ४।३१, पृ० ३०३, "तद् हृदयं विशेषेण चेतनास्थानं हृदयाधिष्ठानं मतम् ।" इति । तत्र डल्हणटीकायाम्—"तद् विशेषेण चेतनास्थानं चैतन्यास्पदम्, सामान्येन तु सकलशरीरमेव चेतनास्थानम् । तदुक्तं चरके—"वेदनानामधिष्ठानं मनो देहश्च सेन्द्रियः । केशलोमनखाग्रान्नमलद्रवगुणैर्विना ।।" इति ।

६. द्रष्टव्यम्—माधवनिदानम्, पृ० १८०, श्लोकः ५
"तैरल्पसत्त्वस्य मलाः प्रदुष्टा बुद्धेर्निवासं हृदयं प्रदूष्य" इति ।

७. द्रष्टव्या—चरकसंहिता, सूत्रस्थानम्, अध्यायः ३०, पृ० २०८, (नि० सा० प्रे० संस्करणम्)

अत्राऽपि हृदयं चेतनास्थानमिति मतमेव पुष्टीकृतम् । मन्ये चरकवाग्भट्टादय आचार्या अस्मिन् विषये दोलायितमानसा एवासन्। यतो हि तेषां ग्रन्थेषूत्तमाङ्गमपि चैतन्यप्राणेन्द्रियाद्यधिष्ठानरूपत्वेन वर्णितमुपलभ्यते । तथाहि—

प्राणाः प्राणभृतां यत्राश्रिता सर्वेन्द्रियाणि च ।
यदुत्तमाङ्गमङ्गानां शिरस्तदभिधीयते[1] ॥

अपि च वृद्धवाग्भट्टैः—

ऊर्ध्वमूलमधःशाखमृषयः पुरुषं विदुः ।
मूलप्रहारिणस्तस्माद्रोगान् शीघ्रतरं जयेत् ॥
सर्वेन्द्रियाणि येनास्मिन् प्राणा येन च संश्रिताः ।
तेन तस्योत्तमाङ्गस्य रक्षायामादृतो भवेत् ॥

ननु किम् 'इन्द्रियाणि' इति पदमिन्द्रियगोलकसूचकं नास्ति ? अत्रोच्यते—यदि 'इन्द्रियाणि' इति पदमत्र इन्द्रियगोलकं सूचयति, तर्हि चरकसंहितोद्धृतपूर्वोक्त्या सह सुसंगतिर्नूनं भविष्यति । परन्तु अस्माकं त्विदं प्रतिभाति यद्यपि उपर्युपन्यस्तं मतं प्रायेणाङ्गीकृतमासीत् पूर्वाचार्यैः, तथाप्यासन् केचन शौनकादिमहर्षयः येषां मते मस्तुलुङ्गमेव चेतनास्थानमुररीकृतमासीत् । श्रूयते हि खलु ऋग्वेदे—

अर्वाग्बिलश्चमस ऊर्ध्वबुध्नः तस्मिन् यशो निहितं विश्वरूपम् ।
तस्यासन् ऋषयः सप्ततीरे वागष्टमी ब्रह्मणा संविदाना[2] ॥

उपर्युक्ते मन्त्रे वर्णितमर्वाग्बिलं चमस इवोर्ध्वबुध्नं नूनमुत्तमाङ्गमेव करोटिपटलसंरक्षितम् । तस्मिन् यश इव भास्वरं विश्वरूपं नानारूपं सर्वात्मकमिति यावत् , चैतन्यं चैतन्यरूप आत्मा वा निहितः सुरक्षितः सन् विद्यते । तस्य चमसरूपोत्तमाङ्गस्य पार्श्वे सप्त ऋषयः सप्तेन्द्रियाणीति यावत्, यथा द्वौ कर्णौ, द्वे नासिके, द्वे चक्षुषी, एकं रसनमिति सप्त ज्ञानेन्द्रियाणि सन्तीति ।

"ऋषिर्मन्त्रदर्शनात्" इति यास्काचार्याः । यतो हि सप्तज्ञानेन्द्रियाणि प्रत्यक्षं दर्शनाख्यं व्यापारं कुर्वन्त्येव । अष्टमी वाग्देवताऽपि तस्योत्तमाङ्गस्य तीर एव ब्रह्मणा सह संवेदनं कुर्वन्ती तत्रैव विद्यत इत्यभिसन्धिः । शौनकमहर्षिमतं तु सुश्रुतेनोल्लिखितम् । तद्यथा—"इत्याह शौनकः, शिरोमूलत्वात् प्रधानेन्द्रियाणामिति[3] ।" अथर्ववेदेऽपि अयोध्याव्यपदेशेन मस्तुलुङ्गमेव चेतनायतनरूपेण वर्णितमुपलभ्यत इति[4] ।

---

१. द्रष्टव्या—चरकसंहिता, सूत्र०, अ० १७, पृ० ६७
२. द्रष्टव्यः—ऋग्वेदः
३. द्रष्टव्यम्—सुश्रुत० शारीरस्थानम् ३।३२, पृष्ठं २६८, नि सा० प्रे०
४ द्रष्टव्यः—अथर्ववेदः १०।२।२५-२६, २८, २९, ३०, ३१, ३२ मन्त्राः—
मूर्धानमस्य संसीव्याथर्वा हृदयं च यत् ।
मस्तिष्कादूर्ध्वः प्रैरयत् पवमानोऽधिशीर्षतः ॥ २५ ॥
तद्वाऽथर्वणः शिरो देवकोशः समुब्जितः ।
तत् प्राणोऽभिरक्षति शिरोऽन्नमथो मनः ॥ २६ ॥
ऊर्ध्वो नु सृष्टा ३ स्तिर्यङ् नु सृष्टा ३ : सर्वा दिशः पुरुष आबभूवाँ ३ ॥

उपर्युक्तं विवेचनमस्माभिरनुसन्धानदृष्ट्यैव प्रस्तुतम्। नायमस्माकमभिनिवेशो यत्प्राचीनं सर्वमुपादेयमर्वाचीनं सर्वं फल्गु इति। वैज्ञानिकसरणिस्तूदारा भवति। तस्या मूलमन्त्रस्तु कालिदासेनैव पूर्वमुद्घोषित आसीत्। तथाहि —

पुराणमित्येव न साधु सर्वं
न चापि काव्यं नवमित्यवद्यम्।
सन्तः परीक्ष्यान्यतरद्भजन्ते
मूढः परप्रत्ययनेयबुद्धिः[1] ॥

यन्मतं प्रेक्षावद्भिर्निरीक्षण-प्रत्यक्ष-प्रयोगादिभिः सुनिश्चितं जायते, तदेवास्माभिः स्वीकरणीयम्। विज्ञानन्तु निष्पक्षं स्वार्थाभिनिवेशरहितं ज्ञानं भवतीत्यस्माभिः पूर्वमेव परिभाषावर्णनावसरे स्पष्टीकृतम्। अर्वाचीनायुर्वेदशारीरकमनोविज्ञानाऽनुसन्धानैः सम्प्रति त्विदं वज्रलेपायितं तिष्ठति यन्नास्ति हृदयं चेतनाधिष्ठानम्। चेतनाधिष्ठानन्तु मस्तुलुङ्गं नाडीतन्त्रसमन्वितमस्ति। हृदयन्तु केवलं मांसमयं पिण्डम्, रक्तसंस्थानस्य केन्द्रीभूतमवतिष्ठते। तत्तु कथमपि चेतनास्थानं चेतनाधिष्ठानमिति यावन्न भवितुमर्हतीति सिद्धमेव शारीरविज्ञानेन शारीरकमनोविज्ञानेन च निष्प्रत्यूहम्। महामहोपाध्यायपादैः श्रीगणनाथसेनसरस्वतीमहोदयैरपि स्वकीये ग्रन्थे प्रत्यक्षशारीर इदं स्वीकृतम्। तैरुक्तम्[2] - न च मांसमयमेव हृद्यन्त्रं तदिति (चेतनास्थानमिति) वाच्यम्, तद्धि न कथमपि तादृशलक्षणाभिधेयं भवितुमर्हति, असम्भवात्। चरकेण रसवहानां स्रोतसां हृदयं मूलमिति मतमन्यत्र वर्णितमेव[3]। अत एव सिद्धं नाडीचक्रस्य मूलं मस्तुलुङ्गं चेतनास्थानम्। नास्ति हृदयं चेतनास्थानमपि तु रक्तसंस्थानकेन्द्रम्, यस्मात् सिरा धमन्यश्च विविधशरीराङ्गानि प्रति प्रसरन्ति, हृदयन्तु वक्षसि स्थितम्। मस्तुलुङ्गस्य मस्तिष्कस्य वा स्थानं मुख्यतः करोटिपरिमितमेवास्ति। अतश्च सिद्धं तयोर्द्वयोः स्थानभेदकार्यभेदोपोद्बलितं महत्पार्थक्यम्।

८. नाडीस्वरूपम्

एवमेव नाडीस्नायुप्रयोगोऽपि स्वच्छन्दतः कृतो दृश्यते प्राचीनायुर्वेदग्रन्थेषु। विशेषतः प्रकाशितेषु आर्यभाषायामद्यतनेषु मनोविज्ञान-शिक्षाविज्ञानपुस्तकेषु नाडीशब्दस्य स्थाने स्नायुशब्दो व्यवहृतो दृश्यते। तत्तु न समीचीनम्। स्नायुशब्दव्याख्यानावसरे सुश्रुतेनोक्तम्—

पुरं यो ब्रह्मणो वेद यस्याः पुरुष उच्यते ॥ २८ ॥
यो वै तां ब्रह्मणो वेदामृतेनावृतां पुरम्।
तस्मै ब्रह्म च ब्राह्माश्च चक्षुः प्राणं प्रजां ददुः ॥ २९ ॥
अष्टचक्रा नवद्वारा देवानां पूरयोध्या।
तस्यां हिरण्ययः कोशः स्वर्गो ज्योतिषावृतः ॥ ३१ ॥
तस्मिन् हिरण्यये कोशे त्र्यरे त्रिप्रतिष्ठिते।
तस्मिन् यद् यक्षमात्मन्वत् तद्वै ब्रह्मविदो विदुः ॥ ३२ ॥

१. द्रष्टव्यम्—मालविकाग्निमित्रम्, २

२. द्रष्टव्यम्—प्रत्यक्षशारीरम्, नाडीखण्डम्, पृ० ३, पादटिप्पणी।

३. द्रष्टव्या—चरकसंहिता, सूत्रस्थानम्, अ० ९, पृ० २८२, नि० सा० प्रे० सं०

स्नायुश्चतुर्विधा विद्यात्तास्तु सर्वा निबोध मे।
प्रतानवत्यो वृत्ताश्च पृथ्व्यश्च शुषिरास्तथा॥
प्रतानवत्यः शाखासु सर्वसन्धिषु चाप्यथ।
वृत्तास्तु कण्डराः सर्वाः विज्ञेयाः कुशलैरिह॥
आमपक्वाशयान्तेषु वस्तौ च शुषिराः खलु।
पार्श्वोरसि तथा पृष्ठे पृथुलाश्च शिरस्यथ॥
नौर्यथा फलकास्तीर्णा बन्धनैर्बहुभिर्वृता।
भारक्षमा भवेदप्सु नृयुक्ता सुसमाहिता॥
एवमेव शरीरेऽस्मिन् यावन्तः सन्धयः स्मृताः।
स्नायुभिर्बहुभिर्बद्धास्तेन भारसहा नराः[1]॥

एवमुक्तप्रकारेण स्नायूनां चत्वारः प्रकाराः सन्ति, यथा प्रतानवत्यः, वृत्ताः, पृथुलाः, शुषिरा इति। स्नायूनामन्यत्प्रकारेणाऽपि द्विधा वर्गीकरणं कर्तुं शक्यते, यथा स्नायु-संहतिः[2] स्नायुव्यक्तिश्चेति[3]। अनेन वर्गीकरणेन स्नायुशब्दार्थद्वयमपि व्यज्यते। स्नायुसंहतिभिः स्नायुभिः सन्धयो दृढीकृता भवन्ति। स्नायुव्यक्तिस्तु स्नायुप्रतानानि द्योतयति, सूक्ष्माणि यानि पक्वाशया-माशयवस्तिभागेषु प्रसरितानि भवन्ति।

नाड्यस्तु[4] स्नायुव्यतिरिक्ता भवन्ति। ताश्च द्विविधा भवन्ति, संज्ञावहा[5] श्चेष्टावहा[6]-श्चेति। ता एव सर्वदेहगानि स्रोतांसि भवन्ति। ताः सूक्ष्माणां नाडीकन्दाणुकानामवयवभूताः। संज्ञावहा नाड्यो विविधाङ्गेभ्यः संवेदनं मस्तुलुङ्गमानयन्ति। चेष्टावहाश्च नाड्यो मस्तुलुङ्गादाज्ञां संवेदनजनकोत्तेजकं प्रति प्रतिक्रियां जनयितुं तदङ्गपेशीर्वहन्ति। तद्विवेचनं विस्तरतो वयमग्रे प्रतिपदं प्रतिपादयिष्यामः।

६. परिसरीयं (त्वगाच्छन्नं) नाडीसंस्थानम्[7]

आमस्तुलुङ्गाद् आसुषुम्णाया वा त्वक्पर्यन्तं यन्नाडीजालं प्रसृतं भवति, तत्सर्वं परिसरीयं त्वगाच्छन्नं वा नाडीसंस्थानमिति नाम्ना प्रथते। ननु को नाम नाडीशब्दो भवति? नाड्यो हि खलु मृदुसूत्रसंघातमय्यो नीरन्ध्रास्तन्व्योऽस्मिन् विज्ञाने प्रथन्ते। तासु प्रायेण द्विविधानि नाडी-सूत्राणि सम्भूय तिष्ठन्ति—संज्ञावहानि चेष्टावहानि चेति। तत्र संज्ञावहानि नाडीसूत्राणि त्वगादिभ्यो मस्तिष्काद्यभिमुखं संज्ञावेगान् प्रापयन्ति। तेष्वन्तर्मुखो वेगः। चेष्टावहानि तु मस्तिष्कादिभ्यः चेष्टावेगान् पेश्यादिषु प्रवर्तयन्ति। तेषां बहिर्मुखो वेगः। ता एता द्विविधनाडीसूत्रसंघातवत्यो नाड्यो मिश्रानाड्य[8] इत्युच्यन्ते विशेषाभिधाने। एकविधनाडीसूत्ररचितास्तु शुद्धा नाड्य[9]

१. द्रष्टव्या सुश्रुत० शा० ६ अ०
२. तुलनार्थम्—Ligaments.
३. तुलनार्थम्—Fibrous Tissues
४. तुलनार्थम्—Nerve.
५. तुलनार्थम्—Afferent Nerve.
६. तुलनार्थम्—Efferent nerve.
७. तुलनार्थम्—Peripheral nervous system.
८. तुलनार्थम्—Mixed nerves.
९. तुलनार्थम्—Pure nerves, sensory or motor.

इति नाम्नाऽभिधीयन्ते। नाडीसूत्राणाञ्च क्वचिद् 'नाडी' इति लघुसंज्ञामात्रेणाऽपि सामान्यतो व्यपदेशो भवति। या नाड्यो मिश्रा भवन्ति, तासां नाडीसूत्राणि परस्परसन्निहितान्यपि पृथग्विधानि त्वक्पेश्यादिप्रवेशकाले पृथग्भूत्वैव प्रसरन्ति स्पर्शयन्त्रिकादिषु।

ननु कथं हि खलु नाडीसूत्राणां निर्माणं भवति? अत्रोच्यते—नाडीसूत्राणां प्रभवो नाडीकन्दाणुकेभ्यो भवति। नाडीकन्दाणुकानि[1] नामातिसूक्ष्मकोमलानि सूक्ष्मवस्तूनि नाडीमूलभूतानि सावयवानि मस्तिष्क-सुषुम्णादिस्थितानि भवन्ति। तेषां प्रत्यक्षमणुवीक्षण-यन्त्रसाहाय्येनैव सम्भवति। नाडीकोषाणुकानि च निरवयवानि भवन्ति। नाडीकन्दाणुकानामेकैका केन्द्रकणिका[2] प्रतिनाडीकन्दाणुकं भवति। इयं नाडीकन्दाणुकस्य केन्द्रकणिका नाडीकोषाणुकमेव भवति। प्रत्येकं नाडीकन्दाणुकस्य एको दीर्घप्रतानो भवति। तस्य अक्षतन्तुरिति[3] संज्ञाऽस्ति। तस्य नाडीसूत्ररूपेण परिणामो जायते, प्रसरश्च दूरात् शाखा-प्रशाखानुशाखादिभिः। नाडीकन्दाणुकस्याऽपरः प्रतान ऊर्णातन्तुरिति नाम्ना प्रथते। एकैकस्य नाडीकन्दाणुकस्य ऊर्णातन्तवः[4] प्रायश एकाधिका भवन्ति। परितो विसारिणामूर्णा-तन्तुसादृश्यादूर्णातन्तूनां ह्रस्वत्वात् 'लघुतन्तवः' इत्यपि निर्देशो भवति। ते तादृशैरेवान्यस्य नाडीकन्दाणुकस्य प्रताने परस्पराऽश्लिष्टाः कन्दाणुकानां सन्निहितानामुद्बोधनकर्माणो भवन्ति। नाडीकन्दाणुकानि च स्थानभेदेनैकबाहुक[5]-द्विबाहुक[6]-बहुबाहुक[7]-गुल्मकादिनानारूपाणि[8] भवन्ति।

ननु नाडीकन्दाणुकानां कियती संख्या? असंख्याकानि हि खलु नाडीकन्दाणुकानि भवन्ति। नाडीतन्त्रविशारदैर्हेरिकमहोदयैर्नाडीकन्दाणुकानां संख्याविषये परस्पराश्लेषवैचित्र्य-विषये चेत्थं विवरणं प्रदत्तम्। तथाहि—"यदि कोऽपि शिक्षित एतादृशः पुरुषः प्राप्तुं शक्येत, यो विद्युद्विषये किमपि न जानाति, येन च टेलीफोनस्य तारसूचनाया वा कोऽपि वृत्तान्तो न श्रुतो भवेत्, यदि चैतादृशः पुरुषः कस्याऽपि विशालनगरस्य बाह्यसाहाय्यमनपेक्ष्यैव तारसूचन-विभागीयसर्वस्थानानां क्रियोपयोगिसर्वसाधनानाञ्च परिचालनक्रियाविधिपुरस्सरां मानचित्रादि-संवलितां व्याख्यां प्रदातुमादिष्टो भवेत्, तर्हि तस्य समग्रं कार्यं नाडीतन्त्रविशारदस्याऽनुसन्धान-विषयत्वापेक्षयाऽल्पीयः सरलतरञ्च भविष्यति। मस्तुलुङ्गं परितो व्याप्तधूसरवस्तुन्येव केवलं९२,८०० लक्षसंख्याकानि नाडीकोषाणुकानि विद्यन्ते, येषाञ्च बहूनि इतस्ततो दूरात् प्रसृतानि नाडी-सूत्राणि शाखाप्रशाखासहितानि भवन्ति। एवंप्रकारेण प्रत्येकं नाडीकोषाणुकमनेकनाडीकोषाणुक-केन्द्रकणिकाभ्यः सम्पृक्तं सञ्जायते। नाडीवेगस्रोतसां संख्या वस्तुतः परिच्छेदातीताऽपरिमेया भवति[9] इति।

१. तुलनार्थम्—Neurons.
२. तुलनार्थम्—Nucleus.
३. तुलनार्थम्—Axone.
४. तुलनार्थम्—Dendrites.
५. तुलनार्थम्—Unipolar.
६. तुलनार्थम्—Bipolar.
७. तुलनार्थम्—Multipolar.
८. तुलनार्थम्—Purkinji cell.
९. द्रष्टव्यम्—C. Judson Herrick, 'Introduction to Neurology', (W. B. Saunders company, PhiladelPhia, 5th edn. 1931)

ननु कथं हि खलु नाडीकन्दाणुकानि संवेदनं मस्तुलुङ्गं प्रापयन्ति ? येन पदार्थेन किमपि इन्द्रियसंवेदनमुत्पद्यते, स उत्तेजक इति नाम्नाऽस्मिन् ग्रन्थे प्रथितो भविष्यति। सुतरामुत्तेजकजनितं किमपि संवेदनं प्रथमत ऊर्णातन्तुभिरेव उत्तेजितस्थानात् प्राप्यते, तदनन्तरमिदं वेगरूपं संवेदनं नाडीकोषाणुकद्वारेणाऽक्षतन्तुनाऽवाप्यते। तत्पश्चादेकस्य नाडीकन्दाणुकस्याऽक्षतन्तुः स्वसन्निहितेभ्योऽन्यनाडीकन्दाणुकस्योर्णातन्तुभ्यस्तत् संवेदनं वेगरूपं प्रदत्ते। एवं सर्वदैव संवेदनं प्रथमत ऊर्णातन्तुभिरेवाऽवाप्यते, न तु अक्षतन्तुना। यस्मिन् स्थले एकस्य नाडीकन्दाणुकस्याक्षतन्तुरन्यस्य नाडीकन्दाणुकस्योर्णातन्तुभिः सम्पर्कं करोति, तत्स्थानं नाडी-संबन्ध[१] इति नाम्नोच्यते। अत्रेदं स्मरणीयं यदेकस्य नाडीकन्दाणुकस्य अक्षतन्तुरन्यस्य नाडीकन्दाणुकस्योर्णातन्तुभिः सह नहि साक्षादविरलं सम्बन्धमवाप्नुते, अपि तु परम्परया।

अयं नाडीसम्बन्धो द्वयोर्नाडीकन्दाणुकयोर्मध्ये सेतुरिवावतिष्ठते। यद्यपीमानि नाडीकन्दाणुकान्येकनाडीसूत्ररूपे न परिणमन्ते, तथापि सान्निध्यादेव संवेदनवेगमेकस्मान्नाडीकन्दाणुकादन्यनाडीकन्दाणुकं प्रति वोढुं समर्थानि भवन्ति। यद्यपि सन्निहिताः, तथाप्येकस्य नाडीकन्दाणुकस्याक्षतन्तुप्रान्तिकयन्त्रिका अन्यस्य नाडीकन्दाणुकस्योर्णातन्तुभिः सह यदा कदा त्वेवं परस्पराश्लिष्टा भवन्ति, यदितरस्य केन्द्रकणिकाऽपि प्रथमनाडीकन्दाणुकस्याक्षतन्तुप्रान्तिकयन्त्रिकाभिर्बद्धा इव प्रतिभाति। वयमग्रेऽपि सहजक्रियाविवेचनावसरेऽस्य नाडीसम्बन्धस्य निर्देशं करिष्यामः।

ननु नाडीकन्दाणुकानां को वर्णो भवति ? अस्मिन् विषये सम्प्राप्ते एतावदेव वक्तव्यं भवति यन्नाडीकन्दाणुकबहुलानां नाडीतन्त्रवस्तूनां भस्मवद् धूसरप्रायो वर्णो भवति। एतस्मादेव कारणादस्य धूसरवस्तुसंज्ञया[२] व्यपदेशो भवति। नाडी-सूत्रबहुलानां तु शुभ्रप्रायो वर्ण इति शुभ्रवस्तुसंज्ञया[३] व्यपदिश्यते। प्रसङ्गतोऽत्रेदमपि स्मरणीयं यन्मस्तुलुङ्गं बहिस्तरेषु धूसरवस्तुमयं भवति। अन्तस्तरेषु चेदं शुभ्रवस्तुप्रायम्, अन्यत्र मूलकन्दादिभागेभ्यः।" सुषुम्णाकाण्डस्तु बहिः

"If it were possible to find an educated man, who knew nothing of electricity and had never heard of a telegraph or telephone, and if to this man was assigned the duty of making an investigation of the telegraph or telephone systems of a great city without any outside assistance whatsoever, and of preparing a report upon all the physical equipment with detailed maps of all stations and circuits and with an explanation of the method of operation of every part, his task would be simple as compared with the problem of the neurologist. The human cerebral cortex alone contains some 9280 million nerve cells, most of which are provided with long nerve fibres which stretch away far great distences and branch in different directions thus connecting each cell with many different nerve centres. The total number of nerve pathways is, therefore, inconceivably great."

१. तुलनार्थम्—Synapse.

२. तुलनार्थम्—gray matter.

३. तुलनार्थम्—White matter.

शुभ्रवस्तुप्रायः, अन्तश्च धूसरवस्तुमयः। नाडीग्रन्थि-नाडीकन्दाणुकादीनाञ्च धूसर एव वर्णः। नाडीसूत्राणान्तु शुभ्रो वर्णः पीताभो वा मेदोमयवृतिबाहुल्याद् भवति।

१०. केन्द्रीयनाडीतन्त्रम्

अस्य मस्तिष्कसौषुम्णिकनाडीतन्त्रम्,[१] किं वा मेरुनाडीतन्त्रमित्यप्यपरनामनी स्तः। इदं नाडीतन्त्रं सर्वत उपरि महत्त्वपूर्णम्। मानवव्यवहारोक्तसर्वाण्युच्चतरीयाणि विचारप्रयत्नेच्छादीनि कार्याण्यनेनैव सम्पाद्यन्ते। अस्य चत्वारो भागा विशेषत उल्लेखनीयाः सन्ति। तथा हि—१. मस्तिष्कम्[२], २. अनुमस्तिष्कम्[३], ३. सुषुम्णाशीर्षकम्[४], ४. सुषुम्णाकाण्डश्चेति[५]। तत्राद्यत्रयन्तु करोटिसम्पुटान्तःस्थमस्ति। सुषुम्णाकाण्डश्च पृष्ठवंशान्तर्निगूढो भवति। वयमत्र प्रथमं सुषुम्णाकाण्डस्य विवेचनं कृत्वैव मस्तिष्कादीनां मस्तुलुङ्गाङ्गानां सविस्तरं विवेचनमुपस्थापयिष्यामः।

११. सुषुम्णाकाण्डः

पृष्ठवंशान्तस्चूडावलयाख्य-प्रथमग्रीवाकशेरुकादारभ्य द्वितीयकटिकशेरुकाशिखरं यावत् सुषुम्णाकाण्डो मेरुदण्डापरनामधेयः पृथुकमलनालाकारो दृश्यते। स दैर्घ्येण स्ववितस्तिद्वयप्रमाणो भवति, तस्य परिणाहश्चाङ्गुष्ठपरिमितो भवति। गुरुत्वेन तस्य भारोऽपि सार्द्धतोलकद्वयमितो भवति। द्वितीयकटिकशेरुकादारभ्याऽयं मेरुदण्डोऽनुत्रिकं यावत् क्रमशस्तनूभूय शतावरीमूलान्तवत् प्रसरति। तस्य मूलमात्रस्य सुषुम्णामूलिकेति संज्ञा भवति। समग्रेऽस्मिन् मेरुदण्ड एकत्रिंशत् कशेरुका भवन्ति। युवावस्थायां ता एकोनत्रिंशत्संख्याका जायन्ते। सुषुम्णाकाण्डस्य ग्रीवावंशान्तः कटिवंशान्तश्च द्वौ स्थूलतरौ भागौ भवतः। तयोः प्रथमस्य ग्रीवावंशान्तस्याऽनुग्रीविकास्फीतिरित्यपि[६] व्यपदेशो भवति। द्वितीयस्य चाऽनुकटिकास्फीतिरिति[७] संज्ञा भवति।

अत्र नाड्योऽपि त्रिविधा भवन्ति। मस्तिष्काऽनुमस्तिष्कसुषुम्णाशीर्षकप्रभवा नाड्यस्तु शीर्षण्या[८] नाम, तासां करोटिगुहान्तःसम्भवत्वात्। या नाड्यः सुषुम्णाकाण्डप्रभवास्तासां मेरुजेति[९] संज्ञा भवति। स्वतन्त्रनाडीतन्त्रसम्भवाः पुनर्नाड्यः स्वतन्त्रा[१०] इत्यभिधानेन व्यपदिश्यन्ते।

सुषुम्णाकाण्डस्य कशेरुकान्तरालस्थै रन्ध्रमार्गैरेकाधिकत्रिंशन्नाडीयुग्मकान्युभयतो दक्षिणवामपार्श्वयोः प्रसरन्ति। तत्र द्वादश शीर्षण्या नाड्यः सन्ति। तास्तु विभिन्नज्ञानेन्द्रियैः

---

१. तुलनार्थम्—Central Nervous system.
२. तुलनार्थम्—Cerebrum.
३. तुलनार्थम्—Cerebellum. (धम्मिल्लकम् = अनुमस्तिष्कम्)
४. तुलनार्थम्—Medulla Oblongata.
५. तुलनार्थम्—Spiual Cord or medulla spinalis.
६. तुलनार्थम्—Cervical enlargement.
७. तुलनार्थम्—Lumbar enlargement.
८. तुलनार्थम्—Cranial Nerves.
९. तुलनार्थम्—Spinal Nerves.
१०. तुलनार्थम्—Sympathetic Nerves.

सह सम्पर्कं स्थापयन्ति मस्तिष्कानुमस्तिष्कस्य। ग्रीवायां[1] मेरुजानां नाडीयुग्मकानां संख्याऽष्टौ भवन्ति, पृष्ठे तासां संख्या द्वादश[2]। कटिभागे[3] तासां संख्या पञ्च भवन्ति। त्रिकास्थीनि पञ्च[4]। अनुत्रिकास्थि[5] चैका। एवमेताः साकल्येन एकाधिकास्त्रिंशद् (३१) मेरुजाख्या नाड्यो भवन्ति।

मस्तुलुङ्गमिव सुषुम्णाकाण्डस्याऽपि तिस्रो वृतयः[6] सन्ति। ता वृतयः कलामय्यो भवन्ति, मेरुनाडीतन्त्रञ्च समन्तात् प्रावृत्य तिष्ठन्ति। तासां बाह्या, मध्यमा, आभ्यन्तरीति नामानि सन्ति। बहिर्वृतिस्तु दृढस्नायुसूत्रबहुला कलानिर्मिता करोटिसम्पुटान्तः पृष्ठवंशान्तश्चाऽस्थिमयप्राचीरिकासु कतिचित्स्नायुसूत्रैः सम्बद्धा भवति। तस्या वराशिकेत्यपि[7] व्यपदेशो भवति। वराशिका पृष्ठवंशीयाऽस्थिषु साक्षान्न सम्बध्यतेऽपि तु समन्तात् सिराजाले मेदसा परिवृता भवति। अस्थिवराशिकयोर्मध्ये योऽवकाशो भवति तस्य परिवराशिका[8] नाम। मध्यमा वृतिः पुनस्तनुतरकलामयी नलिकाकारा नीशारिकापराभिधाना[9] भवति। वराशिकानीशारिकयोर्मध्येऽन्यः पूर्ववदेवाऽवकाशो वर्तते, सोऽपि लसिकापूर्णः। तस्यान्तर्वराशिकसंज्ञा[10] प्रथते। नीशारिकाऽन्तराले च योऽवकाशः, तस्य ब्रह्मोदकुल्येति व्यपदेशो भवति, महत्तरत्वाद् ब्रह्मवारिधरत्वाच्च। तस्यां हि कुल्यायां सुषुम्णाकाण्डो मध्यतोऽवलम्बते चीनांशुकापरिवृतः। आभ्यन्तरी वृतिः चीनांशुकेति व्यपदेशं बिभर्त्ति। इयं हि खलु तनुतमा। सा मस्तुलुङ्गं सुषुम्णाकाण्डञ्च सर्वथा संवेष्टयति, तद्विभागान्तरालेष्वपि च सुसूक्ष्मशिराधमनीजालकैरनुविद्धा भूता संसक्ता जायते।

सुषुम्णाकाण्डो बहिः शुभ्रवस्तुमयोऽन्तश्च धूसरवस्तुमयो भवतीत्यस्माभिः पूर्वमुक्तमेव।

सुषुम्णाकाण्डस्य कार्यम्—वयं सम्प्रति सुषुम्णाकाण्डेन किं कार्यं सम्पाद्यत इति विचारयामः। सुषुम्णाकाण्डस्तु शरीररूपभवनस्य प्रधानतमः स्तम्भः। तस्मिन् भग्ने सति भुग्ने जाते वा, सर्वमिदं भवनं धराशायि भविष्यतीति नास्त्यत्र कोऽपि सन्देहः। उक्तमेवास्माभिर्यत् पृष्ठवंशवतां निम्नस्तरीयाणां प्राणिनां मस्तुलुङ्गकार्यसम्पादनार्थं प्रथमतः सुषुम्णाकाण्ड एवाविर्भवति। मस्तिष्कादिभागानां विवृद्धिस्तु विकासवादीयामुच्चशृङ्खलां द्योतयतीति सर्वमवदातम्। मस्तिष्कस्य विचारोहापोहादीनि कार्याणि सन्तीत्यग्रे वक्ष्यामः। सुषुम्णाकाण्डस्तु मिश्रनाडीनिर्मितो भवति, तासु नाडीषु संज्ञावाहीनि चेष्टावाहीनि च द्विविधान्येव नाडीसूत्राणि विद्यन्ते। तेषां नाडीसूत्राणां केन्द्रकणिकास्तु धूसरवस्तुनि वर्तन्ते, नाडीसूत्राणि च शुभ्रवस्तुनि तिष्ठन्ति। संज्ञावाहीनि नाडीकन्दाणुकानि विभिन्नाङ्गेभ्यः संवेदनात्मकसूचनामादाय सुषुम्णाकाण्डद्वारेण मस्तिष्कमानयन्ति। चेष्टावहानि

१. तुलनार्थम्—Cranial Nerves.
२. तुलनार्थम्—Thoracic Nerves.
३. तुलनार्थम्—Lumbar Nerves.
४. तुलनार्थम्—Sacral Nerves.
५. तुलनार्थम्—Coccygeal Nerves.
६. तुलनार्थम्—Sheaths of the Spinal cord.
७. तुलनार्थम्—Dura mater.
८. तुलनार्थम्—Epidural space.
९. तुलनार्थम्—Arachnoid membrane.
१०. तुलनार्थम्—Sub-dural Space.

त्ऱालकानि वा नाडीकन्दाणुकानि मस्तिष्कादादेशं प्राप्य शरीराङ्गपेशीः प्रति तमादेशं मेरुदण्ड-द्वारेणैव प्रेषयन्ति। न केवलं एतावतैव सुषुम्णाकार्यजातं स्फुटीभवति, अविकसितमस्तिष्कवतां प्राणिनां सुषुम्णाकाण्ड एव प्रारम्भिकतमं मस्तिष्करूपम्। सहजक्रियारूपाः प्रतिसंक्रमिताः प्रतिक्रिया मानवेषु पशुषु च सुषुम्णाकाण्डेनैव नाडीसम्बन्धद्वारा सम्पाद्यन्ते। यदि कोऽपि मशकः सुप्तस्य मानवस्य जानु दंशति तदा स पुरुषः स्वजानु संकोचयति, अनेन कर्मणा मशकोऽपि पलायते। तीव्रप्रकाशागमने नेत्रतारिकाः स्वभावत एव संकुचिता जायन्ते। इमां सहजक्रियाम्, अन्याश्चेता-दृशीः बह्वीः सहजक्रिया अनायासेन सुषुम्णाकाण्ड एव सम्पादयति। अयं नाडीसम्बन्धोऽपि सुषुम्णान्तःस्थसंयोजकनाडीकन्दाणुकेन सम्भाव्यते। संवेदनानां चेष्टानाञ्च संयोजनं सामञ्जस्यस्थापनं मस्तुलुङ्गस्य सर्वोपरि कर्म, तस्य प्रारम्भिकास्ववस्थासु मेरुदण्डस्थितसंयोजकनाडीकन्दाणुकेभ्यो नाडीसम्बन्धद्वारेण सम्पाद्यते। अपि च, यदि सुषुम्णाकाण्डस्य कोऽपि भागः क्षतः संजायते, तर्हि तदधःस्थिताः शरीरपेश्योऽपि चेष्टादेशनिर्वाहेऽसमर्था भवन्ति, चेष्टावहनाडीकन्दाणुकानां क्षतत्वात्। तान्यङ्गानि स्वेच्छानुसारं परिचालयितुं न शक्यन्ते।

१२. मस्तुलुङ्गरचना

वयमिदानीं मस्तुलुङ्गस्योपरि स्थितानामङ्गानां मस्तिष्कानुमस्तिष्कसुषुम्णाशीर्षकादीनां क्रमशो विवेचनमुपस्थापयामः। तत्र प्रथमतः मस्तिष्कं विवेच्यते। किन्तु मस्तिष्क-विवेचनतः पूर्वं मस्तुलुङ्गरचनाया वर्णनमत्यावश्यकं प्रतिभाति। मस्तुलुङ्गं हि खलु शिरोगुहायां करोटिपीठमधिष्ठाय वर्तते। मस्तुलुङ्गं करोटिपटलेन करोटिपक्षाभ्याञ्च सुरक्षितं भवति।

यथोक्तमस्माभिर्यत् सुषुम्णाकाण्डस्त्रिभिर्वृतिभिः परिवेष्टितो वर्तते, एवमेव मस्तुलुङ्गमपि त्रिभिर्वृतिभिः सुरक्षितं तिष्ठति। ता वृतयः—वराशिका नाम बहिर्वृतिः, नीशारिका नाम मध्यमा वृतिः, चीनांशुका नामाभ्यन्तरी वृतिश्चेति। वराशिका नाम या वृतिः सा सकलकरोटिगुहान्तरावरणं करोति, कृत्स्नञ्च मस्तुलुङ्गं परिरक्षति। सा शिरःकपालान्तस्तले दृढस्नायुसूत्रजालैः सम्बध्यते। नीशारिका नाम या मध्यमा वृतिः साऽपि सिराजालवती सकलं मस्तुलुङ्गपिण्डमावृणोति, मस्तिष्क-गोलार्द्धद्वयान्तराले मस्तिष्कधम्मिल्लकमध्ये च प्रविशति। वराशिकानीशारिकयोर्मध्ये योऽवकाश-स्तस्य 'अन्तर्वराशिका' इति संज्ञाऽस्ति। आभ्यन्तरी या चीनांशुकाभिधाना वृतिः सा मस्तुलुङ्गस्याति-सूक्ष्ममावरणरूपा। सा विशेषेण मस्तुलुङ्गीयशिराधमनीजालं धारयति, मस्तुलुङ्गञ्च सम्यक् प्रविशति। नीशारिकाचीनांशुकयोर्मध्ये योऽवकाशस्तस्य 'ब्रह्मोदकुल्या' इति नाम। तस्मिंश्चान्तराले ब्रह्मोदकं नाम स्वच्छस्तरलः पदार्थो विद्यते। अन्तर्वराशिकसंज्ञोऽवकाशस्तु लसीकापूर्ण एव भवति। मस्तुलुङ्गस्यैकम्[1] अपरमप्यावरणं वल्कसंज्ञं[2] भवति। वल्कस्तु संयोजकानां नाडीकन्दाणुकानां जालशतैर्निर्मितो भवति।

१३. मस्तिष्कम्

सकलमस्तुलुङ्गस्य प्रतिशतं सार्धपञ्चाशीति(८५.५%)भागपरिणाहि मस्तिष्कं भवति। अनुमस्तिष्काऽपेक्षया कदाचिदिदं बृहन्मस्तिष्कमप्युच्यते। मस्तिष्कं हि खलु गोलार्द्धद्वयनिर्मितं

---

१. तुलनार्थम्—Skull.

२. तुलनार्थम्—Cortex.

मस्तुलुङ्गस्य महत्तममङ्गम्। मस्तिष्कं हि नाम अग्रिममस्तुलुङ्गपिण्डमेव मृणालकसहितमिति, न तु मस्तुलुङ्गापरनामधेयम्। सर्वस्मिन् मस्तुलुङ्गे बह्वयः सीताः सन्ति। यथा हि हालिको हलकर्षणेन क्षेत्रभूमौ सीता उत्पादयति, एवमेव मस्तुलुङ्गे, विशेषतो मस्तिष्केऽनेकाः सीताः सन्ति। अस्ति हि तासामलौकिकं माहात्म्यम्। नहि मस्तुलुङ्गस्य बृहदाकारवत्त्वं बुद्ध्युत्कर्षस्य प्रयोजकम्, नाप्युत्थितभागानामुत्तमाङ्गस्योपरि स्थितानामेवात्र विनिगमकत्वम्। बुद्ध्युत्कर्षाय तु एतासां सीतानां दैर्घ्यगाम्भीर्य्यवक्रिमादिमत्त्वं कल्पते। मस्तुलुङ्गे सन्ति हि सतदशाधिका मुख्याः सीताः, किन्तु मनोविज्ञानविवेचनदृष्ट्या तिस्रः सीता विशेषत उल्लेखनीयाः। ता हि—अनुदीर्घा नाम महासीता[1], मध्यान्तरा सीता 'रौलन्दिकी सीता' इत्यपरनामधेया[2], शङ्खपार्श्वान्तरा सीता[3] चेति। सकलमिदं मस्तिष्कं सीतासमन्वितमक्षरोटकफलमिव प्रतिभाति। अक्षरोटकार्धं यथा गोलार्द्धद्वयेन विभक्तं दृश्यते, तथैव मस्तिष्कं वामगोलार्द्धं दक्षिणगोलार्द्धमिति गोलार्द्धद्वयेऽनुदीर्घया महासीतया विभक्तं समुपलभ्यते। प्रथमं तावद् वयमेतासां सीतानां संक्षेपतो विवेचनं कृत्वा मस्तिष्कस्य महत्त्वपूर्णकार्याणां सविस्तरं वर्णनमुपस्थापयिष्यामः।

अनुदीर्घा महासीता—इयं सुगभीरा सीता विशालविहङ्गमाण्डवत् प्रविभान्तं मस्तिष्कं गोलार्द्धद्वये विभाजयति। सेयं सीता मध्यरेखायां पुरः पश्चाच्च गम्भीरानुप्रविष्टाऽपि मध्ये गोलार्द्धद्वयसंयोजकेन मस्तिष्कसेतुना विहतगतिर्दृश्यते।

मध्यान्तरा सीता—इयं सीता महासीताया मध्यदेशादारभ्य कुटिलमधोमुखञ्च प्रसृत्य प्रत्येकं गोलार्द्धमग्रिम-पार्श्विक-पिण्डयोर्विभाजयति। इयं सीता 'रौलन्दिकी सीता' इति नाम्नाङ्गलभाषीयग्रन्थेषु प्रसिद्धा जाता, यतो हि सर्वप्रथमं 'रोलन्दो' नामकेन यवनाचार्य्येणाऽस्याः सम्यग् विवेचनं कृतमासीत्।

शङ्खपार्श्वान्तरा सीता—इयं सीता मस्तिष्कतलेऽग्रिमं पिण्डं शङ्खिकापिण्डाद् विभजते। इयमतिगभीरा तिरश्चीना च भवति। एकैकस्य मस्तिष्कगोलार्द्धस्य पार्श्वभागे तलदेशादारभ्य पार्श्वतः प्रसरन्ती इयं सीता द्रष्टुं शक्यते।

अस्माभिः पूर्वमुक्तमासीद् यन्मस्तिष्के द्वादश शीर्षण्या नाड्योऽपि प्रविशन्ति। कास्ताः? तासां संक्षिप्तं वर्णनं मस्तिष्ककार्यनिर्देशनात् पूर्वं सुसङ्गतमेव प्रतिभाति। तास्तु प्रत्येकं शिरसः पार्श्वे द्वादश सन्ति। शरीरस्य वामाङ्गसम्बन्धिसंज्ञाचेष्टावाहिन्यो नाड्यो दक्षिणपार्श्वं समागच्छन्ति मस्तिष्कस्य। दक्षिणशरीराङ्गसम्बन्धिन्यश्च संज्ञाचेष्टावाहिन्यो नाड्यो मस्तिष्कस्य वामपार्श्वं समागच्छन्ति। तास्तु सुषुम्णादिवदितरमाध्यममन्तरेणैव साक्षान्मस्तिष्कमागच्छन्ति।

१—प्रथमा तावत् प्राणनाडी नाम गन्धसंज्ञावहा[4] भवति।

---

१. तुलनार्थम्—Great longitudinal Fissure.

२. तुलनार्थम्—Central Fissure of Rolondo.

३. तुलनार्थम्—Lateral Cerebral Fissure of Sylvius.

४. तुलनार्थम्—Olfactory Nerve pertaining to small.

२—द्वितीया दृष्टिनाडी नाम[1], या रूपसंज्ञावहा नेत्रगोलकमूलात् पश्चिमपिण्डं यावन्मस्तिष्कान्तः प्रसरति।

३—तृतीया[2]
४—चतुर्थी[3] } इमा नाड्यो नेत्रपेशीप्रचेष्टिन्यः सन्ति।
५—षष्ठी[4]

६—पञ्चमी[5] नाडी त्रिधारासंज्ञकाऽस्ति। सा मुखोपेतशिरोमण्डलस्य स्पर्शसंज्ञामानयति, चेष्टाञ्च ह्यनन्यपेशीनां प्रेषयति।

७—सप्तमी[6] वक्त्रनाडी नामाऽस्ति। सा मुखमण्डलस्थपेशीनां चेष्टां वहति, रसनापूर्वार्धस्य संज्ञां चानयति।

८—अष्टमी[7] श्रुतिनाडी नामाऽस्ति। सा श्रोत्राभ्यन्तरात् शब्दसंज्ञामानयति मस्तिष्कसंज्ञाक्षेत्रं प्रति।

९—नवमी[8] कण्ठरासनी नामाऽस्ति। सा विशेषतः स्वादसंज्ञामानयति, अपि च तालुगलरसनापश्चिमार्द्धभागेभ्यः संज्ञामानयति।

१०—दशमी[9] प्राणदाख्याऽस्ति। सा गलक्लोमफुप्फुसहृदयादिप्राणनयन्त्रसम्बन्धिनीं यकृदामाशयसम्बन्धिनीञ्च संज्ञां वहति, चेष्टाञ्च प्रेषयति।

११—एकादशी ग्रीवापृष्ठगा नाम[10]। सा मन्याख्यां पेशीं पृष्ठच्छदाञ्च पेशीं चेष्टां नयति।

१२ द्वादशी[11] जिह्वातालिकाभिधेयाऽस्ति। सा प्रधानतो जिह्वापेशीश्चेष्टादेशं मस्तिष्कान्नयति।

उक्तमेवास्माभिर्यन्मस्तिष्के धूसरवस्तु बहिस्तिष्ठति, अन्तःस्थञ्च शुभ्रवस्तु आवृणोति। यथा विल्वफले धूसरवस्तुगर्भितानि बीजानि तिष्ठन्ति, तथैव चेदं मस्तिष्कं शुभ्रवस्तु, विशेषोक्तत्वात्। धूसरवस्तुनिर्मित एव वल्को भवति, तस्य स्थूलत्वमाधिक्यं वा बुद्धेरुत्कर्षं सूचयति, यथा सीतानां दैर्घ्यगाम्भीर्यवक्रिमाधिक्यसमन्वितत्वञ्च। यतो हि मूर्खाणां शिरःशल्यच्छेदेन मूर्खाणां मस्तिष्कवल्कस्य ह्रस्वपरिणाहो दृश्यते बुद्धिमतामपेक्षया।

---

१. तुलनार्थम्—Optic Nerve—vision.

२. तुलनार्थम् - Ocular motor—motor and sensory to eye muscles.

३. तुलनार्थम् Trochlear motor moter and sensory to eye muscles.

४. तुलनार्थम्—Abducens—motor and sensory to eye muscles.

५. तुलनार्थम्—Trigeminus—sensory from skin, mouth and teeth.

६. तुलनार्थम् —Facial—taste on anterior part of the tongue; fascial muscles, sub-mascillary and sub-lingual glands.

७. तुलनार्थम् - Auditory—Hearing and Equilibrium.

८. तुलनार्थम्—Glosso-pharyngeal—taste on back of tongue.

९. तुलनार्थम्—Vagus—motor and sensory to visera.

१०. तुलनार्थम्—Spinal Accessory—Larynx, pharynx, thoracic, abdominal ann visceral.

११. तुलनार्थम् —Hypoglossal—motor and sensory to tongue.

सन्तु तावन्मस्तिष्कस्य कर्माणि। अस्माभिरुक्तमेव यन्मानसिकक्रियासु सरलतमासु सुषुम्णास्थितनाडीसम्बन्धस्थानान्येवोपयुक्तप्रतिक्रियोत्पादने समर्थानि भवन्ति, नाडीसम्बन्धस्तु गौणं चेष्टायतनम्। निम्नस्तरीयेषु मूलप्रवृत्तिसहजप्रवृत्तिप्रधानेषु प्राणिषु सुषुम्णास्थितं नाडीतन्त्रमेव प्रौढिङ्गतं भवति, बुद्धिमनपेक्ष्य प्रतिसंक्रमितान्[1] क्रियावेगान् पेशीभूरपादयितुं प्रभवति। परन्तु मनुष्याणामनेकविधानां संवेदनविचारस्मृतिप्रयत्नाध्यवसायेच्छादीनां कार्याणां सम्पादनार्थन्तु मस्तिष्कमेव समर्थं भवति। प्राणिविकासशृङ्खलायामत एव मस्तिष्कविकासः सन्निकृष्टतम इति विकासवादिनो मनोवैज्ञानिकाश्च मन्यन्ते। मस्तिष्कमेव बुद्धिविवेकोहापोहनिर्णयप्रत्यभिज्ञानादीनां कार्यक्षमं मुख्यतमं नाडीयन्त्रम्। बुद्धिमत्सु मस्तिष्कस्य भारोऽपि सामान्यजनाऽपेक्षया गुरुतर एव भवति, यद्यपि भाराऽपेक्षातः सीतानां बाहुल्यगाम्भीर्यादिकं संयोजकस्रोतसां नाडीकन्दाणुक-विशेषकाणाञ्च महत्त्वं बुद्धिवैभवोत्कर्षाय गुरुतरमपेक्ष्यते। अर्वाचीन-शारीरकमनोविज्ञानानुसन्धा-नादिभिर्मस्तिष्कस्य केचन स्थलविशेषास्तत्कार्यसम्पादनक्षमतानुसारं निर्दिष्टाः।

१४. मस्तुलुङ्गस्य चैतन्याधिष्ठानत्वसाधकाः केचन प्रयोगाः

'हृदयं चेतनास्थानम्'इति मतं त्वस्माभिर्निराकृतम्। साम्प्रतं प्रतिपक्षिणामिदं चोद्यमस्ति ननु किमस्ति मस्तुलुङ्गस्य चैतन्याधिष्ठानत्वसाधकमिति ? शारीरकमनोविज्ञानवेतृभिरायुर्वेदविज्ञान-विशारदैश्च पाश्चात्त्यैरिदं प्रत्यक्षप्रयोगेभ्यः साधितं यन्मस्तुलुङ्गमस्ति चैतन्याधिष्ठानम्। त्रिविधाः प्रयोगास्तैराश्रिताः—

(अ) प्रयोगकर्तृभिरुत्तेजिताः कृत्रिमोपायैर्विद्युदादिभिर्मस्तिष्कवल्कस्थलविशेषास्तत्तदनु-बन्धिन्योऽपरशरीराधो या अङ्गप्रत्यङ्गाणां क्रियाः प्रवर्तन्ते।

(आ) यदि मस्तिष्कान्तःस्थचेष्टास्थानमभिघातादिभिरभिहतं स्यात्, तर्हि तत्सम्बन्धिनो-ऽङ्गस्य क्रियालोपो वेपथुर्वा जायते।

(इ) यदि मस्तिष्काऽभ्यन्तरे कस्याश्चिद् धमन्यास्त्रुटनं भवेत्तर्हि रक्तस्रावादिना नाडी-स्रोतसामवरोधेन तदनुबन्धिशरीरभागे पक्षाघातादयो रोगाः समुत्पद्यन्ते।

यद्यपि मनुष्येषु मस्तिष्कप्रयोगा दुष्करा भवन्ति, तथापि रुग्णपुरुषाणां मस्तिष्कस्य शल्यचिकित्साऽवसरे बहवः प्रयोगा उपर्युक्तानि संज्ञाचेष्टाधिष्ठानानि मस्तिष्कवल्कस्थितानि निश्चि-नुवन्ति। प्रथमतः पशुष्वेव मस्तिष्कप्रयोगाः सम्पादिता आसन्। साम्प्रतमपि मस्तिष्करचनाया रहस्यं पशूनां करोटिपटलमुद्घाट्य मस्तिष्कस्थलानां विद्युद्रश्मिभिरुत्तेजनेनैव प्रायः समुपलभ्यते। अस्माभिरत्र अष्टौ प्रयोगा विवर्ण्यन्ते।

(१) नाडीतन्त्रविषये सर्वप्रथममाङ्ग्लदेशीयशारीरकविज्ञानविशारदाः श्रीबैलमहोदया[2] एकोनविंशतितमवैक्रमशतकस्योत्तरार्धे प्रतिपादितवन्तो यत् क्रियामभिलक्ष्य नाडीनां वर्गीकरणं कर्तुं शक्यते, यतो हि सन्ति काश्चन संज्ञावहा नाड्यो यास्त्वगादिज्ञानेन्द्रियेभ्यः सुषुम्णां पश्चिमभागे प्रविश्य संज्ञामानयन्ति। अन्याश्च सन्ति काश्चन नाड्यो यासां कार्यं विभिन्नशरीराङ्गपेशीः प्रति चेष्टादेशप्रापणमस्ति, याश्च सुषुम्णाया अग्रिमभागेभ्यः प्रसरन्ति। इदं मतं 'बैल-मेगेण्डी-नियम' इति नाम्ना मनोविज्ञाने प्रसिद्धमस्ति। यतो ह्येकेन फ्रांसदेशीय-मेगेण्डी-महाशयेनाऽपि बेला-न्वेषणात् कतिपयवर्षानन्तरं स्वतन्त्रेणेदमेव मतमुररीकृतमभूत्।

१. तुलनार्थम्—Reflex muscular actions.

२. तुलनार्थम्—Sir charles Bell (१७७४–१८४२ ई०)

(२) परन्तु वैलमहोदयेन नेदं मतं साधितमासीद् यदेकेन नाडीस्रोतसा एकस्येन्द्रिय-विशेषस्यैव कार्यं सम्पाद्यते, न तु बहूनामेकाधिकानां वा, तेनेदं मतमुद्भावितं जातम्। बर्लिनस्थ-जर्मनदेशीयशारीरशास्त्रविशारदेन म्यूलर[1]महोदयेनेदं मतं सर्वथा साधितं यद्धि प्रत्येकं नाडी विशिष्टकार्यसम्पादनक्षमा, कार्यञ्चेदं चेष्टासम्बन्धि भवतु नाम किमुत संज्ञासम्बन्धि; किन्तु तेनापीदं न निर्णीतं यद् दर्शनश्रवणादिसंवेदनकर्माणि तत्तदिन्द्रियविषयसम्बन्धिचाक्षुषश्रावणादिनाडी-विशेषमात्रोत्तेजनयाऽविर्भवन्ति, किमुत मस्तुलुङ्गस्थविशिष्टसंज्ञाधिष्ठानानामुत्तेजनेनेति। तदनन्तरं तेन तु पूर्वोऽयमेव विकल्प आश्रितः, यतो हि तदानीं द्वितीयो विकल्पो वैज्ञानिकक्षेत्रेषु मुद्रासामुद्रिकाङ्गीभूतो[2] न प्रतीयते। स्मरणीयमत्र यन्मुद्रासामुद्रिकं सामिविज्ञानं[3] तदा सन्देहास्पदं जातं वैज्ञानिकक्षेत्रेषु। मुद्रासामुद्रिकस्यैयं मान्यता आसीद्यदुत्थितभागा एव शिरस्युपरि स्थिता बुद्ध्युत्कर्षं सूचयन्तीति। तन्मतसादृश्यभयाद् म्यूलरमहोदयेनाऽपि मस्तुलुङ्गीयसंज्ञा-चेष्टाधिष्ठान-निर्णयसम्बन्धि-प्रयत्नः परित्यक्तः।

(३) वस्तुतः शिरोमुद्रासामुद्रिकस्य प्रगत्यैव तदेतरवैज्ञानिकानां हृदय इदमौत्सुक्यं वर्धितं यन्मस्तुलुङ्गाधिष्ठानान्वेषणं करणीयमेव। फ्रांसदेशीयशारीरविज्ञानपारङ्गतेन फ्लोरेंसमहोदयेन[4] तदानीं पारावतमस्तुलुङ्गकार्याधिष्ठानाऽन्वेषणार्थं केचन प्रयोगाः प्रारब्धाः। तेनेदं प्रमाणीकृतं यन्मस्तुलुङ्गस्योपरिभागानां मस्तिष्कस्य गोलार्द्धद्वयात्मकानामपसारणेन पारावतानां श्रवणदर्शनस्मरणैच्छिककर्मणां विलोपो जायते। मस्तुलुङ्गस्याऽधस्तरीयभागानामनुमस्तिष्काभिधेयानामपसारणेन च विविधसंज्ञाचेष्टाक्रियाणां नियन्त्रणस्य संयोजनस्य च[5] विलोपो भवति। मस्तुलुङ्गस्य द्वौ अपरावपि भागविशेषौ विशिष्टकार्यसम्पादनपरौ लक्षितौ। फ्लोरेंसमहोदयेन मस्तुलुङ्गनाडीतन्त्रयोः क्रियाऽनन्यत्वं तारतम्यञ्चापि निर्दिष्टम्। तेनेदमपि मतमुद्भावितं यदेकस्य मस्तुलुङ्गीयाधिष्ठानक्षेत्रस्याऽपसारणेन विलुप्तं कार्यं पुनरर्जयितुं प्राप्तुं वा शक्यत इति मतं प्रायशो वर्षशतानन्तरं लैशली-महोदयेन प्रमाणीकृतम्।

(४) १९१८ वैक्रमाब्दे पेरिसनगरे मानवीयमस्तुलुङ्गस्याऽध्ययने ब्रोकामहोदयेन सुमहदनुसन्धानं कृतम्। तेषामौत्सुक्यं मस्तुलुङ्गस्याऽधिष्ठानान्वेषणार्थमेकेन रुग्णेन पुरुषेण वर्द्धितम्। तस्य हि खलु रोगिणो वाक्क्रियाविलोपोऽभवत्, यद्यपि तस्याऽपरथा कोऽपि पक्षाघातो नाविर्भूतः। स तु मानसिकेतरक्रियासु वार्तालापक्रियां विहाय सर्वथा स्वस्थ इवाऽचरति स्म। तस्य पुरुषस्य निधनाऽनन्तरं ब्रोकामहोदयस्तस्य मस्तुलुङ्गे वामभागीयमस्तिष्काग्रिमस्थतृतीयसीतायां किमपि निर्गलितमङ्गं दृष्टवान्। ब्रोकामहोदयेन तदाप्रभृति प्रमाणीकृतमिदं यद्धि तद्भागधिष्ठानमेवास्तीति। तदधिष्ठानमद्यावधि ब्रोकाक्षेत्रमिति नाम्ना प्रथते।

---

१. तुलनार्थम् Johanes muller (१८०१–१८५८ ई०)

२. तुलनार्थम्—Phrenology.

३. तुलनार्थम्—Pseudo-science.

४. तुलनार्थम्—Pierre florens (१७९४–१८६७ ई०)

५. तुलनार्थम्—Co-ordinati n.

(५) प्रथमयूरोपीयमहायुद्धे जर्मनदेशीयचिकित्सकद्वयेन आहतानां[1] शूरवीराणां मस्तिष्कानामध्ययनानन्तरं पशुषु मस्तिष्कप्रयोगाः समारब्धाः। फलतस्ताभ्यां मुखग्रीवापिण्डिकापेशीनियामकानि मस्तिष्कस्थचेष्टाधिष्ठानानि निर्णीतानि। एवमेवान्यैश्चापि बहुभिरनुसन्धानपरैर्वैज्ञानिकैर्वानरादिपशुषु प्रयोगाः समारब्धाः। तैषां प्रयत्नैर्मस्तिष्कस्य मस्तुलुङ्गीयेतरवल्कादिभागानां पूर्वनिर्दिष्टविशिष्टसंज्ञाचेष्टाधिष्ठानानि परिमापितानि। द्रष्टव्यमत्र यद्धि मुद्रासामुद्रिकापेक्षया वैज्ञानिकप्रणाल्यनुप्राणितमिदं मस्तुलुङ्गीयसंज्ञाचेष्टाधिष्ठाननिरूपणं महत्पार्थक्यं वैशिष्ट्यञ्चावहति।

(६) मस्तुलुङ्गीयक्रियाक्षेत्राणामन्यद्रूपं श्रीफ्राङ्ज-लैशलीमहोदयाभ्याम्[2] अमेरिकन-मनोवैज्ञानिकाभ्यां प्रकाशमानीतम्। कैलिफोर्नियाविश्वविद्यालयीयप्राध्यापकेन फ्राङ्जमहोदयेन मार्जारवानराः शिक्षिता यत्कथं द्वारमुद्घाट्य ते जटिलकाष्ठपिटिकाभ्यो बहिरागच्छेयुरिति। तदनन्तरं मस्तिष्कस्याग्रिमपिण्डद्वयाऽपसारणेन तैरिदमपि लक्षितं यत्तेषामर्धीतक्रियायाः पिटिकोद्घाटनात्मिकाया विलोपः समजायत। यद्यपि भक्षणनखकर्षणादिप्राक्तनक्रियाः पूर्ववदेव ते कृतवन्तः। स्वप्रयोगनिर्णयान् पुनः संशोध्य फ्राङ्जमहोदयेन प्रतिपादितं यद्धि मस्तिष्कस्याऽग्रिमपिण्डद्वयं नवीनक्रियाणां शिक्षणोपयोगि भवति, यद्यपि नवशिक्षितक्रियाः कालान्तरे मस्तुलुङ्गीयेतरभागानपि परिवर्तयितुं शक्नुवन्तीति।

(७) लैशलीमहोदयेन हारवर्डविश्वविद्यालयीयशारीरकमनोविज्ञानवेत्रा मूषकेषु स्वप्रयोगाः समारब्धा उपर्युक्तप्रकारेणैव। यदा तैर्मूषकैः शिक्षितमिदं यत्कथं जटिलपिटिकाभ्यः पलायितव्यमिति, तदा लैशलीमहोदयेन तेषां मस्तुलुङ्गस्य अतिसंवेदनशीलवल्कसंज्ञकबहिःस्थितभागस्य विभिन्नमात्रासु विभिन्नांशा अपसारिताः। उपलब्धं हि खल्वाश्चर्यजनकं तथ्यम्। नहि विशिष्टं क्षेत्रमपि तु वल्कमात्रयैदमनुमेयं भवति यत् कियती हि साऽभ्यस्ता क्रिया विलुप्ता जायत इति। अथवा नवीनाऽभ्यस्तक्रियाया अविनष्टांशस्तु अनपसारितमस्तुलुङ्गीयवल्कमात्रया परिमेयः। अपि च कस्यचिद् भागस्याऽपसारणानन्तरमपि तैर्वैज्ञानिकप्रवरैरिदं लक्षितं यत् चिकित्सानन्तरमपि ते मूषका अवशिष्टमस्तुलुङ्गीयवल्कपरिमाणाऽपेक्षया विलुप्तामभ्यस्तक्रियां पुनः शिक्षितुं प्रभवन्ति। मस्तुलुङ्गीयवल्कमात्राऽनुपातेनैव तेषां विलुप्ताभ्याससम्बन्धिन्यां पुनःशिक्षणक्रियायां साफल्यं भविष्यतीत्यभिसन्धिः।

किं तर्हि फ्रान्ज-लैशलीमहोदययोरनुसन्धानेभ्य इतः पूर्वनिर्दिष्टसंज्ञाचेष्टाधिष्ठानानां मस्तिष्कस्थानां वर्णितं मतं निराकृतम्? एवं सम्प्राप्तायां शङ्कायामस्माभिरुच्यते—नहि तयोः प्रयोगजातैः पूर्वोक्तमस्तुलुङ्गीयसंज्ञाचेष्टाधिष्ठाननिरूपणं प्रत्युक्तं जायते। तैः प्रयोगैस्त्विदं निर्णीतं यद्धि जटिलतरक्रियाशिक्षणे मस्तुलुङ्गीयः कोऽपि भागो विशेषतोऽनिवार्यो नास्तीति। यदि केनापि शल्यच्छेदादिकर्मणा कोऽपि मस्तुलुङ्गभागो विलुप्तो जायते, तत्सम्पादितक्रियासम्पादनार्थमन्ये मस्तुलुङ्गभागा व्यापृता भवन्ति तदभ्यासश्च पुनः शिक्षितुं शक्यत इति तेषां तात्पर्यम्।

मानवशारीरविज्ञाने फ्राञ्जमहोदयेनोपर्युक्तनिर्णयानां प्रयोगोऽप्यारब्धः। तेन निर्गलितमस्तुलुङ्गीयभागवतां रोगिणां विलुप्ताभ्यासानां पुनः शिक्षणेनाऽपीदं साधितं यद् वल्कस्येतरभागास्तदभ्यासशिक्षणे संलग्ना जायन्त इति।

१. तुलनार्थम्—G. fritsch and E. Hitzig in franco-prussian war.

२. तुलनार्थम्—Shepherd Ivory Franz (१८७४ ई०–१९३३ ई०) and Karls. Lashly (१८९० ई०)

(८) न्यूयार्कस्थचिकित्सकप्रवरेण ब्रिकनेरमहोदयेन[१] मस्तुलुङ्गीयविस्फोटचिकित्सार्थमेकस्य रोगिणोऽग्रिममस्तिष्कपिण्डयोः शल्यच्छेदक्रिययाऽपसारितोऽधिकतमांशः। यद्यपि संज्ञाचेष्टाक्रियासु काऽपि दृश्या क्षतिर्न सञ्जाता, तथाऽपि तस्य रोगिणो व्यवहारोऽतीव परिवर्तितोऽभूत्। स हि रोगी अशान्तः, वित्रस्त इव चुक्रोश, असंयतभाषी चाऽभवत्[२]। स उच्चैरब्रवीत्, उच्चैरगायत् इतस्ततोऽनृत्यत्, स्वप्रशंसाञ्चानियन्त्रितो भूत्वाऽरुघवान्। ब्रिकनेरमहोदयोऽतीवाश्चर्यमयेनानेन व्यवहारपरिवर्तनेनेदं निर्णीतवान् यद्धि अग्रिममस्तुलुङ्गपिण्डद्वयाधिकतमांशापसारणेन तस्य पुरुषस्य समन्वयस्थापनशक्तिः संयोजनयोग्यता वा विलुप्ता जाता, यतो हि तस्या विलोपेन स जटिलतरसमस्याविचारणं भाविकार्यक्रमनियोजनं स्वक्रियावेगादिनियमनञ्च सर्वथैव कर्तुमसमर्थः सञ्जातः।

१५. अनुमस्तिष्कम्[३]

अयं मस्तुलुङ्गभागो मस्तिष्कात् पश्चिमस्थो भवति। अनुमस्तिष्कस्यापरं नाम धम्मिल्लकमित्यपि प्रथते। "धम्मिल्लः संयताः कचाः" इत्यमरः। योषितां धम्मिल्लकाकारत्वादनुमस्तिष्कस्य धम्मिल्लकमिति व्यपदेशः। इदं लघुमस्तिष्कमित्यपि संज्ञां बिभर्ति। यतो हीदमपि मस्तिष्कमिव स्वाधीनक्रियायतनमस्ति। धम्मिल्लकं मस्तिष्कभारस्याष्टमांशमितमस्ति। यूनो धम्मिल्लकं प्रायेण द्वादशतोलकमानम्। शिशोश्च प्रायेणानुमस्तिष्कं पञ्चतोलकमितं भवति, शैशवे मस्तिष्कस्य विंशतितमांशमानत्वात्। अनुमस्तिष्कं बहिर्धूसरवस्तुनिर्मितं भवति, अन्तश्च शुभ्रवस्तुना किञ्चिद्धूसरवस्तुगर्भितेन। अनुमस्तिष्कं मस्तिष्काज्जवनिकाख्य[४]-मस्तिकवाह्यवृतिभागेन पृथक्कृतमाच्छादितञ्च भवति। शुभ्रसूत्रमय्यो वृन्तिका[५] धम्मिल्लकं मस्तिष्कोष्णीषकसुषुम्णाशीर्षकैर्बध्नन्ति। उत्तरवृन्तिकया मस्तिष्केन साकं मध्यवृन्तिकयोष्णीषकेण सार्धमधोवृन्तिकया सुषुम्णाशीर्षकेण सह सम्बद्धो भवति। धम्मिल्लके बह्व्यः सीता गभीराः सन्ति।

किन्तर्हि धम्मिल्लकस्य कार्यम्? धम्मिल्लकं हि खलु महत्त्वपूर्णं कार्यं सम्पादयति। शरीरस्य विभिन्नक्रियासु संवेदनेषु च[६] समन्वयात्मकं सम्बन्धं स्थापयति, शरीरसन्तुलनञ्च विविधास्ववस्थास्वावहति। यदि धम्मिल्लकस्यापसारणं शल्यच्छेदेन कस्यचिज्जन्तोर्भवेत्, तर्हि स स्वशरीर सन्तुलनं धारयितुं न प्रभवति। इदं त्वक्-पेशी-सन्धिभ्यः सुषुम्णामार्गेण प्रत्यक्षं ज्ञानं गृह्णाति,

---

१. तुलनार्थम् Dr Richard M. Brickner of Newyork.

२. तुलनार्थम्—"He became restless, distracted, jittery. He shouted, sang in loud voice, danced about, and boasted without restraint. Brickner concluded that the man had lost his ability to combine or synthesize that he could not think out a problem plan ahead or restrain his impulses."

३. तुलनार्थम्—Cerebellum.

४. तुलनार्थम्—Teutorium cerebelli.

५. तुलनार्थम्—Pedurcular fibres.

६. तुलनार्थम्—Co-ordination of impulses.

अर्द्धवृत्ताकारनलिकाभ्यः श्रावणालोचनं चाक्षुषालोचनञ्च प्राप्नोति, मस्तिष्कवल्काच्च क्रियावेगानवाप्नोति। एतेभ्यः कारणेभ्यः क्रियारूपेभ्य इदं शरीरसन्तुलनधारणक्षमं जायते। यदा कोऽप्यैच्छिकक्रियावेगः शरीरपेशीः प्रति मस्तिष्कान्निर्गच्छति, स तूष्णीषकादिनाडीसूत्रद्वारेणैव सुषुम्णाकाण्डं नीयते। तत्कालमेव मस्तिष्कादनुमस्तिष्कमप्येकः क्रियावेगो निर्गच्छति। तस्मिंश्च क्रियावेगे सम्प्राप्ते धम्मिल्लकं शरीरसन्तुलनं धारयितुं कृतपरिकरो भवत्याशु।

१६. उष्णीषकम्[1]

उष्णीषकं नाम पश्चिममस्तुलुङ्गपिण्डस्य पौरस्त्यो भागो भवति। अस्येदमुपलक्षणमुष्णीषपट्टिकावदनुप्रस्थप्रसृताभिर्नाडीसूत्रपट्टिकाभिरवगम्यते। इदं मस्तिष्कधम्मिल्लकसुषुम्णाशीर्षकान् परस्परं संयोजयति। अस्योर्ध्वसीम्नि मध्यरेखामुभयतो मस्तिष्कमृणालके बहिर्निर्गते द्रष्टुं शक्येते। अस्य पृष्ठतः पार्श्वयोश्च स्तोकेनानुमस्तिष्कपिण्डद्वयं तिष्ठति। उष्णीषकस्याधस्तात् सुषुम्णाशीर्षकं भवति। इदं द्व्यङ्गुलायतं सार्धाङ्गुलदीर्घञ्च भवति। उष्णीषकं परितः शीर्षण्याः पञ्च नाड्यः प्रविशन्ति।

उष्णीषकं हि खलु महासंयोजकं मस्तिष्कानुमस्तिष्कसुषुम्णाशीर्षकादीनामित्युक्तमेव। अत्र दक्षिणमस्तिष्कगोलार्द्धमभिगच्छन्तः संज्ञावेगा वामशरीरभागत आगच्छन्तो दक्षिणपथं स्वीकुर्वन्ति। दक्षिणशरीरभागत आगच्छन्तश्च संवेदनवेगा मस्तिष्कवामगोलार्द्धमभिगच्छन्तो वामपथं परस्परमुल्लङ्घ्य गृह्णन्ति। उष्णीषकमार्गेणैव च मस्तिष्कवामगोलार्द्धमनुमस्तिष्कस्य दक्षिणभागेन सह सम्बद्धं जायते, मस्तिष्कस्य दक्षिणगोलार्द्धमनुमस्तिष्कस्य वामभागेन साकं सम्बद्धं सञ्जायते। संज्ञावेगानामिव चेष्टावेगानामप्यत्रैव परस्परोल्लङ्घनं भवतीति सर्वमेतावतैवाऽध्यवसेयम्।

१७. सुषुम्णाशीर्षकम्

सुषुम्णाशीर्षकं हि खलु सुषुम्णाकाण्डस्य शिखरे पश्चिमकपालमूलभागमधितिष्ठति। इदं द्व्यङ्गुलमात्रेण दीर्घम्, अधस्तादस्य कनिष्ठिकापरिमितो परिणाहः। इदं सार्द्धाङ्गुलप्रस्थमस्ति। सुषुम्णाशीर्षकस्योर्ध्वभागः स्थूलतरपरिणाहयुक्त उष्णीषकाधःसीम्नि तिष्ठति। अस्याधोभागः सुषुम्णाकाण्डेन सह सम्बद्धो भवति। सुषुम्णाशीर्षकं षष्ठ्यादिद्वादशान्तानां शीर्षण्यनाडीनां बहूनां केन्द्राणुकानाञ्चास्ति प्रभवनिर्गमस्थानम्। अत्रैव पश्चिमतो धम्मिल्लकाच्छादितं प्राणगुहाया निम्नार्धं वर्तते।

सुषुम्णाकाण्डस्य रचनायां त्रिविधं वैशिष्ट्यं भवति। प्रथमं तावत् सुषुम्णाशीर्षके धूसरवस्तु नहि सर्वत्र मध्यस्थं सुषुम्णाकाण्ड इव। इदं प्रायेण 'कन्दिका'[2]संज्ञकं धूसरवस्तु पृथक्तो नाडीसूत्रजालेषु द्रष्टुं शक्यते। शुभ्रवस्तु बहिरेव वर्तते। द्वितीयञ्चास्य वैशिष्ट्यं यदत्र मुकुलिकाख्य[3]मार्गगतचेष्टावहसूत्राणि वेणीबन्धक्रमेण तिर्यग् प्रसृतानि जायन्ते, दक्षिणसूत्राणि वामतः, वामसूत्राणि च दक्षिणतः प्रसरन्ति। एवमेव संज्ञासूत्राणामपरो वेणीबन्धश्चेष्टावहवेणीबन्धस्थानात्किञ्चिदूर्ध्वतरमधितिष्ठति। एष चास्य तृतीयो विशेषः। सुषुम्णाकाण्डान्तरीयो ब्रह्ममार्गः शीर्षकस्योपरिभागे स्फारीभवति, तदधस्तात् प्राणगुहा च वर्तते। प्राणगुहा नाम चतुरस्रखातमिति[4] प्रसिद्धमायुर्वेदविज्ञाने।

---

१. तुलनार्थम्—Pons.

२. तुलनार्थम्—Nucleus.

३. तुलनार्थम्—Pyramidal tract.

४. तुलनार्थम्—Forth Ventricle.

किं तर्हि सुषुम्णाशीर्षकस्य[1] कार्यम्? सुषुम्णाशीर्षकं हि समग्रसौषुम्णिकतन्त्रस्य नाडीसूत्राणां संग्राहकं संयोजकञ्चास्ति। इदं मस्तिष्कानुमस्तिष्काभ्यामागतानां नाडीसूत्राणामपि संयोजकमस्ति। मद्यपानां सुषुम्णाशीर्षकं धम्मिल्लकञ्च प्रौढव्यसनावस्थासु निर्गलितं जायते। एतस्मादेव कारणान्माध्वीपानकाले शरीराङ्गानां सन्तुलनं धारयितुं मद्यपो न प्रभवति। सुषुम्णाशीर्षके हि स्थितानि प्राणगुहायां प्राणरक्तसञ्चाराद्यतीवानिवार्यक्रियाणां प्रभवस्थानानि। सुषुम्णाशीर्षकच्छेदाहतं भवेत्तर्हि तत्क्षणं पञ्चत्वमाप्नुयात् कोऽपि प्राणी। एतावतैवास्य महत्त्वमनुमेयम्।

१८. मस्तिष्कसेतुः[2]

मस्तिष्कसेतोर्वर्णनं प्रायेणार्यभाषायां लिखितेषु पुस्तकेषु विपर्यस्तमुपलभ्यते। तत्र मस्तिष्कसेतुस्तूष्णीप्रकपर्यायवाचकरूपेणोपन्यस्तः। अयं मस्तिष्कस्य गोलार्द्धद्वयं परस्परं संयोजयति। अयमनुदीर्घायां महासीतायामधस्तात् शुभ्रवस्तुभूयिष्ठोऽवतिष्ठते। अर्वाग्बुध्नकटाहवदयं ब्रह्मगुहामाच्छादयति। अयं मस्तिष्कसेतुः षडङ्गुलदीर्घो भवति। अयं पूर्वापरप्रान्तयोः स्थूलतरो मध्ये च क्षीणः सार्धाङ्गुलप्रस्थो भवति। मस्तिष्कसेतोरुपरिष्टादनुदीर्घा महासीता वर्तते। मस्तिष्कसेतुरपि महासंयोजकोऽस्ति, महासंवेदनशीलनाडीसूत्रेभ्यो निर्मितोऽयं शुभ्रवस्तुमयः प्रतिभाति।

१९. स्वतन्त्रं नाडीतन्त्रम्

इतः पूर्वमस्माभिर्मस्तिष्कसौषुम्णिकं तन्त्रं व्याख्यातम्। वयमिदानीं स्वतन्त्रं नाडीतन्त्रं व्याख्यास्यामः। 'स्वतन्त्रम्' इति विशेषणमस्य नाडीतन्त्रस्य केन्द्रीयनाडीतन्त्रानधीनत्वं सूचयति। बुद्धिविवेकेच्छादयो मानसिकविकाससम्पन्नमानवस्य नूनं महोत्कर्षाय भवन्ति। किन्तु पुरुषेच्छाधीनत्वात्तेषां सम्पादनं पुरुषः कर्तुमकर्तुमन्यथाकर्तुं वा शक्नोति। दृश्यते ह्यनियतं सम्पादनं वैविध्यसमन्वितत्वञ्च तेषाम्। किन्तु क्रियाणां शरीरयात्राधारभूतानामनियतत्वं सम्पाद्यते चेत्, तर्हि नूनमचिरादेव प्राणव्यसनमापतेत्। जगदीश्वरस्य महत्कौशलं खल्विदं यत् प्राणिनां शरीरधारणार्थमनिवार्यभूतानां क्रियाणां सम्पादनाय काश्चन क्रियाः स्वतन्त्रनाडीसंस्थानाधीना नियोजिताः, यतो हि तासां सम्पादनं नियतरूपेणाहर्निशमव्यवधानेन चालयितुं प्रभवेत्। रक्तसञ्चालनं श्वासप्रश्वासादिक्रिया भोजनपचनं मलमूत्रस्वेदाद्युत्सर्ग इत्यादयः शारीरक्रिया अतीवापरिहार्यत्वान्नियतं कार्यक्षमत्वं नाडीतन्त्रस्याऽपेक्षन्ते। अत एवास्ति स्वतन्त्रं नाडीतन्त्रं तेषां सुसम्पादनाय। इदं नाडीतन्त्रं त्रिधा विभक्तुं शक्यते। यथा हि—

(अ) स्वतन्त्रनाडीमण्डलम्[3]।

(आ) परिस्वतन्त्रनाडीमण्डलम्[4]।

(इ) काश्चन विकीर्णा नाडीग्रन्थयश्च[5]। विकीर्णानां नाडीग्रन्थीनां वर्णनावसरे वयं योगतन्त्राभिमतानां चक्रादीनामपि[6] विवेचनं करिष्यामः संक्षेपत इति विशेषः।

---

१. तुलनार्थम्—Medulla oblongata.

२. तुलनार्थम्—Corpus Callosum.

३. तुलनार्थम्—Sympathetic Nervous System.

४. तुलनार्थम्—Para-sympathetic Nervous System.

५. तुलनार्थम्—Glands.

६. तुलनार्थम्—Plexus.

स्वतन्त्रनाडीमण्डलम् नाम पृष्ठवंशमुभयतः पुरस्ताद् नाडीसूत्रनिर्मितग्रन्थिमालारूपमस्ति। प्राचां योगतन्त्राचार्याणां मते तयोर्वामदक्षिणयोर्ग्रन्थिमाल्योर्नामनी क्रमश इडा पिङ्गला चेति स्तः। वामपार्श्वे इडा वर्तते, सव्येतरपार्श्वे च पिङ्गला।

इदं मालारूपं स्वतन्त्रग्रन्थिजालं मस्तिष्कादारभ्यानुत्रिकं यावत् त्रेधा विभक्तुं शक्यते वर्णनसौकर्याय—शीर्षण्यभागः, अनुपृष्ठिकानुग्रीविको भागः, अनुत्रिको भागश्चेति। शीर्षण्यानुत्रिकभागद्वयेन तु परिस्वतन्त्रं नाडीमण्डलं निर्मितं भवति। अनुपृष्ठिकानुग्रीविको भागस्तु[1] मध्यमभागापरनामधेयो वस्तुतः स्वतन्त्रनाडीमण्डलमिति संज्ञां बिभर्त्ति।

२०. किन्तु खलु स्वतन्त्रनाडीमण्डलस्य कार्यम्?

अस्मिन् इदं स्पष्टीकृतं यत् शीर्षण्यभागः परिस्वतन्त्रनाडीमण्डलस्य नेत्रस्थतारिकायाः संकोचनविकासने करोति प्रकाशाधिक्यागमनिर्गमे। एवमेव चक्षुर्निमीलनमुन्मीलनमपि स्वभावत एव क्रियते। लालाप्रवाहोऽपि शीर्षण्यग्रन्थिसव्यपेक्षः। एवमेव हृदयश्वासप्रश्वासयकृदामाशयक्लोमान्त्रिकोपवृक्कवृक्कादीनां क्रिया अपि शीर्षण्यग्रन्थिप्रभवाः, किन्तु अंशत एताः क्रिया अनुग्रीविकानुपृष्ठिकभागीयग्रन्थिजालेनाऽपि सम्बद्धा जायन्ते।

स्वतन्त्रपरिस्वतन्त्रनाडीमण्डलयोः कार्येष्वस्त्येको विशेषः। परिस्वतन्त्रनाडीमण्डलं शरीरधारणार्थं स्वतन्त्रनाडीमण्डलीयक्रियाभ्यः प्रतिकूलं क्रियाणां सञ्चारं करोति। अपि च स्वतन्त्रनाडीमण्डलं परिस्वतन्त्रनाडीमण्डलस्य क्रियाभ्यः प्रतिकूलं स्वकीयक्रियावेगान् प्रक्षिपति। उदाहरणतः स्वतन्त्रं नाडीमण्डलं हृद्गतिं वर्धयति; परिस्वतन्त्रञ्च नाडीमण्डलमपरथा हृद्गतिं संकोचयति, ह्रासोन्मुखीकरोति, शिथिलीकरोति वा। एतासां प्रतिकूलक्रियाणां सम्यग्व्याख्यानायाधस्तादेका तालिका प्रदर्श्यते।

स्वतन्त्रनाडीमण्डलकार्यप्रदर्शिका तालिका

शरीराङ्गम्	स्वतन्त्रनाडीमण्डलीयाः क्रियाः	परिस्वतन्त्रनाडीमण्डलीयाः क्रियाः
हृदयम्	संवर्धयति	शिथिलीकरोति
परिसरीयधमन्यः	रक्तातिशयेन विकासयति	रक्ताल्पतया संकोचयति
आन्त्रिकधमन्यः	रक्ताल्पतया संकोचयति	रक्तातिशयेन विकासयति
नेत्रतारिका	विकासयति, प्रकाशातिरेकः	सङ्कोचयति, प्रकाशन्यूनता
स्वेदग्रन्थयः	स्वेदप्रसेकः	
रोमावलिः	रोमाञ्चं करोति	
उपवृक्कग्रन्थयः	रसप्रस्रवणम्	
यकृत्	रक्ते शर्कराविक्षेपः	क्लोमरसस्य प्रक्षेपः, रक्ताच्छर्कराह्रासः
लालाग्रन्थयः	लालारसं समापयति	लालारसं वर्धयति
आमाशयः	सङ्कोचनं रसप्रस्रवणं प्रतिबध्नाति	सङ्कोचनं रसप्रस्रवणं वर्धितं भवति
आन्त्रिकाणि	सङ्कोचनं रसप्रस्रवणञ्च समाप्तं करोति	सङ्कोचनं रसप्रस्रवणञ्च वर्धयति
मलाशयः	मूत्रोत्सर्गवेगशान्तिः	मलोत्सर्गो वेगान्वितः

1. तुलनार्थम्—Thoracio-Lumbar Section,

मूत्राशयः	मूत्रोत्सर्गवेगशान्तिः	मूत्रोत्सर्गो वेगयुक्तः
जननेन्द्रियाणि	वीर्यप्रवाहिनलिकाः सङ्कोचिताः	उत्तेजनमुत्थितत्वं वर्धितम्[1]

एवं तावन्निर्गलितोऽर्थः स्वतन्त्रपरिस्वतन्त्रनाडीमण्डलकार्यविषयकः—परिस्वतन्त्रनाडीमण्डलं हि खलु शरीरपोषणविकासप्राणधारणधातुपरिपाकादीनि सर्वदैवापरिहार्याणि कार्याणि सम्पादयति। स्वतन्त्रनाडीमण्डलञ्चानुग्रीविकानुपृष्ठिकग्रन्थिजालरूपमपरथा केवलं विशेषावश्यकतावसर एव कार्यमुपक्रमते। इदं स्वतन्त्रनाडीमण्डलानुबन्धिविशेषावश्यकतामतं श्रीकैननमहोदयः अमेरिकादेशीयः १६७३ वै० संवत्सरे प्रतिपादितवान्। तन्मते विशेषावश्यकतानुसारं शरीरं बद्धपरिकरं सत् कार्यकरणार्थमतिशयशक्तिप्रदानार्थञ्च स्वतन्त्रं नाडीमण्डलं विशेषेण कार्यभूमाववतारयति। भोजनपरिपाकक्रिया रुद्धा जायते, रक्तातिरेकश्चैच्छिकपेशीः प्रति प्रसरति, येन प्रहाररूपं कर्म पलायनरूपं वा कर्म सुकरं भवेत्। हृदयमपि द्रुतगतिना रक्तातिशयं ताः पेशीरनुप्रेषयति। यकृन्नलिकयाऽपि शर्करातिशयं रक्तस्रोतसि प्रक्षिप्तं जायते, येन दुर्वहपेशीजन्याः क्रियाः सम्पाद्येरन्। श्वासनलिकाऽपि या फुफ्फुसे अभिगच्छति, स्थूलतरा विकसिता वा सञ्जायते, येनोषीजनाधिक्यसम्प्राप्तिः सुवहा भवेत्, शीघ्रतरञ्च श्वसनप्रश्वसने सम्भवेताम्। उपवृक्कग्रन्थी च रक्तप्रवाहे विशिष्टमेकं रसं प्रस्रवतः, येनान्त्रिकक्रियासु स्वतन्त्रनाडीमण्डलीयप्रभावोऽपि संवर्धते। तद्रसश्च महासंग्राहकः। स्वतन्त्रनाडीमण्डलकार्यजन्यः प्रभावो हि खल्वनेन द्विगुणीभवति। अपि च, परिस्वतन्त्रनाडीमण्डलं पृथक्तः स्वायत्ताङ्गविशेषमप्युत्तेजयितुं प्रभवति। नहि तथा स्वतन्त्रं नाडीमण्डलम्। अपरन्तु निखिलशरीरस्य स्वायत्तविविधाङ्गानां क्रिया युगपदेव जनयति, येन विशेषापत्तिप्रतीकारवेलायां सामूहिकी शरीरप्रतिक्रिया सुदृढा सफला च सम्भवेत्।[2]

२१. विकीर्णा ग्रन्थयः

वयमधुना विकीर्णानामितस्ततः शरीरे ग्रन्थीनां संक्षिप्तं विवेचनमुपस्थापयामः। केचन मनोवैज्ञानिका मन्यन्ते यद्धि मानवचरित्ररूपावधारणे दृश्यते हि तासां सुमहान् प्रभावः। ग्रन्थीनां द्वेधा वर्गीकरणं कर्तुं शक्यते—सप्रणालिका[3] ग्रन्थयः, प्रणालिकारहिताश्च[4] ग्रन्थयः। सप्रणालिका ग्रन्थयो यथा—लालारसाश्रुस्वेदादिग्रन्थयः प्रणालिकाभिः स्वकीयं रसं परिसरीयशरीरभागे तत्सविधे वा शरीरे प्रमुञ्चन्ति। निष्प्रणालिका ग्रन्थयस्त्वपरथा प्रणालिकां विनैव स्वकीयं रसं साक्षाद्रक्तप्रवाहे सन्निकृष्टासु पेशीषु वा प्रस्रवन्ति प्रच्यावयन्ति वा। तासाममितप्रभावो मनोवैज्ञानिकानां दृष्टिपथं पञ्चाशद्वर्षमात्रपूर्वमायातः। वयमत्र चुल्लिका[5], उपचुल्लिका[6], उरस्यग्रन्थिः[7], उपवृक्कग्रन्थिः[8], त्रिधाराग्रन्थिः[9], पौषणिका ग्रन्थिः[10], इत्यादिग्रन्थीनामुपयोगपुरस्सरं विवेचनमारभामहे।

---

१. द्रष्टव्यम्—Walter canon, Bodily changes in Pain Hunger, fear and Rage (Appleton 2nd eden. 1929)
२. द्रष्टव्यम्—Foundations of Psychology, page 95.
३. तुलनार्थम्—Duct-glands.
४. तुलनार्थम्—Ductless glands.
५. तुलनार्थम्—Thyroid gland.
६. तुलनार्थम्—Para-thyroid gland.
७. तुलनार्थम्—Thymus.
८. तुलनार्थम्—Adrenal glands.
९. तुलनार्थम्—Pineal gland.
१०. तुलनार्थम्—Pituitary gland.

चुल्लिका—इयं ग्रन्थिः कण्ठमणिरिति नाम्नाऽपि प्रथते। अस्याभिधानमाङ्गलभाषायां 'थाइराइड' इत्यस्ति। एतस्या एकः रसः साक्षाद्रक्तप्रवाहे निक्षिप्यते, सशरीरस्य पुष्टिं वर्धयति। भयक्रोधादिसंवेगेषु चुल्लिकाकार्यं शिथिलीभवति। फलतो मानवो रुग्णो दुर्बलश्च सञ्जायते। हर्षे चुल्लिकाकार्यं वर्धते। तेन मानवस्य स्वास्थ्यमपि प्रगतिं करोति। प्रयोगादिभिः साधितं यत् चुल्लिकारसवर्धनेन शिक्षणस्मरणादिषु मानसिककार्येषु प्रगतिः सम्भाव्या। श्वासनलिकायाः पार्श्वस्थितायाश्चुल्लिकायाः कार्यह्रासान्मानसिकशारीरिकवृद्धिरवरुध्यते। मानवोऽश्रान्तो जायते, कचह्रासोऽपि जायते, शरीरतौल्यमपि वर्धते। चुल्लिकाया रसाधिक्येन च मानवोऽशान्तः, नाडीविकारग्रस्तः, क्रियाशक्तिसमन्वितश्च सञ्जायते।

प्रयोगविशेषोऽपि वर्णनीयोऽस्याः कार्यविषये। 'फ्लोरेंसमैटियर' इति संज्ञको बालको चुल्लिकारसह्रासयुक्त आसीत्। यदा वर्षचतुष्क एवासीत् तदानीं तस्य बुद्धिलब्धाङ्कः[1] पञ्चाशत्त ऊर्ध्वः षष्टितो न्यूनश्चासीत्। तस्य शरीरतौल्यमप्यत्यधिकमेवासीत्, शुष्कत्वक्केशयुक्तश्चासीत्। चुल्लिकारसप्रदानेन बालकस्य मानसिकप्रगतिः संलक्षिता। पञ्चवर्षानन्तरं स एव नवतिमितं बुद्धिलब्धाङ्कं प्राप्तवान्। पारिवारिकोपेक्षातश्चुल्लिकारसमयी चिकित्सा परित्यक्ता सञ्जाता, अतोऽनन्तरं कक्षाकार्यमपि ह्रासोन्मुखं गतम्, बुद्धिलब्धाङ्कोऽप्यपगतोऽभवत्। अचिरादेव स जटिलव्यवहारान्वितोऽभवत्। अनेनानुमातुं शक्यतेऽसामान्याभ्यन्तरग्रन्थिस्रावस्यापरिमितः प्रभावः।

पौषणिका ग्रन्थिः—अस्या ग्रन्थेः स्रावातिरेकेण दैर्घ्यं शरीरस्य वर्धते। सुषुम्णाशीर्षकस्य पार्श्वस्थिताया अस्या प्रभावः प्रजननेन्द्रियक्रियास्वपि संलक्ष्यते, यथा च ग्रन्थिद्वयस्यापि। ते ग्रन्थी—उरस्यग्रन्थिः 'थाइमस'संज्ञिका, 'त्रिधाराग्रन्थिः' इति संज्ञिका च स्तः। प्रथमा वक्षस्यूर्ध्वभागे तिष्ठति, अपरा च मस्तुलुङ्गमध्ये वर्तते। अस्तु तावत्, 'रोबर्टवालो' इत्यभिधानीयोऽमेरिकनबालको द्वाविंशतितमे वर्षे द्वादशवितस्तिमितो दीर्घ आसीत् पोषणिकाकार्याधिक्यात्। रसाल्पत्वाच्च वामनत्वमापद्यते।

उपचुल्लिकाः—संख्यया ताश्चतस्रः सन्ति। चुल्लिकाया दक्षिणपार्श्वे द्वे, वामपार्श्वे च द्वे चणकाकारास्तिष्ठन्ति। तेषां क्रियाह्रासादस्थिदौर्बल्यं जायते।

सन्ति हि खलु क्लोम-यकृत्-प्रजननेन्द्रियादीनि शरीराङ्गाणि सप्रणालिकनिष्प्रणालिकग्रन्थिरूपाणि। क्लोमग्रन्थिस्तु[2] एकं रसं निष्प्रणालिकरूपेण रक्तप्रवाहे स्रावयति, यस्याऽभावे मधुमेहः सञ्जायते। सप्रणालिकग्रन्थिरूपेण यकृताऽपि निष्प्रणालिकग्रन्थिवदेव रक्तप्रवाहे शर्कराऽतिरेको प्रदीयते, तेन क्रियाशक्तिर्हर्षश्च वर्धते। प्रणालिकया च यकृत् पित्तमामाशये भोजनागमे भोजनकाले वा प्रक्षिपति, येन भोजनपाचनकार्यं सुकरं जायते। प्रजननेन्द्रियानुग्रन्थिग्रन्थयो निष्प्रणालिकरूपेण साक्षाद्रक्तप्रवाहे विशिष्टं रसं प्रक्षिपन्ति, येन वयःसन्धिकाले क्रोधकामादिसंवेगानां वृद्धिः सञ्जायते, कुमारेषु स्वरभेदशष्पहानव्यरोमादिवर्धनं कुमारीषु च पुष्पदर्शनोरोजवृद्धिस्वरभेदलज्जादिवर्धनञ्चाविर्भवति। मानसिकक्रियासु परिवर्तनमपि सञ्जायते संवेगानुकूलमेव।

वस्तुत आभ्यन्तरग्रन्थिजालं परस्परसम्बद्धतयैव शरीरे प्रभावमुत्पादयतीति प्रतिभाति। पृथक्तो ग्रन्थिविशेषस्य प्रभावं निर्देष्टुमतीव दुःसाध्यम्, तथापि क्रियाशक्त्यतिरेके, मानसिक-

१. तुलनार्थम्—Intelligence Quotient.

२. तुलनार्थम्—Insulin.

शारीरिकविकासे संवेगात्मकव्यवहारे चातीव महत्त्वपूर्णप्रभावोत्पादकत्वात्तासां विशेषाऽध्ययनं साम्प्रतमपि मनोविज्ञानानुरक्तैः करणीयमेव।

२२. षट्चक्रम्

भारतीययोगतन्त्रसाहित्ये षट्चक्राणां स्वतन्त्रग्रन्थिरूपाणां वर्णनमप्युपलभ्यते। नहि तेषां बाह्यव्यवहारे प्रभावः क्वचिदपि वर्णितः। तानि मूलाधार-स्वाधिष्ठान-मणिपूर-अनाहत-विशुद्ध-आज्ञासंज्ञानि षट्पद्मानि, षट्चक्राणि इति यावत्। तेषामध्ययनं पाश्चात्त्यनाडीमण्डलविषयकानुसन्धाने नैवोपलभ्यते। तेषां वर्णनं योगशास्त्र एवमुपलभ्यते—

चतुर्दलं स्यादाधारे स्वाधिष्ठाने च षड्दलम्।
नाभौ दशदलोपेतं सूर्यसंख्यदलं हृदि॥
कण्ठे स्यात् षोडशदलं भ्रूमध्येऽशीतिसम्मितम्।
सहस्रदलमाख्यातं ब्रह्मरन्ध्रे तु पङ्कजम्॥ इति।

महामहोपाध्यायगणनाथसेनसरस्वतीनां मते तु सर्वाणि चक्राणि सुषुम्णास्थितानि। परन्तु योगशास्त्रे तन्त्रे चैतेषां चक्राणां स्थानविशेषाणि भिन्नप्रकारेण वर्णितानि। तथा हि—

१. मूलाधारे गुदास्थाने मूलाधारचक्रम्—इदं रक्तिमवर्णपङ्कजरूपं चतुर्दलं भवति। श्रीगणेशस्याऽस्त्यत्र स्थानम्। एतत्पर्यन्तमेव सुरतपवनस्य गतिर्विद्यते। चतुर्दलेषु क्रमशः व, श, स, ष—इत्यक्षराणि लिखितानि।

२. स्वाधिष्ठानचक्रम्—अस्य चक्रस्यायतनं लिङ्गमूलमिति प्राञ्चः। पीताभं षड्दलमिदं भवति। तेषु दलेषु कमलपत्रेषु षडक्षराणि ब, भ, म, य, र, ल—इति लिखितानि। अस्य देवता सावित्र्युपेतो ब्रह्मा, शक्रादयः सर्वे देवास्चेति।

३. मणिपूरं चक्रम्—अस्य स्थानं नाभिदेशः। नीलाभमिदं चक्रं दशदलोपेतम्। तेषु दलेषु क्रमाद् ड, ढ, ण, त, थ, द, ध, न, प, फ—इति वर्णानि लिखितानि। देवता चाऽस्य विष्णुर्महालक्ष्म्यभ्युपेतः।

४. अनाहतं चक्रम्—अस्य स्थानं हृदयदेशः। अस्मिन् द्वादशकमलपत्राणि श्वेतवर्णकानि सन्ति। अस्याधिष्ठातृदेवता साक्षाद्भगवान् शिव उमायुक्तः। द्वादशाक्षराणि क्रमात् क, ख, ग, घ, ङ, च, छ, ज, झ, ञ, ट, ठ—इति लिखितानि।

५. विशुद्धं चक्रम्—अस्य स्थानं कण्ठप्रदेशः। षोडशदलमिदं कमलचक्रम्। षोडशाक्षराणि च क्रमाद् अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, ऌ, ॡ, ए, ऐ, ओ, औ, अं, अः—इति एकैकस्मिन् दले लिखितानि। अस्याधिष्ठातृदेवता वागस्ति।

६. आज्ञाचक्रम्—अस्य स्थानं भ्रुवोर्मध्यम्। द्विदलं चेदम्। अस्य देवता ज्योतिः। द्वे अक्षरे च हं, स—इति प्रतिदलक्रमाल्लिखिते स्तः। केषाञ्चिदाचार्याणां मतेऽशीतिदलोपेतमाज्ञाचक्रं भवतीति।

७. सहस्रारं चक्रम्—उत्तमाङ्गस्य मध्येऽस्य स्थानम्। हंसो नामेदं दलम्। अस्य सहस्रपत्राणि दलानीति यावत् सन्ति। किंस्वित् सहस्रारमेव मस्तुलुङ्गम्? श्रीगणनाथसेनसरस्वती-

महोदयैः सहस्रारं सहस्रदलं कमलचक्रमेव मस्तुलुङ्गमित्यभिमतम्। तैस्तु—"तत्र च साङ्गोपाङ्गं मस्तिष्कं सहस्रदलसादृश्यात् सहस्रारमिति सर्वज्ञानप्रलयकरं मन्यन्ते योगिनः" इत्युक्तम्।

किं तर्ह्येतानि चक्राणि सुषुम्णास्थितानि? यद्येवञ्चेत् तर्हि कुण्डलिन्याः सुषुम्णामार्गेणोर्ध्व-गमनवर्णनेन सहास्य सङ्गतिर्नूनं भविष्यति। उक्तं हि पूर्णचन्द्राचार्येण षट्चक्रनिरूपणे—

मेरोर्बाह्यप्रदेशे शशिमिहिरशिरे सव्यदक्षिणे निषण्णे
मध्ये नाडी सुषुम्णा…………………।
…………सकलसरसिजान् मेरुमध्यस्थान्
भित्वा देदीप्यते सा…………………॥

परन्तूपर्युक्तविशिष्टस्थानविवरणेनैवेदं प्रतिभाति समीचीनम्। अपरञ्च कुण्डलिनी सर्पिण्याकारा नाभिप्रदेशेऽवलम्बिता भवति। केषाञ्चिद् योगिनां मते लिङ्गमूलं परिवेष्ट्य सर्पाकारा कुण्डलिनी वृषणाद् द्व्यङ्गुलमधस्ताद् गुदस्थानाच्चतुरङ्गुलमन्तर्यावत् स्वपिति। उक्तं चेदमपानवायु-प्रभावादधोमुखानि सर्वाणि कमलरूपचक्राणि जन्मन आरभ्य सन्ति। जन्मनः प्राक्तु गर्भे सर्वं ऊर्ध्व-मुखान्यासन्निति। प्राणायामद्वारेणाऽपानवायोर्नियमनात् कुण्डलिन्या जागरणेनोर्ध्वरेतस्त्वमवाप्तुं सप्त कमलानि चोर्ध्वमुखीकर्तुं शक्यन्ते। तानि निर्भिद्य कुण्डलिनी सहस्रारमभिगच्छति।

मन्ये सर्वोऽयं विषयो वैज्ञानिकप्रणाल्या सम्यगालोचनमपेक्षते। शारीरमनोविज्ञानं योगिसाहाय्यं चेति द्वयमप्यावलम्बनीयम्। यत्किञ्चिदालङ्कारिकं व्याख्यानमत्र भवेत्, तदपि सम्यगनुसन्धानपूर्वकं व्याख्येयम्। रहस्योद्घाटनं नह्यन्धश्रद्धया भवितुमर्हति, अपि तु निष्पक्ष-सत्यानुसन्धानबुभुत्सयैव। तदनन्तरमेवैतेषां चक्राणां स्वतन्त्रनाडीमण्डलं क्रियाकलापं निश्चेतुं शक्यत इति॥

इति अर्वाचीने मनोविज्ञाने नाडीतन्त्रविवेचनीयो द्वितीयोऽध्यायः॥

—:※:—

तृतीयोऽध्यायः

वंशानुक्रमवातावरणयोः प्रभावः

१. विषयोपोद्घातः

पूर्वस्मिन्नध्यायेऽस्माभिर्मनोरूपचैतन्येन परिचालितशरीररूपयन्त्रस्य मुख्यतमाङ्गस्य मस्तुलुङ्गसौषुम्णिकनाडीतन्त्रस्य स्वतन्त्रनाडीमण्डलोपेतस्य विशदं विवरणं प्रदत्तम्। वयं सम्प्रति वंशानुक्रमवातावरणयोर्मानवस्य मानसिकशारीरिकविकासे प्रभावं विमृशामः। ननु 'वंशानुक्रम' इति शब्दस्य कोऽर्थः ? 'वंशानुक्रम' इति शब्देन वयं पैतृकगुणसंक्रमणतारतम्यमिति जानीमः। 'पैतृक' इति शब्देन पितामहादीनां गुणसंक्रमणमपि सम्भाव्यते। ननु किं नाम वातावरणमिति शब्दः ? नहि वातावरणेन वायोरावरणं द्योत्यते यत् शतकद्वयक्रोशपर्यन्तं प्रायेण पृथिवीमावृणोति। वातावरणेन हि खलु निखिला सामाजिकावस्था द्योत्यते, यस्यां कोऽपि मानवो जन्मन आरभ्य शारीरिकमानसिकनैतिकाध्यात्मिकविकासमवाप्नोति, यस्यां च परिवारपाठशालामित्रमण्डलीराजनैतिकार्थिकौद्योगिकसांस्कृतिकधार्मिकादिसर्वेषामेव संस्थासंघटनसमाजादीनां समावेशः क्रियते। अत्रास्माकमियं महती विचारणीया समस्या—'किं बालकस्य मानवस्य वा विकासे वंशानुक्रमस्य पैतृकगुणसंक्रमणस्य गुरुतरः प्रभावो भवति, किंस्विद् वातावरणस्य सामाजिकसंस्थाजन्यशिक्षाया वा ? अयं प्रश्नः शिक्षामनोविज्ञानदृष्ट्याऽतीव महत्त्वपूर्ण उपयोगी चास्ति। यदि पैतृकगुणा एव सर्वोपरि शिशोर्भाविविकासं निर्णयन्ति, तर्ह्यलमनेन महता शिक्षकायासेन ! यदि चापरथा वातावरणमेव परिवारपाठशालाराजनैतिकदलादिजन्यशिक्षणमेव वस्तुतो बालकभाविविकासदिङ्निर्णायकं तर्हि कथं केषाञ्चिद्विद्यार्थिनां शिक्षकप्रयत्नानुकूला प्रगतिर्नाऽवलोक्यते ? वातावरणवैयर्थ्यप्रदर्शनाय भवभूतिमहाकवेर्वचनं सुप्रथितमेव सर्वेषां विदुषाम्। तथाहि—

> वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे
> न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा।
> भवति हि पुनर्भूयान् भेदः फलं प्रति तद्यथा
> प्रभवति शुचिर्बिम्बग्राहे मणिर्न मृदादयः॥[1]

तेषामिदं तात्पर्यम्—गुरुः सर्वान् शिष्यान् समानरूपेण कक्षायां पाठयति। तस्यां कक्षायां मन्दबुद्धयस्तीव्रबुद्धयश्च सर्वे एव छात्राः सन्ति। नहि गुरुः प्रकृष्टबुद्धिषु कञ्चित् शक्तिविशेषमादधाति, न चापि मन्दबुद्धीनां कञ्चित् शक्तिविशेषमपहन्त्येव; परन्तु तथापि तेषां पाठबोधमात्रायामतीव भेदो दृश्यते। किन्तर्हि तस्य भेदस्य कारणम् ? नहि खलु गुरुः, नापि शिक्षणविधिः, नापि पाठशाला, नाऽपि भोजनाऽऽच्छादनान्येव। एते तु सर्वेषामेवान्तेवासिनां समाना एव। अतोऽस्ति किञ्चित्तेषां स्वभावगतकारणं पैतृकगुणादिजन्यं जन्मत एव प्राप्तम्। तद्गुणस्तु तेषामन्तःकरणमादर्श इव प्रतीयमानं मन्दबुद्धिषु मलिनीकरोति, प्रत्युत्पन्नमतिषु च स्वच्छं करोति।

---

१. द्रष्टव्यम्—उत्तररामचरितम् २।४, पृष्ठ २४, नि० सा० प्रे०।

यथा स्वच्छे आदर्शे बिम्बग्राहिका शक्तिः सम्यक्तया वर्तते, परन्तु मलिनपदार्थेषु मृत्तिकाभाजनेषु नैव सा बिम्बग्राहिका शक्तिरुपलभ्यते, एवमेव सर्वोपकरणेषु गुरुपाठशालाकक्षाशिक्षणादिषु समानभावेन विद्यमानेष्वपि मन्दबुद्धीनां मलिनान्तःकरणत्वान्नास्त्येवंविधः पाठबोधः, यादृशः स्वच्छान्तःकरणानां पिपठिषूणां प्रायेण दृश्यते। अतः सिद्धं भेदकारणं पैतृकगुणसंक्रमणजन्यं सांसिद्धिकमिति तेषामभिसन्धिः।

अपि च, विद्यते हि पुरातनकालान्मानवमात्रस्यायं दृढतरो विश्वासो यत्पुत्रो रूपपराक्रमबुद्धिस्वभावादिषु स्वपितरं मातरञ्चानुहरति। नायं विश्वासो भारतीयानामार्याणामेवापि तु यवनादिदेशेष्वपि लक्ष्यते। कियती मार्मिकी हि खलु भगवतो रामचन्द्रस्येयमुक्तिर्मानवसुलभमिमं विश्वासं कियत्तरञ्च स्फोरयति। तथाहि—

भूयिष्ठं च रघुकुलकौमारमनयोः पश्यामि—

कठोरपारावतकण्ठमेचकं
वपुर्वृषस्कन्धसुबन्धुरांसयोः।
प्रसन्नसिंहस्तिमितं च वीक्षितं
ध्वनिश्च माङ्गल्यमृदङ्गमांसलः॥

(निपुणं निरूपयन्) अये, न केवलमस्मद्वंशसंवादिन्याकृतिः—

अपि जनकसुतायास्तच्च तच्चानुरूपं
स्फुटमिह शिशुयुग्मे नैपुणोन्नेयमस्ति।
ननु पुनरिव तन्मे गोचरीभूतमक्ष्णो-
रभिनवशतपत्रश्रीमदास्यं प्रियायाः॥
शुक्लाच्छदन्तच्छविसुन्दरेयं
सैवौष्ठमुद्रा स च कर्णपाशः।
नेत्रे पुनर्यद्यपि रक्तनीले
तथाऽपि सौभाग्यगुणः स एव॥[1]

उपर्युक्तेषु श्लोकेषु महाकविभवभूतिना रघुवंशर्षभव्याजेनेदमभिव्यञ्जितं यद्धि शिशू रूपगुणादिषु न केवलं स्वपितरमेवानुकरोत्यपि तु मातरमपि। तदनुसारं राघवेण लवकुशयोः स्वकीयाकृतिगुणानां सीतागुणानाञ्च नितरां सादृश्यानुकारित्वं तत्र दृष्टम्। नास्त्यत्र किमप्याश्चर्यं यत् शिशुयुगलमुखे दृष्ट्वा सीताया मुखमपि स्मारं स्मारं स नन्दति स्म। अस्तु तर्ह्ययं पैतृकगुणसंक्रमणपक्षः किं वा वंशानुक्रमपक्षः। भगवताऽग्निवेशेनाऽपीदं मतमभिव्यञ्जितम्, यदा तैरभिहितम्—

रूपाद्धि रूपप्रभवः प्रसिद्धः कर्मात्मकानां मनसो मनस्तः[2]।

एवं सम्प्राप्ते वातावरणपक्षोऽपि विचारपदवीमुत्सहते। मार्कण्डेयपुराणवर्णितं मदालसायाः प्रातःस्मरणीयं वृत्तं यत्र हि तया स्वशिक्षाप्रभावेण षट् पुत्रा वैराग्यसम्पदारूढाः कृताः, सप्तमश्च स्वपत्यादेशानुसारं राजधर्मे नियोजितः, शिक्षासरणिप्रभावस्याऽयमादर्शोऽस्माकं हृदयं नितरामानन्दयति। तथा हि—

१. द्रष्टव्यम्—उत्तररामचरितम् ६।२५-२७, पृष्ठ १२४, नि० सा० प्रे०।
२. द्रष्टव्या—चरकसंहिता, शारीरस्थाने ३।२६

शुद्धोऽसि रे तात ! न तेऽस्ति नाम
कृतं हि ते कल्पनयाऽधुनैव ।
पञ्चात्मकं देहमिदं न तेऽस्ति
नैवास्य त्वं रोदिषि कस्य हेतोः ? ॥[१]

महाभारतेऽपि सौभद्रस्य चक्रव्यूहशिक्षा गर्भवातावरणजन्यशिक्षाप्रभावस्य चरममुदाहरणम् । कथ्यते हि गुरुपादैरपि—"वक्तुरेव हि तज्जाड्यं श्रोता यत्र न बुध्यते" इति । आङ्गलदेशीयदार्शनिकप्रवरेण लॉकमहोदयेनाऽनुभववादसंस्थापकेनेदं मतं स्थापितं यत्—"जन्मकालेऽस्माकं मनः श्वेतपट्टिका भवति" इति । श्वेतपट्टिकोपमितत्वेन तेषामभिप्रायः सर्वसंस्कारशून्यमित्यासीत् । तामेव सरणिमनुसृत्य वाट्सनमहोदयो डिण्डिमघोषपूर्वकमिदमुद्घोषितवान् यद्धि तत्किञ्चिदप्येकमानवादन्यमानवेऽन्तरं जायते तत्सर्वं वातावरणजन्यम्, सामाजिकपारिवारिकपरिस्थितिजन्यमिति यावत् । तथा हि—"समीचीनवातावरणशिक्षणाभ्यां कमपि साधारणतया स्वस्थं बालकं तस्य स्वकीयप्रवृत्तियोग्यताप्रतिभां तस्य च पितृपितामहादीनां जीवनव्यवसायं जातिं चाऽविमृश्यैवाहं स्वेच्छानुसारं यथेष्टविषयविशेषज्ञं कर्तुं प्रभवामि, यथायुर्वेदज्ञप्राड्विवाककलाविद्व्यावसायिकप्रमुखेत्यादिरपि च याचकचौरादिः" इति ।[२] अतएव व्यवहारवादिनामिदमपरं किञ्चिदालङ्कारिकं वाक्यमपि सङ्गच्छते—"देहि मे मृत्पिण्डमहञ्च तं यथेष्टाकारं कर्तुं शक्नोमि" इति ।

एवं सम्प्राप्तयोर्द्वयोरेव पक्षयोः सतोर्मनोवैज्ञानिकैर्विचारणीयं वर्तते, को हि पक्षः खलु सम्यक्परीक्षणानन्तरमनवद्यः सिध्यतीति । यदि च कोऽपि पक्षविशेषः सर्वथा शुद्धः प्रशस्यो वाऽपवादरहितो वा न साधयितुं शक्यते, अथ च यदि द्वावेव पक्षावंशतः सत्यौ निर्णीतौ भवेताम्, तर्हि कस्याऽपि पक्षस्यांशिकसत्यत्वानुग्राहकहेतुविमर्शपुरस्सरं तत्सत्यत्वस्येयत्ताऽपि निर्धारणीया । अतोऽस्माभिरिदं विवेचनं प्रारभ्यते, आशास्यते च यदनेन मानवस्वभावाध्ययनबद्धपरिकराणां मनोविज्ञानाऽध्येतॄणां महद् बुद्धिवैशारद्यं सेत्स्यतीति ।

२. ननु किं नाम पैतृकगुणसंक्रमणम् ?

वंशानुक्रमवादिनो मन्यन्ते यद्धि लोके स्वस्थबलिष्ठपितृपितामहानां पुत्रपौत्रा अपि स्वस्था बलिष्ठाश्च दरीदृश्यन्ते, विदुषाञ्च पुत्रपौत्रा बुद्ध्युत्कर्षवन्तः प्रतिभाशालिनश्चेति । एतन्मतं विशदीकर्तुं श्रीफ्रांसिसगाल्टनमहोदयेनाङ्गलदेशीयस्वतन्त्रवैज्ञानिकेन १९२६ वैक्रमाब्दे 'हैरेडिटेरी जीनियस' इति नामको[३] ग्रन्थः प्रकाशं नीतः । अनेन वैज्ञानिकधुरन्धरेण मनोविज्ञानं वैज्ञानिकानु-

---

१. द्रष्टव्यम्—मार्कण्डेयपुराणम् २१।११.

२. द्रष्टव्यम्—B. Watson, Behauiourism, Page 42—

"A normal child with proper environment and training can bc made into any type of specialist I might select—doctor, lawyer, artist, merehant-chief, and yes even beggar man and thief, regardless of his talents, penchants, tendencies, abilities, vocations and race of his ancestors."

३. द्रष्टव्यम्—Francis Galton, Hereditary Genius (1869).

न्धानपद्धतिरूपराजमार्गे प्रतिष्ठापितम्। वैज्ञानिकशैल्या वंशानुक्रमाध्ययनातिरिक्तं तैर्न केवलं शुद्ध-वंशोत्पत्तिविज्ञानमेव[1] प्रवर्तितमपि तु पुरुषाणां पारस्परिकशारीरिकमानसिकभेदाध्ययनोपयोगीनि बहूनि परीक्षणान्यप्याविष्कृतानि। गाल्टनमहोदय आङ्गलद्वीपसमूहवासिनां राजनीतिसैनिकप्रवर-नौसैनिकविद्याविशारदप्रख्यातव्यवसायिनां ९७७ नामानि सङ्कलय्य तेषां पूर्वजानां इतिवृत्त-संशोधनपरायणोऽभवत्। तस्य प्रधानतो विवेचनीयसमस्येयमासीदस्ति कोऽपि कार्यकारणसम्बन्धः पैतृकगुणसंक्रमणसव्यपेक्षः पितामहपितृपुत्रपौत्रप्रपौत्रादिष्वनुगत इति। तेषां हि खलु ५७४ प्रतिष्ठितसम्बन्धिन आसन्। तेष्वपि च ३६२ सम्बन्धिनस्तु सन्निकटतमा आसन्, २१२ सम्बन्धिभिः सार्कं किञ्चिद् दूरस्थः सम्बन्ध आसीत्। तेषां वंशवृक्षाणां सम्यगनुसन्धानेन गाल्टन-महोदयो निर्णीतवान् यद्धि प्रतिभा बुद्ध्युत्कर्षरूपा वस्तुतः पैतृकगुणसंक्रमणाधीना किं वा वंश-परम्परागतगुणानुसारिण्येव भवतीति। अपि च, तुलनात्मकविधिना तैर्वैज्ञानिकप्रवरैरन्येऽपि सहस्रं पुरुषाः आङ्गलदेशीयाः साधारणजनाः सङ्कलिताः। नहि ते पूर्वोक्तसरणिवत् ख्यातिलब्धा आसन्। तेषां वंशानां सम्बन्धिनां चाध्ययनेन तैर्निश्चितं यद्धि केवलं चत्वार एव ख्यातिलब्धाः प्रतिष्ठिताः सम्बन्धिनोऽवचितानां सहस्रपरिमितानां साधारणजनानामवाप्तुं शक्यन्ते। अनेनापि तस्य पूर्वोक्तं मतमेव दृढीकृतम्।

प्रतिभासम्बन्धिपैतृकगुणसंक्रमणानुसन्धाने गाल्टनमहोदयानां रुचिः कलात्मकवंशानुक्रम-प्रभावाऽध्ययनेऽपि जागृता। फलतस्तैर्निर्णीतं यद्धि संगीतचित्रादिकलाविदां पुरुषाणां त्रिंशत्परि-वारेषु ६४% प्रतिशतं बालकाः कलात्मकरुचिसम्पन्ना आसन्, किन्तु सामान्यतः सङ्कलितेषु कलात्मक-रुचिविशेषरहितेषु १५० परिवारेषु केवलं २१% प्रतिशतमेव बालकाः कलात्मकरुचिं प्रदर्शयन्ति। अत एव तैर्महाभागैरयं निष्कर्षः समालोडितो यद्धि वातावरणप्रभावापेक्षयाऽस्ति हि नूनं महत्तरः प्रभावो वंशानुक्रमस्य वंशपरम्परागतगुणसंक्रमणस्य वेति।

३. वीज़मानमतम्[2]

गाल्टनमहोदयमनुसृत्य वीज़मानमहाशयेन 'शुक्रकीटतारतम्यवादः' स्थापितः। तेषां मतेन पैतृकगुणसंक्रमणप्रकारोऽपि व्याख्यातो भवति। गर्भाधानकाल एव पैतृकगुणसंक्रमणस्य वेलाऽस्ति। वंशानुक्रमवादिभिः स्वीक्रियते यद्धि मातापित्रोः शारीरिकमानसिकविशिष्टगुणानां संक्रमणं शुक्रकीटरजःसंयोगद्वारा संघटते। शुक्रकीटरजःसंयोगे कोषाणुकानि संवर्धन्ते। समागम-वेलायामपि नह्येकमेव कोषाणुकं प्रविशत्यपि तु शतकोट्यधिकानि कोषाणुकानि प्रविशन्ति। साम्प्रतं, वीज़मानमहोदयानुसारं नहि सर्वाणि कोषाणुकानि प्रजननक्षमाणि। केवलं कोषाणुकानां विशिष्टप्रकारकाणामेवेदं प्रजननसामर्थ्यं सम्भवति। प्रजननक्रियायां योग्यतमः कोषाणुकसमुदायो हि खलु वंशपरम्परायां तारतम्येनाविनश्वरः प्रविचलति, तमेव धारावाहिकरूपेण पिता पुत्राय प्रददाति, पुत्रोऽपि तमेव शुक्रकीटसमुदायमक्षुण्णमेव पौत्राय प्रदत्ते, एवमेव च पौत्रः प्रपौत्रादिभ्यः। एकमेव शुक्रकीटमेक एव शुक्रकीटसमुदायो वा अक्षुण्णमविनष्टो वा एकस्मिन् वंशे तारतम्येन

१. तुलनार्थम्—Erugenics or the science of the production of Fine offspring (human).

२. तुलनार्थम्—Weissmane, "Continuity of the Germ Plasm Theory."

प्रचलति । इदमेव तेषां तात्पर्यम् । अस्य मतस्य सादृश्यं स्मृतिवचनेष्वपि सँल्लक्ष्यते । 'जाया' इति शब्दस्य व्याख्यानावसर एतत् स्मृतिवचनमुपलभ्यते । तथा हि—

पतिर्भार्यां सम्प्रविश्य गर्भो भूत्वेह जायते ।
जायायास्तद्धि जायात्वं यदस्यां जायते पुनः ॥ इति ।

अस्य पाठान्तरमेवमपि क्वचिदुपलभ्यते—

पतिर्जायां प्रविशति गर्भो भूत्वेह मातरम् ।
सा जाया जाया भवति यदस्यां जायते पुनः ॥ इति ।

अनेनेदं स्पष्टं जायते यद्धि पिता नहि वंशक्रमागतप्रजननक्षमशुक्रकीटस्य जनयिताऽपि तु संरक्षक एव । यथा हि धनमेकस्माद्धनागारादादायापरे धनकोशे निक्षिप्तं भवति सञ्चितं वा क्रियते, एवमेवास्ति वीर्यप्रदानम् । नहि पिता शुक्रकीटं वंशपरम्परागतमुत्पादयत्यपि तु निक्षेपमिव पूर्वजानां स्वपुत्रपौत्रेभ्यः समर्पयति । अन्यत्र श्रुत्याऽप्याम्नातं हि खल्विदं "आत्मा वै पुत्रनामासि" इति । तद्यथा—

अङ्गादङ्गात् सम्भवसि हृदयादधिजायसे ।
आत्मा वै पुत्रनामासि त्वं जीव शरदः शतम् ॥ इति ।[1]

नहि वीज़मानमतं सर्वथा समीचीनमनुमोदितं वा सर्वांशतः प्राणिविज्ञानविशारदैः । नाप्यनेन वंशानुगतपैतृकगुणसंक्रमणमेव सर्वथा व्याख्यातुं शक्यते । वयमग्रे प्राणिविज्ञानायुर्वेदविज्ञानाभिमतगुणसंक्रमणनिरूपणावसरेऽस्य मतस्याऽपूर्णतां प्रदर्शयिष्यामः ।

४. गोडार्डमतम्[2]

दुर्बलमस्तिष्कबालकानां वाइनलैण्डट्रेनिङ्गस्कूलनामकपाठशालासञ्चालकेन अमेरिकादेशीयश्रीगोडार्डमहोदयेन १९६९ वैक्रमाब्दे 'कालिकाकफेमिली' इति नाम्नीं पुस्तिकां प्रकाश्य पैतृकगुणसंक्रमणविकृतिरतीव महत्त्वपूर्णविधिना विवेचिता । स स्वकीयपाठशालायामेकमन्यांश्च कतिपयान् बालकान् समानाभिजातपारिवारिकाभिधानयुक्तान् मानसिकविकारगतानपश्यत् । तेषां वंशवृक्षानुसन्धानानन्तरं तान् सर्वानेकस्यैव मूलपुरुषस्यामेरिकीयक्रान्तियुद्धीयसैनिकस्य वंशजान् स निर्णीतवान् । नहि 'मार्टिनकालिकाक' इति तस्या वास्तविकं नामापि तु व्याजनाम । 'कालिकाक' इति शब्दस्य यवनानीभाषाभिमतोऽर्थस्तु 'शुभाशुभ' इत्यस्ति । वंशजानामितिहासगवेषणायां सत्यां गौडार्डमहोदयेनाऽयं निष्कर्षः प्राप्तः—मार्टिनस्य कयाचित् तरुण्या सहावैधसमागमेनावैधपुत्रः सञ्जातः । सा तरुणी दुर्बलमानसिकशक्तिरासीत् । अत एव तस्याः पुत्रोऽपि मन्दबुद्धिरेवासीत् । तस्य पुत्रस्य ४८० वंशजाः सञ्जाताः, येषु १४३ वंशजा दुर्बलमानसिकशक्तय आसन्, केवलं ४६ वंशजाः सामान्यमानसिकशक्तिसम्पन्ना बभूवुः । अवशिष्टाश्च सन्दिग्धबुद्धय आसन् । अनया तरुण्या प्रवर्तिते वंशे २४ मद्यपा घोरतमाः, ३ पक्षाघातग्रस्ताः, ३ अपराधिनः, ३५ पण्यस्त्रीबहुलानैतिकयौनसम्बन्धयुक्ताः, ८ वेश्यागृहसञ्चालकाश्चासन् ।

---

१. द्रष्टव्या—पारस्कर० १८ कण्डिका; महाभारतम्, आदिपर्वणि ७४।६३

२. तुलनार्थम्—Henry H. Goddard, Director of Vineland Training School for feeble-minded. (1866).

युद्धावसाने मार्टिनमहोदयः सामान्यबुद्धिमतीं क्वेकरेतिसम्भ्रान्तवंशोत्पन्नां महिलां परिणीतवान् । अयं हि खलु विधिवद् वैवाहिकः सम्बन्ध आसीत् । पूर्वोक्तवंशावलिविपरीतमेवास्याः ४९६ वंशजेषु केवलं त्रीन् विहाय सर्वे एव बौद्धिकनैतिकदृष्ट्या स्वस्था आसन् । अस्यां वंशावल्यां सम्भ्रान्ताः सुशीलाः प्रसिद्धाश्च नागरिका बभूवुः । यथा हि भिषग्वराः, प्राड्विवाकाः, विचारपतयः, व्यावसायिका इति । 'न्यूजरसी'नामकप्रदेशस्यानेकनगराणां नामकरणमपि एतद्वंशजसम्बन्धि-नामान्यनुकृत्यैव सम्पन्नं समादरप्रदर्शनाय । अस्मिन् वंशे गौडार्डमहोदयः साक्षीकरोति—कोऽपि व्यभिचारी, मद्यपोऽपराधी वा नाऽभूदिति । अनेन गौडार्डमहोदयोऽतिरमणीयमिमं निष्कर्ष-मालोडितवान् यद्धि दुष्टशोणितसंसर्गजा एव पूर्वोक्तकालिकाकवंशावल्यां बुद्धिमान्द्यनैतिकपतनादि-विकारा आसन्निति । वंशानुक्रमप्रभावाकलनार्थममेरिकादेशीयडुग्डैल-इस्टबुकमहाशयाभ्यां ज्यूक-वंशेऽपरो निरीक्षणात्मकप्रयोग आश्रितः । ज्यूकवंशेऽधमाखेटमैनाकमूलपुरुषजे सर्वेषामेव पुरुषाणां प्रायोऽधमजात्युत्पन्नस्त्रीभिः सह विवाहाः सञ्जाताः । तस्य वंशस्याऽध्ययनेनेदं विवृतं यद्धि २८२० संख्याकपुरुषेषु ३६६ भिक्षुका जाताः, १७१ कठोरापराधात् कारावासभोगिनोऽभवन्, १० च पुरुषाः पुरुषहत्याऽपराधिन आसन् । तेष्वन्ये ४५८ पाठशालाभ्यो द्विवर्षं तदधिकं वा कालं यावद् बहिष्कृताः, २७७ चरित्रहीनाः, २८५ उन्मादग्रस्ताः संजाताः । १६६ पुरुषैः पाठशालीया शिक्षा नैवाऽवाप्ता । तेषु केवलं ३५० संख्याकाः पुरुषा एव सामान्यतः शिष्टाश्चरित्रवन्तश्चासन् । अतस्ताभ्यां निर्णीतमिदं तथ्यमस्ति यद् वंशपारम्पर्यस्य खलु भूयिष्ठः प्रभाव इति ।

५. मैण्डेलमतम्[1]

वयमधुना मैण्डेलमहोदयानां यूरोपमध्यस्थजैकोस्लोवाकियादेशीययतिवराणां मतं व्याख्यास्यामः, यतो ह्यनेन पैतृकगुणसंक्रमणे साम्यं वैषम्यञ्च द्वयमपि व्याख्यातुं शक्यते । मैण्डेल-भिक्षुवरेण मटरवपनप्रयोगाः स्वकीयभिक्षुविहारोद्याने सम्पादिताः । तदनन्तरं तेनैको लेख एकस्यां पत्रिकायां १९२२ वैक्रमाब्दे प्रकाशितः । नहि तदा तेन लेखेन विदुषां ध्यानं समाकृष्टम् । १९५७ वैक्रमाब्दे प्राणिविज्ञानविशारदैस्त्रिभिः स्वतन्त्रानुसन्धानपरायणे मैण्डेलमहोदयस्य तस्मिँल्लेखेऽभूतपूर्वप्रयोगसंवलितसामग्रीं प्रति निखिलविश्वस्य मनोवैज्ञानिकानां प्राणिविज्ञानविशारदा-नाञ्च दृष्टिः समाकृष्टा । विशेषत उल्लेखनीयमत्राऽमेरिकादेशीयमार्गन-पर्लमहोदययोः कार्यमस्ति, ययोः प्रेरणा मैण्डेलमताध्ययनेनैव स्फुरिता । नहि वयं तावत्तयोर्मतमुपस्थापयितुं प्रभवामो यावद्वयं मैण्डेलप्रयोगं न विस्तरशो विचारयामः । मैण्डेलमतविवेचनापि कतिपयविकासवाद-नियमानां परिचयमपेक्षते । ते हि नियमा निम्नलिखिताः सन्ति—

(अ) अविच्छिन्नकोषाणुकनियमः[2] ।
(आ) अर्जितगुणावितरणनियमः[3] ।
(इ) रूपान्तरनियमः[4] ।
(ई) प्रतिगमननियमः[5] ।

१. तुलनार्थम्—Gregor Mendel (1822–1884)
२. तुलनार्थम्—Continuity of the Germ Plasm.
३. तुलनार्थम्—Non–transmission of Acquired traits.
४. तुलनार्थम्—The law of Variation.
५. तुलनार्थम्—The low of Regression.

वयं तावत्प्रथममेतान् नियमान् संक्षेपतो विचार्य मैण्डेलप्रयोगं व्याख्यास्यामः। तदनन्तरं प्राणिशास्त्रविदामाधुनिकमतानां प्राचां चायुर्वेदज्ञानां सुश्रुतचरकादीनां मतानामुपन्यासं करिष्यामः।

६. अविच्छिन्नकोषाणुकनियमः

वंशानुक्रमस्य सर्वोपरि नियमः खलु तावदयमेव यद्धि पित्रोः सम्प्राप्तान् कोषाणुकान् प्रजननक्षमान् पुत्रः स्वपुत्रमविच्छिन्नरूपेण प्रापयति। अविच्छिन्नं हि खलु तारतम्यं कोषाणुकानामेवं प्रचलति। "आत्मा वै जायते पुत्रः" इति वै श्रुतिः। प्रागस्माभिः वीज़्मानमतोपन्यासवेलायामुक्तं यद्धि एकमेव शुक्रकीटं शुक्रकीटसमुदायविशेषो वा पितामहपितृपुत्रपौत्रादिषु अविनष्टः सन् प्रचलति तारतम्यरूपेण धारावाहिकन्यायेन वेति। ननु किमेकमेव शुक्रकीटं शुक्रकीटसमुदायं वा यदि पिता पुत्राय प्रददाति, किं नास्ति तदाप्रभृति तस्य पितुः प्रजननशक्तिर्विनष्टा? नूनं तच्छुक्रकीटं तच्छुक्रकीटसमुदायो वा विलक्षणमेवं, यं पिता स्ववंशरक्षणाय पुत्राय प्रददाति। मन्येऽयमेव दोषो वीज़्मानमतं दूषयति। नहि स्वपितुः सम्प्राप्तशुक्रकीटमेव पिता पुत्राय प्रददात्यपि तु सम्प्राप्तशुक्रकीटसमानम्। प्राणिविज्ञानविशारदा मन्यन्ते यद्धि स्वस्थपुरुषस्य युक्ताहारविहारशालिन एकस्मिन् व्यवाये निसृतानां प्रजननक्षमाणां शुक्रकीटानां संख्या शत-अयुताधिका भवतीति। अत एवाविच्छिन्नकीटाणुनियम एवं व्याख्यातुं शक्यते, पिता पुत्राय स्वसम्प्राप्तशुक्रकीटसमानशुक्रकीटाणुकं प्रददाति। अपि चेयं वंशानुक्रमानुगतशुक्रकीटधारा नह्येकेनैव विलक्षणेन शुक्रकीटेन विनिर्म्मिता भवत्यपि तु स्वसमानानेकैः शुक्रकीटाणुकैः। एवमपि परम्परा सुरक्षिता प्रचलति। सत्कार्यवादोऽपि सांख्याभिमतोऽत्र सङ्गच्छते, 'असदकरणात्'[1] इति। एभिः शुक्रकीटाणुकैः मातापित्रोर्गुणदोषसंक्रमणं बालिकाबालकेषु सम्पाद्यते। तैरापादितमेव साम्यं पुत्रेषु कन्यासु च पित्रा मात्रा वा सार्धं समुपलभ्यते।

७. अर्जितगुणावितरणनियमः

इदं तथ्यन्तु प्रायः सर्वैरेव वंशानुक्रमवादिभिः समाद्रियते यद्धि पितृदोषगुणाः पुत्रं कन्यां वा प्रतिसंक्रामन्ति शुक्रकीटमवलम्ब्येति। ननु किं वंशानुगता गुणा एव संक्रमणार्हाः किमुत पितृभ्यां स्वजीवनकाले समर्जितगुणसम्पदोऽपि संक्रमणमर्हन्ति? एवं प्राप्तेऽर्जितगुणावितरणनियमानुसारमिदं वक्तुं शक्यते—नहि पितृभ्यां समर्जितगुणजातं संक्रमणयोग्यमपि तु वंशानुक्रमागता विशिष्टगुणदोषा एव पुत्रपौत्रादिषु संक्रमितुं प्रभवन्ति। किं वाऽर्जितगुणदोषाणां पुत्रपौत्रादिषु वितरणं न जायते। दृश्यते हि खलु लोके नहि दृष्टिहीना दाराः प्रज्ञाचक्षुष एव प्रसुवते। न च कुब्जस्य पितुरेव कन्या पुत्रो वा कुब्जो जायते। अन्धत्वं मातुः कुब्जत्वञ्च पितुर्न ह्यस्ति वंशक्रमानुगतो गुणोऽपि तु व्याधिवशात् स्वकीये जीवनकाल एव प्राप्तो दोषः। एतादृशाः शारीरिकदोषा गुणा वा मातापित्रनुभवेन सह सम्बध्नन्ति, नहि तेषां कोऽपि सांसिद्धिकः सम्बन्धो वंशपरम्परया सहान्वेष्टुं शक्यते। वीज़्मानमहोदयेनेदं तथ्यं साधयितुं केचन प्रयोगा मूषकेषु समारब्धाः। तेन हि महानुभावेन केचन मूषकाः पालितास्तदनन्तरं तेषां पुच्छानि कर्तितानि। तेषां सन्ततीनामपि पुच्छानि कर्तितानि। एवम्प्रकारेण वीज़्मानमहोदयः पञ्चविंशतिवंशावलिपर्यन्तं तेषु मूषकेषु प्रयोगानव्यवधानेन सम्पाद्येदं तथ्यं निर्णतवान् यद्धि पितृभ्यामर्जिता गुणदोषा नहि संक्रमणार्हा भवन्ति, यतो ह्यनवरतप्रयत्नानन्तरमपि नहि मूषकपुच्छानि

---

१. द्रष्टव्या—सांख्यकारिका।

विलुप्तानि जातानि कस्यामपि वंशावल्यां पञ्चविंशतिवंशावलिं यावत्। अतः सिद्धं नहि वितरणं भवति पितृभ्यामर्जितानां गुणदोषाणामिति।

मैकडूगलपैवलोव-महोदयौ[1] इमं निष्कर्षं समचीनं नैव मन्येते। मैकडूगलमहोदया आङ्गलदेशीया मनोविज्ञानविशारदेष्वग्रगण्यतमाः। पैवलोवमहोदया रूसदेशीया मनोविज्ञान-विशारदाः। तयोस्त्विदं मतमस्ति यद्धि वीज़मानमहोदयाभिमतमातापितृगुणदोषाऽवितरणं नैव सर्वांशतः समीचीनम्। तन्मते बालकोऽवश्यमेव मातापितृभ्यामर्जितमानसिकानुभवरूप-गुणदोषान् परम्परयाऽवाप्नोति। अर्जितगुणानां सन्ततौ संक्रमणं भवति न वेति निश्चेतुं मैकडूगलमहोदया[2] अपि मूषकेषु प्रयोगान् समारब्धवन्तः। तैस्तु केचन मूषका बृहज्जलपात्रे प्रक्षिप्ताः। तस्मात् पात्राद् बहिर्गमनाय द्वौ मार्गावास्ताम्। एको मार्गः प्रकाशयुक्त आसीत्, किन्तु तस्माद् बहिर्गमनेवलायां विद्युत्ताडनं (झटका) भवति स्म। द्वितीयो मार्गोऽन्धकारपूर्णः, किन्त्वन्यथा निरापद आसीत्। मूषका यदा जले प्रक्षिप्ताः, तदा ते स्वभावत एव प्रकाशान्वितं मार्गमनुसरन्ति स्म। परन्तु विद्युत्ताडनं तस्मिन् मार्गे विज्ञाय तैर्मार्गोऽपि परिवर्तितः। एवं हि प्रथममूषकशृङ्खल्या प्रतिमूषकं १६५ स्खलितानि कृतानि। तदनन्तरं तैः समीचीनो मार्गः प्रकाशविरहितः प्राप्तः। किन्तु तेषां वंशजानां मूषकाणां वंशावलिभिः प्रकाशविरहितपथमार्गणे क्रमशोऽल्पतराण्येव स्खलितानि कृतानि। एतावतैव स्खलितानां ह्रासोऽनुमेयो भवति यद्धि त्रयोविंशतितमवंशावल्या पञ्चविंशतिमात्रसंख्याकानि स्खलितानि सञ्जातानि। अनेन प्रयोगेण सिद्धं हि खल्विदं तथ्यं यत् पित्रोर्मानसिकगुणदोषाणां वितरणं भवत्येवेति।

विश्वविश्रुतः पैवलोवमहोदयोऽपि मूषकेषु स्वप्रयोगान् समारब्धवान्। स हि घण्टिका-वादनद्वारा मूषकान् भोजनार्थमाह्वयति स्म। प्रथमवंशावलिर्मूषकाणां ३०० वाराणि यावत् घण्टिकावादनं श्रुत्वा भोजनार्थमागतवती। किन्तु तद्वंशजमूषकावलिभिर्घण्टिकाश्रवणे तादृशीं वादनसंख्यामनपेक्ष्यैव भोजनार्थमागमने चाभूतपूर्वं साफल्यं प्रदर्शितम्। एवं प्रकारेण तद्वंशज-मूषकाणां पञ्चमवंशावलिजाता मूषकाः केवलं पञ्चवारं यावद् घण्टिकावादनं श्रुत्वा भोजनार्थं समागताः। अनेन प्रयोगेण साधितं हि खल्विदं पैवलोवमहोदयेन यन्मातापितृभ्यामर्जितमानसिक-गुणदोषजातानि तत्पुत्रपौत्रादिषु संक्रामन्तीति।

नह्येभिः प्रयोगजातैर्विवादास्पदोऽयं विषयः समीचीनं समाधानमवाप्नोति। साम्प्रतमपि समर्जितगुणवितरणावितरणविषयकबहुप्रयोगावलम्बनमपेक्ष्यमेव विद्वद्भिः। दृश्यन्ते हि लोके शास्त्रपारङ्गतानामपि कदाचन विदुषां देवानाम्प्रियाः पुत्राः, कथं तर्हि तद् व्याख्येयम्? अपि च, सामान्यतो मूर्खाणामिव प्रतीयमानानामपि प्रतिभाशालिनः पुत्राः कदाचन प्रजायन्ते, कथं तर्हि तद् व्याख्येयम्? अर्जितगुणदोषवितरणविषयेऽद्यावधि मूर्धन्या मनोवैज्ञानिका अन्यतमं पक्षं स्वेच्छानुसारं स्वीकुर्वन्ति।

---

१. तुलनार्थम्—William mc. Dougall (1871—1938), Ivan Petrovich Pavlov (1849—1936)

२. द्रष्टव्यम्—British Journal of Psychology, April 1927, and Jan. (1930)

८. रूपान्तरनियमः

मनोविकासावसरेऽस्माभिर्द्वितीयाऽध्याये विकासवादमतस्य संक्षिप्तोपन्यासः कृतः। वयमत्र तान् नियमान् लैमार्क-डारविन[1]प्रभृतिविकासवादिमतानुसारं विशदीकरिष्यामः। कस्यामपि जातौ कथं रूपान्तरं परिणमते विकासशृङ्खलायामिति विषयमधिकृत्य लैमार्कमहोदयः पशुविज्ञानविशारदः प्रतिपादितवान् यद्धि यानि यानि परिवर्तनानि कस्मिंश्चिज्जन्तौ वातावरणेन साकं प्रतिक्रियारूपेणाविर्भवन्ति, तान्येव कालान्तरे तद्वंशजजन्तुषु संक्रामन्तीति। तस्य मतं तत्प्रतिपादितनियमचतुष्टयेन स्फुटं भविष्यतीति विचार्य्य वयं तान् नियमानविकलानुवादयुक्तानग्रे वर्णयामः। तथा हि[2]—

प्रथमो नियमः—(प्राणनं) जीवनं स्वकीयस्वाभाविकशक्त्यैव प्रत्येकप्राणिनः शरीरपरिमाणविकासमावहति। तस्य चावयवानां परिमाणविकासमपि स्वसञ्चालनावधिपर्यन्तं करोति।

द्वितीयो नियमः—कस्याऽपि जन्तोर्नवीनावयवाविर्भावः कयाचिदावश्यकतया सम्पाद्यते, यस्या आवश्यकताया अनुभवोऽविरलं तज्जन्तुना प्राप्यते। अपि च, यां क्रियां साऽवश्यकता प्रसूते धारयते च तयाऽपि तदाविर्भावः सम्भाव्यते।

तृतीयो नियमः—अङ्गानां विकासस्तेषां क्रियाशक्तिश्च सर्वदा तत्सम्प्रयोगेणाऽवधारयितुं शक्यते।

चतुर्थो नियमः—प्राणिनां जीवनकाले स्वशरीररचनायां यत्किञ्चिदर्जितं परिवर्तितमारब्धं वा, तत्सर्वं प्रजननकोषाणुकेषु संरक्षितो भवति, कालान्तरे च वंशजप्राणिषु पुत्रादिषु स्वानुभूतपरिवर्तनादिभ्यः प्राणिभ्यः संक्रामतीति।

---

१. तुलनार्थम्—Lamarck the zoologist. Charles Darwin, the biologist.

२. द्रष्टव्यम्—J. Arthur Thomson, 'The Study of Aniamal life', Page 419—

"First low—life by its inherent power tends continually to increase the volume of every living body and to extend the dimensions of its parts upto self-regulated limit.

Second low—The production of a new organ in an animal body results from the ocurrance of some new need which continues to make itself felt, and from a new movement, which this nead originates, and sustains.

Third law—The development of organs and their power of action are constantly determined by the use of these organs.

Fourth law—All that has been acqired, begun or changed in the structure of individuals during the course of their life, is preserved in the reproduction and transmitted to the new individuals which spring form those which have experienced the change."

लैमार्कमहोदयः प्रचुरवास्तविकसामग्रीसङ्कलनेनैतान् नियमान् निर्णीतवान्। तेन हि केषाञ्चित्प्राणिनां पश्वादीनां कालक्रमादङ्गवैकल्यं संलक्षितम्, इतरेषाञ्च तिर्यगादीनां दूरगमनशीलानां पक्षादिपरिमाणवृद्धिरपि सम्प्राप्ता। शीतप्रदेशीयपशूनां शरीरेषु रोमावलिबाहुल्यं देशकालक्रमानुसारमपूर्वजङ्घास्थिपरिवर्तनादीनि चेति बहुविधपुष्कलसामग्रीमवलम्ब्य तेनाऽर्जितशारीरिकपरिवर्तनानां देशकालसमाजवातावरणप्रतिक्रियापादितानां सन्ततिशरीरनिर्मितिसंक्रमणरूपा रूपान्तरप्राप्तिरपि प्रतिपादिता। लैमार्कमहोदयमतोदाहरणरूपोऽफ्रीकादेशीयो जिराफपशुरस्ति, तस्याऽतिदीर्घा ग्रीवा भवति, यतो हि स पठारप्रदेशेषु सर्वदोच्चकण्टकितवृक्षपत्राणि खादित्वैव स्वोदरपूर्तिं करोति। एवमेवोष्ट्राणां पादाधस्तलेषु मांसलपट्टिका वालुकाबहुलप्रदेशपरिस्थित्यनुकूलैवाऽवसेया। जलपक्षिणामपि सन्ति हि खलु पक्षविशेषाः; किन्तु नहि तैस्तेषां सम्यक् प्रयोगः क्रियते, जलाशयस्थानत्वात्। अतस्तेषां तिरश्चामिवाकाशविहारक्षमताऽपि कालक्रमाद्विलुप्ता सञ्जातेति।

अपरो विकासवादप्रवर्तको विद्वन्मूर्धन्यो डारविनमहोदयोऽस्ति, येन लैमार्काऽपेक्षया विकासवादस्य रमणीयतरं व्याख्यानं समुपस्थापितम्। प्रागुक्तमेवाऽस्माभिर्यद् डारविनमहोदयेन 'जीवो जीवस्य जीवनम्' इति न्यायमधिकृत्य 'प्राकृतिकचयनमतम्' समुपस्थापितम्[१]। योग्यतमा एव खलु जीवनानवरतसङ्घर्षे आत्मानं परिरक्षितुं प्रभवन्ति, न तु दुर्बलाः। इयन्तु तस्य महानुभावस्य प्रथमा मान्यता। योग्यत्वस्य किं प्रयोजकमिति विषयं व्याकुर्वता तेन प्रतिपादितं यद्धि ये प्राणिनः स्वदेशकालरूपवातावरणेन सह सामञ्जस्यस्थापने समर्थाः, वातावरणपरिस्थित्यनुसारं स्वजीवनं परिवर्तयितुं शक्नुवन्ति, त एवान्ततो गत्वा जीवितुं शक्ष्यन्त इति। इदं हि वातावरणानुकूलसामञ्जस्यस्थापनपरं तेन सिद्धान्तितं द्वितीयं मतम्। सुतरां शीतप्रदेशीयवातावरणेन सह सामञ्जस्यधारणे पशूनां शरीरेषु रोमवृद्धिर्भवति, मनुष्याणामाहारोऽपि प्रायः सामिष एव जायते, अन्नोत्पादनसौकर्य्याभावात्। वर्णोऽपि किञ्चिच्छुभ्रतरो भवति ग्रीष्मदेशवासिनामपेक्षया। ये हि प्राणिनो देशकालानुसारपरिवर्तनाभावं प्रदर्शयन्ति, कालान्तरे तेषां विनाशोऽवश्यम्भाव्येव। यतो हि प्रकृतिः परिस्थित्यनुसारं चयनं करोति, यान्यङ्गानि याश्च क्रिया जीवनधारणार्थं सामञ्जस्यस्थापनोपयोगीनि सामञ्जस्यस्थापनयोग्या वा, तान्येवोत्तरोत्तरवंशजेषु संक्रमन्ते नेतराणि। अत एव विकासवादे 'प्रकृतिचयनमतम्' एव डार्विनमतमिति प्रथते। उदाहरणतो जलपक्षिणां पक्षाः सन्ति, किन्तु जलाशयनिवासानुपयोगित्वात्तेषामुपयोगो नैव क्रियते, अतो नास्ति जलपक्षिणामाकाशोड्डयनक्षमताऽपि। एवमेव केषाञ्चित् पशूनां केचनावयवा वातावरणानुकूल्यक्रियायां वर्धन्तेऽन्ये च केचनावयवा ह्रासोन्मुखा विनष्टप्राया वा विकासशृङ्खलायां दृश्यन्ते। उपपद्यते चेत्थं रूपान्तरनियमः।


६. प्रतिगमननियमः

प्रायः सर्वजनविश्वासास्पदमिदं तथ्यं यद्धि पैतृकगुणदोषसंक्रमणेन पित्रोः समानशारीरिकस्वास्थ्यगुणदोषवर्णबुद्ध्युत्कर्षवन्त एव पुत्रपौत्रा जायन्ते। नहि सर्वांशेन सत्योऽयं विश्वासः। यतिवरमैण्डेलमहोदयप्रयोगादिदमुपपद्यते यद्धि विकासशृङ्खलायां कदाचन प्रतिगमनात्मकविकासोऽपि सम्भवति। नहि प्रकृतिः स्वप्रतिनियतविकासमात्रामतिक्रामति। यदि कस्यामपि वंशावल्यां विलक्षणप्रतिभाशालिनोः पित्रोः संयोगात् प्रजाऽपि विलक्षणप्रतिभाशालिनी भवेत्तर्हि

१. तुलनार्थम्—Darwin's Theory of Natural Selection.

प्रकृतिः स्वप्रतिगमननियमानुसारं कतिपयवंशावल्यनन्तरमुग्रप्रतिभाया ह्रासमापाद्य सामान्यस्तरमेवानयतीति प्रतिगमननियमस्य भावः। अपि च, यदि कस्मिंश्चित् कुले वर्णसङ्करत्वात् प्रजोत्पत्तौ पितुरुच्चकुलक्रमागतगुणानां ह्रासो दृष्टिगोचरो भवेद् वृषल्या गुणसंक्रमणवशात्तर्हि लक्ष्यते कालान्तर उच्चवर्णसम्बन्धिगुणानां पौनःपुन्येन प्रादुर्भावः। अस्तु तावदिदं मैण्डलप्रयोगपरीक्षणम्। मैण्डेलमहोदयः स्वभिक्षुविहारोद्याने श्वेतपुष्पवन्ति मटराणि रक्तिमपुष्पवद्भिर्मटरैः सह मेलयित्वा वपति स्म। एका मटरजातिः परिमाणेन दीर्घाऽपरा च ह्रस्वाआसीत्। वपनानन्तरं द्वितीयायां मटरवंशावल्यां दीर्घमटराणि ह्रस्वमटरापेक्षया ३ : १ अनुपातेनाधिकसंख्याकान्यासन्। अर्थाद् यदि दीर्घमटराणि त्रीण्यासन्, तर्हि ह्रस्वमटरं केवलमेकमेवासीत्। ह्रस्वं मटरं तु शुद्धमस्ति। तद् वपनान्तरं शुद्धं लघु वर्तुलमेव प्रसूयते। किन्त्वन्यानि त्रीणि मटराणि वर्णसङ्कराणि सन्ति। तेषां मध्ये एकं वर्तुलन्तु शुद्धं दीर्घवर्तुलवंशजं प्रागुक्तशुद्धह्रस्वमटरवत्, शुद्धं दीर्घवंशजं वर्तुलमेव प्रसूयते। किन्त्वपरे द्वे मटरे वर्णसङ्करे, यतो हि ते उत्पत्यनन्तरं पूर्वोक्तानुपातेन मटरोत्पत्तिं कुरुतः। वयमिमं प्रयोगं निम्नलिखितेन रेखाचित्रेण प्रदर्शयामः।

मैण्डेलप्रयोगप्रदर्शकं वर्तुलचित्रम्



उपरिनिर्दिष्टे चित्रे स्पष्टीकृतं यद्धि कथं विभिन्नमटरजातिसंकरे प्रजोत्पत्तिर्भविष्यतीति। द्वे वर्णसंकरे वर्तुले १ : २ : १ अनुपातेन मटरोत्पत्तिं कुरुतः, यथा ह्येकं शुद्धं दीर्घपरिमाणवद् वर्तुलमपरे द्वे दीर्घह्रस्वपरिमाणसङ्करमटरे, अन्तिमञ्च शुद्धं ह्रस्वपरिमाणकं वर्तुलमिति। अनेन प्रयोगेण मैण्डलमहोदयेन साधितं यद्धि कालान्तरे प्रतिगमननियमेन प्रकृतिः शुद्धवर्णाभिमुखं विकासमावहति वर्णसङ्करतां चापनोदयति। मैण्डेलमहोदयस्य चास्य प्रयोगस्याधुनिकपैतृकगुणसंक्रमणविधेर्व्याख्याने महत्साहाय्यं समुपलब्धं पञ्चत्रिंशद्वर्षानन्तरमित्यग्रे वक्ष्यामः।

१०. पैतृकगुणसंक्रमणप्रकारविवेचनम्

ननु कथं हि मातापितृगुणदोषास्तेषां पुत्रपौत्रादिषु संक्रमन्त इति? मैण्डेलमताध्ययनेन प्रोत्साहिता मार्गनपर्लादिप्राणिशास्त्रविशारदैः[1] पैतृकगुणदोषसंक्रमणप्रकारस्याऽपि सुसूक्ष्मतममध्ययनं कृतम्। उक्तमेवाऽस्माभिः प्रागेव यद्धि शुक्रकोषाणुकरजःकोषाणुकसंयोगेनैव गर्भः समुद्भवति निषेकानन्तरम्। प्रतिमासं नार्याः प्रतिकुक्षेरेकैकं डिम्बमेकैका डिम्बग्रन्थिः प्रेषयतीति।

१. तुलनार्थम्—Thomas Hunt morgan and Reymond pearl.

स्तः खलु द्वे डिम्बग्रन्थी स्त्रिया गर्भपार्श्वस्थे। यद्येकस्मिन् मासे वामपार्श्वीया डिम्बग्रन्थिर्डिम्बं प्रेषयति, तदपरे मासे दक्षिणपार्श्वीया डिम्बग्रन्थिर्डिम्बं स्रावयिष्यति। ऋतुकालारम्भे एकस्मिन् डिम्बे प्राणिशास्त्रविदनुसारं ५०,००० डिम्बकोषाणुकानि भवन्ति स्वस्थायां स्त्रियाम्, तानि सर्वाण्येव प्रायः प्रजननक्षमाणि, किन्तु प्रकृतिनियमानुसारं शतकोट्यधिकसंख्याकशुक्रकोषाणुकेषु योनिमार्गस्थितेषु केवलमेकमेव शुक्रकोषाणुकं बलवत्तरं प्राक्तनकर्मदैवशक्तिप्रेरितं गर्भाशयमुखे प्रविशति, तत्रैव डिम्बेन सह मिलित्वा तड्डिम्बं भिनत्ति। तदनन्तरं डिम्बस्थितकोषाणुकमेकमेव तच्छुक्रकोषाणुकेन भिद्यते। एकस्मिन्नेवाऽस्मिन् क्षणे पैतृकगुणानां मातृगुणानां त्वेषां वंशपरम्परागतगुणदोषाणां संक्रमणमपि सम्पाद्यते। स्मरणीयमत्र यद्धि स्त्रीणां समागमकाले यो मदनसलिलाख्यो रजःस्रावो भवति नहि तत्प्रजननक्षमकोषाणुकसमन्वितम्, यथा पुरुषस्य वीर्यनिषेककाले प्रसिक्तं शुक्रसलिलं प्रजननक्षमकोषाणुकसमन्वितं भवति[१]। प्रत्युत डिम्बमेव प्रजननकोषाणुकबहुलाण्डमिव प्रतिभाति, भवति च। गर्भाधानं नहि केवलं शुक्रप्रसेकेन सम्भवति, नापि डिम्बपरिणत्या, अपि तु शुक्रकोषाणुकद्वारा डिम्बभेदनेनैव सम्पाद्यते। पूर्वस्मिन्नध्यायेऽस्माभिरुक्तमेव यद्धि कोषाणुकमूर्णातन्त्वक्षतन्तुसमन्वितं भवतीति। सुतरां स्त्रीपुरुषयोः शुक्रडिम्बकोषाणुकान्यक्षतन्तूर्णातन्तुकेन्द्रकणिकासमन्वितानि च भवन्ति। नह्येतावतैव वंशानुगतगुणागुणवैविध्यसंक्रमणं व्याख्यातुं पार्यते। सुसूक्ष्माणुवीक्षणयन्त्रसाहाय्येनेदं द्रष्टुं शक्यते यद्धि प्रत्येकं शुक्रकीटं डिम्बकीटश्च 'जिनम्' इति[२] नामकान् २४ युग्मकान् सुसूक्ष्मरोमवदवयवान् बिभर्ति। प्रतिजिनं सहस्राधिकानि क्रमजमानि[३] भवन्ति। सम्प्रयोगकाले शुक्रकोषाणुकं द्विधा विभज्यते, स्वकीयेभ्यः २४ युग्मकेभ्यः केवलमर्धभागपरिमितानि जिनानि डिम्बगतार्थसंख्याकजिनैः सह मेलनार्थं गर्भपरिणामार्थं प्रदत्ते। एवं परिणममाने गर्भे कलले वा केवलानि २४ युग्मकानि जिनान्येव भवन्ति, मातुः पितुश्चार्धमर्धं भागं गृहीत्वैव। सुतरां गर्भप्रकृतिनिर्णायकं नहि केवलं पित्रा प्रदत्तं शुक्रकोषाणुकमपि तु मात्रा प्रदत्तं डिम्बान्तर्गतं डिम्बकोषाणुकमपि। नवजातबालको द्वयोरेव गुणदोषान् भजते। नहि सर्वदा शुक्रकोषाणुकस्य लम्बवदेव विभाजनं जायते प्रत्युत कदाचन तिर्यगपि। अतः सम्भवति वैविध्यं समानपित्रोः पुत्रपुत्रिकासु। अपि च क्रमजमान्यपि पृथक् पृथक् गुणदोषान् संसूचयन्ति। तेषां जिनवैविध्यानुसारं मेलनवैविध्यमपि गुणदोषसंक्रमणे वैविध्यं सुष्ठुतरमावहति। स्मरणीयमत्र यद्धि नहि सर्वदा पित्रोरेव गुणदोषा नवजातबालके संक्रामन्त्यपि तु कदाचन पितामहस्य मातामह्या वाऽपि। एवं प्रकारेण मातुः पक्षादपि गुणसंक्रमणमवधेयम्। वस्तुतस्तु यो ह्यवयवविशेषः शुक्रडिम्बयोस्तेषां जिनयुग्मकेषु चोग्रतरमदम्यं प्रभावमावहति, तस्यैवानुरूपा गुणदोषा गर्भे संक्रमन्ते।

---

१. द्रष्टव्यम्—Encyclopaedia of sex practice, page, 231 "This constitutes the feminine pollution in which in Contrast to the masculine, no germinal calls are rejected."

२. तुलनार्थम्—Genes.

३. तुलनार्थम्—Chromosomes.

अपि च स्मरणीयमत्र यद्धि पिता जिनानामुत्पादको नास्ति। केवलं संवाहको हि सः। स्वपितुः सकाशात् समुपलभ्य पुत्रः सुरक्षितान् तान् पुत्रं स्वकीयं प्रदत्ते। किन्तु पुत्रस्य किमपि जिनं मातृपितृप्रदत्तजिनव्यतिरिक्तं नास्ति। यद्यपि पितुः २४ जिनान्येव पुत्रो गृह्णाति, स पितामहस्याऽपि जिनानां चतुर्थांशं तेषु गृह्णाति। दशवंशावलिपूर्वकस्य च पितामहस्य जिनेभ्यो १।१०२४ जिनभागमवाप्नोति। कदाचनैवमपि भवति यद्धि किमपि जिनमुग्रतरजिनसम्पर्कात् क्रियाहीनमिव प्रतिभाति। किन्तु नहि तेन तस्य विनाशोऽध्यवसेयः। समुपयुक्तकाले भाविन्यां वंशावल्यां सोऽपि किञ्चिदनुग्रजिनसम्प्रयोग उग्रतरमिवाचरिष्यति, तत्सम्बन्धिगुणदोषोऽप्याविर्भविष्यति। अतो युज्यते हि गुणदोषसंक्रमणे वैविध्यशबलितं सारूप्यम्।

११. ननु के गुणा दोषा वा संक्रमन्ते ?

अतीव कठिनेयं समस्या सम्प्रत्ययस्यानुपतिष्ठति। अत्रोच्यते—वंशानुक्रमसंक्रमिता इमे गुणदोषा भवन्ति। तथा हि—नेत्रवर्णः, त्वग्वर्णः, शिरस आकृतिः, शारीरिकदीर्घत्वं वामनत्वं वा, केचन शारीरिकदोषाः, यथा तिमिररोगः[1], किं वा वर्णान्धत्वमङ्गुल्याकृतिः, खलतित्वञ्चेति। मधुमेहव्यतिरिक्ता अन्ये सामान्यरोगा नहि संक्रमणार्हाः, यद्यपि नासूरराजयक्ष्मरक्तपित्तादीनामभिमुखीप्रवृत्त्यपि[2] संक्रामति। मानसिकरोगेषु केवलं द्वौ रोगौ संक्रमेते, मनोदौर्बल्यं शारीरिकमानसिकव्यक्तित्वविभाजनोपोद्बलकोऽपरो रोगश्च यं पाश्चात्त्याः 'हंटिंग्टन्स् कोरिया'[3] इति नाम्ना व्यवहरन्तीति। अन्यमानसिकरोगाणां पैतृकपरम्परया संक्रमणविषये दृश्यते हि बुद्धिभेद आचार्याणाम्। आचार्याणां मनोवैज्ञानिकानां बाहुल्येनाऽनुमोदितमिदं तथ्यमातिष्ठते यद्धि यावती बुद्धिमात्राऽस्माकमस्ति सा नूनं पैतृकगुणसंक्रमणपरम्परया समागतेति। अस्माभिः पाश्चात्त्याचार्याणां पद्धत्योपर्युक्तविवेचनमुपन्यस्तम्, अग्रे वयं तुलनात्मकदृष्ट्या प्राचामाचार्याणां मतान्यपि वक्ष्यामः।

१२. ननु किं नाम वातावरणम् ?

उपर्युक्तमस्माभिर्यत् शारीरिकगठनाकृतिसांवेदिकचेष्टादिक्रियासु विशेषतः पैतृकगुणपरम्पराप्रभावः संक्रमते। 'मानसिकक्षेत्रे वंशानुक्रमप्रभावस्य कियती मात्रा वर्तते' इति विषयमवलम्ब्य महान् बुद्धिभेदोऽद्यावधि वर्तते मनोवैज्ञानिकप्रवराणाम्। प्रागुक्तसंक्षिप्तविवरणमस्माभिरधिकतमानां मनोवैज्ञानिकानां मतबलमवधार्यैवोपन्यस्तम्। अग्रेऽपि वयं दुरधिगमस्यास्य ग्रन्थेर्विस्रंसनाय कृतानां कतिपयानां प्रयोगाणां विवरणं प्रदास्यामः। किं कारणं जाटिल्यस्यास्य ? अस्ति हि खलु वातावरणजनितामितप्रभावो येनायं जन्मतः शूद्रो मानवो द्विजत्वमवाप्नुते। तथा हि स्मृतिवचनम्—

"जन्मना जायते शूद्रः संस्काराद् द्विज उच्यते" इति।

संस्कारो नाम शिक्षा-सामाजिक-पारिवारिक-समुदाचारः। द्विज इति दैवीसम्पदधिगतानां सज्जनानामुपलक्षणम्। ब्राह्मणक्षत्रियवैश्यानां भवति हि तेष्वन्तर्भावः। संस्कारेण वातावरणोपलक्षणेन हि खलु महान् प्रभाव आसुरीसम्पद्विमोक्षाय दैवीसम्पदवाप्तये च वितन्यते। नहि

---

१. तुलनार्थम्—Colour-blindness.

२. तुलनार्थम्—Allergic forms.

३. तुलनार्थम्—Huttingtons chorea.

सर्वदा वातावरणस्य सौम्य एव प्रभावः प्रत्युतापरथाऽपि संलक्ष्यते। अतो विचारणीयमेतद् वातावरणस्वरूपं मानवव्यवहारस्वभावाध्ययनबद्धपरिकरेण विज्ञानमूर्धन्येन मनोविज्ञानेन, येन हि खलु मानवपरिष्कारसंलग्नसामाजिकसंस्थानां प्रयत्नसंस्कार इयत्तावधारणं सुकरं भवेत्। सुतरां वातावरणं नाम आजन्मनो मृत्युपर्यन्तं ये ये प्रभावा विविधसंस्थाभ्यो विभिन्नपुरुषेभ्यो विभिन्न-वस्तुभ्योऽन्तर्घटितविचारेभ्यो वा मानवोऽयं गृह्णाति, उत्तेजकरूपेभ्यः प्रतिक्रियारूपेभ्यो वा, तेषां सर्वेषामुपलक्षणं नहि खल्विदम्। 'आजन्मनः' इति न पूर्वविवेचनं सङ्गच्छते, अत आ-गर्भाधानात्। वातावरणं हि द्विविधम्। गर्भाधानान्तरं गर्भे यो प्रभावो मातुर्भावभोजना-च्छादनादिना घटते, तत्सर्वं प्रागुत्पत्तिवातावरणं गर्भान्तरीयकं वा वातावरणमुच्यते। जन्मन आरभ्योत्तरकालीनं वातावरणं तु सुप्रथितमेव सर्वेषाम्। निम्नस्तरीयेषु प्राणिषु मनुष्याऽपेक्षया-ऽत्यधिकः प्रभावो वंशानुक्रमागतगुणदोषशारीरिकनिर्मितसांवेदनिकचेष्टाप्रतिक्रियासु दरीदृश्यते। यन्त्रवद्धि तेषां सुगठितं शरीरयन्त्रं जगतामधीश्वरेण परमकारुणिकेन। किन्तु मनुष्येषु बुद्धि-बलवत्सु वातावरणजन्यं परिवर्तनं नाल्पतरं संलक्ष्यते, यद्यपि तेषां प्रकृतिप्रदत्तपरम्परासंक्रमण-नियमास्तादृशा एव भवन्ति, यादृशा अन्यपृष्ठवंशवतां प्राणिनां भवन्ति। सुतरां वातावरणाभि-व्यक्तिपरिस्थितौ सर्व इमेऽन्तर्भूता भवन्ति। यथाहि—भोजनभौगोलिकस्थिति-देशकालार्थिकस्थिति-व्यवसाय-जलवायु-पाठशालागृहप्रतिवेशन-जातिराष्ट्रराजनैतिकसामाजिकधार्मिकसमाजसङ्घटनादीनि, यच्च सः शृणोति, पश्यति, जिघ्रति, स्पृशति, खादति यथा चैतेषु कार्येषु प्रवर्तितो भवति, ये ये च भावास्तस्य मनसि परिस्थितिप्रतिक्रियारूपेण विचारविनिमयेन वा प्रादुर्भवन्ति, ते सर्वे वातावरणेऽन्तर्भावं भजन्ते। नहि यमलानां यमलयोर्वा एकमभिन्नं वातावरणं भवति, पित्रो-रभिन्नत्वात्। नहि पञ्चवर्षीयस्य दशवर्षीयस्य च बालकस्याऽभिन्नमेकरूपं वातावरणं भवति, पित्रोः समानत्वात्, समानगृहत्वाद्वा। द्वयोर्भ्रात्रोर्मैत्री भिद्यते, मातापित्रोर्वात्सल्यमपि व्यवहारे भेदमावहति। एका दशवर्षीया कन्या आसीत्, बालकोऽपि वा ज्येष्ठत्वादनन्यलभ्यां स्तनन्धयप्रीति-मवाप्तवान्। किन्तु पंचवर्षीयस्योपरिष्टकात् सार्धतृतीयवर्षीयोऽपि बालको जातः। अत एव माता कनिष्ठपुत्रस्नेहवशात्तस्य तावद्वात्सल्यं नहि प्रदातुं शक्नुते, यावद् ज्येष्ठः पुत्रः कन्या वा लब्धवान्। इत्थमन्येऽपि वातावरणभेदा अवसेयाः। तेषां प्रभावोऽहर्निशं मानवस्योपरि सङ्घटते, दैनन्दिनं च वर्धमानो बालकः शारीरिकमानसिकवातावरणजनितप्रोत्साहनं लब्ध्वा वर्धते, कोऽप्यन्योऽनुत्साहपूर्णवातावरणेन कुण्ठितशक्तिशारीरिकचेष्टावान् हतप्रभ एव दृश्यते। एवंविधा वातावरणजन्यप्रभावाः सुविदिता एव भूरि भूरि विपश्चिताम्। ननु किं वातावरणजनित-शिक्षापालनपोषणादीनि प्रकृतिप्रदत्तशारीरिकमानसिकसम्पत्तिमतिक्रमितुं शक्नुवन्ति? किं तानि स्वभावतो मन्दबुद्धिं बालकं प्रतिभाशालिनं परिणमयितुं प्रभवन्ति?

१२. लॉकमतम्[1]

आङ्ग्लदेशीयोऽनुभववादप्रवर्तको दार्शनिकप्रवरो विश्वविश्रुतो लॉकमहोदयः सर्वत उपरि प्रतिपादितवान् यद्धि प्रकृतिर्नहि मनुष्येषु कञ्चिद् बुद्धिरूपसंस्कारमाधत्ते। जन्मकाले तु मानवमस्तिष्कं मनो वा स्वच्छशुभ्रपट्टिकेव भवति। नहि तस्य निर्मितौ कश्चित् पूर्वागतसंस्कारः

१. द्रष्टव्यम्—John locke, "Essay Concerning Human understanding" (1632–1704 A. D.)

संक्रमते। यत्किञ्चिद् वयं जानीमः, बुद्धिरूपेण, भावनारूपेण वा, तत्सर्वं वातावरणजन्यम्। नहि वातावरणप्रतिक्रियाव्यतिरिक्तं किञ्चिदप्यनुभवाङ्गमस्माकमापादयितुं शक्यते। ये केचन भेदा बालकेऽन्यबालकेभ्यो वर्तन्ते, तेषां वातावरणभेदादेव समुद्भवो नेतरस्मात्। सुकोमलपरिवर्तनीय-द्रव्यनिर्मितं नवजातशिशुमस्तिष्कं यथेच्छं परिवर्तनमर्हति शिक्षाऽभ्यासादिना वातावरण-परिष्कारेण च। नहि जन्मप्राक्कालिकं किञ्चिदपि तत्र वंशक्रमानुगतं गवेषयितुं शक्यते। तन्मते सर्वं ज्ञानमिन्द्रियप्रत्यक्षप्रभवम्। स्मृतिशिक्षणादीन्यपि प्रत्ययसम्बन्धमादाय प्रादुर्भवन्ति।

१४. हेलवेशियशमतम्[1]

एते महानुभावा फ्रान्सदेशीया श्रीलॉकमतानुगामिनः। तेऽपि कस्याऽपि पुरुषस्येतरस्मात् स्वभावाचरणपार्थक्यं वातावरणशिक्षादिसमुद्भूतमिति मन्यन्ते।

१५. ओवेनमतम्[2]

आङ्गलदेशीयोऽयं महान् विचारको हेलवेशियशमतमनुमोदते। तन्मते वंशपरम्परया गतं किमपि नास्ति मानवचरित्रे स्वभावे च। यत्किञ्चिदस्ति, उपलभ्यते च तत्सर्वं परिस्थितिजन्यम्, समाजप्रदत्तमिति यावद्भवति। व्यक्तेरुन्नतिसाधनजातेऽन्यतमं साधनं शिक्षारूपमेव। शिक्षयैव समाजमुखेन सर्वेषां मानवानामुन्नतिः सम्भवति। अतः सुशिक्षया कोऽपि मनुष्यः सद्वृत्तो भवितुमर्हति।

१६. कैण्डोलमतम्

प्रागुक्तमस्माभिः गाल्टनमहोदयानां प्रयोगविवरणम्। गाल्टनमहोदयेन स्वकीयप्रयोगै-र्वातावरणजन्यप्रभावः सर्वथा तिरस्कृतः। तस्येयं त्रुटिः स्विट्जरलैण्डदेशीयेन कैण्डोलमहोदयेन[3] १९३०वैक्रमाब्दे गाल्टनमहोदयस्य 'वंशानुक्रमजन्या प्रतिभा' इति नाम्नः पुस्तकस्य प्रत्याख्यानं प्रकाश्य निराकृता। कैण्डोलमहोदया द्विपञ्चाशदुत्तरपञ्चशतं (५५२) यूरोपीयप्रख्यातवैज्ञानिकानां नामानि सङ्कलय्य तेषां जीवनेतिवृत्ते वातावरणापादितानां प्रभावाणां विवरणमुपस्थापयामासुः। वैज्ञानिकसर्जनात्मकानुसन्धानप्रेमसंवर्धकवातावरणसाधनसूच्यां सम्पत्तिवैपुल्यावकाशवैज्ञानिकपूर्वज-परम्परासमुचितशिक्षोपलभ्यपुस्तकसंग्रहालय-प्रयोगशाला-विचाराभिव्यक्तिस्वातन्त्र्य-स्वेच्छानुकूलव्यव-सायचयनस्वातन्त्र्य-समशीतोष्णकटिबन्धावासादीन् विवर्ण्येमं निष्कर्षं प्रतिपादितवान् यद्धि वातावरणमेव वैज्ञानिकप्रतिभासमुद्भवाय प्रधानं कारणमिति। कैण्डोलमहोदयस्येदमपि विनिगमनं दुष्टं सञ्जातम्, एकान्तिकत्वात्; यतो हि प्रकृतिप्रदत्तवंशानुक्रमजन्यप्रभावं स सर्वथा तिरस्कृतवान्, यमधि-कृत्यैको बालको वातावरणे समाने सत्यपि वैज्ञानिकानुसन्धानरुचिं तदुपयुक्तां प्रतिभाञ्च प्रदर्शयत्य-न्यश्च तस्मिन्नेव वातावरणे सामान्योऽपरश्चापि मन्दबुद्धिरेव जायते। गाल्टनमहाशयस्तु स्वसङ्क-लितलब्धप्रतिष्ठमहोदयानां जीवने वातावरणप्रभावं विदित्वाऽपि तं गौणमेव निर्णीतवान्। उदा-हरणस्वरूपतस्तदुक्तो वैगवुड-डार्विन-गाल्टनपरिवार उल्लेखनीयो यस्मिन् पञ्चवंशावलीर्यावत् 'रायल-सोसायटीफेलोशिप' इत्याख्योपाधिं वैदुष्योत्कर्षप्रदर्शिकां वंशजाः क्रमशो लेभिरे[4]। अस्तु तावद्

---

१. तुलनार्थम्—Helvetious.

२. तुलनार्थम्—Robert Owen.

३. तुलनार्थम्—A. De Candole, Swiss (1873)

४. तुलनार्थम्—Sandiford, Educational Psychology, Page 17; and Hereditary Geneus by Galton.

वातावरणप्रभावोऽपि सुमहान्, किन्तु नहि तत्पैतृकगुणपरम्परागतसम्पत्तिमतिरिच्यते। अतो यां त्रुटिं निराकर्तुं कैण्डोलमहोदयः प्रत्याख्याने प्रवृत्तः सञ्जातस्तामेव त्रुटिं स्वयमपि कृतवान्।

१७. हेवर्डमतम्[1]

आङ्ग्लदेशीयो हेवर्डमहोदयोऽप्यनाथालयस्थबालानामुदाहरणानि सङ्कलय्येदं प्रतिपादितवान् यद्धि सम्यक् शिक्षाप्रदानेन वातावरणपरिष्कारेणानाथबालका अपि सुसभ्या नागरिका भवितुमर्हन्ति। सुचारुवातावरणाभावे नहि प्रतिभा विकासं लभते। परिस्थितिपरिवर्तनेन यत्किञ्चिदपि वंशपरम्परयोपलब्धं भवेत्—अस्ति हि नूनं तत्—तत्सर्वं परिवर्तनक्षमम्, परिमार्ष्टुं शक्यते चेति।

वाट्सनमहोदयस्योग्रतमं मतमस्माभिः प्रागेवोद्भावितम्। एवं सम्प्राप्तां वातावरणवंशानुक्रमप्रभावसंश्लेषोद्भवां जटिलामिमां ग्रन्थिं विस्रंसयितुमग्रे वयं द्विविधान् प्रयोगान् विचारयिष्यामः। प्रथमं तावत् यमलबालकेषु सम्पादितान् प्रयोगान् वर्णयित्वा तदनन्तरं वन्यपशुसंवर्धितबालकेषु व्यवहृतप्रयोगान् विवेचयिष्यामः।

१८. यमलबालकानां मनोवैज्ञानिकमध्ययनम्

वंशानुक्रमस्य प्रभावो भवति न वेति निश्चेतुं यमलबालकानामध्ययनं नितान्तमावश्यकमिति गाल्टनमहोदयेनैव सर्वप्रथममुद्भावितम्। कस्याऽपि प्रयोगस्येदं सर्वाधिकमहत्त्वपूर्णमङ्गं यद्धि सर्वाः परिस्थितीरपरिवर्त्यैकस्या एव कारणसामग्र्याः परिवर्तनजन्यपरिणामाऽध्ययनं सम्पन्नं भवेत्। यदि काश्चनान्या अपि परिस्थितयस्तदा क्रियाशालिन्यो भवेयुस्तर्हि तस्याः कारणसामग्र्या अनन्यथासिद्धत्वं नैव सिध्येत्। न्यायाचार्यैरभिमतं कारणत्वं हि खल्वनन्यथासिद्धनियतपूर्ववृत्तिमत्त्वं भवति। तदुक्तं विश्वनाथेन कारिकावल्याम्—

> अन्यथासिद्धिशून्यस्य नियता पूर्ववृत्तिता।
> कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितम्॥ इति।[2]

व्याख्यातं चेदमनन्यथासिद्धत्वलक्षणमित्थं मुक्तावल्याम्—"दण्डत्वादौ नियतपूर्ववृत्तितायाः सत्त्वादतिव्याप्तिरत उक्तमन्यथासिद्धिशून्येति" इति। अतः कारणनिर्धारणात्मके वैज्ञानिकप्रयोगे नितान्तमावश्यकमिदं तथ्यं यद्गवेषणास्पदीभूतामेकां सामग्रीमादायेतरासां सुनियन्त्रणं भवेदिति। मनोविज्ञानात्मकेषु प्रयोगेषु पैतृकगुणसंक्रमणानुसन्धानपरेषु नितान्तं दुष्करमितरसामग्रीषु नियन्त्रणमित्यवदातमेव विदुषाम्। तथापि यमलानामध्ययनं परिस्थितिसाम्यात् सौकर्यमावहति वंशपरम्परागुणानुसन्धातॄणाम्। ननु यमलशब्दस्य कोऽर्थः? युगपदुत्पन्नबालकौ यमलावित्याख्यां भजेते। यदा शुक्रकोषाणुकद्वयं डिम्बकोषाणुक एकस्मिन्नेव सम्मिलति, तदा समाननालकमलवन्तौ द्वौ बालकौ गर्भाधानं प्राप्नुतः, कालान्तरे च तौ युगपदेवोत्पद्येते। तौ समलिङ्गिनौ भवतो बालकौ बालिके वा। तावेव यमलौ भवतः। डिम्बकोषाणुकैकभाक्त्वात् तयोर्वंशपरम्पराऽप्यभिन्नैव मन्यते मनोवैज्ञानिकैः। यौ च द्वौ बालकौ विभिन्नडिम्बकोषाणुकेभ्यो गर्भाधानं लभेते, तयोः कमलनालेऽपि पृथक् पृथक् भवतः। अतोऽस्ति पार्थक्यं तयोर्वंशानुक्रमणसंक्रमणसम्पत्तावपि

---

१. द्रष्टव्यम्—Heward.

२. द्रष्टव्या—सिद्धान्तमुक्तावली, पृष्ठ १०८, नि० सा० प्रे०।

सिद्धम्। बहुधा पृथग्डिम्बकोषाणुकजन्यौ शिशू विपरीतलिङ्गौ भवतः। ये बालकाः समानपितृभ्यामुत्पन्नाः, तेषां वातावरणं वंशपरम्पराऽपि च महत्तरं पार्थक्यं बिभर्त्ति पूर्वद्वयाऽपेक्षया। अतोऽस्माभिरियं समस्या त्रिधा विभज्य विचारणीया।

(अ) यमलाध्ययनम्।[१]

(आ) युगपदुत्पन्नविभिन्नकमलनालान्वितबालकानामध्ययनम्।[२]

(इ) समानपित्रोः कन्यापुत्राणामध्ययनम्।[३]

वयमिदानीं कांश्चित् प्रयोगान् विविच्य तदनन्तरं तालिकाद्वयेन तेषां तुलनात्मकं साम्यवैषम्यविवरणं प्रदास्यामहे।

१९. गाल्टनमहोदयानां प्रयोगः

अशीतियुग्मकानां बालकानामितिवृत्तसङ्कलनेन गाल्टनमहोदय इदं प्रमाणीचकार यद्धि तेषु विविधवातावरणपोषितेषु सत्स्वपि महदाश्चर्यजनकं साम्यमुपलभ्यत इति। गाल्टनसङ्कलितसूच्यां यमला युगपदुत्पन्ना विभिन्ननालकमलान्वितबालकाश्च द्विविधा एवासन्। अपरथा च यमलाः-जन्मतो पार्थक्यं भजमानाः, विविधवंशोत्पन्ना इति तात्पर्यम्, समानवातावरणे पोषिताः पालिता अपि महत्पार्थक्यमावहन्ति। एवम्प्रकारेणाऽपि गाल्टनमहोदयः प्रतिपादितवान् यद्धि वंशपरम्पराप्रभावो वातावरणप्रभावादतिरिच्यत इति।

गाल्टनमहोदयेनेतिवृत्तसंशोधनावसरे यमलानां लौकिकदन्तकथाजनश्रुतीनामप्यन्तर्भावः स्वसूच्यां कृतः। अपि च द्विजकथनानामसङ्गतानामुल्लेखनं महत्त्वपूर्णं सदप्यकिञ्चित्करं प्रतिभाति। महत्त्वपूर्णं हि खल्विदं यतो ह्यनेन भाव्यनुसन्धानस्य प्रभातस्य नेतृत्वं सम्पादितम्।

२०. थार्नडाइकप्रयोगाः[४]

कोलम्बियाविश्वविद्यालयप्राध्यापकेन मनोवैज्ञानिकपुङ्गवेन १९६२ वैक्रमाब्दे सर्वप्रथमं वैज्ञानिकविधिना युगपदुत्पन्नबालकानां पञ्चाशद्युग्मानामध्ययनं कृतम्। स हि बालकान् षड्विधैर्मानसिकपरीक्षणैर्जटिलसमस्यासंवलितैः परीक्षितवान्। तेन प्रदत्तासु समस्यासु केचनेदृशाः प्रश्ना आसन्, यथा अभिहितशब्दानां प्रतिकूलार्थशब्दोच्चारणम्, मुद्रितपृष्ठान्तर्गत 'अ' इत्यक्षराणां रेखया कर्तनम्, बहिष्करणं वा। तैरेव प्रश्नैः सोऽन्यांश्च समानपितृभ्यां पोषितान् सुतानपि परीक्षितवान्। दृष्टं हि खलु तेन महत्सादृश्यं यमलाभ्यां प्रदत्तेषूत्तरेषु समानपितृभ्यां परिवर्धितेतरयमलबालकानामपेक्षया[५]। अयमलपुत्राणामपेक्षातो यमलानामुत्तरसाम्यं द्विगुणतरं त्रिगुणतरमधिकमासीत्। स तदाप्रभृति निष्कर्षमिमं प्राप्तवान् यद्धि पैतृकगुणसंक्रमणप्रभावातिरेकादेवोत्तरसारूप्यमायाति, कथमन्यथेदं पारिवारिकवातावरणसाम्येऽपि पार्थक्यं व्याख्येयमिति।

---

१. तुलनार्थम्—Identical twins.

२. तुलनार्थम्—Fraternal twins.

३. तुलनार्थम्—Siblings.

४. तुलनार्थम्—Edward Lee Thorndike of Columbia University. (1874—)

५. तुलनार्थम्—Siblings.

२१. यमलेषु वातावरणवैविध्यप्रभावः

समानपैतृकगुणसंक्रमणवातावरणसम्पत्तिभाजां यमलयमलेतरसमानपितृपोषितानां बालकानां विवेचनं कृतम्। सम्प्रति विविधवातावरणेषु पालितेषु यमलेषु वातावरणवैविध्यस्य समानपैतृकपरम्परायां सत्यामपि को हिं खलु विशेषो भवतीति विचार्यते। शिकागोविश्वविद्यालयीयप्राध्यापकत्रयेण [1]न्यूमान-फ्रीमान-होलजिङ्गरमहोदयैर्विविधवातावरणसंवर्द्धितानां बालकानामितिवृत्तान्वेषणाय समस्तामेरिकादेशस्य भ्रमणं कृतम्। तदनन्तरं त एकोनविंशतिर्यमलयुग्मकानि लेभिरे, यानि विविधवातावरणेषु जन्मनः कियत्कालादनन्तरमेव पृथक्कृत्वा संवर्धितान्यासन्। तेषां शारीरिकमापनं कृत्वा बुद्धिपरीक्षणैस्तेषां बुद्धिलब्धाङ्का अपि सम्प्राप्ताः। युगपत्संवर्धितानामयुगपत्संवर्धितैर्बालकैः सह तैः सम्प्राप्तो भेदो निम्नलिखिततालिकया प्रदर्श्यते—[2]

	सहसंवर्धितयमलानां पार्थक्यम्	पृथक्कः संवर्धितयमलानां भेदः
आकारः (दैर्घ्यम्)	१.७ सेण्टीमीटराः	१.८ सेण्टीमीटराः
परिमाणः (तौलम्)	४.१ पौण्डाः	९.९ पौण्डाः
बुद्धिलब्धाङ्कः[3] (परीक्षणद्वयम्)	५ किं वा ६ अङ्काः	८ किं वा ९ अङ्काः

एका वितस्तिर्विंशतिसेण्टीमीटरपरिमिता भवति। अर्धप्रस्थमिति पौण्डमानम्। अष्टात्रिंशत्तोलकमिति यावत्। उपर्युक्तया तालिकयेदं प्रतिभाति नहि वातावरणमाकारदैर्घ्योपरि कतिविधं प्रभावमासादयति। बुद्धिपरीक्षणसम्प्राप्तौ प्रभावमनुसन्दधानैस्तान्येकोनविंशतिर्युग्मकानि द्विधा विभक्तानि। ये समानार्थिकदशाव्यवसायादिषु परिवारेषु परिवर्धिता आसन्, तेषां प्रथमा श्रेणी। द्वितीया च श्रेणी तेषामासीद्येषामार्थिकदशाव्यवसायादिभेदान्वितेषु परिवारेषु पालनपोषणं सञ्जातम्। एवं प्रकारेण संलक्षितो भेद एतादृश आसीत्—प्रथमश्रेण्यन्तर्गतानां यमलानां बुद्धिलब्धाङ्कभेदः परस्परं ५ किं वा ६ अङ्कान् यावदासीत्। द्वितीयश्रेण्यन्तर्गतयमलानां पारस्परिकबुद्धिलब्धाङ्कभेदः १० किं वा ११ अङ्कान् यावदासीत्। वातावरणभेदाऽपेक्षयैव बुद्धिभेदजनकलब्धाङ्कोऽप्यतिरिच्यते स्म।

ननु पूर्वोक्तमतेन सहेदं मतं नहि सङ्गच्छते? प्रागुक्तं ह्यस्माभिर्यन्मनोवैज्ञानिकाः प्रायशः बुद्धिं पैतृकगुणसंक्रमणायत्तामनुमन्यन्त इति। पूर्वं त्वस्माभिः समन्वितं मतं सामान्यत उपन्यस्तम्। अयं प्रयोगस्तु तां समस्यां विशिनष्टि। अपि च, वैज्ञानिकप्रणाल्या इदं वैशिष्ट्यं यद्यत्र वैज्ञानिको नहि कांश्चन तथ्यान् दृष्टिमार्गात् तिरोहितान् करोति। अस्माभिस्तु प्रयोगनिरूपणमिदं गीर्वाणवाण्युत्कर्षविलसितविद्वद्गणानामुपयोगायैव कृतम्। किं बहुना, स्मरणीयमस्मिन् विषये यद्धि नहि बुद्धिर्बुद्धिसम्प्राप्तिश्चानर्थान्तरम्। या बुद्धिरस्माभिर्वंशानुक्रमगुणायत्ता स्वीकृता समस्तान्यमतमवलम्ब्य, सा तु बुद्धिप्रवणत्वरूपा। दृश्यते केषाञ्चिद् जन्मत एव सञ्जीते

---

१. तुलनार्थम्—Horatio Hackett Newman (1875 A. D.—)
Frank N. Freeman.
Karl J. Holzinger.

२. द्रष्टव्यम्—Twins–A Study of Heredity and Environment by freeman, Newman. & Holginger.

३. द्रष्टव्यम्—Intelligence Quotient विचारप्रकरणेऽग्रे वक्ष्यते।

रुचिर्हि खलु लोके। इतरेषां रुचिः कृषिविधाने गोपालने वा संलक्ष्यते। इयं बुद्धिः प्रवणतारूपा[1] पैतृकगुणाश्रिता। नहि वातावरणं साऽपेक्षते। अपि च, अशिक्षितानामपि बुद्धिवैभवं बहुशो दृश्यते। बुद्धिसम्प्राप्तिस्त्वपरथा पाठशालीयविन्यासमाश्रिता भवति। वातावरणसम्प्राप्ताचारविचारसाहित्य-भूगोलेतिहासादिनियतपाठ्यक्रमानुशीलननिदर्शिका। बुद्धिसम्प्राप्तिर्हि खलु वातावरणोत्कर्षजन्यं संस्कारमनुसरति। दृश्यते हि बुद्धिलब्धाङ्को न्यूनो येषु बुद्धिमत्सु, तेष्वपि प्रतिस्पर्द्धालुपरीक्षण-बुद्धिर्नास्तीति। परीक्षायामुत्तरप्रदानमपि कौशलमपेक्षते; तच्च व्यवहारायत्तम्। तस्याभावे बुद्धिमतामपि वैफल्यमसन्दिग्धम्। सुविदितमेवेदं तथ्यं मानसिकस्तरपरीक्षणपरायणानां विदुषाम्। अतो न हि बुद्धिसम्प्राप्तिलब्धाङ्कः सर्वदा वंशानुक्रमायत्तं बुद्धिशक्तिमभिव्यनक्ति। नूनं विद्याध्ययनं बुद्धिसम्प्राप्तिसंवर्धनायान्यतमं साधनम्। उपरिलिखिते प्रयोगे एका बालिकाऽभिजातकृषकपरिवारपोषिता महाविद्यालयीयां शिक्षामवाप्तवती। तस्या बुद्धिलब्धाङ्कास्तु ११६ यावत् समुन्नता जाताः। तया सहोत्पन्नयमलभगिन्या निम्नस्तरीयपरिवारसंवर्धिताया द्वित्रवर्षं यावल्लब्धशिक्षाया बुद्धिलब्धाङ्कास्तु ९२ यावत्परिमिता एवासन्। तस्मिन्नन्वेषणेऽयं भेदो महत्तम आसीदिति।

२२. विङ्गफील्डमतम्

अन्यैर्विङ्गफील्डप्रभृतिमनोवैज्ञानिकैः सर्वविधयमलादिभ्रातृषु प्रयोगाः समाश्रिताः। तेषु यमलाः, युगपदुत्पन्नाः, समानपितृभ्यां परिवर्धिताः पुत्राः सर्व एवासन्। तैस्तु मानसिकपरीक्षण-प्रश्नावलीं समाश्रित्य कदाचन कैश्चिच्च होलजिङ्गरप्रभृतिभिः शारीरिकगुणचेष्टादिसहिष्णुताऽध्यव-सायानां परीक्षणमपि सुसम्पादितम्। तेषां परीक्षणादुपलब्धनिष्कर्षान् वयं निम्नलिखिततालिकया प्रदर्शयामः।

पारिवारिकसारूप्यानुमापनात्मकबुद्धिपरीक्षणे बुद्धिलब्धाङ्कानुबन्धगुणकप्रदर्शिका[2] तालिका[3]

सम्बन्धप्रकारः (क्रमागतः)	बुद्धिलब्धाङ्कानुबन्धगुणकम्
यमलाः	०.९०
सहोत्पन्ना भ्रातरो भगिन्यो वा	०.७०
सहोत्पन्ने भ्रातृभगिन्यौ (लिङ्गभेदान्वितौ)	०.५६
भ्रातरो भगिन्यः (अयमलाः समानपितृकाः)	०.५०
पितरौ बालकश्च	०.३१
पितृव्योत्पन्ना भ्रातरः[4]	०.२७
पितामहीपितामहौ पौत्रीपौत्राश्च	०.१६
असम्बद्धा बालकाः	०.००

१. तुलनार्थम्—Aptitude in Intellijence.

२. तुलनार्थम्—Co-efficient of correlation. (अनुबन्धगुणकः)

३. द्रष्टव्यम्—A. N. Wingfield, "Twins and Orphans, the Inheritance of Intelligence."

४. तुलनार्थम्—(Dent, 1928, edition, page 106)

ननु किमस्ति ह्यनुबन्धगुणकं नाम ? कस्मिन्नपि कारणसङ्घाते काश्चन परिवर्तनीयाः परिस्थितयो भवन्ति । द्वयोः परिवर्त्यपरिस्थित्योर्मध्ये या सम्बन्धस्य मात्रा भवति साऽनुबन्धगुणकेन संसूच्यते । उदाहरणत उपर्युक्तायां तालिकायामसम्बद्धबालकेषु कोऽपि सारूप्यसम्बन्धो नावतिष्ठते । अपरञ्च द्वयोर्यमलयोर्मध्येऽत्यधिकं सादृश्यं भवतीति सूच्यते तदनुबन्धगुणकेन । सुतरां स्पष्टोऽयं निर्णयो जायते यद्धि यमलः स्वभ्रातरं नितान्तमनुहरति । कस्यचिदेकस्य कार्यं दृष्ट्वाऽन्यस्याऽपि कार्यं वक्तुमनुमातुं वा शक्यतेऽनायासेन । तस्मात् किञ्चिन्न्यूनमस्ति सादृश्यं सहोत्पन्नविभिन्न-कमलनालयोर्भ्रात्रोः (विपरीतलिङ्गिनोः प्रायः) । अत एव सिद्धं यद्धि वंशानुक्रमगुणसंक्रमणमेव बुद्धिं चेष्टामयीः क्रियाः शरीराकृतिं चाभिनिर्वर्तयतीति ।

२३. दत्तकपुत्रेषु वातावरणप्रभावः

ननु यदि वातावरणमेव सर्वोपरि निर्णायकं मानवस्वभावाचरणयोः, यथा व्यवहारवादिनो मन्यन्ते, तर्हि किं दत्तकपुत्रा अपि गृहीतपितॄणामाचरणान्यनुहरन्ति न वेति ? अस्य प्रश्नस्य समाधानं श्रीमत्या वर्कस्महाभागायाः[1] प्रयोगेण सम्पन्नम् । सा हि स्टैनफोर्ड-विश्वविद्यालयस्य प्रख्यातमनोविज्ञानविदुषी । तया २१४बालकानामितिवृत्तानि सङ्कलितानि, ये वास्तविकपितृभ्यः प्रायो मासत्रयानन्तरं वियुक्ताः सञ्जाताः, तदनन्तरञ्च दत्तकपुत्रत्वेन सम्भ्रान्तपरिवारेषु स्वीकृता जाताः । तेषां बालकानां यदा ते पञ्चवर्षैकादशवर्षयोर्मध्य एवासन्, बुद्धिपरीक्षणेनेदं तथ्यं प्रमाणीभूतं यत्ते मनागेव स्वीकृतपितॄननुकुर्वन्ति, दत्तकपुत्रपित्रोः सादृश्यं किञ्चिदेवाऽस्ति । अपरथा स्वीये गृहे सम्भृता बालकाः स्वपितृभिः सार्धमनल्पं दृश्यं सादृश्यमावहन्ति स्म इति । अतो वंशानुक्रमसम्प्राप्तगुणा बुद्धिं वातावरणापेक्षयाऽधिकतरं प्रभावयन्तीति निश्चीयते । सा तु डिण्डिमघोषेण निर्णीतवती यद्धि वंशपरम्पराया वातावरणाऽपेक्षया चतुर्गुणं पञ्चगुणं वाऽधिकः प्रभावः सञ्जायते मानवानां विभेदनिर्णायकबुद्धिपरीक्षणेष्विति ।

२४. वन्यपशुसम्भृतबालकानामध्ययनम्

ननु ये बालकाः पशुभिर्वने परिपालिताः, किं ते पुनर्वातावरणपरिवर्तनेन परिवर्तयितुं शक्यन्ते ? किं तेषां शिक्षणादिकं यथेच्छपरिवर्तनेन सम्भवति ? वन्यपशुपरिपोषितबालकाना-मितिवृत्तमद्यावधि मनोवैज्ञानिकानां तत्त्वावधाने नाधिकं गवेषितम् । यत्किञ्चित् सम्प्राप्तं संक्षेपेण प्रस्तूयते, वातावरणप्रभावो येनाकलयितुं सम्भवेत् । १८५६ वैक्रमाब्दे दक्षिणफ्रांसदेशस्थादवीरोन-नामकाद् वनात् केचन आखेटिनो मृगयाऽवसरे कञ्चन वन्यबालकमितस्ततो भ्रमन्तमपश्यन् । स एकादशवर्षीयः प्रतिभाति स्म । पशुवदेव स स्वजीविकां कन्दादिभ्यः प्राप्तवान् । स तैराखेटिभिः पाशैर्निबध्य पेरिसनगरं समानीतः । तत्र स डाक्टरजीनइटार्डमहाशयस्य संरक्षणे निक्षिप्तः । स तमसभ्यं सभ्यीकर्तुमनेकविधान् प्रयत्नानारब्धवान् । तस्य शिक्षणं नैराश्यजनकमेव प्रतीयते स्म । बालकोऽपि मन्दबुद्धिरिव प्रतिभाति स्म । तस्य संवेदनशक्तिरपि मन्दैवासीत् । कदाचन स भृशं स्पन्दते स्म मूर्च्छित इव । शरीरकम्पनमपि भृशमकरोत् । केवलानि कानिचिद् हिङ्कृतान्येव[2] शूकरवत् कृतवान् । नहि तेन सामाजिकव्यवहारस्य निरीक्षणस्य चित्तैकाग्रताया

---

१. तुलनार्थम्—Barbara S. Burks.

२. तुलनार्थम्—Occasional grunts.

वा किमपि चिह्नं प्रदर्शितम् । इटार्डमहाभागस्य शब्देषु 'तस्य निखिलं जीवनं पूर्णतः पशुजीवनाभिन्नमेवासीत्' इति[१] ।

पूर्णं पञ्चवर्षाणि यावत् स हि खलु महाभागो दिव्याध्यवसायेन महता आयासेन च तं शिक्षितवान्, येन स संस्कारसम्पन्नो नागरिको भवेत् । तस्य भेदपरिचयात्मिका विवेकशक्तिः स्तोकं वर्धिता । स 'विक्टर' इति स्वनामसम्बोधने प्रत्युत्तरमपि अबुध्यत् । एवमेव केषाञ्चिदतिसरलशब्दानामुच्चारणं पठनञ्चाप्यकरोत् । तस्य सर्वोत्तमबोधो 'लैट' इति[२] दुग्धपर्यायवाचकशब्दज्ञानमेवासीत् । एतस्य शब्दस्य वर्णानपि स क्रमात् संयोजयितुं प्राभवत् । इटार्डं प्रति तस्य प्रगाढं प्रेमापि समवर्धत । किन्तु तेन सामान्यबालकानामिव व्यवहाराद्याचरणं नैव गृहीतम् ।

अस्तु तावत् सर्वसमर्थवातावरणेन तस्मिन् शुभसंस्काराधानं केन कारणेन नैव सम्पन्नम् ? वक्तुं खल्विदं शक्यते यद्धि स जन्मत एव मन्दबुद्धिरासीदिति । अर्थात् तस्य वंशानुक्रमगुणसंक्रमणमेव दुष्टमासीदत एव वातावरणमपि तस्मिन् सामाजिकसभ्यतासंस्कारानाधातुं न प्राभवत् । एवं सम्प्राप्ते वयं ब्रूमः—नैतत्समीचीनं प्रतिभाति । यदि हि स मन्दबुद्धिरासीत् तर्हि तस्य वनेचरैः सह जीवतोऽपि वन्यवातावरणेन सह सामञ्जस्यस्थापनं कथं व्याख्येयम् ? सर्वैर्मनोवैज्ञानिकैरभिमतोऽयमेव बुद्धिसत्त्वस्य मानदण्डो यद्धि नवपरिस्थितावुपस्थितायां बुद्धिमान् प्राणी परिस्थित्याकलनपूर्वकमेव पूर्वार्जितज्ञानसाहाय्यमादाय साफल्येन जन्मजातविवेकशक्त्याचरतीति । यदि जन्मत एव मन्दबुद्धिः स आसीत्, कथं तर्हि वनेऽपि स्वजीवनसंरक्षणे सामञ्जस्यधारणे सफलतां प्रदर्शितवान् । अतोऽस्माभिरियमेव व्याख्या तस्योन्नेतुं शक्यते यद्धि प्रारम्भिकाणि कतिपयवर्षाणि शिक्षासंस्काररक्षमाणि तस्य विलक्षणवन्यवातावरण एवंप्रकारेण व्यतीतानि, येनोत्तरकालीनं सर्वं शिक्षणं मुधैव सिद्धम् । पैतृकगुणपारम्पर्यमुपयुक्तकालं हि खल्वपेक्षते । नह्याषाढे गोधूमान् इन्द्रसहस्रमपि वप्तुं शक्नोति । अतः शैशवकालीनवातावरणेन तस्य पैतृकगुणपारम्पर्यं सर्वथैव कुण्ठितम्, यथा भूर्जितो गोधूमो नह्यङ्कुरोत्पादिकां शक्तिं पूर्ववद् बिभर्त्ति ।

१९७७ वैक्रमाब्दे वङ्गदेशे कमला-अमले द्वे कन्यके वृकैः सह निवसन्त्यौ वनात्समाहृते आस्ताम् । इदं वृत्तं प्राग्विवृतं पालमहोदयेन[३] तदनन्तरञ्च श्रीजिङ्गमहाभागेन[४] स्वपुस्तके विवृतम् । इमे नामनी ते समाहरणानन्तरं प्राप्तवत्यौ । ज्येष्ठा बालिका नववर्षीया प्रतिभाति स्म । तस्या भगिन्यपरा द्विवर्षीया आसीत् । स्थानीयेऽनाथालये संरक्षिते ते श्रीयुतसिंहेन तस्य देव्या च[५] शिक्षिते । पूर्वं तु तयोराचरणं पशुवदेव नितान्तं प्रतीयते स्म । ते चतुर्भिः पदैरेव व्यचरेताम् । तयोरुपरिस्थानन्तु कदाचनैवाभवत् । तयोर्घ्राणशक्तिः श्रवणशक्तिश्चात्युत्कृष्टे आस्ताम् । कमला तु रात्रौ दिवसापेक्षया किञ्चिदधिकस्पष्टतरमपश्यत् । अनाथालयप्रवेशकाले तस्या यच्चित्रं चित्रितं तेन श्ववद्वा मार्जारवद्वा स्वरवाद्यमेकस्मात् पात्रादाहरती सा द्रष्टुं शक्यते । मांसमपक्वमपि खादति स्म । एकदा सा एकस्य जलपक्षिणोऽन्त्रकाण्यपि खादन्ती दृष्टा ।

१. तुलनार्थम्—"His whole life was a complete animal existence."
२. तुलनार्थम्—'Lait' milk.
३. तुलनार्थम्—Paul C. Squires.
४. तुलनार्थम्—Robert M. Zingg, an anthropologist.
५. तुलनार्थम्—Reverend J. A. M. Singh.

अमला तु कियत्कालानन्तरं पञ्चत्वं गता। किन्तु कमला नववर्षाणि यावत् जीविता आसीत्। सा वस्त्राणि धारयति स्म, स्थाल्याञ्च हस्तद्वयेन खादति स्म। सा स्थित्वा चरणद्वयेन गमनमपि शिक्षितवती, यद्यपि धावने सा हस्तद्वयमप्यवलम्ब्य चतुर्भिः पदैर्धावति स्म। क्रमशस्तया पाशविकप्रवृत्तयोऽपि परित्यक्ताः। बालकानां क्रीडास्वपि सा सहयोगमददात्। तेषां खेलाभ्यस्तस्या बहिष्कारस्तच्चेतो दुःखाकरोति स्म। सा पत्रवहनं शिशुपालनं शतपरिमितशब्दानां प्रयोगादीनि कार्याण्यपि कृतवती। तयोत्तरदायित्वं स्वावलम्बित्वं क्रियाशीलत्वञ्चापि प्रदर्शितम्। किं बहुना, तया मानवजीवनयापनविधिरेवाङ्गीकृतेति। महाखेदास्पदं खल्विदं यतो हि मनोवैज्ञानिकास्तस्या बालिकायाः परीक्षणाय नैवाहूताः। श्रीमती-श्रीयुतसिंहमहोदयाभ्यां प्रदत्तं विवेचनं सविस्तरं द्वाविंशतिचित्रोपोद्बलितं सदपि वैज्ञानिकं न प्रतिभाति। श्रीजिङ्गमहोदयेन तस्य निखिलवृत्तान्तस्याविकलमुद्धरणं स्वकीये पुस्तके[1] उपनिबद्धम्।

सुतरां वन्यपशुपरिवर्धितानामेतेषां बालकानामितिवृत्तानुशीलनेन किमस्त्यनुमेयम्? यद्यपि सविस्तरमितिवृत्तं नैवोपलभ्यते, यथा समाहरणकाले तेषां व्यवहारः कीदृश आसीत्? शिक्षणे च तेषां का शिक्षाशैली प्रतिपदमाश्रिता? कियती वा शिक्षणे क्रमशः सफलता सम्प्राप्तेति, तथापि सम्प्राप्तवृत्तान्तं यद् विवृणोति तत्त्वेतदेव यद्धि वन्यपशुसाहचर्ये वन्यबालका अपि काञ्चिद् गतिं तत्साधनं वा विशिष्टामव्याकृताञ्च ध्वनिमन्यांश्च कतिपयान् वातावरणानुकूलप्रतिक्रियात्मकव्यवहारानवाप्तुं शक्नुवन्ति। नहि तदा भाषाप्रयोगः सामाजिकाचारव्यवहारो वा विचारशैली वा तैरुन्नेतुं शक्यते। वन्यबालकानां शिक्षणं नह्यसम्भाव्यम्, किन्तु वन्यजीवनावधि यावानधिको भवेत् तावत्यधिकैव तेषां शिक्षा दुःसाध्या भविष्यति, तद्पेक्ष्यैव तेषां सामान्यव्यक्तिजीवनधारणमपि दुष्करमेव भवति। मानवीयव्यक्तित्वग्रहणाय वंशानुक्रमोपलब्धगुणजातस्यापि शिशोः सामाजिकवातावरणावाप्तिस्तु तदभिव्यक्तये नितरामपरिहार्या। वंशपारम्पर्याभिव्यक्तौ वातावरणजन्यप्रभावो नह्युपेक्षणीयः।

२५. चरकसुश्रुतादीनां मतम्

वयमधुना संक्षेपतोऽग्निवेशात्रेयधन्वन्तर्यादिमहर्षीणामार्षं मतम्, यथा चरकसुश्रुतादिभिरुपन्यस्तम्, विवृणुमः। तेषामध्ययनमस्मिन् विषये यावत् सूक्ष्मतरमासीत् तावद् वयं नह्यद्यापि पारयामहे। तेषां प्रणाली सर्वथैव वैज्ञानिकी वस्तुतन्त्रात्मिका आसीत्। अतः स्थाने इदं यद् वयं तेषां मतान्यत्र विचारयामः।

(क) वंशानुक्रमाय निर्धारणं कथं सम्भवति? पूर्वमस्माभिर्नैतद् विचारितम्। तथा हि सुश्रुतसंहितायाम्—

आहाराचारचेष्टाभिर्यादृशीभिः समन्वितौ।
स्त्रीपुंसौ समुपेयातां तयोः पुत्रोऽपि तादृशः[2] ॥

अतः पित्रोराहाराचारादयो नवजातशिशोर्वंशानुगतगुणपारम्पर्यमभिव्यञ्जयन्ति।

(ख) स्त्रिया मूसास्थानीयायाः कानिचित् कर्माण्यपि नवजातशिशो रूपवैभिन्न्यमावहन्ति। नैतदिदानीं यावत् पाश्चात्त्यैरनुसन्धानपदवीं नीतम्। उक्तं हि सुश्रुतसंहितायाम्—

---

१. द्रष्टव्यम्—Robert M. Zingg, 'Wolf-childien and feral man."

२. द्रष्टव्या—सुश्रुतसंहिता, शारीरस्थानम्—२।४६ पृ० २३४ नि० सा० प्रे०।

पूर्वं पश्येदृतुस्नाता यादृशं नरमङ्गना ।
तादृशं जनयेत् पुत्रं भर्तारं दर्शयेदतः[1] ॥

मैण्डेलवादस्य प्रागुक्तरीत्या वनस्पत्युत्पादने बहवः सफलाः प्रयोगा व्यवहृताः । वैज्ञानिका मानवप्रसूतिप्रयोगेषु तावत् साफल्यं नैवाप्नुवन्तः, परिस्थितिजाटिल्यनियन्त्रणदुःसाध्यत्वात् । सुश्रुतमतस्यैतस्य परीक्षणमपि विधेयमेव । अयं विषयः पण्डितप्रवरैः श्रीरघुनाथशर्मभिः सारस्वती-सुषमायां गर्भे गुणदोषसंक्रमणविमर्शनामके निबन्धे बहुधा प्रपञ्चितः[2] ।

(ग) यत्तु पूर्वमस्माभिरर्वाचीनं मतमुपन्यस्तं तत्सर्वं रसजं रासायनिकक्रियोत्पन्नमेव गर्भं साधयति । रसजत्वमात्रोद्भावकं मतं भरद्वाजनिराकृतं महर्षिरात्रेयोऽपि केवलमंशत एव स्वीकरोति । महर्ष्यात्रेयमते तु "मातृजश्चायं गर्भः पितृजश्चात्मजश्च सात्म्यजश्च रसजश्चास्ति च सत्त्वमौपपादुकमिति होवाच भगवानात्रेयः ।" चक्रदत्तेन[3] औपपादुकपदमेवं व्याख्यातम्—"औप-पादुकमित्यात्मनः शरीरान्तरसम्बन्धोत्पादकम्" इति । एवं षट् कारणानि गर्भस्य भवन्ति । महर्षिरात्रेय एतान्येवं विशिनष्टि[4]—"सर्वेभ्य एभ्यो भावेभ्यः समुदितेभ्योऽभिनिर्वर्तते गर्भः" इति ।

(१) मातृजश्चायं गर्भः—यानि चास्य मातृतः सम्भवतः सम्भवन्ति तान्यनुव्याख्यास्यामः । तद्यथा—त्वक् च लोहितं च मांसं च मेदश्च नाभिश्च हृदयं च क्लोम च यकृच्च प्लीहा च वृक्कौ च बस्तिश्च पुरीषाधानं चामाशयश्च पक्वाशयश्चोत्तरगुदं चाधरगुदं च क्षुद्रान्त्रं च स्थूलान्त्रं च वपा च वपावहनं चेति ।"

अस्मिन् विषये सुश्रुतमतं त्विदं सुश्रुतसंहितायाम्[5]—

"मांसशोणितमेदोमज्जाहृन्नाभियकृत्प्लीहान्त्रगुदप्रभृतीनि मृदूनि मातृ-जानि" इति ।

सर्वतन्त्रस्वतन्त्रा आचार्यवाचस्पतिमिश्रा अपि 'सूक्ष्मा मातापितृजाः' इति सांख्यकारिकांशव्याख्यानावसरे[6] विवृतवन्तः । तद्यथा—"एतच्छरीरं षाट्-कौशिकमिति गीयते । तत्र त्रीणि लोमलोहितमांसानि मातृतः, पितृतस्तु त्रीणि स्नाय्वस्थिमज्जान इति षट् कोशाः " इति । एतस्मादपि मातृजो भागोऽवसेयः ।

(२) "पितृजश्चायं गर्भः—नहि पितुर्ऋते गर्भोत्पत्तिः स्यात्, न च जन्म जरायु-जानाम् । यानि तु खल्वस्य पितृजानि, यानि चास्य पितृतः सम्भवतः सम्भवन्ति, तान्यनुव्याख्यास्यामः । तद्यथा—केशश्मश्रुनखलोमदन्तास्थिसिरास्नायुधमन्यः शुक्रं चेति[7] ।"

---

१. द्रष्टव्यम्—सुश्रुतसंहितायां शारीरस्थानम्—२।२६ पृ० २६१, नि० सा० प्रे०
२. द्रष्टव्या—सारस्वती सुषमा, अष्टमवर्षे, प्रथमोऽङ्कः, २०१० वै०
३. द्रष्टव्यम्—चरक० शारीर० ३।३, पृ० ३४८, नि० सा० प्रे०
४. द्रष्टव्यम्—चरक० शारीर० ३।१२, पृ० ३५०
५. द्रष्टव्यम्—सुश्रुतसंहिता, शारीर० ३।३३, पृ० २६८, नि० सा० प्रे०
६. द्रष्टव्या—सांख्यतत्त्वकौमुदी—कारिका ३९
७. द्रष्टव्यम्—चरक० शारीर० ३।१३ पृ० ३५०

अत्र वाचस्पतिमतं तूपरि वर्णितमेव। सुश्रुतमते तु 'गर्भस्य केशश्मश्रुलोमास्थिनखदन्तसिरास्नायुधमनीरेतःप्रभृतीनि स्थिराणि पितृजानि।' इति।[1] स्मरणीयमत्र यत्सुश्रुतमताद्भिन्नैवेयमुक्तिर्वाचस्पतिमिश्राणां यद्धि लोमानि मातृजानि मज्जा च पितृजेति।

(३) "आत्मजश्चायं गर्भः—गर्भात्मा ह्यन्तरात्मा यः, तं जीव इत्याचक्षते शाश्वतमरुजमजरममरमक्षयमभेद्यमच्छेद्यमलोड्यं विश्वरूपं विश्वकर्माणमव्यक्तमनादिमनिधनमक्षरमपि, स गर्भाशयमनुप्रविश्य शुक्रशोणिताभ्यां गर्भमेत्य गर्भत्वेन जनयत्यात्मनात्मानम्। आत्मसंज्ञा हि गर्भे। तस्य पुनरात्मनो जन्मानादित्वान्नोपपद्यते, तस्मादजात एवायमजातं गर्भं जनयति, जातोऽप्यजातं च गर्भं जनयति। स चैव गर्भः कालान्तरेण बाल्युवस्थविरभावानवाप्नोति, स यस्यां यस्यामवस्थायां वर्तते तस्यां तस्यां जातो भवति, या त्वस्य पुरस्कृता तस्यां जनिष्यमाणश्च। तस्मात् स एव जातश्चाजातश्च युगपद् भवति, तस्मिँश्चैतदुभयं युगपत् सम्भवति जातत्वं जनिष्यमाणत्वं च। स च जातो जन्यते। स चैवानागतेष्ववस्थान्तरेष्वजातो जनयत्यात्मनात्मानम्, सतो ह्यवस्थान्तरगमनमात्रमेव हि जन्म चोच्यते, तत्र तत्र वयसि तस्यां तस्यामवस्थायां यथासतामेव शुक्रशोणितजीवानां प्राक् संयोगाद्गर्भत्वं न भवति, तच्च संयोगाद् भवति। यथा सतस्तस्यैव च पुरुषस्य प्रागपत्यात् पितृत्वं न भवति, तच्चापत्याद् भवति। तथा सतस्तस्यैव गर्भस्य तस्यां तस्यामवस्थायां जातत्वमजातत्वं चोच्यते।"

अग्रे भगवानात्रेयो विविधशक्तीनां न्यूनत्वमाधिक्यञ्च दैवायत्तं कर्मविपाकायत्तञ्चेति स्फोरयति। तद्यथा—"न तु खलु गर्भस्थेन मातुर्न पितुर्नात्मनः सर्वभावेषु यथेष्टकारित्वञ्चास्ति। ते किञ्चित् स्ववशात् कुर्वन्ति किञ्चित् कर्मवशात्, क्वचिच्चैषां करणशक्तेर्भवति, क्वचिन्न भवति। यत्र सत्त्वादिकरणसम्पत्तत्र यथाबलमेव यथेष्टकारित्वमतोऽन्यथा विपर्ययः। न च करणदोषादकारणमात्मा सम्भवति गर्भजनने, दृष्टं चेष्टा योनिरैश्वर्यं मोक्षश्चात्मविद्भिरात्मायत्तम्, नह्यन्यः सुखदुःखयोः कर्त्ता, न वान्यतो गर्भो जायते जायमानः, न चाङ्कुरोत्पत्तिरबीजात्।

"यानि तु खल्वस्य गर्भस्यात्मजानि, यानि चास्यात्मतः सम्भवतः सम्भवन्ति, तान्यनुव्याख्यास्यामः। तद्यथा—तासु तासु योनिषूत्पत्तिरायुरात्मज्ञानं मन इन्द्रियाणि प्राणापानौ प्रेरणं धारणमाकृतिस्वरविशेषाः सुखदुःखे इच्छाद्वेषौ चेतना धृतिर्बुद्धिः स्मृतिरहङ्कारः प्रयत्नश्चेति[2]।"

अस्मिन् विषये सुश्रुतेनोक्तं मतमेवम्प्रकारकमस्ति। तद्यथा—"इन्द्रियाणि ज्ञानं विज्ञानमायुः सुखदुःखादिकं चात्मजानि" इति।[3]

---

१. द्रष्टव्यम्—सुश्रुत० पूर्ववत्

२—द्रष्टव्यम्—चरकसंहिता, शारीर०—३।१४-१६ पृष्ठ ३५०-५१

३—द्रष्टव्यम्—सुश्रुत संहिता—पूर्ववत्

महर्षिपतञ्जलिना योगसूत्रेऽपि पूर्वजन्मायत्तमास्मायत्तमिति वा—जात्यायुर्भोगादिकमुल्लिखितम्। तद्यथा—"सति मूले तद्विपाको जात्यायुर्भोगाः" इति।[1]

अर्वाचीनं मनोविज्ञानमद्यावधि शैशव एव वर्तते, अतस्तेन साम्परायिकतत्त्वानुसन्धानप्रवृत्तिः प्रायो नावलम्बिता। अत उपर्युक्तं मतं तैन नहि विचारितम्। मनोवैज्ञानिकानामर्वाचीनयुगे मानवव्यवहारस्य प्रत्यक्षगोचरस्य गवेषणायां रुचिर्मुख्यतः सँल्लक्ष्यते। आत्मनः साम्परायिकजीवनं कर्मवादादिभावास्तैर्दर्शनकुक्षौ प्रक्षिप्यन्ते। यतः प्रयोगनिरीक्षणपरं हि मनोविज्ञानम्, वस्तुतन्त्रात्मकविज्ञानत्वात्। मन्ये प्रौढिङ्गते सत्यर्वाचीने मनोविज्ञाने सर्वा एताः समस्या विचारपदवीमारोक्ष्यन्ति।

(४) "सात्म्यजश्चायं गर्भः। नह्यसात्म्यसेवित्वमन्तरेण स्त्रीपुरुषयोर्वन्ध्यात्वमस्ति गर्भे वाप्यनिष्टो भावः। यावत् खल्वसात्म्यसेविनां स्त्रीपुरुषाणां त्रयो दोषाः प्रकुपिताः शरीरमुपसर्पन्तो न शुक्रशोणितगर्भाशयोपघातायोपपद्यन्ते, तावत् समर्था गर्भजननाय भवन्ति। सात्म्यसेविनां पुनः स्त्रीपुरुषाणामनुपहतशुक्रशोणितगर्भाशयानामृतुकाले सन्निपतितानां जीवस्यानवक्रमणाद्गर्भा न प्रादुर्भवन्ति। नहि केवलं सात्म्यज एवायं गर्भः, समुदायोऽत्र कारणमुच्यते। यानि तु खल्वस्य गर्भस्य सात्म्यजानि, यानि चास्य सात्म्यतः सम्भवतः सम्भवन्ति, तान्यनुव्याख्यास्यामः। तद्यथा—'आरोग्यमनालस्यमलोलुपत्वमिन्द्रियप्रसादः स्वरवर्णबीजसम्पत् प्रहर्षभूयस्त्वञ्च' इति।"[2]

सुश्रुतमते तु "वीर्यमारोग्यं बलवर्णौ मेधा च सात्म्यजानि" इति।

(५) "रसजश्चायं गर्भः—नहि रसादृते मातुः प्राणयात्राऽपि स्यात्, किं पुनर्गर्भजन्म। यानि खल्वस्य गर्भस्य रसजानि, यानि चास्य रसतः सम्भवतः सम्भवन्ति, तान्यनुव्याख्यास्यामः। तद्यथा—'शरीरस्याभिनिर्वृत्तिरभिवृद्धिः प्राणानुबन्धस्तृप्तिः पुष्टिरुत्साहश्च' इति" ।[2]

सुश्रुतमते तु—"शरीरोपचयो बलं वर्णः स्थितिर्हानिश्च रसजानि" इति।[3]

(६) अस्ति खल्वपि सत्त्वमुपपादुकम्, यज्जीवस्पृक् शरीरेणाभिसम्बध्नाति। यस्मिन्नपगमनपुरस्कृते शीलमस्य व्यावर्तते, भक्तिर्विपर्यस्यते, सर्वेन्द्रियाण्युपतप्यन्ते, बलं हीयते, व्याधय आप्यायन्ते, यस्माद्धीनः प्राणान् जहाति, यदिन्द्रियाणामभिग्राहकं मन इत्यभिधीयते।

"तत्त्रिविधमाख्यायते—शुद्धं राजसं तामसं चेति। येनास्य मनो भूयिष्ठं तेन द्वितीयायां जातौ सम्प्रयोगो भवति। यदा तु तेनैव शुद्धेन संयुज्यते, तदा जातेरतिक्रान्ताया अपि स्मरति। स्मार्तं हि ज्ञानमात्मनस्तस्यैव मनसोऽनुबन्धादनुवर्तते, यस्याऽनुवृत्तिं पुरस्कृत्य पुरुषो 'जातिस्मरः' इत्युच्यते।" इति[4]।

---

१. द्रष्टव्यम्—योगसूत्रम्—२।१३

२. द्रष्टव्या—चरकसंहिता, शारीर० ३।१७-१८ पृ० ३५२

३. द्रष्टव्या—सुश्रुत०—पूर्ववत्

४. द्रष्टव्या—चरकसंहिता, शारीर० ३।१३ पृ० ३५३

सुश्रुतमतेऽपि "यद् गुणं चाभीक्ष्णं पुरुषमनुवर्तते, तद् गुणमेवोपदिशन्ति बाहुल्यानुशयात्[1] ।"

विशेषत उल्लेखनीयमस्मिन् विषयेऽस्तीदं यन्महर्षिणा कारणसमुदायो वंशानुक्रमकर्मप्रयुक्तवातावरणादिकसमूहरूप एवाङ्गीकृतः, न तु कोऽप्यन्यतमः। तेषां यो यो विशेषः सोऽपि विवृतः ।

(घ) पाश्चात्त्या अपि गर्भस्य स्त्रीत्वपुंस्त्वनिर्धारणं शुक्रकोषाणुडिम्बकोषाणुगतजिनक्रमजमादिव्यपेक्षमिति मन्यन्ते; किन्तु नहि तथा सुश्रुतादिमतम् । तथा ह्युक्तं सुश्रुतसंहितायामस्य शुक्रशोणितमात्राधीनत्वम्—तत्र शुक्रबाहुल्यात् पुमान्, आर्तवबाहुल्यात्स्त्री, साम्यादुभयोर्नपुंसकमिति[2]। एतदपि पर्यालोचनमपेक्षते । अस्ति हि किमिदं दिनादिक्रमाधीनम् ? तद्यथा सुश्रुतसंहितायाम्—

युग्मेषु तु पुमान् प्रोक्तो दिवसेष्वन्यथाऽबला । इति ।[3]

नहि शुक्रकोषाणुके एकस्मिन् दिने जिनसंख्या क्रमजमसंख्या वा वर्धते, अपरस्मिन् वा परिहीयते । एतत्सर्वं विचक्षणैरनुसन्धेयम् । स्मरणीयमत्र यत्प्रयोगशतानन्तरमेव परमश्रद्धेयमार्षं मतं निराकर्तुं शक्यते । विगतसहस्रपरिमिते यवनाधिपत्येऽस्माकमनुसन्धानपरा वैज्ञानिकी प्रणाली व्यवहिता । सततप्रयत्नैरेवाऽस्माभिः साम्प्रतमपि गवेषणं विधेयमेव । श्रुतिस्तु स्वयमेवानुसन्धानपरं प्रोत्साहनं प्रदत्ते । तथाहि—

यो जागार तमृचः कामयन्ते
यो जागार तमु सामानि यन्ति ।
यो जागार तमयं सोम आह
तवाहमिति सख्ये न्योकाः ॥[4]

विज्ञानं प्रगतिशीलं भवति । जीवितायां विज्ञानचिन्तनायामन्धश्रद्धायाः किमपि स्थानं नास्ति । अस्माकमृषिभिः कार्ऽपि त्रुटिर्नैव कृतेत्यभिनिवेशस्तु वैज्ञानिकानुसन्धानौत्सुक्यवन्ध्यात्वमेवाभिव्यनक्ति । अतः सिद्धा प्रयोगपरीक्षणानामद्यापि महत्यावश्यकता ।

२६. उपसंहारः

अस्माभिर्वंशपरम्परावातावरणप्रभावसमुद्भूतोऽयं जटिलः प्रश्नः प्राचां प्रतीच्यानां मतान्यवलम्ब्य सम्यक्तया किन्तु संक्षेपतो व्याख्यातः । विस्तरतस्तु तत्तदाकरग्रन्थेभ्य एवोन्नेयः । अस्माभिः प्राच्यप्रतीच्यमतानां पार्थक्यमप्यरुन्धतीन्यायेन निदर्शितम् । अन्येषामपि केषाञ्चित् कैलोगप्रभृतिविदुषां[5] प्रयोगानां स्थलसङ्कोचभयान्नहि विवरणमस्माभिः प्रस्तुतम् । अयं प्रश्नोऽस्माभिर्बहुधा पर्यालोचितः । सुतरां कं निष्कर्षं वयं लब्धवन्तः ? वंशानुक्रमगुणसम्पद् वातावरणञ्च द्वे अनुपूरके परस्परं मन्तव्ये । नह्येकं विहायाऽन्यः प्रभवति सामाजिकाचारविचारसम्पन्नमानवस्य नागरिकाख्यस्य निर्माणे । सुनिश्चलं खलु हि भवति वंशानुगतगुणपारम्पर्यम् ;

---

१. द्रष्टव्या—सुश्रुतसंहिता, शारीर०, ८
२. द्रष्टव्या—सुश्रुत० शारीर० ३।५, पृ० २१६
३. द्रष्टव्या—सुश्रुत० शारीर० ३।१२, पृ० २१६
४. द्रष्टव्यः—ऋग्वेदः ५।४४।१४ (न्योकाः=गृहे निवसन्)
५. तुलनार्थम्—Prof. winthrop N. Kellog of Indiana niversity.

प्राणिविज्ञानाभिमतशुक्रडिम्बकोषाणुकप्रभवनियतत्वात् । नहि वातावरणं तन्निश्चितसीमानमुल्लङ्घयितुं क्षमते । यस्य बुद्धिमान्द्यं वंशपारम्पर्यायत्तम् । नहि तत्प्रतिभाशालित्वे परिणमयितुं वातावरणं शक्रसहस्रप्रयुक्तमपि शक्नोति; किन्तु वंशानुगतगुणपारम्पर्यमपि स्वानुकूलवातावरणं देशकालादिकमपेक्ष्यैवाऽभिव्यक्तिं लभते । नूनमनुपयुक्तवातावरणे प्राप्ते कोऽपि महाकविः कालिदासोऽसँल्लक्षित एव पञ्चत्वमवाप्स्यते । न जान एवं म्रियमाणानां दुर्भाग्यप्रतिभाशालिबालकानां कियती संख्याऽसौम्यवातावरणवशात् सुरभिविरहितैव विनश्यति । रुडोल्फमहोदयेन (१६७७ वै०) सम्यगुक्तम्—"वातावरणस्य शक्तिमत्त्वं नहि तादृशं यादृशं जनाः मन्यन्ते । बालकस्य शक्तयस्तु स्वपितॄणां पारम्पर्योन्नीता जायन्ते । यद् वातावरणं कर्तुमर्हति तत्तु तासां वंशपारम्पर्यागतशक्तीनां सम्यगभिव्यञ्जनायावसरानुकूल्यप्रदानमेव । नहीदं नूतनाः शक्तीर्वा शक्त्यतिरेकविशेषं वोत्पादयितुं क्षमते ।" इति [1] । किन्तु यदि कोऽपि मानवो वंशानुक्रमपारम्पर्यं नात्यधिकं भजते, तदर्थं तु सामाजिकसेवाकार्यमधिकतरमपेक्ष्यते । सामाजिकसंस्थाभ्यो नहि शक्तिमतामेव प्रशिक्षणं प्रोत्साहनमपेक्ष्यतेऽपि स्वल्पशक्तिमतामपि । थार्नडाइकमहोदयेन स्वकीयग्रन्थे शिक्षामनोविज्ञाननामके सुष्ठुविदमुक्तम्—"यदि मानवसमाजेन तथ्यमिदं ज्ञातं भवेद् यद्धि वंशानुक्रमेण कांश्चन मानवान् सुलभमुत्कृष्टपारम्पर्यं सम्प्रापितमन्यांश्च न तथा, तर्हि वयं शिक्षणे द्विगुणतरसाफल्यं लभामहे ।···मानवार्थं मानवस्य वस्तुभूते कार्ये, वातावरणपरिष्कारद्वाराऽधिकाधिकसाफल्यप्राप्तिरूपे, वंशानुक्रमपारम्पर्यं नहि मार्गं रुणद्धि । किन्तु वातावरणप्रदत्तेभ्यः सामाजिकसुधारेभ्यः शिक्षाभ्यश्च लोकानां रुचिकरा आशा जन्यते, तद्विषये ···मानवजीवनसङ्घर्षे, यस्मिन् नह्यतिक्रमणमेव प्रयोजकं प्रत्युत कः कं पुरुषमतिक्रमत इति वंशानुक्रमपारम्पर्यमेव निर्णायकम् ।···यानि च पारितोषिकाणि शिक्षा कामयते तानि सर्वाणि शिक्षाशक्तिसीम्न्यन्तर्गतानि···सामाजिकसमुन्नत्यै वस्तुतोऽयमविशेषो यद्धि के परां कोटिं भजन्ते, के वा सर्वाधिकगुणार्जनं कुर्वन्तीति । सर्वजनहिताय यदस्ति महत्त्वान्वितं तत्तु एतदेव यत्सर्वोच्चं शिखरं स्पृहणीयं भवेत्, तच्च प्राप्त्यर्हमपि भवेत् ।" इति [2] ।

---

१. तुलनार्थम्—Rodolf pinter (1884—1942)

"The potency of environment is not nearly so great as commonly supposed.........A Child's abilities are datermined by his ancestors and all that environment can do is to give the opportunity for the devlopment of his potentialities it cannot create new powers or additional abilities.

२. तुलनार्थम्—Thorndike, Educational Psychology—

"We may even expect education will be doubly effeetive, once society recognises the advantages given to some and denied to others by heredity.......To the real work of man for man—the increase of achievement through the improvement of environment—the influence of heredity offers no barrier. But to the popular demamds form educa-

वंशानुक्रमस्त्वसंस्कृतां सामग्रीं प्रस्तौति, यस्याश्चायं मानवः प्रादुर्भवति। कथं केनांशेन वा तस्याः परिष्कारः क्रियते, सर्वमिदं वातावरणव्यपेक्षम्। रमणीयं वस्तु नूनं प्रकृष्टकलाकारस्य हस्ते रमणीयतरं सौन्दर्यं लभते। अनुत्कृष्टे च वस्तुनि नहि परिकल्पशतेनापि चरमं मनोहारित्वमभिव्यज्यते।

अस्माकं महर्षिभिरपि यदा वंशशुद्धिसंरक्षणेऽनुलोमविवाहादिनियमविधानैर्वर्णाश्रमव्यवस्थया चानवरतं प्रयत्न आदृतः, तदैव शिक्षाविधौ वंशानुक्रमपारम्पर्येण साकं वातावरणरूपशिक्षाया महत्त्वमपि तैरङ्गीकृतम्। सर्वोत्तरदायित्ववहने समर्थो नागरिकस्तदैव निष्पन्नो जायते यदा प्रशस्ता माता भवति, प्रशस्तः पिता, प्रशस्तश्च गुरुर्भवति। आम्नातं हि शतपथे तद्यथा—"मातृमान् पितृमानाचार्यवान् भवति।" अत्र 'आचार्य' इति निखिलवातारणसुलभशिक्षासामग्र्या उपलक्षणं बोद्धव्यम्। एवमेव पित्रोरभिजातपितॄणामप्यन्तर्भाव उन्नेयः।

ऋतुक्षेत्राम्बुबीजानां यदा प्राशस्त्यान्वितं साहचर्यं पुरुषप्रभवकारणं भवति, तदा कियती मानवसुलभा पुण्याशा पूर्यत इति प्रातःस्मरणीयेषु महर्षिप्रोक्तेषु वचनेष्वेवोपलभ्यते। तथा हि—

ध्रुवं चतुर्णां सान्निध्याद्गर्भः स्याद्विधिपूर्वकः।
ऋतुक्षेत्राम्बुबीजानां सामग्र्यादङ्कुरो यथा॥
एवं जाता रूपवन्तः सत्त्ववन्तश्चिरायुषः।
भवन्त्यृणस्य मोक्तारः सत्पुत्राः पुत्रिणो हिताः॥[१]

यथा हि ऋतुक्षेत्राम्बुबीजानां सामग्र्यादनुपघातादङ्कुरो जायते, कस्याप्येकस्याऽभावे नहि तस्य सम्भवः। एवंप्रकारेण चतुर्णामृतुक्षेत्राम्बुबीजानाम्, न त्वेकद्वित्रिसंख्याकानाम्, सान्निध्यात् संयोगादेव विधिपूर्वको यथेष्टो गर्भो जायते। "ऋतुरङ्गनाया रजःसमयः, क्षेत्रं गर्भाशयः, अम्बु पुनराहारपाकजो रसधातुः, बीजं स्त्रीपुरुषयोरार्तवशुक्रे" इति डल्हणः। एवंप्रकारेण वंशानुक्रमवातावरणयोः परस्पराश्लिष्टा ग्रन्थिरागर्भाधानमेव सँल्लक्ष्यते। विगतदशकत्रयानवरतमनुसन्धानमैकान्तिकं मतं वंशानुगतपारम्पर्यपक्षगतं किमुत वातावरणप्राधान्योपोद्बलकं नैव द्रढयति। निर्णायकप्रयोगावसरस्तु मनोवैज्ञानिकैरद्यापि प्रतीक्ष्यत एव।[२] अतस्तयोरनुपूरकत्वमेव मानवसंस्कृतिसमुन्नतिपरायणैः समादरणीयम्, येन शिक्षादिसमुन्नतिसाधनैः कल्याणवहराष्ट्रप्रदैः सर्वे स्वकीयां यथाकामं चरमोन्नतिमवाप्तुमुपयुक्तमवसरं निष्प्रत्यूहं लभेरन्निति।

इति अर्वाचीने मनोविज्ञाने वंशानुक्रमवातावरणप्रभावविवेचनीयस्तृतीयोऽध्यायः।

---

tion and social reforms it does..........In the actual race of life which is not so much to get ahead, as to get ahead of some body, the chief point determining factor is heredity.......But the prizes which education ought to seek are all within its power.......for the common good it is indifferent who is at the top, which men are achieving most. The important thing for the common good, for all men, is that the top should be high, that much should be achieved."

१. द्रष्टव्या—सुश्रुतसंहिता, शारीरस्थानम्, २।३३-३४

२. द्रष्टव्यम्—Anastasi, foundations of psychology, page 456

चतुर्थोऽध्यायः

सहजक्रियामूलप्रवृत्त्यादिविवेचनम्

१. ननु केयं सहजक्रिया नाम ?

अस्माभिर्नाडीतन्त्रस्य वंशानुक्रमवातावरणप्रभावस्य विवेचनं पूर्वमेव विस्तरतः सम्पादितम्। वयमधुना सहजक्रियास्वतन्त्रक्रियामूलप्रवृत्तिसामान्यप्रवृत्तीरनुव्याख्यास्यामः। नाडीतन्त्रविवेचनावसरेऽस्माभिः सहजक्रियायाः[१] प्रतिसंक्रमितक्रियाख्यायाः संक्षेपत उल्लेखनं कृतम्। वयं साम्प्रतं तामेव विशदीकरिष्यामः। अपि च, वंशानुक्रमप्रभाववर्णनावसरेऽस्माभिरुक्तं के के गुणाः प्रसूतौ वंशानुक्रमप्रभावात् संक्रामन्तीति प्रश्नस्य समाधानमुखेन हि शरीराकृतिविशेषचेष्टावहसांवेदनिकसंस्थानानि वंशपारम्पर्यायत्तानि भवन्तीति। या याश्चेष्टाः प्रवृत्तयो वा वंशपारम्पर्यायत्ता भवन्ति, यासां प्रभावो जन्मत एव सिद्धः, यासामुद्भवे च वातावरणप्रभावो नहि स्पष्टतः सँल्लक्ष्यते, तासामप्यत्र विवेचनं करिष्यते। तासु चेष्टासु हि मूलप्रवृत्तिसामान्यप्रवृत्तीनामन्तर्भावः क्रियते। अतो वयमस्मिन्नध्यायेऽनधीतक्रियाणां जन्मजातस्वरूपाणाञ्चतुर्विधानां सहजक्रिया-स्वतन्त्रक्रिया[२]-मूलप्रवृत्ति[३]-सामान्यप्रवृत्तीनां[४] व्याख्यानं करिष्यामः।

अर्वाचीने युगे मूलप्रवृत्तीनां स्वरूपावधारणे मनोवैज्ञानिकानां महान् बुद्धिभेदो दृश्यते। तन्मूलन्तु तृतीयेऽध्याये स्फोटितमेवाऽस्माभिर्यतो हि व्यवहारवादिनो वातावरणायत्तमेव सर्वं क्रियागुणजातं सामाजिकानुभवशिक्षाप्रभवमिति मन्यन्ते। अत एव मूलप्रवृत्तिस्वरूपमपि तैर्भृशमालोचितं विवादास्पदीभूतम्। केचन महान्तो मनोवैज्ञानिकाः, विशेषतोऽमेरिकादेशीयाः, मूलप्रवृत्तयोऽन्तर्निहितप्रेरणाः[५] किं वा प्राणिविज्ञानीया आवश्यकता[६] इति वदन्ति। ते तु मन्येऽल्पीयांस एव। प्रायो बहवो मनोवैज्ञानिका आक्सफोर्डविश्वविद्यालयीयप्राध्यापकप्रवरमैकडूगलमतमेवानुसरन्ति मूलप्रवृत्तीनां निरूपणविषये। अस्मानपि तन्मतमेव समीचीनतरं प्रतिभाति। अतो वयमपि तन्मतमवलम्ब्यैव मूलप्रवृत्तीर्व्याख्यास्यामः। यथास्थानं विविधमतानां निर्देशमपि करिष्याम एव।

---

१. तुलनार्थम्—Reflex action.

२. तुलनार्थम्—Autonomous action.

३. तुलनार्थम्—Instinct.

४. तुलनार्थम्—General Tendencies.

५. तुलनार्थम्—Inner impulse, or drive or incentive.

६. तुलनार्थम्—Biological need.

२. सहजक्रियास्वरूपम्

व्यवहाररूपप्रतिक्रियायाः सुसरलतमरूपं हि खलु सहजक्रिया प्रतिसंक्रमितक्रियाऽपरनामधेया। इयं प्रतिक्रिया सरलतमोत्तजेकजन्या। यत्किञ्चिदपि मनुष्ये प्रतिक्रियारूपं व्यवहारं जनयति, तदुत्तेजकम्। उत्तेजकं प्रायो बाह्यः पदार्थ एव। किन्तु जटिलमानसिकास्ववस्थासु प्रत्यया आन्तरविकारा वाऽप्युत्तेजकमिवाचरन्ति। सरलतममुत्तेजकमित्थम्भूतं भवति, यथा मशकदंशनं जानौ, किं वा प्रकाशातिरेक इति। सहजक्रिया अपि परस्परं भिद्यन्ते चैतन्यसंसर्गापेक्षया। सरलतमाः सहजक्रियाः, यथा नेत्रतारिकायाः संकोचनं विशदीभवनं वा, स्नायुसहजक्रियाः; यादृशासु स्तोकं चैतन्यं चैतन्याभाव इव वा सँल्लक्ष्यते। तासां सहजक्रियाणां जटिलतरास्तु चैतन्यान्विता एव कदाचनानुभूयन्ते; तद्यथा—कासः, जृम्भणम्, निष्ठीवनम्, क्षवथुः, शिशुक्रन्दनमिति।

स्काटलैण्डप्रदेशीयभिषग्वरमार्शलहालमहोदयेन[१] सर्वप्रथमं सहजक्रियायाः परिभाषा स्पष्टीकृता। स दृष्टवान् यद्धि शिरश्छेदानन्तरमपि पशवः पेशीचेष्टाः कर्तुं शक्नुवन्तीति। कथं हि तत्सम्भवतीत्यनुसन्दधानेन तेन सहजक्रिया एवं व्याख्याता— तथा हि चैतन्यानन्विता या क्रियां मस्तुलुङ्गाप्रवर्तिता सती सुषुम्णायत्ता सा सहजक्रियेति नाम। तदनन्तरं म्यूलरमहोदयेन स्वकीये ग्रन्थे[२] दादुरेषु प्रत्यक्षप्रयोगैर्निश्चित्य सहजक्रियाया नाडीतन्त्राभिमतपदावल्याः परिभाषा गुम्फिता। तथा हि केनाप्युत्तेजकेन जनितमिन्द्रियोत्तेजनं संज्ञावहनाडीभिः सुषुम्णामभिगच्छति, तत्रेदं चेष्टावाहिन्या नाड्या सह नाडीसम्बन्धद्वारेण[३] सम्बन्धमवाप्नुते, ततश्चेदं पेशीं प्रति गच्छति, यत्रेदं क्रियामुत्पादयति। म्यूलरमहोदयेन प्रदत्तेयं सुप्राञ्जला परिभाषा सहजक्रियायाः पूर्वोक्तसर्वव्याख्याभ्योऽतिरिच्यते स्म।

काश्चनैतासु जटिलतरासु सहजक्रियासु धारावाहिकसहजक्रियारूपं वहन्ति। यथा हि मृत्कीटस्य गतौ प्रथमपेशीजन्या सहजक्रिया द्वितीयपेशीजन्यसहजक्रियां प्रत्युत्तेजनां प्रदत्ते, द्वितीयपेशीजन्या सहजक्रिया तृतीयपेशीजन्यक्रियां प्रत्युत्तेजनां प्रदत्ते, तयोत्तेजनयैव तृतीया क्रियोत्पद्यते। अतो धारावाहिकसहजक्रियाया[४] एका क्रियाऽपरस्या क्रियाया उत्तेजिका भवति, अपरा क्रियाऽप्येवमेव अन्यस्यास्तृतीयाया उत्तेजिका भवति। मानवीयक्रियासु धारावाहिकसहजक्रियाणामुदाहरणं शिशुभोजननिगलनक्रियायामनधीतरूपायामेवोपलभ्यते।

शैरिङ्गटनमहोदयेन[५] सहजक्रियाणां सम्बद्धसहजक्रिया विरोधिसहजक्रियाश्चैवं द्विविधो भेदोऽप्यङ्गीकृतः। सम्बन्धक्रियास्तु ता भवन्ति यास्वेका क्रियाऽपरां क्रियां संवर्धयति सरलीकरोति वा। विरोधिसहजक्रियास्तु ता भवन्ति यास्वेकाऽपरां क्रियां रुणद्धि ह्रासोन्मुखीं वा करोति। यथा शुनः पादैकस्याग्रगमनसमकालमेव पश्चिमपादसंकोचनं सञ्जायते स्वत एव।

---

१. तुलनार्थम्—Marshall holl, scottish doctor.

२. तुलनार्थम्—Johames muller's, "Hand-book of psysichology."

३. तुलनार्थम्—Reflex are.

४. तुलनार्थम्—Chain reflexes.

५. द्रष्टव्यम्—C. S. Sherrington, "Integrative action of the nervous system."

३. प्रतिनियता सहजक्रिया[1]

सहजक्रिया मूलतः केनाऽप्युत्तेजकेनोत्पाद्यते, यथा प्रकाशातिशयेन नेत्रतारिके संकुचतः, प्रकाशापगमे चैते प्रसरतो विशदीभवतो वा। यथा च भोजनमधुरसुगन्धेन घ्राणजप्रत्यक्षमात्रेण लालारसो जन्यते, भोजनस्वादेन वा। किन्तु कालान्तरेऽनुभवपरिपाकेनाऽन्येनाऽपि केनचित्तत्सम्बद्ध-वस्तुना सहजक्रियोत्पादनं सम्भवति। एवम्भूता सहजक्रिया 'प्रतिनियता सहजक्रिया' इत्यभिधीयते। विश्वविश्रुतेन रूसदेशीयमनोवैज्ञानिकपुङ्गवेन पैवलोवमहोदयेन[2] शुनां लालारससम्बन्धिप्रतिनियत-सहजक्रियोपरि सर्वप्रथमं प्रयोगाः सम्पादिताः। यदा यदा भोजनं शुने प्रदत्तं, तदा तदाऽस्य लालारसः प्रस्रवति। परन्तु यदि भोजनप्रदानसमकालमेव घण्टिकाध्वनिरपि भवेत्तर्हि कतिपय-कालानन्तरम्, एवम्भूतभोजनप्रदानक्रमेण तद्घण्टिकाध्वनिना सह तल्लालारसप्रवाहोऽपि प्रतिनियतः सञ्जायते। अर्थाद् भोजनं विनाऽपि घण्टिकाश्रवणमात्रेण कतिपयप्रयोगानन्तरं लालारसप्रवाहः शुनः सञ्जायते। एवम्प्रकारेण लालारसप्रवाहरूपा सहजक्रिया घण्टिकाध्वनिना साकं 'प्रतिनियता' सञ्जायते। एवम्प्रकारेणाऽन्या अपि सहजक्रियाः प्रतिनियोक्तुं शक्यन्ते। एवम्प्रकारेण काश्चन क्रिया दैनिकजीवने आकस्मिकसम्बन्धैः प्रतिनियता भवन्त्येव। सहजक्रियाप्रतिनियतत्वं हि खलु शिक्षणस्य प्राथमिकं रूपं सरलतममभिव्यञ्जयति, यथा—प्रत्यक्षात्मकं शिक्षणं यद् वयमग्रेऽनुव्याख्यास्यामः।

सहजक्रियायामुत्तेजकसंवेदने सम्प्राप्ते सति तत्क्षणमेव प्रतिक्रिया जन्यते। उदाहरणतः किञ्चिदप्याघातकरं वस्तु यदा नेत्रसविधे आगच्छति, तत्क्षणमेव चक्षुःपक्ष्मनिमीलनं जायते। यदा च हस्तः किञ्चिदपि शीतमुष्णं वा वस्तु स्पृशति, तत्क्षणं हस्तोऽपसरति। यदा च धूसरमक्षिण पतति, तत्क्षणमेव स्वतोऽश्रुप्रवाहो जायते। किंकृतमिदं सर्वम्? सर्वा एताः सहजक्रिया यासां क्रियासौकर्यं वंशानुक्रमपारम्पर्यागतम्, यदर्थं च नाडीसम्बन्धा जन्मत एव प्रौढिङ्गता निर्मिता वा भवन्ति। नहि ता वातावरणादध्ययनमपेक्षन्ते। किं गमनं सहजक्रिया भवति किमुताऽभ्यासो वा? प्रायो जना मन्यन्ते यद्धि शिशुर्गमनमधीते शिक्षति वा। किन्तु प्रारम्भकाले खल्विदं सहजक्रियारूपमेव बिभर्त्ति। शिशोः स्वमृदुशय्यायां पादप्रक्षेपणं हस्तचालनञ्च नास्त्यनुकरणजन्यमपि तु स्वाभाविक-शक्तिजन्यम्, सहजक्रियात्मकत्वात्। भूमौ विसर्पणम्, शय्यायामूर्ध्वमधो वा विसर्पण-मुत्तानस्य शिशोः स्वयमेव सहजक्रियाकारित्वं द्योतयति। यथा यथा पेश्यः पुष्टाः सञ्जायन्ते, यथा यथा च जन्मजातनाडीसम्बन्धाः सुदृढा भवन्ति, तथा तथा बालकस्य गमनमपि संवर्धते। नूनमुत्तरकालिकं गमनमनुकरणपितृहर्षोत्सवप्रकाशनादिभ्यः शिक्षणजन्यमिव प्रतीयते, किन्तु मूलतस्तु तत्सहजक्रियाजन्यमेवास्ति। नहि हस्ताभ्यां पद्भ्यां च शिशुविसर्पणं शिक्षणजन्यं भवति, नापि क्रन्दनमेव। अतो जन्मत एव यासां क्रियाणामभिव्यक्त्यर्थं नाडीसम्बन्धा वंशपारम्पर्यप्रभावात् सिद्धा भवन्ति नाडीसंस्थाने, ताः क्रियाः सहजक्रियाख्यां भजन्त इति। ताश्च चैतन्यात्मकक्रियाणां निम्नतममभिव्यक्तं रूपम्। निम्नस्तरीयप्राणिनां तु निखिलं जीवनमेव सहजक्रियाणां तारतम्य-निदर्शकम्। सहजक्रियाणां जीवनधारणार्थमेतेनैवाऽनुमातुं शक्यते गौरवम्। किन्तु मनुष्येषु तासामल्पीयसी संख्यैवोपलभ्यते।

१. तुलनार्थम्—Conditioned Reflex.

२. द्रष्टव्यम्—Pavlov, 'Conditioned Reflexes." translated by G. V. Anrep (Oxford University press 1927)

४. अनियताः क्रियाः[1]

अस्यां श्रेण्यां शिशोर्बहूनि प्रतिक्रियारूपकार्याणि समाविष्टानि भवन्ति। ननु किं तावदस्ति प्रयोजकं सहजक्रियाऽनियतक्रिययोः? सहजक्रियायां हि खलु निश्चितमुत्तेजकमुत्तेजनां जनयति या तत्क्षणं प्रतिक्रियारूपा सहजक्रिया जनयति। किन्त्वनियतक्रियाणां नहि किञ्चिदप्येवंविधमुत्तेजकं भवति यस्येयं प्रतिक्रिया वक्तुं शक्येत। अपि च सहजक्रियाणां नाडीसम्बन्धा जन्मत एव प्राणिनः सम्भवतः सुनिश्चिताः सुदृढा भवन्ति। अनियतक्रियासु सम्भवत एवंविधाः सुनिश्चिता नाडीसम्बन्धा न भवन्ति, प्रत्युत नाडीषु शक्त्यतिरेकादेवाऽनियताः क्रिया जायन्ते। एतासु क्रियासु हस्तपादस्य अङ्गुलीनाञ्च विविधाः क्रियाः परिगणिता भवन्ति। आसामुपयोग उत्तरकाले विविधाभ्यस्तक्रियाणां जनने संगठने च सिध्यति।

५. स्वतन्त्राः क्रियाः[2]

याः क्रियाः स्वतन्त्रनाडीमण्डलेन सम्पादिता भवन्ति, यासाञ्च समावेशो नह्युपर्युक्त-द्विविधक्रियासु भवति, ताः स्वतन्त्राः क्रिया अभिधीयन्ते। ता अपि सहजक्रिया इव पैतृकपारम्पर्यायत्ता भवन्ति। तासु क्रियासु श्वसनरक्तसञ्चालनपचनमूत्रपुरीषोत्सर्गान्तरग्रन्थिरस-स्रवणादिक्रियाणां समावेशो भवति। स्वतन्त्रनाडीमण्डलस्योत्तेजकानि तु विवादास्पदानि। किन्त्वेतावत्तु सुनिश्चितमेव यद्धि तेषां क्रिया जन्मत एव सुनिश्चितनाडीसम्बन्धैः प्रौढिङ्गता भवत्यपरथा जीवनधारणमपि दुर्वहं भवेत्। नूनं हर्षातिरेके हृदि रक्ताधिक्यं जायते, धमन्योऽ-धिकरक्तसञ्चरणेन विशदीभवन्ति, मुखञ्च रक्ताभं जायते। चिन्तायां सत्यां दुःखदसमाचारश्रवणे वा रक्ताल्पतया मुखं पीताभं जायते पुरुषश्च हतोत्साहो जायते। सिद्धा हि खल्वेताः क्रियाः पैतृकवंशपारम्पर्यजन्याः, किन्तु कालान्तरे वातावरणोत्थोत्तेजकानि तु प्रभावयन्त्येव। स्वतन्त्राः क्रिया यदि न भवेयुः, तर्हि निखिलं जीवनमपि न सम्भवेत्। अतः सहजक्रिया इव स्वतन्त्राः क्रिया अपि बाह्यान्तरोत्तेजकविशेषेण प्रतिनियता कर्तुं शक्यन्ते।

अपराः काश्चन रासायनिकाः क्रिया[3] अपि भवन्ति। यथा सूर्यमुखं पुष्पम्, यदार्यभाषायां 'सूरजमुखी' इति नाम्ना प्रथते, यदा बालारुणं पश्यति तदा सूर्याभिमुखमेव जायते। यस्यां यस्यां दिशि सूर्यः प्रक्रमते, तस्यां तस्यामेव दिशि सूर्यमुखं पुष्पमपि विनम्रं जायते। मनुष्येऽपि सूर्यं दृष्ट्वा कदाचन कायप्रसारणं भवति। रासायनिकाः क्रियाः प्रायश्चैतन्यरूपेण व्याख्यातुं शक्याः। किन्तु सहजानियतस्वतन्त्रक्रियाणां रूपन्तु चैतन्यव्यतिरेकेण नोपलभ्यते। अतो मनुष्येष्वेतादृश्यः क्रियाः प्रायो नोपलभ्यन्ते। वनस्पतिषु तासां प्राय उपलब्धिर्दृश्या।

६. मूलप्रवृत्तिः[4]

सम्प्रति वयं मूलप्रवृत्तिस्वरूपमनुव्याख्यास्यामः। मूलप्रवृत्तयः सहजक्रिया इव जन्मजाता वंशपारम्पर्यायत्ताः क्रिया भवन्ति; किन्तु ताः सहजक्रियाऽपेक्षया जटिलतरा भवन्ति। यतो हि सहजक्रियासु स्तोकेनैव चैतन्योपलब्धिः, चैतन्यस्यानुमानमेव

---

१. तुलनार्थम्—Random movements.

२. तुलनार्थम्—Autonomic Responses.

३. तुलनार्थम्—Tropism.

४. तुलनार्थम्—Instinct.

कर्तुं शक्यते, यदस्मिन् सति सहजक्रिया प्रसूत इति; किन्तु मूलप्रवृत्तिषु चैतन्याऽन्वितत्वं स्पष्टतो लक्ष्यते, यद्यपि तस्य प्रवर्तनं नास्ति सुषुम्णया, नाऽपि मस्तिष्केण, अपि तु वल्काधस्तनस्थलेभ्यः शीर्षण्यग्रन्थिभ्यः[1]। सहजक्रियाः सरलतरा भवन्ति, सुषुम्णास्थनाडीसम्बन्धजन्यत्वात्। अपि च सहजक्रिया अपरिवर्तनीया भवन्ति, मूलप्रवृत्तिषु च कालक्रमेण परिवर्तनं कर्तुं शक्यते। मूलप्रवृत्तयो नहि व्यक्तिविशेषवंशानुगतपारम्पर्यप्रभवा भवन्त्यपि तु निखिलजातिगतवंशानुक्रमपारम्पर्यसंक्रमणजन्या हि ताः। अतो मूलप्रवृत्तयो जातिविशेषगतप्रत्येकव्यक्तौ जन्मना सहैवोपलभ्यन्ते। जन्मजाता हि मूलप्रवृत्तयो भवन्ति। यद्यपि ताः सहजक्रियाऽपेक्षया किञ्चिज्जटिलतरा भवन्ति, तथापि ता ऐच्छिकक्रियावन्नैव विचारविवेकप्रभवाः। अतो मूलप्रवृत्तयो विचारोत्थैच्छिकक्रियापेक्षया सरलतरा एव भवन्ति। मूलप्रवृत्तयः प्रयत्नापेक्षया द्रुततरा भवन्ति, अनायासेनैव प्रवर्तन्ते, यतो हि तासां नाडीसम्बन्धा जन्मत एव वंशपारम्पर्यसिद्धाः प्राणिषूपलभ्यन्ते।

ननु मूलप्रवृत्तीनां सहजक्रियापेक्षया जाटिल्यं कथमुच्यते ? सहजक्रियासु संवेगाभावो भवति, मूलप्रवृत्तयश्च संवेगारूढा भवन्ति। अपि च मूलप्रवृत्तिषु नहि तथा ध्यानाभावोऽनवधानता वा विद्यते, यथायं सहजक्रियासु भवति। मूलप्रवृत्तिषु पलायनादिषु प्रथमतः प्रवृत्त्यधिष्ठानरूपस्य पदार्थस्य प्रत्यक्षं जायते, यथा वृकस्य जङ्गले निबिडे वने वा। तदनन्तरं भयरूपसंवेगं पर्यटकोऽनुभवति। संवेगानुभूत्यनन्तरमेव पलायनरूपा क्रियाऽनायासेनैव प्रसरति, हृद्गतिर्वर्धते, स्विद्यते च पर्यटको रोमाञ्चितो भृशं श्वसन्नेव स पलायते। संवेगानुभूतिः सहजक्रियायां नोपलभ्यते। सहजक्रियायामुत्तेजना बाह्यपदार्थात्तु जायते, किन्तु साऽपि प्रत्यक्षपदवीं नारोहति, सहजक्रियायाः सुषुम्णास्थितनाडीप्रभवत्वात्। प्रत्यक्षं सर्वदा ध्यानान्वितं भवति, नहि तथा सहजक्रिया ध्यानाऽन्विता भवति सर्वदा। अतः सिद्धं सहजक्रियामूलप्रवृत्त्योः पार्थक्यं जाटिल्योपोद्बलितम्।

नन्वभ्यस्तक्रियाऽ[2]प्यनायासेनैव प्रवर्तते, कथन्तर्हि सा मूलप्रवृत्तिर्न भवितुमर्हति ? अभ्यस्तक्रिया त्वभ्यासजन्याऽधीताऽर्जिता वा क्रिया। मूलप्रवृत्तिर्नूनमनायासेन प्रवर्तते, किन्तु सा नैवाऽधीताऽर्जिता शिक्षिता क्रिया भवति। यत्तु पौनःपुन्येनाऽभ्यासेन शिक्षितुं शक्यते, तस्योन्मूलनमपि सम्भाव्यम्। नहि मूलप्रवृत्तीनां सर्वथोन्मूलनं कर्तुं शक्यते। अपि च अभ्यस्तक्रियाः प्रतिपुरुषं भिद्यन्ते। निखिलजातिगतव्यक्तिषु कस्या अप्येकस्या अभ्यस्तक्रियाया नियतत्वं समरूपत्वं वा नैवोपलब्धुं शक्यते। अभ्यस्तक्रिया नहि जन्मजाता भवन्ति। तास्त्वनुकरणेन शिक्षणेनाऽभ्यासेन वाऽधीयन्ते। प्रतिकूलाऽभ्यासेनैकदाऽभ्यस्तक्रियायाः कालान्तरे परित्यागोऽपि दृश्यते लोके। अपि चाऽभ्यस्तक्रियाया अनायासप्रवर्तनं मूलतस्तु विचारप्रभवम्, कालान्तरे चेदं यान्त्रिकक्रियासमं जायते। नहि यान्त्रिकक्रियारूपजातायामभ्यासक्रियायामस्ति कोऽप्यवकाशः संवेगानुभूतेर्यथा मूलप्रवृत्तौ दृश्यते। अतः सिद्धो मूलप्रवृत्त्यभ्यस्तक्रिययोः स्वरूपभेदः।

७. मूलप्रवृत्तिपरिभाषा

सहजक्रियाभ्यस्तक्रिययोर्भेदनिरूपणानन्तरं मूलप्रवृत्तेः परिभाषाऽपि व्याख्यातुं शक्यते। सम्यक्स्वरूपानवबोधेनैव मूलप्रवृत्तीनां स्वरूपविषये संख्याविषयेऽनेकानि भ्रान्तमतानि

१. तुलनार्थम्—Basal ganglia.
२. तुलनार्थम्—Habit ('आदत' इति उर्दूभाषायाम्)

सञ्जातानि। वयं तेषां किञ्चिन्निदर्शनमग्रे करिष्यामः। अत्र तु वयं प्राध्यापकमैकडूगलमहोदयाभिमतं मूलप्रवृत्तिलक्षणमेवमुपस्थापयामः—

"वयं मूलप्रवृत्तिमेवं व्याख्यातुं शक्नुमः—मूलप्रवृत्तिर्हि नामैको कायिकमानसिकः पैतृकगुणसंक्रमणजनितो जन्मजातो वा स्वभावो येन तदन्विता व्यक्तिर्विशिष्टप्रकारकाणि वस्तूनि पश्यति, तानि प्रत्यवहिता वा जायते, तत्प्रत्यक्षानन्तरं विशिष्टप्रकारकं संवेगञ्चानुभवति, तद्विषये च विशिष्टप्रकारेण प्रयतते, अथ वा तत्प्रयत्नानुरूपं क्रियावेगमेवानुभवति।" इति।[1]

श्वसनादिशारीरिकमात्रक्रियास्वतिव्याप्तिवारणाय कायिकमानसिकत्वमुपर्युक्तायां परिभाषायां मैकडूगलमहोदयेनाऽङ्गीकृतम्। नहि मूलप्रवृत्तिर्नाम क्रिया रासायनिकी क्रिया यथा भोजनपचनाद्रसनिर्वृत्तिः, रसाभिनिष्पत्तौ वा रक्तमांसमेदोऽस्थिमज्जाशुक्रादिधातूनां परिणामः। नापि मूलप्रवृत्तिः केवला मानसिकक्रिया, यथा स्मृतिः कल्पनाऽनुमितिर्वा, यतो हि मूलप्रवृत्तौ कायिको व्यापारोऽनिवार्यतो विद्यते। कायिकव्यवहारमन्तरा मूलप्रवृत्तिर्नहि प्रवृत्त्याख्यां भोक्तुमर्हति। अतः समीचीनमेवेदं यद्धि मूलप्रवृत्तयः शारीरिकमानसिकक्रिया भवन्ति।

अधीतक्रियास्वतिव्याप्तिवारणाय मूलप्रवृत्तिपरिभाषायां जन्मजातेति विशेषणपदं सन्निवेशितम्। मूलप्रवृत्तयो हि खलु नैसर्गिकाः प्रवृत्तयो भवन्ति, नहि तासां मौलिकं रूपमध्ययनव्यवहारादिसापेक्षम्। नहि नवजातशिशुं कथं स्तनपानं कर्त्तव्यमिति कोऽपि शिक्षयति। ननु शिक्षते तु, यद्धि बालको मातुः स्तनसविधे नीयते? एवं प्राप्ते वयं ब्रूमः—नहि स्तनपानं शिक्ष्यते, बालकस्तु नीयत एव। यावन्न तस्याङ्गुलिपेश्यः स्थिरा भवन्ति, तावदेव चिरं शिशुर्मातुः साहाय्यमपेक्षते स्तनसामीप्ये मात्रा नीयत एव। स्तनगवेषणं स्तनपानञ्च मूलप्रवृत्तिजन्ये, ते तु नैसर्गिके। चर्चरीकाः स्वकीयनीडमतिकौशलपूर्वकं निर्मिमते। नहि कोऽपि शिक्षयति ताः। नीडनिर्माणन्तु मूलप्रवृत्तिजन्यं सांसिद्धिकं जन्मजातं कर्म। मधुमक्षिका मधु सञ्चिनोति, तद्रक्षणञ्च स्वनिर्म्मितमधुनीडे करोति। किमस्ति तद् व्यवहारजन्यमनुकरणजन्यं वा? मनुष्योऽपि व्याघ्रदर्शने चौरागमे वा भयात् पलायते। स्वेदरोमाञ्चरक्तातिशीघ्रप्रसरणादीनि च लक्षणानि तस्य शरीरे आविर्भवन्ति। नहि सर्वमेतत् पलायनादिक्रियाजातं व्यवहारजन्यमनुकरणजन्यं वा। शिशुरपि मार्जारभयात् पलायते। तस्य मृत्तिकाशिशुस्फोरणे क्रुद्धश्च सञ्जायते। शिशुं प्रति मातुर्वात्सल्यं नैसर्गिकमेवेति सुप्रथितमेव सर्वेषां विदुषाम्। मर्कटपत्नी स्वक्रोडे शिशुमेकहस्तेन

---

१. द्रष्टव्यम्—Mc. Dougall "An Introduction to social psychology" (1946) Page 55—

"We may, then define an instinct as an inherited or innate psycho-physical disposition which determines its possessor to perceive and to pay attention to, objects of a certain class, to experience an emotional excitement of a particular quality upon perceiving such an object, and to act in regard to it in a particular mainer, or at least, to experience an impulse to such action." Cp. also "Out-line of psychology," Page 110.

निधाय विंशत्युत्तरशतवितस्त्यधिकोत्तुङ्गभवनादन्यभवनस्योपर्युत्क्षिपति। कस्माद्धेतोः ? वात्सल्यवशात्। अतः सिद्धं वात्सल्यस्य नैसर्गिकत्वं जन्मजातत्वमिति यावत्। तिरश्चां शीतकाले ग्रीष्मदेशगमनं ग्रीष्मकाले च शीतप्रदेशगमनं मूलप्रवृत्तिजन्यम्। अमेरिकादेशीयकृषिविभागस्य वार्षिकविवरणे 'गोल्डन फ्लावर' नामकचर्चरीकाविषये[1] महदाश्चर्यजनकं तथ्यं प्राकट्यमानीतम्। तद्यथा—'गोल्डन फ्लावर' इति नामिकाश्चर्चरीकाः, या उत्तरीयामेरिकादेशस्थे अलास्काप्रदेशे निवसन्ति ग्रीष्मकाले, तास्तु शैत्यागमे 'हवाई'नामके द्वीपसमूहे सहस्राधिकक्रोशानतिक्रम्य समागच्छन्ति। याश्च चर्चरीकास्तन्नामधेया ग्रीष्मकाले उत्तरीयकैनाडादेशे निवसन्ति, तास्तु शैत्यागमेऽर्जेण्टाइनाप्रदेशे दक्षिणीयामेरिकास्थे, 'ब्यूनिसियर्स'नामकं नगरं परितः समागच्छन्ति। या चर्चरीकास्तन्नीडेभ्य आकृष्यान्यत्र परित्यक्तास्तास्तु पुनः स्वकीयं नीडं तद्देश एव समागच्छन्ति। तासामियं मूलप्रवृत्तिर्नैसर्गिकत्वमन्तरेण नैव व्याख्यातुं शक्यते। अतो मूलप्रवृत्तीनां जन्मजातत्वं वंशपरम्परायत्तत्वञ्च सुनिश्चितमेव।

नह्येतावतैतदभुक्तं भवति यद्धि मूलप्रवृत्तयोऽपरिवर्तनीया भवन्ति। अस्माकमभिप्रायस्तु केवलमेष एव यद्धि ताः सन्ति जन्मजाता नैसर्गिकाः। तासां मूलप्रवृत्तीनामपरिवर्तनीयं रूपन्तु निम्नस्तरीयेषु प्राणिषु कीटपतङ्गसरीसृपादिषूपलभ्यते। उच्चस्तरीयप्राणिषु शिक्षणादिना परिष्कारः सञ्जायते। उच्चस्तरीयपृष्ठवंशवतां प्राणिनां मूर्धन्ये मानवे तु व्यवहारानुकरणशिक्षणाभ्यासादिना महत् परिवर्तनं तासां स्वरूपं बिभर्ति। नहि तस्येयत्ताऽनुमातुं शक्यते। किन्तु प्रारम्भिकजीवने शिशोः कासाञ्चिन्मूलप्रवृत्तीनां परिवर्तनं शिक्षणाभ्यासजन्यं द्रष्टुं शक्यते। नहि मूलप्रवृत्तीनामुन्मूलनं कथमपि भवितुमर्हति, जन्मजातत्वात् नैसर्गिकत्वाच्च। आस्ट्रियादेशीयमनोविश्लेषणाविष्कारकर्तृभिः स्वनामधन्यफ्रायडमहोदयैर्वज्रलेपायितमिदं तथ्यं यद्धि कामादिमूलप्रवृत्तीनामुन्मूलनं कथमपि कर्तुं नैव शक्यते। तासां दमनं मार्गान्तरीकरणं शोधनं वा यथा कर्तुं शक्यते, तत्तु वयमप्यग्रे वक्ष्यामः। मानवव्यवहारे मूलप्रवृत्तीनां यद्रूपं समुपलभ्यते, तत्तु शिक्षणाभ्याससंस्कृतिसंस्कारप्रभवत्वान्महत् परिवर्तितं भवति; किन्तु नहि तेन तासां मूलप्रवृत्तीनां निराकरणं कर्तुं शक्यते। तासां नैसर्गिकत्वन्तु युक्तिबलोपेतत्वात् सुनिर्णीतम्।

नाऽपीदं वक्तुं शक्यते यद्धि यतो हि जन्मकाले सर्वासां मूलप्रवृत्तीनां युगपदाविर्भावाभावान्नैव तासां जन्मजातत्वं सिद्धमिति। मूलप्रवृत्तीनामाविर्भावो देशकालावपेक्षते। यथा यथा मानवानां शरीरसंस्थानं यासां मूलप्रवृत्तीनां व्यापारे कार्यक्षमं जायते, तथा तथा तासामाविर्भावोऽपि सँल्लक्ष्यते। यतो हि मूलप्रवृत्तीनामाविर्भावो नहि केनाऽपि सर्वथा निवारयितुं शक्यते, यतो हि तासामनुकूलपात्रदेशकालादिसम्प्राप्तौ समुद्गमो भवत्येवेति सुनिश्चितं तासां जन्मजातत्वम्। जन्मकाले बालकस्य रोदने क्षुत्पिपासादिमूलप्रवृत्तीनामाविर्भावो भवति। शैशवे पलायनक्रोधताडनादीनां मूलप्रवृत्तीनां क्रोधद्वेषघृणादिसंवेगारूढानामाविर्भावोऽपि सँल्लक्ष्यते। वयःसन्धिकाले तारुण्ये च कामप्रवृत्तेरुद्गमोऽपि सञ्जायते। यौवने च वात्सल्यं स्त्रीपुरुषाणामाविर्भवति, यद्यपि तस्य प्राथमिकरूपं स्वभ्रातृभगिनीप्रेम्णि दरीदृश्यत एव। बालिकाभिः कृत्रिमपुत्रपरिपालने तासां वात्सल्यमूलप्रवृत्तेः किञ्चिदुन्मेषरूपमुपलभ्यते। अतो यदि मूलप्रवृत्तयो

1. द्रष्टव्यम्—U. S. Department of Agriculture, circular 363 fig. 22.

देशकालपात्रशरीरपेशीधात्वादिपरिपाकमाविर्भावेऽपेक्षन्ते, नहि तेन तासां नैसर्गिकत्वं जन्मजातरूपत्वं वा निराकर्तुं शक्यते, यतो हि प्रयोजककारणानि परिस्थित्यङ्गत्वेन प्रविशन्ति। पशूनां शरीरव्यवहारस्याधिकतमांशे मूलप्रवृत्त्यायत्तत्वात्तेष्वधिकतमानां मूलप्रवृत्तीनामाविर्भावो जन्मसमकालमेवोपलभ्यते। कामादिमूलप्रवृत्तयस्तु कालान्तरे स्वत एवाविर्भवन्ति।

मूलप्रवृत्तीनां जन्मजातत्वादिदमपि वक्तुं न शक्यते यद्धि कस्या अपि मूलप्रवृत्त्याः सर्वेषु प्राणिषु किमुतैकस्या जातेरन्तर्भूतसर्वप्राणिषु समानमात्रायामभिव्यक्तिर्भवेदिति।' नहि विभिन्नेषु मानवेषु कामक्रोधादिमूलप्रवृत्तयः समानमात्रायां समुपलभ्यन्ते, वंशानुक्रमायत्तत्वाद्धि मूलप्रवृत्तीनाम्। यथा वंशपारम्पर्यगुणायत्तत्वात् प्रतिपुरुषं शरीररचनाधातुपरिपाके इन्द्रियतीव्रत्वादीनि भिद्यन्ते, तथैव मूलप्रवृत्तीनां ह्रासोत्कर्षमात्राऽपि प्रतिपुरुषं भिद्यते। दृश्यते हि कालान्तरे मूलप्रवृत्तीनां ह्रासोत्कर्षवृद्धिर्वातावरणप्रभावात्, किन्तु तासां मात्राभेदस्तु जन्मजात एव।

उपर्युक्तविवेचनेनेदमपि स्फुटीभवति यद्धि मूलप्रवृत्तीनां जन्मजातानामपि समुद्गमकाले भवति। यदि तत्काले समीचीनावसराभावो भवेत्तर्हि केचन विकारा जायन्ते। शिक्षणविधौ तु मूलप्रवृत्त्यानुकूल्यं विशेषतः शिक्षकेण स्मर्तव्यम्। तेन हि पिपठिषूणामौत्सुक्यमवधानञ्चाक्रष्टुमध्यापको प्रभवतीत्यवदातमेव। प्रपञ्चितमेवेदमग्रेऽस्माभिरप्यवधानप्रकरणेऽसामान्यमनोविज्ञानप्रकरणे च। सम्यगवसराभावान्मूलप्रवृत्तीनां तैक्ष्ण्यमपि कुण्ठितं जायतेऽक्रियाशीलत्वाद् यथौत्सुक्यं बालकानां प्रजननं च गर्भाशयादीनाम्।

मैकडूगलमते मूलप्रवृत्तीनां रचनायां त्रिविधान्यङ्गानि सम्मिलन्ति। तद्यथा--प्रत्यक्षम्, संवेगः, क्रिया च। मूलप्रवृत्त्यनधीताजन्मजाताऽनायासेन सम्पाद्यमाना क्रिया भवति, किन्तु मूलप्रवृत्तिः कस्मान्नैवाविर्भवति? अपेक्षते हि खलु मूलप्रवृत्तिर्वातावरणात् किञ्चिदुत्तेजनम्, यथा श्वानं ताडयितुकामस्य पुरुषस्य प्रवृत्तिस्तदैवाविर्भवति यदा स पुरस्तात् स्थाल्या ओदनं खादन्तं श्वानं चक्षुषा पश्यति। शुन ओदनभक्षणमस्त्यत्र उत्तेजकम्। तस्य प्रत्यक्षमनिवार्यमस्ति मूलप्रवृत्त्याविर्भावाय। नहि केवलमोदनभक्षणमेव तत्प्रत्यक्षं वा ताडनात्मकमूलप्रवृत्तिं जनयितुं प्रभवति। प्रत्यक्षानन्तरं स पुरुषः क्रोधसंवेगमनुभवति। यदि श्वा पालितोऽस्ति नहि तदा ताडनरूपमूलप्रवृत्त्या अवसरः सम्भवति। शुनोऽनधिकारचेष्टां दृष्ट्वैव क्रोधसंवेगोऽनुभूयते। नहि क्रोधसंवेगानुभूतिमन्तरा प्रवृत्तिः प्रादुर्भवितुं शक्यते। अनुभूयमानः क्रोधसंवेग एव ताडनात्मकयष्टिप्रहारक्षमतां बिभर्त्ति। क्रोधसंवेगानुभूत्यनन्तरमनायासेन स पुरुषो यष्टिप्रहारं करोति। एतस्मिन्नेवान्तराले श्वाऽपि पलायते। पलायनमपि शुनोऽस्त्यपरा मूलप्रवृत्तिः। कथं हि साविर्भवति? श्वाऽपि पश्यति यद्धि दृष्टो हि स ओदनं स्थाल्या भक्षयन् इति। तं पश्यन्तं पुरुषं दृष्ट्वा स सचेता जायते। यदा श्वा यष्टिं पश्यन्तमाहरन्तञ्च तं पश्यति, तत्प्रत्यक्षमेवोत्तेजनं प्रदत्ते। यष्ट्याहरणन्तूत्तेजकम्। नहि तत्प्रत्यक्षेणैव पलायनमूलप्रवृत्तिः सम्भाव्यते, भयसंवेगानुभवाद्दते। भयसंवेगमनुभूय कम्पते हि खलु श्वा, सहसा पलायतेऽप्रताडित एव। एवं ताडनपलायनमूलप्रवृत्तिद्वयविश्लेषणेनावधार्यते यद्धि मूलप्रवृत्तिस्वरूपे ज्ञानसंवेगक्रियाङ्गत्रयस्य सन्निवेशोऽनायासेन विद्यते। प्रत्यक्षन्तु ज्ञानमभिव्यञ्जयति। संवेगोऽपि स्वत एव विद्यते। क्रिया तु मूलप्रवृत्तिस्वरूपमेवाऽर्थवत् करोति। जन्मजाताऽनायासप्रवर्तिता सत्यपि मूलप्रवृत्तिर्नहि प्रत्यक्षविरहिता क्षणमवस्थातुं शक्नोति, नाऽपि संवेगानुभूतिव्यतिरिक्ता। संवेगो हि खलु प्रवृत्तिवेगमुग्रत्वं वा निश्चिनोति।

ननु ज्ञानसंवेगवती मूलप्रवृत्तिः कथं प्रवृत्तिरूपतां प्रयत्नार्थवत्तां नैव भजते ? नहि मूलप्रवृत्तिः प्रयत्नः। प्रयत्नस्तु विचारतर्केच्छासमन्विता क्रिया, सैव प्रवृत्तिः। नहि मूलप्रवृत्त्यां विविधविकल्पानां विचारावसरो धर्माधर्मविवेको वा विद्यते। सा त्वनायासेन प्रवर्तते प्रत्यक्षपूर्विका संवेगाऽभिरूढा। नहि प्रत्यक्षं सविचारोहापोहप्रौढिमभिव्यञ्जयति। प्रत्यक्षमात्रेण मूलप्रवृत्त्यङ्गेन तूत्तेजकज्ञानमेव सम्पाद्यते। तदनन्तरं संवेगानुभवपर्यन्तं मूलप्रवृत्तिः स्वत एव प्रवर्तते। नास्त्यत्रैच्छिकनिर्णयः प्रवर्तमानस्य पुरुषस्य। यदि पलायनादिमूलप्रवृत्तेः प्राग् विविधविकल्पचिन्तनं धर्माधर्मविवेकपुरस्सरं भवेत्तर्हि मूलप्रवृत्तिरपि मूलप्रवृत्तितां विहाय प्रयत्नाख्यां बिभर्ति। मूलप्रवृत्तिस्तु जन्मसिद्धनाडीसम्बन्धेभ्यः प्रवर्तते। ननु कुतस्ते नाडीसम्बन्धाः ? नहि सुषुम्णायामस्ति तेषां सत्त्वम्, तत्र तु सहजक्रियाणां नाडीसम्बन्धो भवति। नाऽपि मस्तिष्के, तत्तु विचारविवेकेच्छापूर्वकप्रयत्नादिक्रियाणामायतनं प्रत्यक्षशारीरवेतृभिर्निरवद्यं साधितम्। मूलप्रवृत्तीनां नाडीसम्बन्धाः शीर्षण्यग्रन्थिजाले[1] स्वतन्त्रनाडीमण्डले भवन्ति। इटालीदेशवासिभिः प्राणिविज्ञानविशारदैः पैगानोमहोदयैर्विशेषतोऽयं विषयो विशदीकृतः[2]। शीर्षण्यनाडीजालं हि खलु संज्ञावाहिचेष्टावाहिनाडीसम्बन्धयुतमेवेदं मूलप्रवृत्तिरूपं कार्यं सम्पादयति। व्याख्यातमनेनैव मूलप्रवृत्त्यां सहजक्रियाऽपेक्षया चैतन्याभिव्यक्त्युत्कृष्टरूपम्, प्रयत्नाऽपेक्षातश्चैतद् यूनश्चैतन्याभिव्यक्तिरूपमिति।

प्रागुक्तमेवाऽस्माभिर्यन्मूलप्रवृत्तिर्निखिलमनोवृत्तीनां त्रिविधवर्गीकरणस्य समस्तं रूपमभिव्यञ्जयति। अस्त्यत्रैको विशेषः। अध्ययनशिक्षणार्जितक्रियादिभिर्मूलप्रवृत्तिप्रथमाङ्गं प्रत्यक्षनिर्मितं संज्ञावाहिनाडीसंस्थानं वा नाडीतन्त्रपक्षेऽन्तिमं चाङ्गं चेष्टारूपं चेष्टावाहिनाडीसंस्थानं वा नाडीतन्त्रपक्षे कालान्तरे मानवेषु सभ्यतासंस्कृतिसामाजिकशिष्टाचारोत्कर्षापेक्षया महत् परिवर्तनं बिभ्रतः। किन्तु मध्यमाङ्गं संवेगात्मकं मूलप्रवृत्तीनां कक्ष एव। मानवानामितरपशुभ्यो नास्ति कोऽप्यन्तरविशेषप्रयोजकः। मूलप्रवृत्तयो हि पशुषु मानवेषु च समानरूपेण समुपलभ्यन्ते। अत एवाऽस्ति प्राचीनमाभाणकम्। तद्यथा—

आहारनिद्राभयमैथुनञ्च सामान्यमेतत् पशुभिर्नराणाम्।
धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः॥ इति।

सुतरां संवेगाख्यो मूलप्रवृत्तिभागोऽहमहमिकयाऽभिनिविष्टानामुत सभ्यम्मन्यानामपि सदैव विद्यते। तस्य च नग्नं रूपं विधुरे काले स्फुटीभवति। अनुभूयते चेदं सर्वदा तेन तेन मानवेन तत्तन्मूलप्रवृत्त्यवसरे। प्रतिशोधावसरे दुर्भिक्षे वा मानवोऽपि पशुभिन्नव्यवहारमाचरति। उक्तं हि—

"बुभुक्षितः किं न करोति पापं क्षीणा जना निष्करुणा भवन्ति" इति।

अपि च—"कामातुराणां न भयं न लज्जा" इति।

अतो व्याख्यातं जन्मजातानायासप्रवर्तितप्रत्यक्षसंवेगक्रियासंवलितमूलप्रवृत्तिरूपमिति।

८. कति मूलप्रवृत्तीनां संख्या ?

सम्प्रति वयं मैकडूगलमहोदयाभिमतमूलप्रवृत्तीनां विशेषेणोल्लेखं करिष्यामः। प्रधानतमाः

१. तुलनार्थम्—Basal ganglia of the brain.

२. द्रष्टव्यम्—Archives Italiennes de Biologie, 1906 तथा, Mc Dougall, "An Introduction to Social Psychology", Page 29.

सन्ति हि खलु चतुर्दश मूलप्रवृत्तयः। पूर्वास्तु त्रयोदश समानाः पशुषु मानवेषु च। अन्तिमा तु केवलं मानवेष्वेवोपलभ्यते। एता मूलप्रवृत्तयो निम्नलिखिततालिकया संवेगविवरणोपेता विवृता भवन्ति—

संख्या	मूलप्रवृत्तिनामानि	तत्सम्बद्धसंवेगनामानि
१	भोजनान्वेषणम्	बुभुक्षा
२	पलायनम्	भयम्
३	युयुत्सा	क्रोधः
४	औत्सुक्यम्	आश्चर्यम्
५	सर्जनमुत विधायकत्वम्	रचनात्मक आनन्दः
६	सञ्चयः संग्रहो वा	स्वत्वम्, लोभः
७	विकर्षणम्	घृणा
८	समवेदनाप्रकाशनम्	करुणा
९	पुत्रैषणा	वात्सल्यम्
१०	प्रजननं कामप्रवृत्तिर्वा	वासना
११	सामूहिकजीवनैषणा	एकाकिभावः
१२	आत्मगौरवप्रदर्शनम्	अहङ्कारः
१३	दैन्यम्	आत्महीनता
१४	परिहासः	हर्षः, आमोदः[1]

---

१. तुलनार्थं द्रष्टव्यम्–Mc Dougall, Out-line of Psychology, Energies of man, and Intro. to Social Psychology, Chap. III.

(1) The instinct of food–seeking and the emotion of appetite.

(2) The instinct of flight and the emotion of fear.

(3) The instinct of pugnacity and the emotion of anger.

(4) The instinct of curiosity and the emotion of wondr.

(5) The instinct of construction and the emotion of creativeness.

(6) The instinct of acquisition and the emotion of possession.

(7) The instinct of repulsion and the emotion of disgust.

(8) The instinct of appeal and the emotion of helplessness.

(9) The instinct of parenthood and the emotion of tenderness.

(10) The instinct of mating and the emotion of sexuality.

(11) The instinct of gregariousness and the emotion of nostalgia.

(12) The instinct of self-assertion and the emotion of self-elation.

(13) The instinct of self-abasement and the emotion of subjection.

(14) The instinct of laughter and the emotion of amusement.

एता मूलप्रवृत्तयस्त्रिधा वर्गीकर्तुं शक्यन्ते। तद्यथा—

(अ) आत्मरक्षासम्बन्धिन्यो मूलप्रवृत्तयो यथा—भोजनान्वेषणम्, पलायनम्, युयुत्सा, औत्सुक्यम्, विधायकत्वम्, संग्रहः, विकर्षणम्, समवेदना च।

(आ) जातिसंरक्षणात्मिका मूलप्रवृत्तयो यथा—व्यवायः, पुत्रैषणा च।

(इ) सामाजिकमूलप्रवृत्तयो यथा—सामूहिकजीवनैषणा, दैन्यम्, आत्मगौरवः, परिहासः।

एतासु मूलप्रवृत्तिषु भोजनान्वेषणं जन्मत एवोपलभ्यते। यत्किञ्चिदपि बालकः स्वहस्तयो-र्गृह्णाति तत्सर्वं कन्दुकमङ्गुलिं तृणं यष्टिं वा, मुख एव निवेशयति। स्तनपानन्तु तस्य सांसिद्धिकीं प्रवृत्तिं द्योतयति। जन्मत एव शूकरशुनोर्वैरभावजन्या युयुत्सामूलप्रवृत्तिरपि सँल्लक्ष्या। प्रौढमानवे तरुणे वा मूलप्रवृत्तिकार्याणि परिवर्तितानि जायन्ते सामाजिकनियन्त्रणनैतिक-नियन्त्रणादिभिः।

मैकडूगलमहोदयानां मतेऽन्यास्चतस्रः सामान्यप्रवृत्तयोऽपि जन्मजाता उपलभ्यन्ते, किन्तु तासु संवेगाभावो भवति। स यथा—संकेतः[1], सहानुभूतिः[2], अनुकरणम्[3], क्रीडनमिति[4]। दृश्यते हि तास्वप्यनायासप्रवृत्तिर्बालकानाम्, अतस्तासां सत्त्वमप्यनिवार्यमिति तेषां मतम्। वयं सामान्यप्रवृत्तीनां पृथक्तः सविस्तरं विवेचनमग्रे करिष्यामः। प्रथमं तावद् विविधमतानां मूलप्रवृत्तिस्वरूपनिर्धारण-विषये महत्त्वपूर्णमुल्लेखनं करणीयमेव।

६. मूलप्रवृत्तिविषयकेतरमतोपन्यासः

मूलप्रवृत्तिस्वरूपविषये हि खलु महान् विवादः समजायत। संभवतोऽन्या काचिदेवम्भूता जटिला विवादास्पदीभूता समस्याधुनिकमनोविज्ञाने नोद्भाविता। व्यवहारवादिनो मूलप्रवृत्तीना-मस्तित्वं नैवाङ्गीकुर्वन्ति। मनोवैज्ञानिकैश्च मूलप्रवृत्तीनां वर्गीकरणमपि स्वेच्छानुसारं पृथगेव निदर्शितम्। वयमत्र तद्विवादस्य काञ्चिद् रूपरेखां प्रदर्शयामहे। आङ्गलदेशीया महान्तोऽर्थ-शास्त्रिण एडमस्मिथमहोदयाः सहानुभूतिरूपां मूलप्रवृत्तिमेव मानवव्यवहारस्य आधारभूतामनु-मन्यन्ते[5]। ट्राटरमहाभागाः[6] सामाजिकजीवनेच्छारूपा मूलप्रवृत्तिरेव निखिलमानवव्यवहारस्य चूलिकेति मन्यन्ते। फ्रायडमहोदयाः कामप्रवृत्तिरेव समग्रमानवजीवनस्य स्रोतस्विनीति मन्यन्ते। यद्यपि ते महाभागा उत्तरकालीनग्रन्थेष्वात्मरक्षात्मकप्रवृत्तिमृत्युमूलप्रवृत्तिद्वयस्य[7] सत्तामपि स्वीचक्रुः। जेम्समहोदया द्वात्रिंशन्मूलप्रवृत्तीनां सत्त्वं स्वीकृतवन्तः। तासु स्तनपानम्, क्रन्दनम्,

१. तुलनार्थम्—Suggestion.
२. तुलनार्थम्—Sympathy.
३. तुलनार्थम्—Imitation.
४. तुलनार्थम्—Play.
५. तुलनार्थम्—Sympathetic bases of human activities.
६. तुलनार्थम्—Trotter W. Instinct of the Herd in Peace and War.
७. तुलनार्थम्—Instinct of self-preservation and death instinct.

गमनमुपसर्पणं वा, जिज्ञासा, मिलनसारित्वम्, लज्जालुत्वम्, स्वच्छताप्रियत्वम्, पादाधःसम्भारदानम्[1], अनुकरणम्, युयुत्सा, सहानुभूतिः, अन्धकारमयस्थलभयः, जिज्ञासा, प्रेम, ईर्ष्येत्यादीनां समावेशोऽपि कृतः। स्पष्टमेवेदं यत्तासु स्वच्छताप्रियत्वादिकाधीतक्रियाणामप्यन्तर्भावः सञ्जातः। विलियमजेम्स-महोदयेन मूलप्रवृत्तीनां परिवर्तनशीलत्वानुकारितत्वमपि समुल्लिखितम्। तदनन्तरं मैकड्गलमहोदयेन यथापूर्वं वर्णितं मतमुल्लिखितम्। अमेरिकनदेशीयैः थार्नडाइकमहोदयैरपि मूलप्रवृत्तीनां द्विविधं वर्गीकरणं कृतम्। तद्यथा—वैयक्तिकमूलप्रवृत्तयः, सामाजिकमूलप्रवृत्तयश्चेति। तासु मूलप्रवृत्तिषु तैर्महाभागैः शताधिकानां मूलप्रवृत्तीनां समावेशः कृतः[2]। कालान्तरे थार्नडाइक-महोदयाश्चत्वारिंशन्मूलप्रवृत्तीरेवाऽङ्गीकृतवन्तः[3]। अस्ति हि तेषां मतस्य मैकड्गलमहोदय-मतान्महान् भेदः। संवेगाभिरूढैव मूलप्रवृत्तिर्भवति, यद्वा संवेगं विना मूलप्रवृत्तिर्नैव स्वरूपं लभत इति मतं तैरपास्तम्। तन्मते मूलप्रवृत्तेरियं परिभाषैव पर्याप्ता यद्धि मूलप्रवृत्तिरनधीता क्रिया भवतीति। तत्सूच्यां प्रायो मैकड्गलपरिगणितसमग्रमूलप्रवृत्तीनामन्तर्भावो लक्ष्यते। संक्षिप्तसंस्करणे परिगणिता मूलप्रवृत्तयः काश्चनैवंप्रकारेण वर्गीकृताः समुपलभ्यन्ते। तथा हि—

(अ) वैयक्तिकाः—मौलिकं ध्यानान्वितत्वम्, स्थूलशरीरनियन्त्रणम्, भोजनप्राप्तिः, संरक्षात्मकप्रतिक्रिया, क्रोधः—इत्यादयः।

(आ) सामाजिकाः—मातृव्यवहारः, मानवेषूपस्थितेषु सत्सु प्रतिक्रिया, तेषां प्रशंसायां प्राप्तायां सत्यां प्रतिक्रिया, तेषां निन्दायां प्राप्तायां सत्यां प्रतिक्रिया, आत्मगौरव-प्रवृत्तिः, दैन्यभावः, अनुकरणमित्यादयो मूलप्रवृत्तयः।

वारेनमहोदयैः षड्विंशतिर्मूलप्रवृत्तयोऽङ्गीकृताः। सामाजिकमनोविज्ञानविशारदा बर्नार्डमहाभागाः स्वकीये ग्रन्थे दशोत्तरशतं मूलप्रवृत्तयोऽङ्गीकर्त्तव्या भवन्तीति स्वीकुर्वन्ति[4]। ड्रेवरमहोदया मैकड्गलप्रदर्शितशैलीमेवानुसरन्ति, तथापि तैर्मूलप्रवृत्तीनां वर्गीकरणमन्य-प्रकारेणैवोद्भावितम्।

---

१. तुलनार्थम्—Pressing downward on the feet.

२. द्रष्टव्यम्—Thorudike. Educational psyohology.

३. द्रष्टव्यम्—Thorndike, A Briefer Course.

४. द्रष्टव्यम्—Bernard, L.L., Instinct, A Study in Social Psychology, Chap. 8.

ड्रेवरमहोदयानां वर्गीकरणम्[1]

जन्मजाताः प्रवृत्तयः

- संवेदनात्मिकाः[2]
  - सामान्याः
    यथा—
    सुखवेदनीये प्रवृत्तिः
    दुःखवेदनीयान्निवृत्तिः ।
  - विशिष्टाः
    - बुभुक्षा
    - पिपासा
    - निद्रा
    - कामप्रवृत्तिः
    - वमनम्[4]
- प्रतिक्रियात्मिकाः[3]
  - विशेषाः
    - विशुद्धाः
      (स्युरपरिमेयाः, सहजक्रियाभ्यश्चा-व्यावर्त्याः । तासां किञ्चिन्निर्दशनम्)
      यथा—
      - सामञ्जस्यस्थापनप्रतिक्रिया, ध्यानम्
      - भयप्रतिक्रिया
      - गमनप्रतिक्रिया
      - ध्वन्यात्मकप्रतिक्रिया
    - संवेगात्मिकाः
      - क्रोधः
      - आखेटः
      - संग्रहप्रवृत्तिः
      - जिज्ञासा
      - सामूहिकजीवनेच्छा
      - कामवृत्तिः
      - आत्मप्रदर्शनम्
      - आत्मदैन्यम्
      - वात्सल्यम्
  - सामान्याः
    - क्रीडनम्
    - प्रयोगकरणम्
    - अनुकरणम्
    - सहानुभूतिः
    - संकेताहत्वम्

उपर्युद्धृतया तालिकयेदं स्फुटीभवति यद्धि ड्रेवरमहोदयानां वर्गीकरणं मनोवैज्ञानिकीं शैलीं विशेषेणाऽनुसरति । तन्मते संवेदनात्मिका मूलप्रवृत्तयस्ता भवन्ति यादृशासु सुखवेदनीयेनोत्तेजकेनोत्पादिता सुखसंवेदनानुभवपरिमितैव मूलप्रवृत्तिर्भवति, किमुत दुःखवेदनीयेनोत्तेजकेनोत्पादिता दुःखसंवेदनानुभवपरिमितैव मूलप्रवृत्तिर्भवतीति ।

प्रतिक्रियात्मिका मूलप्रवृत्तयस्त्वपरथा ता भवन्ति यादृशासु सुखवेदनीयेनोत्तेजकेनोत्पादिता सुखसंवेदनानुभवपरिमितैव मूलप्रवृत्तिर्भवति, किमुत दुःखवेदनीयेनोत्तेजकेनोत्पादिता दुःखसंवेदनानुभवपरिमितैव मूलप्रवृत्तिर्भवतीति प्रतिक्रियात्मका मूलप्रवृत्तयस्त्वपरथा ता भवन्ति

१. द्रष्टव्यम्—Drever, Instincts in Man, Page 169.
२. तुलनार्थम्—Appetitive.
३. तुलनार्थम्—Reactive.
४. तुलनार्थम्—Nausea (loathing food)

यादृशीषु विशेषपदार्थेन परिस्थितिविशेषेण वा जन्यमानोत्तेजनायाः प्रतिक्रियामुखेन प्रवृत्तिः प्रवर्तते, तस्याः प्रवृत्त्याश्च लक्ष्यं तत्पदार्थसम्बन्धि तत्परिस्थित्यनुबन्धि वा भवत्येवेति[१]। वस्तुतः प्रतिक्रियात्मिका जन्मजाताः क्रियैव मूलप्रवृत्तिरूपतां भजन्ते। प्राध्यापकमैकडूगलमहाभागानां वर्गीकरणं स्वरूपविवेचनञ्च मूलप्रवृत्तीनां संक्षिप्तं सारवच्च प्रतिभाति। तदेव विशेषेणाद्रियते विद्वद्भिः।

मूलप्रवृत्तीनां जन्मजातरूपवत्त्वमपरे नाङ्गीकुर्वन्ति। ते विशेषतो व्यवहारवादानुसारिणः। १९८१ वैक्रमाब्दे वर्नार्डमहोदयः[२], यस्य मतं पूर्वमुद्धृतम्, 'मूलप्रवृत्ति'नामकं स्वकीयं ग्रन्थं प्रकाशितवान्। तस्मिँश्च ग्रन्थे शतचतुष्टयलेखकानां कृतिषु 'मूलप्रवृतिः' इति शब्दस्य प्रयोगं व्यवहृतं समालोच्योपहासपूर्णत्वं मूलप्रवृत्तिसिद्धान्तस्य प्रदर्शितवान्। तेनाकलितं यद्धि मूलप्रवृत्तिशब्दस्य ६००० षट्सहस्रप्रेरणासु क्रियासु वा प्रयोगो दरीदृश्यते। प्राध्यापकयर्कीस-ब्लूमफील्डमहोदयाभ्यां प्रदर्शितं यद्धि मार्जारैर्मूषकहननमंशतोऽधीतमेवास्ति[३]। प्राध्यापकडनलप-वाट्सनमहोदयाभ्यां जानहापकिन्सविश्वविद्यालयीयमनोवैज्ञानिकप्रवराभ्यां प्रचालितं मैकडूगलादिभिरभिमतं मूलप्रवृत्तिविषयकं मतं भृशमालोचितम्[४]। द्वाभ्यामेव साग्रहं समदं प्रतिपादितं यद्धि मानवव्यवहारोऽधिकतमांशे, विशेषतश्च प्रौढव्यवहारे, शिक्षणप्रभावान्वितत्वान्नास्ति सहजं जन्मजातं वेति। वाट्सनमहोदयस्तु शिशुवृत्ताध्ययनपूर्वकमिदं मतमुद्भावितवान् यद्धि भयं वामहस्तवत्त्वं दक्षिणहस्तवत्त्वं वाऽनुभवाभ्यामनियतं भवति। जानूपसर्पणम्, स्थानम्, गमनमित्यादीनि बहूनि क्रियाजातान्यंशतोऽधीतानि सन्तीति।

तदनन्तरं कैश्चिन्मनोवैज्ञानिकैर्मूलप्रवृत्तिशब्दप्रयोगेऽर्थद्वयास्तित्वमुद्घाटितम्। यथा कदाचन तु मूलप्रवृत्तिशब्दप्रयोगः स्तन्यपानयुयुत्साऽन्धकारस्थलभयादिषु दृश्यते। कदाचन चापरथा कामप्रवृत्तिबुभुक्षासंग्रहादिप्रेरणासु व्यवहारजनकास्वयं शब्दो व्यवह्रियत इति। राबर्टवुडवर्थमहोदयेन[५] उपर्युक्तार्थद्वयानुसारं 'मैकेनिज्म' किं वा यान्त्रिकक्रियेति प्रथमार्थ-

---

१. तुलनार्थम्—पूर्ववत्।

"Appetitive tendencies are those which arc woked by experiences which are agreeable or disagreeable, and in which the end sought has reference merely to this agreeableness or disagreeableness."

"Reactive tendencies are characterised by the fact that they are evoked by reactions to specific objects or situations which are apprehended, and the end sought are with reference to those objects or situations."

२. तुलनार्थम्—Bernard, L. L., Instinct: a study in social Psychology, 1924

३. तुलनार्थम्—Robert M. Yerkes. तथा Leonard Bloomfield.

४. तुलनार्थम्—Knight Dunlop of John Hopkins Universely:

५. द्रष्टव्यम्—Robert S. Woodworth, Psichology, A study of mental life, Page 368–70

प्रदर्शनाय, 'ड्राइव' किं वा प्रेरणेति द्वितीयार्थप्रदर्शनाय च द्वौ शब्दौ व्यवहृतौ। प्रथमवर्गीयाः क्रिया 'यान्त्रिकक्रिया' भवन्ति, यतो हि व्यापारः क्रिया वा यन्त्रवत् केनचिदपरेण कर्त्रा परिचालयितुमपेक्षते। द्वितीयवर्गान्तर्गताः प्रेरणानामधेयाश्त्तय विद्युच्छक्तय इव भवन्ति, यया परिचाल्यते। वस्तुतो नहि वर्गद्वये कोऽपि विनिगमकविशेषो वर्तते यतो ह्येकदा परिचालितं यन्त्रं स्वकीयां प्रेरणां शक्तिरूपामवाप्तुमर्हति, यथा हि सङ्गीतमधीयानः शिशुः स्वयमेव गानेन प्रोत्साहनं सम्प्राप्तसाफल्यप्रशंसनहर्षजनितं प्राप्नोति। एवं प्रकारेणान्या अपि अर्जितक्रिया विशिष्ट-व्यवहारश्च कमपि मानवं नूतनतरां प्रेरणां भाविनि कार्ये जनयन्त्येव। वुडवर्थमहोदयो मैकड्गलमहोदयं तदनुकारिणश्चान्यान् मनोवैज्ञानिकान् समालोचितवान्, यतो हि ते नियत-संख्याकमूलप्रवृत्त्यादिभिर्निखिलमानवव्यवहारो जन्यत इति मन्यन्ते।

सन्ति हि खल्वन्ये ये नियतसंख्याकमूलप्रवृत्तिसमाश्रयणेन मनो विविधशक्तिजाते विभक्तमिति ज्ञात्वा भयभीता जायन्ते। यथा हि प्राध्यापकप्रवरौ गाल्टहावर्डमहोदयौ मैकड्गलमत-समालोचनावसरे कथयतः[1]।

अपि च सन्त्यन्ये प्राध्यापकसरजूप्रसादचौबेमहोदया[2] इव ये मैकड्गलमतं तिरस्कुर्वन्ति, यतो हि तैः कोऽपि प्रयोगशालीयप्रयोगोऽस्मिन् मूलप्रवृत्तिविषये न समाश्रितः। आश्चर्यं हि महत्खल्विदं यद्धि ते महाभागा मानवव्यापारस्य सूक्ष्मनिरीक्षणं मनोविज्ञानस्य चरमं साधनं नैव मन्यन्ते। प्रयोगोऽपि निरीक्षणप्रकार एव। प्रयोगस्तु निरीक्षणपूरकत्वेन प्रयुज्यते। मानवव्यवहारस्य यावत् सुसूक्ष्मपर्यवेक्षणं प्राध्यापकप्रवरेण मैकड्गलमहोदयेन समाश्रितं विश्लेषितञ्च तच्च तेषां ग्रन्थद्वयस्य 'मनोविज्ञानस्य रूपरेखा' 'सामाजिकमनोविज्ञानस्य भूमिका' संज्ञकस्य प्रतिपृष्ठं साक्षीकरोति। नहि चौबेमहोदयैः काऽपि स्वकीया युक्तिः प्रयोगनिरीक्षणपुरस्सरा मैकड्गलमतखण्डनाय प्रस्तुता। मूलप्रवृत्तिविषयस्त्वेतावान् विवादग्रस्तः सञ्जातो यद्धि तस्य समाधानं कैण्टरप्रभृतिमनोविज्ञानाचार्याणामुल्लेखनमात्रेणैव कर्तुं न पार्यते।

१०. तथाकथितार्वाचीनमतानां समालोचनम्

व्यवहारवादिनां मूलप्रवृत्तिमस्वीकुर्वाणानां ग्रन्थेषु तेषां मतमर्वाचीनमिति प्रथते। वयमप्यत्र तथाकथितमर्वाचीनमतं संक्षेपत आलोचयामो येन तज्जनितभ्रान्तीनां परिहारः सम्भवेत्, असमीचीनत्वञ्चार्वाचीनमतस्य सम्भवेत्।

११. यान्त्रिकवादसप्रयोजनवादयोर्भेदजनकत्वम्

मूलप्रवृत्त्यादिसहितनिखिलमानवव्यवहारस्य प्रयोजनात्मकत्वञ्च। अस्ति हि खलु मनोविज्ञानेतरविज्ञानानां यान्त्रिकवादात्मिका प्रवृत्तिः। इतराणि भौतिकविज्ञानरसायन-विज्ञानादीनि निष्क्रियं जडं तत्त्वं विवेचयन्ति, तस्य रासायनिकपरिवर्तनादिषु संवेगेच्छादीनां प्रभावो नैव लक्ष्यते। अतस्तेषां परमं वस्तुतन्त्रात्मकत्वं यानि विज्ञानानि नियतकार्यकारण-साहचर्यान्वितं स्वस्वविषयजातं मन्यन्ते, ते यान्त्रिकवादसंज्ञयाऽभिधीयन्ते। तां यान्त्रिकवादा-भिमतां प्रवृत्तिं केचन मनोवैज्ञानिका मनोविज्ञानक्षेत्रेऽप्यावहन्ति। तत्र द्वे विचारधारे—

१. द्रष्टव्यम्—Robert H Gault & Howard: An out line of Psychlogy, Page 183.

२. द्रष्टव्यम्—डा० सरयूप्रसादचौबे, मनोविज्ञान, पृष्ठ १६०

एका 'निखिलं मानवव्यवहारजातं मूलप्रवृत्त्यादिसहितं सप्रयोजनात्मकम्' इति मतमाश्रयते, द्वितीया च 'सर्वो मानवव्यवहारो यान्त्रिकवादाभिमतरीत्या सहजक्रियापुञ्जीभूत एव' इति मतमातनोति[१]। सहजक्रिया प्रागुक्तरीत्या शारीरिकी क्रिया, नहि तस्यां विचारेच्छानिश्चयादयः प्रवर्तन्ते, तत्सौषुम्णिकनाडीसम्बन्धजनितत्वाद् मस्तिष्कस्य चेच्छाविचाराद्यधिष्ठानत्वात्। जडीभूतानामिव मानसिकक्रियाणां यदध्ययनम्, यद्वा जडशरीरस्य रासायनिकविकारहेतुतां निखिलमानवव्याणरस्य, चैतन्यस्याऽपि, यत्स्वीकरोति, तदस्ति यान्त्रिकवादात्मकं मनोविज्ञानम्। तद्विलक्षणमस्ति सप्रयोजनात्मकत्ववादिशैण्डमैकडूगलननटिचनरड्रेवरप्रभृतीनां मनोवैज्ञानिकपुङ्गवानाम्। नहि यान्त्रिकवादात्मकं मनोविज्ञानाध्ययनं समीचीनम्, विकल्पासहत्वात्। मानवीयो व्यवहारो यथा नैतिकमाचरणम्, विचारः, धर्माधर्मविवेकः, इत्यादिः सर्व एव सप्रयोजनात्मकः। नहि यान्त्रिकवादोऽन्येषु मानवीयेषु शास्त्रेषु विज्ञानेषु चैकान्ततः समाश्रीयते, यथा—नीतिशास्त्रे, सौन्दर्यशास्त्रे, राजशास्त्रे, समाजशास्त्रे वेति। सन्ति हि खलु केचन मानवविकासविज्ञानवेत्तारः प्राणिविज्ञानविशारदाश्च यैर्यान्त्रिकवादो मानवविकासाध्ययनेऽप्यवलम्ब्यते, येषां च स्खलितमतानां विस्तारोऽर्वाचीनमतोद्भावकैः स्वे स्वे ग्रन्थे क्रियते यत्र तत्र। तद्व्याख्याऽपि विरूपा जायते। नहि मानवः स्थाणुः, नापि परमाणुः, नापि द्रवः, नापि सम्मिश्रितं तत्त्वम्, येन यान्त्रिकवादसरणिर्मानवव्यवहाराध्ययनात्मकेषु मनोविज्ञाननीतिशास्त्रसमाजशास्त्रादिषु समादरणीया भवेत्। पदे पदे स्वनिश्चयपूर्वकं मानवः परिस्थित्याः स्वामी भवति, स्वानुकूलाञ्च तां करोति, तदनुकूलो वा स्वयमेव जायते। नहि प्रयोजनविरहितस्य कोऽपि व्यापारः। 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति हि प्राचीनमाभाणकम्। ननमहोदयानामग्रगण्याङ्गलदेशीयविश्वविश्रुतशिक्षाविशेषज्ञानामिदं वचनं सर्वथोपयुज्यते यद्वयस्ति निखिलो मानवव्यापारः प्रयोजनान्वितः। प्राणिविज्ञानविशारदलीवमहोदयानामालोचनावसरे तेषां वचनान्यतीवोल्लेखनीयानि[२]। तथा हि, लीवमहोदयानां कृत्रिमगर्भाधाने कृत्रिमपशुसंवर्धने च मूलप्रवृत्तिरचनायां रासायनिकाङ्गान्वितत्वे सम्पादिताः प्रयोगा निःसन्देहमतीव प्रभावोत्पादकाः। तैस्तेभ्यो या आशा प्रदत्ता ननु सा केवलं पुण्याशैवासीदिति वयं वक्तुं प्रभवेम—यद्धि कालान्तरे निखिलाभिलाषप्रयत्नसङ्कल्पनैराश्यकष्टा(तपस्या ?)दीनामाजन्मनो मृत्युपर्यन्तं जीवनस्य विषयीभूतानां किमपि भौतिकरासायनिकं व्याख्यानामवाप्स्यत' इति। पुण्याशैवेत्यनेन मोघा आशा निष्फला आशेति

---

१. तुलनार्थम्—All human behaviour is a mass of reflexes.

२. द्रष्टव्यम्—T. P. Nunn, Education: Its Data and first Principles, Page 15—

Liebs "experiments on artificial fertilisation, on the artificially directed growth of animals, and on the 'tropistic' factors in the instinct are undoubtedly most impressive. They gave him the hope—perhaps we must call it a pious hope—that a physico chemical explanation will be found in time for all the wishes, hopes, efforts, and struggles.........disappointments and sufferings, that form the contents of life from the cradle to the bier."

सूचितम्। प्रथमाऽध्यायेऽस्माभिः प्राणिविज्ञानमनोविज्ञानसम्बन्धप्रदर्शनावसरे प्राणिविज्ञानस्येयं यान्त्रिकवादाभिनिवेशयुक्ताऽध्ययनदृष्टिः संकेतिता। केवलभौतिकरासायनिकक्रियापुञ्जीभूतं स्वेच्छानिर्णयविवेकस्वातन्त्र्यविरहितमेव निखिलं मानवव्यवहारजातमिति मतं नैवोपयुज्यते। मन्येऽर्वाचीनमतोद्भावका मनोवैज्ञानिकास्तान्येव तथ्यानि सञ्चिन्वन्ति यैस्तेषां यान्त्रिकवादाभिमतं व्यवहारवादानुसारि मनोवैज्ञानिकं व्याख्यानं पदार्थविज्ञानानामितरेषां व्याख्यानमिव प्रतीयेत। मन्ये प्रवृत्तिरियं मनोविज्ञानस्य वास्तविकं मौलिकं स्वरूपं वैशिष्ट्यञ्चापाततस्तिरोहति। सर्व एव मानवीयो व्यवहारश्चैतन्यरूपमनसो वृत्तिव्यापारेणोतप्रोतः। एतस्मिन्नेवास्त्यस्य मनोविज्ञानाध्ययनस्य वैशिष्ट्यं यद्धीदं मानवसुलभसत्यत्व-शिवत्व-सौन्दर्यविषयकप्रतिमानानां तत्तद्व्यक्तिविचारेच्छाप्रवर्तमानानां निश्चितानां समादरं करोति। नह्यनेनेदमनुमेयं यद् वयं चरमयान्त्रिकवादस्य मनोविज्ञानक्षेत्रेऽनुप्रवेशविगर्हणायां कार्यकारणनियतत्वमपि विगर्हामः। अस्ति कार्यकारणनियमापेक्षा तादृशी मनोविज्ञानेऽपि यादृशीयं पदार्थविज्ञानेषु भवति। किन्तु मनोविज्ञानस्य पदार्थविज्ञानादस्यैकं महद् वैशिष्ट्यम्, यद्धीदं कारणसङ्घाते मनुष्यस्य भावनाविचारसंवेगेच्छोद्भूतपरिस्थितेरपि समावेशं समीचीनं मन्यते। एवं प्रकारेण मनोविज्ञानस्य कार्यकारणनियमो जडापरिवर्त्यनिष्क्रियप्रतिपाद्यविषयमात्र एव नास्ति। स्थाने खल्विदं मनोवैज्ञानिकं तथ्यं यत्र हि कोऽपि मानवीयो व्यवहारो मानसिको वा व्यापारोऽकारणं न जायते। किन्तु कारणमिति वचने मानसिककारणान्यप्यन्तर्भूतान्यूह्यानि। बाढम्, नहि किञ्चिदकस्मादकारणाज्जायते। एवं व्याख्यातं मनोविज्ञानं सप्रयोजनात्मकं मनोविज्ञानमिति संज्ञां बिभर्ति। आङ्ग्लभाषायां 'हार्मिक साइकोलॉजी'[१] इत्यभिधानेन प्रथते। मनोविज्ञानस्य समुदाराय्यां व्याख्यायामन्यमनोविज्ञानसम्प्रदायप्रवर्तितसमीचीनतथ्यान्यपि सामञ्जस्यं लभन्ते। अतः सिद्धो मूलप्रवृत्तिसमाश्रयविरोधो यान्त्रिकवादाभिभूतव्यवहारवादजन्यः, मानवसुलभप्रकृतेर्महोपेक्षागर्भितः।

ननु किमस्ति प्रयोजनं मूलप्रवृत्तिसिद्धान्तसमाश्रयणे? आत्मसंरक्षणं जातिक्रमाऽव्यवच्छेदश्च द्वौ पशुमनुष्यसुलभौ नैसर्गिकौ हेतू, याभ्यां प्रेरिताः प्राणिनो मूलप्रवृत्तिरूपां प्रतिक्रियामाचरन्ति। एते नैसर्गिके प्रयोजने विधात्रा प्राणिनां जीवनधारणार्थं जन्मतः प्रागेव नियोजिते, अथवा चिरन्तनसञ्चितानुभववासनानां वंशानुक्रमागतोपयोगिक्रियासंग्राहकत्वजनिते एते प्रयोजने इति विकासवादिनो मन्यन्ते। यस्याञ्च परिस्थितौ त्वरिता प्रतिक्रियाऽनिवार्या भवति, तदर्थमेव प्रकृत्याऽयं प्रबन्धो मूलप्रवृत्तिरूपोऽङ्गीकृतः। मनुष्याय सामाजिकी मूलप्रवृत्तिर्हासप्रवृत्तिश्च विशेषेण नियोजिते, यतो हि तयोरावश्यकता परस्परसम्मेलनसहयोगसम्भाषणादिष्वनुदिनमनुभूयते। नहि पशुजीवनमपि सर्वथा सामाजिकप्रवृत्तिविरहितम्। दृश्यते हि गवामियं प्रवृत्तिर्यद्धि ता इतरगवादिपशुभिः सहैव बहिश्चरणाय प्रस्थातुमिच्छन्ति, तदभावे चातिव्याकुला भवन्ति। मानवेष्वपि बालकः शिशुर्वा स्ववयस्कैः साकमेव क्रीडितुमिच्छति। दृश्यते हि लोके द्वित्रवर्षीयो शिशुरन्यशिशुभिः सार्धं क्रीडन्नतीवानन्दं लभते, स्वभोजनादिकमपि न स्मरति। हासस्तु मानवजीवनस्य विशेषानन्दप्रदर्शिका प्रवृत्तिः। मैकडूगलमहोदया मन्यन्ते यदतीव महत्त्वपूर्णेयं प्रवृत्तिर्यतोऽन्या मानवः सर्वप्राणिभिरभिलषितां सुखानुभूतिं प्रकाशयतीति। अतः सिद्धं प्रयोजनत्रयं मूलप्रवृत्तीनाम्। तद्यथा—आत्मसंरक्षणम्, जातिपारम्पर्यव्यवच्छेदः, सामाजिकसम्बन्धनिर्वाहश्चेति।

१. तुलनार्थम्—Hormic Psychology.

ये ये भावा व्यापाराः क्रियाः प्रतिक्रिया वोपयोगिन्योऽनुभूयन्ते, ते ते तस्यां तस्यां जातौ वंशपारम्पर्यगुणसंक्रमणेन आजन्म सुलभा जायन्ते । स्मरणीयं मूलप्रवृत्तिरिति शब्देनानायासा नैसर्गिका स्वतः प्रवृत्ताः क्रिया एवाभिव्यज्यन्ते ।

१२. नहि मूलप्रवृत्तयः प्रतिनियतसहजक्रियाः

ननु मूलप्रवृत्तयोऽनधीताः क्रिया भवन्ति, नैसर्गिकत्वात्तासाम्; अतस्ताः प्रतिनियताः सहजक्रिया[1] भवितुमर्हन्ति । एवं व्यवहारवादिनो मूलप्रवृत्तिं प्रतिनियतसहजक्रियारूपत्वेन व्याख्यान्ति । एवं सम्प्राप्तायां शङ्कायां वयं ब्रूमः—नहि मूलप्रवृत्तिः प्रतिनियतसहजक्रियारूपतां भजते । सहजक्रिया हि खलु मूलप्रवृत्त्यपेक्षातो निम्नस्तरीयाः क्रिया भवन्ति । सहजक्रियायां प्रागुक्तरीत्या भवन्त्येतानि कारणानि—उत्तेजकम्, उत्तेजना, तद्वाहि संज्ञावहनाडीकन्दाणुकम्, सुषुम्णायां नाडीसम्बन्धस्थलविशेषस्तत्र च प्रतिसंक्रान्तिकारकमपरनाडीकन्दाणुकम्, तदनन्तरं चेष्टावाहि नाडीकन्दाणुकम्, मांसपेशी, चेष्टास्थानम् । ततः प्रसरति सहजक्रिया प्रतिसंक्रमितक्रियाभिधाना । नहि तादृशी मूलप्रवृत्तिर्भवति । मूलप्रवृत्तौ निस्सन्देहमुत्तेजकजनितोत्तेजनायाः प्रत्यक्षं जायते । कदाचन तु तत्प्रत्यक्षमेकाधिकेन्द्रियजन्यं भवति । भयस्थले वृकादिदर्शनेन दूरागतेन सह तज्जान् हुङ्कारादिगर्जनशब्दानाकर्णयन् पूर्वकृतहिंसाजनितदुर्गन्धं जिघ्रन् भयसंवेगमनुभूय पलायनमाचरति । अत्र न केवलमस्ति चाक्षुषं प्रत्यक्षमपि तु घ्राणजं श्रोत्रजञ्च प्रत्यक्षे । संक्षेपत इदं वक्तुं शक्यते—नहि सकलपरिस्थित्यवलोकनमन्तरा मूलप्रवृत्तिजन्या प्रतिक्रिया प्रादुर्भवति । निखिलपरिस्थतीनां सम्यगवलोकनान्तरमेव संवेगानुभूतेराशा सम्भवति । सम्प्रति प्रागुक्तप्रत्यक्षत्रयेण सुनिश्चितमिदं भवति यद्धि प्रत्यक्षेण[2] चाक्षुषाज्ञाकन्दभागा समुत्तेजिता भवन्ति । संवेगानुभूत्यर्थमपि शारीरिकमनोविज्ञानविशारदै रासायनिकवैद्युतिकोत्तेजनप्रकारकप्रयोगशतैः सुनिर्णीतमिदं तथ्यं यत्तस्मिन् मस्तिष्काधस्तरीया मस्तुलुङ्गभागाः किमुत आज्ञाकन्दाः सक्रिया जायन्ते । नहि तद्विना तादृशी संवेगानुभूतिः सम्भवति यादृशी पलायने, व्यवाये, पुत्रवात्सल्ये, सहानुभूतिजनितकरुणानुभवे, युयुत्सायां वाऽनुभूयते । कुतस्तस्मात् पलायनादयो मूलप्रवृत्तय आदिष्टा भवन्ति । नहि खलु मस्तिष्कात्, तस्य विचारविवेकेच्छासंवलितप्रयत्नायनत्वात् । प्रयोगैः सिद्धम्, स्वीक्रियते चेदं मनोवैज्ञानिकैर्यद्धि मूलप्रवृत्तिप्रभवस्थानं शीषर्ण्यनाड्यो[3] भवन्ति । सुतरां मूलप्रवृत्तयः सहजक्रियाऽपेक्षया जटिलतरा भवन्ति । यदि सहजक्रिया प्रतिनियता कर्तुं शक्यते, समीचीनं हि तत् । नहि तेन मूलप्रवृत्तिसहजप्रवृत्तिस्वरूपभेदमपि तिरोहितुं शक्यते । सहजक्रियाः प्रतिनियता भवन्ति, इत्येतावता सिद्ध्यति यत् स्यान्मूलप्रवृत्तीनां मार्गान्तरीकरणं परिशोधनं दमनं वा परिस्थितिषु नियन्त्रणेन, यथा पैवलोवमहोदयाभ्यां प्रदर्शितप्रयोगजातैः सहजक्रियाणां प्रतिनियतत्वं सम्भाव्यते । यथा सहजक्रियाणामस्ति शिक्षणविधावुपयोगस्तथैव मूलप्रवृत्तीनामपि परिशोधनेन मार्गान्तरीकरणेन यादृशी मानवसामाजिकसंस्कृतिविज्ञानसंस्थासम्यतोत्कर्षावस्था साम्प्रतं वर्तते, सा तस्मादप्यूर्ध्वं या काचिद् दैवी पराकाष्ठा भाविनि काले सम्भवेत् सा च सर्वथैव सम्भाव्यते । अतः सहजक्रिया स्वरूपतो निम्नस्तरीयानधीतक्रियात्वान्नहि मूलप्रवृत्तेः स्थानापन्ना भवितुमर्हति । ये तथा कर्तुमुत्सहन्ते, ते मूलप्रवृत्तिस्वरूपमनवधार्यैव तथाविधां भ्रान्तिं जनयन्ति ।

---

१. तुलनार्थम्—Conditioned reflex.
२. तुलनार्थम्—Optic thalamus.
३. तुलनार्थम्—Basal genglia.

१३. नहि मूलप्रवृत्तयोऽभ्यासरूपाः

ननु सर्व एव प्रौढमानवस्य व्यवहारोऽधीतक्रियाणां पुञ्जीभूत एव लक्ष्यते। किन्तर्हि मूलप्रवृत्तिसत्त्वसमाश्रयणस्य कारणम् ? नहि काचन मूलप्रवृत्तिः स्वकीये मूलरूपे मानवेषूपलभ्यते; प्रौढानां तु वार्ता कुतो बालकेष्वपि नोपलभ्यते। अतो मूलप्रवृत्तीनामङ्गीकरणं व्यर्थमेवेत्याशङ्कायां सम्प्राप्तायां वयं ब्रूमः—सन्ति हि खलु मूलप्रवृत्तयो यथा पशुषु तथा मानवेषु नैसर्गिकाऽनधीताऽनायासप्रवर्तिताऽप्रतिनियतसहजक्रियारूपा । तुलनात्मकमनोविज्ञानविशारदैरुद्घाटितं तथ्यमिदं यदस्ति हि सुदृढं साम्यं मानवपशुस्वभावयोः, मूलप्रवृत्तिभागित्वात्तेषाम्। ये व्यवहारवादिनो मूलप्रवृत्तिसङ्घटने वंशपारम्पर्यजनितगुणसंक्रमणभीत्या मूलप्रवृत्तीनामङ्गीकारेऽप्यव्यवस्थितचेतसः प्रतीयन्ते, ते पक्षपातादेवैवं कुर्वन्तीति वयं मन्यामहे। नहि केनाननुभूतमिदं सारल्यसमन्वितं बालकानामौत्सुक्यम्, येन ते परिस्थित्युपलब्धनिखिलवस्तूनामध्ययनं साक्षात् कर्तुमिच्छन्ति, औत्सुक्यमूलप्रवृत्तेर्नैसर्गिकत्वादनधीतत्वाच्च। बालिकाः पञ्चषड्वर्षीया एव द्वित्रचतुर्वर्षीया वा पुत्तलिकाशिशुं मृत्तिकानिर्मितं शिशुं गणेशं वा स्वक्रोडेषु कृत्वा वात्सल्यभावान्वितां मूलप्रवृत्तिमूलरूपमनुभवन्ति। कालान्तरे तस्य भावस्य परिष्कार एव जायते, यथा स्तन्यपानादिमूलप्रवृत्तेः परिवर्तितं रूपमधुना प्रौढावस्थायां सर्वथैव विलक्षणं भोजनखादनं किं वा दुग्धपानमुपलभ्यते। शिशूनामात्मप्रदर्शनं क्रोधप्रेरितसम्प्रहारप्रवृत्तिः, सहानुभूतिप्रदर्शनं यदा माता भगिनी वा रोदिति। माता भगिनी तु बालकं किमपि प्रदत्तेऽपि, शिशुस्तु द्वित्रवर्षीयः 'थर्मस'-नामकं दुग्धपात्रं ताडयित्वा तं रुदन्तं मन्यमानः स्वयं रोदितुं तं लालयितुं (चतुर्वर्षीयकन्यावृत्तमिदं) चोपक्रमते। स्मरणीयमत्र यद्धि यतो मूलप्रवृत्तयो नैसर्गिकाः कार्यक्षमा प्रवृत्तयोऽतस्तासामपरिवर्तनीयत्वमपि भवितव्यमिति युक्तिर्नोपयुज्यते। अनेनाग्रहेण व्यवहारवादिनां मैक्डूगलमहोदयानां ग्रन्थानां सम्यक्परिशीलनाभाव एव संसूच्यते। प्राध्यापकप्रवरा मैकडूगलड्रेवरप्रभृतयः सर्वे एवेदमुद्घोषयन्ति यद् वातावरणनियन्त्रणात् मूलप्रवृत्तीनां[1] परिशोधनं मार्गान्तरीकरणं[2] दमनं[3] वा कर्तुं शक्यते, यतो हि मनुष्यः पशूनामपेक्षया बुद्धिविवेकेच्छाकल्पनास्मृतिभाषाविलसितः प्राणी भवति। यदि बुद्धिविवेकपुरस्सरं मूलप्रवृत्तीनां परिवर्तनं सम्भाव्यते, तत्तु प्राणिनां परिस्थित्या साकं सामञ्जस्यस्थापनक्षमतामेव नितरां प्रदर्शयति। मन्ये तेषामयमभिनिवेशो यान्त्रिकवादनिगडितत्वात् प्रसूयते। न चाप्ययं तुलनात्मकमनोविज्ञानेन सह सङ्गच्छते। उपपद्यते च मानवमनोविज्ञानपशुमनोविज्ञानसम्यङ्निरीक्षणप्रसूतमिदं मूलप्रवृत्तिस्वरूपव्याख्यानम्।

१४. मूलप्रवृत्त्यभ्युपगमेनापि मनस एकत्वमक्षुण्णम्

ननु विशिष्टमूलप्रवृत्तिसमाश्रयणेन मनस एकत्वमक्षुण्णं नैव सम्भवति। किमुत जीवधारिण एकीभूता समन्विता वा क्रिया नैव सम्भवति, यतो जायते तस्य विविधासु मूलप्रवृत्तिषु विभाजनम्, यथा मनसो विविधासु शक्तिषु विभाजनं मन्यमानाः शक्तिवादिनो मनसः

१. तुलनार्थम्—Sublimation.
२. तुलनार्थम्—Transformation.
३. तुलनार्थम्—Repression.

समन्वितैकीभावविरहितत्वमापाततोऽङ्गीकुर्वन्ति, एवम्प्रकारेण गाल्टहावर्डप्राध्यापकप्रवरा[1] मूलप्रवृत्तीनामस्तित्वमङ्गीकुर्वाणा अपि मैकडूगलप्रदर्शितचतुर्दशसंख्याकमूलप्रवृत्तिसिद्धान्तमभि स्वकीयामुपेक्षां प्रदर्शयन्ति। इयं समालोचना मैकडूगलमतासम्यगध्ययनप्रोद्भूतेति वयं मन्यामहे। मैकडूगलमहाशयानां मूलप्रवृत्तिव्याख्यानमुदारमस्ति। नहि मूलप्रवृत्तय इतरेतर-सम्पर्कसहयोगव्यावृत्ता भवन्ति मैकडूगलमते। नापि मनसोऽनेन निरङ्कुशविभाजनमापतति, येन प्राक्तनशक्तिवाद इव मनसो विविधपरस्परासहिष्णुविभागेषु विभक्तत्वापत्तिर्भवेत्। अस्ति हि मनसः संयोजनात्मिका शक्तिः, संग्राहिका शक्तिः, यस्या अस्तित्वमस्माभिर्मनसो विकास-विवेचनावसरे द्वितीयाऽध्याये विवृतम्। तया संग्राहिकया शक्त्या विविधासु प्रतिक्रियासु तज्जनकप्रत्यक्षविचारसंवेगस्थायिभावादिषु सामञ्जस्यं स्थाप्यते। नहि तद्विरहितः प्राणी एकीभूतम-द्वैतं व्यक्तित्वमपि धारयितुं क्षमते। यदि सर्वाः शक्तयः सन्नियुक्ताः स्युः, संयोजनशक्त्यधीना भवेयुस्तर्हि नास्त्यत्र काऽपि क्षतिः। मूलप्रवृत्तिस्वरूपं हि तौ स्वीकुरुतः। सन्ति हि ताः। तासां जन्मजातत्वमनायासप्रवर्तितत्वमपि तावाचार्य्यावङ्गीकुरुतः। एवमेव मैकडूगलमहोदयोऽपि विविधमूलप्रवृत्तीनां मनसा संयोजनं स्वीकरोति, तासां परिवर्तनमपि शिक्षाणाभ्यासादिनाऽनुमतमेव, नहि स मूलप्रवृत्तीः स्वतन्त्रेष्वितरेतरनिरपेक्षकक्षेषु विभक्ता मन्यते। अत इयं समालोचनाऽपि नोपपद्यते।

आधुनिकमनोविज्ञाने दृश्यते ह्येका प्रवृत्तिर्यत् केचन मनोवैज्ञानिका मनसो विविध-शक्तीनां प्रत्याख्यानं कुर्वन्ति। ते शक्तिस्थाने व्यापारपदं प्रयुञ्जते। तथा हि ते कथयन्ति यन्नास्ति स्मृतिर्नाम काऽपि मनसः शक्तिः। अस्ति वै मनसो व्यापारः स्मरणमिति। एवमेव ते इच्छारूपशक्तिविशेषमपि निराकुर्वन्ति। त इच्छाऽनुभवनमेषणमिच्छाकरणं वेति व्यापारतया व्यपदिशन्ति। समासत इदं वक्तुं शक्यते यत्ते मनसः शक्तीर्नानुमन्यन्ते। तत्स्थाने मनसः क्रिया व्यापारा वा तैरभिमताः। इयं समालोचनापि स्वारस्यविरहितेति वयं मन्यामहे। नहि कोऽपि व्यापारः स्वजनकशक्तिमन्तराविर्भवति। तदुक्तं हि कुमारिलभट्टाचार्य्यैः श्लोकवार्तिके—"न ह्यसती शक्तिः कर्तुमन्येन शक्यते" इति। अपि चास्त्ययं सत्कार्यवादस्य मूलभूतः सिद्धान्तः। तदुक्तं वै सत्कार्यवादप्रतिपादनवेलायां सांख्याचार्येण ईश्वरकृष्णेन सांख्यकारिकायाम्—

असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्॥ इति।

---

१. द्रष्टव्यम्—Gault & Howard, An Out-line of psychology 183–184 P. P.

'Just this appears to be very nearly implied in some of the older conceptions of instinct And the view has some popular currency to-day. It brings us very near to the old 'Faculty psychology,' with its implication of a divided rather then a unified organism,

शक्तिनिरपेक्षस्तु कोऽपि व्यापारो न प्रसरति। यदि मनसः स्मरणेच्छाकल्पनादिशक्तयो न भवेयुः, कथं तर्हि स्मरणेच्छाव्यापाराणां प्रादुर्भावोऽपि सम्भवेत्! अस्यां समालोचनायां यदभीष्टं तत्त्विदमेव यच्छक्तयः परस्परनिरपेक्षाः स्वतन्त्रा नावगन्तव्याः। सन्ति हि ताः संग्राहिका-शक्त्यधीनाः, मनसः संयोजनशक्तिपरिनियन्त्रिताः। तन्नियन्त्रणं न केवलं विचाराणामेव भवत्यपि तु क्रियाणां संवेदनादिभावानामपि। विचारेच्छास्थायिभावादयो यदि मनोव्यापारतया भवितुमर्हन्ति, किन्त्वेषामुत्पादनक्षमा मनसः काऽपि शक्तिर्नास्ति? भेदात्मकेऽनुभवे एकत्वग्रहणं जीवस्य लक्षणम्। युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति स्थाने। अयुगपद्घटितानां मनो-व्यापाराणामेकीभावेन ग्रहणम्, संयोजनमिति यावत्, मनस एव कार्यम्। अत्र 'मनः' इति पदं चैतन्यसमानार्थकम्। तेषां वचने विरोधाभासप्रदर्शनाय नातीव प्रपञ्चयिष्यते, इत्युक्त्वा वयं विरमामहे। यदि मूलप्रवृत्तयोऽपि मनसो विविधाः शक्तयो भवेयुस्तर्हि नास्त्यत्र किमपि वचनीयमिति वयं मन्यामहे। अन्यच्च स्मरणीयमस्मिन् विषये यन्मैकडूगलमहोदयैर्मूलप्रवृत्ति-व्याख्यानावसरे 'कायिकमानसिकः स्वभावः' इति पदं मूलप्रवृत्तिपरिभाषायां व्यवहृतम्। 'स्वभाव' इत्युक्ते शक्त्यन्तरभावोऽपि जायते, नहि तस्य निराकरणमपि समञ्जसमिति त्ववदातमेव।

१५. मूलप्रवृत्तित्रयमतस्यासमीचीनत्वम्

सन्ति हि खलु केचन मनोवैज्ञानिका ये चतुर्दशमूलप्रवृत्तीनां स्थाने केवलं मूलप्रवृत्तित्रयमेवाङ्गीकुर्वन्ति। तथा हि तेऽभ्युपगच्छन्ति यन्मानवव्यवहारस्यानुव्याख्यानं तिसृभिरेव मूलप्रवृत्तिभिरहङ्कारकामप्रवृत्तिसमूहप्रवृत्तिभिरेव कर्तुं शक्यत इति। तन्मते त्र्यधिक-मूलप्रवृत्तीनामङ्गीकरणमनावश्यकमेव। अस्य मतस्य समालोचनात् प्रागेवेदं स्पष्टीकरणं समीचीनं प्रतिभाति यन्मूलप्रवृत्तिरिति वचनेन किमस्ति तेषां तात्पर्यमिति। मूलप्रवृत्तीनां समीहितपुरुषा-र्थानाञ्च ते त्रिधा वर्गीकरणं प्रतिपादयन्ति। तद्यथा—

(क) मानवस्य अहङ्कारप्रवृत्तयस्ता भवन्ति यास्तस्याहम्भावं संरक्षन्ति संवर्धयन्ति च। प्रकृत्या सह तुमुलसङ्घर्षेऽन्यैः प्राणिभिश्च सह स्वकीयमस्तित्वं स्वकीयां सम्पत्तिं संरक्षितुं स एतासां मूलप्रवृत्तीनामनिवार्य्योपयोगित्वमनुभवति।

(ख) कामप्रवृत्त्यादयस्ते शक्तिवेगाः सन्ति येभ्यो मानवो विपरीतलिङ्गिकप्राणिभिः सार्धं प्रेमसम्बन्धं विस्तारयति, प्रगाढीकरोति च।

(ग) समूहप्रवृत्तयस्ते शक्तिवेगाः सन्ति यैः प्रवर्तितः कोऽपि मानवोऽन्यैः सामाजिकैः प्राणिभिः सह योगं प्रदत्ते, सामाजिकहितगोपनाय च युद्धादिकेषु प्रवर्तते। आभिः प्रवृत्तिभिः स्वसमूहहितचिन्तनमेव करोत्येतदस्माभिरभिप्रेतम्।

सम्प्रति वयमिदं मतं समालोचयामः। इमास्त्रिविधा मूलप्रवृत्तयस्त्रिसंख्याका मूलप्रवृत्तयो नैव सन्तीति सुनिश्चितम्। इमाः प्रवृत्तयो मैकडूगलमहोदयानुव्याख्यातमूलप्रवृत्तिस्वरूपापेक्षया व्यापकतरा भवन्ति जटिलतराश्चापि। ताभिर्मानवमनोविकासस्योच्चतरीयावस्थाविशेषा द्योत्यन्ते। समासेनेदं वक्तुं शक्यते यन्मैकडूगलमहोदयोक्तमूलप्रवृत्तय एतासु त्रिविधासु प्रवृत्तिषु वर्गीकर्तुं शक्यन्ते। किञ्च कस्याश्चिदप्येकस्या अथवा सर्वासामेवैतासां लक्ष्याभिनिष्पत्त्यर्थमुपक्रमन्ते। उदाहरणतो युयुत्सा मैकडूगलमते सम्प्रहाररूपा मूलप्रवृत्तिः क्रोधसंवेगाभिप्रेरिता भवति; किन्तु सम्प्रहारो योधनं वोपर्युक्तेषु त्रिष्वेव लक्ष्येष्वभिमुखीभूय प्रवर्तते। यथा हि—स्वकीयं

शत्रुविशेषं वारयितुमपि युद्धं प्रवर्तते, प्रतिद्वन्द्विनं पराजित्य स्वाभिलषितां रमणीं वरयितुमपि। अथवा स्वभार्यानुरक्तं पारदारिकं हन्तुमपि युद्धमुपक्रमते। आर्थिकप्रतियोगिताऽपि युद्धकारणमिति तु सुप्रथितमेव। 'जननेतॄणामहमहमिकया युद्धानि जायन्ते' इति तु सुविदितमेव तथ्यमितिहासविचक्षणानाम्। किञ्च, समानशत्रुविरोधावसरे जातिधर्मराष्ट्रसंस्कृतिविशेषसंरक्षणार्थमपि पुरुषा युद्ध्यन्ते। एवम्प्रकारेण योधनं युयुत्सामूलप्रवृत्तिर्वोपर्युक्तलक्ष्यत्रयमेवाभिसन्धत्ते। तत्तदुपयुक्तावश्यकतापूर्तिञ्चावहति, यथा—अर्थावश्यकता, कामानुबन्धिन्यावश्यकता (सम्भोगेच्छा, पुत्रैषणा वा) तथा समूहसंरक्षणविषयिणी आवश्यकता, किं वा स्वजातिहितवाञ्छेति। यदि वयमेतास्त्रिविधा मूलप्रवृत्तीः स्वीकुर्याम तर्हि मूलप्रवृत्त्यन्तर्गतमूलप्रवृत्त्यन्तरस्वीकरणापत्तिर्नूनमापद्येत। अर्थान्मूलप्रवृत्तिशब्दस्यार्थो दन्दोलायमानतयाऽनिश्चित एव भविष्यति। अत्रेदं स्मर्तव्यं यन्मूलप्रवृत्तित्रयमुपर्युपन्यस्तं भाविनं चरमं वा पुरुषार्थं लक्ष्यीकरोति। जटिलतरञ्चेदम्, तस्य तत्तत्कार्यपरिणतिश्च महद्दूरदर्शित्वविचारविवेकेच्छाद्यनन्तरमेव सम्पाद्यते। नहि तथा प्राध्यापकमैकड्गलमहोदयाभिमता मूलप्रवृत्तयः। तास्त्वेकविधाः प्रवृत्तयो भवन्ति, यासां प्रतिक्रिया सम्पूर्णा त्वरितमेव जायते; विचारस्य नास्त्यत्र व्यपेक्षा। अनायासमिमाः प्रवृत्तयः प्रादुर्भवन्ति, अनधीता अनभ्यस्ताश्चैताः। लक्ष्ये प्राप्ते सति सर्वाः क्रियाः शान्ता जायन्ते। यदा चान्यदुत्तेजकं प्रेरयति, प्रवृत्तं वा जायते, तदाऽन्या तदनुकूलमूलप्रवृत्तिर्जन्यते। 'ख'वर्गान्तर्भूतकामप्रवृत्त्याख्यो वेगः प्रागुक्तः। स्पष्टतो मैकड्गलमहोदयाभिमतं प्रजननप्रवृत्तिरूपमुपर्युक्तप्रवृत्तित्रयाऽपेक्षयाऽतीव सरलतरं भवति।

पुनश्च समूहाभिमुखो वेग उपर्युक्ते 'ग'वर्गे सन्निविष्टो मैकड्गलमहोदयोक्तसामाजिकप्रवृत्त्यपेक्षयाऽतीव जटिलतरो भवति। इतरैः प्राणिभिः सह सम्मिलनेच्छा, तैर्विना चैकाकिभावानुभव इति मैकड्गलमहोदयाभिमतमूलप्रवृत्तिकथनाभिसन्धिः। उपर्युक्तसमूहवेगस्य तात्पर्यन्तु नूनमेतस्मादधिकं प्रपञ्चं द्योतयति, यथा—समूहसहयोगः, सामाजिकसंयोजनम्, परस्परं व्यापारविनिमयादिश्च। एते सर्वे व्यापारा नहि तत्क्षणं जायन्तेऽनायासं वा, किन्तु दूरदर्शित्वसुदूरकालिकनियोजनविचारविवेकपुरस्सरमेव तेऽभिनिर्वर्तन्ते।

या याः क्रिया विचारविवेकेच्छादूरदर्शित्वादियुक्ता भवन्ति, तासां विवेचनं सपरिकरं वयमग्रे प्रयत्नाख्येऽध्यायेऽनुव्याख्यास्यामः। मैकड्गलाभिमतमूलप्रवृत्तयस्तु प्रौढविचारपुरस्कृतक्रियाभिर्विलक्षणाः, प्रारम्भिकसरलतररूपत्वान्नैसर्गिकत्वादाशुकारित्वाच्च मूलतमाः प्रतिक्रिया भवन्ति। वस्तुत इमे त्रिविधा वेगाः स्थायिभावादिसमन्विता जटिलतराश्च भवन्ति, यान् वयं व्यक्तिजीवनसम्बन्धेषु दाम्पत्यप्रेमसम्बन्धेषु सामाजिकव्यवहारसम्बन्धेषु च बिभृमः।[1]

१६. अभ्यासप्राचुर्येऽपि मूलप्रवृत्त्यभ्युपगमस्याप्रत्याख्यानम्

सिद्धास्तर्हि प्रागुक्तरीत्या मैकड्गलमहोदयाभिमता मूलप्रवृत्तयो नैसर्गिकवेगरूपाः। ननु पशूनां जीवने मूलप्रवृत्तीनां सत्त्वं भवेन्नाम, किन्तु प्रौढमानवव्यवहारेऽधीतक्रियाऽभ्याससमन्विते तासां सत्त्वं नैवोपपद्यते। एवम्प्राप्तायामाशङ्कायां वयं ब्रूमः—दृश्यते हि

१. द्रष्टव्यम्—J. Nicole, 'Normal and Abnormal Psychology,' 1948, George Allen & unioin Ltd., Page 12.

शैशवे मूलप्रवृत्तीनां प्रारम्भिकः प्रादुर्भावः, तत्तत्समीचीनविकासोपयोगिकालेषु। यदा चाऽसामान्या मानसिकावस्थाविशेषा जायन्ते, तदा मूलप्रवृत्तिदमनजनितमानसविकारग्रन्थिभ्यो मूलप्रवृत्तीनां सत्त्वमुद्धाव्यते मनोविश्लेषणकुशलैः। अतो मूलप्रवृत्तिविषये नास्ति सन्देहावकाशः। किन्तर्हि मध्ये मूलप्रवृत्तीनामभावो वर्तते? मूलप्रवृत्तिमभ्युपगम्यालोचकानामियमप्युक्तिर्नैव युज्यते। नहि वयमधीतक्रियाणामभ्यासानां वा मूल्यमवगणयितुमिच्छामः। नहि तैर्विना मानसिको विकासः सम्भाव्यते, यथायं सामाजिकसंस्थासु व्यवहरतः सदाचारशीलसम्पन्नमानवस्य समुपलभ्यते। अस्माकमभिप्रायस्तु तावदयमेव यदभ्यासाध्ययनशिक्षणानुकरणादिभिरेव मूलप्रवृत्तीनां सुसंस्कृतं परिवर्तितं वा रूपं सर्वसामाजिकव्यवहारेषु व्यक्तिगतशीलादियुक्तव्यवहारेषु चोपलभ्यत इति। महर्षिर्बादरायणोऽपि "पश्वादिभिश्चाविशेषात्"[1] इति सूत्रेण मूलप्रवृत्तीनामस्तित्वं सर्वेषु पशु-मानवेषूररीकरोति। यावन्मनसः संयोजिका शक्तिर्विभिन्नव्यवहारान् मूलप्रवृत्तिपरिवर्तितरूपान् सन्नियोजयति, व्यक्तित्वमद्वैतमिव सँल्लक्ष्यते, सर्वाश्च क्रिया विचाराभिप्रेरिता अधीता इवाभ्यस्ता इव च सँल्लक्ष्यन्ते, यदा च संयोजकशक्तिदौर्बल्यान्मूलप्रवृत्तिप्रकर्षत्वाच्च व्यक्तित्वं द्वैधीभूतं जायते, तदा मूलप्रवृत्तीनामनन्यतमाया नग्नीभूतं रूपं निष्प्रत्यूहं दरीदृश्यते। अतो मूलप्रवृत्तीनां प्रत्याख्यानं नैवास्ति समीचीनम्। मैकडूगलड्रेवरप्रभृतीनां परमरमणीयविवेचनस्य सम्यगध्ययनं निष्पक्षं यदि भवेत्तर्हि सर्वासामेवैतासां शङ्कानां निरसनं स्वयमेवापद्येत।

१७. सामान्यप्रवृत्तयः

मूलप्रवृत्तिस्वरूपमनुव्याख्यातम्। वयं सम्प्रति सामान्यप्रवृत्तीरनुव्याख्यास्यामः। ननु मूलप्रवृत्तिभ्यः कथं सामान्यप्रवृत्तयो भिद्यन्ते, यतो हि मूलप्रवृत्तिरपि जातिविशेषस्य सामान्यं गुणं निर्दिशति? नूनं सामान्यप्रवृत्तयोऽपि मूलप्रवृत्तय इव जन्मजाता अनायासप्रवर्तितास्त्वरित-प्रतिक्रियारूपा भवन्ति। सामान्यप्रवृत्तयोऽपि मूलप्रवृत्तय इव अनधीता अनभ्यस्ताः क्रिया भवन्ति, किमस्ति तावत् तासां मूलप्रवृत्तिभ्यो भेदजनकं प्रयोजकम्? प्राध्यापकमैकडूगलमहोदया मन्यन्ते यत्संवेगविरहितत्वात् सामान्यप्रवृत्तयो मूलप्रवृत्तिभ्यो भिद्यन्ते। नहि सामान्यप्रवृत्तिषु तादृशसंवेगोत्कर्षः सँल्लक्ष्यते, यादृशोऽयं मूलप्रवृत्तिषु जायते। अस्ति ह्युत्तेजको विषयः सामान्यप्रवृत्तिषु यथा मूलप्रवृत्तिषु, अस्ति च त्वरिता प्रतिक्रिया सामान्यप्रवृत्तिषु यथा मूलप्रवृत्तिषु; किन्तु तन्मध्ये संवेगाभावो वर्तते। मैकडूगलमहाभागानुसारं सामान्यप्रवृत्तयश्चतुर्विधा भवन्ति, ता यथा—(१) संकेतः, (२) अनुकरणम्, (३) सहानुभूतिः, (४) क्रीडनञ्चेति। सामान्यप्रवृत्तयोऽपि खल्वभ्यस्त-क्रियाऽपेक्षया सरलतरा भवन्ति, तास्वपि तथाविधं जाटिल्यं नास्ति यथाविधं सुविचारितैच्छिकप्रयत्नेषु किं वा मूलप्रवृत्तिषु लक्ष्यते, तथापि ताः सहजक्रियाऽपेक्षया मेरुदण्डस्थनाडीसम्बन्ध-जन्यक्रियाऽपेक्षया नूनं किञ्चिज्जटिलतरा भवन्ति।

१८. संकेतः

कस्तावत् सङ्केतोऽयम्? वृद्धोक्तम् 'अश्वो धावति' इति वाक्यं श्रुत्वा बालकोऽवगच्छति यद् यो धावति स अश्व इति। नहि बालकोऽश्व इति पदार्थोपलब्धौ किञ्चिदपि सन्दिह्यति। सन्देहानवकाशस्य किं कारणम्? गुरुजनेषु श्रद्धा विश्वासश्चेति। मनोवैज्ञानिकपारिभाषिकपदावल्यां 'आदरसङ्केतः' इति व्यपदिश्यते। श्रद्धासङ्केतजन्यत्वादश्वज्ञानं सन्देहास्पदं नैव भवितुमर्हति।

1. द्रष्टव्यम्—वेदान्तसूत्रम्।

परमविस्रब्धानां मातापितृगुरुचरणानां वचनानि यत्पदार्थज्ञानं जनयन्ति तत् पुत्रशिष्यादीनां सन्देहास्पदं न जायते। कस्मात् ? नैसर्गिकसङ्केतग्रहणशक्तेः। अस्ति हि बालकेषु सर्वेषु मानवेषु च जन्मजाता अनधीता स्वभावायत्ता सङ्केतग्रहणक्षमता यया प्रवृत्तोऽयं बालको वृद्धवचनमवितथं मन्यते, तथैव चावगच्छति व्यवहरत्यपि। किञ्चान्यावसरेषु 'शुक्ला गौः' इत्यन्येन बालकेनोक्ते सत्यपरो बालकः प्रत्याख्यानं करोति तद्वचनस्य—'नेयं शुक्ला गौः, प्रत्युत पिङ्गला' इति। एवम्प्रकारेण विवदमानौ तौ स्वमातरमुपगच्छतः। यदा हि सा ब्रवीति—'गौरियं पिङ्गला' इति, तदा द्वावेव बालकौ तूष्णीम्भूत्वा तस्या वाक्यं प्रति विश्वस्तौ। विवादोऽपि समाप्यते। कथन्नु खल्विदमायाति ? द्वयोरेव बालकयोरस्ति स्वभावान्तर्निगूढा सङ्केतक्षमता, यया परस्परं विवदमानयोरपि मातुर्वाक्यश्रवणानन्तरमचिरादेव निखिलोऽयं विवादः परिसमाप्यते। अनेनोदाहरणेन संकेतस्वरूपं स्फुटं जायते। वयं संकेतमेवम्प्रकारेणाऽनुव्याख्यातुं शक्नुमः—न्यायसरणिमननुसृत्य तदभावे वाऽन्योक्तिविस्रब्धत्वजनकं यत्साधनं स संकेत इति निगद्यते'। संकेतमात्रा चेवमुक्तवाक्याऽङ्गीकारत्वनिर्भरा। संकेताख्यसामान्यप्रवृत्तौ 'ननु, न च' इत्यादि विकल्पचिन्तनं नैवापतति। नहि सर्वदा शब्दादिभिरेव संकेताः प्रदीयन्ते। संकेतस्य मौलिकं स्वरूपन्तु प्रयोगाङ्गुल्यादिकेङ्गितैः स्फुटं लोके। चक्षुःपरिचालनं प्रान्तपर्यन्तमपि संकेताभिधानं तदर्थमभिव्यनक्ति। नह्येतदर्थाभिव्यञ्जनमस्माभिरत्राभिप्रेतम्। अनायासं युक्तिविचाराभावे विश्वासजनकत्वमभिमुखीकृत्यैवाऽस्मिन् ग्रन्थे जन्मजातमानवस्वभावस्याऽङ्गीभूतसंकेताख्यसामान्यप्रवृत्तेः प्रपञ्चं करिष्यते। अन्यप्रवृत्तिभिर्जन्मजाताभिः सहेयमपि प्रवृत्तिर्नैसर्गिकी। संकेतास्तावच्चतुर्विधा भवन्ति, यथा—आदरसङ्केतः किं वा श्रद्धासंकेतः, समूहसंकेतः, आत्मसंकेतः, विरोधिसंकेतश्चेति। श्रद्धासंकेतस्त्वनुव्याख्यातः। आशैशवं बालकः श्रद्धासंकेतमादाय समग्रज्ञानसञ्चयं करोति। यदि 'अ, आ'—स्थाने शिशुः 'क, ख' इत्यवगच्छेत् तस्य ज्ञानवृद्धिर्मनागपि नूनं न भवेत्। पितृभ्यां गुरुजनैश्च यत्स गृह्णाति, तदञ्जसैव विश्वसिति, हृदयङ्गमञ्चैतज्जायते। द्वितीयप्रकारकः संकेतोऽस्ति समूहसंकेतः। यदा कस्मिंश्चित्समुदाये भवामो वयं तदा नहि व्यक्तिगतसिद्धान्तानुसारमेव स्वकीयाचरणं सुविचार्यैव वर्तामहेऽपि तु बहुमतमवलम्ब्य तां बहुजनसंवेगोत्कर्षोत्पादितां प्रवृत्तिं दृष्ट्वैव तथैवाचरामो यथा अन्ये सभ्या आचरन्तीति। कथं तावदिदं सम्पद्यते ? नैसर्गिकसामान्यप्रवृत्तिजन्यं खल्विदमाचरणम्। स्मरणीयम्, यदस्मिन् ग्रन्थे 'सामान्यप्रवृत्तिः' इति संज्ञापि जन्मजातानायासप्रवर्तितसंवेगविरहितप्रवृत्तिबोधनाय विशिष्टेऽर्थं एव प्रयुक्ता भविष्यतीति। यदा कोऽपि श्रमिकसमुदायो बहुमतमादाय मिलाख्यौद्योगिकसंस्थानसञ्चालकं प्रति स्वकीयरोषं सामूहिकमुच्चैर्नादैस्तुमुलैः प्रदर्शयति, नहि तदा बुद्धिविवेकमन्तोऽप्यन्यथा विमर्शयितुं क्षमन्ते, नाऽपि स्वमन्तव्यप्रकाशनं वा कुर्वन्ति। अनुभूतमिदं प्रचुरं १९९९ वैक्रमाब्दे भारतीयस्वतन्त्रतासंग्रामे यदा काऽपि जातीयपरिषदन्यपुरुषाचरणं विगर्हितवती, नहि तदा निन्द्यमानपुरुषाय कस्यापि सहानुभूतिरुत्पद्यते स्म। आत्मसंकेतश्च तृतीयः। यदा हि कोऽपि मित्रमन्यं कियत्कालानन्तरं दृष्ट्वा ब्रवीति—'दुर्बलोऽसि मित्र ! किं कारणमस्ति ?' अपरमित्रं स्वयमेव विचारयति, किं तावदहं दुर्बलः सञ्जातोऽस्मि ? स्वं दुर्बलं मन्यमानो न तथैव सञ्जायते, यथा स स्वयमेव मन्यते। यदि च तस्मिन्नेव क्षणे स बद्धपरिकरो भूत्वा व्यायामभोजनपरिष्कारविश्रामादिभिः स्वकीय स्वास्थ्यस्य पुनरुद्धारं करोति, नूनमात्मसंकेतेन स कालान्तरेऽनामयो भवति। आत्मसंकेतस्य महत्त्वमग्रेऽप्यस्माभिरसामान्यमनोविज्ञानविवेचनावसरे प्रदर्शयिष्यते। विस्रब्धपुरुषजन्य

आत्मसंकेतो भवति। विरुद्धसंकेतस्तुरीयो भवति। यदा बालकं कश्चिदन्योऽविस्रब्धः सामिविस्रब्धो वा आदिशति 'द्वारं पिधेहि' इति, तदा स नहि द्वारं पिनद्धि, प्रत्युत द्वारं प्रति गच्छत्येव न। नहि प्रवृत्तिरियं सर्वदैकस्मिन् बालके सर्वेषु वा बालकेष्वेकदा दृश्यते। किन्तु इयमपि प्रवृत्तिरुपलभ्यते, नैसर्गिकी चेयमपि प्रतिभातीति वयं ब्रूमः। संकेतविषये केचन विद्वांसः सन्दिग्धविषया भवन्ति। विशेषतस्तर्कप्रणालीमनुसरतां विवेकवतां विदुषां प्रबलेच्छाशक्तिमतां संकेतसामान्यप्रवृत्तिस्वरूपावधारणविषये चित्तं प्रत्ययं प्रायो नाधत्ते। सम्मोहनादिप्रयोगेषु सुनिर्णीतं संकेतस्वरूपमर्वाचीनमनोविज्ञानक्षेत्रे सम्प्रत्यवतिष्ठते। सम्मोहने संकेतव्यापारं वयमग्रे प्रदर्शयिष्यामः।

१९. अनुकरणम्

अनुकरणप्रवृत्तिर्द्वितीया सामान्यप्रवृत्तिः, या मानवेषु पशूनामिव विद्यते। वानराणामनुकरणन्तु सुप्रथितमेव लोके। आनन्दकन्दश्रीकृष्णचन्द्रभगवताऽप्युक्तं वचनं श्रीमद्भगवद्गीतायामनुकरणास्तित्वमहत्त्वख्यापनायालम्। तथा हि—

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते[1]॥

भगवद्वचनमपि नैसर्गिकं लोकस्वभावमनुकरणमूलप्रवृत्त्याख्यमुररीकरोति। दृश्यते हि ब्राह्मणस्याध्ययनाध्यापनशीलस्य बटुको बाल्यादेवाध्ययनपरायणो भवति। द्वित्रवर्षीय एव स पत्राणि कानिचिदादाय, पट्टिकां वा स्वभ्रातुरादाय पाठशालां गन्तुमिच्छति, नाट्यति च। किं कारणम्? अस्ति हि शिशौ नैसर्गिकी सामान्यप्रवृत्तिरनुकरणाख्या। तत्प्रेरित एव स्वपितरं पुस्तकं वहन्तं भ्रातरं वा पाठशालां गच्छन्तं दृष्ट्वा सोऽपि पत्राण्यादातुं पाठशालां वा पट्टिकामादाय गन्तुमिच्छति। अपि च दृश्यते लोके कुविन्दस्य पुत्रस्य पटनिर्माणे रुचिः। अनुकरणेन अनायासमेव स पट्टनिर्माणविधिमवगच्छति। बालिका अनुकरणेनैव पाचनक्रियां केशवस्त्ररचनां कलात्मकतन्तुगुम्फनादिकमवगच्छन्ति। अनुकरणन्तावत् सिद्धं सांसिद्धिकं मूलप्रवृत्तिरूपमध्ययनस्य चरममुपयोगि साधनम्। शिक्षकाश्च सुचरिता भवेयुर्यतो हि तासामाचारणस्यान्तेवासिचरित्रनिर्माणे गरीयान् प्रभावो दरीदृश्यते। अनुकरणविषये मनोवैज्ञानिकानां विविधमतानामुपन्यासोऽप्यस्माभिरत्र प्रपञ्च्यते, येन तत्स्वरूपं स्फुटतरं सञ्जायेत।

२०. थार्नडाइकमतम्

यदाऽन्ये मनोवैज्ञानिका मन्यन्ते यद् बालकोऽनुकरणादेव सामाजिकशिष्टाचारभोजनाच्छादनप्रकारविशिष्टशीलसद्वृत्तादिकं बुध्यते, मनोवैज्ञानिकप्रवरा थार्नडाइकमहोदया मन्यन्ते यद्ध्यनुकरणेन शिक्षणं नैव जन्यत इति। यदि शिक्षणमनुकरणप्रभवं भवेत्तर्हि त्रिंशद्वर्षेष्वपि प्रतिदिनं दशघटिकापर्यन्तमनुकुर्वन् कोऽपि बालको विंशतिपेशीप्रकर्षापकर्षजन्यशब्दोच्चारणमनुकरणद्वाराऽभ्यसितुं न प्रभवेत्। तन्मते शब्दोच्चारणे विविधा मांसपेश्यः स्वभावत एव तथाविधकर्मसम्पादनक्षमा भवन्ति। तदर्थं प्रतिनियताः सहजक्रिया एव पर्याप्ताः। दूरत्वज्ञानम्, तौलज्ञानम्, तुङ्गत्वज्ञानञ्चानुकरणेनैव सम्पाद्यते। कथं हि सा सहजक्रिया प्रतिनियता जायते, तद्व्याख्यातं पूर्वमस्माभिः पैवलोवमहोदयानां प्रयोगविवेचनावसरेऽस्मिन्नेवाऽध्याये। अतः

1. द्रष्टव्या—श्रीमद्भगवद्गीता, अ० ३, श्लो० २१

थार्नडाइकमहोदया मन्यन्ते—"नहि शिक्षणमनुकरणजन्यमपि तु प्रतिनियतसहजक्रियाजन्यं सम्बद्धसहजक्रियाजन्यं वोपपद्यते" इति ।

थार्नडाइकमहोदयानां मतस्यांशिकासमीचीनत्वन्तु स्फुटमेव। नह्यस्त्यस्माकं वैमत्यं यत्प्रतिनियता सहजक्रियाऽपि महत्त्वपूर्णशिक्षणप्रकारो भवति । किन्तु अनुकरणं शिक्षणजनकं नास्तीति नैवानुभवेन साकं सङ्गच्छते। शब्दोच्चारणरूपा सहजक्रिया सर्वेषु मानवेषु समाना, सहजक्रियात्वात्। कथन्तर्हि यवनानीफ्रेञ्चजर्मनसंस्कृतप्राकृतापभ्रंशार्यभाषाभेदः सम्पद्यते? अस्ति चैकस्या भाषाया एवोच्चारणे देशकालनिमित्तैर्महान् भेदः। नहि सर्वमिदं वैचित्र्यमनुकरणं विनोपपद्यते। मन्येऽनुकरणजन्यं भाषोच्चारणशीलरदाचारवेषभूषादिप्रयुक्तं साम्यं वैचित्र्यमिति।

२१. अनुकरणसामान्यप्रवृत्तेर्वर्गीकरणम्

अनुकरणाख्यां सामान्यप्रवृत्तिमङ्गीकुर्वाणा अन्ये मनोवैज्ञानिका अनुकरणं वर्गीकृत्यानुव्याख्यायन्ते। वयमत्र कर्कपैट्रिकड्रेवरमहोदयाभ्यां मनोवैज्ञानिकशिरोमणिभ्यां प्रदर्शितं वर्गीकरणद्वयमत्र समासतोऽनुव्याख्यास्यामः। प्रथमं तावत् कर्कपैट्रिकमहोदयोक्तं वर्गीकरणं व्याख्यास्यामः, यन्मैकडूगलकृतवर्गीकरणेन सह महत् साम्यं बिभर्ति। कर्कपैट्रिकमहोदयाः पञ्चप्रकारकमनुकरणमनुमन्यन्ते। तद्यथा—

(१) **सहजानुकरणम्**—यथा जृम्भमाणमन्यं पुरुषं दृष्ट्वाऽपरोऽपि जृम्भणप्रवृत्त्यभिमुखो भवति।

(२) **स्वाभाविकमनुकरणम्**—यथाऽन्यं पुरुषं किमपि कर्म कुर्वन्तं दृष्ट्वा कोऽपि मानवः स्वयमेव तत्कर्म कर्तुमभिप्रवृत्तो भवति। छात्रावासे स्वकक्षस्थमन्यं छात्रं द्वादशवादनं यावद्रात्रौ पठन्तं दृष्ट्वाऽपरोऽपि बद्धपरिकरो भूत्वा तद्वदेवाधीते। एकां स्त्रीं वेणीद्वयं रचमानां दृष्ट्वान्याऽपि काचिदापणादचिरादेव वेणीद्वयक्रयार्थं गच्छति, आनयनान्तरञ्च तां तथैव रचयति। एवम्प्रकारेण प्रकारभेदात् पुरुषबालकस्त्रीवृद्धेष्विदमनुकरणं स्वेच्छयैव व्यवह्रियमाणं दरीदृश्यते।

(३) **अभिनयानुकरणम्**—बालिकाः स्वीयपुत्तलिका भोजयन्ति, तासां विवाहांश्च परस्परं रचयन्ति। बालका मयूरपुच्छानि धारयित्वा वानराश्च भूत्वाऽपरे राक्षसानां मृण्मयानुकृतिमुखानि धारयित्वा रामरावणयोर्युद्धमभिनयन्ति। पित्रोरपि दैनिकानामाचरणानां व्यवसायविषयकाणामनुकरणं शिशुभी रहसि क्रियत एव। बाल्यकालिकं पार्वत्याः कियत् सरसमभिनयानुकरणोदाहरणं महाकविकण्ठाभरणेन रससर्वस्वेन कालिदासेन प्रस्तुतम्। तथा हि—

मन्दाकिनीसैकतवेदिकाभिः
सा कन्दुकैः कृत्रिमपुत्रकैश्च।
रेमे मुहुर्मध्यगता सखीनां
क्रीडारसं निर्विशतीव बाल्ये॥[1]

(४) **सप्रयोजनात्मकमनुकरणम्**—प्रयोजनविशेषेणोपयोगिना प्रेरितः सन् यदा कोऽपि मानवोऽन्यस्यानुकरणं करोति तत्तदा सप्रयोजनात्मकमनुकरणमुच्यते, यथा केचन काष्ठकलाविशारदाः

---

१. द्रष्टव्यम्—कुमारसम्भवम् १।२९

काष्ठेन बहूनि यन्त्राणि निर्मातुं प्रभवन्ति, यथा वान्यनिर्मितं चित्रं दृष्ट्वा सर्वकारप्रदत्त-पुरष्कारप्राप्त्यर्थमन्योऽपि रम्यतरं चित्रं निर्मिमीते।

(५) आदर्शानुकरणम्--महापुरुषाणां महात्मगान्धीमहर्षिदयानन्दलोकमान्यतिलक-महामनोमालवीयपण्डितजवाहरलालनेहरूप्रभृतीनां जीवनवृत्तज्ञानसमलंकृतो बालको वयःसन्धिकालेऽन्यतमस्य महापुरुषस्यादर्शमनुकरोति। चरित्रविकासार्थमस्ति हि खलु तस्य नितरामुपयोगित्वम्। शैशवे तु प्रायो बालकस्य स्वपिता गुरुर्वादर्शो भवति, बालिकानामपि तथैव मातादर्शरूपा भवति कुलीनेषु गृहेषु। आत्मसंकेतप्रयुक्तं स्वविनिश्चयपुरस्सरमादर्शानुकरणं महत्त्वाय कल्पते[1]।

२२. ड्रेवरमहोदयोक्तं वर्गीकरणम्

ड्रेवरमहोदयैर्मैकडूगलकर्कपैट्रिकमहाभागोक्तरीत्या पञ्चसु वर्गेषु वर्गीकरणमनुकरणस्य नैवाङ्गीक्रियते। तेषां मतेऽनुकरणं द्विविधं भवत्यैच्छिकमनुकरणमनैच्छिकञ्चानुकरणमिति[2]। ऐच्छिकमनुकरणं बालकस्य स्वकीयनिर्णयाध्ययनप्रयुक्तं भवति। अनैच्छिकञ्चानुकरणं यदा बालकः स्वयमेव यदृच्छयानुभूतसामाजिकसंस्थाजातसंस्कारमनायासमात्मसात्कृत्यानुकरोति। इदं वक्तुं शक्यते नहि सोऽनुकरोत्यनुकृतः स सञ्जायत इति, यतो हि कर्तृत्वमिच्छाजन्यमेवोद्भाव्यते; तथापि मनोवैज्ञानिकदृष्ट्यानैच्छिकमनुकरणमस्त्यनुकृतेश्चरमं रूपम्, सुसूक्ष्मत्वात्। यदानुकरणं बालकेन क्रियते तदा 'अहमनुकरोमि' इति ज्ञानं तस्य नैव विद्यतेऽतोऽनैच्छिकमनुकरणमचेतनमिव प्रतीयमानं सुसूक्ष्मं भवतीति।

ड्रेवरमहोदयैरन्यत्प्रकारेणाप्यनुकरणस्य वर्गीकरणं समुपबृंहितम्[3]। तद्यथा—दृश्यानुकरणं विचारानुकरणञ्चेति। दृश्यानुकरणन्तु दृष्टपदार्थजन्यमनुकरणं भवति। इदमनुकरणं विशेषेण दृश्यमानपदार्थस्य चित्राङ्किस्यैव सम्पद्यते। विचारानुकरणन्तु विचारस्मृतिकल्पनोद्भूतप्रत्यय-सरणिगुम्फितं भवति। विचारप्राधान्यान्मनःप्रयोक्तृत्वाद्वा विचारानुकरणस्य सार्थकत्वमिति।

२३. सहानुभूतिः

केनापि पुरुषेण सह तद्दुःखहर्षानुभवनं सहानुभूतिरित्यभिधीयते। दुःखिनं दरिद्रं वा दृष्ट्वाप्लावितमानसो भूत्वा मानवः कदाचन तेन सह रोदिति साहाय्यञ्चार्थिकं प्रदत्ते। इयं सहानुभूतिः सामान्यप्रवृत्तिः समाना पुरुषेषु पशुषु च। नैसर्गिकी चेयम्। 'अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्' इति महाकविभवभूतिनिर्दिष्टं सहानुभूतेश्चरममुदाहरणम्। मैकडूगलमहोदया

---

१. द्रष्टव्यमेते क्रमशः प्रकाराः—
 (1) Reflex imitation.
 (2) Spontaneous imitation.
 (3) Dramatic Imitation.
 (4) Purposeful imitation.
 (5) Idiealistc imitation.

२. तुलनार्थमेते क्रमशः—(1) Deliberate imitation.
 (2) Unconscious imitation.

३. तुलनार्थम्—(1) Perceptual imitation. (2) Ideal imitation.

मन्यन्ते सहानुभूतिर्द्विविधा भवति—निष्क्रिया सहानुभूतिः, सक्रिया चेति। निष्क्रियायां सहानुभूत्यां कस्यचिद् दुःखज्ञानमात्रेणापरस्य द्रष्टुर्हृदयं दयार्द्रं जायते। नहि तत्र दुःखितेन किञ्चित् कृत्रिमं रूपं हावभावविशेषान्वितं धार्यते, नहि तथा सक्रियायां सहानुभूत्याम्; तत्र तु दुःखितः किञ्चित् कृत्रिमं रूपं बिभर्त्ति, येनेतरेषां चेतांसि करुणार्द्राणि भवेयुः। बालकेषु सहानुभूतिनिदर्शनं सुतरामुपलभ्यते। रुदन्तीं मातरं भगिनीं वा दृष्ट्वा शिशुर्भृशं रोदिति। प्रमुदितायां वा मातरि तां दृष्ट्वा बालोऽपि हर्षातिरेकेण हसति। अतः सिद्धं यन्नैसर्गिकी खल्वियं प्रवृत्तिर्या सहानुभूतिरित्युच्यते, यया प्रेरितश्च सन् मानवः स्वजातीयेतरप्राणिभिः सह, इतरजातीयपश्वादिभिः साकमपि, दुःखादिकमनुभवति। आदिकवेः कविकुलगुरोर्वाल्मीकेः क्रौञ्चपक्षिणा सह सहानुभूतिप्रकाशनन्तु सुप्रथितमेव सुरभारतीचरणचञ्चरीकाणाम्। तथा हि—

मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥

नहि सहानुभूतिरूपमूलप्रवृत्त्यङ्गीकारं विना शोकस्य श्लोकत्वपरिणतिर्व्याख्येया। तथा हि—

तामभ्यगच्छद्रुदितानुसारी, मुनिः कुशेध्माहरणाय यातः।
निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः[१] ॥

नहि केवलं मानवेष्वेव सहानुभूतिनिदर्शनमुपपद्यते, पशुष्वपि सहानुभूतिर्भवति। एकं स्वजातीयं रुदन्तं पक्षिणमाक्रान्तं दृष्ट्वा सर्वे पक्षिणः क्रन्दितुमारभन्ते। नूनं भाषाविकासजन्यमुत्कृष्टप्रौढिङ्गतं मानवसुलभसहानुभूतिप्रदर्शनम्। पशुपक्षिणां करुणभावातिरेकेऽपि भाषाविकासाऽभावे नहि मानवानामिव सहानुभूतिप्रदर्शनवैचित्र्यमुपलभ्यते। सहानुभूतौ पशवोऽपि रुदन्ति, क्रन्दन्ति, विलपन्ति, अश्रूणि च स्रावयन्ति। सम्पोषितं मनोवैज्ञानिकमिदं तथ्यं कविकुलगुरुणापि मैथिलीं भृशं विलपन्तीं दृष्ट्वा। तथा हि—

नृत्यं मयूराः कुसुमानि वृक्षा दर्भानुपात्तान्विजहुर्हरिण्यः।
तस्याः प्रपन्ने समदुःखभावमत्यन्तमासीद्रुदितं वनेऽपि[२] ॥

समदुःखभावमेव सहानुभूतिः।

प्रागुक्तया समवेदनाप्रकाशनप्रवृत्त्या कथं हि खलु सहानुभूतिर्भिद्यते ? अयं प्रश्नो मैकडूगलमहोदयेन नैव विवेचितः। सहानुभूतौ संवेगप्राधान्यन्तु विद्यत एव। अतः सिद्धं तस्याः समवेदनामूलप्रवृत्त्यन्तर्भावत्वम्। करुणरसप्रवर्तिता हि खलु सहानुभूतिः। संवेगवत्त्वान्नहि सा सामान्यप्रवृत्तिर्भवितुमर्हति। प्राध्यापकमैकडूगलमहोदया अपि सहानुभूत्यां संवेगास्तित्वमङ्गीकुर्वन्ति। तथा हि—

"पशुमानवसामाजिकजीवनाय त्रिविधास्ताः पारस्परिकमानसिकप्रतिक्रियारूपाः प्रवृत्तयः। पारस्परिकमानसिकप्रतिक्रियासु प्रत्यक्षतत्प्राप्त्यादिषु मानसिकक्रियाया विचारपक्षः संवेगपक्षः प्रतिक्रियापक्षो वा प्रधानतमो भवितुमर्हति। प्रथमतो यदा कस्यचित् पुरुषस्य किञ्चिद्रूपं विचारो विश्वासो वान्यस्मिन् पुरुषे तत्समं रूपं विचारं विश्वासं वा जनयति, तदा संकेतप्रवृत्त्याविर्भावो जायते। यदा च प्रयोक्तुः कश्चित् संवेगो भावनानुभूतिर्वान्यस्मिन् तत्प्रकारिकां

१. द्रष्टव्यम्—रघुवंशम् १४।७०
२. द्रष्टव्यम्—रघुवंशम् १४।६९

संवेगानुभूतिं जनयति, तदा सहानुभूतिः समवेदनापराख्या प्रवृत्तिरुत्पद्यते। यदा च पारस्परिक-प्रतिक्रिया क्रियापक्षे समुपलभ्यते, प्राधान्येन तस्याः प्रभावेण प्रयोक्तुः क्रिया भावापन्नस्य क्रियास्वात्मसात्कृता सँल्लक्ष्यन्ते, तदानुकरणाख्या प्रवृत्तिरुत्पद्यते" इति।[1]

अतः संवेगवत्त्वात् सिद्धं सहानुभूतिप्रवृत्तेर्मूलप्रवृत्तित्वम्। सहानुभूतेः सामान्यप्रवृत्तित्वन्तु निरसनीयम्, गौरवात्।

२४. क्रीडनम्

जन्मतो दृश्यते हि क्रीडनमूलप्रवृत्तिर्बालकेषु। समाना चेयं मानवेषु पशुषु च। विशिष्ट-संवेगविरहितत्वात्तस्याः परिगणनं सामान्यप्रवृत्तिषु समीचीनमेवेति वयं मन्यामहे। केचन मनोवैज्ञानिकाः क्रीडनसामान्यप्रवृत्तेः स्वतस्त्वं नैव मन्यन्ते। शुनां प्रातरुत्थाय खेलनं सुविदितमेव। बाला अपि खेलाभिर्विना नहि तथाविधाः स्वस्था दृश्यन्ते, यथा खेलन्तः। सामुदायिकजीवनस्य प्रारम्भिकं रूपं खेलास्वेवोपलभ्यते। पितॄणां परस्परं वैमनस्यं मनोमालिन्यं वा बालसुलभक्रीडा-प्रवृत्तिमार्गं कदापि न रुणद्धि। परस्परं क्षणे रुष्टा बालकाः क्षण एव खेलाह्वानेन परितुष्टा जायन्ते। खेलास्वौत्सुक्यरचनात्मकत्वानुकरणादीनामितरप्रवृत्तीनां विकासार्थं सम्यगवसरमुपलभ्यते; अत एव सिद्धं क्रीडाप्रवृत्तेर्महत्त्वम्।

ननु किं क्रीडनमिति पृथक्तः सामान्यप्रवृत्तिरवगन्तव्या ? किमुतौत्सुक्यरचनानुकरणादि-प्रवृत्त्यभिव्यक्तिरूपमेव क्रीडनमिति ? केचन विद्वांसो मन्यन्ते यद्धि खेलनं स्वतः पृथक् सामान्य-प्रवृत्तिर्नास्ति। इदन्तु रचनानुकरणौत्सुक्यादिप्रवृत्तीनामभिव्यक्तिरूपमेवास्तीति। मैकडूगलमहोदया इदं स्वतन्त्रसामान्यप्रवृत्तिरूपेणानुमन्यन्ते। तन्मतमेव साम्प्रतमिति वयमपि मन्यामहे। खेलनं तु नैसर्गिकप्रवृत्तिरूपम्। यदि तस्या नैसर्गिकप्रवृत्तेर्बालसुलभाया उत्तरकाले शिक्षकै रचनाकौश-लौत्सुक्यवर्धनानुकरणसौष्ठवैरुपयोगित्वं सम्पाद्येत, नहि ;तेन तस्याः प्रवृत्तेर्बालसुलभं स्वभावायत्तं स्वतन्त्रं रूपं विनश्यति। भवेद्वा खेलास्वपि बालकानां स्वभावायत्तरचनाकल्पनानु-

---

१. द्रष्टव्यम्—Mc. Dougall, Introduction to social psychology, page 74 (1946 edition)

"They are three forms of mental inter-action of fundamental importance for all social life, both of men and amimals. These processes of mental inter-action, of impression and reception, may involve chiefly the cogntive aspect of mental process, or its affcetive or conative aspect. In the first place, when some presentation idea or belief of the agent induces a similar presentation, idea or belief in the patient, the process is called one of suggestion, when an affective, or emotional exitement of the agent induces a similar affective exitement in the patient, the process is one of sympathy or sympathetic induction of emotion or feeling, when the most prominent result of the process of inter-action is the assimilation of the bodily movements of the patient to those of the agent, we speak of imitation."

करणौत्सुक्यकौशलमभिव्यक्तम् ; किन्तु तेन लेशमात्रमपि क्रीडाप्रवृत्तेः स्वतस्त्वं नैसर्गिकरूपत्वं वा निरस्तुं नैव शक्यते ।

ननु किमस्ति खेलास्वरूपम् ? अथवा क्रीडनप्रवृत्तेः किं कारणम् ? इमं विषयमवलम्ब्य बहूनि मतान्युद्भावितानि । वयमत्र तेषां मुख्यतमानां संक्षिप्तं विवेचनं पुरस्कुर्मः ।

(अ) अतिशयशक्तिमतम्[1]—इदं मतं स्पेन्सरशिलरमहोदयाभ्यामुद्भावितम् । तन्मते जीवनकार्योपयोगिशक्तेर्व्यतिरिक्तोऽपि कश्चन शक्त्यतिरेकः प्राणिषु विद्यते । अवशिष्टायाः शक्तेरुपयोगस्तु केनापि प्रकारेण करणीय एव । अतः क्रीडासु तस्या अवशिष्टशक्त्यंशस्योपयोगः प्राणिभिः क्रियते । यथा हि खलु लोके दृश्यते यद्रेलशकटाख्यस्य बाष्पयानस्येञ्जिनो बाष्पाधिक्यं सुरक्षानलिकया 'सेफ्टीवाल्व' इति यवनभाषाप्रथितया विमुञ्चति, तेनैव प्रकारेण बालका अपि शक्त्यतिरेकं खेलादिरूपेण विमुञ्चन्ति, बहिः प्रदर्शयन्तीति तेषां तात्पर्यम् । इदं मतमंशतः सत्यम् । सरलतमानां विनोदमात्रपर्यवसायिनीनां खेलानां व्याख्यानं नह्यनेन सम्भवति । बालकाश्च क्रीडितुमिच्छन्ति यावन्न ते पूर्णतः क्लान्ता भवेयुः । नूनं रोगिणः प्रवृत्तिः खेलासु प्रायो न दृश्यते । स्वस्थाश्च बालकाः क्रीडाक्षेत्रं गन्तुकामा भवन्ति । अत एवेदं मतमंशतः सत्यम् ।

(आ) पुनरावर्तनमतम्[2]—अस्य मतस्योद्भावका वण्टमहोदयानां शिष्यवरेण्या १९३६ वैक्रमाब्दे जानहापकिन्सविश्वविद्यालयेऽमेरिकादेशे प्रथममनोवैज्ञानिकानुसन्धानप्रयोगशालासंस्थापकाः प्राध्यापकप्रवराः स्टेनलीहॉलमहोदयाः सन्ति । तन्मते बालके जन्मतो यौवनपर्यन्तं खेलादिषु पूर्वजानां संस्कृते रूपं वन्यमानुषजीवनादारभ्योत्तरं विकसदस्ति । एवम्प्रकारेण खेला विविधसभ्यतासंस्कृतिस्तरेषु मनुष्याणामितिवृत्तस्य पुनरावृत्तिरूपाः । धावनं क्रोशनं नूनं पूर्वोचितमृगयाकर्माङ्गमेवेति तेषां तात्पर्यम् । नहीदं मतं समीचीनं प्रतिभात्यस्मान् । अस्ति हि खल्वस्य मतस्य मूलकारणमेका भ्रान्तिर्यदि पूर्वजानां संस्कृतिस्तरविशेषसंस्कारास्तर्हि वंशपारम्पर्येण सन्ततावक्षुण्णाः संक्रमिता जायन्ते, तेन च वंशपारम्पर्यायत्तप्रभावेण खेलास्वपि तथाविधेतिवृत्तसंस्कारविशेषाणां पुनरावृत्तिः सञ्जायत इति । नहि वयमेतां भ्रान्तिमाद्रियामहे । यन्मनुष्यस्वभावे वन्यमानुषतः सभ्यमनुष्यपर्यन्तं नैसर्गिकं संस्कृतिस्तरविशेषजन्यं किमप्युल्लेख्यमन्तरं विद्यत इति मतमेव मूलप्रवृत्तिस्वरूपविचारणेन नोपयुज्यते । स्वाभाविकं प्रवृत्तिवेगरूपं स्तरविशेषानुमानजनकमन्तरं नैव प्रकटयति । सामाजिकसंस्थाविशेषशिक्षणव्यवस्थापुस्तकादिसाधनजातैः पितृचरणकृपासम्प्राप्तैः संस्कृतिरूपे परिवर्तनं नूनं सँल्लक्ष्यते, किन्तु तत्सर्वं वातावरणान्तर्गतं पारम्पर्यं सूचयति, न तु नैसर्गिकस्वभावनिरूढं वंशानुक्रमायत्तम् । अतः खेलास्वपि कथं तस्य संस्कृतिविविधस्तरविशेषजातस्य पुनरावृत्तिः सम्भाव्यते ? अत एवेदं मतं नैवोपपद्यते ।

(इ) विरेचनात्मकं मतम्[3]—इदं क्रीडास्वरूपविषयकं तृतीयं मतं प्रतिपादयति यत्क्रीडनं पूर्वजेभ्यो वंशानुक्रमायत्तानां पाशविकवन्यजीवनोपयोगिप्रवृत्तीनां विरेचनं करोति, अथ

१. तुलनार्थम्—Surplus Energy Theory.

२. तुलनार्थम्—Recapitulation theory of G. Stanley Hall (1846–1924) of John Hopkins University.

३. तुलनार्थम्—Cathartic theory.

वा खेलादिद्वारा बालकस्ताः प्रवृत्तीर्विरेचयति। तदनन्तरं बालकः सुसंस्कृतः सभ्यः सहयोगप्रीति-क्रियाशीलत्वसमन्वितो जायते। विविधाः क्रीडा एवम्प्रकारेण चरित्रोन्नयनसाधनरूपाः, पाशविक-प्रवृत्तिविरेचकत्वादिति तेषामाशयः।

(ई) नष्टशक्तिसम्प्राप्तिनिमित्तकं मतम्[1]—लेजरसमहोदयप्रतिपादितेनानेन मतेनेदं ज्ञायते यच्छ्रान्तः क्लान्तो भूत्वा बालकः पुनर्नष्टशक्तिसम्प्राप्त्यर्थं क्रीडनमभिमुखीभवति। तेन सा तथा विनष्टा शक्तिः पुनरर्जिता भवति। कार्यसम्पादने या शक्तिर्विनश्यति, तस्याः क्षयाद्या क्लान्तिर्जायते, तस्या अपनोदनं खेलाभ्यः सम्पद्यत इति तेषामभिसन्धिः।

(उ) पूर्वाभिनयात्मकं मतम्[2]—मेलब्राशमहोदयप्रतिपादितं कार्लग्रूसमहोदयैः[3] प्रति-संस्कृतमिदं मतं प्रतिपादयति यद् बालको विविधासु क्रीडासु भाविजीवनोपयोगिक्रियाकलापानां पूर्वरूपं दर्शयति। यथा नाटकेऽभिनयरूपे वस्तुभूतात्मकपरिस्थितेरनुकृतिरेव भवति, एवं प्रकारेण खेलादिभिर्बालकोऽग्रमप्रौढजीवनोपयोगिकार्यक्रममनुहरति। प्रकृत्या नैसर्गिकया सा क्षमता बालकाय प्रदीयते यया स भविष्यति विविधक्रियाक्षेत्रेषु सक्षमो भवेत्। एवं प्रदर्शितं खेलादीनामुपयोगित्वं दृश्यते हि लोके। अध्यापकस्य बालक इतरेषां बालकानां कक्षां निर्माय तां शिक्षितुमभिनयति। मार्जारशिशुरपि वस्त्रकन्दुकमुच्छालयति, कराभ्यां प्रसभमाकर्षति, विदीर्यते च, येन भाविमूषकमृगयावसराय तस्य क्षमतोपार्जनं सिद्ध्यति। बालिकाश्च पुत्तलिकामादाय तद्विवाहं रचयन्त्यस्तद्विषयमवलम्ब्य विलपन्त्यस्तद्वियोगे वरयात्रां रचयन्त्यश्च स्वक्रीडासु दरीदृश्यन्त एव। अतः सिद्धं पूर्वरङ्गत्वं विविधक्रीडानां बालकनां भाविजीवनक्षेत्रक्रियोपयोगित्वनिमित्तकमिति तेषामभिप्रायः।

श्रीपर्सनिनमहोदयानां विद्वद्वरेण्यानां मतं वयमप्यनुमोदामहे यद्धि मतान्येतानि नहि सर्वो-शतः सत्यानि, तथाप्यस्ति हि तेषु सर्वेष्वांशिकं सत्यं निहितमतस्तानि परस्परानुपूरकाणीति। अस्मान् त्विदमपि प्रतिभाति यदिदं सर्वमध्ययनं खेलाविषयकं प्रौढदृष्ट्या विवेकोपयोगित्वपुरस्सरया विशदीकृतं नहि बालस्वभावं निसर्गजं लक्ष्यीकरोति, यतो हि बालका मनोरञ्जनायैव मनोविनोदायैव खेलासु प्रवर्तन्ते। खेलासु प्रवृत्तासु यदि तेषां स्वात्मप्रदर्शनक्रोधेर्ष्यादिप्रादुर्भावोऽपि भवेत्त-दपि खेलास्वरूपाय मनोरञ्जनाङ्गीभूतमेवेत्यवधार्यम्। अतो लीलामात्रं शिशूनां खेलनमि-त्यस्माकमाकूतम्।

ननु खेलानां कियन्तः प्रकारविशेषाः ? खेलास्त्वनेकाः। तासां तावत् पञ्चधा वर्गीकरणं कर्तुं शक्यते। इदं वर्गीकरणं विषयप्राधान्यमवलम्ब्यैवावधार्यम्। कार्लग्रूसोक्तरीत्येदं पञ्चधा वर्गीकरण-मित्थमूह्यम्—

(१) परीक्षणात्मकाः खेलाः[4]—यासु बालकः स्वपरिस्थित्यवधारणाय पात्रपुस्तककन्दुक-चमसादिकमादाय परितः सम्यगवलोक्य पुनस्तत्रैव त्यजति।

---

१. तुलनार्थम्—Recuperative theory.
२. तुलनार्थम्—Anticipatory Theory.
३. तुलनार्थम्—Male branche & Karl Groos.
४. तुलनार्थम्—Experimental Play.

(२) **गतिशीलाः खेलाः**[1]—यासु बालका धावन्ति, गतिमन्तो भवन्ति। ताभिः खेलाभिर्बालकानां शरीरावयवानां विकासो भवति।

(३) **रचनात्मकाः खेलाः**[2]—यासु बालकानां विधायिका सर्जनात्मिका मूलप्रवृत्तिर्नवीनप्रकारकखेलोपयोगिवस्तूनामाविष्कारं करोति, यथा गोपा गृहनिर्माणं कुर्वन्ति, वन एव भोजनं पचन्ति, लघु जलाशयं वा खनन्ति, प्राकृतदृश्यानां चित्राणि च लिखन्ति।

(४) **युद्धमयाः खेलाः**[3]—यासु बालकाः करवालयष्ट्यादिशस्त्राणि गृहीत्वा युद्धमयीं क्रीडामभिनयन्ति। यथैकपक्षीया रामस्य सैनिका अपरपक्षीया रावणसैनिका भवन्ति। एतासु खेलासु पराजयविजयभावः प्रधानो भवति, यथा 'कबड्डी' संज्ञकक्रीडायाम्।

(५) **बौद्धिकखेलाः**[4]- यासु बालकानां बुद्ध्युत्कर्षप्रदर्शनस्यावसरो भवति। ताश्च त्रिविधा भवन्ति विचारसंवेगकृत्यनुबन्धित्वात्।

(अ) विचारप्रधाना बौधिकखेला द्यूतादयो भवन्ति।

(आ) संवेगप्रधानाः खेला अभिनयादयो भवन्ति। तेषु साक्षाच्चाक्षुषक्रतुषु साहित्यशास्त्रोक्तनवरसानां समभिव्यक्तिर्जायते। तथा हि—

देवानामिदमामनन्ति मुनयः शान्तं क्रतुं चाक्षुषं
रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा।
त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते
नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधकम्[5]॥

तर्हि संवेगप्रधानासु खेलासु नाट्यमन्यतमम्, नानारसाप्लावितत्वात्।

(इ) कृत्यात्मका मानसिकाः खेलाः, यासु प्रयत्नविशेषस्य प्राधान्यं वर्तते। यथा हि तावदेव हसितव्यं यावन्नाकाशोत्क्षिप्तं मार्जनवस्त्रं भूमावापतति; यश्च बालकस्तदनन्तरमपि हसत्येव, स पराजितो जायत इति।

इदं वर्गीकरणं वैज्ञानिकदृष्ट्या दुष्टम्, परस्परलक्षणोल्लङ्घितत्वात्; तथापि ग्रहणीयमस्योपयोगित्वाल्लक्ष्यप्राधान्याच्चेति।

२५. मूलप्रवृत्त्यादीनां परिवर्तनक्षमत्वम्

प्रागुक्तमस्माभिर्जन्मजातत्वं नैसर्गिकत्वं मूलप्रवृत्तीनां सहजसामान्यप्रवृत्त्यादीनाञ्च। ननु किं तर्ह्येताः प्रवृत्तयोऽपरिवर्त्या जन्मजातत्वात्? यद्येवं स्यात्, कथं तर्हि प्रौढमानवस्य सभ्यताशीलसम्पन्नस्यैवंविधं परिवर्तनं भवति? स्मरणीयमत्र, यत्र हि सर्वाः क्रिया या बाल्ये प्रादुर्भवन्ति, मूलप्रवृत्तयो जन्मजाता वा प्रवृत्तयो भवितुमर्हन्ति। अभ्यस्तक्रियाणामधीतक्रियाणां

१. तुलनार्थम्—Movement Play.
२. तुलनार्थम्—Constructive Play.
३. तुलनार्थम्—Figurative Play.
४. तुलनार्थम्—Intellectual Play.
५. द्रष्टव्यम्—मालविकाग्निमित्रम् १।४

जन्मजातनैसर्गिकक्रियाभ्यो भेदः स्मरणीयः। मन्येऽस्य भेदस्य स्मरणाभावादेव मूलप्रवृत्तिविषये विप्रतिपत्तयः सम्भवन्ति, किं वा मूलप्रवृत्तिसंख्याविषये वा बुद्धिभेदः सँल्लक्ष्यते। बालोऽप्यधीते यथा प्रौढः। अतो नैसर्गिकमूलप्रवृत्तिभिः समकालमेवाभ्यस्ताधीतक्रियाणामप्याविर्भावः सञ्जायते। बाल्येऽधीतक्रिया अपि मूलप्रवृत्तय इति वक्तुं नैव साम्प्रतम्। यथा 'ओरियल' नामिकैका चर्चरीका या ग्रीष्मत आङ्गलदेशं समागच्छति, बाल्ये मधुरं गायति। तत्पक्षिणः बालकानामन्यत्र परिवर्धनात् सिद्धं यन्नहि विशिष्टप्रकारकसङ्गीतध्वनिर्जन्मजाता किमुत नैसर्गिकी। प्रत्युत कलकण्ठोपेतगायनप्रवृत्तिरेव सांसिद्धिकीति। यस्तु स्वरभेदोऽन्यत्र परिपालनेन जायते, सहैव परिवर्धनेन वा स्वरसाम्यं वा यज्जायते तदभ्यासजन्यमिति। वन्यौरियलचर्चरीकाभिः सह पृथक्परिपालिततत्पक्षिशावकानां स्वरविशेषसाम्याभावादेवायातमिदं तथ्यम्।

अपि चासीदियं मान्यता पूर्वं यद्धि बालकानां जले क्षिप्तानां भयमपि नैसर्गिकमिति। नहीदं मतमुत्तरकालिकानुसन्धानजातं सङ्गच्छते। सम्प्रति विद्वांसः सुनिश्चितमिदं मन्यन्ते यद्भये द्वे जन्मजाते नैसर्गिके केवलम्, यथा उच्चैःस्वरभयं शरीरसन्तुलनाभावजं भयञ्चेति। सर्वथा सम्भाव्यमिदं यदेकस्मिन्नवसरे सम्यग्ग्रहणाऽभावे जलवेगाधिक्ये सति च बालकाः स्वशरीरसन्तुलनाभावमन्वभवन्, तेन साकमेव जलस्पर्शमप्यन्वभवन्। शरीरसन्तुलनाभावजं भयं हि खलु तस्य निसर्गजम्; किन्तु तेन सह प्रतिनियतसाहचर्याज्जलस्पर्शमात्रमपि तदुत्तरं भयमुत्पादयति। फलतः पूर्वानुभूतजलस्पर्शशरीरसन्तुलनाभावसाहचर्य्यादेकस्मिन्नपि सति तदुत्तरं भयमुत्पद्यते। अत एव जलप्रक्षेपजं बालकानां भयं बाल्य एवोत्पद्यमानमपि नैसर्गिकं नैव भवतीत्यवसेयम्।

प्रागुक्तरीत्या सहजक्रियाः प्रतिनियता जायन्ते, प्रतिनियतसाहचर्य्यात् पेवलोवमहोदयानां प्रयोगाः पूर्वमनुव्याख्याताः। साम्प्रतमेकेनोदाहरणेन पुनः व्याख्यायते। नहि केवलं सहजक्रिया एव प्रतिनियता भवन्ति, मूलप्रवृत्तयोऽपि प्रतिनियतसाहचर्य्यात् प्रतिनियता जायन्ते। तथा हि, बालके दुःखसंवेदनीयोत्तेजकविरोधिनी जन्मजाता नैसर्गिकी सहजक्रिया भवति। दुःखोत्पादकोत्तेजकात् स्वहस्तमपसारयति हि बालकः। यथा अग्निमुष्णं वा पदार्थं स्पृष्ट्वा स स्वहस्तमपसारयति। किन्तु दुग्धपात्रमाकारविशेषकं दर्शनमात्रेण तस्मिन् भयं नैव जनयति, नाप्याह्लादमेव। यदि कदाचन तपद् दुग्धपात्रं बालकः स्पृष्ट्वा दुःखं संवेत्ति, तदनन्तरं तेन साकं दुःखसंवेदनं प्रतिनियतसाहचर्य्यं जायते। अतोऽनन्तरं प्रेरितोऽपि सन् तथाविधं दुग्धपात्रं बालको नैव स्पृशति। किं कारणम्? या दुःखसंवेदनात्मिका सहजक्रिया निसर्गतोऽग्निनोष्णपदार्थेन वा नियतसाहचर्य्यासीत्, सा दुःखानुभवनादेकशो बहुशो वा दुग्धपात्रेण सार्धमपि प्रतिनियतसाहचर्य्या प्रतिनियता वा सञ्जाता। अत एव दुग्धपात्राकारविशेषकदर्शनमात्रमेव बालकस्य भयं जनयितुं समर्थं भवति।

किं तावत् प्रतिनियतत्वं नाम? एकेनोत्तेजकेन सह नियता साहचर्य्येण सम्बद्धा प्रतिक्रिया यदाऽपरेणोत्तेजकेन पूर्वानुभूतोत्तेजकसम्बद्धेन सह प्रतिनियता जायते, तन्निष्ठभावः प्रतिनियतत्वमित्युच्यते। नैसर्गिकसहजक्रियामूलप्रवृत्त्यादयः प्रतिनियता भूत्वा परिवर्तिता जायन्ते। मूलप्रवृत्त्यादिपरिष्कारपरिवर्तनेन सर्वसभ्यतासामाजिकविविधसंस्थाशिष्टाचारसमुन्नतिः सम्भाव्यते, यतो हि मानवो निसर्गजं मूलप्रवृत्तिरूपशक्तिस्रोतसमादाय सामाजिकवातावरणेन सह सामञ्जस्यं स्थापयति तत्परिष्कारद्वारेण। मूलप्रवृत्त्यादिपरिवर्तनं विना सामञ्जस्यस्थापनमसम्भवम्। परिवर्तनञ्च प्रतिनियतसाहचर्य्यमपेक्षते।

२६. सामञ्जस्यस्थापनम्

कः प्राणी यस्य वातावरणं प्रायोऽपरिवर्तितं भवति, तस्य नैसर्गिकमूलप्रवृत्तिशक्तिस्रोतांसि स्वाभाविकनियतरूपेणैव प्रतिक्रियोत्पादने सफलानि भवन्ति। किन्तु परिवर्तनशीले वातावरणे तथाभूता मूलप्रवृत्तयोऽपरिवर्तिताः सत्यो नहि वातावरणेन सह सामञ्जस्यस्थापने किं वानुकूल्यस्थापने सफला भवन्ति। जटिले सततपरिवर्तनक्षमे वातावरणे प्राणिनः स्वाभाविकमूलप्रवृत्तिसम्पत्तिरपि परिवर्तमाना भूत्वैवानुकूल्यनिर्धारणे समर्था जायते। सभ्यमानवस्य सततसङ्घर्षमयेन विषमपरिस्थितिशबलीकृतेन दैनन्दिनपरिवर्तनशीलवातावरणेन सह सामञ्जस्यस्थापनाय सर्वदैवावश्यकतानुभूयते। निम्नस्तरीयेषु प्राणिषु मूलप्रवृत्तिसहजक्रिया एव शरीरयन्त्रधारणे नियतप्रतिक्रियोत्पादने पर्याप्ताः; किन्तूच्चस्तरीयानां मानवान्यतमानां सामञ्जस्यं जन्मजातप्रवृत्तिरचनायां परिवर्तनमपेक्ष्यैव सम्भाव्यते।

ननु किङ्कारणमिदं परिवर्तनं नाम ? नैसर्गिकमूलप्रवृत्तीनां प्रतिक्रियासु यत्परिवर्तनक्षमत्वमनुभूयते सम्बुद्धसभ्यमानवव्यवहारे, तत्तु मानवस्य बुद्धिविवेकसम्पन्नत्वात्। बुद्धिमतां व्यवहारस्तु निश्चयेन परिस्थितिवैषम्यजाटिल्यमाकलय्य सम्भावितप्रतिक्रियाफलं विमृश्यैव प्रवर्तते। फलतो विचारविवेकपुरस्सरत्वाद् वयस्यव्यवहारे मूलप्रवृत्तयः परिवर्तनक्षमा जायन्ते, सुदृढा नाडीसम्बन्धाश्च निसर्गजाः सन्तोऽपि परिवर्त्य नवीनस्रोतसामभिमुखा जायन्ते।

नहि बुद्धिरपि नैसर्गिकमूलप्रवृत्तिजातेभ्यः सुसूक्ष्मं भेदजनकं सहते। परिस्थितिजाटिल्यानुबन्धिसामञ्जस्यस्थापनक्षमबुद्धेः शक्तिरपि निसर्गजा, यथा मूलप्रवृत्तयः। यदि सामञ्जस्यस्थापनात्मकव्यवहारो बुद्धिसञ्चालितो मूलप्रवृत्तिभ्यस्सर्वथैव भिन्नं भवेत्, व्यावृत्तं भवेत्, विलक्षणं भवेत्तर्हि तस्य प्रयोजिका शक्तिः कापि न भविष्यति, यतो मूलप्रवृत्तिषु निसर्गजासु सर्वव्यवहारमूलभूतप्रतिक्रियोत्पादनक्षमाणि शक्तिस्रोतांस्यस्माभिरभिमतानि। अतो मूलप्रवृत्तेरनुकूलीकरणमेव बुद्धिजन्या प्रतिक्रिया प्रयत्नाख्या किं वा विचारपरिष्कृता मूलप्रवृत्तिरेव बुद्धिजन्या प्रतिक्रिया प्रयत्नाख्येति सिद्धम्।

२७. मूलप्रवृत्तिपरिवर्तनम्

ननु कथं हि मूलप्रवृत्तौ परिवर्तनं भवितुमर्हति ? मूलप्रवृत्तीनां द्विविधो हि खलु परिवर्तनस्यावकाशः। प्रथमं तावत् परिस्थितौ परिवर्तितायां सत्यां व्यक्तेः प्राणिनो वा नैसर्गिकमूलप्रवृत्तिरपि वातावरणपरिवर्तनानुकूलीकरणाय प्रेरिता सती परिवर्तते। शक्यते हि खल्विदं यत् परिस्थितिपरिवर्तनापादितप्रतिनियतोत्तेजकेनैव विशिष्टा मूलप्रवृत्तिरेका प्रवर्तयितुमारभते, प्राक्तनं मौलिकं वोत्तेजकं तज्जनने निष्क्रियमवतिष्ठते। नवीनाः परिस्थितयो मूलप्रवृत्तिं तामुद्बोधनाय प्रेरणाय समर्थाः भवन्ति, पुरातनमुत्तेजकं निष्फलं फल्गु वा जायते। द्वितीयं तावन्मूलप्रवृत्तिप्रतिक्रियायामेव कानिचित्परिवर्तनानि जायन्ते, यैस्तत्स्वरूपमेवं परिवर्तितं प्रतिभाति। द्वावेवेमौ परिवर्तनप्रकारविशेषौ विशदीक्रियेते—

(अ) परिस्थितौ परिवर्तनम्—

(१) प्रतिनियतसाहचर्य्यादिदं परिवर्तनं घटते। प्रागुक्तरीत्या यदा विशिष्टप्रकारकेणोत्तेजकेन जनिता प्रतिक्रिया कालान्तरे पूर्वं तत्साहचर्य्येणानुभूतेनापरेणो-

त्तजकेन सह सम्बद्धा जायते, प्रतिनियतसाहचर्या किमुत तदुत्तेजकेन सार्धं प्रतिनियता सा प्रतिक्रिया सञ्जायते। प्रागुक्तदृष्टान्तद्वये यथा बालके जलाद्भयं दुग्धपात्राद्भयं वोत्पद्यते। एवमेव प्रेयस्याः श्वाऽपि प्रगाढप्रेमास्पदं जायते।

(२) वैशेष्याच्च यदा परिस्थितिजातं मूलप्रवृत्तिप्रेरकं सङ्कीर्णं विशिष्टमवच्चितं वा जायते नहि तदा यो वा को वा पदार्थस्तां मूलप्रवृत्तिमुत्तेजयितुं प्रभवति। विशिष्टप्रकारकः पदार्थं एव तन्मूलप्रवृत्तिमुद्बोधयितुं शक्नोति। मूलप्रवृत्ति-परिशोधनेऽस्य परिवर्तनस्य चरमं रूपं समुपलभ्यते। उदाहरणतः पतिव्रताया जीवने भर्ता एव परमप्रेमास्पदं जायते। एवमेवोदात्तप्रेम्णि एकपत्नीव्रत-पुरुषस्यैका धर्मपत्न्येव परमप्रेमास्पदं भजते। तथा हि भगवत्याः प्रातः-स्मरणीयाया वैदेह्याः पुण्यानि खल्विमानि वचनानि—

साऽहं तपः सूर्यनिविष्टदृष्टि-
रूर्ध्वं प्रसूतेश्चरितुं यतिष्ये।
भूयो यथा मे जननान्तरेऽपि
त्वमेव भर्ता न च विप्रयोगः॥[1]

अपि चाग्निपरीक्षावसरे—

मनसि वचसि काये जागरे स्वप्नसङ्गे
यदि मम पतिभावो राघवादन्यपुंसि।
तदिह दह ममाङ्गं पावनं पावकेदं
सुकृतदुरितभाजां त्वं हि कर्मैकसाक्षी॥

अपि च रावणप्रणययाचनावसरे—

दीनो वा राज्यहीनो वा यो मे भर्ता स मे गुरुः।
तं नित्यमनुरक्ताऽस्मि यथा सूर्यं सुवर्चला॥
यथा शची महाभागा इन्द्रं समुपतिष्ठते।
अरुन्धती वशिष्ठं च केशिनी सगरं यथा॥
लोपामुद्रा यथाऽगस्त्यं सुकन्या च्यवनं यथा।
तथाऽहमिक्ष्वाकुवरं रामं पतिमनुव्रता॥

अन्यच्च—

सव्येनाऽपि हि पादेन न स्पृशेयं निशाचरम्।
किं पुनः रावणं साऽहं कामयेयं विगर्हितम्?॥

(आ) प्रतिक्रियास्वरूप एव परिवर्तनम्—

(१) स्वत एव—कदाचनैवं भवति यद्विषमायां परिस्थित्यां समुपस्थितायां प्राणी स्वय-मेव परिस्थितिपरिवर्तितरूपानुकूलमेवाचरति। नेयं प्रवृत्तिः प्राक्तनाऽध्ययना-यत्ता, नाऽप्यभ्यस्तपूर्वा। अनायासमेव तत्क्षणमेवेयं समुत्पद्यते।

---

१. द्रष्टव्यम्—रघुवंशम् १४।६६

(२) अनुभवनात्—स्वयमनुभवनं शिक्षणस्य चरमं साधनमिति वयमग्रे वक्ष्यामः। नवीनायां परिस्थित्यां समुत्पद्यमानायां प्राणी प्राक्तनमूलप्रवृत्तिसाधनरूप-प्रतिक्रियाभिरेवाचरति। यदा ता विफला जायन्ते, तदा प्रयत्नस्खलनविधिना किञ्चिदन्यन्मार्गसाधनमन्वेषयति, तदनन्तरं सफलपरिणामावहं[1] मार्गमप्यन्वेष्टुं समर्थो भवति। एवंविधानुभवस्यादर्शीभूतं तु चक्रचलनेनोदाहृतं यस्मिन् मूषकादिः प्राणी इतस्ततो धावति यावन्न स्वलक्ष्यं बहिर्निःसरणमार्गं भोज्यं वाऽवाप्नोति। यदधिकतमं सुखावहं साधनं भवति, सुखावहो मार्गो विधिर्वा भवति, तमेव सत्प्राणी शिक्षति। यद् दुःखप्रदं साधनं भवति तत्तु त्यक्तं भवति। पौनःपुन्येनानुभवनात् स्खलनसंख्याह्रासो जायते। सफलमार्गान्वेषणं चानुभवेन सुकरं सम्पद्यते। अनेन शिक्षणविधिनाऽनुभवनात्मकेनाऽपि मूलप्रवृत्तिप्रतिक्रियायां परिवर्तनं जायते।

(३) विचारेण च—मूलप्रवृत्त्यभिव्यञ्जने परिवर्तनमभिनिर्वर्तते। विचारेणाऽपि द्विधा परिवर्तनं सञ्जायते।

(अ) प्रथमं तावत् कल्पनयेदं परिवर्तनमभिसम्पद्यते। प्रागुक्तप्रयत्नस्खलनरीत्या यदन्विष्टं भवति तत्सर्वं कल्पनयाऽपि कदाचनोद्घाटयितुं प्रभवति। यथा मानवः कल्पनया सम्भावितमार्गस्य साधनस्य वा मानसं चित्रं प्रागेव स्वमनस्याधत्ते। तेन जटिलपरिस्थितेः समाधानं जायते यदन्ये केचनानियतरूपेण प्रतिक्रियां कुर्वन्त इतस्ततः परिभ्रमन्ति। यान्त्रिकजटिलचक्रेऽन्ये कल्पनोपेता मनस्येव तत्समाधान-मन्विष्य सम्यक्क्रियामाचरन्ति। यदि कदाचन कस्यचित्तालकस्य कुञ्जी विनष्टा भवेत्तदा कुञ्जीशतेनान्ये प्रयोगान् करिष्यन्ति। सन्ति चान्ये कुशला ये कल्पनयैव समीचीनकुञ्जीस्वरूपमाकलय्य तदर्थमनुरूपां कुञ्जीं प्रवेष्टुं गुच्छात् प्रभवन्ति, निर्मातुं वाऽन्यां शक्नुवन्ति।

(आ) तर्केण युक्त्या वा—एवंविधं सामञ्जस्यस्थापनं मूलप्रवृत्तीनामभिव्यक्तेरनुकूली-करणं वातावरणेन सह बुद्ध्यन्वितं भवति, यदा च समयदूरत्वाद्याकलनमपेक्ष्यं भवति, यदा वा सुदूरपरिणामहितत्वाहितत्वविमर्शोऽनिवार्यो भवति, तदाऽस्ति हि तर्कयुक्त्यन्वितो व्यवहारः। तेषु विविधविकल्पेषु सत्सु कस्यचिदेकस्य ग्रहण-मनिवार्य्यं जायते, तत्तु तर्केण युक्त्योहापोभ्यामभिसम्पद्यते। एवम्प्रकारके व्यवहारे मूलप्रवृत्तिस्वरूपं कदाचन सर्वथैव मूलरूपाद्विलक्षणं रूपं बिभर्त्ति। भयावस्थायां समुपस्थितायामुदाहरणतः कमपि विकल्पमेतेभ्यो विकल्पेभ्यो ग्रहीतुं शक्नोति, यथा—पलायनमेव हितावहमिति, शत्रुं भयान्वितं कर्तुमग्रे गमनमेव समीचीनमिति, आग्नेयास्त्रमादाय सम्प्रहार एव कर्त्तव्य इति, स्वव्यक्तित्वमपोह्य छद्मवेशेन गमनमेवोचितमिति वा विविधप्रकारकोऽयं व्यवहारः कालात्ययेऽपि जायते, अतोऽस्यस्य विमर्शान्वितत्वमिति। विचारतर्कान्वित-व्यवहारे कदाचन मूलप्रवृत्तीनां स्वरूपमेव तिरोहितमिव प्रतिभाति।

---

१. तुलनार्थम्—Maze

स्मरणीयमत्र यन्मूलप्रवृत्तीनामुत्तेजकानि न केवलं बाह्यपरिस्थितिप्रभवाण्येवाऽपि तु विचाराः पूर्वानुभवस्मृतयश्चापि तदनन्तरमुत्तेजकानि भवितुमर्हन्ति। यथा बमवर्षणस्य स्मृतिरपि युद्धानुभूतपुरुषेषु भयोद्वेगं नाल्पतरं जनयति। काश्चन स्त्रियस्तु युद्धानन्तरमपि बमवर्षणं स्मृत्वा मूर्च्छिता जायन्ते।

(४) अनुकरणेन च—मूलप्रवृत्तिरूपाणि मौलिकान्यनुकरणेनापि परिवर्त्तनं बिभ्रति। यथा पितरं दृष्ट्वा तस्यानुकरणं पुत्र उपनीतः करोति, स्नानसन्ध्योपासनं विना नहि प्रातःकाले वा भोजनं करोति। भोजनान्वेषणमूलप्रवृत्तिरेवम्प्रकारेण परिवर्तनमाधत्ते।

(५) सहानुभूत्या (६) संकेतेन—चापि मूलप्रवृत्तीनां परिष्कारो जायते। मूलप्रवृत्तीनामङ्गीभूतसंवेगानां दमनविलयनमार्गान्तरीकरणपरिशोधनादिभ्यो मूलप्रवृत्तीनामपि दमन-विलयनमार्गान्तरीकरणपरिशोधनाख्यानि[१] परिवर्तितरूपाण्यासादितानि भवन्ति। तत्सर्वमस्माभिः संवेगप्रकरणे प्रपञ्चयिष्यते। उपर्युक्तेन परिस्थितिप्रतिक्रियापरिवर्तनरूपेणापि तदन्यप्रकारेण सर्वमनुव्याख्यातमेवेति।

इति अर्वाचीने मनोविज्ञाने सहजक्रियामूलप्रवृत्त्यादिविवेचनीयश्चतुर्थोऽध्यायः।

१. तुलनार्थम्—(1) Repression.
(2) Ammihilation or eradication.
(3) Transformation.
(4) Sublimation.

पञ्चमोऽध्यायः

(चैतन्यस्वरूपम्)

१. चैतन्यस्वरूपम्

वयमस्मिन्नध्याये चैतन्यस्वरूपं मनोवृत्तिस्वरूपसहितं सपरिकरमनुव्याख्यास्यामः। मनोविज्ञानस्वरूपविवेचनावसरे प्रथमेऽध्यायेऽस्माभिर्मनोविज्ञानं चैतन्यवृत्तिव्यवहाराध्ययनपरत्वेनानुव्याख्यातम्। मनोविज्ञानस्य लक्ष्ये द्वे एव, चैतन्यं व्यवहारश्चेति। ननु किं नाम चैतन्यम्? जटिलतमोऽयं प्रश्नः दर्शनशास्त्रस्य चिरन्तनी समस्या। नह्यर्वाचीनमनोविज्ञानान्वेषणजातैश्चैतन्यस्य विलक्षणस्वरूपविषयकजिज्ञासा सर्वथा समाहिता। नहि चैतन्यस्य पारमार्थिकं रूपं गवेष्टुं शक्यते। अस्य पारमार्थिकस्वरूपस्य यथाभूतस्य लक्षणमपि दोषरहितमसम्भवप्रायम्। तथाप्यस्य वर्णनं विश्लेषणञ्चोपक्रमते, तत्कर्तुं शक्यतेऽपि च। यद्यपि जडमहाभूताख्यं तत्त्वं सुसूक्ष्मतो विश्लिष्टं तथाप्यस्य स्वरूपमद्यावधि वैज्ञानिकैरज्ञातमेव। भूताख्यप्राकृततत्त्वस्य परमौ विश्लिष्टावयवौ 'इलेक्ट्रॉनप्रोटोन'संज्ञकौ[1] सूक्ष्मतमौ लक्षणापेतावेव। अत एव यथा चैतन्यं विलक्षणं तथैव भूततत्त्वमपि। द्वे एव स्वरूपलक्षणतो रहस्यान्विते। तथापि तयोरनुभवविषयीभूतघटकयोः सम्मेलनं नाडीतन्त्रे सम्भवत्येव यथाकथञ्चित्। ये द्विपार्श्वकं[2] मतमनुमन्यन्ते, तेषां मते चैतन्यं नाडीगतक्रिया चैकस्यैव मूलतत्त्वस्य पार्श्वद्वयम्। यदा नाडीगतक्रिया[3], जाटिल्यमात्राविशेषं बिभर्ति विकासविशेषमवाप्नोति वा, चैतन्यमाविर्भवति। विलक्षणं सदपि चैतन्यं नाडीतन्त्रे आसादितभूततत्त्वसम्पर्कादिष्यतेऽनुभवनं मनोवृत्तिपरिकरोपेतम्।

२. चैतन्यस्वरूपविषये पौरस्त्यमतानि

भारतीयैर्ऋषिभिश्चैतन्यस्वरूपमधिकृत्यानेकानि मतान्युद्भावितानि। तत्र चार्वाका मन्यन्ते देहाकारेण परिणतानि चत्वारि भूतान्येव चैतन्यकारणम्। तेष्वपि चक्षुरादीनि प्रत्येकं चैतन्यमिति कश्चित्। मिलितानीत्यन्ये। क्षणिकविज्ञानमिति सौगता नैरात्म्यवादिनः। शून्यमिति माध्यमिका निःस्वभावतावादिनः। देहेन्द्रियातिरिक्तं देहपरिमाणमिति दिगम्बराः। कर्त्ता भोक्ता जडो विभुरात्मेति वैशेषिकनैयायिकप्राभाकराः, चैतन्यस्यानुषङ्गिकत्वात्। जडो बोधात्मक आत्मा चैतन्याख्यमिति कुमारिलभट्टाचार्यानुयायिनः। भोक्तैव केवलबोधात्मकनित्यशुद्धबुद्धानासक्तमुक्तस्वभावः पुरुषश्चैतन्यसंज्ञक इति सांख्याः पातञ्जलाश्च। अविद्यया कर्तृत्वादिभाक् परमार्थतो

---

१. तुलनार्थम्—Electrons and Protons.

२. तुलनार्थम्—Double aspect theory.

३. तुलनार्थम्—Neural activity.

निर्धर्मकः परमानन्दबोध एवेत्यौपनिषदाः, शाङ्कराद्वैतवादिन इति यावत्। भागवतेऽपि चैतन्यमात्माभिधानं हर्षशोकाद्यतीतमेवेति वर्णितम्। तथाहि—

हर्षशोकभयक्रोधलोभमोहस्पृहादयः।
अहङ्कारस्य चैवैते जन्ममृत्यू च नात्मनः॥

ब्रह्मपुराणेऽपि चेतनस्यात्मनः कर्तृत्वादिधर्माणां निषेध एवोपलभ्यते। यथा हि—

कुर्वन्त्यचेतनाः कर्म देहेन्द्रियगणाः सदा।
चेतनस्तदधिष्ठाता शान्तात्मा न करोत्यसौ॥

केचन चार्वाकैकदेशिन आसन्, येषां मते मन एव चैतन्याधिष्ठानमासीत्। अर्वाचीनं मनोविज्ञानं चैतन्यस्य जडभूततत्त्वविलक्षणं रूपमङ्गीकरोति, तथापि तदसङ्गं कामक्रोधहर्षविमुक्तमकर्तृकं वा नैव मन्यते। चैतन्यतत्त्वं मन इत्यभिधानेनार्वाचीनमनोविज्ञानेऽस्मिन् ग्रन्थेऽपि च प्रयुज्यते। नूनं आत्मनोऽर्थे मन इति पदस्य प्रयोगः संस्कृतभाषा-दर्शनप्रतिकूल-दार्शनिकभावाभिव्यक्तिपारिभाषिकशब्दावल्यभावनिदर्शन इति। तथापि 'मनः' इति पदमस्माभिराङ्गलमनोविज्ञानाभिमतेऽस्मिन्नेवार्थे प्रयुक्तः। यन्मनोऽर्वाचीनमनोवैज्ञानिकाभिमतं तच्चेतनतत्त्वं चैतन्यमिति वा। जडभूतविलक्षणं सदपि तेन सहास्य सम्प्रयोगो जायते नाडीतन्त्रे सपरिकरमस्तुलुङ्गाख्ये। नहि मनःसंज्ञकं चैतन्यतत्त्वमसङ्गं कर्तृत्वव्यतिरिक्तं वा प्रत्युत कामक्रोध-हर्षवेगादिषु निमग्नं तत्प्रयोजकं तद्रूपमिति वा। विचारेच्छासंवेगप्रयत्नादय मनस एव वृत्तयः। नहि निर्धर्मकं मनसो रूपं किमप्यस्ति विचारास्पदं मनोवैज्ञानिकानाम्। यत्तु व्यवह्रियते बाह्यव्यवहारेषु, यच्चान्तरिकवृत्तिषु व्याप्नुते, तच्चैतन्यं मनःसंज्ञकमद्यतनैः मनोवैज्ञानिकैराद्रियते। तस्यापि पारमार्थिकस्वरूपलक्षणगवेषणं नहि तेभ्यो रोचते। यत्तु तेभ्यो नितरामभिरोचते तत्तु व्याप्रियमाणानां चैतन्यमनोवृत्तीनां बाह्यव्यवहाराणाञ्च साङ्गोपाङ्गमध्ययनम्। अत एवास्माभिश्चैतन्यक्रियाणां मनोव्यापाराणां विश्लेषणमत्रारभ्यते।

३. चैतन्यक्रियाविश्लेषणम्

वयं तावच्चैतन्यस्य पारमार्थिकस्वरूपानुसन्धानं दार्शनिकचिन्तनान्तर्गतमिति मत्वा चैतन्यस्य विविधवृत्तीनां व्यापाराणां वा स्वरूपमेवानुव्याख्यास्यामस्तेषाञ्च बाह्यसामाजिकव्यवहारे का का प्रतिक्रिया भवतीत्यपि विवेचयिष्यामः। उक्तं हि खलु बृहदारण्यकोपनिषदि "काम सङ्कल्पो विचिकित्सा ह्री श्रद्धाऽश्रद्धा धृतिरधृतिर्धीर्भिरित्येत्सर्वं मन एव"[1] इति। इमाः सर्वाः मनसो वृत्तयः। वर्तत इति वृत्तिर्व्यापार इति यावत्। कामसङ्कल्पादीनां मनोवृत्तित्वं मनोधर्मत्वं मनोव्यापारत्वं प्राचीनभारतीयाचार्याणां प्रतीच्यमनोविज्ञानाचार्याणां समानरूपेणाभ्युपगमः; किन्तु प्राचीनभारतीयाचार्याणां मते चैतन्याधिष्ठानस्यात्मनो चैतन्यस्वरूपस्यात्मनो वेमा वृत्तयो न भवन्ति, तस्य निष्क्रियत्वान्निर्विशेषत्वाच्च। प्रत्युत जडस्य मनस एवैते विकाराः। यच्चैतन्यात्मकं तत्त्वं चैतन्यरूपं वा तत्त्वं तस्यैवैते व्यापारा इति प्रतीच्यानामर्वाचीनानां मनोवैज्ञानिकानामभिमतः सिद्धान्तः। इमे मनसश्चैतन्यस्य वा व्यापाराः त्रिधा वर्गीकर्तुं शक्यन्ते—विचारः, संवेगः प्रयत्नश्चेति। किं वाऽनुभवनम्, संवेदनं प्रयत्नश्चेति। अनुभवनं नाम निर्विकल्पप्रत्यक्ष-सविकल्पप्रत्यक्ष-विचार-

१. द्रष्टव्या—बृहदारण्यकोपनिषत् १।५।३

तर्कोहापोहादयो व्यापाराः। संवेदनं नाम सुखसंवेदन-दुःखसंवेदन-संवेग-स्थायिभावादयश्चैतन्य-व्यापाराः। प्रयत्नो नाम सहजप्रवृत्तिमूलप्रवृत्तिसामान्यप्रवृत्त्यैच्छिकक्रियाचरणादयो व्यापाराः। स्मृतिकल्पनादिव्यापाराणां विचाराख्ये वर्गेऽन्तर्भावः। अनुभवनसंवेदनेऽत्र विशिष्टार्थयोर्व्वहृते। अनुभवनं कदाचन सामान्यचैतन्यव्यापारं विचारसंवेगप्रयत्नादिष्वन्यतमप्यभिव्यञ्जयति। यथा अपरोक्षानुभूतिः (ज्ञानान्तर्गता) सुखानुभवः, दुःखानुभवः, (संवेगान्तर्गतप्रयोगः) क्रियानुभवः (प्रयत्नान्तर्गतप्रयोगः)। एवमेव संवेदनमपि कदाचन ज्ञानद्योतनाय प्रयुज्यते, यथा स्वसंवेद्यम्, परसंवेद्यं वा। अस्मिन् ग्रन्थे वयमनुभवनं संवेदनञ्च विशिष्टार्थयोरेव व्यवहरिष्यामः। अनुभवनं हि ज्ञानाख्यं कर्म विचारोहापोहस्मरणकल्पनादींश्चैतन्यव्यापारान् द्योतयति। संवेदनं हि तच्चैतन्य-कर्म, येन सुखदुःखकामबुभुक्षेर्ष्याद्वेषलोभादिसंवेगस्थायिभावादयोऽनुभूयन्ते, संवेद्यन्त इति यावत्।

४. महर्षिपतञ्जलिमतम्

योगदर्शनकारा वृत्तिपञ्चकमङ्गीकुर्वन्ति। तद्यथा—"प्रमाणविपर्ययविकल्पनिद्रास्मृतयः।"[१] चित्तस्यैताः पञ्चधा वृत्तयो निरोद्धव्या। प्रमाणानुव्याख्यानावसरे "प्रत्यक्षानुमानागमाः प्रमाणानि।" इत्युक्तम्[२]। विपर्ययोऽपि "मिथ्याज्ञानमतद्रूपप्रतिष्ठम्" इत्येवं व्याख्यातम्[३]। "शब्द-ज्ञानानुपाती वस्तुशून्यो विकल्पः" इत्येवम्प्रकारेण विकल्पसंज्ञकचित्तवृत्तेः स्वरूपं निदर्शितम्[४]। निद्रावृत्तिस्वरूपमपि "अभावप्रत्ययालम्बना वृत्तिर्निद्रा" इत्युक्त्वा व्याख्यातम्[५]। अस्ति हि प्रत्ययविशेषो निद्रा तन्मते, सा चभावप्रत्ययालम्बनस्वरूपा। इमाः पञ्चधा वृत्तयो योगसाधकैर्निरोद्धव्याः। इदं वृत्तिवर्गीकरणं नैव समीचीनमित्यस्माकं मतम्। नहि सर्वा वृत्तयो वृत्तिपञ्चकेषु तथाव्याख्यातेषु समाविष्टा भवन्ति। साधनाप्रत्यवायनिरूपणायैवेदं वृत्तिपञ्चकनिरूपणमवगन्तव्यम्, न तु चित्तस्य सर्ववृत्तिव्याख्यानपरमिदं सूत्रं भवितुमर्हति। सन्ति हि तदधिका बहुविधा चित्तवृत्तयः। नहि विकल्पाख्या चित्तवृत्तिः 'कल्पना'संज्ञकां वृत्तिं साङ्गोपाङ्गां विवेच्यमानां निरूपयितुमर्हति। नापि निद्रामिव स्वप्नवृत्तिं निरूपयति। सन्देहवृत्तिर्मनसो विपर्यय-संज्ञकवृत्तौ प्रवेशं नार्हति। साधकेभ्यो यथाकथञ्चित्सुकरमपीदं वर्गीकरणं नैव मनोवृत्तिनिरूपणायालमित्यस्मान् प्रतिभाति। नापि क्लिष्टाक्लिष्टप्रकारविशेषाभ्युपगमेनैवेयं समस्या समाहिता जायते। क्लिष्टत्वाक्लिष्टत्वलक्षणेन चैतन्यक्रियाकलापस्य संवेदनपक्ष एव स्पृश्यते, न तु विचारपक्षोऽथवा प्रयत्नपक्षः। तत्त्ववैशारद्यां द्वेषमोहादीनां विपर्ययसंज्ञकमिथ्याज्ञानान्तर्गतविवेचनमपि मनोवृत्तिवर्गीकरणदृष्ट्या नोपयुज्यते। रागद्वेषमोहादिवृत्तयो मनसः संवेदनात्मकव्यापारेषु समाविष्टा भवन्ति प्रागुक्तरीत्या, न तु ज्ञानाख्यमनोवृत्तिवर्गे[६]।

---

१. द्रष्टव्यम्—योगसूत्रम् १।६

२. द्रष्टव्यम्—योगसूत्रम् १।७

३. द्रष्टव्यम्—योगसूत्रम् १।८

४. द्रष्टव्यम्—योगसूत्रम् १।६

५. द्रष्टव्यम्—योगसूत्रम् १।१०—आनन्दाश्रमसंस्करणम्, पृ० १५

६. द्रष्टव्यम्—योगसूत्रम् १।८—आनन्दाश्रमसंस्करणम्, पृ० १३

५. चैतन्यस्वरूपम्

वयं तावन्मानसप्रत्यक्षात्मकं मनोविज्ञानमनुसृत्य[1] चैतन्यस्वरूपमनुव्याख्यास्यामः। चैतन्यस्वरूपविवेचनमतीव दुष्करम्। चेतनस्य भावश्चैतन्यमिति विवेचनम्। चैतन्यमिति चेतनाधातुमपि द्योतयति। स एव चेतनाधातुः जानाति, इच्छति, यतते। तस्यैवाऽपरपर्यायो मन इत्याख्यां भजते, यच्चाधिकृत्य मनोविज्ञानं सपरिकरं प्रथते। तदेव चैतन्यमात्मगुणत्वेन नैयायिकाः स्वीकुर्वन्ति। चैतन्यमात्मनः स्वरूपमित्यद्वैतवेदान्तिनः। केचन मनोवैज्ञानिकाश्चैतन्यं मनोविज्ञानप्रतिपाद्यं नैवाभिमन्यन्ते। नहि तेषामयमाग्रहः समीचीन इत्यस्माभिः प्रागेवोक्तम्। तन्मते चैतन्यस्य ज्ञानमवाप्तुं न शक्यते। चैतन्यमिति तत्त्वं नैव विद्यत इत्यपरे; किन्तु यस्य चैतन्यस्य ज्ञानेच्छाप्रयत्नादीनां व्यवहारजातेनाध्ययनमुपक्रमते तैः, तत्सत्त्वनिराकरणमज्ञेयत्वप्रतिपादनं वा कथं सम्भवति ? नहि चैतन्यव्यापारव्यतिरिक्ताबाह्यव्यवहाराः सम्भवन्ति। तच्चैतन्यं साक्षादपरोक्षाद् भवति। श्रुतिरपि ममैव भावमनुवदति "साक्षादपरोक्षाद् ब्रह्म" इति। यदि परमं विश्वस्तं ज्ञानं कस्यापि पदार्थस्याऽस्माकं विद्यते, तत्तु स्वविषये, स्वचैतन्यविषये, स्वमनोविषये निःसन्दिग्धं भवति। नहि किञ्चिदपि स्वमनोव्यापारापेक्षयाऽपरोक्षज्ञानमपरोक्षज्ञानजनकमिति वा भवति। बाह्यव्यवहारस्य ज्ञानमपि स्वमानसिकव्यापारजन्यज्ञानस्य दृढभूमिमवलम्ब्यैवोत्पद्यते। अतो व्यवहारवादिवाट्सनप्रभृतीनां चैतन्यस्वरूपव्यापाराणामध्ययनम्प्रति विरोधिदुराग्रहो विपश्चिद्भिर्नैवादरणीयः।

ननु किन्तावज्जाग्रच्चैतन्यमेव चैतन्यमिति केषाञ्चिन्मनोवैज्ञानिकानां मतं नैव समीचीनम् ? नूनं चैतन्यविषयेऽस्माकं ज्ञानं जाग्रदवस्थायां ज्ञानेच्छासंवेगप्रयत्नादिभिरेवोत्पद्यते, नह्यन्यथा तज्ज्ञानमुत्पद्यते। अतः कतिपयैर्मनोवैज्ञानिकैर्जाग्रच्चैतन्यमेव चैतन्यमिति मतमवलम्बितम्। नहि तदुपपद्यते। स्वप्नसुषुप्त्यवस्थयोश्चैतन्यसत्त्वापादितमेवेदं ज्ञानं प्रतिबोधानन्तरमुत्पद्यते 'सुखमहमस्वाप्सम्' इति। पौर्वकालिकानुभवानां स्मरणमपि स्वप्नसुषुप्त्यवस्थयोश्चैतन्यसत्त्वाङ्गीकारेणैवोपयुज्यते। सुतरां जाग्रच्चैतन्यव्यतिरिक्तमपि चैतन्यसत्त्वमस्तीति बोद्धव्यम्। अपि चार्वाचीना मनोवैज्ञानिकाश्चैतन्यस्यापरे द्वे अवस्थे अप्यङ्गीकुर्वन्ति, तद्विवेचनमग्रे करिष्यामः।

६. चैतन्यं हि व्यक्तिगतं तत्त्वम्

चैतन्यं हि व्यक्तिविशिष्टगुणः। यज्ज्ञानादि कर्म तत्पुरुषविशेषप्रयुक्तमेव। यश्च प्रयत्नादिर्मनोव्यापारः सोऽपि कस्याश्चिद् व्यक्तेरेव। सुतरां चैतन्यस्य यद्रूपमनुभवपदमारोहति, तत्तु सर्वदा व्यक्तिविशिष्टपरमेव। किं वा चैतन्यं व्यक्तिगतं भवति यतो हि कोऽपि व्यक्तिविशेष एव स्वमनोव्यापाराणामपरोक्षं ज्ञानमवाप्तुं प्रभवति, न त्वन्ये। ते तस्य मनोव्यापाराणां परोक्षं ज्ञानं प्राप्तुं शक्नुवन्ति। यः पुरुषः कञ्चिदनुभवं मानसमनुभवति, जानाति, इच्छति, यतते वा स प्रमातेति सञ्ज्ञां बिभर्ति। अस्तु तर्हि चैतन्यव्यापारः सर्वदा प्रमातृसम्बद्ध एव। एवम्प्रकारेण मनोव्यापारा न केवलं कस्यचित् प्रमातुरेव मनोव्यापारा भवन्ति, प्रत्युत कञ्चिद्विषयमधिकृत्यैव ते प्रादुर्भवन्ति। स विषयो न्यायपारिभाषिकपदावल्यां प्रमेयमिति संज्ञया प्रथते। यतः प्रमेयं ज्ञानाख्यकर्मविषयीभूतमेव भवति, न तु भावादिसंवेदनस्य, वयं तावत्

---

१. तुलनार्थम् Introspective psychology.

विषयमेव निखिलमनोव्यापारस्याधिष्ठानीभूतं मन्यामहे। स हि मनोव्यापाराणामुत्तेजकमालम्बनं क्रियाभूमिर्वा यथावसरं जायते। तृतीयस्तु मनोव्यापार एव। एतावतेदमुन्नेयं यद्धि मनोव्यापारे चैतन्यप्रयुक्ते व्यवहारे च प्रमाता, विषयः, ज्ञानसंवेदनादिव्यापाराश्चेति त्रीण्यङ्गानि सन्निविष्टानि भवन्ति। या हि व्यक्तेः काञ्चन परिस्थितिं विषयीभूतां प्रति प्रतिक्रिया जायते, सा प्रमातुश्चरित्रायत्ता, यच्च प्रमातुश्चरित्रं तदपि तत्परिस्थितिजन्यज्ञानाधीनम्, तत्संवेदनायत्तम्। अतः प्रमातेत्यभिधानेनास्माकमभिप्राये मनोवैज्ञानिकी व्यक्तिः, या हि खलु चेतना सती परिस्थितिगतान् विषयाननुभवति, जानाति इति यावत्; तद्विषयकं सुखदुःखादिसंवेदनमनुभवति, यस्य प्रतिक्रिया प्रयत्नरूपा तद्विषयज्ञानसंवेदनादिकेन सर्वदा सम्बद्धा प्रयुक्ता च भवतीति।

आचार्यप्रभाकरभट्टपादैरपि त्रिपुटीप्रत्यक्षमङ्गीकुर्वद्भिर्ज्ञानाख्ये कर्मणि प्रमाता, प्रमेयः, ज्ञानमिति त्रीण्यङ्गानि सन्निविष्टान्यभिमतानि। किन्त्वर्वाचीनं मनोविज्ञानन्तु सर्वास्वेव मनोवृत्तिषु प्रमातृविषयमनोव्यापारान् सन्निविष्टान् मन्यत इति विशेषः।

७. मनसः परिवर्तनशीलत्वम्

चैतन्यं हि खलु धारावाहिकम्। प्रतिक्षणमिदं परिवर्तनं बिभर्ति। तदुक्तं पार्थेनाऽपि श्रीमद्भगवद्गीतायाम्—

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद् दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्[1] ॥ इति।

मनस्तावदत्यर्थं चञ्चलं भवति। प्रतिक्षणमेकस्मात् पदार्थादन्यमर्थं विषयीकरोति। चैतन्यधाराप्रवाहे नहि व्यवधानं विद्यते, नापि व्यवच्छेद एव। यदि वयं सम्प्रति रूसदेशस्य प्रधानमन्त्रिमहोदयानां श्रीबुल्गानिनमहाभागानां भारतयात्राविषयं चिन्तयामः, एकघटिकानन्तरञ्च द्वितीयपञ्चवर्षीययोजनाविषये वार्तालापः समाप्तिं गच्छति, सन्ति हि तदन्तराले बहवो मनोव्यापारविशेषा ये परस्परं सन्निहिताः सम्बद्धाः, यद्यपि सम्बन्धशृङ्खला दृष्टिपथात्तिरोहिता एव भवति। विज्ञानवादिभिरभिमतः क्षणिकविज्ञानवादो विज्ञानाख्यस्य चैतन्यस्य क्षणिकत्वं धारावाहिकत्वं सम्यक्तया स्फुटीकरोति। अमेरिकादेशीयमनोवैज्ञानिकधुरन्धरेण विलियमजेम्समहोदयेन मानसिकघटनानामनवरतपरिवर्तनशीलमिदं रूपं 'चैतन्यधारा' इत्यभिधानेन निर्दिष्टम्[2]। तन्मते नेयं धारा समानरूपेण वहत्यपि तु उत्पतनानामवस्थानानाञ्च तारतम्यं तत्र भवति। कदाचन मनोव्यापारेषु वेगवती क्रिया जायते, दृश्यते च, कदाचन सा शिथिलीभवतीति तेषामभिसन्धिः। इमाश्चैतन्यजन्याः क्रिया मनोवृत्त्याख्या नाडीतन्त्रे नाडीक्रियाभिः समनन्तरमेव सम्बद्धा भवन्तीति शारीरिकमनोविज्ञानविदां मतम्।

८. व्यष्टिचैतन्यस्याद्वैतत्वम्

ननु किं मनोवैज्ञानिकानामप्यद्वैतवादः प्रथते? नैतद् वक्तुं शक्यते यदद्वैतवादो विश्वविश्रुतः परमहंसश्रीमच्छङ्कराचार्याणां सिद्धान्तो मनोविज्ञानक्षेत्रेऽपि स्वीक्रियते। मनोवैज्ञानिकाभिमतं चैतन्यस्याद्वैतत्वं व्यष्टिचैतन्यमेव लक्ष्यीकरोति। व्यक्तेश्चैतन्यमेकीभूतमद्वैतं भवति। चैतन्य-

१. द्रष्टव्या—श्रीमद्भगवद्गीता ६।३४

२. द्रष्टव्या—William James, Principles of Psychology, Vol. I. Chep. IX, "Stream or Consciousness."

स्यैकत्वाद्विभिन्नमनोव्यापारेषु सामञ्जस्यं जायते। अपि च स्वात्मैकत्वविषया प्रत्यभिज्ञा 'योऽहं बाल्ये देवदत्त आसं सोऽहमिदानीं वार्धक्ये पुत्रपौत्राद्युपेतोऽप्यस्मि' इति चैतन्यैकत्वादेव सम्भवति। मनसो वैशिष्ट्यं खल्विदं यत् सततपरिवर्तनशीलं सदपीदमेकत्वमक्षुण्णं बिभर्त्ति। चैतन्यस्य खल्वयं विशेषः सत्त्वोपपादनायात्यर्थं गौरवान्वितः। केचनैकदेशिनो मनोवैज्ञानिका मन्यन्ते स्वात्मप्रत्यभिज्ञानं तावद् विविधचेष्टोपयोगिमांसपेशीक्रियालोचनज्ञानजन्यं परामर्शोत्थञ्च ज्ञानं भवतीति। यान्त्रिकवादाभिभूतमिदं व्याख्यानं मन्ये चैतन्यस्य मनसो वा परमोत्कृष्टं विशेषं नैव लक्ष्यीकरोति, येनेदं प्रतिक्षणमत्यर्थं परिवर्तनमादधानेषु मनोव्यापारेष्वपि स्वारस्यं स्थापयति, विशिष्टां समन्वितां प्रतिक्रियामाचरणरूपां प्रदर्शयति च। विविधमणिगणानामिव चैतन्यक्रियाणां सूत्रमिव मनो नास्ति, प्रत्युत तासु विलक्षणमनुस्यूतमेकीभावमप्यभिव्यञ्जयति। तच्च मनसः परमं वैशिष्ट्यम्।

प्रकृष्टास्वसामान्यमनोऽवस्थासु यदा व्यक्तित्वं द्वैधीभूतं जायते, तदा चैतन्यमपि द्वैधीभूतमिव प्रतिभाति। तत्तु भवत्यानुषङ्गिकम्। मनोविश्लेषणाद्युपचारैर्यदा व्यक्तिः स्वस्था जायते, तदा तस्या एकत्वमपि पुनरावर्तते।

६. सम्बन्धस्थापनम्

सम्बन्धस्थापनं हि खलु चैतन्यस्य किं वा मनसोऽपरो विशेषः। तथैव मस्तुलुङ्गमपि नाडीस्रोतसां परस्परं सम्बन्धान् निर्मिमीते। सम्बन्धनियम एवम्प्रकारेण व्याख्यातुं शक्यते—'यदि द्वौ तदधिकौ वानुभवौ युगपदनुभूयमानौ सन्निकृष्टतया वाऽनुभूयमानौ भवेतान्तर्हि तौ परस्परं सम्बद्धौ जायेते। यदि च कालान्तरे तयोरेकतरस्मिन् समुपस्थिते समुद्भूते वाऽपरोऽप्याविर्भवति स्मृतिपथमारोहतीति। प्राचीनयुगे सम्बन्धवादः सम्बन्धशब्दस्याऽतीव सङ्कीर्णमर्थमङ्गीकृत्य प्रतिपादितः, यतो हि प्रत्ययानां सम्बन्धा एव तन्मतेऽभिमता आसन्। अस्माभिरत्रास्य प्रयोगोऽधिकव्यापकक्षेत्रद्योतनाय कृतः। नहि केवलमेकः प्रत्ययोऽपरेण प्रत्ययेनाऽपरैर्वा प्रत्ययैः सम्बद्धो जायते, प्रत्युत क्रिया भावाः संवेगा अपि प्रत्ययैः साकं सम्बन्धमिच्छन्ति। तथा च क्रिया प्रत्ययेन संवेगेन वाऽन्यतरेण सह सम्बद्धा जायते। एतावता कालान्तरे एकस्मिन् सत्यपरस्याऽपि स्मृतिर्जायते। उदाहरणतः सविकल्पकाख्ये प्रत्यक्षे नहि केवलमालोचनं ज्ञानं विशुद्धं वर्ततेऽपि तु पूर्वानुभवानुकूलां स्मृतिं समाश्रित्यार्थव्याख्यानमपि सविकल्पप्रत्यक्षे सन्निवेशमवाप्नोति। एवमेव क्रोधोऽपि पूर्वानुभवास्पददुःखमयानुभवेन सह सम्बद्ध एव दृश्यते। सम्बन्धस्थापनमध्ययनस्य प्रथमा खलु भूमिः। स्तनन्धयः दुग्धपानेन समाश्लिष्टां मातरं परिचिनोति सर्वप्रथमम्। अग्रेऽपि गामागतां सम्पश्य गोज्ञानं बालकस्योत्पद्यते।

अत्र स्मरणीयं यद् वयं प्राक्तनं सम्बन्धवादीदं मनोविज्ञानं[1] नाद्रियामहे, यतो हि तस्मिन् त्रिविधा मनोवृत्तयो मनोऽवस्था वा सम्बन्धनियमैरुपनिबद्धा स्रगिवेति मान्यं मतमासीत्। नहि मनोऽवस्था रुद्राक्षेण पुष्पेण वा माल्याङ्गीभूतेन समं भवितुमर्हति, रुद्राक्षपुष्पस्वर्णादिकानां चैतन्यविरहितत्वात्तैः स्वयमेव माल्यग्रथनमसम्भवम्। मनस्तु स्वमनोवृत्तिविषयानवचिनोति, ग्रथते, विविधमनोवृत्तीनां सामञ्जस्यं च स्थापयति। नहि मनोवृत्तयः पृथक् पृथक्

---

१. तुलनार्थम्—Associationist Psychology.

मानसरङ्गभूमावतरन्त्यपि तु परस्पराश्लिष्टा एवानुभूयन्ते । तासामनुभवपथारोहणमपि प्रकृष्टतारतम्येनासाद्यते ।

१०. चिन्तनम्

प्रागुक्तमेवास्माभिर्यद् विविधमनोवृत्तीनां त्रिधा वर्गीकरणं सम्भवति, यथा— अनुभवनम्, संवेदनं प्रयत्नश्चेति । एतानि त्रीण्येव मनोव्यापाराणां प्रारम्भिकतमानि मूलभूतान्यङ्गानि । नहि तानि समनन्तराणीतरेतरव्यावृत्तानि पृथग्भूतानि वा भवन्ति । त्रीणि हि खल्वेतानि समाश्लिष्यैकं मानसिकमनुभवं वस्तुभूतं जनयन्ति । निखिलस्यैकस्यानुभवस्य विश्लेषणेन वयं त्रीणि मौलिकानि परस्परं विविक्तानि चैतन्यव्यापाररूपाणि लभामहे । मनोवृत्तीनां सम्यग्व्याख्यानसौकर्यायैव विवेचनं तासामावश्यकं प्रतिभाति । विविक्ता अप्येतास्तिस्रो मनसोऽवस्था नैव पृथग्भूता भवन्ति । तिस्रोऽपि मनोवृत्तयः समनन्तरमेव कस्याप्यनुभवविशेषस्याङ्गत्वेनोत्पद्यन्ते । प्रथमं ज्ञानमुत्पद्यते, ततो भावसंवेगोऽनुभूयते, ततश्च प्रयत्नो जायत इत्यपि न वाच्यम्, यतस्तानि मूलभूतान्यङ्गानि ज्ञानेच्छाप्रयत्ना युगपन्मिलित्वैव मानसमनुभवं जनयन्ति । कथन्नु तर्हि तेषां मूलभूतत्वमुपपद्यते ? विलक्षणस्वरूपत्वात् । प्रत्येकमितरपरिणाममात्रमिति वक्तुं न शक्यते, अत एव सिद्धं तेषां मूलभूताङ्गत्वम् । अपि च यत्र यत्र जाग्रच्चैतन्यं विद्यते, तेषां प्रादुर्भावोऽपि नियतरूपेण तत्र तत्र विद्यत एव ।

ज्ञानन्तर्हि चैतन्यस्य स व्यापार उच्यते येन प्रमाता कमपि पदार्थं जानाति । एवम्प्रकारेण ज्ञानकोटौ प्रत्ययानां विचाराणां वाक्यरूपाणाञ्च समावेशो भवति । नहि सर्वदा ज्ञानं स्पष्टं व्यवसायात्मकमेव भवति । यदा ज्ञानमव्यवसायात्मकमव्यपदेश्यं भवति तदाऽप्यस्य ज्ञानव्यपदेशो विद्यत एव । निर्विकल्पकं प्रत्यक्षं यदालोचनं ज्ञानमित्यभिधीयते, तदव्यवसायात्मकमेव भवति । अनुभवनाख्यज्ञानक्रियायान्तर्हि सविकल्पकालोचनज्ञानयोर्द्वयोरेव समावेशो भवति । वस्तुमात्रावगाह्यालोचनं ज्ञानं भवति । वस्तुविशेषावगाहि सविकल्पकं ज्ञानमुच्यते । प्रत्यक्षानुमानादीनि प्रमाणानि, यानि चाप्रमाणानि वस्तुस्वरूपविषयकाणि, तानि सर्वाणि ज्ञानपरिधौ समाविष्टानि । पदार्थस्य ज्ञानं प्रत्ययात्मकं भवतु नाम, वाक्यात्मकं भवतु वा, ज्ञानसामान्याङ्गम् । यदा चेतनः प्राणी कमपि पदार्थं प्रति प्रतिबुद्धो जायते, तदा ज्ञानमवश्यमेव सन्निविशति समुत्पद्यते वा । एतस्मादेव कारणाच्चैतन्यं ज्ञानपर्यायवाचकमिव प्रयुज्यते ।

११. संवेदनम्

अनुकूलवेदनीयं सुखम्, प्रतिकूलवेदनीयं दुःखमिति सुखदुःखादीनामनुभवः संवेदनमित्यभिधीयते । क्रोधलोभमोहादिभावानामन्तर्भावोऽपि संवेदन एव कार्यः । अस्ति हि संवेदनं चैतन्यानुभवस्य मौलिकमङ्गम् । यतो हि किमपि ज्ञानं संवेदनं विना नैवोपलभ्यते । साधारणतमोऽपि ज्ञानविषयः सुखं दुःखं वाऽवश्यमेव जनयति । रागात्मिका वृत्तिर्हि मनसः संवेदनमित्युच्यते । ज्ञानं तद्वति तत्प्रकारकोऽनुभवो भवति । सुखदुःखानुभवस्तु पुरुषस्वभावेच्छाधीनमनियतरूपं भवति । सरलतमत्वादपरिवर्त्यत्वात् प्रारम्भिकक्रियारूपत्वाच्च संवेदनं मौलिकं चैतन्याङ्गमिति मन्यते । क्रोधकामादिस्थायिभावेष्वपि सुखदुःखादीनां समावेशः क्रियत एव । नहि किञ्चिदपि ज्ञानं पूर्णत औदासीन्यान्वितमुपलभ्यते । यदपि विचार्यते, ज्ञायते, तत्सर्वं सुखजनकमथ वा दुःखजनकमवश्यमेव भवति ।

१२. प्रयत्नः

सर्वेऽनुभवाः क्रियाजनकाः। यथा सर्वज्ञानं दुःखं वा सुखं वाऽवश्यमेव जनयति, तथैव यत्प्रतिकूलवेदनीयमनुकूलवेदनीयं वा भवति तदवश्यमेव क्रियामुत्पादयति। प्रयत्नोऽपि मानसानुभवस्य मौलिकमङ्गम्। नहि तद्व्यतिरिक्तं किञ्चिदपि ज्ञानमुपलभ्यते। ज्ञानोत्पत्तावपि क्रियालेशो वर्तते। तथा हि वक्ष्यमाणध्यानाख्यक्रियां विना प्रत्यक्षज्ञानमपि न सम्भाव्यते। ध्यानमपि चैतन्यव्यापार एवेति वयं वक्ष्यामः। अपि च सुखदुःखानुभूत्यनन्तरं प्रयत्न उत्पद्यत एव, दुःखजनकोत्तेजकप्रहाणाय सुखोत्तेजकसम्प्राप्त्यै वा। यत्सुखजनकं तद्रोचते, यच्च रोचतेऽस्मभ्यं वयमवाप्तुं तदिच्छामः। कदाचन पदार्थज्ञानं मानसक्रियामात्रपर्यवसानं भवति। क्रियाणां जन्मजातानां यद्रूपं तत्तु मूलप्रवृत्तीनां प्रकरणेऽस्माभिर्विस्पष्टम्। प्रयत्नो हि खलु सरलतमक्रियारूपो मानसानुभवस्यापरिहार्यमपरिवर्त्यं मौलिकमङ्गम्। ज्ञानाख्यो व्यापारः संवेदनञ्च सुखदुःखयोर्मानसक्रियां विना न सम्भाव्येते, क्रियायामन्ततो गत्वा परिणमेते अपि च। प्रयत्नेषु सप्रयोजनात्मकोच्चस्तरीयाचरणैच्छिकचेष्टादीनामप्यन्तर्भावो बोद्धव्यः। सन्ति हि विनिहितरूपाः केचन प्राणिषु जन्मजाता वेगाः शक्त्यभिव्यक्तिस्रोतांस्यपि च। बौद्धिकनिम्नस्तरीयमानसिकक्रियासु इमे वेगा अनिर्दिष्टरूपा अन्धेन नीयमानो यथान्ध इव प्रतीयन्ते। पशूनां मूलप्रवृत्तिषु वेगानामभिव्यक्तिरूपमेवम्प्रकारकमेव दृश्यते। मानवव्यवहारे सप्रयोजनत्वाद् विचारान्वितत्वादेतेषां वेगानां मूलप्रवृत्त्याख्यानामभिव्यक्तिः परिवर्तिता जायते, प्रयत्नाख्यं रूपमिच्छानुप्रेरितञ्च प्रपद्यते।

१३. मानसिकसँल्लग्नता[१]

केचन मनोवैज्ञानिकाः, यथा प्राध्यापकवुडवर्थमहोदयाः[२], प्रयत्नाख्यप्रत्ययनिरसनाय मानसिकसँल्लग्नतेति पदस्य प्रयोगं कुर्वन्ति। तेषां मते मानसिकसँल्लग्नता द्विविधा भवति[३]—परिस्थितिसँल्लग्नता, प्रयोजनसँल्लग्नता चेति। परिस्थितिसँल्लग्नता तदा जायते यदा वयं प्रयुज्यमानान् पदार्थान् प्रति सचेष्टा भवामः, यथा—प्रस्तुतग्रन्थलेखनाय लेखनीपत्रतद्विषयकविचारशृङ्खलाविशेषादयः। यद्यपि कक्षकुड्ये विलिखितानि चित्राण्यपि परिस्थितावेव सन्निविष्टानि, सन्निकृष्टत्वात्; तथापि प्रस्तुतलेखनकार्योपयोगिपरिस्थित्यां तेषामन्तर्भावो नैव भवति। अत एव चित्रादिषु परिस्थितिसँल्लग्नताया अभाव एव विद्यते। लक्ष्यसँल्लग्नता किं वा प्रयोजनसँल्लग्नता तु प्रयोजनं लक्ष्यं वा प्रति जागरूकता भवति, यदधिकृत्य मानवस्य सर्वे प्रयत्ना ज्ञानेच्छासंवेदनकर्मादयः प्रवर्तिता भवन्ति। प्रस्तुतस्थलेऽस्याध्यायस्थ समापनमेवास्मल्लक्ष्यम्, तदभिमुखीकृत्य सर्वाण्यस्माकं कार्याणि प्रेरितानि भवन्ति।

नेदं प्राध्यापकवुडवर्थमहोदयानां विवेचनेन स्फुटीभवति यद्धि कथन्नु परिस्थितिसँल्लग्नतालक्ष्यसँल्लग्नतयोः स्वीकारेणान्तर्निहितप्रकृतिजन्यवेगानां प्रवृत्तीनां प्रयत्नाख्यचैतन्यव्यापारा-

---

१. तुलनार्थम्—Mental set.

२. द्रष्टव्यम्—Woodworth, R. S. Psychology, 'The science of mental life', Page 9—18

३. तुलनार्थम्—Situation set and goal set.

ङ्गस्य मौलिकस्य निराकरणमासादितुं शक्यते। मूलप्रवृत्तीनां स्वरूपावधारणवेलायामपि यान्त्रिकवादाभिभूतस्य तन्मतस्यालोचनं कृतमेवास्माभिः। अत्रापि पर्याप्तमेवेदं वक्तुं यत्परिस्थितिसँल्लग्नता लक्ष्यसँल्लग्नता च निरर्थके निष्फले, यदि प्रयत्नो मौलिकश्चैतन्यव्यापाररूपो न स्वीक्रियेत। नहि प्रयत्नमन्तर्निहितप्रकृतिजन्यशक्तिवेगरूपं विहाय परिस्थितिसँल्लग्नता लक्ष्यसँल्लग्नता वापादयितुं शक्यते। सँल्लग्नतायामपि मानसो व्यापारः प्रयत्नरूपः सन्निविष्ट एव। प्राध्यापकवुडवर्थमहाभागा 'विकसन्ती क्रिया' 'शिरस्युत्पद्यमाना क्रिया' 'मानसिकसँल्लग्नता'[1] इत्यादिकैः शब्दसमूहैर्यं भावं प्रकटयितुमिच्छन्ति, सतु व्यवहितोऽस्पष्ट एव जायते। समयघटिकायन्त्रेण सह सँल्लग्नस्य पुरुषस्य सादृश्यमुद्भाव्य तैराकूतं भ्रान्त्यवलीढमिव प्रतिभाति। नहि मानवव्यापाराणां यान्त्रिकक्रियाभिः सह तुलना करणीया। यान्त्रिकक्रिया मानव। आरभन्ते। स्वतस्तु ताः प्रयोजनविरहिताः, प्रयोक्तुः प्रयोजनमपेक्षन्ते। मानसव्यापारस्तु प्रयोजनेच्छादिभिः प्रवर्तित आभ्यन्तरप्रकृतिनिहितवेगैः प्रचोदितः साकूतो भवति। नहि यन्त्रं स्वयं क्रियारूढं जायते। अपेक्षते हि तच्चैतन्यं प्रेरकम्। अतो वयं यान्त्रिकवादातिशयातिरञ्जितं मौलिकतमप्रयत्नाख्यचैतन्यव्यापारानुस्यूतं वुडवर्थमतं नाद्रियामहे। नहि जडपदार्थजन्यक्रियाव्याख्यानमात्रं विलक्षणस्वरूपवच्चैतन्यव्यापाराणां स्वरूपावबोधायालमित्यस्माकं मतम्।

१४. ज्ञानसंवेदनप्रयत्नानां परस्परं सम्बन्धः

ज्ञानसंवेदनप्रयत्नाः सन्ति हि खलु मानसव्यापारस्य मूलभूताङ्गरूपेण विविक्ता इति वयमवोचाम। स्मरणीयमस्मिन् विषये यदेतानि चेतनानुभवाङ्गानि रसायनविज्ञानाभिमतमूलतत्त्वैः सदृशानि नैव भवन्ति। न ह्यस्ति तेषां साम्यम्, यतो हि रासायनिकमूलतत्त्वानां पृथक्करणं विश्लेषणं मेलनं सर्वथैव प्रयोगशालायां कर्तुं शक्यते, नहि तथा मानसानुभवमूलभूतज्ञानसंवेदनप्रयत्नाख्यतत्त्वानि। एते तु मिलित्वैव परस्परमाश्लिष्यैव मानसानुभवं जनयन्ति। नहि तेषां पृथक्करणं सम्भवति। नाप्येकमेव तत्त्वं विविक्तं कदाचन पृथक्तोऽनुभूयते। अतो मिलित्वैव तेषामनुभवाङ्गत्वमुपपद्यते।

अपि च सामान्यतयेदं वक्तुं शक्यते यद् वयं प्रथमं जानीमस्तदनन्तरं संवेदनमनुभवामः, तदनन्तरमिच्छामः, प्रयतामहे। नहि सर्वदाऽयं क्रमः परिरक्षितुं शक्यते। नह्यालोचनमपि ज्ञानं ध्यानाख्यां क्रियां विहायापादयितुं शक्यते। प्रत्यक्षमपि तावत् क्रियापूर्ववृत्तितायुक्तमिति सूक्ष्ममानसप्रत्यक्षोपोद्बलितम्। अपि च नहि सर्वे पदार्था ध्यानाकर्षणायालम्। ये ये सुखप्रदास्ते तेऽभिरुचिमुत्पाद्य ध्यानायोपयुक्ततमा भवन्ति। अर्थाद् ध्यानाख्या क्रियाऽपि संवेदनमूलैव भवति। अतो विवेचनसौकर्याय मानसानुभवेषु परस्परमाश्लिष्टा अपि ज्ञानसंवेदनप्रयत्ना विविक्ता विचार्यन्ते, विशेषतो विलक्षणरूपत्वात्तेषाम्।

१५. चैतन्यस्य प्रकारविशेषाः

यदायं पुरुषः पश्यति, स्मरति, कल्पते, अनुमिनोति, उपमिनोति, विश्वसिति तदा चैतन्यं मनो वा सर्वानेतान् व्यापारान् करोति। इयं हि खलु चैतन्यस्य स्थूलावस्था या जाग्रद-

1. तुलनार्थम्—Progressive activity, activity which goes on in the head, mental set.

वस्थाऽपि निगद्यते। जाग्रद्दशायामेव ज्ञानसंवेदनप्रयत्नादीनि चैतन्यकर्माणि क्रियमाणानि दृश्यन्ते। केचन मनोवैज्ञानिका एकदेशिनश्चैतन्यं नाम जाग्रदवस्थाविशेषात्मके चैतन्य एव व्यवहरन्ति। अपरे केचन चैतन्यसन्तानव्यवच्छेदं किमुतान्तरालं चैतन्यसत्त्वेऽङ्गीकुर्वन्ति यदाऽयं पुरुषः स्वपिति मूर्च्छितो वा जायते। नेदं व्याख्यानं चैतन्यस्वरूपस्य समीचीनमस्मान् प्रतिभाति। नास्ति सुषुप्तौ चैतन्यसत्त्वव्यवच्छेदः, नाप्यस्ति चैतन्येऽन्तरालविशेष एव। चैतन्यन्त्ववच्छिन्नस्वरूपमेकमेव। अस्ति हि खल्वस्य महद् वैलक्षण्यं यच्चैतन्यमेकं सदपि तत्तद्व्यापारेषु व्याप्रियमाणम्। सर्वा मनोवृत्तीर्जानाति, तासां संस्कारानादधाति, कालान्तरे च स्मरति। जाग्रदवस्थाभिमानि चैतन्यं विश्वाख्यं भवति। उक्तं हि माण्डूक्योपनिषदि आत्मनश्चतुष्पादस्य प्रथमपादरूपस्य विश्वाख्यचैतन्यस्य व्याख्यानावसरे "जागरितस्थानो बहिष्प्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः[1]।" अत्रेदं स्पष्टीकृतं यज्जाग्रच्चैतन्यं स्थूलविषयानेव विषयीकरोतीति। अपि च जाग्रच्चैतन्यं बहिष्प्रज्ञो बाह्यपदार्थानेव विजानाति। स्मरणीयमत्र यच्चैतन्यस्य स्थूलावस्थायां जाग्रच्चैतन्ये वाऽस्माभिः मानसप्रत्यक्षस्मृतिकल्पनादीनां व्यापाराणां कार्यक्षमताऽपि स्वीकृता, न तु बाह्यपदार्थज्ञानमात्रमेव। अपि च चैतन्यमिति शब्दोऽस्माभिर्नहि सङ्कीर्णेऽर्थे जाग्रच्चैतन्यपर्यायवाचके प्रयुक्तोऽपि तु चैतन्यस्य सर्वास्वेवावस्थास्वनुगतस्वरूपद्योतनाय।

१६. सूक्ष्मावस्था, संस्कारावस्था, तेजःसंज्ञं चैतन्यम्

अस्ति हि खल्वपरा चैतन्यस्य सूक्ष्मावस्था। अर्वाचीनैर्मनोवैज्ञानिकैः साऽवरं चैतन्यमिति नाम्ना प्रथते। संस्कारमयी हि साऽवस्था। तदभिमानि चैतन्यं तैजसमिति निगदन्ति वेदान्तविदः। माण्डूक्योपनिषदेनदेवम्प्रकारेण विशिनष्टि—"स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक् तैजसो द्वितीयः पादः[2]।" नहि सूक्ष्मचैतन्यस्य विषयाः स्थूलपदार्था भवन्त्यपि तु मानससंस्कारा अथवा मानसप्रत्ययसंवेदनप्रवृत्त्यादयः स्मृत्युद्बेजिता एवंविषयीभूता भवन्ति। इन्द्रियापेक्षयाऽन्तःकरणत्वान्मनसस्तद्वासनारूपा च स्वप्ने प्रज्ञा यस्येत्यन्तःप्रज्ञः। विषयशून्यायां प्रज्ञायां केवलप्रकाशरूपायां विषयित्वेन भवतीति तैजस इति श्रीमच्छङ्कराचार्याः। इह वासनामात्रं केवला भोज्येति प्रविविक्तो भोग इति। स्वप्ने हि तैजसचैतन्यस्य क्रियाकलापस्यानुभवो जायते। स्मृत्यां कथं पूर्वानुभूतविषयाणां स्वरूपं सुरक्षितं धारणागतं वा तिष्ठति ? नूनं तत्तु सूक्ष्मचैतन्यक्रियाद्वारैवासाद्यते। प्रतीच्यैर्मनोवैज्ञानिकैस्तैजसाख्यं सूक्ष्मं चैतन्यमवरं चैतन्यमिति[3] नाम्नाऽभिधीयते। आङ्ग्लभाषायामस्य पर्यायवाचकः 'सब-कांन्सस' इति शब्दो व्यवह्रियते।

१७. चैतन्यतृतीयाऽवस्था, कारणावस्था

सुप्तवासनामयी हि खलु साऽवस्था। औपनिषदास्तु तां प्रज्ञाख्यं चैतन्यमित्यभिधानेन व्यवहरन्ति। माण्डूक्योपनिषदि व्याख्यातञ्चेदमित्थम्—"सुषुप्तिस्थान एकीभूतः प्रज्ञानघन

१. द्रष्टव्या—माण्डूक्योपनिषद् ३

२. द्रष्टव्या—माण्डूक्योपनिषद् ४

३. तुलनार्थम्—Sub-conscious.

एवानन्दमयो ह्यानन्दभुक्चेतोमुखः प्राज्ञस्तृतीयः पादः।" स्मृतिस्वप्नादौ सूक्ष्मचैतन्यस्याभिव्यक्तिस्तु दरीदृश्यते, किन्तु कारणावस्थागतं चैतन्यं किं वा कारणचैतन्यं सुप्तमिवाऽवतिष्ठते। यथा सुषुप्तौ तथाऽन्यथा। नहि तदभिव्यक्तिः साधारणतया जायते। कुशलैर्मनोवैज्ञानिकैर्मनोविश्लेषणादिविधिविशेषैस्तद्रूपमुद्धाट्यते। अर्वाचीनैर्मनोवैज्ञानिकैः कारणचैतन्यमचेतनं चैतन्यमिति नाम्नाभिधीयते। आङ्ग्लभाषायामस्य पर्यायवाचकः शब्दः 'अनकान्सस' इति व्यवह्रियते।[1]

१८. चैतन्यस्य त्रैविध्यम्

स्मरणीयमस्मिन् विषये यद्धि सर्वेषामेव मनोवैज्ञानिकानां मतैक्यं सूक्ष्मचैतन्यास्तित्वविषये नास्ति। तथापि सामान्यत इदं स्वीक्रियते यद्धि जाग्रच्चैतन्यं सूक्ष्मचैतन्याद्भिद्यते, सूक्ष्मचैतन्यञ्च कारणचैतन्याद्भिद्यत इति। विश्वविश्रुताः स्वनामधन्याः फ्रायडमहोदयाश्चैतन्यस्य त्रीणि रूपाणि स्वीकुर्वन्ति, तानि यथा—चैतन्यम्, पूर्वचैतन्यम्, अचैतन्यमिति[2]। चैतन्यं हि मनसस्तद्भागो भवति यत् साक्षात् प्रत्यक्षं संवेदनं विचारादीननुभवति। पूर्वचैतन्यम् (उपर्युक्तमवरचैतन्यमेवेदम्) यद्यपि साक्षाच्चैतन्यात्तात्कालिकात्तु बहिरेवावतिष्ठते, तथापि स्मृत्यादिसाधनैस्तदुद्बोधनं कर्तुं शक्यमेव, जाग्रच्चैतन्यभूमौ तदवतारणमपि तथा सम्पद्यते। अचैतन्यं हि मनसः प्रायस्तिरोहितं रूपं भवति, यच्चाभियुक्तैर्मनोविश्लेषणादिसाधनैरभिव्यज्यते।

अचैतन्यं नास्ति चैतन्याभावोऽपि तु चैतन्यस्य सुप्तावस्था। अचैतन्यं नाम मनसस्तृतीयो भाग इति कथनेन मनसो जाग्रदवस्थातिरिक्तमपि सत्त्वं वज्रलेपायितम्। केचन सूक्ष्मावस्थां कारणावस्थाञ्च चैतन्यस्याभिन्नामेव मन्यन्ते। तेषां मते पूर्वचैतन्यमेवाचैतन्यमिति। नेदं मतं समीचीनं प्रतिभाति। फ्रायडमहोदयाभिमतं पूर्वचैतन्याचैतन्ययोरङ्गीकरणन्त्वनुभवप्रतिष्ठमित्यवसेयम्। नहिं 'अचैतन्यं किमुताचेतनं चैतन्यं किमुतान्चेतनं मनः' इत्यस्मभ्यं रोचते। नहि चेतनं मनोऽचेतनमिति वक्तुं शक्यते। अतो वयमचैतन्यमित्यस्य स्थाने कारणचैतन्यमिति प्रयोगं व्यवहरिष्यामोऽग्रिमेषु विवेचनावसरेषु।

केचन पूर्वचैतन्यमपि नास्ति साम्प्रतमिति मन्यन्ते। जाग्रचैतन्यानुभवस्तु सर्वेषामेवानुभूवानां प्रथमा भूमिः। तदनन्तरमेव सूक्ष्मचैतन्ये तत्संस्काराः समाधीयन्ते। अतः सूक्ष्मं चैतन्यमवरं चैतन्यं भवतीत्यपि वक्तुं शक्यते। केचन मन्यन्ते यद्धि सूक्ष्मं चैतन्यमवरं चैतन्यं भवति। यतो हि जाग्रचैतन्यापेक्षया तस्य प्रभावो विस्तरश्चात्यधिको दृश्यते। पश्चाद्भावित्वादेवास्माभिरवरं चैतन्यमित्युक्तम्, न तु प्रभावापेक्षया। अतः सूक्ष्मं चैतन्यं पूर्वचैतन्यमवरचैतन्यमिति वा भवतीति न वाच्यम्।

सन्ति हि केचन मनोवैज्ञानिका ये सूक्ष्मचैतन्यं कारणचैतन्यञ्च कल्पनामात्रमिति वदन्ति। अपरे तु वस्तुभूतं तच्चैतन्यमिति निगदन्ति। केचन मनोवैज्ञानिकाः सूक्ष्मं चैतन्यं जाग्रदवस्थानुभवमात्रनिर्मितमिति वदन्ति। तथाप्यन्ये ज्यूरिचनागरिककार्लयुङ्गमहोदया इव

---

१. तुलनार्थम्—Unconscious.

२. तुलनार्थम्—Sigmund Fraud, A General Introduction to psychoanalysis (Boni & liveright) 1920. cf. consciousness, forconsciousness and Unconscionsness.

जातिवंशपारम्पर्यायत्तं हि कारणं चैतन्यमिति कथयन्ति[1]। सूक्ष्मं चैतन्यं कारणं चैतन्यञ्च व्यष्टिरूपे द्वे एव वस्तुभूते इति प्राञ्चः, यथा हि खलु जाग्रच्चैतन्यं भवति।

औपनिषदानां मते चैतन्यस्य चतुर्थं रूपं तुरीयाख्यमपि भवति। नहि तस्य प्रपञ्चावसरोऽत्र विद्यते। प्रपञ्चितं हि तदस्माभिः समासतोऽन्यत्र[2]। तुरीयं हि चैतन्यस्य चतुर्थः पाद इत्याकूतम्।

१६. विशिष्टमनोवृत्तीनां स्वरूपम्

वयमत्र सम्प्रति संस्कृतवाङ्मये प्रयुक्ता मुख्यतमा मनोवृत्तीरनुव्याख्यास्यामः, येनाऽर्वाचीनमनोविज्ञाने प्रयुक्तानां मनोवृत्तीनां तत्तद्विषयपार्थक्यं स्फुटतरं भवेत्। प्रथमं तावन्मन एव। तस्य स्वरूपन्त्वस्माभिः प्रथमाध्याये किञ्चिद्विवृतम्—कस्तावन्मनोविषयः ? किञ्चास्य स्वरूपम् ? तद्यथा भगवतां पुनर्वस्वात्रेयमहर्षीणां मते[3]—

लक्षणं मनसो ज्ञानस्याभावो भाव एव च।
सति ह्यात्मेन्द्रियार्थानां सन्निकर्षे न वर्तते॥
वैवृत्यान्मनसो ज्ञानं सान्निध्यात्तच्च वर्तते।
अणुत्वमथ चैकत्वं द्वौ गुणौ मनसः स्मृतौ॥
चिन्त्यं विचार्यमूह्यं च ध्येयं सङ्कल्प्यमेव च।
यत्किञ्चिन्मनसो ज्ञेयं तत्सर्वं ह्यर्थसंज्ञकम्॥
इन्द्रियाभिग्रहः कर्म मनसः स्वस्य निग्रहः।

अर्वाचीने यथोक्तं मनसो व्यापारेषु विचारसङ्कल्पातिरिक्तं विविधभावसंवेदनेच्छाप्रयत्नादीनां समावेशः क्रियते। मनस्तु प्रायश्चैतन्यपर्यायवाचकमात्मार्थे प्रयुक्तमर्वाचीनमनोविज्ञानग्रन्थेषु दरीदृश्यते। नहि मनश्चैतन्यस्य शक्तिः, किमुतैकं करणमात्मनः साधनमिति यावदथवा ज्ञानस्यासाधारणो हेतुरपि त्विदमनुभवितृ, यस्य सङ्कल्पसंवेदनेच्छाप्रयत्नादयो व्यापारा भवन्ति। वैलैण्टाइनमहोदयै राजकीयसंस्कृतमहाविद्यालस्य प्राक्तनप्रधानाचार्यपदमलङ्कुर्वाणैः स्वकीयन्यायकौमुद्यामेवम्प्रकारेण मनसः स्वरूपं विवृतम्। तथा हि—

"युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्" इति।

(१) युगपदेककाले। एकात्मनीति पूरणीयम्। ज्ञानानामनुत्पत्तिर्यतः स एव धर्मो मनसो लिङ्गम्, लक्षणमित्यर्थः।

(२) अत्र मनोनामकं परमाणुपरिमाणम्, क्रियावत्, आभ्यन्तरमिन्द्रियम्, तच्चात्मना संयुक्तं सद् येन येनेन्द्रियेण यदा यदा संयुज्यते, तदा तदा तदिन्द्रियेण ज्ञानं जायते, तस्य च परमाणुत्वाद् युगपदनेकेन्द्रियसंयोगाभावेन न युगपन्नानाज्ञानोत्पत्तिरिति गौतममतम्। अस्मन्मते

---

१. तुलनार्थम्—C. G. Jung, "Psychology of the unconsious," translated by Beatrice Hinkle (moffatt, yard, 1916)

२. द्रष्टव्यम्—तत्त्वज्ञानमन्दिरस्य वार्षिकाङ्के १९४६ ई० 'तुरीय' लेखः।

३. द्रष्टव्या—चरकसंहिता, शारीरस्थानम् १८-२०।१।

तु जीवात्मनो युगपन्नानाज्ञानधारणे स्वाभाविकी काचिच्छक्तिर्विद्यते तद्विशिष्ट आत्मा मनःपदेन व्यवह्रियत इति।

२०. बुद्धिः

अध्यवसायात्मिका बुद्धिर्भवति। अध्यवसायो हि बुद्धिधर्मः। तदुक्तं हि चरकसंहितायाम्—

कल्प्यते मनसा तूर्ध्वं गुणतो दोषतोऽथवा॥
जायते विषये तत्र या बुद्धिर्निश्चयात्मिका।
व्यवस्यति तथा वक्तुं कर्तुं वा बुद्धिपूर्वकम्[1]॥

'घटोऽयम्' 'पटोऽयम्' इत्येवं याऽध्यवस्यति सा बुद्धिरिति सांख्याचार्येश्वरकृष्णेनाऽप्यभिहितम्। तथा हि—

अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम्।
सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तम्॥

सा च बुद्धिरष्टाङ्गिका, सात्त्विकतामसरूपभेदात्। स्मरणीयमेतद्यत् सांख्यमते बुद्धिरपि जडा एव। नेदमपि स्पष्टं यद् बुद्धिरियं प्रकृतिविकाररूपा समष्टिबुद्धिर्भवति किमुत व्यष्टिबुद्धिरिति। अपि च, क्रियते बुद्धिशब्दस्य व्यापकेऽर्थे प्रयोगो नैयायिकैः। यथा—

"सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम्। सा द्विधा—स्मृतिरनुभवश्च।"

अर्वाचीनानां मनोवैज्ञानिकानां मते बुद्धिर्मनसश्शक्तिविशेषा नास्ति। एकमेव मनोऽन्तःकरणसंज्ञकं मन इति बुद्धिरिति अहङ्कार इति चित्तमिति चाख्यायते वृत्तिभेदेन व्यापारभेदेन वा। तदुक्तं वेदान्तपरिभाषायाम्—

मनो बुद्धिरहङ्कारश्चित्तं करणमान्तरम्।
संशयो निश्चयो गर्वः स्मरणं विषया इमे॥ इति।

मनसो विषयः संशयो भवति। बुद्धेश्च निश्चयः। अहङ्कारस्य विषयः गर्वोऽभिमान इति यावत्। चित्तस्य विषयः स्मरणम्। नहि व्यापारभेदेन इतरेतरव्यावृत्ता मनोशक्तिविशेषा भवन्तीति वाच्यम्। एकस्यैव चित्तस्य वृत्तिभेदादेतानि नामानि भवन्तीति बोद्धव्यम्।

वयमग्रिमेऽध्याये चैतन्यस्य मनःसंज्ञकस्य ध्यानाख्यव्यापारविशेषस्य स्वरूपमनुव्याख्यास्यामः।

इति अर्वाचीने मनोविज्ञाने चैतन्यस्वरूपविवेचनीयः पञ्चमोऽध्यायः॥

१. द्रष्टव्या—चरकसंहिता, शारीरस्थानम्

षष्ठोऽध्यायः

ध्यानस्वरूपम्

१. पतञ्जलिमतम्

ननु किमिदं ध्यानं नाम ? भगवता पतञ्जलिमहर्षिणा ध्यानमष्टाङ्गयोगव्याख्यानावसर एवम्प्रकारेण व्याख्यातम्—"तत्र प्रत्ययस्यैकतानता ध्यानम्" इति[१]। तत्र तस्मिन् देशे विषयदेशे प्रत्ययस्यैकतानता सदृशः प्रवाहः प्रत्ययान्तरेणापरामृष्टो ध्यानमित्युच्यते। यदा चित्तं समाहितं भूत्वा कमपि विषयं समनस्कं ध्यायति पश्यति, तदा वयं ब्रूमः 'ध्यानेन स पश्यति' इति। समनस्कमिति ध्यानयुक्तम्। ध्यानस्य पूर्ववर्तिकारणद्वयं भवति, तद्यथा—एकस्मिन्नेव विषयदेशे बाह्ये आभ्यन्तरे वा चित्तबन्धत्वमिति प्रथमं कारणम्। तदेव महर्षिपतञ्जलिना धारणापदेनाभिहितम्। अपरञ्च ध्यानजनकं कारणमितरविषयेभ्यः चित्तवृत्तीनां प्रत्यावर्तनमिति। इदन्तु 'प्रत्याहार' इति पदेनाभिधीयते। यदा तु चित्तमेकेन विषयेणैव सम्प्रयुज्यतेऽपरैश्च विषयैर्विनिवर्तते, तदा यं विषयं चित्तमेकीभूय घनीभूय केन्द्रितं भूत्वा वा चिन्तयति, स ध्यानविषय इति कथ्यते। कथं हि चैतन्यं मनो वा केन्द्रितं घनीभूतं वैकस्मिन् विषये जायते, कीदृशं वा ध्यानस्य स्वरूपमिति निर्वक्तुं न शक्यते। यत्किञ्चिद् वयं निर्वर्णयितुं शक्नुमस्तत्तु किं हि खलु ध्यानेन जायते, केन केन कारणजातेन चैतनस्य प्रत्ययैकतानत्वमापद्यत इति। अस्माभिर्ध्यानमिति शब्दोऽतिविस्तृतमनोविज्ञानक्षेत्रोपयोगित्वेनात्र व्यवहृतः, न तु केवलमष्टाङ्गयोगपरत्वेन प्रसंख्यानपरत्वेन, यथा योगदर्शनाचार्यैरयं प्रयुज्यते। एवम्भूतोऽयं ध्यानशब्दश्चैतन्यस्य सामान्यं व्यापारमभिव्यञ्जयति। नहि ध्यानव्यतिरिक्तं किमपि ज्ञानं संवेदनं प्रयत्नो वा प्राकट्यं लभते। न ह्यस्माकमयमाग्रहः—'ध्यानं क्षणमात्रस्थायि भवत्युत घटिकाद्वयपर्यवसायि' इति। यदस्माभिरभिप्रेतं तत्त्विदमेव यदेकस्मिन् विषये केन्द्रीभूते चैतन्यस्य तारतम्येन प्रवाहो विद्यत इति। एकस्मिन् विषयेऽनुभवैकतानत्वमेव ध्यानमित्यभिधीयते। ध्यानमवधानमित्यनर्थान्तरम्।


२. चैतन्यध्यानयोः सम्बन्धः

मनोवृत्तीनां वर्गीकरणे ध्यानस्य किं स्थानं भवतीति प्रश्नस्य समाधानं मनोवैज्ञानिकानां परमसन्तोषप्रदं नोपलभ्यते। किन्तावद् ध्यानं चैतन्यमित्यनर्थान्तरम् ? यतो हि यत्र यत्र ध्यानं वर्तते, तत्र तत्र चैतन्योपलब्धिर्भवति। प्राध्यापकप्रवराणां वार्डमहोदयानां मते किञ्चिद् वस्तु प्रति चैतन्यानुभवः तद्ध्यानञ्चानर्थान्तरमिति। नेदं मतमस्मान् समीचीनं प्रतिभाति। यद्यपि जाग्रदवस्थायां सर्वास्वेव मनोवृत्तिषु ध्यानसहकृतैव विषयानुभूतिर्जायते, तथापि ध्यानं चैतन्यपर्यायवाचकमिति नैव लोकसिद्धम्। चैतन्यं हि व्यापकतरम्, ध्यानञ्च चैतन्यस्य केन्द्रीभूतत्वं घनीभावो वा। यद्यपि स्वप्नेऽपि मनोवृत्तयो ध्यानोपेता एवोत्पद्यन्ते, तथापि सुषुप्तौ चैतन्ये

---

१. द्रष्टव्यम्—योगसूत्रम्—३।२, आनन्दाश्रमसंस्करणम्, पृ० १११

तमोऽभिभूते चैतन्योच्छेदो नैवाभिमतोऽस्माभिः। अस्ति हि चैतन्यं सुषुप्तावपि। यदा हि वयं सङ्कल्पमिमं चेतस्याधाय 'प्रातश्चतुर्वादने जागरिता भविष्यामः' इति सुषुप्ता भवेम, चतुर्वादनात् प्रागेव चोत्थिता विनिद्रा भवेम, तदा चैतन्येनाविरलसत्त्वेनैवासादितं तज्जागरणमिति वयं मन्यामहे। अस्तु तावत् चैतन्यक्षेत्रं व्यापकतरं ध्यानक्षेत्रञ्च चैतन्यवृत्तस्य केन्द्रीभूतमिति।




केन्द्रबिन्दुश्चायं ध्यानाख्य इतस्ततः प्रविचलति। इदानीमस्मिन् विषये, तदानीमपरे विलक्षणे विषये। यं विषयमभिमुखीकृत्य चैतन्यानुभवः प्रवर्तते, स एव चैतन्यवृत्तस्य केन्द्रबिन्दुत्वमापद्यते।

३. चेतनाया द्विविधत्वम्

विलियमजेम्स-टिचनर-लॉयडमार्गनप्रभृतयो मनोवैज्ञानिका ध्यानस्वरूपव्याख्यानाय चेतनाद्वैविध्यमङ्गीकुर्वन्ति, तद्यथा—केन्द्रीयचेतना, प्रान्तीयचेतना चेति। केन्द्रीयचेतनया विचारप्रत्ययादीनां साक्षात् सम्बन्ध एव ध्यानम्। यथा हि यदा वैद्युतप्रदीपः कक्षमेकं प्रकाशयति, तदा कश्चन स्थानविशेषस्तु समीपतमत्वादुज्ज्वलतमप्रकाशान्वितो भवति; दूरस्थाः कक्षप्रान्तिकभागास्तु न्यूनप्रकाशयुक्ता एव भवन्ति। समीपतम उज्ज्वलप्रकाशयुक्तो भागः केन्द्रीयचेतनाविषय इव भवति। यथा स भागः प्रकाशकिरणैरन्वितो भवति, तथैव यं विषयं द्रष्टुं वयमुद्यता भवामः, स विषयो ध्यानोपेतः केन्द्रीयचेतनायुक्त इति यावदुच्यते। यां समस्यां वयं विचारयामः, सैव चैतन्यसामान्यव्यापारस्य केन्द्रबिन्दुः, किन्तु तद्व्यतिरिक्तान्यपि कानिचिद् वस्तूनि पार्श्वस्थानि भवन्त्येव, यथास्माकं वस्त्राणि, पीठासनम्, जलपात्रमित्यादि। एतानि वस्तून्यस्मत्सकाश एव सन्ति, तथापि न तान्यस्माकं चित्तं समाकर्षन्ति। यद्यवसरो भवेत्तर्हि तेष्वपि वस्तुषु किमपि वस्तु अस्माकं ध्यानमाक्रष्टुं प्रभवति। एतानि दूरस्थानि वस्तूनि यान्यस्माकं चित्तस्य केन्द्रीभूतानि न वर्तन्ते प्रान्तिकचेतनाविषयाणि बोद्धव्यानि। एकेन दृष्टान्तेनेदं विवरणं स्पष्टं भविष्यति। १९५५ ई० नवम्बरमासस्याष्टादशतारिकायां रात्रौ सपादाष्टवादनत आकाशवाण्या प्रसारितानि गीतवाद्यादिकान्यस्माकं प्रतिवेशिनो यन्त्रेण समापितानि। नहि तैरस्य ग्रन्थस्य लेखने सँल्लग्नमस्मच्चित्तं ध्यानावस्थं समाकर्षितम्। किन्तु यदाऽयं समाचारः प्रसारितो यद्धि राजकीयसंस्कृतमहाविद्यालयस्य संस्कृतविश्वविद्यालयरूपतां प्रदानाय शिक्षामन्त्रिमहोदयाः श्रीयुतमाननीयहरगोविन्दसिंहमहाभागा राजकीयप्रस्तावमुपस्थापयिष्यन्तीति, तदा पुस्तकलेखने ध्यानावस्थितेन पूर्णतः समाहितेनाऽप्यस्मच्चित्तेन स समाचार एव केवलम्, न तु तदधिकम्, श्रुतः। कथं केन च तत्सम्पादितम्? प्रान्तिकचेतनायां स्थितमपीदं राजकीयसंस्कृतमहाविद्यालयविषयकं वृत्तं सहसा केन्द्रीयचेतनायामानीतम्। नहि वयं जानीमः—कथमिदं परिवर्तनं

सञ्जातम्। किन्तु परिवर्तने जाते, केन्द्रीयचेतनया तद्वृत्तान्तस्य सम्बन्धे स्थापिते सति ध्यानमाकृष्टम्।



उपर्युक्तेन चित्रेण प्रान्तीयचेतनास्थितवस्तूनां विकीर्णानां केन्द्रीयचेतनान्तर्गतसमस्यां परितः दर्शनं कर्तुं शक्यते। सुतरां कस्यचिद् वस्तुनः प्रत्ययस्य केन्द्रीयचेतनया सह सम्बन्ध एव तर्हि ध्यानमित्यभिधीयते।

चैतन्यव्यापारस्य, ध्यानाख्यस्यास्ति हि महद् वैशिष्ट्यम्। कोऽपि दृष्टान्तस्तद्वैशिष्ट्यमुन्नेतुं प्रभवति। चैतन्यव्यापारस्तु सर्वदा गतिशीलो भवति। कक्षस्थानि सर्वाणि वस्तूनि जडानि स्थिराणि भवन्ति। चैतन्यं तु प्रतिक्षणमेकस्मात् पदार्थादन्यं विषयं परिवर्तते, चैतन्यव्यापारस्य धारावाहिकत्वात्। चैतन्यव्यापाराश्चाभ्यन्तरेच्छामूलप्रकृतिजन्यवेगादिभिरेव प्रवर्तन्ते; किन्तु दृष्टान्तान्तर्गतजडपदार्थास्तु सर्वदा बाह्यपदार्थप्रभावैरेव परिवर्तनान्याधातुं प्रभवन्तीति।

४. ध्यानस्य सक्रियत्वम्

ध्यानाख्योऽयं चैतन्यव्यापारः सक्रियो भवति। न ह्यौदासीन्यसमन्वितेन चैतन्येन तानि कर्माणि सम्पाद्यन्ते, यानि ध्यानाख्यव्यापारस्य विषयीभवन्ति, केन्द्रीभूतानि जायन्ते। उपपद्यते तर्हि चैतन्यस्य मनसो वा सक्रियत्वं ध्यानाख्ये व्यापारे ध्यानावस्थायां वा। किन्तर्हि चैतन्येनान्यदापाद्यते? यद्यच्चैतन्यक्षेत्रं ध्यानान्वितं जायते, तत्स्वच्छतरं विमलमिति यावत्, प्रकाशान्वितं विषयमधिकृत्येन्द्रियाणां चक्षुरादीनां दूरत्वाद्यपेक्षया सन्धानं केन्द्रीकरणञ्च[१]-ऽनुभवति। नहि तथा प्रान्तिकभागेषु चैतन्यक्षेत्रस्य तादृशं वैमल्यवैशारद्यादिकमनुभूय, ध्यानविरहितत्वात्। अपि च, विलक्षणो मौलिकश्चायं ध्यानाख्यश्चैतन्यव्यापारः। नहि खल्वयमितरमनोवृत्तिषु ज्ञानसंवेदनप्रयत्नादिषु समावेशमर्हति, यतो हि ध्यानव्यतिरिक्ता काऽपि मनोवृत्तिर्नानुभूयते। ध्यानन्तु सर्वासामेव मनोवृत्तीनां नियतपूर्ववृत्तित्वोपेतं भवति। अतो

१. तुलनार्थम्—Focalisation.

मनस इतरवृत्त्यपेक्षया ध्यानस्य मूलभूतत्वं मौलिकत्वञ्चोपयुज्यते। किं बहुना, ध्यानं कस्यापि मनोवृत्तेरङ्गीभूतं परिणामो वा नैव भवति। इदन्तु चैतन्यानुभवस्य नियतपूर्ववर्ति मन्तव्यम्। न ह्येवम्प्रकारकेण व्याख्यानेनापि ध्यानस्य स्वरूपं स्फुटं भवति। ध्यानं पूर्वं जायते, चैतन्यं तदनन्तरं सञ्जायत इति तु नैव वाच्यम्; अस्ति हि ध्यानस्य चैतन्येन सह नियतसाहचर्यसम्बन्धः, यतो यदा वयं कामपि परिस्थितिमनुभवामस्तदा ध्यानान्विता भूत्वैव तां पश्यामो जानीमस्तद्विषये कञ्चिद् भावमनुभवामः, कञ्चित् प्रयत्नमारभामहे। नहि ध्यानव्यतिरिक्तं किञ्चिदप्यनुभवजातमुत्पद्यते।

५. नहि ध्यानं नाम मनसः शक्तिविशेषः

प्रागुक्तरीत्येदं वक्तुं शक्यते यद्धि ध्यानं चैतन्यस्य सामान्यव्यापारत्वेन सदपि विशिष्टैका मनोवृत्तिर्नैव भवति, या इतरमनोवृत्तिभ्यो भिद्यते, व्यावर्तकाभावात्। ध्यानन्तु चैतन्यानुभवाभिन्नस्वरूपमिति वयं मन्यामहे। नापीदं विशिष्टा मनसः शक्तिरेव भवति, यस्याः केनचित् कारणेनाधानं क्रियतेऽपरैश्च कारणैः परित्यागो वा क्रियते। ध्यानन्तु चैतन्यानुभवेन सह सर्वदैवानुभूयते, चैतन्यस्वरूपमिवेदं प्रतीयते। परिवर्तनशीलं सदपि ध्यानं धारावाहिकत्वेन प्रसरति। नहि ध्यानं नाम चैतन्यस्यागन्तुको गुणविशेषः। ध्यानं यद्यधुनास्य ध्यानस्वरूपस्य विवेचने केन्द्रितं सँल्लग्नं वा वर्तते तदेव क्षणान्तरे लेखन्यां पीठिकादिपदार्थेषु क्रमशः किन्त्वव्यवधानेन विचलति। नहि ध्यानं विद्युत्प्रभेव क्षणं प्रकाशते क्षणञ्च तिरोहितं जायते। ध्यानं परिवर्तनशीलं क्षणिकं सदपि धारावाहिकं तारतम्यप्रयुक्तं भवति, क्रमशोऽव्यवहितं प्रचलति। एकस्मिन्नपि पदार्थे कियच्चिरमेकतानतया ध्यानमवस्थातुं शक्यते। किं बहुना, तात्कालिकध्यानविषया एकस्मिन् पूर्णेऽनुभवे सुसम्बद्धया चैतन्यस्य ध्यानाख्यक्रियया संग्रथिता जायन्ते।

६. ध्यानावस्थायां शारीरिकमुद्रा

ध्यानावस्थायां विशिष्टं मुद्रापरिवर्तनं जायते। यद्यपि सर्वसुलभं मुद्रास्वरूपनिर्देशनं दुष्करम्, तथापि चाक्षुषविषये चक्षुषी तारस्वरेण स्तिमिते जायेते, चक्षुर्निमीलनमपि विस्मरति ध्याता। एवमेव प्रियवस्तुस्मृतिरूपविषये मानसिकध्यानसम्पन्नो मनुष्यः कदाचन निमील्यैव चक्षुषी स्मृतिरूपविषयानुभवस्य रसास्वादं करोति। केचन पण्डिताः पद्मासनमुद्रायां ध्यानैकाग्र्यं सुखेन कर्तुं शक्नुवन्ति। सन्ति चापरे येषां ध्यानं पृष्ठपीठासने सुखेनैकाग्रीभूतं जायते। अस्मद्गुरुचरणाः शयाना एव कदाचनाद्वैतसिद्धिशारीरकभाष्यादिग्रन्थान् परमध्यानावस्थिता भूत्वा पाठयन्ति स्म। श्रवणकाले केचन दूरत आगतं सङ्गीतं तद्दिशि कर्णं परिवर्त्यैव शृण्वन्ति। सैनिकानान्तु 'सावधान' इत्यादेशानन्तरमुल्लेखनीयं मुद्रापरिवर्तनं कस्य न गोचरीभूतम्!

किन्तावत् ध्यानं शारीरिकमुद्रापरिवर्तनमात्रं नास्ति? नहि ध्यानं शारीरिकमुद्रापरिवर्तनमात्रेण व्याख्यातुं शक्यते। सन्ति हि नूनं केचन विद्यार्थिनो ये मुखमुद्रादिभिः सदैव ध्यानास्थिता गुरुमुखमभिपश्यन्तो दृश्यन्ते, किन्तु तेषु कोऽपि मातृप्रेषितं छात्रावासस्थितं मिष्टान्नं चिन्तयति, अपरः कश्चन क्रीडार्थं गन्तुमेव योजनां निर्मिमीते, अन्यश्च कश्चन गुरुं पश्यन्नप्युन्मीलितचक्षुरर्धसुप्तो जायते। ध्यानं नास्ति शारीरिकक्रियामात्रपर्यवसानम्। य एकदेशिनो

मनोवैज्ञानिका शारीरिकमुद्रामात्रेण शारीरिकक्रियामात्रेण वा ध्यानं व्याख्यातुमिच्छन्ति, तेषां मतं नैव समीचीनम्। अस्ति हि खलु शारीरिकमुद्राया महान् प्रभावो ध्यानैकाग्र्ये। साहचर्यमपि तयोः प्रायो दृश्यते। तथापि ध्यानविषयानुसारं शारीरिकमुद्रास्वरूपविषयका बहवो भेदा जायन्ते। अपि चैकविषये ध्यानावस्थितानां पुरुषाणामपि शारीरिकमुद्रादिषु बहवो भेदा दरीदृश्यन्ते। शारीरिकक्रियामुद्रादिस्वरूपे ध्यानस्वरूपाधिगमे सति चैतन्यस्य विलक्षणं ध्यानमयं सक्रियं स्वरूपमपि तिरोहितं जायते। अस्तु तर्हि ध्यानेन सह मुखादिमुद्रासम्बन्धो महत्त्वपूर्णोऽनियतश्च। भगवता पतञ्जलिनापि ध्यानापेक्षयासनस्वातन्त्र्यं स्वीकृत्य शारीरिकमुद्रया सह ध्यानस्यानियतसम्बन्धत्वं निदर्शितम्। तथा हि—"स्थिरसुखमासनम्[1]" इति।

७. ध्यानद्वैविध्यम्

प्राध्यापकप्रवरेणेन्द्रियविषयकं[2] बुद्धिविषयकं[3] चेति द्विप्रकारकं ध्यानं प्रतिपादितम्। नहीमौ ध्यानप्रकारौ ध्यानस्वरूपं स्पृशतः। विषयभेदमवलम्ब्यैवेमौ ध्यानभेदौ बोद्धव्यौ। यद्ध्यानमिन्द्रियविषयकप्रत्यक्षमवलम्ब्य बाह्यपदार्थेषु प्रवर्तते, तदिन्द्रियविषयकं ध्यानमित्यभिधीयते। यथा चाक्षुषप्रत्यक्षे विषयदूरत्वापेक्षया नेत्रयोरवस्थानं केन्द्रितत्वमानुकूल्योपेतमुत्पद्यते। श्रावणप्रत्यक्षे कर्णं दत्वा श्रोता श्रोतुमिच्छति। केन कारणेनेदं शारीरिकमुद्रापरिवर्तनं जायते? यत्र कुत्रचिदप्युत्तेजकं भवेत्तजन्योत्तेजनातिशयमाधातुमेवेदमिन्द्रियशारीरिकमुद्रापरिवर्तनं सञ्जायत इति।

स्मरणीयमस्मिन् विषये प्राध्यापकवुडवर्थमहोदयाभिमता मानसिकसँल्लग्नता, यया कोऽपि मनुष्यो विशिष्टविषये नियुज्यते, यस्यां समुपस्थितायाञ्च इन्द्रियाणि शरीराङ्गानि च विषयं प्रति केन्द्रितानि जायन्ते। इन्द्रियविषयके ध्याने सुतरां तावदिन्द्रियाणामनुकूलीकरणं[4] केन्द्रीकरणं[5] वा सञ्जायते।

८. बुद्धिविषयकं ध्यानम्

विषयापेक्षातोऽपरो ध्यानस्य प्रकारो बुद्धिविषयकं ध्यानं भवति। यदा ध्यानविषयीभूता काऽपि जटिला समस्या भवति, प्रश्नो वा भवति, तदा कविर्वा गणितज्ञो वा दार्शनिको वा विचार-निमग्नः सँल्लक्ष्यते। इन्द्रियाणां शरीराङ्गानामनुकूलीकरणमत्रापेक्षितं नैव भवति। प्रागुक्त-मानसिकसँल्लग्नताया आवश्यकता त्वत्रापि बोद्धव्या। मानसिकसँल्लग्नतायां सत्यां द्विप्रकारको लाभो भवति, प्रथमस्तु—ध्यानं विषये केन्द्रीभूतमिव जायते, विषयस्य चैतावता परमाभिव्यक्तिः सम्पद्यते। द्वितीयश्च—इतरविषयेभ्यश्चित्तस्य प्रत्याहारः प्रत्यावर्तनं वाऽभिसम्पद्यते। मन इतरविषयान् अभि नैव प्रवर्तत इति।

९. ध्यानोपयोगिशारीरिकमुद्रया[6] सहाभ्यासस्य सम्बन्धः

दृश्यते हि कदाचन ध्यानेन सहाभ्यस्तक्रियाणां सम्बन्धोऽपि, यथा शारीरिकमुद्राया इन्द्रियमुद्रापरिवर्तनस्य च सम्बन्धः पूर्वमस्माभिर्वर्णितः। केचन मानवाः सङ्गीतश्रवण एवं

---

१. द्रष्टव्यम्—पातञ्जलयोगसूत्रम्.

२. तुलनार्थम्—Sensorial attention.

३. तुलनार्थम्—Intellectual attention.

४. तुलनार्थम्—Adjustment.

५. तुलनार्थम्—Focussing.

६. तुलनार्थम्—Bodily attitude in attention.

ध्यानस्थिता जायन्ते यद्धि शिरःकम्पनेन दोलनेन वा ते सङ्गीतस्वरारोहावरोहमूर्च्छनादीनां तालस्वरेणानुमोदनं कुर्वन्ति। अपरे च हस्तवादनेनाङ्गुलिवादनेन च सङ्गीतस्वारस्यानुभवाभिव्यञ्जनाय प्रवर्तन्ते। केचन वार्तालापे यदा ध्याननिमग्ना जायन्ते तदा जानुकम्पनं पादकम्पनं वा कुर्वन्ति। एतादृश्यः क्रियाः कालान्तरेऽभ्यस्ता जायन्ते। तासामवरोधोऽपि ध्यानप्रत्यवायं जनयति। योगिनां हृत्पुण्डरीक उपासनार्थं ध्यानावस्थानमप्यस्त्यभ्यास एव। दृष्टं हि सहस्रारे नाभिकमले वा ध्यानैकाग्रयीकरणमितरेषां योगिनाम्।

१०. ध्यानकारणम्

द्विविधं हि खलु ध्यानस्य कारणं भवति, बाह्यमाभ्यन्तरञ्चेति। यद्यदुत्तेजकवैशिष्ट्यं बाह्यपरिस्थितिवैलक्षण्यं वा ध्यानं जनयितुं समर्थं भवति, तद्बाह्यकारणेष्वन्तर्भाव्यते। उत्तेजकवैशिष्ट्यानुसारं[1] बाह्यकारणान्यष्टविधानि भवन्ति। तानि यथा—

(अ) विषयस्य तीव्रत्वमौग्र्यं वा[2]—तीव्रमुत्तेजकं ध्यानाकर्षणाय सर्वोपरि समर्थं भवति, यथा तीव्रो वैद्युतः प्रकाशो ध्यानमाक्रष्टुं प्रभवति, नहि तथा साधारणो दीपप्रकाशः। उच्चैः स्वरं सर्वे शृण्वन्ति, न तु मन्दं स्वरम्। योऽध्यापको मन्दस्वरेण पाठयति, तस्य छात्रा अनवहिता जायन्ते। आक्रोशनं क्रन्दनं ध्यानमाक्रष्टुमलम्। तीव्रा वस्त्रवर्णा उच्चैः डिण्डिमघोषाः कस्य न चेतः प्रसभं हरन्ति।

(आ) परिवर्तनम्[3]—अस्ति हि परिवर्तनमपरं महत्त्वपूर्णं कारणम्। उग्रमप्युत्तेजकं यद्यविरलं भवेत्, तदपि नैव ध्यानाकर्षणाय क्षमं भवति। लोहकारस्य घनताडनमुच्चैः सदपि ध्यानं सर्वदा नैवाकर्षति। केन कारणेन? अविरलमुग्रमप्युत्तेजकं सात्म्यीभावमापद्यते। एतावतैव तद् ध्यानोत्पादनेऽसमर्थं जायते। अतोऽपेक्षते हि परिवर्तनमपि ध्यानजननाय। यदा हि लोहकार एकस्मिन् दिनेऽस्वस्थो जायते, पृच्छन्ति हि प्रतिवेशिनस्तस्य, 'कुत्र वै लोहकारो गतः? अपि सन्ति सर्वे कुशलिनस्तस्य परिवारे?' लोहकारस्य घनताडनाभावादेव ध्यानं तदभावे प्रसभमाकृष्टम्। घनताडनाभावरूपं परिस्थितौ यत्परिवर्तनं सञ्जायते, तेन ध्यानं विशेषतः समाकृष्टम्। घटिकायन्त्रस्य 'टिक्टिक्' इति शब्दो नैव ध्यानपथमारोहति। यदा तु स शब्दः शान्तो जायते, तस्य स्थगनसमकालमेव ध्यानमपि तद्विषये समाकृष्यते। परिवर्तनमेव तीव्रस्यानवरतस्योत्तेजकस्य निर्जीवतां निष्प्रभावतां वाऽपनेतुमलम्। चलचित्राणां परमरमणीयमनोरञ्जनसाधनत्वमपि चित्रपरिवर्तनमेवेत्यवसेयमिति।

(इ) अभिनवत्वम्[4]—यदुत्तेजकं सर्वदाऽपरिवर्त्यं भवति, तस्य ध्यानाकर्षणक्षमतापि परिहीयते। नारीणां बालकानां सुरुचिसम्पन्नपुरुषाणां प्रतिदिनमभिनववस्त्रधारणमपीतरेषां पुरुषाणां ध्यानाकर्षणायैव भवति। प्रशंसन्ति च द्रष्टारो नित्यमभिनवं रमणीयं परिधानमयं पुरुषो धारयतीति। 'क्षणे क्षणे यन्नवतामुपेति तदेव रूपं रमणीयतायाः' इति तु सुविदितमेवास्ति

१. तुलनार्थम्—Objective conditions of attention.

२. तुलनार्थम्—Intensity of the stimulus.

३. तुलनार्थम्—Change of stimulus.

४. तुलनार्थम्—Novelty.

सर्वेषां विपश्चिताम् । रमणीयत्वसर्वस्वं हि नूनं ध्यानाकर्षणक्षमत्वम्, तच्च नित्यं नित्याभिनवत्वे सन्निहितमित्यवधेयम् । अपि चास्ति प्राचीनेयमुक्तिः–"नवनवरसानुरागी प्रायशो जीवलोकः" इति । नहि सर्वदैकप्रकारकं भोजनं रोचते कस्मैचिदपि पुरुषाय । नह्यभिनवताया मनागपि तीव्रताया अपेक्षातो गौरवन्यूनत्वं विद्यत इति ।

(ई) पुनरावर्तनम्[1]—उत्तेजकस्य पुनरावर्तनमप्यस्ति ध्यानाकर्षणस्य कारणम्, यद्येकदैकमुत्तेजकं ध्यानमाक्रष्टुं न प्रभवति, नूनमन्यस्मिन् काले वारं वारं समागतमुत्तेजकं ध्यानाकर्षणक्षमामुत्तेजनां जनयिष्यति । अनेनैव कारणेन समाचारपत्रेषु पौनःपुन्येन विज्ञापनानि प्रकाशितानि भवन्ति । चलचित्राणां विज्ञापनमपि बहुवारं डिण्डिमघोषपूर्वकं क्रियते । अतः पुनरावर्तनमपि ध्यानजनकमित्युन्नेयम् ।

(उ) साम्यम्[2]—अस्ति हि खलु साम्यं ध्यानजनकम् । विलक्षणेषु पदार्थेष्वसङ्ख्येयेषु योऽस्माकं पूर्वदृष्टवस्तुसमानो भवति, स एव ध्यानमुत्पादयितुं शक्नोति, न हीतरे । 'समानशीलव्यसनेषु सख्यम्' इति सूक्तिरपि निर्दिशति यद्धि असमानशीलव्यवहारवतां पुरुषाणां सविधे ध्यानं नैवोत्पद्यते । विलक्षणेष्वपि यद्वस्तु पूर्वानुभवसमानं भवति, तदेव ध्यानजननाय कल्पते ।

(ऊ) वैषम्यम्[3]—विषममुत्तेजकं ध्यानाय कल्पते । प्रायः समानपदार्थेषु यः पदार्थो विषमो विलक्षणो वा भवति, सोऽपि ध्यानमाक्रष्टुं प्रभवति । एकसहस्राधिकसमानवस्तुषु विलक्षणमसमानमेव वस्त्वञ्जसा ध्यानं समाकर्षति । तथा हि—बहुषु व्याख्यानेषु प्रतिपाद्यमानेषु यद्व्याख्यानमितरेभ्यो भिन्नं विषमं विलक्षणं नवीनं वा युक्तिप्रवाहं प्रदर्शयति, तदेव व्याख्यानं श्रोतॄणामवधानं समाकर्षति । दत्तचित्ता भूत्वा श्रोतारस्तदेव प्रवचनं शृण्वन्ति । श्रीविश्वनाथमन्दिरपार्श्वे तिष्ठत्येको वामनः पण्डितो भिक्षुकवर्गे । क्षण एव स भगवद्दर्शनार्थं समागतानां ध्यानविषयीभूतः सञ्जायते । स्त्रीणां परिधानेषु वर्णवैषम्यं विशेषेण सुरुचिचयनमपेक्षते ।

उत्तेजकवैषम्यं हि खलूत्तेजकाभिनवत्वेऽन्तर्भावयितुं शक्यते । वैषम्यमप्यभिनवत्वस्यास्ति प्रकारविशेषः । तद्विशेषत्वादेव ध्यानजनकसामग्र्यां तस्य पृथङ्निर्देशः कृतः ।

(ए) गतिशीलत्वम्[4]—उत्तेजकस्य गतिशीलत्वमपि ध्यानैकाग्र्याय कल्पते । चलचित्राणां लोकप्रियताया मनोरञ्जनस्यानन्यतमसाधनत्वस्य साधकं तत्र प्रदर्शितचित्राणां गतिशीलत्वमेव भवति । नह्येकस्मिन् चित्रे परमरमणीयेऽपि बहुकालं यावद् जनानां ध्यानैकाग्र्यं भवितुमर्हति । अत उत्तेजकपदार्थानामुत्तेजकपरिस्थितेर्वा गतिशीलत्वं प्रगतिशीलसंविधानकयुक्तत्वं चित्तैकाग्र्याय नितरामपेक्ष्यते ।

नहि गतिशीलत्वगुणस्य परिवर्तनवत्त्वगुणेऽन्तर्भावो जायते । गतिशीलत्वं सामान्यपरिवर्तनवत्त्वादतिरिच्यते ।

---

१. तुलनार्थम्—Repetition.

२. तुलनार्थम्—Similarity of stimulus.

३. तुलनार्थम्—Contrast of stimulus.

४. तुलनार्थम्—Movement.

चलच्चित्राणां यत्किञ्चिदपि सौन्दर्यं मनोहारित्वञ्च भवति, तत्सर्वं 'चित्रद्वयम्' 'चित्रावस्थानम्' इत्यादीनि प्रयुज्यैतादृशीं भ्रान्तिं जनयति, यया दर्शका मन्यन्ते 'इयमेव तारिकाऽस्मत्सम्मुखीना वर्तते' इति। 'अयं गच्छति' 'स पलायते' इत्यादिकं केवलं चित्राणां गतिशीलत्वेनैवासाद्यते। दर्शकाश्च चलच्चित्रप्रदर्शनवेलायां घटिकात्रयपरिमितायां मन्त्रमुग्धा इव सम्मोहनवशीभूता इव वा सन्तिष्ठन्ते।

(ऐ) परिमाणम्[1]—उत्तेजकस्य परिमाणमपि ध्यानोत्पादनाय कारणं भवति। विशालभवनेषु काशीस्नानार्थं समागतानां स्तिमितदृष्टिसमाहितचित्तानां यात्रिणां प्रतिपर्वं दर्शनं कर्तुं शक्यते। विशालकायमागन्तुकं पुरुषं सर्वे छात्रा दत्तचित्ता अवलोकयन्ति। परिमाणन्यूनानि वस्तूनि प्रायो ध्यानमाक्रष्टुं न प्रभवन्ति। तेषां स्वरूपं तिरोहितमिव जायते। बालकानां प्रारम्भिकपुस्तकेषु स्थूलतमान्यक्षराणि मुद्रितानि भवन्ति, तेषां पट्टिकास्वपि तदध्यापकैश्च स्थूलाक्षराण्येव लिख्यन्ते। किं कारणम्? परिमाणं हि ध्यानाकर्षणाय परमं कल्पते।

कैश्चिद् मनोवैज्ञानिकैः परिमाणस्योत्तजकतीव्रतायामेवान्तर्भावः क्रियते। परिमाणस्तु पदार्थाकारमभिप्रैति। तीव्रत्वमौग्र्यं वा वर्णध्वनिरसाद्याधिक्यगाम्भीर्यादिकमभिव्यञ्जयतीति विशेषः। अत एवास्य पृथङ्निर्देशोऽत्र कृतः।

एवं तीव्रत्वपरिवर्तनत्वाभिनवत्वपुनरावर्तनत्वसाम्यवैषम्यगतिशीलत्वपरिमाणादिगुणविशेषैर्बाह्यपरिस्थित्यामुत्तेजकेषु समुपस्थितेषु ध्यानं बलान्नीयते।

११. ध्यानस्याभ्यन्तरकारणम्[2]

अस्ति हि खलु ध्यानस्याभ्यन्तरमपि कारणम्। तच्चात्यन्तं प्रभावशालि भवति। बाह्योपकरणेषु सत्स्वपि कदाचन ध्यानं नोत्पद्यते। क्षुधातुराणां नहि दर्शनव्याख्याने ध्यानैकाग्र्यं जायते। ऋषिपुत्री शकुन्तलाऽभ्यागतानामातिथ्यसत्कारे सदैव समुत्सुका आसीत्, किन्तु कारणवशाद् महर्षेर्दुर्वाससः 'अयमहं भोः' इत्युक्तिस्तया कथमपि न श्रुता। दुष्यन्तध्यानमग्ना नूनं हि सा आसीत्। ध्यानस्याभ्यन्तरकारणजन्यत्वमतो युज्यते।

ध्यानस्य परमं कारणं खलु रुचिर्भवति। साऽपि द्विविधा भवति—नैसर्गिकी[3] रुचिः, अर्जिता[4] रुचिश्चेति। नैसर्गिकी रुचिर्मूलप्रवृत्तिजन्या भवति। यथा मातुर्ध्यानं शिशोर्नीचस्वरक्रन्दनमपि दूरादेव आकर्षति; किन्तु परिवारस्यान्ये जनास्तत्क्रन्दनं न शृण्वन्ति। मातृसुलभवृत्तान्तेषु वात्सल्यमयपुरन्ध्रीणां रुचिः स्वभावतो जायते। क्षुधाकाले भोजने भोजनविषये वा रुचिर्भवति, किन्तु तृप्तपुरुषो भोजनविषये विशेषरुचिं न प्रदर्शयति। उक्तं हि—

"अपां हि तृप्ताय न वारिधारा,
स्वादुः सुगन्धिः स्वदते तुषारः॥"

सामान्यजनाः कामप्रवृत्तिविषयकवार्तासु रुचिं प्रदर्शयन्ति, कामप्रवृत्तेर्मूलप्रवृत्तिषु प्रधानत्वात्। अत एव समाचारपत्राणां विज्ञापनस्तम्भेषु प्रायः स्त्रीणां तारिकाणां मनोहार्यवयवानां प्रदर्शन-

---

१. द्रष्टव्यम्—Extensity or size.

२. तुलनार्थम्—Subjective conditions of attention.

३. तुलनार्थम्—Primary interest or instinctive interest.

४. तुलनार्थम्—Secondary or acquired interest.

पूर्वकाणि चित्राणि प्रदर्श्यन्ते। बालकानामपि रुचिः खेलाप्रिया दरीदृश्यते। हस्तकलाकौशलेषु विशेषतो पिपठिषूणां छात्राणां नैसर्गिकविधायकमूलप्रवृत्तिरभिव्यक्तिं लभते। दृश्यते चैतादृशेषु कार्येषु तेषां रुचिसमुपेता ध्यानसँल्लग्नता। यदि द्वे मूलप्रवृत्तिविषयकोत्तेजके भवेतां तर्हि नूनं या तात्कालिकी मूलप्रवृत्तिः प्रभावशालिनी भविष्यति, तत्सम्बन्ध्युत्तेजकमेव ध्यानं समाक्रष्टुं प्रभविष्यति; यथा—बुभुक्षिताय रसिककवीनां शृङ्गाररससान्द्रा काव्यरचनाऽपि न रोचतेऽत एव तस्य ध्यानमपि नाकर्षयति। अतः सिद्धं मूलप्रवृत्तीनां सर्वोत्कृष्टध्यानजनकत्वम्। यदि नैसर्गिकरुचिर्न भवेत्, नाप्यर्जिता, तर्हि तीव्रमप्युत्तेजकं ध्यानपथमनारुह्यैवाघट्टितमिव भविष्यति।

१२. अर्जिता रुचिः

आभ्यन्तरकारणेषु द्वितीयं कारणमर्जिता रुचिर्भवति। सा हि प्रयोजनविशेषमूला। यदा हि कश्चन बालकः पुरुषो वा जानाति 'गृञ्जनं रक्तवर्धकम्' इति, तदनन्तरं स 'गाजर' इति लोकभाषायां प्रसिद्धेषु गृञ्जनेषु तन्निर्म्मितपदार्थेषु च रुचिविशेषं प्रदर्शयति। यदा च कोऽपि गृञ्जनविक्रयार्थं समागच्छति, तस्य ध्यानं तं प्रति विशेषेण समाकृष्यते। ननु गृञ्जनं तु भोजनान्वेषणात्मिकां मूलप्रवृत्तिमनुबध्नाति, तत्तु नैसर्गिकरुचिविशेषान्तर्गतमेवेति तु न वाच्यम्; ध्यानन्तु चयनात्मकश्चैतन्यव्यापारः। विभिन्नेषूपस्थितेषु पदार्थेष्वेको ध्यानमाकर्षयति। यदा च स मूलप्रवृत्तिमात्रविषयीभूतस्तदा तु स ध्यानस्य नैसर्गिकं कारणं भवति। यदा च गुणविशेषत्वात्तस्य चयनं क्रियते, ध्यानविषयीभूतश्च जायते, तदा तस्य मूलमर्जिता रुचिरेव मन्तव्या। एवम्प्रकारेण मूलप्रवृत्तिसम्बन्धादन्यविषयेष्वप्यर्जिता रुचिर्जायते मानवानाम्। पादपान् प्रति पार्वत्याः शकुन्तलाया वा रुचिः स्त्रीसुलभवात्सल्यसम्बद्धत्वादेवावसेया। तथा हि कण्वोक्तिः—

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनाऽपि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये तस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥ इति[1]।

मूलप्रवृत्त्या मार्गान्तरीकरणस्य परममिदमुदाहरणमर्जितरुचिस्वरूपमप्यभिव्यञ्जयति। यो विषयो मूलप्रवृत्तिविषयेण सह सम्बद्धो जायते, स कालान्तरे ध्यानं प्रसभमाक्रष्टुं प्रभवति। बाल्यकाल इन्द्रियसंवेदनस्य प्रभावो विशेषेणोपलभ्यते, यतो हि बालकानामिन्द्रियविषयेषु तत्तन्मूलप्रवृत्तिसम्बन्धिषु रुचिर्मुख्यतया जायते। अत एव शैशवकालीनशिक्षाविधौ माण्टेसरीसंज्ञके विशेषेणेन्द्रियसंवेदनस्य नैसर्गिकरुचिजनकस्योपयोगं बालकानां ध्यानमाक्रष्टुं क्रियते। अर्जिता रुचिस्तु तदोत्पद्यते यदा बालक इन्द्रियसंवेदनमतीत्य भावसंवेदने समारूढो जायते। कटुभाषिमित्रं प्रति कस्यारुचिर्न जायते। अत एव मनुनोक्तं 'न ब्रूयात् सत्यमप्रियम्' इति। यः पुरुषोऽस्माकं स्वाभिमानमवमन्यते, तस्य मृदूनि श्लिष्टानि हितकराणि वाक्यान्यप्यस्माकमरुचिमेवोत्पादयन्ति, न च भावसंवेदनात्तं प्रति, तच्चरित्रवैशिष्ट्यं प्रति, तद्वचांसि प्रत्यस्माकं ध्यानमाकृष्यतेऽपि तु विरोधिसंकेतादुपेक्षा जायते। अतः सिद्धमर्जितरुचीनामपि ध्यानजनकत्वम्। किन्तु स्मरणीयं यद्धि नैसर्गिकरुचीनामपेक्षयार्जितरुचीनां प्रभावो न्यूनतर एव भवति। तथापि प्रकृष्टतमा अर्जितरुचयो नैसर्गिकरुचय इवाचरितुं ध्यानमाक्रष्टुं क्षमन्ते।

1. द्रष्टव्यम्—अभिज्ञानशाकुन्तलम् ४।९

१३. मानसिकसँल्लग्नता[1]

मानसिकसँल्लग्नताऽप्यस्ति तृतीयमाभ्यन्तरं कारणम्। यद्यपि रुचिविशेषादपि मानसिकसँल्लग्नता जायते, तया च भाविध्यानविषयस्योत्तेजकस्य वातावरणाच्चयनं क्रियते, तथाप्यस्ति तात्कालिकप्रयोजनविशेषसंवेगादिजन्यापरा मानसिकसँल्लग्नता यास्माभिरभिप्रेता। कदाचनैवं भवति यद्वयं प्रयोजनविशेषादापणं गन्तुकामा नहि दूरादागच्छन्मित्रमपि पश्यामस्तस्य सम्बोधनं वा शृणुमः। अत्र प्रयोजनकल्पनयाभिभूता वयमुद्देशचिन्तन एव समाहितचेतसो न तद्वाक्यश्रवणध्यानं कर्तुं शक्नुमः। मृतापत्या स्त्री न मृदूनि वाक्यान्यप्यन्यस्याः स्त्रियाः शृणोति, यतो हि तस्या मानसिकसँल्लग्नतेतरवस्तूनामापणविक्रयविषयकाणां ध्यानं सर्वथा वारयति तिरोहति वा। सेयं सँल्लग्नता तात्कालिकप्रयोजनात् समुपस्थितसंवेदनसंवेगादिभ्यः पूर्वोक्ताभ्यन्तरकारणेभ्यश्च जायते।

१४. ध्यानभेदाः

ध्यानं हि द्वेधा भवत्यनैच्छिक[2]मैच्छिकञ्चेति[3]। अनैच्छिकं ध्यानं मूलप्रवृत्तिसामान्यप्रवृत्त्यादिसम्बद्धोत्तेजकजन्यं भवति। ऐच्छिकं ध्यानं तदुच्यते यत्किञ्चिदायासजन्यमुपर्युक्तप्रकारकोत्तेजकभिन्नजन्यञ्च भवति।

(अ) सहजमनैच्छिकं ध्यानम्—अनैच्छिकं ध्यानमपि द्विधा विभक्तुं शक्यते—सहजमनैच्छिकं ध्यानम्, प्रसभं बाध्यं वाऽनैच्छिकं ध्यानञ्चेति। सहजमनैच्छिकं ध्यानं मूलप्रवृत्त्यादिजन्यम्, यथा–भोजनं तत्स्वादश्च स्वयमेव ध्यानमाकर्षयति। बालकानां ध्यानं स्वकीयप्रशंसावस्त्राध्ययनसौजन्यालोचनायामात्मप्रकाशने च निसर्गत एवोपलभ्यते। शिक्षका नैसर्गिकानैच्छिकध्यानस्य विशेषतः स्वकक्षाध्यानसमाकर्षणाय प्रयोगं कुर्वन्ति। इदं ध्यानमनायासं भवति, वंशपारम्पर्यगुणमूलप्रवृत्त्यादिजन्यत्वात्।

(आ) बाध्यमैच्छिकं ध्यानम्—बाध्यं प्रसभमाकृष्टं बलादानीतं वा ध्यानमनैच्छिकध्यानस्यापरः प्रकारः। इदं ध्यानमुग्रेणोत्तेजकेनाविरलेन गतिशीलेन पुनरावर्तनशीलेन वोत्तेजकेन जन्यते। तीव्रो वैद्युतः प्रकाशः, घोरः स्वनः, डिण्डिमघोषः, वरयात्रायां भेर्यादिवादनम्, चलचित्रादिकञ्च कस्य चित्तं न समाहरन्ति। एतत्प्रकारकं ध्यानं प्रखरोत्तेजकेन बाह्यस्थेन बलादानीयते। अनैच्छिकं ध्यानमनायासेनोत्पद्यते, ध्याता चापेक्षाकृतं निष्क्रिय इवावतिष्ठते।

१५. ऐच्छिकं ध्यानम्

(अ) प्रयत्नात्मकमैच्छिकं ध्यानम्—ऐच्छिकं ध्यानमर्जितरुचिप्रयोजनादर्शादिप्रभवम्। आदर्शो हि लक्ष्यम्। ऐच्छिकं ध्यानमपि द्वेधा–प्रयत्नात्मकं निष्प्रयत्नात्मकञ्च। नह्यैच्छिके ध्याने प्रबलमुत्तेजकमस्माकं ध्यानं बाधते, अस्मान् वा ध्यानार्थं प्रवर्तयितुं बाधते, यथा हि पूर्वोक्तानैच्छिकबाध्यध्यानेऽस्माभिरुक्तम्। नाप्यैच्छिके ध्याने मूलप्रवृत्तिजन्या नैसर्गिकी रुचिरेवोत्तेजकेन स्वभावत

---

१. तुलनार्थम्—Mental set.

२. तुलनार्थम्—Involuntary attention.

३. तुलनार्थम्—Voluntary attention.

आपाद्यते। किन्तु प्रकृते तु ध्यानमन्यप्रयोजनादर्शादिसाहचर्य्येण परम्परया जन्यते, न तु साक्षात्, यथानैच्छिके ध्याने। उदाहरणतया मनोविज्ञानविषये पिपठिषूणां प्रवृत्तिर्ध्यानञ्च दृढेच्छाजन्यमेव। नहीच्छाऽपि प्रयोजनं विनैव जायते। यदि विद्यार्थी निश्चयपूर्वकं जानाति—'मनोविज्ञानस्य सम्यगध्ययनं विना परीक्षायां प्रथमा श्रेणी कथमपि नावाप्स्यते, प्रथमा च श्रेणी भाविजीवनक्षेत्रे स्पृहणीयोच्चपदप्राप्त्यर्थमवश्यमेव प्राप्तव्या' इति, तदा स अध्ययनं ध्यानान्वितं मनोविज्ञानविषये कालातिक्रमेणापि रात्रौ द्वादशवादनं यावद् वितनुते। आचार्यवोपदेवस्य जीवनवृत्तान्तं सुविदितमेव सर्वेषां गीर्वाणवाणीशेमुषीजुषाम्। क्लिष्टमपि व्याकरणशास्त्रं तेनैवम्प्रकारेणाधिगतं यद् वयं तं मुग्धबोधव्याकरणस्य प्रणेतारं विश्वविश्रुतमेव जानीमः। अत एवोक्तं भवति—

यथा खनन् खनित्रेण नरो वार्यधिगच्छति।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति॥

स्वनामधन्येश्वरचन्द्रविद्यासागरमहाभागानां प्राक्तनकलिकातानगरस्थसंस्कृतमहाविद्यालय-प्रधानाचार्याणां जीवनं व्याकरणशास्त्राध्ययनश्चैच्छिकध्यानस्य प्रयत्नोपेतस्य चरमसमुदाहरणम्।

(आ) निष्प्रयत्नात्मकमैच्छिकं ध्यानम्—प्रयत्नात्मकमैच्छिकध्यानमेव यदा पराकाष्ठा-मवाप्नोति, तदा निष्प्रयत्नात्मकमिव परिणमते। यदा बालको लिखितुमारभते, प्रतिपदं प्रत्यक्षरं प्रत्यङ्गुलिगतिमभि तस्य ध्यानमपेक्षते, किन्तु कालान्तरे यदा लेखनाभ्यासः परिपाकावस्थां लभते, नहिं तदा ध्यानं लेखनकर्मणि प्रत्यङ्गुलिगतिं प्रति प्रतिपदं जायतेऽपि तु ये ये विचारा मनसि समागच्छन्ति, ते ते पृथक्तः किन्तु क्रमशस्तारम्येनैकैकशो ध्यानस्य विषयीभूता जायन्ते। लेखनकर्मणि तु कालान्तरे निष्प्रयत्नात्मकमेव ध्यानं जायते। बालकेभ्यो भूगोलेतिहासपठन-मारम्भिकावस्थायां न समारोचते। किञ्चिदभ्यासानन्तरमर्जिता रुचिस्तेषु विषयेषूत्पद्यते, तदनन्तर-मितिहासघटनासु ध्यानमनायासेनैव जायते। प्रयत्नात्मकं ध्यानमायासजन्यम्, निष्प्रयत्नात्मकं ध्यानञ्चानायासप्रभवमित्येव तयोर्विशेषः। प्रयोजनादर्शलक्ष्यज्ञानपूर्वके तु द्वे एव। प्रयोजन-ज्ञानं त्विच्छोत्पादकम्, इच्छा चानायासेनायासेन वा केनचिद् ध्यानं समाकर्षयति।

१६. ध्यानविषयविस्तरः[1]

ध्यानस्वरूपप्रकारादिकं विचार्याधुना वयं विचारयामः, किन्तु खलु ध्यानस्य क्षेत्रमिति? कियती तेषां पदार्थानां संख्या ये युगपद् ध्यानस्य विषयीभूता जायन्ते? 'एकस्मिन्नेव क्षणे वयं कियतः पदार्थान् ध्यातुं शक्नुमः' इति प्रश्ने विचार्यमाणे नैयायिकाः प्रतिपादयन्ति यद्धि वयमेकस्मिन् क्षण एकमेव वस्तु पदार्थं वा ध्यातुं शक्नुमः। तन्मतमिदं मनसो लक्षणावसर इत्थमभिव्यक्तम्—"युग-पज्ज्ञानानुत्पत्तिर्हि मनसो लिङ्गम्" इति। किं वा "ज्ञानायौगपद्यादेकं मनः" इति[2]।

श्रीहैमिल्टनमहोदयेन[3] शताधिकवर्षपूर्वं निर्णीतं यद् वयं षट् सप्त वा पदार्थानेकस्मिन्नेव क्षणे द्रष्टुं शक्नुमः। तदनन्तरं विश्वविश्रुतेनाङ्गलदेशीयार्थशास्त्रिन्यायशास्त्राचार्यजिव्होन्स[4]महाभागे-

१. तुलनार्थम्—Span of attention.

२. तुलनार्थम्—न्यायसूत्रम् ३।२।५६, पूना सं०, पृ० २२१

३. तुलनार्थम्—Sir william Hamilton.

४. तुलनार्थम्—William s. Jevons.

नापि परीक्षणानि समारभ्य निर्णीतं यद्धि पिटके त्रयाणां चतुर्णां वा चणकानां प्रक्षेपणेन तदनन्तरं तदवलोकनेन च नहि तस्यैकमपि स्खलितं जातम्। किन्तु पञ्चचणकप्रक्षेपणेन तस्य कानिचित् स्खलितानि जातानि। अष्टानां दशानां वा चणकानां प्रक्षेपणेऽर्धसङ्ख्याकानां चणकानां युगपदेव प्रत्यक्षं जातम्। एवम्प्रकारकेभ्यः प्रयोगेभ्यो ध्यानविस्तारविषयिणी जिज्ञासा समुद्भूता। कैटल[1]-प्रभृतिभिर्विशिष्टप्रयोगशालासाधनसम्पन्नैर्निर्णीतमिदं तथ्यं यद्वयस्क एकस्मिन् सेकण्डसंज्ञक-विपलांश एव त्रिंशदधिकवर्णान् सार्थकलघुवाक्यावयवीभूतान् युगपद् द्रष्टुं शक्नोति। वयस्कास्तु षट्त एकादश यावत् पदार्थान् युगपद् द्रष्टुं शक्नुवन्ति। सामान्यतः किं वाऽनुपातशोऽष्टौ पदार्थान् द्रष्टुं वयस्कः शक्नोति। अस्ति हि नूनं टैकिस्टोस्कोपसंज्ञक[2]मेकं यन्त्रं येन श्वेतपृष्ठभूमौ कृष्णबिन्दवो वर्णमालाया अक्षराणि वोद्घाट्यन्ते क्षणमात्रमेव सेकण्डसंज्ञकविपलांशमात्रमेव। ध्याता च पृच्छ्यते कियन्तः कृष्णबिन्दवः कियन्त्यक्षराणि वा तेन दृष्टानीति? उत्तराणामध्ययनेनाय-मुपर्युक्तो निष्कर्षो निष्पन्नः।

एतावता स्पष्टमिदं जायते यद्धि ध्याता समन्वितवाक्यान्तर्गतान् वर्णान् पङ्क्तिबद्धान् बिन्दून् वाऽधिकसंख्यायां द्रष्टुं शक्नोति। असन्विता वर्णा विकीर्णाः क्रमरहिता वा बिन्दवो नाधिकसंख्यायां युगपद् ध्यातुं शक्यन्त इति। श्रूयते च यत्पुरा सम्राट् आगस्टससीजरो रोम-साम्राज्याधिपतिर्नेपोलियनबोनापार्टश्च फ्रांसदेशीयाधिपतिर्विश्वविश्रुतविजेता चतुःपञ्चकान् लेखकान् युगपत् स्वपत्राणि लेखयतः स्म।

उपर्युक्तानि सर्वाणि तथ्यान्यालोच्यापि वयं नैयायिकानां मतमेव समीचीनं मन्यामहे। चैतन्यप्रयुक्तं ध्यानमाशुगतिस्वरूपं भवति। नूनं बालकानां ध्यानमेकस्मिन्नेव वस्तुन्येकस्मिन् क्षणे केन्द्रितं जायते। सूत्रकारेण महर्षिणा गौतमेनाप्यपरेण सूत्रेणैताः शङ्काः निवारिताः। तद्यथा—"अलातचक्रदर्शनवदुपलब्धिराशुसञ्चारवत्[3]।" भाष्यकारोऽप्येवमिदं व्याचष्टे—"आशुसञ्चारादला-तस्य भ्रमतो विद्यमानस्य क्रमो न गृह्यते क्रमस्याग्रहणादविच्छेदबुद्ध्या चक्रवद्बुद्धिर्भवति। तथा बुद्धीनां क्रियाणां चाशुवृत्तित्वाद्विद्यमानः क्रमो न लक्ष्यते। क्रमस्याग्रहणाद्युगपत् क्रिया भवन्ती-त्यभिमानो भवति।" इति[4]। यान्त्रिकप्रयोगेषु न तु ध्यात्रा नापि प्रयोक्त्रैवाशुवृत्तिमद्ध्यानं विपलांशैर्मातुमाकलयितुं वा पार्यते। कथं ह्येकाधिकवर्णान् स युगपन्नैव द्रष्टुं शक्नोति? कथञ्च विशिष्टवस्तूनां युगपत् प्रत्यक्षाभासो जायते? इत्येतत्सर्वं भाष्यकारेणेत्थमनुव्याख्यातम्—"वाक्य-स्थेषु खलु वर्णेषूच्चरत्सु प्रतिवर्णं तावच्छ्रवणं भवति। श्रुतं वर्णमेकमनेकं वा पदभावेन प्रतिसन्धत्ते। प्रतिसन्धाय पदं व्यवस्यति। पदव्यवसायेन स्मृत्या पदार्थं प्रतिपद्यते। पदसमूहप्रतिसन्धानाच्च वाक्यं व्यवस्यति। सम्बद्धाँश्च पदार्थान् गृहीत्वा वाक्यार्थं प्रतिपद्यते। न चासां क्रमेण वर्तमानानां बुद्धीनामाशुवृत्तित्वात् क्रमो गृह्यते। तदेतदनुमानमन्यत्र बुद्धिक्रियायौगपद्यस्य[5]।" इति स्पष्टमेव बालकानामपेक्षया वयस्कानां प्रौढानां वा ध्यानं प्रकृष्टमाशुतरञ्च जायते, अत एव विपलांशेऽपि ते

१. तुलनार्थम्—James Mc Keen cattel.

२. तुलनार्थम्—Tachistoscope.

३. तुलनार्थम्—न्यायसूत्रम् ३।२।५८

४. तुलनार्थम्—न्यायसूत्रभाष्यम् ३।२।५८, पृ० २२९।२३०

५. तुलनार्थम्— ,, ३।२।५८, पृ० २३०

क्रमशोऽनेकानि वस्तूनि द्रष्टुं शक्नुवन्ति। क्रमशो जायमानं ज्ञानमपि कालसौक्ष्म्याद् युगपज्जायमानं ज्ञानमिवोच्यते, किन्तु तत्त्वतो ध्यानं बहुषु वस्तुषु युगपन्नैव जायते, यथा—प्रयोगेषू पर्युक्तेषु साधितमिवाभियुक्तैः प्रतीयते। अतः सिद्धो ध्यानविस्तरः; सिद्धं वा ध्यानक्षेत्रमेकस्मिन्क्षण एकवस्तुपरिमितमेव। स्मरणीयमत्र क्षणमिति प्रतिपुरुषं भिद्यते। बुद्धिप्रकर्षापेक्षातो ध्यानस्याशुसञ्चारित्वमपि वर्धते। स्थूलबुद्धिमतां ध्यानं नहि तथाशुसञ्चारि भवति यथा विपश्चितां दूरदर्शिनाम्। क्षणमिति विपलविशेषपरिमितमिति नातो वाच्यम्। क्षणं त्वत्रापेक्षिकमिति बोद्धव्यम्। यदा च युगपदेकस्यैव बृहदाकारपदार्थस्य ज्ञानं जायते, तदा स्मरणीयं यद्ध्यानविषयीभूतं क्रमशो विशिष्टमङ्गं गुणविशेषो वा जायते। किन्त्वाशुसञ्चारित्वाद् ध्यानमेकगुणादपरगुणमभि नितान्तं वेगेन प्रचलतीत्यस्माकं मतम्। वस्तुतस्तु यत्किञ्चिदपि ध्यानस्य विषयीभूतं जायते, तदेकत्वमेवावाप्नोति, तन्निसर्गतो विषयैकरूमतां प्राप्नोतीति वयमग्रे प्रत्यक्षविवेचनीयेऽध्यायेऽनुव्याख्यास्यामः।

१७. ध्यानस्य विचलनम्[1]

सम्प्रति ध्यानविषयेऽपरः प्रश्नः समुद्भवति—'कियत्कालपर्यन्तं नु खल्वेकस्मिन् विषये वस्तुनि वा ध्यानमवस्थातुं शक्यते' इति? प्राच्यैः प्रतीच्यैश्चाचार्यैरस्य प्रश्नस्याध्ययनं बहुविधं सम्पादितम्। प्रायः पुरुषा मन्यन्ते यद् बहुकालं यावद् घटिकापर्यन्तं वा ध्यानमेकस्मिन् पदार्थेऽवस्थातुं शक्यत इति। सूक्ष्मविचारानन्तरमेतन्मतं नहि समीचीनं प्रतिभाति। चञ्चलं मनोऽत एव ध्यानमपि चलायमानं प्रतिक्षणं भवति, एकस्मात्पदार्थात्क्षण एव प्रविचलति। उपर्युक्तमेव यत्क्षणमानमत्रावस्थामानसिकविकासाभ्याससापेक्षमिति बोद्धव्यम्। आशुतरं ध्यानं सेकण्डसंज्ञकक्षणैकं यावदेवैकस्मिन् पदार्थेऽवतिष्ठते। जर्मनदेशीयवैज्ञानिकेन अरबैण्टशिट्शमहाभागेनैकं[2] घटिकायन्त्रं तावद्दूरं स्थापितं यावदस्य मन्दटिक्टिक्ध्वनिमात्रमेव श्रोतुं शक्यते। दृष्टं हि तेनाचार्येण यत्कदाचन तु घटिकायन्त्रशब्दः श्रूयते, कदाचन च न श्रूयते। एतदेव ध्यानविलचनमित्याख्यायते। स्विट्जरलैण्डदेशीयपदार्थविज्ञानविशारदेन नैकरमहोदयेन[3] घनचित्रा-[4] ध्ययनपूर्वकमिदं साधितं यदेकदा त्वेकघनपार्श्वसम्मुखीनो जायते, क्षणानन्तरं घनचित्रं परिवर्तितमिव प्रतीयतेऽपरः पार्श्वश्च सम्मुखीन इव जायते। वस्तुतो नहि घनचित्रं परिवर्ततेऽपि तु ध्यानविचलनात्तत्प्रत्ययोऽपि परिवर्तित इवास्मान् प्रतिभाति। अमेरिकादेशीयमिशिगनविश्वविद्यालयस्य प्राध्यापकप्रवरेण पिल्सबरीमहाभागेन[5] केचन विद्यार्थिन एकस्मिन् मसिचिह्नरूपे बिन्दौ ध्यानं समाधातुमादिष्टाः, यदा च तेषां ध्यानविचलनं जायते, तदा कुञ्जिकामवपीडनाय त आदिष्टाः। सामान्यतोऽयं निष्कर्षो निष्पन्नो यदेकविपलानन्तरं सेकण्डसंज्ञकविपलद्वयानन्तरं तेषां ध्यानं प्रविचलति। स्पष्टत इदं जातं यत्कियद्विपलानन्तरं द्वित्रविपलानन्तरं वा ध्यानं विचलति। प्रायो ये जना विश्वसन्ति जानन्ति यत्तेषां ध्यानं बहुकालं यावदेकस्मिन्नेव पदार्थे

१. तुलनार्थम्—Fluctuations of attention.

२. तुलनार्थम्—V. urbantschitsch.

३. तुलनार्थम्—L. A. Necker.

४. तुलनार्थम्—Cube.

५. तुलनार्थम्—Walter B. Pillsbury, Professor, University of michigan.

समाहितं जायते, त एकस्यैव वस्तुनो विविधपार्श्वैर्नैकस्या एव समस्याया वा विविधपक्षान् वा पश्यन्ति विचारयन्ति ध्यायन्ति वा। यं पक्षमधिकृत्य ध्यानं समाहितं जायते, स एव तदानीं ध्यानस्य विषयीभूतो जायते। विषयक्रमो ध्यानस्याशुतरत्वात् कदाचिद्विवेकिभिरपि विषयचिन्तायां सँल्लग्नत्वान्निमग्नत्वाद्वा ज्ञातुं न शक्यते। अत एव भ्रान्तिर्जायते बहुकालं यावत् ध्यानस्यैक एव विषयोऽपरिवर्तितोऽवतिष्ठत इति।

१८. समाधिः

चित्तविचलनविषये समाधिस्वरूपविवेचनं प्रकृतान्तर्गतमेवेदमस्मान् प्रतिभाति। प्रतीच्यमनोविज्ञानविशारदैः समाधिविषये काऽपि रुचिर्नाद्यावधि लक्षिता। अस्माकं महर्षिभिर्नूनं योगदर्शनपरम्परायां यो प्रयत्नोऽष्टाङ्गयोगरूपोऽनुव्याख्यातः, स सर्वो ध्यानविषयक एवास्ति। योगश्चित्तवृत्तिनिरोधो भवति पातञ्जलमते। योगस्याष्टावङ्गानि च यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयो भवन्ति[१]। तत्राद्यपञ्चकानि तु बहिरङ्गसाधनानि, अन्तिमत्रीणि चान्तरङ्गसाधनानि भवन्ति। चित्तैकाग्र्याय प्राणायामस्य सर्वत उपरि महत्त्वं भवति। 'अहिंसासत्यास्तेयब्रह्मचर्यपरिग्रहाः यमाः[२]", "शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः[३]"। इति यमनियमानामनुपालनेन बुद्धिः सत्त्वगुणसम्पन्ना जायते। सत्त्वोद्रेकाद् व्यवसायात्मिका बुद्धिर्जायते। सैव ध्यानादियोगाङ्गानुपालने समर्था भवति। उक्तं हि भगवता श्रीकृष्णेनापि श्रीमद्भगवद्गीतासु—

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम्।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते॥ इति[४]।

यमनियमादिविशुद्धमपि चित्तं प्राणायामाभ्यासात् सर्वथा नियन्त्रितं भवति। 'तपो न परं प्राणायामात्' इत्यस्माकं महर्षीणां यन्मतं तत्सर्वं समीचीनम्। महर्षिव्यासेनापि भाष्ये[५] उक्तम्—

"तपो न परं प्राणायामात्ततो विशुद्धिर्मलानां दीप्तिश्च ज्ञानस्य" इति। प्राणायामाभ्यासेन चित्तैकाग्र्यं सुकरं भवतीत्यत्र नास्ति सन्देहावकाशः। मनुनाप्युक्तम्—

दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः।
तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात्॥ इति।

कस्तावदयं प्राणायामो येन पतञ्जलिमहर्षीणां मते प्रकाशावरणं क्षीयते? यत्र बाह्यो वायुराचम्यान्तर्धार्यते स पूरकसंज्ञकः प्राणायामः। यत्र च कोष्ठस्य वायुर्विरेच्य बहिर्निःसार्यते स रेचकाख्यः प्राणायामः। कुम्भके स्तम्भवृत्तिः कोष्ठस्य वायुर्गतिविच्छिन्नस्तत्रैव स्थास्यति। एवम्प्रकारेण यथा रेचके तथा पूरके तथैव च कुम्भके श्वासप्रश्वासयोः स्वाभाविकगतिविच्छेदः सञ्जायते।

---

१. द्रष्टव्यम्—योगसूत्रम् २।२९
२. द्रष्टव्यम्—योगसूत्रम् २।३०
३. द्रष्टव्यम्—योगसूत्रम् २।३१
४. द्रष्टव्या—श्रीमद्भगवद्गीता २।४४
५. द्रष्टव्यम्—व्यासभाष्यम् २।५२

अत एवेयं व्याख्याप्यवसेया सूत्रकृताम्—"तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः" इति ।

ज्ञानिनान्तु ध्यानप्रकर्षे सहजप्राणयामो जायत इत्यनुभवसिद्धमेवेति वयं मन्यामहे; किन्तु मानसिकबाह्याभ्यन्तरजीवने प्राणायामे सत्यपि ध्यानं जायते, तं विनापि च। समाधौ प्राणायामस्य विशेषोपयोगित्वमुपपद्यते। समाधिर्हि द्विविधो भवति—सबीजः समाधिर्निर्बीजश्चेति। सबीजः समाधिः सम्प्रज्ञातोऽप्युच्यते। निर्बीजश्चासम्प्रज्ञातोऽप्यभिधीयते। सम्प्रज्ञातसमाधौ विविधचित्तवृत्तीनां तत्संस्काराणाञ्च निरोधो जायते, ध्यातृध्येयध्यानानामेकत्रावस्थानात्। तथोक्तं हि भोजवृत्त्याम्—"ऐकाग्र्यं हि वृत्तिनिरोधः। विरुद्धे च सर्वासां वृत्तीनां संस्काराणाञ्च, इत्यनयोरेव भूम्योर्योगस्य सम्भवः" इति[1]। चित्तस्य भूमिपञ्चके ऐकाग्र्यभूमिश्चतुर्थी भवति। सैवात्र 'एकाग्र' इति पदेन विवक्षिता। सम्प्रज्ञातसमाधिश्चैवं व्याख्यातो व्यासभाष्ये—"यस्त्वेकाग्रे चेतसि सद्भूतमर्थं प्रद्योतयति, क्षिणोति च क्लेशान्, कर्मबन्धनानि श्लथयति, निरोधमभिमुखं करोति, स सम्प्रज्ञातो योग इत्याख्यायते" इति[2]। मन्ये प्रज्ञाप्येका चित्तवृत्तिरेव। तस्या अपि निरोधाच्चित्तैकाग्र्यस्य परमा कोटिर्निर्विषयाख्याऽसम्प्रज्ञातसमाधावेवोपलभ्यते। चित्तवृत्तिपरमनिरोधे सति किमप्यालम्बनमसम्प्रज्ञातसमाधौ ध्यानस्य नोपलभ्यते। तत्र ध्यातृध्येयध्यानानामेकीभावो जायते। "तदा द्रष्टुः स्वरूपेऽवस्थानम्" इति योगसूत्रकाराः[3]। न तत्र किञ्चिदपि सम्प्रज्ञायते वृत्तिव्यापारेणातोऽसम्प्रज्ञातः। स एव धर्ममेघसमाधिर्ध्यानस्य लोकोत्तरा चरमावस्थेत्याचक्षते ध्यायिनः। तस्मिन् समाधौ ध्यानविचलनस्य सम्भावना नैव विद्यते।

१६. ध्यानेऽन्तरायाः

के के खलु ध्यानस्य अन्तराया भवन्ति? योगसूत्रकारैर्महर्षिपतञ्जलिभिर्नव चित्तविक्षेपा ध्यानान्तरायाः परिगणिताः। ते यथा—"व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः" इति[4]। एतेषामन्तरायाणामभावे ध्यानं समाहितं जायते।

१. व्याधिः—धातुरसकरणवैषम्यं किं वा रोगः। यदा कोऽपि मानवो रोगपीडितो भवति, नहि तस्य चित्तं पठने समाहितं भवति।

२. स्त्यानम्—अकर्मण्यता चित्तस्य किं वा कर्मानर्हता।

३. संशयः—उभयकोटिस्पृग्विज्ञानं स्यादिदमेवं नैवं स्यादिति।' संशयात्मकस्य दोलायमानं चित्तं ध्याने समाहितं नैव भवति।

४. प्रमादः—समाधिसाधनानामभावनम्। लक्ष्यपूर्त्यर्थं साधनानामध्ययनद्रव्यादिकानामचिन्तनम्। 'तातस्य कूपोऽयमिति ब्रुवाणाः क्षारं जलं कापुरुषाः पिबन्ति" इति प्राचीनमाभाणकम्। येन पुरुषेण यथाकालमुपर्युक्तसाधनानां संग्रहो न कृतः, प्रमादात्तस्य ध्यानं समीचीन-

१. द्रष्टव्या—भोजवृत्तिः १।२
२. द्रष्टव्यम्—व्यासभाष्यम् ।१।१
३. द्रष्टव्यम्—योगसूत्रम् १।३
४. द्रष्टव्यम्—योगसूत्रम् १।३०

परिस्थितौ कार्ये समुत्पन्ने वा समाहितं नैव जायते। किं वा कार्यानर्हत्वादेव ध्यानाभावो जायते। अप्रमत्तेन सता लक्ष्यं चिन्तनीयम्। अन्यथा ध्यानाभावोऽनिवार्य्यः।

५. आलस्यम्—कायस्य चित्तस्य च गुरुत्वादप्रवृत्तिः। नह्यालस्येन मानवो ध्यानावस्थितो भवति। 'आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः' इति सुप्रसिद्धमभियुक्तवचनम्।

६. अविरतिः—चित्तस्य विषयसम्प्रयोगात्मा गर्धस्तृष्णेति यावत्।

७. भ्रान्तिदर्शनम्।

८. अलब्धभूमिकत्वम्—समाधिभूमेरलाभः। ध्यानसामान्ये तु प्रकृतमेवं व्याख्येयम्। यदि कस्यचिद् बालकस्य पूर्वज्ञानं मनोविज्ञानविषये किमपि न भवेत्तर्हि तस्य प्रारम्भकालिकेऽध्ययने प्रारम्भिकज्ञानभूमेरभावादलब्धत्वान्नहि ध्यानं समाहितं जायते, अत एव पूर्वज्ञानभूमावेव नवीनं ज्ञानभवनं निर्माणार्हम्। ज्ञातवस्तुसम्बन्धादेवाज्ञातवस्तुज्ञानं सम्पाद्यते। न ह्यलब्धभूमिना नवीनं ज्ञानमासादयितुं शक्यते। समाधिपक्षे—"मधुमत्यादयः समाधिभूमयः। लब्धभूमेर्यदि तावत्तैव सुस्थितमन्यस्य समाधिभ्रेषः स्यात्ततस्तस्या अपि भूमेरपायः स्यात्। यस्मात् समाधिप्रतिलम्भे तदवस्थितं स्यात्तस्मात्तत्र प्रयतितव्यम्" इति वाचस्पतिमिश्राः[१]।

९. अनवस्थितत्वम्—चञ्चलचित्तयुक्तत्वम्। नहि चञ्चलचेता गभीरतत्त्वदर्शनं ध्यातुमर्हति। अनवस्थितत्वमिति यल्लब्धायां भूमौ चित्तस्याप्रतिष्ठा। एते चित्तविक्षेपा ध्यानान्तराया योगप्रतिपक्षा योगमला ध्यानबाधका इत्यभिधीयन्ते।

एतेऽन्तराया आभ्यन्तराः। सन्ति हि बाह्यपरिस्थितिजन्यानि बाधकानि यैर्ध्यानं सततं बाध्यते, यथोत्कटं वादनम्, बालानां पार्श्वतः क्रन्दनमिति बाधकैर्जातुचित् कार्यसम्पादने विलम्बो जायते। नापि कार्यमेव तथाविधं सुन्दरं निष्पन्नं भवति यथा पूर्णमनस्कतया सम्पादितं कार्यं सुन्दरं भवति। यथा बाधकेषु सत्स्वपि कदाचनेच्छाप्राबल्याल्लाभ एव जायते। बाधकानां वारणाय प्रतिपक्षभावनोदेति। सा चेच्छाप्राबल्योपेता यदि भवेत्तर्हि बाधका अगण्याः शक्तिहीना निरस्ता वा भविष्यन्ति। अपि च बाधकैः स्वशक्तिं परीक्ष्य समुत्साही पुरुषोऽधिकतरवेगेन कार्ये सँल्लग्नो भवति। तदानीं तस्य ध्यानं सक्रियं प्रकृष्टञ्च जायते। प्रकृष्टध्यानेच्छावन्तः पुरुषा बाधकानतिक्रम्य समीहितार्थान्नैवाप्नुवन्ति। का अपि बाधा मनस्विनां मार्गावरोधं कर्तुं न शक्नुवन्ति। तथा हि—

तुङ्गत्वमितरा नाद्रौ नेदं सिन्धावगाधता।
अलङ्घनीयता हेतुरुभयं तन्मनस्विनि[१] ॥ इति।

अतो ध्यानं बाधा विजित्य सुदृढां भूमिमवाप्नोति। नहि प्रयोजनविहीनं ध्यानं सुदृढं भवति। बाधकोपस्थित्या प्रयोजनं निश्चितं स्पष्टं जायते, तदनन्तरं ध्यानमपि सुदृढभूमिकं भवतीति स्मरणीयम्।

२०. ध्याने क्लान्तिप्रभावः

प्रागुक्तरीत्या विवृतमस्माभिर्यद् रुच्यभावे ध्यानं समाहितं न जायते। अस्ति ह्येकमपरं कारणं येन ध्यानभङ्गो जायते, ध्यानं वा समाहितं न जायते। एकस्मिन् कार्येऽनवरतं यदि वयं चिरं यावल्लग्ना भवेम तर्हि क्लान्तिर्जायते। सा तु द्विविधा—शरीरक्लान्तिः, मानसिकी

---

१. द्रष्टव्यम्—शिशुपालवधम् २।४८

क्लान्तिः। क्लान्तिः श्रान्तिः श्रम इति यावत्। निरन्तरं कार्ये सँल्लग्नाः पेश्यः थकिताः श्रान्ता वा जायन्ते। चिरं यावत्कार्ये परिश्रमेण शरीरे कानिचिद्रासायनिकानि परिवर्तनानि जायन्ते। पेशीनां घर्षणेन धातूनां परिपाकजन्यपरिणामेन कानिचित् कोषाणुकानि विनष्टानि जायन्ते, रक्तमपि विषाक्तं दूषितं वा जायते, धमनीभिरानीतं रक्तं फुफ्फुसाभ्यां विशुद्धयति। प्रश्वासेनोषीजनद्वारेण रक्तं विशुद्धं भवति। निःश्वासेन रक्तात् 'कार्बनडियाक्साइड' इत्याख्यविषाक्तवायुर्बहिर्निस्सार्यते। यदि शरीरे उपर्युक्तविषस्याधिक्यं रक्ते भवति, तदा तमोऽभिभूतोऽयं प्राणी मानवो वा श्रान्तं क्लान्तमात्मानं मन्यते। इयं क्लान्तिर्मानसिककार्याधिक्यादपि जायते, शारीरिककार्यादपि। नूनं रुच्यभावे ध्यानं समाहितं नैव जायते, किन्तु श्रान्तः क्लान्तः पुरुषो बालको वापि कश्चिद् विषयं चिरं ध्यातुं न शक्नोति। रमणीयमपि वृत्तं श्रान्ताय क्लान्ताय न रोचते, तस्य ध्यानं समाक्रष्टुं न शक्नोति। ध्यानं हि समुपयुक्तं कालमपेक्षते। कथं हि बालकानां क्लमापनोदो जायते, इत्येदप्यस्माभिर्विचारणीयम्। क्लमो हि कार्यक्षमतायाः परमः शत्रुः। कार्यक्षमताया जीवनसर्वस्वं हि ध्यानम्। ध्यानञ्च रुचिजन्यम्। कार्यक्षमता हि प्रतिपुरुषं भिद्यते, प्रतिकार्यस्वरूपमपि चेयं भिद्यते। विद्याध्ययने यथा परीक्षार्थी कृतपरिकरो भवति, नहि तथान्यः परीक्षासन्निकृष्टो बालकः। एवमेव विषमपरिस्थितिगतोऽध्यापकः शकटवाहने कार्यक्षमतां तथाविधां प्रदर्शयितुं नार्हति। जापानदेशीयेन शारीरविज्ञानप्राध्यापकेन 'त्सुरू अराई' इत्यभिधानेन विदुषा निर्णीतं यत्प्रथमघटिकानन्तरं ५ प्रतिशतं कार्यक्षमताह्रासो जायते। ३१ घटिकानन्तरं (अनवरतं ११ घटिकापर्यन्तं कार्यसम्पादनेन) १०० प्रतिशतं कार्यक्षमताह्रासो वर्धते। कार्यराशिसमयापेक्षया ध्यानं विचलति, क्लान्तिर्जायते। कार्यक्षमताया ह्रासोऽप्यनुपातशो वर्धते। नूनं मध्ये मध्ये प्रशंसापुरस्कारादयः क्लमापनोदनाय कल्पन्ते।

मानसिकश्रान्तावपि रक्तगतरासायनिकपरिवर्तनान्येव कारणानि। शारीरिकक्लान्तिर्मानसिकक्लान्त्याः प्राग्भवति। इदमपि सर्वं दैनन्दिनकार्याभ्यासरुच्यादिव्यपेक्षमिति बोद्धव्यम्। शारीरिककार्यं प्रायो मानसिकश्रमापनोदनाय कल्पते।

२१. श्रमापनोदनसाधनम्

श्रमापनोदनायोपायपञ्चकमाश्रयणीयम्। तद्यथा—(१) निद्रा, (२) कार्यान्तरालेऽवकाशः, (३) कार्यपरिवर्तनम्, (४) रुचिसंवर्धनम्, (५) कार्याभ्यासश्च। अतः परं वयमेतान् प्रतिपदमनुव्याख्यास्यामः।

(१) निद्रा—श्रमापनोदनाय प्रकृतिसुलभ उपायो हि खलु निद्रा। नहि निद्रा चैतन्योच्छेदोऽपि तु चैतन्यस्यैका वृत्तिरेवेति स्पष्टीकृतमस्माभिः पूर्वम्। निद्रावस्थायां पेश्यो मस्तुलुङ्गसहितं सर्वं नाडीतन्त्रं पूर्णतो विश्राम्यन्ति। तदानीं निःश्वासद्वारा प्रभूतं 'कार्बनडियाक्साइड' नामकं विषाक्तं तत्त्वं बहिर्निःसरति, रक्तस्य शुद्धिश्च सम्पद्यते। निद्रायां क्षीणकोषाणुकानि प्रस्वेदमलमूत्रादिद्वारेणापि पृथग्भूतानि जायन्ते। निद्रा हि परमपोषणिका संग्राहिका। निद्रायां विश्रान्तशरीराङ्गानि पुनः शक्तिमाधातुं शक्नुवन्त्यपि। एतस्मात्कारणादेव प्रातःकालिकेऽध्ययने बालकानां रुचिः प्रकृष्टतमा जायते। थकिता बालका दिनान्ते च एतस्मादेव कारणाद् गणितदर्शनादिक्लिष्टविषयान् पठितुं न प्रभवन्ति। नहि निद्राकालसङ्कोचनं कथमपि कार्यम्। यद्यपि दिवास्वापो वर्ज्यस्तथापि श्रान्ताय दिवास्वापः सुश्रुतादिभिरप्यनुमतः। दृष्टं हि निद्राभ्रंशो

निद्रालोपो वाऽसामान्यमानसिकावस्थाग्रस्तानां मानसिकद्वन्द्वाभिभूतानाञ्च मानवानाम्। अतो निद्रा ध्यानसंरक्षिका, ध्यानस्य स्वास्थ्यप्रदात्री, श्रमापनोदनक्षमा च भवति। निद्रा श्रमापनोदनस्य सर्वोपरि साधनं सिद्धम्।

(२) कार्यान्तरालेऽवकाशः—अनवरतं कार्यं श्रममावहति। यदि मध्ये मध्येऽवकाशो भवेत्तर्हि या कार्यक्षमतानवरतेन कार्येण न्यूना ह्रासोन्मुखी विनष्टा वा जायते, सा नूनं यौवनमापद्यते, पुनरावर्तते। दृष्टं हि बालकानां पाठ्यक्रमविषयकसमयविभागचक्रेऽवकाशनिवेशनाद् बालकानां ध्यानवृद्धिरन्तिमासु घटिकासु। यदि कोऽपि मानवः पूर्णतया विश्रान्तो भवेत्तर्हि तस्मा अन्तरालेऽवकाशस्तथाविधं श्रमापनोदनं न करोति यादृशमिदं सामिश्रान्ताय श्रमापनोदनं कुरुते। पूर्णतो विश्रान्तस्य निद्रैवौषधम्। यद्यवकाशोऽपि किञ्चिन्मनोरञ्जनयुक्तो भवेत्तर्हि तस्य श्रमापनोदनक्षमतातिशयेन वर्धते। औद्योगिकक्षेत्रेषु श्रमिकानां कार्यक्षमताया अध्ययनं कुर्वद्भिः प्रोफेनवर्गरमहाशयैर्निर्णीतं[1] यद्धि यदा कदावकाशप्रदानेन सामग्र्युत्पादनं किल वर्धते। अपि चावकाशकालः श्रमिककार्यविशेषानुसारं भिद्यते। तन्मते सामान्यतया घटिकापादैकमितोऽवकाशकालः पर्याप्तः। श्रीवर्नेनमहोदयैरपि[2] कार्यक्षमतायां ५% किं वा १०% प्रतिशतं वृद्धिर्लक्षिता, यदावकाशो नियतकार्यकाले मध्ये भवति। वस्तुतोऽवकाशकाले शारीरिकमानसिककार्यात्सर्वथा भिन्नं वातावरणं भवेत्तदैवावकाशस्य श्रमापनोदने परमोपयोगित्वं सिध्यतीत्यवसेयम्।

(३) कार्यपरिवर्तनम्—यद्येकमेव कार्यमनवरतं क्रियमाणं भवेत्तर्हि श्रमोऽप्यधिको जायते। यदि च कार्यपरिवर्तनं कियत्कालान्तरं जायेत, तर्हि तथाविधोऽधिकः श्रमो नोत्पद्यते। कार्यप्रकारपरिवर्तनेन किञ्चिन्मनोरञ्जनं जायते। यद्युत्तरकालिकं कार्यं पूर्वसदृशमेव भवेत्तर्हि श्रमापनोदनमपि तदपेक्षया न्यूनमात्रमेव भविष्यति। वस्तुतः क्लान्तौ पेशीनां नाडीनाञ्च किमपि कर्षणमिव (Tension) कार्याधिक्याज्जायते। एकं कार्यं विहायेतरत्कार्यं तद्भिन्नं तत्कर्षणमपनुदति, श्लथयति। अत एव बालकानां पाठ्यविषयोऽपि प्रतिघटिकानुसारं परिवर्त्यते। एवम्प्रकारेण मानसिककार्यजन्यः श्रमः शारीरिककार्यमात्रमपनुदति। शारीरिककार्ये हस्तकलाकौशले वा ध्यानं पूर्ववदेव स्वस्थं समाहितञ्च जायते।

(४) रुचिसंवर्धनम्—यथा कार्यं कुर्वन्नेव पुरुषोऽन्यैर्गुरुजनैः स्वामिना वा प्रशस्यते, तत्प्रदत्तं पुरस्कारं वा मध्ये मध्येऽवाप्नोति, तदा तस्य श्रमापनोदनमपि जायते। लक्ष्यसिद्धिरपि सर्वं श्रमं परिहरति। दृश्यते हि लोके, यो बालको धावने स्वमित्रैर्गुरुभिश्च प्रशंसामवाप्नोति स द्रुततरं धावति। क्लान्तोऽपि सोऽन्यान् पराजित्य सर्वप्रथममागच्छति निर्णायकसविधे। अपि चाह कालिदासः—

"अह्नाय सा नियमजं क्लममुत्ससर्ज
क्लेशः फलेन हि पुनर्नवतां विधत्ते॥" इति।[3]

पूर्वं पार्वत्या बहुविधा तपस्या कृता आसीत्, किन्तु भगवन्तं दृष्ट्वा, स्वकीयाराध्यमभीप्सितं

---

१. तुलनार्थम्—Albert Proffenberger.

२. तुलनार्थम्—Horace M. Vernon.

३. द्रष्टव्यम्—कुमारसम्भवम्

देवं शिवं दृष्ट्वा, सर्व एव तपस्याजन्यः श्रमस्तस्या विनष्टः। सा पूर्ववदेव स्वस्था सञ्जातेति। एवमेव ताडनं भर्त्सनमपि श्रममौदासीन्यमुत्पादयतीत्यवधार्यम्।

एतावता स्मरणीयं यद्येन येन साधनेन रुचिः संवर्धते तत्तत् साधनं श्रमापहारीति। थार्नडाइकमहोदयानां मते यदि कस्मिँश्चित् कार्ये रुचिः कस्यापि पुरुषस्याप्रहीणा भवेत्तर्हि स द्वादशघटिकापर्यन्तमप्यनवरतं कार्यं कर्तुं शक्नोति। श्रमस्तु नूनं रुच्यभावाज्जायतेऽत एव रुचिसंवर्धनेनैव श्रममपनोदितुं ध्यानमासादयितुञ्च शक्यत इति विशेषः।

(५) कार्याभ्यासः—कार्याभ्यासेनापि श्रमह्रासो भवति। अभ्यस्ता क्रिया अभ्यासो वा मूलप्रवृत्तिरिवानायासो भवतीति वयमवोचाम। पूर्वं यत्कार्यं श्रमजनकमिच्छाजन्यञ्चासीत् कालान्तरे तदेव सरलं सुगममनायासं स्वाभाविकञ्च जायते। अत एवाभ्यासः श्रमापनोदनाय कल्पते। यदि चाभ्यासमनपेक्ष्यापि श्रमो जायते स एव वास्तविकः श्रमः। विवेकिभिः पूर्णा क्लान्तिर्यथा न जायेत, तथैव प्रयतितव्यम्। यदि सम्यग्रीत्या श्रमवारणाय चिन्ता क्रियेत, तर्हि श्रमिकानां बालकानां ध्यानमुपयुक्तकार्येषु नूनं यथाकालं समाहितं भविष्यति, तदपेक्षया च कार्यक्षमताध्ययनप्रियतापि वर्धिष्यते। ध्यानोपेतं चिन्तनमनुभवनं संवेदनं प्रयतनं वोपादेयमेव भवति, नेतरत्; तच्चैव कालान्तरे स्मर्तुं शक्यत इति वयमग्रे वक्ष्यामः॥

इति अर्वाचीने मनोविज्ञाने ध्यानस्वरूपविवेचनीयः षष्ठोऽध्यायः॥

सप्तमोऽध्यायः

आलोचनं ज्ञानम्

१. प्रत्यक्षस्वरूपम्

प्रागुक्तमेवाऽस्माभिर्यच्चैतन्यस्य मूलभूता व्यापारास्त्रिविधा भवन्ति। ते यथा—अनुभवनम्, किं वा चिन्तनम्, संवेदनं प्रयतनञ्चेति। प्रथमं तावदनुभवनं ज्ञानं चिन्तनं वा वयं विवेचयिष्यामः। ज्ञानं चिन्तनं वा विविधविकासस्तरान् बिभर्त्ति। मूलभूतं सरलतमं ज्ञानस्यानुभवस्य वा यद्रूपं वयं लभामहे, तत्तु निर्विकल्पकं प्रत्यक्षमालोचनज्ञानाख्यं भवति। वयं तावत् प्रथममालोचनज्ञानस्य स्वरूपप्रकारादिप्रपञ्चनं करिष्यामः। प्रत्यक्षमपि द्विविधं भवति—निर्विकल्पकं सविकल्पकञ्चेति। अस्मिन्नध्याये वयं निर्विकल्पकं प्रत्यक्षमालोचनज्ञानसंज्ञकमेव प्रतिपादयिष्यामः।

महर्षिगौतमेन प्रत्यक्षं प्रमाणमेवं व्याख्यातम्। तद्यथा—"इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकमिति।" प्रत्यक्षं ज्ञानमिन्द्रियार्थसन्निकर्षजन्यं भवति। इदमव्यपदेश्यमपि भवति, अर्थात् 'डित्थोऽयम्', 'ब्राह्मणोऽयम्' इत्यादिनामधेयव्यतिरिक्तमव्यप्रदेश्यं प्रत्यक्षं भवति। स्पष्टीकृतञ्चेदं वात्स्यायनाचार्य्येण—"तदेवमर्थभानकाले सन् समाख्याशब्दो व्याप्रियते। तस्मादशाब्दार्थज्ञानमिन्द्रियार्थसन्निकर्षोत्पन्नम्" इति[1]। अव्यभिचारि अभ्रान्तमिति। यदतस्मिंस्तदिति तद्व्यभिचारि, यत्तु तस्मिंस्तदिति तदव्यभिचारि प्रत्यक्षमिति। व्यवसायात्मकं निस्संशयमिति यावत्। इदं त्वस्मान् प्रतिभाति यत्सूत्रकारैर्भाष्यकारैश्च यदभिमतं तन्निर्विकल्पकं प्रत्यक्षमेवेति। "प्रत्यक्षं कल्पनापोढमभ्रान्तम्" इति दिङ्नागाचार्यकृतं प्रत्यक्षलक्षणमप्यनेन सार्धं सङ्गच्छते। तात्पर्य्याचार्य्या वाचस्पतिमिश्रास्तु त्रिलोचनगुरून्नीतमार्गमनुसृत्य सविकल्पकमपि ज्ञानं सौत्रलक्षणेऽन्तर्भावयितुं यतन्ते। तथा हि—"अव्यभिचारिपदेनैव संशयज्ञाने निरस्ते सविकल्पकप्रत्यक्षावरोधार्थमुपादीयमानं व्यवसायात्मकपदं साक्षात् सविकल्पकस्य वाचकम्" इति[2]। नूनं प्रशंसनीयमिदं सूत्रान्तर्गतव्यवसायात्मकमिति पदस्यानुव्याख्यानम्। यद्यपि न भाष्यकारेण, नापि वार्त्तिककारेणोद्योतकराचार्य्येणैव सविकल्पकज्ञानस्य प्रत्यक्षभेदस्य चर्चैव कृता; तथाप्यनुभवसिद्धौ हि खल्विमौ प्रत्यक्षभेदौ निर्विकल्पकसविकल्पकसंज्ञकौ। आचार्य्यकुमारिलभट्टेनापि निर्विकल्पकं प्रत्यक्षज्ञानमालोचनज्ञानरूपं स्वीकृतम्। तन्मते प्रथममालोचनाख्यं ज्ञानं जायते। तच्च शुद्धवस्तुजं बालमूकज्ञानवन्निर्विकल्पकं ज्ञानं भवतीति।

अस्ति ह्यालोचनं ज्ञानं प्रथमं निर्विकल्पकम्।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम्॥ इति[3]।

---

१. द्रष्टव्यम्—वात्स्यायनभाष्यम् १।१।४ पृ० १४

२. द्रष्टव्या—न्यायसूत्रभाष्यवार्त्तिकतात्पर्यटीका १।१।४

३. द्रष्टव्यम्—श्लोकवार्त्तिकम् ४।११२

भासर्वज्ञोऽपि न्यायसार आलोचनं ज्ञानमेवं व्याचष्टे—"आलोचनं ज्ञानं वस्तुस्वरूपमात्रावभासकं प्रथमाक्षसन्निपातजञ्च भवति" इति[1]। गङ्गेशोपाध्यायास्तदनुयायिनश्च प्रत्यक्षलक्षणमेवं व्याचक्षते—"ज्ञानाऽकरणकं ज्ञानम्" इति[2]। अन्नम्भट्टादय इदमेव व्याख्यानमङ्गीकुर्वन्ति। अत्र ज्ञानं व्याप्तिज्ञानम्, सादृश्यज्ञानं पदज्ञानञ्च करणं येषां तानि ज्ञानकरणकान्यनुमित्युपमितिशाब्दानि। ज्ञानकरणकं न भवतीति ज्ञानाकरणकमिति बोद्धव्यम्। तच्च प्रत्यक्षज्ञानं यदा निष्प्रकारकं भवति तदेदं निर्विकल्पकमित्युच्यते। यदा चेदं सप्रकारकं ज्ञानं भवति तदेदं सविकल्पकमित्यभिधीयते। तथा हि तर्कसंग्रहे अन्नम्भट्टोऽप्येवमाह—"तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम्। सप्रकारकं ज्ञानं सविकल्पकम्। यथा—डित्थोऽयम्, ब्राह्मणोऽयम्, श्यामोऽयम्" इति। 'डित्थ' इति शब्दस्य व्याख्यायामेतदुक्तं भवति—

> श्यामरूपो युवा विद्वान् सुन्दरः प्रियदर्शनः।
> सर्वशास्त्रार्थवेत्ता च डित्थ इत्यभिधीयते॥ इति।

एवम्प्रकारेण प्रकारताशून्यज्ञानत्वं विशेष्यताशून्यज्ञानत्वं संसर्गताशून्यज्ञानत्वं वा निर्विकल्पकत्वमिति। मनोवैज्ञानिकवरेण्या आङ्गलदेशीयाः प्राध्यापकस्टाउटमहाशया अपि निर्विकल्पकं ज्ञानं विचारसंवेदनप्रयत्नादिमनोव्यापारपूर्ववर्तित्वेनाङ्गीकुर्वन्ति। तथा हि—"मनसश्चिन्तनवृत्तेः संवेदनवृत्तेः प्रयत्नवृत्तेश्चेयं पूर्ववर्तिनी नियतावश्यकता भवति, यदेताभिः पूर्वं किञ्चिन्मनसः समक्षं वस्तुमात्रावगाहि ज्ञानं भवेद्यदधिकृत्येमाः प्रवर्तन्ते तदेवालोचनं ज्ञानमित्यभिधीयते"[3]। अपि च—"आलोचनज्ञानमिति व्यपदेशेन वयं विषयस्य चैतन्यसमक्षमवस्थानं सम्यक्तयाभिव्यञ्जयितुं शक्नुमस्तदानीं मनो नान्येन संसृज्यते" इति। अयं विशेष्यचैतन्याभिमुखीभाव एव निर्विकल्पकं ज्ञानमुच्यते। बौद्धास्तु निर्विकल्पकमेव ज्ञानं प्रत्यक्षप्रमात्वेनाङ्गीकुर्वन्ति। सविकल्पकं प्रत्यक्षं नहि प्रमात्वेन युक्तमभिमतं तैः, कल्पनोपेतत्वात् सविकल्पकज्ञानस्य। अन्ये नैयायिकाः, मीमांसकाः, सांख्याः, वेदान्तिनश्च प्रत्यक्षं द्विविधं निर्विकल्पकसविकल्पकभेदात्मकत्वेन स्वीकुर्वन्ति।

स्मरणीयं यत् प्रत्यक्षम्, यस्य प्रपञ्चनं मनोविज्ञानं करोति, तन्नास्ति प्रमाणम्। प्रमीयतेऽनेनेति प्रमाणम्। प्रमाऽस्तीदं ज्ञानमप्रमा वेति न्यायशास्त्रविवेचनीयम्। कथमिन्द्रियसन्निकर्ष-

---

१. द्रष्टव्यः—न्यायसारः, पृ० ४, कलिकातासंस्करणम्, १९६७ ई०

२. द्रष्टव्या—तत्त्वचिन्तामणिः, पृ० ५५२

३. द्रष्टव्यम्—Manual of Psychology, by Stout, Page 103,

"It is a precondition of the cognitive attitude, the feeling attitude, and the cogntive attitude, that there should be some thing before the mind with which they are concerned."

द्रष्टव्यम्—पूर्ववत्—"simple apprehension is the term which seems most suitable for naming this bare presence of an object to consciousness without indicating anymore special relation in which the mind may stand to this object."

जन्यं ज्ञानमुत्पद्यते, तच्च भवतु नाम प्रमात्मकमप्रमात्मकं वा, कश्चास्त्यस्य विशेष इति सर्वं वस्तुभूतं मनोविज्ञानप्रतिपाद्यान्तर्गतम्।

एकोऽपरो विशेषोऽपि स्मर्तव्यः। सर्वे मनोव्यापाराः चिन्तनसंवेदनप्रयत्नादयो मनोविज्ञानेऽनुभवसामान्यव्यपदेशेनाभिधीयन्ते। विशेषेणानुभवनं चिन्तनं विचारप्रधानं ज्ञानं निर्दिशति। नहि मनोवैज्ञानिकानां मते स्मृतिव्यतिरिक्तोऽनुभवो ज्ञानाख्यः। तथा हि अन्नम्भट्टेनोक्तं तर्कसंग्रहे—"संस्कारमात्रजन्यं ज्ञानं स्मृतिः। तद्भिन्नं ज्ञानमनुभवः। स द्विविधः—यथार्थोऽयथार्थश्च" इति। मनोविज्ञानेऽस्मिन् ग्रन्थे च सङ्कीर्णेऽर्थे यथाऽनुभवशब्दः प्रयुज्यते, नहि स स्मृतिव्यतिरिक्तोऽवसेयः। स्मृतिरपि ज्ञानप्रकार एव, चिन्तनभेद एव, अतोऽस्तीयमनुभवनान्तर्गता। अपि च, यदा मनोविज्ञानेन यथार्थत्वायथार्थत्वविचारणा स्वविषयस्य यथावस्तुनिरूपणे समाद्रियते, अयथार्थोऽप्यनुभवो नैयायिकैरभिमतो मनोविज्ञानप्रतिपाद्यकलेवरान्तर्गत एव सिद्ध्यति, वस्तुभूतरूपत्वात्।

२. आलोचनज्ञानस्वरूपम्

सिद्धं तर्ह्यालोचनज्ञानस्य निर्विकल्पकप्रत्यक्षनामधेयस्य सविकल्पकप्रत्यक्षपूर्ववर्तित्वम्। नहि सामान्यप्रौढव्यवहारे आलोचनज्ञानं प्रथमं ज्ञायते, सविकल्पकञ्च तदनन्तरम्। प्रथमं यज्ज्ञानं जानीमस्तत्तु सविकल्पकं वस्तुज्ञानम्। आलोचनज्ञानन्तु सविकल्पकप्रत्यक्षानन्तरमेवानुव्यवसायेन किं वा मानसप्रत्यक्षेणावगम्यते। यत्सविकल्पकप्रत्यक्षमालोचनज्ञानानां मिश्रीकरणमस्तीत्यपि तदनन्तरमनुव्यवसायेनैवानुमीयते। आलोचनज्ञानस्य पूर्ववर्तित्वं वस्तुभूतत्वञ्च न्यायशास्त्रसङ्गतम्; किन्तु व्यक्तिगतानुभवापेक्षयालोचनज्ञानसत्त्वमौत्तरकालिकमानसप्रत्यक्षेण सिद्ध्यति। सविकल्पके प्रत्यक्षे नामजात्यादियोजना सन्निविशते। निर्विकल्पकसविकल्पकप्रत्यक्षयोर्यदीतरेतराश्लिष्टत्वं जायते, तदालोचनज्ञानस्य पृथङ्निर्देशो दुःशकः। तथाप्यस्ति स दुर्निवारः, वस्तुज्ञानरूपत्वात्। सामान्यतया प्रत्यक्षे पूर्वज्ञानसम्बन्धिसामान्यविशेषप्रत्ययैः सविकल्पात्मकं ग्रहणं जायते, अत एवालोचनज्ञानस्य मौलिकस्वरूपं दृष्टिपथं नायाति। तथाप्यनुमीयतेऽनुव्यवसायेन यत्प्रथमालोचनज्ञाने जायमाने सत्येव जात्यादिगुणविशेषाणामाधानं क्रियत इति। अतो निर्विकल्पकं प्रत्यक्षमपि निर्विशेषं न भवति। तत्तद्विषयानुसारि ह्यालोचनं ज्ञानमाचार्यप्रवरैरीश्वरकृष्णैरप्येवमभिहितं सांख्यकारिकायाम्—

"रूपादिषु पञ्चानामालोचनमिष्यते वृत्तिः" इति[1]।

भगवतां रामानुजाचार्याणामप्येवंविधं मतं श्रीभाष्य उपलभ्यते। तथा हि—"न च निर्विषया संवित् काचिदस्ति, अनुपलब्धेरिति[2]।" बालकस्तावत् प्रथमं स्वमातरं पश्यति, पितरं कन्दुकादिकञ्च तदनन्तरं पश्यति। पृथक् पृथगेतेषां पदार्थानां यज्ज्ञानं जायते, वस्तुतस्तु तदेवालोचनं ज्ञानं विशुद्धरूपेण स्फोटयति। अत एव रामानुजाचार्या[3] अपि जातेः प्रथमपदार्थविशेषस्य प्रथमक्षणसम्बन्धिज्ञानमेव निर्विकल्पकप्रत्यक्षतयाङ्गीकुर्वन्ति। सामान्ये प्रौढानुभवे तु विशुद्धालोचनज्ञानं दुर्लभम्। सर्वाण्यालोचनज्ञानानि हि सविकल्पकप्रत्यक्षजन्यप्रत्ययैरुपनिबद्धानि।

---

१. द्रष्टव्या—सांख्यकारिका, २८
२. द्रष्टव्यम्—श्रीभाष्यम्, पृ० ३६
३. द्रष्टव्यम्—श्रीभाष्यम्

श्रीमदभिनवगुप्तपादाचार्यैरपि निर्विकल्पकप्रत्यक्षे सविकल्पकप्रत्यक्षस्य सूक्ष्मस्वरूपावस्थानमीश्वर-प्रत्यभिज्ञाविमर्शिन्यामङ्गीकृतम्[१]।

३. इन्द्रियोत्तेजकालोचनज्ञानस्वरूपम्

वयमत्रेन्द्रियोत्तेजकालोचनज्ञानस्वरूपमनुव्याख्यास्यामः। ननु किमिदमिन्द्रियं नाम? इन्द्रियमिति नाडीकन्दाणुकानां समूहविशेषो भवति यो विशिष्टप्रकारकोत्तेजकजन्यामुत्तेजनां ग्रहीतुमेव समर्थो भवति। उत्तेजको विषय इति यावत्। निर्विकल्पकं ज्ञानमिन्द्रियार्थसन्निकर्ष-जन्यमित्यस्यायमभिप्रायो यदुत्तेजकेन या उत्तेजना विशिष्टप्रकारकनाडीकन्दाणुकेषु जायते, तया जन्यं ज्ञानमालोचनं ज्ञानमित्याचक्षते। यथा चक्षुरिन्द्रियं प्रकाशोर्मिजन्यामुत्तेजनां[२] ग्रहीतुमेव समर्थं भवति, न त्वाकाशोर्मिजन्यामुत्तेजनाम्[३]। श्रोत्रञ्चाकाशोर्मिजन्यामुत्तेजनामेव गृह्णाति, न तु प्रकाशोर्मिजन्यामुत्तेजनाम्। त्वगिन्द्रियञ्च स्पर्शौष्ण्यशीतादिजन्यामुत्तेजनां ग्रहीतुं शक्नोति। आदिपदेनावपीडनमिति[४] योजनीयम्। एकं विशिष्टमिन्द्रियं येनोत्तेजकेन जन्यामुत्तेजनां ग्रहीतुं क्षमतां बिभर्ति, तेनोत्पादितामुत्तेजनामेव ग्रहीतुं प्रभवति, नेतराम्। अत एव तदुत्तेजकम्, यज्जनितामुत्तेजनां ग्रहणक्षमतैकस्मिन्निन्द्रिये विद्यते, योग्यमुत्तेजकमित्यभिधीयते। अतो नहि यः कोऽपि विषयः प्रत्यक्षविषयो भवितुमर्हति, अपि तु योग्य एव विषयो योग्यमेवोत्तेजकं वा प्रत्यक्षगोचरीभूतं जायते। अतो विषयस्योत्तेजकस्य वा योग्यतापि प्रत्यक्षजनने विचारणीया। तदुक्तं धर्मराजाध्वरीन्द्रेणापि वेदान्तपरिभाषायाम्—"योग्यत्वस्यापि विषयविशेषणत्वात्" इति[५]।

एकैकस्य प्राणिनः कानिचिदिन्द्रियाणि भवन्ति, यैः स प्राणी वातावरणघटिततथ्यान्य-वगच्छति, तदनन्तरञ्च बाह्यपरिवर्तनानुकूलमाचरति। प्राणिविकासशृङ्खलानुसारमेव कस्यापि प्राणिविशेषस्येन्द्रियाणां संख्या, सौक्ष्म्यम्, प्राखर्यं वा भवति, मानवस्तु मानवविकासशृङ्खला-शिखरं शोभते। तस्यैव प्रकृष्टतमेन्द्रियाणां विशिष्टः समूहो विद्यते। अर्थादिन्द्रियसंख्यामुद्दिश्य किमुतेन्द्रियप्राखर्यमुद्दिश्य मनुष्याणामिन्द्रियसमूहस्तत्तत्सम्बन्धिकार्यसम्पादने विकासविशेषमादधाति, यद्यपि सन्ति हि केचन प्राणिनो येषामेक इन्द्रियविशेषो मनुष्येन्द्रियापेक्षया तीव्रतरः प्रखरतरो वा भवति। उदाहरणतः शूकराणां घ्राणेन्द्रियं मनुष्याणां घ्राणेन्द्रियापेक्षया प्रखरतरं भवति। शुनामपि घ्राणेन्द्रियं मनुष्यापेक्षया प्रकृष्टतरमेव भवति। सर्वेषामेवेन्द्रियाणां विकासमधिकृत्य

१. द्रष्टव्या—ईश्वरप्रत्यभिज्ञाविमर्शिनी, ज्ञानाधिकरणम् १६
cf. K. C. Pandey, Bhsskari, vol. III, Page 81,

"At the time of indeterminate experience also there is determinate consciousness (the essence of which is the application of the indicatory sign), for how otherwise will there be the possibility of ruming, etc. if there be no determinate consciousness (though in the subtter form)."

२. तुलनार्थम्—Light waves.

३. तुलनार्थम्—Ether waves or air waves.

४. तुलनार्थम्—Pressure.

५. द्रष्टव्या—वेदान्तपरिभाषा, पृ० १६।

मनुष्यस्य प्राणिविकासमूर्धन्यत्वं सिध्यति। इन्द्रियाणि हि खलु सर्वोपरि ज्ञानसाधनानि। इन्द्रियं हि यन्त्रवदुत्तेजकजनितोत्तेजनामनुलिखतीव, तदभावे चेदमुदासीनमिवावतिष्ठते।

आद्यमुत्तेजनाज्ञानमालोचनं[1] ज्ञानमिति नाम्नाभिधीयते। उत्तेजकं नाम किमपि वस्तु विषयो वा पदार्थरूपो यदुत्तेजनां जनयति। तच्चेन्द्रियाद् बाह्यं विद्यते। प्राय उत्तेजकानि बाह्यस्थानानि भवन्ति, किन्तु कदाचनाभ्यन्तराण्यपि भवन्ति; यथा क्षुद्रगोचरमालोचनं ज्ञानमाभ्यन्तरेणैवोत्तेजकेन जन्यते। यथा क्षुद्रगोचरं ज्ञानमप्यालोचनं भवति तद्वयमग्रे वक्ष्यामः। उत्तेजकेन किल किञ्चिद् भौतिकं रासायनिकं परिवर्तनं संज्ञावाहिनाडीकन्दाणुके[2] ग्राहके कोषाणुके[3] वा जन्यते, तच्च संज्ञावाहिनाडीकन्दाणुकश्रृङ्खलाद्वारेण मस्तुलुङ्गीयसंज्ञास्थानानि प्रत्यानीयते। ततश्च चेष्टवाहिनाडीकन्दाणुकद्वारेण तदेव भौतिकं रासायनिकं परिवर्तनं[4] चेष्टामयीं पेशीमभिगच्छति।

नाडीतन्त्रान्तर्गतरासायनिकं परिवर्तनमेवालोचनं ज्ञानमस्तीति न वाच्यम्। नाडीतन्त्रान्तर्गतपरिणामस्यैव मानसिकपक्षोऽस्त्यालोचनज्ञानाख्यः। आलोचनं ज्ञानं वै साक्षादपरोक्षानुभवो यो मनसि घटते, यश्च वैयक्तिको भवति। कथन्नु खलु निर्विकल्पकज्ञानस्य वैयक्तिकत्वमुपपद्यते? एकैव दीपशिखा पुरुषयोर्द्वयोर्मनसोर्नैवैकविधमालोचनं ज्ञानं जनयति। अस्माकमालोचनज्ञानं नहि तद्रूपकं यद्रूपकं युष्माकमालोचनज्ञानम्, यद्यप्युत्तेजकन्तु एकैवाभिन्ना दीपशिखा। 'मिलिन्दपञ्ह'नामके ग्रन्थे भदन्तनागसेनोक्तहस्तिविषयककथालोचनज्ञानस्य वैयक्तिकत्वं नितरां स्फोटयति। दीपशिखाविषयके आवयोरालोचनज्ञाने द्वे भवतः, विशिष्टे पृथग्भूते मानसिकघटनारूपे भवतः, तयोश्च प्रत्येकमनुभवितारमनुधावति। अतः सिद्धं मानसिकव्यापाररूपालोचनज्ञानस्य वैयक्तिकत्वम्[5]।

४. आलोचनज्ञानभेदाः

विविधानि ह्यस्माकमिन्द्रियाणि, तत्तदिन्द्रियजन्यान्यालोचनज्ञानान्यपि विविधान्येव भवन्ति। प्रत्येकमिन्द्रियं ज्ञानद्वारमिव भवति। इन्द्रियाणां संख्याप्रकर्षगुणायत्तमेवातो ज्ञानक्षेत्रं भवति। चक्षुर्हीनस्य मूकस्य बधिरस्य वेन्द्रियजन्यानुभवाभावः क्लेशावह एव। सामान्यतया पञ्चैव बुद्धीन्द्रियाणि विद्वज्जनैर्मन्यन्ते। एवं स्म आह मनुः—

"श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चैव पञ्चमी" इति।

श्रोत्रेन्द्रियस्य ग्राह्यो विषयः शब्दो भवति। किं वा शब्दात्मकमालोचनं ज्ञानं[6] श्रोत्रेन्द्रियेण जायते। स्पर्शात्मकमालोचनज्ञानं[7] त्वगिन्द्रियेण गृह्यते। रूपात्मकमालोचनं

१. तुलनार्थम्—Sensation.
२. तुलनार्थम्—Receptor neuron.
३. तुलनार्थम्—Receptor cell.
४. तुलनार्थम्—Physico chemical change.
५. तुलनार्थम्—Private character.
६. तुलनार्थम्—Auditory sensation.
७. तुलनार्थम्—Tactual sensation.

ज्ञानं[1] चक्षुरिन्द्रियग्राह्यम्। गन्धविषयकमालोचनं ज्ञानं[2] घ्राणेन्द्रियेण गृह्यते। रसात्मकं रसविषयकं वा निर्विकल्पकं ज्ञानं[3] रसनेन्द्रियेण गृह्यते। यद्विषयकं निर्विकल्पकं ज्ञानं येनेन्द्रियेण गृह्यते, तेनैवेन्द्रियेण तद्विषयकं सविकल्पकं प्रत्यक्षमपि गृह्यते। विषय एवास्मिन् तन्त्रे 'उत्तेजकम्' इत्यभिधीयते, यतो हि स प्रत्यक्षोत्पादिकामुत्तेजनां जनयति प्रदत्ते वा। न इन्द्रियमिति शब्देनेन्द्रियगोलकमात्रं ग्रहणीयम्, यथा—चक्षुर्गोलकं जिह्वा वा। इन्द्रियमित्यनेनास्माकं तात्पर्यं निखिलसंज्ञावाहिनाडीकोषाणुकनाडीकन्दाणुकमस्तुलुङ्गीयायतनविशेषाणां समूह इति। वाह्येन्द्रियन्तु तत्प्रतीकमात्रम्। तथाप्यस्ति हि तस्याप्युपयोगित्वं करणत्वञ्च सिद्धम्। एतेषां पञ्चज्ञानेन्द्रियाणां पञ्च विषयाः शब्दस्पर्शरूपरसगन्धा भवन्ति, तज्जन्यानि च पञ्चविधानि शब्दस्पर्शरूपरसगन्धाख्यान्यालोचनज्ञानानि भवन्तीति।

सन्ति हि केचन अन्ये ज्ञानप्रकारा येषामन्तर्भाव उपर्युक्तपञ्चेन्द्रियजन्यालोचनज्ञानेषु न कर्तुं शक्यते। उदाहरणस्वरूपं केवलं त्वच्येव चतुर्विधालोचनज्ञानोत्पादनक्षमाण्यायतनानि स्थलविशेषा वा भवन्ति। तानि यथा—स्पार्शनालोचनज्ञानस्थानानि[4], औष्ण्यालोचनज्ञानस्थानानि[5], शैत्यालोचनज्ञानक्षमाणि[6] स्थानानि, अवपीडननिर्विकल्पकप्रत्यक्षक्षमाणि[7] स्थानानि च। प्रयोगशालासु प्रयोगैः साधितमिदं यद्धि सर्वा त्वक् समानरूपेण स्पार्शनालोचनात्मकज्ञानजनिका नास्ति। स्पर्शसंज्ञाग्राहीणि नाडीकोषाणुकानि त्वचि विशिष्टस्थलेषु प्रधानत इतस्ततो विकीर्णानि सन्ति। एवम्प्रकारेणावपीडनसंज्ञाग्राहिनाडीकोषाणुकान्यपि नैव सर्वत्र समानरूपेणोपलभ्यन्ते। तानि शैत्यसंज्ञावाहीनि न भवन्ति, नापि स्पर्शसंज्ञावाहीनि वा। अतो मनोवैज्ञानिकैर्निर्णीतं यत्त्वगिन्द्रियेणैव चतुर्विधसंज्ञास्थलेभ्यश्चतुर्विधान्यालोचनज्ञानानि जन्यन्त इति। त्वगिन्द्रियरचनाध्ययनेनैवेदं ज्ञातुं शक्यते यत् कियज्जटिलमिन्द्रियं भवति, कियदपर्याप्तञ्च सामान्यजनैरभिमतं तन्निरूपणं भवतीति।

अर्वाचीना मनोवैज्ञानिका आलोचनज्ञानजनकेन्द्रियाणां त्रिधा वर्गीकरणमङ्गीकुर्वन्ति। तद्यथा—(क) विशिष्टानीन्द्रियाणि, (ख) शरीरावयवभूतानीन्द्रियाणि, (ग) पेशीस्नायुजन्यानीन्द्रियाणि चेति। वयमेतानि प्रतिपदं विचारयामः।

५. विशिष्टानि ज्ञानेन्द्रियाणि[8]

विशिष्टानीन्द्रियाणि हि खलु पञ्च भवन्ति, यथा—श्रोत्रम्, त्वक्, चक्षुषी, जिह्वा, नासिका च। एतेषां विवरणं प्रागुक्तरीत्यावसेयम्। शरीरस्य परिसरीयभागस्थितानि ह्येतानि भवन्ति, बाह्यजगद्विषयकोत्तेजनासम्बन्धि ज्ञानं जनयन्ति च।

१. तुलनार्थम्—Visual sensation.
२. तुलनार्थम्—Olfactory sensation.
३. तुलनार्थम्—Gustatory sensation.
४. तुलनार्थम्—Touch-spots.
५. तुलनार्थम्—Heat-spots,
६. तुलनार्थम्—Cold-spots.
७. तुलनार्थम्—Pressure-spots.
८. तुलनार्थम् Speciatl sensations.

६. शरीरावयवभूतानीन्द्रियाणि[1]

उपर्युक्तपञ्चज्ञानेन्द्रियव्यतिरिक्तान्यपि सन्ति हि खलु कानिचिच्छरीरावयवभूतानीन्द्रियाणि, यान्यस्माकं शरीरान्तर्वर्तिघटनानामालोचनं ज्ञानं जनयन्ति। यान्यालोचनज्ञानानि तैः शरीरावयवभूतेन्द्रियैर्जन्यन्ते, तानि ह्येवंविधानि सन्ति, यथा—क्षुधालोचनज्ञानम्, पिपासानिर्विकल्पकज्ञानम्, वमनालोचनज्ञानम्, कण्ठावरोधनिर्विकल्पकज्ञानञ्च। एवंविधानि कानिचिदन्यान्यपि भवन्ति, किन्तु तेषामस्पष्टं भानमेव भवति। एवंविधालोचनज्ञानानि स्वतन्त्रनाडीमण्डलेन सार्धमपि सम्बद्धानि भवन्ति, तेषाञ्च भयघृणाक्रोधादिसंवेगेषु समुपस्थितेषु महत्त्वपूर्णः प्रभाव उपलभ्यते।

७. पेशीजन्यालोचनज्ञानानि[2]

एतैरालोचनज्ञानैर्वयं शरीरावयवगतिविषयकं प्रत्यक्षं ज्ञानं प्राप्नुमः। एतेषामालोचनज्ञानानां स्वरूपमचिरादेवानुसन्धानपथमायातम्। प्राक्तु जनानामियं धारणासीद् यच्चाक्षुषालोचनज्ञानेन स्पर्शनिर्विकल्पकज्ञानेन चास्माकं शरीरगतिविषयकं ज्ञानं जायते। स्पष्टमेवेदं यन्निमीलितचक्षुषापि शरीरावयवहस्तादिगतिविशेषज्ञानमवाप्तुं शक्यते। हस्तादीनां गतिमात्रा गतिदिक् च ज्ञातुं शक्यते। मनोवैज्ञानिकैः प्रयोगैरभीक्ष्णं साधितं खल्विदं यद्धि शरीरपेशीषु स्नायुषु[3] सन्धिषु[4] चेन्द्रियाणि भवन्ति, यैः शरीरावयवानां गतीनां सक्रियं ज्ञानं सम्पादयितुं शक्यते। एतैरिन्द्रियैरिदं ज्ञातुं शक्यते—का हि शरीरस्यावस्थितिः? काश्च शरीरावयवगतयः? गत्यवरोधे च शरीराङ्गानां बाह्योत्तेजकप्रभावोऽपि कियान्? इति।

८. आलोचनज्ञानानां सामान्यगुणाः[5]

आलोचनज्ञानानामपि केचन गुणविशेषा भवन्ति। तैर्गुणविशेषैर्विना निष्प्रकारकं ज्ञानमालोचनाख्यमपि नैव सविकल्पकप्रत्यक्षरूपतां कदाचनावाप्तुं शक्नोति, "नह्यसतः शक्तिः कर्तुमन्येन शक्यते" इति श्लोकवार्तिककारवचनात्। एते तर्हि गुणा भवन्ति—प्रकारविशेषत्वम्[6], तीव्रत्वम्[7], विस्तरत्वम्[8], अविरतत्वं[9] चेति। वयमेतान् क्रमशोऽनुव्याख्यास्यामः।

९. प्रकारविशेषत्वम्

आलोचनज्ञानानां प्रकारविशेषास्तत्तदिन्द्रियापेक्षया भिद्यन्ते। एतस्मादेव कारणाद् घ्राणजमालोचनं ज्ञानं चाक्षुषनिर्विकल्पकज्ञानाद् भिद्यते। स्पार्शनालोचनं ज्ञानं रासनालोचनज्ञानाद्

१. तुलनार्थम्—Organic sensations.
२. तुलनार्थम्—Kinaesthetic sensations, or mascular sensations.
३. तुलनार्थम्—Tendons.
४. तुलनार्थम्—Joints.
५. तुलनार्थम्—General characteristics of sensations.
६. तुलनार्थम्—Quality.
७. तुलनार्थम्—Intensity.
८. तुलनार्थम्—Extensity.
९. तुलनार्थम्—Duration.

भिन्नमित्युच्यते, यतो हि विशिष्टेन्द्रियजन्यत्वात्तयोः प्रकारभेदोऽप्यनुभवसिद्ध एव। अतः सिद्धः प्रकारविशेषभेदस्येन्द्रियविशेषभेदः प्रयोजकः। एकेन्द्रियजन्यालोचनज्ञानेष्वपि च प्रकारभेदा भवन्ति। यथा हि नीलिमालोचनं ज्ञानं पीतिमालोचनज्ञानाद्भिन्नमेव भवति, प्रकारविशेषवत्त्वात्। पटहध्वनिः रणशृङ्गध्वनेः शङ्खध्वनेर्वा भिद्यते, प्रकारविशेषवत्त्वात्। अत्रालोचनज्ञानस्य भेदजनकमिन्द्रियं नास्ति। श्रोत्रेन्द्रियन्तु तयोर्ध्वन्योरभिन्नमेव। आकाशीयोर्म्मिरूपोत्तेजकभेदादेव[1] ध्वनिभेदोऽप्यासादितः। नह्युत्तेजकप्रकारभेदं विनालोचनज्ञानभेद आपादयितुं शक्यते। अपि च, विविधप्रकारकध्वनिजनकोत्तेजकानामाकाशोर्म्मिरूपाणां ग्रहणमप्येकेनाभिन्नेनेन्द्रियेणैवोपपद्यते। किन्तु विशिष्टप्रकारकोत्तेजकजन्यालोचनज्ञानमपि विशिष्टप्रकारकनाडीकोषाणुकेनैव मस्तुलुङ्गमभिनीयते। अतः सिद्धमयुताधिकसंख्याकविशिष्टनाडीकोषाणुकानां सत्त्वं चक्षुषोः कर्णपटहे चान्तर्गतम्। नहि केवलं युक्तित उत्तेजकप्रकारभेदादासादितनाडीकोषाणुकभेद उपयुज्यतेऽपि तु प्रयोगैः प्रयोगशालीयैरणुवीक्षणयन्त्रैश्चालोडितं तथ्यम्। अत आलोचनज्ञानानां प्रकारभेदा उत्तेजकभेदादिन्द्रियप्रकारभेदाच्च जायन्त इति सिद्धम्।

१०. तीव्रत्वम्

सन्ति ह्यालोचनज्ञानानां भेदास्तीव्रत्वव्यपेक्षया। नहि तीव्रत्वं ह्रस्वत्वं वा प्रकारविशेष एवेति मन्तव्यम्। उत्कटनीलिम्नः प्रगाढनीलिम्नो वा मृदुनीलिमा न्यूननीलिमा भिद्यते। कथम्? तीव्रत्वापेक्षयोत्कर्ष्यापेक्षया वा। सत्यप्येकस्मिन्नालोचनज्ञानप्रकारे तीव्रमध्यमन्यूनादिप्रकर्षापेक्षया भेदा जायन्ते। तथा हि विद्युत्प्रकाशासादितालोचनं ज्ञानं दीपप्रकाशालोचनज्ञानाद् भिद्यते। किमस्ति तर्हि तत्प्रयोजकम्? तीव्रत्वम्। वरयात्रायां तुमुलध्वनिः कन्यकाया हारमोनियमसंज्ञकवादनयन्त्रध्वनेर्भिद्यते। अयं भेदस्तीव्रतामादाय प्रथते। लघुतीव्राम्लरसयोरप्ययं भेदस्तीव्रत्वजन्यो भवति। आलोचनज्ञानस्य तीव्रत्वादिभेदस्योत्तेजकतीव्रत्वादिरेव प्रयोजकोऽस्तीत्यवधार्यम्। उत्तेजकतीव्रत्वानुपातशो निर्विकल्पकप्रत्यक्षस्यापि तस्य तद्वृद्ध्यनुरूपवृद्धिर्भविष्यतीति न वाच्यम्। आलोचनप्रत्यक्षस्य तदुत्तेजकस्य च तीव्रत्वविषयका बहवः प्रयोगा मनोवैज्ञानिकैः सम्पादिताः। विशेषत उल्लेखनीया वैबरफैचनरमहोदययोः प्रयोगाः सन्ति। वयं तद्विवरणं संक्षेपतः समुपस्थापयामः।

११. वैबरनियमः

वैबरमहोदयप्रतिपादितनियमेनोत्तेजकालोचनज्ञानतीव्रत्वसम्बन्धो निश्चीयते। यदि कस्याप्यालोचनज्ञानस्य प्रत्यक्षयोग्या वृद्धिरभीप्सिता भवेत्तर्हि तस्योत्तेजकस्यापि नियतांशेन[2] वृद्धिः करणीयेति जर्मनदेशीयशरीररचनाविज्ञानवेत्तृभिः वैबरमहोदयैः प्रतिपादितो नियमः। आंशिकीयं वृद्धिश्च प्रतीन्द्रियं भिद्यते, अर्थादिकप्रचारकालोचनज्ञानजनकोत्तेजकं यदंशानुपातेन दृश्यालोचनज्ञानोत्पादनाय वर्धनीयम्, नह्यन्यप्रकारकालोचनज्ञानजनकोत्तेजकं तदंशानुपातश एव वृद्धिमपेक्षते। वैबरमहोदयो भारोत्क्षेपणाध्ययनेनेमं नियमं निर्णीतवान्। स यथा—पूर्वभारस्यैकेन त्रिंश($\frac{1}{30}$)भागेन यदि वृद्धिर्भवेत्तर्हि तदालोचनज्ञाने दृश्यालोचनज्ञानवृद्धिर्जायते। त्रिंशत्तोलकं सुवर्णं यदोदाहरणतयैकतोलकेन सुवर्णेन वृद्धिमवाप्नोति, तदैव भारवृद्धिविषयकश्चालोचनं

१. तुलनार्थम्—Waves of ether.

२. तुलनार्थम्—Constant fraction.

ज्ञानमुत्पद्यते, नेतरथा। यत्केवलं दृश्यमालोचनगम्यमात्रं वा तज्ज्ञानं भेदज्ञानदेहलीत्युच्यते। नहि सर्वाण्युत्तेजकानि निर्विकल्पकं प्रत्यक्षं जनयितुं समर्थानि। अतितीव्रोत्तेजकजनितोत्तेजना-लोचनज्ञानविषया नैव भवन्ति। नापि निर्विकल्पकज्ञानगम्यमेवातिमन्दमुत्तेजकं भवति। केवलं मध्यममुत्तेजकमेवालोचनज्ञानं जनयितुं प्रभवति। यस्यां सीम्नि किमप्युत्तेजकमालोचनज्ञान-गम्यामुत्तेजनां जनयितुं शक्नोति, सा हि 'भेदज्ञानदेहली[1]' इत्यभिधीयते। यस्यां सीम्नि तीव्रतमोत्तेजकं कष्टप्रदं जायते, सा 'आलोचनज्ञानातिक्रमणबिन्दुः[2]' इत्युच्यते। उपर्युक्तयोर्द्वयोर्मध्ये यत्र मध्यममुत्तेजकमुत्तेजनां प्रदत्ते तत् 'निर्विकल्पकप्रत्यक्षक्षेत्रम्[3]' इत्याख्यायते। शब्दालोचने यदि शब्दध्वनावुत्तेजकभूते तृतीयांशस्य वृद्धिर्जायेत, तदैव ध्वन्यन्तरस्यालोचनं ज्ञानं भविष्यति। सामान्यत इदं वक्तुं शक्यते यद्धि वैबरनियमेन निखिलमानसिकजीवने सापेक्षतावादः[4] प्रमाणीकृतः। रेखाणां दैर्घ्यान्तरालोचनं ज्ञानं तदैव भवति, यदैकस्या रेखाया वृद्धिः शतांशेनापररेखापेक्षया जायते। एवम्प्रकारेणैकशतं वितस्तिपरिमिताया रेखाया एकोत्तरशतं वितस्तिपरिमितरेखाभ्योऽन्तरं साक्षान्निर्विकल्पकज्ञानगम्यं भवति। यदि तयोर्दैर्घ्येऽन्तरं न्यूनं भवेत्तर्हि द्राघीयस्या रेखाया दीर्घाकारत्वमप्यालोचनज्ञानगम्यं नहि भविष्यतीति वैबरमहोदय[5]-प्रतिपादितमानस्य रहस्यम्।

१२. फैचनरनियमः[6]

वैबरप्रतिपादितनियमे तत्सहयोगिलिपजिगविश्वविद्यालयीयभौतिकविज्ञानप्राध्यापकफैचनर-महोदयो मानसिकभौतिकघटनासु गणितोचिताकलनपुरस्सरं सम्बन्धनिर्धारणार्थं प्रवर्तितोऽभूत्। वर्षाणि यावत् परिश्रम्य तेन 'एलिमेन्ट्स आव साइकोफिजिक्स[7]' (अध्यात्मभौतिकविज्ञानस्य मूलतत्त्वानि) इति नामधेयो ग्रन्थः प्रकाशितः। अस्मिन् ग्रन्थे बहव आलोचनप्रत्यक्षभेदज्ञान-देहलीविषयकाः प्रयोगा उल्लिखिताः। स्वकीयप्रयोगेषु फैचनरमहोदयो भारोत्क्षेपण-प्रकाशतीव्रत्व-स्पार्शन-चाक्षुषप्रत्यक्षोपयोग्युत्तेजकानामध्ययनं चकार। तेन संशोधितो वैबरनियम एवम्प्रकारेण वर्णयितुं शक्यते। तद्यथा—'नियतांशेनोत्तेजकवृद्ध्या तज्जनितोत्तेजनाविषयकालोचनप्रत्यक्षेऽपि नियतानुपातेन वृद्धिर्जायते' इति। यदि ह्युत्तेजकं ज्यामितिकविकासक्रमेण[8] वर्धते, तर्हि तज्जनितोत्तेजनाया आलोचनप्रत्यक्षमङ्कगणितीयविकासक्रमेण[9] वृद्धिमवाप्नोतीति। अर्थाद् यदि

---

१. तुलनार्थम्—Difference threshold.

२. तुलनार्थम्—Point of upper-limit of sensation.

३. तुलनार्थम्—Range of sensibility.

४. तुलनार्थम्—Relativity in all mental life.

५. तुलनार्थम्—Erust Heinrich Weber, Professor of anatomy and physiology, University of Leipsig.

६. तुलनार्थम्—Gustaw Theodor Fechner, Professor of physics, University of Leipsig.

७. तुलनार्थम्—Elements of psycho-physics.

८. तुलनार्थम्—Geometrical progression.

९. तुलनार्थम्—Arithemetical progression.

निर्विकल्पके प्रत्यक्षे १, २, ३, ४, ५, क्रमाद् वृद्धिरभीष्टा भवेत्तर्हि नूनमुत्तेजके तज्जनकेऽपि १, २, ४, ८, १६, क्रमाद् वृद्धिः करणीया। यदि ह्युत्तेजक एतत्क्रमान्न्यूना वृद्धिर्भवेत्तर्हि तज्जनितालोचनज्ञानमपि भेदज्ञानदेहलीं नावाप्स्यतीति।

कैचनरमहोदयानां बहुमूल्येषु प्रयोगेषु सत्स्वपि तस्येयं प्रतिज्ञा मनःशरीरयोः स्वरूपवैशिष्ट्योत्पन्नखातपूरणपरा न साधिता तैस्तैः प्रयोगैः। भविष्यति कोऽपि लोकोत्तरो वैज्ञानिको य इमां प्रतिज्ञां साफल्येन साधयिष्यतीत्येवं वैज्ञानिकक्षेत्रेष्वाशास्यते।

१३. विस्तरत्वम्

अस्ति हि विस्तरो निर्विकल्पकज्ञानस्यापरो विशेषः। न केवलं निर्विकल्पकज्ञानानि गुणविशेषेण तीव्रत्वविशेषेण वा परस्परं भिद्यन्तेऽपि तु विस्तरेणापि तानि परस्परं भिद्यन्ते। आङ्गलदेशीयमनोवैज्ञानिकप्रवरवार्डमहोदयानामिदं मतं विशेषत उल्लेखनीयम्। आलोचनज्ञानविस्तरत्वेन निर्विकल्पकप्रत्यक्षस्य विशालत्वं बृहदाकारत्वं[1] वा वार्डमहोदयानामभिप्रेतं भवति। अस्ति हि तत्र निदर्शनम्—नह्यङ्गुलिमात्रं जले प्रक्षिप्तं तादृशमालोचनज्ञानं जनयति यादृशं गङ्गायां समस्तशरीरस्नानं जनयति। किमेकचम्पकेन तादृशमेव निर्विकल्पकं ज्ञानं जन्यते, यादृशं चम्पकवनेन जन्यते? सिद्धं हि द्वयोरालोचनप्रकारयोरन्तरम्। प्रयोजकञ्चात्र निर्विकल्पकज्ञानस्य विस्तरत्वरूपवैशिष्ट्यम्।

यद्यप्यालोचनज्ञानविस्तरे विषयविस्तरे च भवति हि महत् साम्यं सादृश्यं वा, तथापि तयोरभेदो नैव साधयितुं शक्यते। आलोचनज्ञानस्य विस्तरत्वं तु नयनयोरन्तरेण दूरत्वेन वा प्रयुक्तम्, किन्तु विषयस्योत्तेजकस्य वा विस्तरत्वं नेत्रदूरत्वसापेक्षं न भवति, नियतस्थिरस्वरूपत्वात्, वस्तुभूतत्वाच्च। तत्रोदाहरणमपि चेदमूह्यम्—यदि च वयं चन्द्रमसं पश्यामस्तर्हि विस्तरविशेषालोचनं ज्ञानं तदा जन्यते। यदि चक्षुषोः कियद्दूरमेक आदर्शः स्थापितो भवेत्तर्हि चन्द्रमसः प्रतिबिम्बालोचनज्ञानं तदपेक्षया विशेषेण विस्तरयुक्तं भवतीति। अतः सिद्धमालोचनज्ञानविस्तरत्वमुत्तेजकविस्तरत्वञ्च नैवानर्थान्तरमिति।

यद्यपि चाक्षुषस्पार्शननिर्विकल्पकप्रत्यक्षेषु विस्तरत्वं लक्ष्यं साध्यमपि च, तथापि विस्तरत्वविशेषणमितरालोचनज्ञानेषु लक्षणां विहाय प्रयोक्तुं शक्यत इत्यपि सन्देहास्पदम्।

१४. कालस्थायित्वम्

निर्विकल्पकज्ञानानि कालस्थायित्वमधिकृत्यापि भिद्यन्ते। आलोचनं ज्ञानमधिकं कालं यावन्निर्विकल्पकज्ञानापेक्षया स्थायि भवति, अतस्तयोरन्तरमपि सुगममेव। नहि विपलं यावदनुभूयमानं ज्ञानं निर्विकल्पकं पलं यावदनुभूयमानालोचनज्ञानादभिन्नं भवितुमर्हति।

स्मरणीयमत्र यद्ध्युत्तेजकस्थायित्वसापेक्षमेवालोचनं ज्ञानं न भवति। सत्यप्युत्तेजके तज्जनितालोचनज्ञानं कदाचन नैव जन्यते, ध्यानाभावात्। असत्यप्युत्तेजके किं वा विनिर्गतेऽप्युत्तेजके तज्जनितालोचनज्ञानं क्षणमनुभूयत एव। यतो हि संज्ञावाहिनाडीकोषाणुकाणि नाडीकन्दाणुकाणि चोत्तेजके विनिर्गतेऽपि कियत्कालानन्तरं सक्रियाणि दृश्यन्ते, नह्युत्तेजनायामस्तङ्गतायां तज्जनितनिर्विकल्पकप्रत्यक्षप्रयोजिका नाडीक्रिया विरम्यते। चलचित्रेषु पात्रगतिरूपो

---

१. तुलनार्थम्—Volume of mass or spreadoutness of sensation.

भ्रमोऽप्येतस्मादेव कारणादुपपद्यते। अलातचक्रेऽपि यो भ्रम उपपद्यते, सोऽप्येतस्मादेव कारणादासाद्यत इत्यवसेयम्। यदि प्रकाशोत्तेजनासु सेकण्डाख्यविपलदशमांशमितं विपलविंशतितमांशमितं वाऽन्तरं भवेत्तर्हि द्वयोरालोचनज्ञानयोः पार्थक्यमपि द्रष्टुं न शक्यते, नाडीक्रियानवच्छिन्नत्वात्। अत एव गतिभ्रमोत्पत्तिर्बोद्धव्या।

१५. इन्द्रियानुकूलीकरणम्[1]

यद्येकं विशिष्टमुत्तेजकमनवरतं किमपीन्द्रियमुत्तेजयति, तदा तदिन्द्रियं तेनोत्तेजकेन सहानुकूलीभवति, किं वा सात्म्यं लभते। सात्म्यभावस्येयत्ताप्येतावतानुमेया यद्धि कियत्कालानन्तरमपेक्षाकृतमुत्तेजनाविरहितमिवेदमिन्द्रियं प्रतिभाति। उदाहरणतो दीपप्रकाशे पठनशीलो यदि कश्चन ब्रह्मचारी वैद्युतप्रकाशान्विते कक्षे गच्छति, तदा प्रथमक्षणे तस्य चक्षुषी नितान्तमुत्तेजिते जायेते, किन्तु घटिकामेकां यावत् तस्मिन् कक्षेऽधीत्य तस्य चक्षुषी नहि तथाविधमुत्तेजिते जायेते। अपि च, द्वित्रघटिकानन्तरं तदुत्तेजकेन सार्धमभ्यस्ते सात्म्यभावापन्ने किं वानुकूले जायेते। तदा वैद्युतप्रकाशजनितोत्प्रोत्तेजना तदभावाभिन्ना इव प्रतीयतेऽनुभूयतेऽपि च। नूनं हि कियत्कालानन्तरमिन्द्रियानुकूलीभवनत्वमेवास्त्यत्र प्रयोजकम्। एवम्प्रकारेणैव चक्षुरिन्द्रियं तमोऽनुकूलं जायते। प्रकाशितकक्षाद् बहिरागत्य 'सूचीभेद्यं तम' इत्यनुभव आसीत्। किन्तु सार्धैकघटिकानन्तरमस्माकं चक्षुरिन्द्रियं तमस्यपि पदार्थान् द्रष्टुं शक्नोति। चक्षुरिन्द्रियस्य तमोऽनुकूलीभवनं सात्म्यभावापन्नत्वमेवात्र कारणम्। अजापालकस्य गृहे नहीतरे जना अजामलमूत्रजदुर्गन्धानभ्यस्ता एकघटिकां यावदपि स्थातुमुत्सहन्ते। अन्ये च सुकोमला नरास्तत्र क्षणमपि स्थातुं नोत्सहन्ते; किन्त्वजापालकपारिवारिकजनास्तद्दुर्गन्धमहर्निशं घ्रात्वा तेन सहाभ्यस्ताः सात्म्यभावापन्ना जायन्तेऽत एवान्यथा स्वस्थान्यपि तेषां घ्राणेन्द्रियाण्यजामलमूत्रजदुर्गन्धेन नोद्वेजितानि जायन्ते। एवमेव चर्मकारस्य चर्मदुर्गन्धं प्रति सात्म्यापन्नत्वम्, रसायनविज्ञानविशारदस्य विविधरसायनजदुर्गन्धं प्रत्यनुकूलीभावश्च व्याख्यातुं शक्यते। एकेनोत्तेजकेन सहानुकूलीभवनेनापि तदिन्द्रियस्यान्यैरुत्तेजकैरुत्तेजनार्हत्वं नोपहीयतेऽपि तूपचीयत एव। चाक्षुषनिर्विकल्पकप्रत्यक्षमधिकृत्येदं सँल्लक्ष्यते यद्धि बहुकालं यावदेकस्मिन् विशिष्टवर्णयुक्तपदार्थे समाहिता दृष्टिर्यदा तस्मात्पदार्थात् परावर्तते वर्णेतररञ्जितपदार्थं प्रति, तदा विचित्रं हि निर्विकल्पकं ज्ञानं क्षणमात्रं जायते। तदा प्रथमन्तु पूर्वालोचनज्ञानसमानमेव निर्विकल्पकं प्रत्यक्षं क्षणमात्रमवतिष्ठते; किन्त्वेतस्मिन्नेव क्षणे तदालोचनज्ञानानुयोगिवर्णान्वित.लोचनं ज्ञानमुत्पद्यते। एतस्मिन्नालोचनज्ञानद्वये प्रथममालोचनं ज्ञानं हि 'अनुकार्युत्तरप्रतिमा' इति[2] नाम्ना प्रथते। द्वितीयं निर्विकल्पकं प्रत्यक्षमनुयोगिवर्णान्वितम् 'अनुयोग्युत्तरप्रतिमा' इति[3] नाम्ना चाख्यायते। यथा हि यदा रक्तिमवर्णं चित्रमनवरतं पश्यतो दृष्टिः परावर्तते, श्वेतपृष्ठे च केन्द्रिता जायते, तदान्तराले द्विविधमालोचनं ज्ञानमुत्पद्यते—प्रथममालोचनन्तु ईषद्रक्तवर्णमेव भवति, अन्यच्चालोचनं ज्ञानं खलु हरितवर्णं जायते[4]। ईषद्रक्तालोचनं ज्ञानमनुकार्युत्तरप्रतिमेत्युच्यते। नह्युत्तरप्रतिमेत्यभिधानेनास्यालोचनज्ञानत्वं परिहीयते।

---

१. तुलनार्थम्—Sensory adaptation.

२. तुलनार्थम्—Positive after-image.

३. तुलनार्थम्—Negative after-image.

४. तुलनार्थम्—Complementary colours.

हरितवर्णमितरदालोचनज्ञानमनुयोग्युत्तरप्रतिमेत्याचक्षते । वस्तुत इयमालोचनज्ञानोत्तरप्रतिमा आलोचनज्ञानान्येव । उत्तेजके विनिर्गतेऽपि संज्ञावाहिनाडीकोषाणुकानि सक्रियाणि कियत्क्षणं यावद् भवन्ति । तत्क्रियाजन्यमिदमौत्तरकालिकमालोचनज्ञानं द्विप्रकारकं भवतीत्यवसेयम् ।

१६. चाक्षुषमालोचनज्ञानस्वरूपम्

चक्षुरिन्द्रियं हि खलु सर्वज्ञानेन्द्रियाणां प्रवरं भवति । रूपसंज्ञाग्राहकं चक्षुरिन्द्रियं दूरत्वसंज्ञाग्राहकमपि भवति । अर्थाद् दूरस्थस्याप्युत्तेजकस्योत्तेजनां चक्षुरिन्द्रियं गृह्णाति । घ्राणेन्द्रियेण वयं कियद् दूरस्थमेव गन्धं घ्रातुं शक्नुमः, श्रोत्रेन्द्रियेण क्रोशार्धदूरात् क्रोशदूराद्वागतं शब्दमेव वयं श्रोतुं प्रभवामः; किन्तु चक्षुरिन्द्रियेण नहि वयं केवलं वृक्षान् आलेख्याट्टालिकाश्चैव द्रष्टुं शक्नुमोऽपि तु कोट्यधिकक्रोशदूरस्थं तारागणमपि वयं द्रष्टुं प्रभवामः ।

यथोच्चस्तरीयाः प्राणिनो निम्नस्तरीयप्राणिनां विकासशृङ्खलायामेवाविर्भवन्ति, तथैवेन्द्रियाणामपि प्राणिविकासक्रमानुसारं विकासो जायते । उच्चस्तरीयेषु प्राणिष्विन्द्रियाणां संख्या वर्धते । जटिलोत्तेजकानुभवक्षमता वर्धते, अपि चेन्द्रियजन्यप्रतिक्रियायां वैशिष्ट्यमाविर्भवति । आद्ये तु त्वगिन्द्रियमेवैकमिन्द्रियं भवति । तदेव सर्वेन्द्रियाणां यथावश्यकं स्वल्पं कार्यं सम्पादयति । तदुच्चस्तरीयेषु प्राणिषु त्वचि केचन मसीबिन्दव इवाङ्गानि भवन्ति । तदेवाद्यं चक्षुरिन्द्रियस्य रूपम् । तदनन्तरं प्राणिविकासशृङ्खलायां यथा यथा चक्षुरिन्द्रियस्योत्तेजकानि क्लिष्टानि जटिलतराणि जायन्ते, तथा तथा चक्षुरिन्द्रियस्य कार्येषु वैशिष्ट्यमप्याविर्भवति । अर्थाद् विशिष्टं विशिष्टं कार्यं सम्पादयितुं विशिष्टं विशिष्टमेव नाडीकोषाणुकजातं प्रादुर्भवति । एतावतेदमपि बोधगम्यं भवति यद्धि नाडीकन्दाणुकेषु विशिष्टेषु प्रादुर्भूतेषु चक्षुरिन्द्रियं रचनाविशेषेऽपि महत् परिवर्तनमाधत्ते । मध्यमवर्गीयप्राणिषु विकासशृङ्खलायां चक्षुरिन्द्रियं सामञ्जस्यात्मकव्यवहारगतिं पदार्थरूपादिकञ्च द्रष्टुं शक्नोति । मानवीयं चक्षुरिन्द्रियं तेषु सर्वेषु चरमं प्रौढिङ्गतम् ।

१७. चक्षुरिन्द्रियरचना

चक्षुरिन्द्रियस्य बाह्याधिष्ठानं नेत्रगोलकद्वयं भवति । तच्च दृष्टिनाड्योरग्रे सम्बद्धम् । एकैका हि दृष्टिनाडी[1] एकैकं नेत्रगोलकं प्रविशति, तदन्तश्च दृष्टिवितानरूपेण प्रतायते । तत्रैव नानाविधानां पदार्थानां रूपाणि प्रतिबिम्बितानि भवन्ति । उभयोरेव नेत्रगोलकप्रतिबिम्बयोः समन्वयेनैकमेव रूपं दृश्यते । आभ्यन्तराधिष्ठानन्तु दृष्टिनाडीप्रभवस्थानं द्विविधं भवति—मस्तिष्कान्तरीयभागोऽनुमस्तिष्कभागश्चेति । इदं हि चरमं रूपसंज्ञाधिष्ठानमिति पूर्वमेव द्वितीयाध्याये व्याख्यातम् ।

मानवीयं दर्शनेन्द्रियं हि खलु चित्रग्राहियन्त्र(कैमरा)[2]मिव भवति । नाडीतन्तुनिर्मितमिदं नेत्रगोलकं तिसृभिर्वृतिभिरावृतम् । ताश्च बाह्यमध्यान्तरसंज्ञाः ।

बहिर्वृतिः[3]—शुक्ला दृढस्नायुसूत्रनिर्मिता कठिनप्राया स्थूला च भवति । अस्या अपि द्वौ भागौ भवतः—स्वच्छमण्डलं शुक्लवृतिश्चेति । तत्र [4]शुक्लवृतिर्नेत्रगोलकस्य पश्चिमं($\frac{5}{6}$)

---

१. तुलनार्थम्—The aptic nerve.

२. तुलनार्थम्—Camera.

३ तुलनार्थम्—External tunic of the eye-ball.

४. तुलनार्थम्—Sclerotic coat or sclera.

षड्भागपञ्चकमावृणोति। अग्रिमषड्भागावरणं तु स्वच्छमण्डलं[1] समुन्नतमध्यं भवति। निखिला बहिर्वृतिश्चित्रग्राहियन्त्रस्य बाह्यस्थकाष्ठस्थूलावरणमिव भवति। स्वच्छमण्डलं स्वच्छकाचवन्निर्मितं भवति। प्रतिभाति चेदमापातदृष्ट्या कृष्णमिव पिङ्गलं वा, पश्चिमस्थस्य तादृशतारामण्डलस्य तद्द्वारेण दर्शनात्। अत एव कृष्णभागोऽयमिति लौकिको व्यपदेशः। वस्तुतस्तु स्वच्छकाचवदस्य निर्माणमिति बोद्धव्यम्।

मध्यमवृतिः[2]—मध्यमा वृतिर्नेत्रगोलकान्तःस्था बहिर्वृतेरन्तस्तलेन संसक्ता भवति। अस्य त्रयो भागा भवन्ति—तारामण्डलम्, सन्धानमण्डलम्, कर्बुरवृतिश्चेति।

तारामण्डलम्[3]—तनुपेशीसूत्रमयी मण्डलाकारा जवनिका, या स्वच्छमण्डलस्य पश्चिमवर्तिनी जले संप्लवते, स्वपरिधिमात्रेण सर्वतो निबद्धा। सा यवोदरायता सङ्कोचविकासशीला च भवति। सा चित्रग्राहियन्त्रस्य 'डायफ्रेम' इति संज्ञकभागविशेषेण सार्धं सादृश्यं भजते। यदि तारामण्डलं कृष्णवर्णं पिङ्गलवर्णं वा भवति, तस्य प्रतिच्छाया स्वच्छमण्डले संक्रमिता तत् श्यामीकरोतीति पूर्वमेवोक्तम्।

कनीनकम्[4]—तारामण्डलस्य मध्ये दैवकृतमेकं विवरं कनीनकाख्यं भवति येन तेजोरश्मय उज्ज्वलवस्तूनां किरणानि च प्रविशन्ति। तारामण्डलीयपेशीतन्तूनां प्रसारसङ्कोचाभ्यां तस्य विवरस्य सूक्ष्मता स्फारता वा सम्पद्यते। प्रकाशातिरेकागमे कनीनकं सूक्ष्मं जायते, प्रकाशलाघवे कनीनकं स्फारीभूतं जायत इति विशेषः।

सन्धानमण्डलम्[5]—तारामण्डलकर्बुरवृत्योर्मध्यस्थं मण्डलमुभयतः सन्धायि भवति। पेशीसूत्रमयमिदं भवति।

कर्बुरवृतिः[6]—मध्यवृतेः पश्चिमभागः कर्बुरवर्णबहुलो भवति। सा शुक्लवृतिदृष्टिवितानयोर्मध्ये शोणितस्रोतोभिः प्राचुर्येणानुविद्धा भवति। इयं नेत्रगोलकाभ्यन्तरस्य षड्भागपञ्चक-($\frac{5}{6}$)मावृणोति, शुक्लवृत्या च सह संसृज्यते। यैर्नाडीकोषाणुकैर्निर्मितेयं कर्बुरवृतिर्भवति, तानि "[7]कर्बुरवर्णकप्रचुराणि[8]" भवन्ति। चित्रग्राहियन्त्रस्य कृष्णजनविका इव कर्बुरवृत्तिरपि तेजोरश्मी निवारयति, आत्मन्यन्तर्हिताः करोति।

अग्रिमा जलधानी[9]—स्वच्छमण्डलात् पश्चिमतः पुरतश्च तारामण्डलस्याकाशस्तनुजलपूर्णो भवति। तस्य 'अग्रिमा जलधानी' इति व्यपदेशो भवति।


---

१. तुलनार्थम्—Cornea.
२. तुलनार्थम्—Middle or vascular tunic of the eye-ball
३. तुलनार्थम्—Iris
४. तुलनार्थम्—Pupil of the eye
५. तुलनार्थम्—Ciliary body or ciliary muscles
६ तुलनार्थम्—Choroid coat
७. तुलनार्थम्—Browhish-black (भूरा, धुमैला)
८. तुलनार्थम्—Pigmenis
९. तुलनार्थम्—Anterior chamber or acqueons humour.

दृष्टिमण्डलम्[1]—दृष्टिमण्डलं दृष्टिमणिर्वा नाम चिपिटमौक्तिकाकारं यवकाचसदृशं वा पारदर्शकवस्तुमयं स्थूलमध्यं मण्डलं भवति। तद्धि तारामण्डलस्य पश्चान्नेत्रगोलकान्तर्मध्येऽवलम्बते। तच्च समन्तात् सन्धानमण्डलनिबद्धया तद्बन्धन्या सन्धृतम्, तस्याग्रतः सकनीनकं तारामण्डलं पश्चिमजलधान्या व्यवहितं जायते। यस्य पश्चिमतः पश्चिमजलधानी[2] भवति। ननु किमर्थं दृष्टिमण्डलं काचमण्डलमिति नोक्तम्, काचवदपारदर्शकवस्तुमयत्वात्? नहि दृष्टिमण्डलं काचमण्डलमिति वाच्यम्, काचसंज्ञा तु आयुर्वेदतन्त्रे नेत्ररोगविशेषाभिधायकत्वेन सुप्रसिद्धा। अपि च सुश्रुतेन दृष्टिपदमस्मिन्नर्थे प्रयुक्तमप्युपलभ्यते। दृष्टिमण्डलं हि खलु चित्रग्राहियन्त्रस्थपारदर्शककाच इव भवति। दृष्टिमण्डलस्य निर्म्माणमपि पलाण्डुकन्दवत् कोषस्तरैः समन्वितं भवति। एते स्तरकोषाश्चान्तरन्तर्गताः क्रमशः कठिनतराः, मध्ये च कठिनतमाः। तथापि पारदर्शितास्य न व्याहन्यते, सर्वाङ्गानां तुच्छस्वच्छत्वात्। दृष्टिमण्डलीयस्तरकोषाणां पोषणं धमनीशिरानाडीभिर्नैव भवति। लसिकामात्रेण परितः स्थितेनैव तत्पोषणं सम्पाद्यते। यदा वार्धकादिहेतोः स्वच्छत्वापगमाद् रूपग्रहणे व्याघातो जन्यते, तदा दृष्टिमण्डलानाविलत्वजन्यः सुप्रसिद्धो रोगः 'काच' संज्ञको जायते। स एवार्यभाषायां 'मोतियाबिन्द' किं वा 'मुक्ताबिन्दुः' इति व्यपदिश्यते।

पश्चिमा जलधानी सान्द्रजलपूर्णा[3] भवति। नेत्रगोलकाभ्यन्तरस्य चतुःपञ्चम(४/५)-भागमापूरयति। अनया गोलकस्य सुसंहतवर्तुलाकाररक्षणं जायते।

मानवीयचक्षुरिन्द्रियचित्रम्



---

१. तुलनार्थम्—Lens of the eye.

२. तुलनार्थम्—Posterior chamber.

३. तुलनार्थम्—Vitreous humour.

१. स्वच्छमण्डलम्
२. अग्रिमा जलधानी
३. तारामण्डलम्
४. दृष्टिमण्डलम्
५. पश्चिमा जलधानी
६. शुक्लवृतिः
७. कर्बुरवृतिः
८. अन्तर्वृतिः, दृष्टिवितानः
९. दृष्टिनाडी
१०. अन्धबिन्दुः
११. दर्शनकेन्द्रं पीतबिम्बं वा
१२. अक्षरेखा

दृष्टिवितानः—दृष्टिवितानो नाम अन्तर्वृतिर्या नेत्रगोलकस्यान्तरतमातितन्वी वृतिर्भवति। साग्रिमषड्भागवर्जंसमग्रमपि नेत्रगोलाभ्यन्तरं व्याप्नोति। इयं दृष्टिनाड्या नेत्रगोलकप्रविष्टायाः प्रतनुविस्तारस्वरूपा। दृष्टिनाडी च नेत्रगोलकस्याक्षरेखां[1] नानुसरति। किन्तु सा तत्पार्श्वतः प्रविशति, परितश्च विसारिभिः प्रतानैर्वितानरूपेण प्रतायते। येन छिद्रेण दृष्टिनाडी नेत्रान्तः प्रविशति, तस्य सितबिम्बमिति[2] संज्ञा भवति। तदेवान्धबिन्दुरित्यप्याचक्षते, यतो हि तत्र दृष्टिशक्तेः सर्वथाभावो विद्यते। अक्षरेखास्पर्शस्थानन्तु सितबिम्बपार्श्वस्थं स्तोकेन निम्नस्थं[3] पीतबिम्बं नाम भवति। तस्मिन् मध्यबिन्दौ ईषद्गभीरे तीक्ष्णतमा दृष्टिशक्तिर्भवति, अत एव तस्य दर्शन-केन्द्रमित्यपि[4] व्यपदेशो भवति।

दर्शनेन्द्रियस्यैते सर्वे भागा उपर्युक्तेन चित्रेण स्फुटीभवन्ति। दृष्टिवितानस्य दृष्टिनाडीविस्तार-भूतप्रतानैर्नाडीकन्दाणुकैः सतन्तुकैश्च निर्म्माणं जायते। तस्य दशस्तरिकाः सूक्ष्मपरीक्षा दृश्याः[5]। नवम्यां दशम्यां च स्तरिकायां रूपादानग्राहीणि द्विविधानि नाडीकन्दाणुकानि भवन्ति—शूला-काराणि[6], वेमाकाराणि[7] चेति। तत्र शूलाकाराणि नाडीकन्दाणुकानि प्रकाशहीनतामन्धकारं वा गृह्णन्ति। वेमाकाराणि च नाडीकन्दाणुकानि प्रकाशजन्यरूपग्राहीणि भवन्ति। वस्तुत-स्त्वेतान्येवालोचनप्रत्यक्षस्य ग्राहीणि संज्ञावाहीनि वा नाडीकन्दाणुकानि भवन्ति। सूक्ष्मपरीक्षया ज्ञायते यत्तयोः प्रत्येकप्रकारकनाडीकन्दाणुकानां संख्यानेकायुतमिता भवति दृष्टिविताने। पीतबिम्बे मध्यबिन्दौ वा किमपि शूलाकारकं नाडीकन्दाणुकं नास्ति। अत एव तत्र रूपादानस्य चरम-मालोचनं ज्ञानं जायते, वेमाकारकनाडीकन्दाणुकानामेव सत्त्वात्।

स्मरणीयमत्र यत्पीतबिन्दौ तीक्ष्णतमा दृष्टिशक्तिर्भवति। आलोचनप्रत्यक्षवेलायां तत्रैव साम्मुख्यं विधातुं नेत्रचेष्टिन्यः पेश्यः, शिरोग्रीवापेश्यश्च शिरोविवर्तनादिना यथार्हं प्रयतन्ते। मध्यबिन्दावेव दृष्टिमण्डलेन प्रकाशरश्मीनां संव्यूहनं[8] सम्पाद्यते। प्रकाशरश्मय एव तर्हि चाक्षुष-प्रत्यक्षे योग्या उत्तेजका भवन्ति। रश्मीनां संव्यूहनञ्च दृष्टिमण्डलेन एकाग्रीकरणेन सम्पाद्यते।

१. तुलनार्थम्—Aris.
२. तुलनार्थम्—Blind-spot.
३. तुलनार्थम्—Yellow-spot.
४. तुलनार्थम्—Fovea centralis.
५. द्रष्टव्यम्—प्रत्यक्षशारीरकम्, पृ० २०३, खण्ड ३
६. तुलनार्थम् Rods.
७. तुलनार्थम्—Cones.
८. तुलनार्थम्—Focussing.

दृष्टिकेन्द्रं परितो दृष्टिशक्तेस्तीक्ष्णता परिहीयते। किं कारणम्? प्रकाशरश्मीनामक्षं विहायान्यत्र तथाविधसंव्यूहनाभावादपि प्रागुक्ताभिर्दृष्टिवितानस्याष्टभिर्नाडीकन्दाणुकविशेषैर्विनिर्मिताभिः स्तरिकाभी 'रूपादानिकाचित्रजवनिके'[2] नवमीदशम्यौ स्तरिके पिहिते, यद्यपि तासामतिस्वच्छत्वात् प्रतिबिम्बग्रहणं न बाध्यते। पीतबिम्बे चेदं व्यवधानमतीव तनूभूतं जायते। अत एव मध्यबिन्दौ तीक्ष्णतमा दृष्टिशक्तिः।

१८. चाक्षुषोत्तेजकस्वरूपम्

प्रागुक्तमेवास्माभिर्यत् तेजोरश्मय एव चाक्षुषालोचनज्ञानार्थं योग्य उत्तेजका भवन्ति। तेजोरश्मीनां गतिर्हि ९३०,०० कोशाः प्रतिसेकण्डाख्यं विपलं भवति[3]। अत्र क्रोशमानं मीलद्वयमितमवधार्यम्। येन माध्यमेनेमाः प्रविचलन्ति तद्धि नूनमाकाशो द्रव्यं यदाङ्गलभाषायाम् 'ईथर'नाम्ना[4] व्यपदिश्यते। स्मरणीयमस्मिन् विषये यदन्यप्रकारका अपि माध्यमा भवन्ति, यथा—आकाशवाण्यूर्म्मयः[5], ध्वन्यूर्म्मय[6] इत्यादयः। नहि चक्षुरिन्द्रियं आकाशोर्म्मिव्यतिरिक्ताभिरूर्म्मिभिरुत्तेजितं जायते। नहि सर्वा आकाशोर्म्मय एव योग्या उत्तेजिका, अपि तु यासां दैर्घ्यं 'मिलिमिटर' इति आङ्गलभाषीयमानस्य ३९२ तः ८०० प्रयुततमांशमध्ये वर्तते। 'मिलिमिटर' इति मानं वितस्तिपरिमाणस्य नवतितमो भागो भवति। एवम्प्रकारेण चक्षुरिन्द्रियमप्याकाशवाणीग्राहकयन्त्रमिव भवति यद्विशिष्टप्रकारकदैर्घ्ययुक्तप्रकाशोर्म्मिग्रहणे समर्थं भवति। ये सप्त वर्णाश्चक्षुरिन्द्रियेण रूपादानकाले ज्ञायन्ते, ते इन्द्रधनुषः सप्तवर्णसदृशा भवन्ति। दीर्घतमतेजोरश्मिना रक्तिमवर्णरूपादानं सम्पाद्यते। तद्ध्रस्वतरतेजोरश्मिना नारङ्गीवर्ण उत्पाद्यते। तदपेक्षया ह्रस्वतरतेजोरश्मिना पीतवर्ण उत्पाद्यते। तदपेक्षया ह्रस्वतररश्मिना हरितवर्णो जन्यते। तदपेक्षया ह्रस्वतररश्मिना च नीलवर्णालोचनज्ञानमुत्पाद्यते। एवम्प्रकारेणान्यद्वर्णद्वयालोचनज्ञानद्वयमपि ह्रस्वतररश्मिभ्यां जन्यते। सर्वे रूपवर्णाः, यान् वयं वक्ष्यामः, रश्मीनां परस्परं सम्मिलनजन्या एव भवन्ति, तेषाञ्च रश्मीनां दैर्घ्यपरिमाणभेदो विद्यते। शूलाकाराणि नाडीकन्दाणुकानि दृष्टिवितानान्तरीयस्थानि नीलादिमन्दप्रकाशवर्णालोचनज्ञानजनकोत्तेजनाग्रहणे समर्थानि भवन्ति। वेमाकाराणि च नाडीकन्दाणुकानि रक्तिमवर्णादिरूपालोचनज्ञानजनकोत्तेजनाग्रहणे समर्थानि भवन्ति। मिश्रितवर्णानुकूलोत्तेजना विविधदैर्घ्ययुक्तरश्मिभिर्जन्यते, ताश्च शूलाकाराणि वेमाकाराणि नाडीकन्दाणुकानि मिलित्वैव गृह्णन्ति।

केचन पुरुषा वर्णरूपान्धा[7] भवन्ति। वर्णरूपान्धत्वप्रकारको रोगविशेषः कृष्णवर्णं कर्बुरं वा प्रत्येकं वस्तु ते सर्वदा पश्यन्ति। तेषां दृष्टिविताने शूलाकाराण्येव नाडीकन्दाणुकानि भवन्ति, वेमाकाराणां रूपग्राहिणां नाडीकन्दाणुकानां तत्राभाव एव विद्यत इति दर्शनेन्द्रियप्रयोगैः

१. तुलनार्थम्—Jacob's membrane or layer of rods and cones.
२. तुलनार्थम्—Tapetum Nigrum.
३. तुलनार्थम्—१८६,००० मील
४. तुलनार्थम्—Ether.
५. तुलनार्थम्—Radio-waves.
६. तुलनार्थम्—Sound-waves.
७. तुलनार्थम्—Colour-blind.

साधितम्। केचनान्ये पुरुषास्तमोऽन्धाः[१] भवन्ति। तिमिररोगग्रस्तास्ते भवन्ति। तेषां दृष्टिविताने वेमाकाराण्येव नाडीकन्दाणुकानि भवन्ति। शूलाकाराणां मन्दप्रकाशग्राहिणां नाडीकन्दाणुकानामभाव एव तत्र विद्यत इत्यपि पौनःपुन्येन चक्षुरिन्द्रियप्रयोगैः साधितं शारीरकमनोविज्ञानविशारदैः। वयं तावन्निर्णेतुमर्हाः—शूलाकाराणि नाडीकन्दाणुकानि रूपवर्णाभावग्रहणक्षमाणि भवन्ति, वेमाकाराणि च नाडीकन्दाणुकानि रूपादानक्षमाणीति।

सम्प्रति वयं तेजोरश्मिप्रतिबिम्बग्रहणप्रकारविशेषमनुव्याख्यास्यामः। प्रागुक्तमेवास्माभिर्यद् नेत्रेन्द्रियमालोकचित्रग्राहकयन्त्रसदृशं भवति। दर्शनेन्द्रियस्थो दृष्टिवितानस्तु चित्रग्राहियन्त्रस्थप्रतिबिम्बग्राहिकाचवद्[२] भवति। दर्शनेन्द्रियस्थं तारामण्डलमपि सङ्कोचविस्फारशीलेन तद्यन्त्रस्थजवनिकाचक्रेण[३] सह सादृश्यं बिभर्ति। जवनिकाचक्रेणापि तेजोरश्मीनामल्पाधिक्यं नियन्त्रितं जायते। आलोकचित्रग्राहियन्त्रस्य यथोर्ध्वाधःपार्श्वदेशेषु सन्निकटं दूरं वा स्थानपरिवर्तनेन बिम्बग्रहणायाभिकेन्द्रं स्थापयितुं शक्यते, तथैव नेत्रगोलकमपि शिरोग्रीवापेशीप्रचेष्टनेन नेत्रपेशीप्रचेष्टनेन च। तथाप्यस्ति ह्येको विशेषः। आलोकचित्रग्राहियन्त्रे यवकाच[४] एक एव भवति। स च समीपतो दूरतो वा यथाप्रयोजनं स्थापयितुं शक्यते, येन तेजोरश्मिसंव्यूहनं सुकरं भवेत्। किन्तु चक्षुरिन्द्रियगोलके तु रश्मिसंव्यूहनयन्त्रं द्विविधं भवति—एकं स्वच्छमण्डलम्, द्वितीयञ्च दृष्टिमणिः। प्रथमं तावत् स्वच्छमण्डलेनैवादीयन्ते तेजोरश्मयः संव्यूह्य। अग्रिमजलधान्यां तनुजलप्रवेशेन ते चेषद्भुग्नीकृतमार्गा[५] जायन्ते। इदं हि स्वच्छमण्डलं पुरस्तात् समुन्नतमध्यं भवति, पश्चाच्च कोरोदरं भवति। तदनन्तरं तारामण्डलसहितकनीनकमार्गस्य संकोचनविस्फाराभ्यां ते रश्मयोऽल्पीकृतगुच्छा बहुलीकृतगुच्छा वा जायन्ते, पतन्ति च दृष्टिमणेः पुरोभागे। दृष्टिमण्डलं चेदमुभयतस्तुन्दिलं[६] भवति। कनीनकमार्गस्य संकोचनसमनन्तरमेव दृष्टिमण्डलमप्यधिकतुन्दिलं जायते, तद्विस्फारसहकृतमेवास्यापि दृश्यतेऽल्पतुन्दिलत्वम्। तारामण्डलस्य संकोचनविस्फाराभ्यां कनीनकमार्गस्य विस्फारसङ्कोचनमासाद्यते, आपद्यते च दृष्टिमण्डलस्य बन्धन्या अपि शिथिलीकरणम्, अशिथिलीकरणं वेति। बन्धन्याः शिथिलीभावेन दृष्टिमण्डलमल्पतुन्दिलं जायते, तच्च तदैव भवति यदा तेजोरश्मीनामाधिक्यं न भवति। बन्धन्योरशिथिलीभावेनापरथा दृष्टिमण्डलस्याधिकतुन्दिलत्वं जायते, तच्च तदैव भवति यदा प्रकाशातिरेको भवति। तेजोरश्मीनां नियन्त्रणमावश्यकञ्च प्रतिभाति, तदभावेऽन्यथा रश्मिसंव्यूहनं नापद्यते, नापि प्रतिबिम्बग्रहणमेव सम्यक्तया जायते। नहि दृष्टिमण्डलस्य केन्द्रीकरणमन्तरा[७] पदार्थानां सम्यक्तया प्रतिबिम्बं दृष्टिवितानेन गृह्यते। दृष्टिमण्डलस्योभयतस्तुन्दिलत्वात् तेजोरश्मयस्तत्प्रवेशनिर्गमाभ्यां द्वेधा भुग्नीभूय संव्यूढाः सन्तो दृष्टिविताने प्रतिबिम्बरूपं

१. तुलनार्थम्—Night-blind.
२. तुलनार्थम्—Sensitive plate.
३. तुलनार्थम्—Iris (diaphrague).
४. तुलनार्थम्—Lens.
५. तुलनार्थम्—Refraction of rays.
६. तुलनार्थम्— Binconvex.
७. तुलनार्थम्—Accommodation.

जनयन्ति। नहि तद्यथावस्तुरूपं भवत्यपि तु विपरीतमेव, यथा ह्यालोकचित्रग्राहियन्त्रस्थे प्रतिबिम्बग्राहिकाचे विपरीतमेव प्रतिबिम्बं जायते। रूपादानकाले चाक्षुषालोचनं तु यथार्हमेव जन्यते, यतो हि प्रतिबिम्बस्यापि विपरीतस्य चित्रजवनिकायामासादितस्य मनस उपलब्धिस्तु स्वभावनियमाद् वस्तुरूपानुसारिण्येव भवति। अनुमातुमपि चेदं शक्यते वस्तुभूतरूपत्वमुपलब्धेः स्पर्शादिना।

१९. चाक्षुषालोचनज्ञानविशेषाः

दर्शनेन्द्रियनिर्माणं चाक्षुषप्रत्यक्षोत्तेजकस्वरूपञ्च रूपादानप्रकारश्चेति सर्वं प्रतिपदं व्याख्यातचरम्। साम्प्रतं वयं चाक्षुषनिर्विकल्पकप्रत्यक्षस्वरूपगतविशेषाननुव्याख्यातुमारभामहे। चाक्षुषालोचनज्ञानानां द्विधा वर्गीकरणं कर्तुं शक्यते; यथा—वर्णात्मकान्यालोचनज्ञानानि वर्णरहितान्यालोचनज्ञानानि चेति। वर्णात्मकालोचनज्ञानमपि सप्तविधमिन्द्रधनुरन्तर्गतवर्णानुसारम्। तेषां मिश्रीकृतरूपाणि च। वर्णरहितालोचनज्ञानस्यानेके प्रकारा भवन्ति चाकचिक्याद्यालोचनज्ञानेभ्य आरभ्य प्रगाढकृष्णवर्णपर्यन्तम्।

वर्णानां भेदा अपि भवन्ति तद्गुणविशेषापेक्षया। अत्र त्रयो गुणा विशेषेणोल्लेखनीयाः—वर्णरूपम्[१], चाकचिक्यम्[२], गभीरत्वञ्चेति[३]। वर्णरूपं तूत्तेजकस्य रश्मिदैर्घ्यानुसारं भिद्यते। चाकचिक्यमपि खलूत्तेजकस्य तीक्ष्णत्वव्यपेक्षमवसेयम्। गभीरत्वञ्च विविधदैर्घ्ययुक्तरश्मीनां परस्परं मिश्रणेन जन्यते। विशुद्धैकस्तेजोरश्मिः प्रकाशोर्म्मिरिति यावत् पूर्णतो गभीरवर्णो भवति, किन्तु चक्षुरिन्द्रियं प्रायेण सवर्णकेनोत्तेजितं न जायतेऽत एव पूर्णतो गभीरस्य रश्मेरालोचनं ज्ञानमपि नोत्पद्यते। यद्वयं निर्विकल्पके प्रत्यक्षेऽनुभवामस्तत्सर्वं रश्मीनां परस्परं मिश्रणमेव।

२०. उत्तरप्रतिमा

आलोचनज्ञानस्य चाक्षुषरूपस्योत्तरप्रतिमापि जायते। यदि वयं कियन्तं कालं यावत् तीव्रे प्रकाशे पठामस्तदनन्तरञ्च तमसि गच्छामस्तदानीं क्षणं यावत्पूर्वप्रकारकमालोचनं ज्ञानमव्यवहितं प्रचलति। तदानुवर्त्यालोचनं ज्ञानम् 'अनुरूपोत्तरप्रतिमा' इति[४] व्यपदिश्यते। तच्च क्षणानन्तरं तिरोभूय पुनरनुयोगिनमालोचनं ज्ञानं जनयति, 'विपरीतोत्तरप्रतिमा[५]' इति चाभिधीयते। मूलतमा वर्णाश्चत्वारः सन्ति—रक्तिमा, हरीतिमा, पीतिमा, नीलिमा चेति। तेषां वर्णानां युगलद्वये विपरीतोत्तरप्रतिमोत्पादनाय वर्गीकरणं सम्पाद्यते। रक्तिमहरीतिम्नोः पीतिमनीलिम्नोश्च विपरीतोत्तरप्रतिमाजनने युगलद्वयं जायते। विपरीतोत्तरप्रतिमोत्पादनायानुपूरकवर्णापेक्षेते। कौ तह्यनुपूरकवर्णौ[६] ? यौ वर्णौ मिश्रीभावमापद्यमानौ विशिष्टमात्रायामीषत्पाण्डुरवर्णं जनयतः, तौ च समीपस्थौ परस्परमेकैकं संवर्धयतः। एतस्मादेव कारणात्तयोरनुपूरकाविति

१. तुलनार्थम्—Hue.

२. तुलनार्थम्—Brightness.

३. तुलनार्थम्—Saturation or chroma.

४. तुलनार्थम्—Positive after-image.

५. तुलनार्थम्—Negative after-image.

६. तुलनार्थम्—Complementary after-image.

विशेषणम्। यदि कोऽपि पुरुषो नीलं पदार्थं चिरं यावत् पश्यति, ततश्च तस्य दृष्टिस्तत्पदार्थस्येषत्पाण्डुरायां पृष्ठभूमावापतति, तत्र विपरीतोत्तरप्रतिमायां पीतिमा भासते, पीतं पृष्ठभूमिभागं वा स पश्यति। एवम्प्रकारेण यदि कोऽपि पुरुषः कियन्तं कालं यावद् रक्तिमवर्णं पदार्थं पश्यति, तर्हि तस्मात् पदार्थाद् दृष्टिविचलनाद् ईषत्पाण्डुरायां[1] पृष्ठभूमौ हरीतिमानमेव स पश्यति, हरिताभं वा पृष्ठभूमिभागं स पश्यति। एवम्प्रकारेणान्येषां वर्णानामपि मिश्रीभावमापद्यमानानामपि परस्परमनुपूरकत्वं जायते।

२१. श्रवणेन्द्रियम्

सम्प्रति वयं संक्षेपतः श्रवणेन्द्रियरचनाशब्दसंज्ञादावप्रकारादिकमनुव्याख्यास्यामः। शाब्दालोचनज्ञानसाधनं हि खलु श्रोत्रेन्द्रियम्। तस्य श्रुतिकर्णावपरपर्यायौ। तस्य बाह्यगोलकं तु शिरःपार्श्वे शङ्खास्थिसँल्लग्नं तद्बहिरन्तश्च द्रष्टुं शक्यते। आभ्यन्तरमधिष्ठानं तु मस्तिष्कापरार्धे उत्तरशङ्खिकाख्यकणिकाश्रितं शब्दसंज्ञाबोधनक्षेत्रमिति द्वितीयाध्याये व्याख्यातचरम्।

श्रवणेन्द्रियस्य बाह्याधिष्ठानस्य तावत्त्रयो भागा भवन्ति। ते यथा—बहिःकर्णः[2] मध्यकर्णः[3], अन्तःकर्णश्चेति[4]। वयमेतान् सम्प्रति प्रतिपदं विवेचयामः।

बहिःकर्णः—श्रवणेन्द्रियस्यायं बाह्यतमो भागः। तस्य द्वावंशौ मुख्यौ भवतः—कर्णशष्कुली[5], कर्णकुहरञ्चेति[6]। कर्णकुहरनामसार्धाङ्गुलदीर्घा वक्रसुरङ्गा कर्णपटहावधि विस्तृता।

मध्यकर्णः—अस्य 'मध्यमा कर्णगुहा' इत्यप्यपरो व्यपदेशः। सेयं क्षुद्रविषमायतना गुहा पटहकलया प्रच्छन्नमुखी भवति। अङ्गुलमात्रविस्तारा चेयम्। वर्णनसौकर्य्याय मध्यकर्णस्य द्वौ भागौ विशेषत उल्लेखनीयौ—मध्यभागः, पटहभागश्चेति। मध्यभागस्तत्र[7] कर्णास्थित्रितयस्याधरार्द्धं वक्त्रनाड्यादिकं क्रोडीकृत्य वायुपूर्णस्तिष्ठति। पटहः[8] श्रुतिपटहो वा नाम तनुदृढमसृणा स्वच्छप्राया मण्डलाकारा कला भवति। बहिःकर्णमध्यकर्णयोर्मध्ये पटहनेमिस्थेऽर्धशायितभावेनातिष्ठते। अस्ति हि श्रुतिपटहस्य कार्यविशेषः। वायुवाहितैः शब्दतरङ्गैः कर्णशष्कुल्यवच्छिन्ने आकाशे समुत्थितैः कर्णपटहः प्रकम्पितो जायते, तथाभूतश्चायं स्वसंसक्तकर्णास्थित्रयतरङ्गवेगान् कर्णान्तःप्रापणाय नुदति। त्रीणि क्षुद्रतमान्यस्थीनि, यानि मध्यमकर्णगुहान्तर्निगूढानि भवन्ति, पटहकम्पनोत्थितवेगतरङ्गानन्तःकर्णे प्रापयन्ति। तेषां नामानि हि [9]मुद्गरकमङ्कुशकं[10]

---

१. तुलनार्थम्—Grey colour.

२. तुलनार्थम्—outer ear.

३. तुलनार्थम्—Middle ear.

४. तुलनार्थम्—Inner ear.

५. तुलनार्थम्—Pima of the ear.

६. तुलनार्थम्—External Auditory meatus.

७. तुलनार्थम्—Tympanic-cavity proper.

८. तुलनार्थम्—Ear drum or tympanic membrance.

९. तुलनार्थम्—Hammer.

१०. तुलनार्थम्—Anvil.

धरणकञ्चेति[1]। तत्र क्षुद्रमुद्गराकारकत्वान्मुद्गरकमस्थि पटहपृष्ठे संसक्तं भवति। तदेवादौ पटहोत्थकम्पनवेगं गृह्णाति। अङ्कुशकं नाम शिखरस्थं मध्यवर्णगुहायां कर्णास्थिशकलं यत्किञ्चिद् वक्रमङ्कुशाकृति च भवति। धरणकमिति क्षुद्रतमश्चरमः कर्णास्थिखण्डो यस्याकारोऽश्वपृष्ठनिबद्धपर्य्याणस्य पार्श्वस्थपादधरणीसदृशो भवति। इदमेव कर्णपटहोत्थवेगतरङ्गान् साक्षादन्तःकर्णयन्त्रेषु प्रेषयति प्रापयति वा। शब्दतरङ्गाणां वेगः कर्णास्थित्रयस्य क्रियया भूम्ना संवर्धते। मनोवैज्ञानिकैराकल्य्य निर्धारितं यद्धि शब्दतरङ्गाणां वेगोऽन्तःकर्णप्रवेशकाले बहिःकर्णप्रवेशकालापेक्षया त्रिंशद्वारं संवर्धितो जायते।

अन्तःकर्णः[2]—अस्य कान्तारकमित्यप्यपरं नाम। अयं हि श्रवणेन्द्रियस्य मुख्यतमो निगूढतमो भागः। अयं हि शंखास्थ्नोऽश्मकूटभागान्तः[3] प्रच्छन्नो भवति। अतिगहनवर्त्मरूपेणावस्थितत्वात्तस्य कान्तारकमिति व्यपदेशो भवति। अन्तःकर्णे हि जलपूर्णभागोऽपि वर्तते, यस्मिन्नन्तर्जलपूर्णः कलामयोंऽशः प्लवते। तदन्तरेव श्रुतिनाड्यः प्रतानाः प्रतायन्ते। अस्थिमयांशे तूत्कीर्णगुहागृहाणीव भागा भवन्ति। वस्तुतस्तु शब्दसंज्ञावाहिनाड्यः श्रुतिशम्बूक एवावतिष्ठन्ते। श्रुतिशम्बूकं[4] नाम अन्तःकर्णभागे शङ्खाकृतिकं भवति। अत्रेदं स्मरणीयं यद्धि कान्तारकस्य द्वावंशौ—अस्थिमयांशः, कलामयांशश्चेति। अस्थिमयकान्तारकं हि तनुलसीकापूर्णं भवति। तस्या लसीकाया नाम परिजलमिति[5] भवति। तस्मिन्नेव चान्तःकर्णस्य कलामयांशः प्लवते सपरिकरम्। सोऽपि [6]'अन्तर्जल'ख्यलसीकापूर्णो भवति। तस्मिन्नेव सूक्ष्मतमाः श्रुतिनाड्याः प्रतानाः प्लवन्ते। श्रुतिनाडी चाप्यत्रैव संसक्ता जायते।

श्रुतिनाडीप्रसरक्रमः—श्रुतिनाडी सप्तमनाड्या सह प्राणगुहायाश्चतुरस्रखातधरातलात् समुत्तिष्ठति, मस्तिष्कादुष्णीषकसुषुम्णाशीर्षकमार्गेण च निर्गच्छति। इयं सप्तमनाड्या सहैव कर्णान्तर्द्वारं प्रविश्य पृथग्भवति, द्विधा च विभज्यते। अस्यैका शाखा तुम्बिकाभिगा नाडी भवति, अपरा च शम्बूकाभिगा नाडी भवति। तुम्बिकाभिगा श्रुतिनाडी विविधैः प्रतानैर्दिग्देशज्ञानाय स्थानासनसन्तुलनरक्षणाय च प्रभवति। नहि तत्सम्बद्धा मस्तिष्कभागाः शब्दालोचनज्ञानाय कल्पन्ते।

श्रुतिनाड्या अपरा शाखा शम्बूकाभिगा[7] नाम श्रवणालोचनज्ञानाय कल्पते। तद्विशेषविवरणमुपरि व्याख्यातचरम्।

---

१. तुलनार्थम्—Stirrup.

२. तुलनार्थम्—Inner ear or labyrinth.

३. तुलनार्थम्—Temporal bones.

४. तुलनार्थम्—Cochlea.

५. तुलनार्थम्—Perilymph.

६. तुलनार्थम्—Endo-lymph.

७. तुलनार्थम्—Cochlear Nerve.

एते सर्वे कर्णेन्द्रियावयवा निम्नलिखितेन चित्रेण प्रदर्शिताः—

मानवीयश्रवणेन्द्रियचित्रम्


१—बहिःकर्णः

२—कर्णकुहरम्

३—मध्यकर्णः

४—शम्बूकनाडी

५—श्रुतिपटहः



२२. शब्दसंज्ञादानप्रकारः

श्रवणेन्द्रियरचना व्याख्याता। वयं सम्प्रति शब्दालोचनं ज्ञानं कथमुत्पद्यत इत्यधिकृत्य किञ्चिद्विवेचनं पुरस्कुर्मः। शब्दालोचनज्ञानस्य योग्या उत्तेजकास्तु वायुतरङ्गा वस्तुप्रतीघातकृत-प्रकम्पनसमुत्थिताः। शब्दो वायुतरङ्गैः सह[1] कर्णकुहरं प्रविश्य पटहकलामभिहन्ति। कर्णपटहा-भिघातेन मुद्गरिकोन्नमनात् कर्णास्थिचिकं चाल्यते। ततश्चोत्पद्यतेऽस्थिमयकान्तारकान्तरीये परिजले सर्वतः प्रकम्पनम्। परिजलोत्थतरङ्गवेगाश्च द्वेधा प्रसरन्ति—पुरस्तात् शम्बूकान्तः, पश्चाच्च शुण्डिकाधारिकान्तरिति। अन्तर्जलीयप्रकम्पनैस्तन्मध्यस्था कलामयी शम्बूकी अन्तर्जलेन साकं प्रकम्पिता जायते। अन्तर्जलञ्चेदं प्रकम्पमानं स्वरग्राह्यवयवान् प्रागुक्तान् वीणातन्त्रीराजिमिव प्रकम्पयति, ततश्चोत्पद्यन्ते षड्जर्षभगान्धारमध्यमादिसप्तस्वरास्तेषां ग्राममण्डलमूर्च्छनादयश्च। ते चादीयन्ते सुसूक्ष्मैः शम्बूकाभिगनाडीसुसूक्ष्मप्रतानैः संज्ञावहवर्त्मभिर्मस्तिष्कमभि प्रापणाय। एवम्प्रकारेण जायते शब्दालोचनं ज्ञानम्।

ये तु पुनः परिजलीयास्तरङ्गवेगास्तुम्बिकामार्गेण पश्चादुपसर्पन्ति, ते तु शुण्डिकान्तरीयं परिजलं प्रकम्पयन्ति। परिजलप्रकम्पनैस्तदन्तःप्लवमानशुण्डिकाभ्यन्तरीयजलसंसक्तरोमवत् कोषाणु-कानि कम्पनं संज्ञादानप्रकारकमवाप्नुवन्ति। शुण्डिकाकोषाणुकानि दिग्देशाद्यालोचनज्ञानं स्थानासनसन्तुलनाद्यालोचनज्ञानमुत्पादयितुं प्रभवन्तीति विशेषः। एतानि रोमवन्ति कोषाणुकानि एकैकस्यां शुण्डिकायां सार्द्धपञ्चदशसहस्रं भवन्ति।

नहि सर्वे वायुतरङ्गोत्थाः शब्दा आलोचनज्ञानविषया भवितुमर्हन्ति। दृष्टिवितानोऽपि तथा समग्रतेजोरश्मीनां संव्यूहनं केन्द्रीकरणञ्च कर्तुं न प्रभवत्येवमेव श्रुतियन्त्रमपि सर्वानेव तरङ्गवेगानादातुं न प्रभवति। मध्यमकक्षीयवायुतरङ्गवेगानेव कर्णेन्द्रियं योग्योत्तेजकरूपेणाङ्गीकरोति न हि तदवरान्, नापि तदुत्तरान्। सूक्ष्मप्रयोगैर्निधारितं हीदं यद्धि प्रतिसेकण्डाभिधविपलं विंशतिः कम्पनानि[2] न्यूनातिन्यूनं श्रोतुमर्हाणि। प्रतिसेकण्डाभिधविपलमधिकतमसंख्या प्रकम्पनानां

---

१. तुलनार्थम्—Air-waves or atmospheric waves.

२. तुलनार्थम्—Vibrations.

विंशतिसहस्रमिति गणयन्ति सूक्ष्मपरीक्षकाः। अपि च, मानवीयश्रवणेन्द्रियं ३००,००० ध्वनिलक्षत्रयमालोचनज्ञानमवाप्तुं शक्नोतीत्यपि तद्विवेकिनामाकलनम्। वायुतरङ्गा वस्तुप्रतिघातवेगक्रमाद्यनुसारं भिद्यन्ते। तदनुसारमेव ध्वनीनामपि तीव्रत्वं[1] पौनःपुन्यञ्च[2] जायत इत्यवसेयम्। तीव्रवस्तुप्रतिघातेन वायुरपि तीव्रतरं विशीर्यते, अत एव वायुतरङ्गा अपि तीव्रवेगाः समुत्थिता भवन्ति। तज्जनितकर्णपटहप्रकम्पनादिषु तीव्रवेगः स्वत एवोत्पद्यते। उच्चैःस्वरञ्च तीव्रान्तःकर्णप्रकम्पनानां नियतं कार्यमिति सर्वमवदातम्।

एवम्प्रकारेणान्यप्रकारकालोचनज्ञानानामुत्पत्तिस्वरूपादिज्ञानमप्युन्नेयम्॥

इति अर्वाचीने मनोविज्ञाने निर्विकल्पकप्रत्यक्षविवेचनीयः सप्तमोऽध्यायः॥

---

१. तुलनार्थम्—Intensity.
२. तुलनार्थम्—Frequncy.

अष्टमोऽध्यायः

सविकल्पकप्रत्यक्षविवेचनम्

१. सविकल्पकप्रत्यक्षस्वरूपम्

आलोचनज्ञानस्वरूपेन्द्रियक्रियाकलापादिविवेचनं पूर्वस्मिन्नध्याये व्याख्यातम्। वयं सम्प्रति सविकल्पकप्रत्यक्षस्वरूपमनुव्याख्यास्यामः। प्राक् तु साधितमेवास्माभिर्यन्निर्विकल्पकं प्रत्यक्षं सविकल्पकप्रत्यक्षपूर्ववर्तिज्ञानं भवति। आलोचनज्ञानस्य निर्माणे प्रकारज्ञानं विशेष्यज्ञानं संसर्गज्ञानञ्चेति ज्ञानत्रयमेव स्वरूपतो वर्तते। नहि तत्र तेषां प्रकारत्वेन विशेष्यत्वेन संसर्गत्वेन च सम्बन्धावगाहिज्ञानं प्रादुर्भवति। किन्तु सविकल्पके प्रत्यक्षे तेन तेन रूपेण तत्सम्बन्धावगाहिज्ञानं समुत्पद्यते। अत एवास्त्यस्य सविकल्पकात्मकमिति व्यपदेशः। यथा हि 'दण्डी पुरुषः' इति विशिष्टबुद्धौ दण्डे प्रकारताख्या, पुरुषे विशेष्यताख्या, तयोः संयोगे च संसर्गताख्या विषयता भासते। निर्विकल्पके प्रत्यक्षे आलोचनज्ञानसंज्ञके विशेषणविशेष्यसंसर्गाणां स्वरूपमात्रं भासते, न तु परस्परं तयोः संश्लेषः। सविकल्पके प्रत्यक्षे तेषां परस्परं सम्बन्धोऽप्यवगाह्यते। अत एव सविकल्पकं प्रत्यक्षं संसर्गावगाहिज्ञानमित्यप्यभिधीयते।

प्रत्यक्षं हीन्द्रियार्थसन्निकर्षजं ज्ञानं भवति। इन्द्रियमित्यत्र समनस्कमित्यवसेयम्। ध्यानाभावे नहीन्द्रियार्थसन्निकर्षः सम्यक्तयोपपद्यते। अस्ति च प्रत्यक्षं वर्तमानविषयग्राहि। भूतकालिकं भविष्यत्कालिकं वा पदार्थजातं प्रत्ययजातं वा स्मृतिविषयः कल्पनाविषयो वा भवितुमर्हति। नहि तस्येन्द्रियैः प्रत्यक्षं कर्तुं शक्यते, इन्द्रियसन्निकर्षाभावात्। यथा हि वयं प्रतिदिनं पशून् पश्यामः, मनुष्यैः सह वदामः, सौरभं जिघ्रामः, सङ्गीतं श्रृणुमः, सुमधुरमन्नमास्वादयामः, मृदुकुसुमानि स्पृशाम इति सर्वं प्रत्यक्षनिदर्शनम्। सन्निकर्षो नाम इन्द्रियस्य विषयेण सह सम्बन्धः। यथा घटप्रत्यक्षे सौरभप्रत्यक्षे वा घटेन सह चक्षुषः संयोगसम्बन्धः, सौरभेण सह तु न्यायमते संयुक्तसमवायसम्बन्धः, सांख्यमतेऽर्वाचीनानां मनोवैज्ञानिकानां मते च संयोग एव सम्बन्धः।

निर्विकल्पकं ज्ञानं निर्विषयं ज्ञानं न भवतीति त्वस्माभिः प्रागेव प्रपञ्चितम्। तत्र विषयतात्रयस्याभावे चतुर्थी विषयता विद्यत इति तु नैयायिकानां मतम्। अद्वैतवादिनां मते निर्विकल्पकज्ञानत्वं नामाखण्डार्थविषयकत्वम्, संसर्गानवगाहियथार्थज्ञानत्वमिति यावत्। तदुक्तं हि तत्त्वप्रदीपिकायां श्रीमच्चित्सुखाचार्यैः—

> संसर्गासङ्गिसम्यग्धीहेतुता या गिरामियम्।
> उक्ताखण्डार्थता यद्वा तत्प्रातिपदिकार्थता॥ इति[1]।

नह्यर्वाचीनमनोविज्ञानाचार्य्यमतेन सार्धमुपर्युक्तमतद्वयं संवदति। नास्त्यालोचनज्ञाने चतुर्थी विषयता। नाप्यस्त्यत्राखण्डार्थावभासः। अस्ति ह्यालोचनज्ञानं विशिष्टं ज्ञानम्, यन्मनोविज्ञानप्रतिपाद्यम्। विशिष्टैकैकपदार्थनिष्ठत्वादालोचनज्ञानमपि विशिष्टं ज्ञानमिति निगद्यते। विद्यन्ते हि तत्र प्रकारताविषयता (विशेषणविषयता), विशेष्यताविषयता, संसर्गताविषयता च

१. द्रष्टव्या—तत्त्वप्रदीपिका, पृ० १०६

स्वरूपतः। किन्तु तासां निरूप्यनिरूपकभावसम्बन्धाभावेन निर्विकल्पकं ज्ञानं तत्तत्प्रकारकं तत्तत्पदार्थनिष्ठं सदपि, सम्बद्धज्ञानमिव 'श्यामो घटः' इति ज्ञानमिव न सविकल्पतां भजते। अपि च, निर्विकल्पकज्ञाने मनोविज्ञानप्रतिपाद्योऽस्ति हि विविधेन्द्रियक्रियाकलापः साङ्गोपाङ्गः प्राधान्येन कारणीभूतः। युज्यते च निर्विकल्पकज्ञानस्याखण्डार्थत्वविरहितत्वम्, विशिष्टबुद्ध्यात्मकसविकल्पकज्ञानानियतपूर्ववर्तित्वात्। नह्यालोचनज्ञाने तत्तद्विषयकत्वमन्तरा सविकल्पके प्रत्यक्षे तत्तपदार्थविशेषावगाहिज्ञानत्वमुपपद्यते। अव्यक्तमस्पष्टं ज्ञानं तर्हि सविकल्पकप्रत्यक्षभूमाववतीर्य व्यक्तसम्बन्धं स्पष्टञ्च जायत इत्यस्माकं तात्पर्यम्। महर्षिगौतमेन "अव्यपदेश्यं प्रत्यक्षं ज्ञानम्" इत्येवमुक्तस्य वचनस्याप्यव्यक्तस्वरूपमुद्दिश्य प्रत्यक्षनिर्वचनेऽभिसन्धिरवसेयः। इन्द्रियसन्निकृष्टपदार्थसद्भावात् कल्पनाविषयाभावाच्च 'व्यवसायात्मकम्' इति पदमुन्नेयम्। अन्यथा स्पष्टस्वरूपाभावे निर्विकल्पकप्रत्यक्षस्य कथं व्यवसायात्मकत्वमुच्येत? वस्तुतः प्रमाणीभूतं व्यवसायात्मकन्तु सविकल्पकं ज्ञानम्; किन्तु तत्र शुद्धवस्तुज्ञानाद्व्यतिरिक्तं पूर्वानुभूतप्रत्ययनामजात्यादियोजनायाः सन्निवेशोऽपि विद्यत एव। नूनं विशुद्धमिन्द्रियजन्यं ज्ञानं निर्विकल्पकम्; किन्तु विचारपूर्वानुभूतप्रत्ययादिकल्पनादिसंवलितं सविकल्पकं प्रत्यक्षम्। सविकल्पके प्रत्यक्षे सत्येव भ्रमस्य निरासो भवितुमर्हति; यतो हि निर्विकल्पकं प्रत्यक्षन्तु भ्रमप्रमयोः समानमेव। अत एव प्रत्यक्षं द्विविधमेव सर्वतन्त्रस्वतन्त्राचार्य्यवाचस्पतिमिश्रेण गौतमप्रणीतसूत्रात्प्रत्यक्षव्याख्यानपरात् समालोडितम्। नूनं श्लाघनीयोऽयं प्रयत्नः। एतत् सविकल्पकं प्रत्यक्षं किम्प्रकारकं सपरिकरमिति वयमिदानीं विवेचयामः।

२. प्रत्यक्षभेदाः

विविधपदार्थानामितरेतरव्यावृत्तमिन्द्रियजन्यं यज्ज्ञानं तत्सविकल्पकम्। विषयभेदात्तर्हि प्रत्यक्षभेदा अपि विचार्यन्ते। विषयस्वरूपमधिकृत्य ये सविकल्पकप्रत्यक्षभेदा अत्र विचार्यन्ते, नहि सविकल्पकप्रत्यक्षस्वरूपे तैरापादितः कश्चन भेदः सञ्जायत इत्यवधेयम्। अस्तु।

(अ) पदार्थतद्गुणप्रत्यक्षम्

प्रथमन्तावत् पदार्थानां तद्गुणानाञ्च प्रत्यक्षं[1] विवेच्यते। वयं यदा घटं पश्यामस्तदा घटप्रत्यक्षमिति निगद्यते; चक्षुरिन्द्रियस्य घटपदार्थेन सह सन्निकर्षात्। एवमेव न केवलं वयं घटमेव पश्यामोऽपि तु तस्य शुक्लत्वश्यामत्वपृथुबुध्नोदरत्वादिकमपि पश्यामः। अत्रेदं घटविशेषणप्रत्यक्षम्। 'शुक्ला गौः' इति प्रत्यक्षे न वयं गौरिति पदार्थमेव केवलं पश्यामोऽपि तु तस्याः शुक्लत्वमपि। एवमेव सामान्यगुणानां प्रत्यक्षमपि व्यक्तिप्रत्यक्षसहकृतमेव जायते। गोप्रत्यक्षे सति गोत्वजातिसमानाधिकरणगुणानां प्रत्यक्षमपि जायते। प्राचीनभारतीयन्यायशास्त्रे तु प्रत्यक्षविषयेन्द्रियसन्निकर्षोऽपि षोढा विषयानुसारमभिमत आसीत्। तथा हि[2]—

(१) संयोगः—प्रत्यक्षज्ञानहेतुः प्रथमोऽयमिन्द्रियार्थसन्निकर्षः। उदाहरणतश्चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षो भवति।

(२) संयुक्तसमवायः—घटनिष्ठस्य श्यामशुक्लादिगुणस्य संयुक्तसमवायो द्वितीयः सन्निकर्षः, चक्षुःसंयुक्ते घटे रूपस्य समवायात्।

---

१. तुलनार्थम्—Perception of things and attributes.

२. द्रष्टव्यः—तर्कसंग्रहः, दीपिकासहितः।

(३) संयुक्तसमवेतसमवायः—रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षो भवति, चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र च रूपत्वस्य समवायात् ।

(४) समवायः—श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः, कर्णविवरवर्त्याकाशस्य श्रोत्रत्वाच्छब्दस्याकाशगुणत्वाद् गुणगुणिनोश्च समवायात् ।

(५) समवेतसमवायः—शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः, श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात् ।

(६) विशेषणविशेष्यभावः—अभावप्रत्यक्षे एष सन्निकर्ष उपलभ्यते । 'घटाभाववद् भूतलम्' इत्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वादिति ।

इन्द्रियसन्निकर्षस्येत्थं प्रौढं विवेचनमर्वाचीनमनोवैज्ञानिकैरद्यावधि नैव प्रपञ्चितम् । उपर्युक्तेषूदाहरणेषु ह्याद्यं सन्निकर्षत्रयन्तु व्याख्यातचरम् । शब्दसाक्षात्कारे प्रागुक्तरीत्या संयोग एव सन्निकर्ष एष्टव्यः । यतो हि श्रावणप्रत्यक्षविषयीभूतं श्रावणालोचनज्ञानस्य योग्यमुत्तेजकं वा वायुतरङ्गजातम् । वस्तुभूतं खल्वेतत् । निदर्शने दुष्टेऽपि सन्निकर्षभेदस्तु समीचीन एवेति प्रतिभात्यस्मान् ।

अत्रेदं स्मरणीयं यद्धि पूर्वानुभूतसमानविषयस्मृतिसंस्कारोपेतं हि सविकल्पकं ज्ञानं भवति । बौद्धदर्शनपारिभाषिकपदावल्यनुसारन्तु सविकल्पकं प्रत्यक्षं कल्पनोपेतं भवति । कल्पना हि तस्मिन् तन्त्रे 'नामजात्यादियोजना' इत्यभिमता । औत्तरकालिकेऽद्यतने वाऽश्वप्रत्यक्षे बालकस्य पूर्वदृष्टाश्वगुणप्रत्ययादिसन्निवेशात् संस्कारसमवेतं तत्प्रत्ययसंस्कारजातैः स्पष्टतरमनुव्याख्यातं वाश्वप्रत्यक्षं जायते । अस्तु तर्हि प्रत्यक्षे प्रचुरं पूर्वानुभवप्रत्ययसंस्काराधानम् । अर्थसंवादि ज्ञानं सविकल्पकं प्रत्यक्षम् । यत्प्रत्यक्षं विषयेण सह न संवदति, नहि तत् सविकल्पकं प्रत्यक्षम्, अपि तु भ्रमो विपर्ययो वा । भ्रमस्वरूपविवेचनं तु वयमग्रे करिष्यामः । सविकल्पकं प्रत्यक्षं समुपस्थितवस्तुस्वरूपं पूर्वानुभवप्रत्ययानुसारं व्याख्यातुं प्रयतते । यदा सफलोऽयं प्रयत्नः संशयादिकं निरसितुं शक्नोति, तदा हि व्यवसायात्मकं ज्ञानमुदेति । नामजात्यादियोजनाया वस्तुस्वरूपं विशदीक्रियते, व्याख्यां स्फुटतां वा लभते । अत एवेदमालोचनज्ञानस्य परिणतावस्था । सविकल्पकं ज्ञानं वस्तुगुणादीनां व्यपदेशकमपि भवत्येव ।

(आ) दिग्देशप्रत्यक्षम्[१]

नहि वयं केवलं पदार्थान् तद्गुणाँश्च पश्यामः, अपि तु वस्तुविशेषदेशं तद्दिशं तद्दूरत्वञ्चापि पश्यामः । दिग्देशदूरत्वादिज्ञानं तर्हि सविकल्पकप्रत्यक्षस्यापरः प्रकारविशेषः । अयं पदार्थः सन्निकृष्टः, तच्च वस्तु सुदूरवर्ति, इति दूरत्वज्ञानं[२] नूनं प्रत्यक्षजन्यम् । 'इयं प्राची', 'इयमवाची', 'इयमुदीची', 'इयं प्रतीची' इत्यादि व्यवहारासाधारणं कारणं नूनं दिक्प्रत्यक्षम्[३] । 'रामस्य गृहं मद्गृहात् पश्चिमतः, रमेशोपाध्यायगृहाच्च पूर्वतो वर्तते' इति ज्ञानं हि खलु पदार्थावस्थानविषयकं प्रत्यक्षम्[४] । यदा वयमुपरि पश्यामस्तदा गृहतोरणोत्तुङ्गाट्टालिका-

१. तुलनार्थम्—Perception of space.

२. तुलनार्थम्—Perception of distance.

३. तुलनार्थम्—Perception of direction..

४. तुलनार्थम्—Perception of relative position of a thing.

विमानादीनामवस्थानसामीप्यदूरत्वादिविषयकं ज्ञानं सविकल्पकप्रत्यक्षमात्रेणैव जन्यते। दिग्देशावस्थानादिप्रत्यक्षं हि खलु महते व्यवहारसौकर्य्याय कल्पते। वस्त्ववस्थानं सम्यक्तया ज्ञात्वा हि वयं तत्प्रति स्वकीयचेष्टामारभामहे। शिशुर्हि दूरत्वादिसविकल्पकप्रत्यक्षक्षमताभावे चन्द्रमसमप्यादातुं प्रयतते। नूनं तदा तस्यालोचनमेव प्रत्यक्षं विद्यते। कालान्तरे प्रत्ययानुभवादिविकासे सति बालकश्चन्द्रमसं दृष्ट्वापि ग्रहीतुं न प्रयतते। तदा हि सविकल्पकप्रत्यक्षेण जन्यते। तस्य दूरत्वादिज्ञानं पूर्वप्रत्ययानुभवाद्यनुगृहीतमेव सविकल्पकं प्रत्यक्षं भवतीति वर्णितपूर्वम्। सन्निकटो हि पदार्थो बृहदाकारको दृश्यते विप्रकृष्टश्च ह्रस्वाकारः। शिशोर्हि दूरत्वावस्थानप्रत्यक्षे चाक्षुषस्पार्शनपेशीजन्यप्रत्यक्षयोः सहयोगपुरस्सरं सद्भावो विद्यत इत्यवदातमेव सर्वम्।

(इ) कालप्रत्यक्षम्

कियन्तं कालं यावदेकोऽनुभवो विद्यत इति ज्ञानन्तु कालप्रत्यक्षम्। व्याख्यानान्तराल एव खेलप्रतियोगितान्तराले वा केचन पुरुषा विद्यार्थिनो वा कियान् कालो व्यतीतः, कदा वा खेलाः समाप्ता भविष्यन्तीति निश्चेतुं प्रभवन्ति। परीक्षाकाले हि समयो द्रुतगत्या व्येति, मनोरञ्जके हि व्याख्याने सार्धघटिकापि क्षणमिव व्यतीता जायते। किं कारणम्? नूनं कालविषयकं प्रत्यक्षमिच्छां समारुह्य धावति। यदीच्छा मार्गेऽवरुद्धा जायेत, कालोऽपि सविलम्बं गच्छति। किन्तु यदेच्छा समुत्साहमूलप्रवृत्तिसमन्वितानवरुद्धा स्वलक्ष्यमभिप्रवर्तते, तदा सुमहान् कालोऽपि क्षणमिव व्यतीतः प्रतीयते। तथा हि महाकविभवभूतिरचितोत्तररामचरिते "अविदितगतयामा रात्रिरेव व्यरंसीत्"[1]। अपि च, भोजब्रह्मचारिसंवादे श्रूयते—

शीतेनाध्युषितस्य माघजलवच्चिन्तार्णवे मज्जतः
शान्ताग्नेः स्फुटिताधरस्य धमतः क्षुत्क्षामकुक्षेर्मम।
निद्रा क्वाप्यवमानितेव दयिता सन्त्यज्य दूरङ्गता
सत्पात्रे प्रतिपादितेव कमला नो हीयते शर्वरी॥ इति[2]।

अतः कालप्रत्यक्षमिच्छादिसव्यपेक्षम्। अत एव घटिकायन्त्रानुकूलमेव सर्वदा सर्वेषां प्रत्यक्षं नोपलभ्यते। तथापि सन्ति केचन पुरुषा ये सगर्वं सविकल्पकप्रत्यक्षेण कालनिर्देशं समीचीनं कर्तुं प्रभवन्ति। तेषां हि गर्वोक्तिरस्मान् श्रीमदुदयनाचार्यस्योक्तिमिमां भूरिं भूरि स्मारयति। तथा हि—

वयमिह पदविद्यां तर्कमान्वीक्षिकीं वा,
यदि पथि विपथे वा वर्तयामः स पन्थाः।
उदयति दिशि यस्यां भानुमान् सैव पूर्वा
नहि तरणिरुदीते दिक्पराधीनवृत्तिः॥ इति।

सगर्वाणामपि तेषां कालज्ञानं निःस्पृहं वस्त्वपेक्षं भवतीति सर्वमूह्यम्।

(ई) गतिप्रत्यक्षम्

गतिशीलपदार्थोऽपि द्रष्टुं शक्यते। अत एव गतिप्रत्यक्षमपि सिद्धमेवेति निष्प्रत्यूहम्।

---

१. द्रष्टव्यम्—उत्तररामचरितम्।

२. द्रष्टव्यः—भोजप्रबन्धः।

पुच्छलतारिकाकाशेऽवपतन्ती गच्छन्ती वा केन न दृष्टा ? वायुयानमपि नभसि गच्छद् वयं सर्वे एव पश्यामः, यद्यपि तस्य चालकयन्त्रस्य इञ्जिनाभिधस्य कोऽपि रवो न श्रूयते। गतिशीलपदार्थानां पुच्छलतारावायुयानादीनां दर्शनाद् गतिप्रत्यक्षत्वं युज्यत एव। चित्रपटे गतिप्रत्यक्षोपोद्बलितभ्रममुत्पाद्य चित्रपटसञ्चालका अहर्निशं रूप्यकसहस्रमर्जयन्ति। पृथग्भूतान्यपि चित्राणि स्वतो गतिविहीनानि विशेषवेगेन प्रवर्तमानानि गतिभ्रमं जनयन्ति। तद्वति तत्प्रकारकं ज्ञानं प्रत्यक्षं सत्यं प्रमेति वोच्यते। अतद्वति तत्प्रकारकं ज्ञानं भ्रमः। वयं भ्रमस्वरूपमग्रे विशदतया विवेचयिष्यामः। अत्र तु केवलमिदमेव प्रतिपाद्यं यद्धि गतिशीलानां पदार्थानां तद्गतेश्च प्रत्यक्षं जायते, तस्य च चित्रपटे चरममुदाहरणं समुपलभ्यते।

नहि केवलं गतिप्रत्यक्षं चाक्षुषमेव भवति। त्वगिन्द्रियेणापि गतिप्रत्यक्षं जायते। यदि कापि पिपीलिका शरीरोपर्युपसरति, तदा तस्या गच्छन्त्या अङ्गविशेषानुबन्धिप्रत्यक्षं ज्ञानं प्रतिपदं जायते। अतस्त्वाचमपि गतिप्रत्यक्षं भवति। श्रावणं प्रत्यक्षमपि कदाचन जायते। "अद्य किलाचार्य्यनरेन्द्रदेवमहोदयानां व्याख्यानं 'टाउनहाल' स्थले भविष्यति" इति सूचना डिण्डिमघोषपूर्वकं विज्ञापयितुर्गतिशीलाश्वशकटस्थितस्य पुरुषस्य ध्वनिनैव तस्य सन्निकृष्टमागच्छतः श्रावणरूपं प्रत्यक्षं कर्तुं शक्यते। अपि च, पिहितनेत्रा अपि वयं स्वकीयभुजस्योत्क्षेपणमवक्षेपणञ्च ज्ञातुं शक्नुमः। तयोर्दिशमपि ज्ञातुं प्रत्यक्षेण प्रभवामः। इदं हस्तगतिप्रत्यक्षन्तु तत्रत्यपेशीस्नायुसन्धिस्थज्ञानेन्द्रियविशेषैर्जन्यते।

(ङ) सौन्दर्यप्रत्यक्षम्

सविकल्पकप्रत्यक्षस्य पञ्चमः प्रकारः सौन्दर्यप्रत्यक्षं भवति। पर्वतीयदृश्ये रमणीये सौन्दर्यानुभवो नूनं प्रत्यक्षजन्यः। किमपि सुन्दरं वस्तु सहसा दृष्ट्वा वयं ब्रूमः 'अलौकिकं हि खलु सौन्दर्यमस्य' इति। अनायासमुक्तं वचनमिदं नहि विचारप्रभवम्, सहसोक्तत्वात्। दर्शनोत्थं खल्विदं वचनम्। बालिकायास्तालसहितं मधुरं स्वरं श्रुत्वा मनोहारित्वं तस्य श्रावणप्रत्यक्षेणैवानुभूयते। स्वाभाविकसौन्दर्यस्य मनोमुग्धकारित्वं दर्शनमात्रेण कियदधिकं भवतीति कविकुलगुरुणा महाकविकालिदासेन सर्वं सुष्ठु स्फुटमभिज्ञानशाकुन्तले प्रतिपादितम्। तथा हि—

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्[१] ॥ इति।

भवन्ति हि खलु पुरुषाणां स्त्रीणां पदार्थानाञ्च गुणविशेषाः, ये दर्शकानां चेतांसि बलादाकर्षयन्ति। पद्मिन्याः सौन्दर्यं विश्वविश्रुतम्, यद्दर्शनमात्रलोलुपो यवनाधिपोऽलाउद्दीनखिलजिनामासीत्। समानञ्च सौन्दर्यप्रत्यक्षं बर्बरसभ्यपुरुषेष्वप्युपलभ्यते। सौन्दर्यप्रत्यक्षेण वयं रमणीयं वस्तु प्रति समाकृष्टा भवामः, असुन्दरं वा दृष्ट्वा वयं तद्वस्तु प्रत्युदासीना भवामः।

ननु कथं सौन्दर्यानुभवः प्रत्यक्षं ज्ञानं भवति ? यावन्तः पुरुषास्तावन्त एव तेषां सुन्दरवस्तुविषयकविचाराः। एकवस्तुजन्यप्रत्यक्षं ज्ञानं प्रतिपुरुषं भिद्यते। सौन्दर्यासौन्दर्यविषये प्रायो

१. द्रष्टव्यम्—अभिज्ञानशाकुन्तलम्, १।१९

मतैक्यं नोपलभ्यते। एवं सम्प्राप्तायामाशङ्कायां वयं प्रतिवदामः। बाढम्, सौन्दर्यासौन्दर्य-प्रत्यक्षे विविधपुरुषाणां मतैक्यं यद्यपि कदाचन नोपलभ्यते, तथापि दृश्यते हि लोकानां वर्ण-विशेषं प्रति, स्वरतालग्रामविशेषं प्रति, शरीराङ्गविशेषसौष्ठवं प्रति विशेषाभिरुचिः। यत्र मतवैचित्र्यं जायते, तत्र तत् पूर्वानुभवविरोधिसंस्कारोपेतत्वादेव सविकल्पकप्रत्यक्षस्य। नहि सर्वदा सविकल्पकं प्रत्यक्षमपि सर्वेषां पुरुषाणामभिन्नं भवति। वस्त्वालोचनज्ञाने समाने सत्यपि पूर्वप्रत्ययसंस्काराहितकल्पनाभेदात् सविकल्पकप्रत्यक्षेऽपि कदाचन मतैक्यराहित्यमुपलभ्यत इति सर्वमवदातम्।

(ऊ) सामाजिकं प्रत्यक्षम्

प्रत्यक्षज्ञानस्य षष्ठः प्रकारः सामाजिकं प्रत्यक्षम्। सामाजिकप्रत्यक्षसंवलितो ह्यस्माक-मधिकतमो व्यवहार उपलभ्यते। वयमनेनैव जानीमः को ह्यस्मान् द्वेष्टि, कश्चास्मान् स्निह्यति। द्वित्रवर्षीयस्य शिशोर्व्यवहारेऽपि वयं सामाजिकप्रत्यक्षस्य सुनिश्चितं रूपं लभामहे। यदि कश्चनागन्तुकः शिशुं क्रोडे कर्तुं प्रयतते, शिशुस्तावन्न तदभिमुखं गच्छति; यावन्न तन्मुद्रा-प्रत्यक्षेण तन्मनोभावं स्नेहक्रोधादिरूपं सम्यक्तया परिचिनोति। मन्यामहे सामाजिकप्रत्यक्षस्याद्यं रूपन्तु मातृमुखस्पर्शपरिचय एव सन्निहितम्। नूनं सामाजिकव्यवहारज्ञानप्रकर्षसमनन्तरमेव सामाजिकप्रत्यक्षमपि प्रौढिमवाप्नोति। विश्वेतिहासे ये विश्वविश्रुतामनवद्यां कीर्तिं लब्धवन्तः, ये च स्वोपक्रमेषु सर्वदा सफला जाताः, तेषां सर्वेषामेव युगनिर्मातॄणां समाजनेतॄणां राज्ञाञ्च सामाजिकं सविकल्पकं प्रत्यक्षं नितान्तं प्रौढिङ्गतमाशुकारि च सँल्लक्ष्यते। उदाहरणतो मुगल-सम्राड् महान् अकबराभिधानो यत्साफल्यं साम्राज्यस्थापने यद्गौरवञ्च तत्प्रबन्धेऽवाप्तवान्, तस्य सर्वस्य रहस्यं तस्य सामाजिकप्रत्यक्षे नितान्तं परिनिष्पन्नमेव निहितम्। अद्यतन-भारतीयगणतन्त्रस्य प्रथमप्रधानमन्त्रिमहोदयानां श्रीजवाहरलालनेहरूमहोदयानां सामाजिकं प्रत्यक्षं नितान्तमुत्कृष्टं दरीदृश्यते। सामाजिकं प्रत्यक्षमिति सामाजिकाचारव्यवहारजनता[1]-तन्नेतृस्वभावादिप्रत्यक्षम्, मुखमुद्रादिजन्यमिति यावत्। सामाजिकव्यवहारोपोद्बलितं हि तेषामुपयुक्तसहयोगिचयने जनतेच्छावश्यकतानुसारं स्वकीयकार्यक्रमनिर्धारणे च सामाजिकं प्रत्यक्षं महत् सौकर्य्यमभूतपूर्वं साफल्यञ्चावहति। सामाजिकं प्रत्यक्षं सामाजिकव्यवहारोचितप्रतिक्रियो-त्पादनेऽसम्यं क्षमतां प्रदत्ते। विश्वविश्रुतवीरनैपोलियनबोनापार्टस्य पराजयस्य मूलकारणं सामाजिकप्रत्यक्षाभाव एव। यतो हि स योग्याधिकारिचयनेऽपाटवं प्रदर्श्य भाविनः पराजयस्य बीजं निक्षिप्तवान्।

सविकल्पकं निखिलं प्रत्यक्षं प्रत्ययाभ्यासज्ञानवृद्ध्या सह प्रकर्षत्वं पूर्णत्वं लभत इति त्ववदातमेव।

३. सविकल्पकप्रत्यक्षविश्लेषणम्

वयमधुना सविकल्पकप्रत्यक्षस्य विश्लेषणं करिष्यामः। सविकल्पकप्रत्यक्षस्वरूपनिर्म्मितौ प्रत्यक्षं नूनं मुख्यतममङ्गमिति तु प्रागुक्तमेवास्माभिः। नह्यालोचनं ज्ञानमन्तरा सविकल्पकं प्रत्यक्षस्वरूपं लभते। यदि चाक्षुषमालोचनं न पूर्वं भवेत्तर्हि चाक्षुषसविकल्पकप्रत्यक्षस्य सम्भावनापि नोदेष्यति। श्रावणालोचनं ज्ञानं विना श्रावणं सविकल्पकं प्रत्यक्षमपि नोत्पद्यते।

---

१. तुलनार्थम्—Public, जनसमूहार्थे प्रयुक्तः।

मानवशरीरेऽस्थिपञ्जर इव खलु निर्विकल्पकं प्रत्यक्षं सविकल्पकप्रत्यक्षज्ञानोत्पादनाय कल्पते। निर्विकल्पकं ज्ञानन्तु संज्ञावाहिनाडीकन्दाणुकमस्तुलुङ्गीयसंज्ञाधिष्ठानादिप्रभवम्। ननु किं तर्हि सविकल्पकं प्रत्यक्षम्? केवलमालोचनज्ञानविशेष एवेति वक्तुं शक्यते। नाडीकन्दाणुकक्रियादिव्यापारस्तु वस्तुस्वरूपप्रतिबिम्बग्रहणरूपः। प्रतिबिम्बग्रहणञ्चौदासीन्योपात्तं कर्म। आलोचनं ज्ञानमीषदौदासीन्योपेतं कर्म भवतु नाम, सविकल्पकं प्रत्यक्षन्तु नूनं चैतन्यव्यापारस्य सक्रियत्वमभिव्यञ्जयति। नह्यालोचने ज्ञानेऽपि सर्वांशत औदासीन्यं वर्तते। प्रागुक्तरीत्या ध्यानमन्तरा प्रत्यक्षादि ज्ञानं नोत्पद्यते। इन्द्रियाभिमुखः सन्नपि पदार्थविशेषो न तावत्प्रत्यक्षं जनयितुमलम्, यावन्नहि स जन्तोर्ध्यानं समाकर्षति। ध्याने समाकृष्टे हि वस्तुजोत्तेजनयोत्तेजितानि संज्ञावाहीनि नाडीकन्दाणुकानि जायन्ते। तदनन्तरं जायते निर्विकल्पकं प्रत्यक्षम्। यदि सम्मुखीने पदार्थे व्यक्तिविशेषस्य रुचिर्न भवेत्, नहि तत्र निर्विकल्पकप्रत्यक्षस्य सम्भावना प्रतीयेत। अत एवालोचनं ज्ञानं वस्तुप्रतिबिम्बग्रहणमात्रमिति न वाच्यम्, यद्यपीत्थमेव सामान्यजनानाम् इदं प्रतिभाति।

सविकल्पके प्रत्यक्षे त्वालोचनज्ञानादतिरिक्तमपि पूर्वानुभवजन्यप्रत्ययादिसमुपेतं महदनुव्याख्यानं सन्निविशते। सम्प्राप्तालोचनज्ञानस्य मन उपबृंहणं टीकामिव भाष्यमिव वा करोति। निखिलपरिस्थितिजातात्कस्यचिदेकस्य वस्तुनस्तत्प्रत्यक्षोपपादनाय चयनं क्रियते, चयनानन्तरमेव च ध्यानं समाहितं जायते। नहि ध्यानमन्तरा कस्यापि वस्तुनः प्रत्यक्षमुत्पद्यते। सुतरां तावदालोचनं ज्ञानमपि चयनपूर्वं ध्यानमपेक्षते। नह्यालोचनज्ञानस्य पूर्वानुभवासादितमनुव्याख्यानं सविकल्पकप्रत्यक्षाख्यं विभिन्नेषु पुरुषेषु समानं भवति, अपि तु पूर्वोपार्जितज्ञानाद्यनुसारमेव तदुपबृंहणं जायते। ऋषिपत्तनस्थं संग्रहालयं दृष्ट्वा भारतीयेतिहासविद्यार्थिनो दर्शनविद्यार्थिनो वा धर्मचक्रं सिंहचतुष्टयात्मकमशोकसम्राजा निर्मितस्य स्तम्भस्योपरिभागं वा पश्यतो यत् सविकल्पकं प्रत्यक्षं जायते, नहि तत्सम्भवति भोलाभिधस्य हालिकस्य। द्वयोरेवालोचनज्ञाने समाने सत्यपि पूर्वज्ञानराशिभेद एव तयोर्द्वयोः सविकल्पके प्रत्यक्षेऽन्तरमावहति। अतो रुचिगर्भितध्यानोपात्तमालोचनं ज्ञानं वस्तुजं पूर्वानुभवसंस्कारजन्यालोचनज्ञानोपबृंहणं चेति द्वयमेव सविकल्पकप्रत्यक्षस्य विशदं स्वरूपं निर्धारयति। अर्थात् सविकल्पकं प्रत्यक्षं न केवलं वस्तुप्रतिबिम्बग्रहणरूपम्, अपि तु प्रमात्रनुभवरुचिध्यानकल्पनाद्यायत्तमपीति निर्गलितार्थः।

४. सविकल्पकप्रत्यक्षे किं वस्तुस्वरूपं प्रकाशते?

ननु किं विशुद्धं वस्तुस्वरूपं[१] ज्ञातुमर्हम्? किं वा वयं विशुद्धवस्तुस्वरूपं ज्ञातुं शक्नुमः? वस्तुतोऽयं प्रश्नो ज्ञानमीमांसान्तर्गतः। नहि मनोविज्ञानं तत्त्वदर्शनम्, नापि ज्ञानमीमांसा। दर्शनं हि विश्वस्य चरमतात्त्विकप्रश्नावधारणार्थं प्रवर्तते, मनोविज्ञानं तु मानवव्यवहारस्य चैतन्याभिप्रेरितस्य स्वरूपाध्ययनपरमेव दृश्यते। व्यवहारातीतस्य किमुत लोकोत्तरस्य वस्तुजातस्य विशुद्धं किं स्वरूपमिति न मनोविज्ञानस्य गवेषणास्पदम्। तथापि प्रस्तुते सविकल्पप्रत्यक्षस्वरूपविषयके प्रश्ने किमपि वयं निर्देष्टुं कामयामहे। जर्मनदेशीयदार्शनिकशिरोमणिना इमैनुवलकाण्टमहोदयेनोक्तं यद्धि वस्तुनो[२] विशुद्धं पारमार्थिकं स्वरूपं दृष्टिपथं नायाति। यदस्ति प्रत्यक्षगोचरं तत्तु वस्तुव्यावहारिकं स्वरूपं किमुत वस्तुप्रातिभासिकं स्वरूपमिति।

१. तुलनार्थम्—Things-in-themselves.

२. द्रष्टव्यम्—Immanual kant, critique of pure reason

विज्ञानवादिनोऽसङ्गवसुबन्धुप्रभृतयो मन्यन्ते यद्धि बाह्यार्थसत्त्वं नैव विद्यते। या बाह्यवस्त्वाकार-प्रतीतिर्जायते सा सर्वा असत्यैव। तथा ह्युक्तं वसुबन्धुना विज्ञप्तिमात्रतासिद्धौ—

विज्ञप्तिमात्रमेवैतदसदर्थावभासनात्।
यथा तैमिरिकस्यासत्केशचन्द्रादिदर्शनम्'॥ इति[1]।

सौत्रान्तिकास्तु मन्यन्ते यद्धि बाह्यार्थाः सर्वे सत्याः, किन्तु क्षणिकास्ते भवन्ति। अत एव तेषां ज्ञानमनुमितिजन्यम्। वैभाषिकाश्च बाह्यान् पदार्थान् सत्यान् प्रत्यक्षगोचरान् क्षणभङ्गुराँश्च मन्यन्ते। शून्यवादिनश्च सर्वान् पदार्थान् निर्वाणतो बाह्यार्थपर्यन्तान् निःस्वभावान् स्वरूपरहितानेव मन्यन्ते। अतस्तेषां मतेऽपि यत्प्रत्यक्षगोचरं तत्सर्वं सांवृतिकं सत्यम्, न तु पारमार्थिकं सत्। नैयायिकवैशेषिका बाह्यार्थवादिनः। एवमेव सांख्य-योग-वेदान्तादिदर्शनानि। अद्वैतवेदान्तानुसारं बाह्यं जगत् सर्वमात्मविवर्तरूपम्, तन्मते प्रत्यक्षगोचराणां बाह्यार्थानां व्यावहारिकमेव सत्त्वं नामरूपात्मकप्रपञ्चरूपेण प्रत्यक्षगोचरम्। पारमार्थिकतत्त्वन्तु ब्रह्म आत्मस्वरूपमिति। अपि चाहुः—

देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः।
लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयात्॥ इति[2]।

अतो विषयावच्छिन्नमेव चैतन्यं प्रमात्रवच्छिन्नचैतन्येन वृत्त्यवच्छिन्नचैतन्यद्वारा विषयीक्रियते। चैतन्यमेवोपहितं प्रत्यक्षे भासते नेतरदिति तेषां तात्पर्यम्।

मनोविज्ञानन्तु मानसानुभवविश्लेषणपरत्वान्निर्धारयत्यस्मिन् विषये यद्धि सविकल्पके प्रत्यक्षे नहि केवलं वस्तुस्वरूपमेव भासते, प्रत्युत पूर्वसञ्चितवासनासंस्कारानुभावग्रन्थिपक्षपातादिसंवलितानुव्याख्यानपुरस्सरमेव वस्तुरूपं तत्र भासते। या काचित् कल्पना आलोचनं ज्ञानमनुव्याख्यातुं प्रवर्तते, साप्रि वस्तुरूपमनुगृह्यैव। अस्ति हि कल्पनायाः सविकल्पकप्रत्यक्षान्महदन्तरम्। सविकल्पके प्रत्यक्षे यः कल्पनांशो विद्यते, स त्वालोचनज्ञानं स्पष्टीकर्तुमेवारभते। कल्पनास्वरूपं वयमग्रेऽनुव्याख्यास्यामः। नहि नामजात्यादिव्यापारेण वस्तुस्वरूपनिर्मासं निराकर्तुं शक्यते, यथा दिङ्नागादयो विज्ञानवादिनो भारतीया बौद्धसम्प्रदायानुसारिणः, प्रतीच्याश्च वर्कलेमहोदयानुसारिणो मन्यन्ते। अस्ति हि बाह्यार्थश्चैतन्यव्यतिरिक्तः, यस्यालोचनं ज्ञानं चैतन्यव्यापारेण जन्यते। आलोचनज्ञानं परिष्कृतं भूत्वा, स्पष्टं भूत्वा, सविकल्पकप्रत्यक्षरूपमाधत्ते। नूनं तस्मिन् परिष्कारे सामाजिकशिक्षावश्यकतासुखदुःखाद्यनुभवसंस्कारसंवलितं सविकल्पकं प्रत्यक्षमाविर्भवति।

सविकल्पकप्रत्यक्षे कथमालोचनं ज्ञानं विकृतं कदाचन जायत इत्यधिकृत्य वयं ब्रूमः—रेलशकटे यात्रां कुर्वन्तो वयं रेलमार्गपार्श्वे स्थितान् वृक्षान् गृहादींश्च च परिभ्रमतः पश्चाद्गच्छतो वा पश्यामः। केन कारणेनेदं जायते? रेलशकटमेव धावति न तु वृक्षाः, तथापि विकृतमेव सविकल्पकं प्रत्यक्षं जायते। अपि च, वृत्तमङ्कितं पत्रं तिरश्चीनं परिवर्तितं यदा जायते, तदेदमण्डाकारं[3] प्रतीयते। प्रत्यक्षमपि तथैव जन्यते। ये वृत्ताकारं[4] तच्चित्रं जानन्ति, ते प्रत्यक्षमपि न विश्वसन्ति।

१. द्रष्टव्या—विज्ञप्तिमात्रतासिद्धिः, का० १
२. द्रष्टव्यम्—वे० सू० शां० भा० १।१।१ (अन्तिमः श्लोकः)
३. तुलनार्थम्—Ground.
४. तुलनार्थम्—Figure.

नहि सर्वदा चक्षुःसंनिधाने उपस्थितं वस्तु सविकल्पके यथातथमेव भासते, अपि तु द्रष्टुः पूर्वानुभवाकाङ्क्षापि तद्रूपं निर्धारयितुं प्रभवति ।


के च ते विशेषा यैर्निर्विकल्पकं ज्ञानं सर्वं सहकृतं भूत्वा सविकल्पकप्रत्यक्षरूपतामवाप्नोतीति वयमधुना विचारयामः ।

५. सविकल्पकप्रत्यक्षाङ्गभूतविशेषाः

(अ) पृष्ठभूमिराकृतिविशेषश्च

सविकल्पकप्रत्यक्षस्याङ्गद्वयं भवति--एकं पृष्ठभूमिरपरञ्चाकृतिविशेष इति । पृष्ठभूमिस्तु समानरूपेण वर्तते, यथा नीलमाकाशम् । तस्मिँश्च य आकारविशेषो दृष्टिगोचरो भवति, यथैकं वायुयानम्, तस्यैव प्रत्यक्षं जायते । नह्येतस्मादङ्गद्वयादृते प्रत्यक्षं जन्यते । केषाञ्चिन्मनोवैज्ञानिकानां मते पृष्ठभूम्यामाकृतिविशेषनिर्धारणमेव सविकल्पकं प्रत्यक्षमिति[1] । कस्मिन्नपि जनसमूहे वयं नहि सर्वान् पुरुषान् प्रति समाकृष्टा भवामोऽपि तु स्वकीयं प्रतिवेशिनं सम्बन्धिनं मित्रं वा प्रत्येव । तेन सहैव वयं रहसि वार्तालापं कर्तुमिच्छामः । जनकोलाहलेऽपि तस्यैव शब्दान् वयं शृणुमः । जनसमूहोऽत्र पृष्ठभूमिः । मित्रं प्रतिवेशी वात्राकृतिविशेषोऽवधारणीयः । जनकोलाहलः पृष्ठभूमिः, मित्रस्य मन्दोऽपि ध्वनिराकृतिविशेष इत्युन्नेयः । निम्नलिखितचित्रेणेदं स्फुटं भविष्यति ।

पृष्ठभूम्याकृतिविशेषनिर्देशकं चित्रम्



उपरि लिखिते चित्रे कृष्णवर्णो भागः पृष्ठभूमिः । तस्यामाकृतिविशेषः शुक्लवर्णः । इत्थमेवास्पष्टायाः पृष्ठभूमेरुपरि आकृतिविशेषः प्रत्यक्षगोचरो भवति । आकृतिविशेषस्येतरव्यावृत्ताभिव्यञ्जनानुसारमेव सविकल्पकं प्रत्यक्षं स्वरूपमाधत्त इत्यवसेयम् ।

१. तुलनार्थम्—Perception is nothing but the discrimination of figure against a ground.

(आ) संयोजनम्[1]

सविकल्पके प्रत्यक्षे हि वयं चैतन्यस्य संयोजनाभिव्यञ्जनं चरमं लभामहे। विविधालोचनज्ञानानां संयोजनं क्रियते। अस्ति हि कोऽपि नियमः संयोजनरूपनिर्धारणपरः? अत्रोच्यते—परिस्थितिशिक्षासंस्कारोत्थाकाङ्क्षातात्पर्यजन्यं हि खलु संयोजनं भवति। स्वतः पौर्वापर्यक्रमागतान्यपि ह्यालोचनज्ञानानि क्षण एव परस्परं सम्बद्धानि जायन्ते। ध्यानक्षेत्रविस्तारावसरेऽस्माभिरुक्तमेव यद्धि एकस्मिन्नेव क्षणे पञ्च वा षड् वा वस्तूनि दृष्टिगोचराणि भवन्ति। संयुक्ताः शब्दा यदि भवेयुस्तर्हि नव दश वाक्षराणि दृष्टिगोचराणि भवन्तीति। मनस आशुसञ्चारित्वाद् वयमेकं द्वे वा अक्षरे दृष्ट्वा झटिति समस्तं पदं शब्दं वा कल्पनया संयोज्य सम्पूर्ण एव शब्दो मया दृष्ट इति घोषयामः। दृश्यत एकस्यापि पदस्याक्षररचनाविशेषः प्रत्यक्षरं ध्यानमपेक्षते। एवमेव विकीर्णानि पृथग्घटितानि वा लोचनज्ञानान्यञ्जसैव सम्पूर्णवस्तुस्वरूपतामापद्यन्ते। अंशमात्रं यतो ह्यालोचनज्ञानगोचरं भवति, अत एव कदाचन तस्येतरांशेन सह सङ्घर्ष इतरेतराभिभवरूपोऽपि जायते। दृश्यते मुद्राणालयेषु प्रारूपशोधने स्खलितान्येवंविधानि कतिपयांशेनाहर्निशं भवन्तीति। चित्रपटे विकीर्णचित्राणां द्रुततमगत्या प्रसारणेन तेषां संयोजनमपूर्वमुत्पद्यते। नहि पुरुषा भ्रमन्ति चित्रपटे, नापि धावन्त्येव। किन्तु क्रमशः शीघ्रतातिरेकेण प्रसारितचित्रस्वरूपाणां तेषां गतिशीलत्वमपि भासते। बुद्धिप्रकर्षोपेतं संयोजनमप्यालोचनज्ञानेषु जायते।

(इ) मानसिकसँल्लग्नता


अयं तावत् सविकल्पकप्रत्यक्षस्य तृतीयो विशेषः। ध्यानप्रकरणे वयमवोचाम यद्धि मानसिकसँल्लग्नता ध्यानैकाग्रीकरणाय परमो हेतुः। नूनं यानि तु ध्यानकारणानि प्रागुक्तानि, तानि सर्वाण्येव प्रत्यक्षे सविकल्पके उपकारकाणि भवन्ति। स्वभावगुणदोषभावाभिमुखतारुच्यादिर्मानसिकसँल्लग्नतायाः प्रतीक एव। सर्वोत्तमपरीक्षाफलापादितायां प्रसन्नतायां नवयुवकः सर्वमुत्साहप्रदं मङलात्मकमेव जानाति साक्षादपरोक्षम्। प्रोषितपतिका वियुक्ता वा यदि खल्वन्यमनस्का काचन स्त्री भवेन्नहि तत्रास्ति प्रत्यक्षाभावे तस्या दोषः। अभीक्ष्णं परीक्षणैर्मनोवैज्ञानिकैः साधितं यद्धि किमपि साधारणं चित्रं दृष्ट्वा कतिपयपुरुषाणां तज्जन्यसविकल्पकप्रत्यक्षाणि विभिन्नान्येव भवन्ति, स्वस्वमानसिकभावसंस्काराकुलितत्वादिति। तेषु केचन कानिचिच्चित्राङ्गानि न वर्णयन्ति। अन्ये चित्रप्रत्यक्षेण सह किमप्यन्यद्वैशिष्ट्यं वर्णयन्ति, सकल्पनास्मृतिव्यापृतत्वात्। यं दृष्टिकोणमादाय ते प्रत्यक्षे प्रवर्तिता भवन्ति, येन च तेषां प्रायः प्रत्यक्षमनुरक्तं जायते, तेन मानसिकांशरूपेण तेषां मनोवैज्ञानिकैर्वर्गीकरणं कर्तुं शक्यते।

(ई) अनुमितिः

सविकल्पके प्रत्यक्षे सन्निविशते हि खल्वनुमितिरपि। एष तावच्चतुर्थो विशेषः। आलोचनं ज्ञानं त्वपेक्षाकृतमल्पमेव; किन्तु सविकल्पकं प्रत्यक्षं तदपेक्षया सुमहत् सम्पूर्णं साङ्गोपाङ्गं परस्परं समन्वितं ज्ञानम्। केन कारणेनाऽस्य सम्पूर्णत्वमुत्पद्यते? कुतो वेदं समन्वितं रूपं परिपूर्णमिव प्रतिभाति? नूनं सद्योजातानुमितिव्याप्तत्वादेव सविकल्पकं प्रत्यक्षमना-

1. तुलनार्थम्—Organisation.

लोचितमपि वस्तुस्वरूपविशेषं वर्णयितुमुपक्रमते। यानुमितिः सविकल्पकं प्रत्यक्षमनुप्रविशति, सा विचारविस्तारशून्या तात्कालिकी च भवति। अनुभवे प्रौढिंगते सामान्यमनुमितिज्ञानं विशदविचाराभावेऽपि स्वत एवालोचनं ज्ञानं परितः प्राय आवृत्य विशदीकरोति। नह्यनुमितिः सर्वदैव सविकल्पकप्रत्यक्षाङ्गभूतेति नियमः। दूराद्विज्ञापनं द्वारस्थं निर्देशविशेषं वा पठतामस्माकं प्रत्यक्षं ज्ञानं प्रायोऽनुमितिज्ञानमिश्रितं प्रतीयते। चक्षुरिन्द्रियतैक्ष्ण्यादिशक्तिपरीक्षणेषु यदि सार्थकसामग्रीस्थानं निरर्थकसामग्री प्रस्तुता भवेत्तर्हि प्रायोऽधिकतमाः पुरुषा असफला भवेयुः। प्राध्यापकवार्टलेटमहोदयेन केम्ब्रिजविश्वविद्यालयीयमनोवैज्ञानिकप्रवरेण स्वकीयप्रयोगैरनुमितिज्ञानस्य सविकल्पकप्रत्यक्षाङ्गभूतत्वं साधितम्। इत्थम्भूत एकः प्रयोगोऽत्र चित्रेण विस्तार्यते।



इदमनुमितेः सविकल्पकप्रत्यक्षाङ्गत्वसाधकं चित्रम्। काँश्चन पुरुषान् क्षणमिदं चित्रं प्रदर्श्य स पृष्टवान्—"द्वारस्थनिर्देशपट्टिकायां किं लिखितम्?" इति। एकेन पुरुषेण निम्नलिखितमुत्तरं प्रदत्तम्—"मया स्पष्टमिदं दृष्टमिति प्रतीयते, मूर्खतापूर्णमिदम्; यतोऽहं द्रष्टुं न शक्नोमि। तथापि पश्यामि, आदेशेन अधस्ताल्लिखितम्" इति। एकेनापरेण प्रदत्तमुत्तरमेवम्प्रकारकं द्वारपिधानेन आपादितमासीत्, "प्रवेशो निषिद्धः" इति। अपरेणैकेन "दूर्वाक्षेत्राद् बहिः स्थातव्यम्" इति। अनेन दर्शकेनान्तिमेन तत्कालमुक्तम्—"आश्चर्यम्! कथं मयेदमुक्तम्!" तत्रोल्लिखितम्—"आदेशोल्लङ्घनकर्त्तारो दण्ड्या भवितारः" इति। अतः प्रत्यक्षे सविकल्पेऽनुमितिरनुप्रविशतीति सिद्धम्।

(ड) परिवर्तनम्

सविकल्पकप्रत्यक्षस्य स्वरूपाङ्गभूतविशेषाः पञ्च व्याख्याताः। अत्रैकः परिस्थितिविशेषोऽपि निर्दिश्यते। परिवर्तनं हि परिस्थितौ भवत्याद्यं कारणं प्रत्यक्षस्य। यावन्न सामान्येऽनिर्दिष्टे वातावरणे किञ्चित् परिवर्तनं जायेत, तावन्न किमपि प्रत्यक्षं ज्ञानं सम्भवेत्। परिवर्तनेन हि खल्वनिर्दिष्टसर्वसामान्यपृष्ठभूमाववतरति विशिष्टाकारकः प्रत्यक्षोत्तेजको विषयः। नहि निर्विशेषायां पृष्ठभूमौ परिवर्तनमन्तरा क्वापि प्रत्यक्षस्य सम्भावना विद्यत इति। प्रत्यक्षं नाम परिस्थितिघटितस्य भेदस्य परिवर्तनस्य वा प्रतिक्रियारूपमिति। नहि प्रकृतेः साम्यावस्थायां प्रत्यक्षं नाम किमपि ज्ञानं जायते। एवमाह भगवान् मनुः। तथा हि—

आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः॥ इति[1]।

---

१. द्रष्टव्या—मनुस्मृतिः, अध्यायः १

अतः प्रत्यक्षज्ञानस्य मूलभूतं तत्त्वमिदं यद्धि परिस्थित्यां किञ्चित् परिवर्तनमाविर्भवेत्। अस्माकं शरीरस्य वितस्तिनवमांशपरिमितवर्गाकारभागे[1] सार्धसप्तसेटकमितो भारो[2] विद्यते भूमितले। निर्विशेषं सर्वसाधारणं हि खल्विदमत एवास्य प्रत्यक्षं न जायते। किन्तु यद्येकस्मिन्नेवास्माकं शरीरभागे वितस्तिनवमांशमिते परः सार्धसप्तसेटकमितो भारो वर्धेत, तर्हि तस्य प्रस्फुटमेव भारप्रत्यक्षमनुभूयतेऽस्माभिः। ननु किं प्रमाणं यद्धि वयं समानं भारज्ञानमवपीडनज्ञानं वा नानुभवामः? अस्मिन् विषये ज्ञातव्यमिदं यद्धि वायुयानचालका ये वायौ ३५,००० फिटाख्यमानोपरि ४०,००० फिटाख्यमानोपरि वा (एका वितस्तिः फिटाख्यमानस्य ३।४ भागो भवति) उत्पतन्ति, नहि तैस्तदा वायोर्भारोऽवपीडनं वानुभूयते, यद्यपि तदापि प्रतिवितस्तिनवमांशमिते शरीरभागे सार्धैकसेटकमितं वायोरवपीडनं वायुभारो वा वर्तते। वायुभारस्य तु सर्वत्र समानरूपेण विद्यमानत्वाद् निर्विशेषत्वाच्च तस्य प्रत्यक्षं ज्ञानं नोपलभ्यते। इत्थमेव तितीर्षवोऽपि समुद्रतले २५–३० सेटकमानं यावद्भारं वितस्तिनवमांशवर्गाकारशरीरभागे सामान्यतया वहन्तोऽपि नानुभवन्ति। कुतः? अविशेषत्वात् तस्य भारस्य। अतः किञ्चित् परिवर्तनं परिस्थितावावश्यकमेव प्रत्यक्षज्ञानजननायेति सिद्धं निष्प्रत्यूहम्। अन्यान्यपि यानि यानि कारणानि ध्यानोत्पादनक्षमाणि तानि सर्वाणि प्रत्यक्षज्ञानोपोद्बलकानीत्यवधार्यम्। ध्यानप्रकर्षे हि खलु सविकल्पकं ज्ञानं यथार्थं प्रमात्मकं भवति, नान्यथा।

६. प्रत्यक्षविषये समष्टिवादिनां मतम्[3]

सम्प्रति वयं समष्टिवादिनां जर्मनदेशीयवर्दीमरकौफ्काकौहलरप्रभृतीनां[4] मतं प्रत्यक्षं ज्ञानमधिकृत्य विवेचयामः। वर्दीमरमहोदया हि समष्टिवादाख्यमनोविज्ञानसम्प्रदायस्य प्रवर्तकाः। तेषां मते सविकल्पकं प्रत्यक्षमालोचनज्ञानमात्रं नास्ति, नापीदमालोचनज्ञानानां समूहमात्रमेव, अपि तु तदधिकमेवेदमस्तीति। अयं सम्प्रदायो जर्मनभाषायां 'गेस्टाल्ट' इति नाम्ना प्रथते। 'गेस्टाल्ट' इति शब्दस्य समीचीनोऽनुवादो कर्तुं न शक्यते। आङ्गलभाषायाम् 'आकारः', 'प्रतिकृतिः', 'विवर्त'[5] इत्यादिभिः शब्दैरस्यानुवादः क्रियते, नह्येषु कोऽपि सर्वथा विशुद्धोऽस्मान् प्रतिभाति। अस्माभिः 'समष्टिवाद' इति पदं तस्य भावार्थाभिव्यञ्जनार्थं प्रयुक्तम्। तदाशयश्चात्र विशदीक्रियते। नह्यस्य 'अवयविवाद' इत्यनुवादः कर्तव्यः, यतो हि नव्यन्यायदर्शनेऽवयविवादनामा सिद्धान्तः सुप्रथित एव गीर्वाणवाणीशेमुषीजुषाम्।

१९६७ वैक्रमाब्दे वर्दीमरमहाभागा अन्विष्टवन्तो यद्धयेकस्य चित्रस्य द्वे विवरे[6] यदा पृथक् पृथक् क्षणं तावत् प्रकाशेते, तदा गतिभानं जायते। प्रकाशो ह्येकस्माच्चित्रविवरादन्यद्

---

१. तुलनार्थम्—आर्यभाषायाम् इञ्चाख्यं मानम्
२. तुलनार्थम्—आङ्गलभाषान्तर्गतं १४ पोण्डमानम्
३. तुलनार्थम्—Gestalt view of Perception.
४. तुलनार्थम्—Max Wertheimer, koffka and kohler.
५. तुलनार्थम्— Form, Figure, pattern or configuretion.
६. तुलनार्थम्—Slits of a screen.

विवरमभिगच्छत् प्रतीयते, यद्यपि तदा कापि वस्तुभूता गतिर्नोत्पद्यते। अत्र स्मरणीयमिदं यद्धि चित्रपटेष्विमं भ्रमं जनयित्वैव चित्रस्थाकृतिविशेषचलनादिरूपगतिप्रत्यक्षमुत्पाद्यते, यद्यपि चित्रपटे किमपि न चलति। वयं तत्र शान्तानि गतिशून्यानि चित्राण्येव जडीभूतानि पश्यामः। तथापि चक्षुरिन्द्रियेण सविकल्पकप्रत्यक्षं गतिशीलचित्राङ्कितपात्रयुक्तं सम्पाद्यते।

अनेन प्रयोगेण प्रभाविता भूत्वा वर्दीमरमहोदयास्तेषां सहयोगिनौ च कौफकाकोहलर-महाभागौ समष्टिवादनामानं 'गेस्टाल्ट' इत्यभिधेयं सम्प्रदायं स्थापितवन्तः। अर्वाचीने मनो-विज्ञानेऽनेन सम्प्रदायेन महनीयः प्रभावः समादरश्च सम्प्राप्तः।

समष्टिवादानुसारं सविकल्पकं प्रत्यक्षमेका समष्टिर्भवति, यस्या विश्लेषणं न कर्तुं शक्यते। नहि तद्विश्लेषणं पृथक् पृथगवयवभूतालोचनज्ञानेषु कृत्वा वयं सविकल्पकप्रत्यक्षस्वरूपावबोधं कर्तुं शक्नुमः। सविकल्पप्रत्यक्षरूपा समष्टिस्तदवयवसमुच्चयादतिरिच्यते, उद्यानदृश्यमेकं नहि बहुवृक्षलतागुल्मजन्यदृश्यसमुच्चयमात्रम्, प्रत्युत तत्तु विलक्षणं सविकल्पज्ञानरूपम्। अस्य वैशिष्ट्यं नूनं नहि वाटिकास्थलतागुल्मादिषु कुत्राप्युपलभ्यते। बाढम्, सविकल्पकप्रत्यक्षसमष्ट्यावयव-भूतान्यङ्गानि दर्शनगोचराणि। वर्तन्ते च तदवयवेषु परस्परं सुनिश्चिताः सम्बन्धविशेषाः। यदि तेषु सम्बन्धविशेषेषु कापि विकृतिर्जायते, समष्टिरूपसविकल्पकज्ञानमपि नूनं परिवर्तितं भविष्यतीत्यनवद्यम्।


विविधालोचनज्ञानानां परस्परं सम्बन्धस्य प्रत्यक्षमपि सविकल्पकप्रत्यक्षाय महत्त्वपूर्णं भवतीति साधयितुं कोहलरमहोदयेनैकश्चातुर्य्यपूर्णः प्रयोगः कुक्कुटीषु सम्पादितः। अन्नकणाः शुभ्रे कर्बुरे च पत्रे स निक्षिप्तवान्। यदि हि कुक्कुट्यः कर्बुरवर्णपत्रादादातुमन्नकणान् प्रयतन्ते, तर्हि ता निर्बाधं खादितुमाज्ञप्ताः। किन्तु यदा ताः श्वेतपत्रात् खादितुमन्नकणान् प्रयतन्ते, तदा ता उपानत्प्रहारेण त्रासिताः। प्रयत्नशतानन्तरं ताः कर्बुरपत्रादेवान्नकणभक्षणं शिक्षन्ते स्म। तदनन्तरं कोहलरमहोदयः श्वेतपत्रस्थाने कृष्णवर्णपत्रं निक्षिप्तवान्। किन्तु खल्वधुनापि कुक्कुट्यः कर्बुरादेव पत्रात् खादयिष्यन्तीति गवेषणीयं जातम्। कर्बुरवर्णपत्रेण सह तु प्रतिनियता प्रतिक्रिया तासां सञ्जाता आसीत्। पूर्वस्मात् प्रयत्नात् ३-४ वारं प्रयत्नान् कृत्वा कुक्कुट्यः कृष्णवर्णपत्रादेव कर्बुरपत्रापेक्षया खादितुमारभन्ते स्म। अर्थात् कुक्कुट्यो वर्णान्तरापेक्षया कृष्णवर्णेन सम्बन्ध-विशेषरूपा प्रतिक्रिया प्रदेयेति शिक्षितवत्यः। नहि कुक्कुटीनां प्रतिक्रियाणां प्रतिनियतत्वमभिसम्बद्धत्वं वा कर्बुरवर्णमात्रेण सार्धमेव जातम्। अतः कुक्कुटीनां प्रत्यक्षे श्वेतकृष्णवर्णयोः सम्बन्धस्य प्रभाव एव दर्शनीयो महत्त्वपूर्णश्चासीदिति निर्गलितार्थः।

अन्यसम्बन्धविशेषेषु कौफकामहोदयः पृष्ठभूम्याकृतिविशेषानुबन्धं पौनःपुन्येन सविकल्पक-प्रत्यक्षेषु विद्यमानं निर्दिष्टवान्। पृष्ठभूम्याकृतिविशेषसम्बन्धस्तु व्याख्यातचरः। आकृतिविशेषो हि निर्विशेषसाधारणातिविस्तृतपृष्ठभूमौ प्रकटीभवति। सङ्गीते यथा सामरस्यतालवादनादिकं पृष्ठभूमिर्भवति, स्वरग्राममण्डलमूर्च्छनादयश्चाकृतिविशेषा बोद्धव्याः; यतो हि श्रावणप्रत्यक्षेण स्फुटीभवन्ति। कदाचनैवं भवति यद्ध्येकस्मिन् सविकल्पके या पृष्ठभूमिः सैवापरे सविकल्पके प्रत्यक्षे आकृतिविशेषो प्रत्यक्षगोचरो जायते। वयमेतत् पृष्ठभूम्याकृतिविशेषपरिवर्तनं निम्न-लिखितेन चित्रेण प्रदर्शयामः।



उपरिलिखिते चित्रे वृद्धबालकयोश्चित्रद्वयं प्रदर्शितमिति चित्रं परावृत्य द्रष्टव्यम् ।

समष्टिवादिभिर्मनोवैज्ञानिकैर्निर्णीत एकोऽयं नियमो यद्वयं ह्यपूर्णं त्रिभुजं वृत्तं वा सविकल्पके प्रत्यक्षे पूरयितुं यतामहे । यथा हि निम्नलिखिते चित्रे—



यद्यपि विकलाङ्गं त्रिभुजं वृत्तं चैकैकमपूर्णं विद्यते, तथापि द्वे अपि पूर्णे इव प्रतीयेते । अनवधानतया वयमपूरितान् भागान् पूरयित्वा सम्पूर्णमेव त्रिभुजं वृत्तं वा पश्यामः । एवमेव सङ्घटनं द्वित्रनिर्विकल्पकप्रत्यक्षाणां कृत्वैव वयं तेषां प्रत्यक्षं कुर्मः । इदं सङ्घटनमेव वर्णितपूर्वं संयोजनम् । वर्दीमरमहोदयेन साधितमिदं यद्धि संयोजनं सङ्घटनं वा निर्विकल्पकप्रत्यक्षाणां सामीप्यसाम्यवैषम्यसामरस्यादिगुणविशेषाननुगृह्य सम्पाद्यत इति ।

सुतरां समष्टिवादिनो मन्यन्ते यद्धि प्रत्येकमस्माकं सविकल्पकं प्रत्यक्षं निर्विकल्पकप्रत्यक्षाणां सङ्घटनरूपो विलक्षणः सम्बन्धसमुच्चयः । वैशिष्ट्यं हि खल्वस्यानुभवस्यैतरेष्वालोचनज्ञानेषु नोपलभ्यते । अवयवविशेषसमुच्चयाद्धि सविकल्पकप्रत्यक्षरूपा समष्टिरतिरिच्यते । समष्टिरूपप्रत्यक्षानुभवस्य रूपमपरिवर्त्य तदवयवभूताङ्गेषु प्रविभाजनं न कर्तुं शक्यत इति समष्टिवादिनामर्वाचीनमनोविज्ञाने प्रत्यक्षस्वरूपानुव्याख्यानपरं गौरवान्वितमनुसन्धानम् ।

७. प्रत्यक्षबाधकानि

ननु कैः कैः कारणविशेषैः प्रत्यक्षोपलब्धिर्न जायते ? अथवा, सतामप्यर्थानां कैः कैर्हेतुभिः प्रत्यक्षं न जायते ? इयमाशङ्का सांख्याचार्य्येणेश्वरकृष्णेन सांख्यकारिकायामित्थं समाहिता । सा यथा—

अतिदूरात्सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् ।
सौक्ष्म्याद् व्यवधानादभिभवात्समानाभिहाराच्च[1] ॥

सम्प्रति वयमिमां कारिकां प्रतिपदमनुव्याख्यास्यामः ।

(१) अतिदूरात्—दूरस्थानां देशान्तरस्थानां पदार्थानां प्रत्यक्षं न जायते । नहि काश्यां तिष्ठन्तो वयं लक्ष्मणपुरस्थसंग्रहालयस्थवस्तूनि द्रष्टुं शक्नुमः । अतः सतामपि पदार्थानामतिदूरत्वात् प्रत्यक्षं न जायते । दूरस्थपदार्थेभ्यः समागतप्रकाशतरङ्गजन्यप्रतिबिम्बग्रहणं दृष्टिवितानेन न सम्यक्तया सम्पाद्यते, अतिदूरत्वात् ।

(२) सामीप्यात्—अतिसन्निकृष्टपदार्थानामपि प्रत्यक्षं नैव जायते, यथा नेत्राञ्जनस्य । नहि दूरदृष्टिरोगेण पुरुषेण सन्निकृष्टस्य पदार्थस्य प्रत्यक्षं कर्तुं शक्यते । सामीप्यात् प्रतिबिम्बग्रहणं सुष्ठुतरं दृष्टिविताने न भवति । अत एव प्रत्यक्षमपि न जायते । प्रागुक्तरीत्या मध्यमकोट्युत्तेजको विषय एव प्रत्यक्षोत्पादनयोग्यो भवति । अतिदूरादुत्तेजकमान्द्यमुपजायते, सामीप्याच्चातितीव्रत्वात्तस्य सम्यग्ग्रहणं नोपपद्यते ।

(३) इन्द्रियाभिघातात्—यथा बधिरान्धयोः शब्दरूपाद्युपलब्धिर्न जायते । जन्मन आरभ्य योऽन्धो भवति, तस्य प्रायो दृष्टिनाडी विकृता दृश्यते । स्वस्थेन्द्रिय एव प्रमाणभूतं प्रत्यक्षं कर्तुं शक्नोति ।

(४) मनोऽनवस्थानात्—मनस्काराद्दते प्रत्यक्षं नोपपद्यत इति तु वर्णितपूर्वम् । अनवहिते मनसि इन्द्रियाण्यपि स्वविषयावगमे समर्थानि न भवन्तीति सर्वं ध्यानविवेचनीयाध्याये विस्तरेण व्याख्यातचरम् ।

(५) सौक्ष्म्यात्—अतिसूक्ष्माः पदार्था अपि प्रत्यक्षायोग्याः । तेषां प्रत्यक्षावबोधार्थमणुवीक्षणयन्त्रसाहाय्यमाश्रयणीयम् । यथा चातिदूरस्थग्रहादीनां निरीक्षणार्थं ज्यौतिषाचार्यैर्दूरवीक्षणयन्त्रादीनां साहाय्यं भृशमवाप्यते । तथापि चैतन्याद्यतिसूक्ष्मपदार्थानामिन्द्रियप्रत्यक्षं न भवति, अपि तु मानसप्रत्यक्षेणैव तेषां सत्त्वमवधार्यते । 'प्रोटान–इलैक्ट्रोन'प्रभृतिमूलभूततत्त्वानां चरमं रूपमपि प्रत्यक्षगोचरं न भवति, सौक्ष्म्यादिति । "धूमोष्मजलनीहारपरमाणवो गगनगता नोपलभ्यन्ते" इति गौडपादाचार्याः ।

(६) व्यवधानात्—यथा कुड्येन पिहितं वस्तु नोपलभ्यते ; एवमेव व्यवहिते सति वस्तुनः प्रत्यक्षं नावगम्यते ।

(७) अभिभवात्—यथा सूर्यतेजसाभिभूतानां ग्रहनक्षत्रतारकादीनां प्रत्यक्षं न कर्तुं शक्यते, तथैव १०० वैद्युतदीपप्रकाशान्विते कक्षे ४० वैद्युतदीपप्रकाशग्रहणं तदभिभवात् सम्यक्तया न प्रत्यक्षगोचरम् । मन्दतममेव प्रतिभातीत्यर्थः ।

(८) समानाभिहारात्—यथा मुद्गराशौ समानवर्णप्रकारादिर्मुद्गः क्षिप्तः, अथवा कुवलयामलकमध्ये तद्वर्णप्रकारादिके कुवलयामलके क्षिप्ते, कपोतानां मध्ये कपोतो

---

१. द्रष्टव्या—सांख्यकारिका, का० ७

वा समानवर्णो नोपलभ्यन्ते, समानद्रव्यमध्याहृतत्वादेवम्प्रकारेण समानाभिहारात् प्रत्यक्षं न जायते। उत्तेजकस्य तीव्रत्वमधिकृत्यास्माभिः प्रत्यक्षज्ञानजनक-निम्नतमसीमा पूर्वं व्याख्याता। निम्नतमसीमा 'आलोचनज्ञानदेहली' इति संज्ञयास्मिन् ग्रन्थे प्रथते। वैबरफैचनरमहोदयाभ्यां प्रतिपादिता नियमा अप्यस्मिन् विषये उल्लेखनीयाः।

एवम्प्रकारेण सतामप्यर्थानामष्टविधैः कारणैः प्रत्यक्षोपलब्धिर्न सम्भवति।

८. अद्वैतवेदान्ताभिमतं वृत्तिनिर्गमनम्

अद्वैतवेदान्तिनस्त्रिविधं चैतन्यमङ्गीकुर्वन्ति। तद्यथा—विषयचैतन्यम्, प्रमाणचैतन्यम्, प्रमातृचैतन्यञ्चेति। तत्र घटाद्यवच्छिन्नं चैतन्यं विषयचैतन्यम्, अन्तःकरणवृत्त्यवच्छिन्नं चैतन्यं प्रमाणचैतन्यम्, अन्तःकरणावच्छिन्नं चैतन्यं प्रमातृचैतन्यमिति।

तेषां मते प्रत्यक्षं वृत्तिनिर्गमनमपेक्षते। तदुक्तं धर्मराजाध्वरीन्द्रेण वेदान्तपरिभाषायाम्—"तत्र यथा तटाकोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान् प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति, तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारान्निर्गत्य घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते। स एव परिणामो वृत्तिरित्युच्यते[१]" इति। इदं वृत्त्यवच्छिन्नचैतन्यस्य विषयदेशगमनमनुमित्यादिस्थले न जायते। यतो हि वह्न्यादिश्चक्षुराद्यसन्निकृष्टो भवति। आचार्य्यप्रवरा अप्पयदीक्षिता अपि सिद्धान्तलेशसंग्रहे वृत्तिनिर्गमनावश्यकतां तत्स्वरूपञ्चैवं व्याचक्षते—"अत्रोक्तं विवरणे—ब्रह्मचैतन्यं सर्वोपादानतया सर्वतादात्म्यापन्नं सत् स्वरसंसृष्टं सर्वमवभासयति, न जीवचैतन्यम्। तस्याविद्योपाधिकतया सर्वगतत्वेऽप्यनुपादानत्वेनाऽसङ्गित्वात्। यथा सर्वगतं गोत्वसामान्यं स्वभावादश्वादिव्यक्तिसङ्गित्वाभावेऽपि सास्नावद्व्यक्तौ संसृज्यते, एवं विषयासङ्ग्यपि जीवः स्वभावादन्तःकरणे संसृज्यते। तथा च यदान्तःकरणस्य परिणामो वृत्तिरूपो नयनादिद्वारान्निर्गत्य विषयपर्यन्तं चक्षूरश्मिवद् झटिति दीर्घप्रभाकारेण परिणम्य विषयं व्याप्नोति, तदा तमुपारुह्य तं विषयं गोचरयति। केवलाग्न्यदाह्यस्यापि तृणादेरयःपिण्डसमारूढाग्निदाह्यत्ववत् केवलजीवचैतन्याप्रकाश्यस्यापि घटादेरन्तःकरणवृत्त्युपारूढस्य तत्प्रकाश्यत्वं युक्तम्" इति[२]।

वृत्तिनिर्गमनानन्तरं प्रत्यक्षज्ञानं कथं जायते? अस्य प्रश्नस्य समाधाने एतदुक्तं भवति—"तथा च—'अयं घटः' इत्यादिप्रत्यक्षस्थले घटादेस्तदाकारवृत्तेश्च बहिरेकत्र देशे समवधानात्, तदुभयावच्छिन्नं चैतन्यमेकमेव; विभाजकयोरप्यन्तःकरणवृत्तिघटादिविषययोरेकदेशस्थत्वेन भेदाजनकत्वात्। अत एव मठान्तर्वर्तिघटावच्छिन्नाकाशो न मठावच्छिन्नाकाशाद् भिद्यते।" इति।

अन्यच्च, "तथा च—'अयं घटः' इति प्रत्यक्षस्थले घटाकारवृत्तेर्घटसंयोगितया, घटावच्छिन्नचैतन्यस्य तद्वृत्त्यवच्छिन्नचैतन्यस्य चाभिन्नतया तत्र घटज्ञानस्य घटांशे प्रत्यक्षत्वम्।" इति।

१. द्रष्टव्या—वेदान्तपरिभाषा, पृ० १३, अड्यारसंस्करणम्।
२. द्रष्टव्यः—सिद्धान्तलेशसंग्रहः, प्रथमपरिच्छेदः, पृ० १४४ (का० सं०)

अद्वैतवेदान्तमते 'सर्वं खल्विदं ब्रह्म'। उपाधिभेदाद् घटपटादिप्रतीतिर्भेदपूर्विका जायते। सापि व्यावहारिकीं सत्तामुपादाय वर्तते। ननु किं प्रागुक्तार्वाचीनमनोविज्ञानानुसन्धानजातमभिमुखीकृत्य वृत्तेर्विषयदेशे बहिर्निर्गमनमुपपद्यते ? किं वैज्ञानिकपरिशोधानुमतमिदं वृत्तिनिर्गमनं भवति न वेति पृष्टव्यमस्माभिः साम्प्रतं वर्तते। ननु किमर्थं वृत्तिनिर्गमनमङ्गीक्रियते वेदान्तिभिः ? नूनं प्रमातृचैतन्यं वृत्तिद्वारा तत्संसृष्टविषयावच्छिन्नब्रह्मचैतन्याभेदाभिव्यक्तौ तु तं विषयं प्रकाशयति। एकोऽपरोऽपि विकल्पो विद्यते। तदुक्तं हि—"अथवा जीवः सर्वगतोऽप्यविद्यावृतत्वात् स्वयमप्यप्रकाशमानतया विषयाननवभासयन् विषयविशेषे वृत्त्युपरागादावरणतिरोधानेन तत्रैवाभिव्यक्तस्तमेव विषयं प्रकाशयति। एवं च चिदुपरागार्थत्वेन, विषयचैतन्याभेदाभिव्यक्त्यर्थत्वेन आवरणाभिभवार्थत्वेन वा वृत्तिनिर्गमनमपेक्ष्य तत्संसृष्टविषयमात्रावभासकत्वाद् जीवस्य किञ्चिज्ज्ञत्वमुपपद्यते" इति। एवम्प्रकारेण त्रिभिर्हेतुभिर्वृत्तिनिर्गमनमङ्गीक्रियते।

अर्वाचीनं मनोविज्ञानं 'सर्वं खल्विदं ब्रह्म' इति मतं स्वीकृत्य नैव विषयप्रपञ्चनं करोति। मनोविज्ञानस्य प्रतिपाद्यविषयस्तु चैतन्यव्यापाराध्ययनं तस्य कार्यकारणभावपुरस्सरा दैनिकसांसारिकव्यवहारेऽनुलक्षिता प्रतिक्रिया च। अत्र मनसां चैतन्यस्वरूपाणामनेकत्वं तु स्वीकार्यमेव। जडविषयं विना चैतन्यव्यापारप्रतिक्रियाया व्याख्यानं नोपपद्यते। अस्मन्मते वृत्तिनिर्गमनमिति विषयदेशं प्रति चैतन्यगमनमित्यस्मिन्नर्थे अंशत उपपन्नमपि सर्वांशतो नोपपद्यते। ध्यानं नाम चैतन्यस्य प्रधानतमो व्यापारः। नहि ध्यानमन्तरा कापि मनसो वृत्तिः। ध्यानप्रेरितानि हि संज्ञावाहिनाडीस्रोतांसि विषयाभिमुखानि जायन्ते। अस्मानिदं प्रतिभाति यद्धि ध्यानप्रेरितसंज्ञावाहिनाडीस्रोतसां विषयाभिमुखीभवनमेव वृत्तिनिर्गमनमिति युज्यते। न तु चैतन्यस्य जीवात्मरूपस्य बहिर्देशगमनमिति युज्यते, नापि नाडीस्रोतसामेव प्रतिक्रिया तत्तदिन्द्रियगोलकाद् बहिर्जायते। सन्ति हि बहुविधान्यनेकानि चोत्तेजकानि विषयभूतानि यानि बाह्यकर्णशष्कुलिं प्रविश्योत्तेजनाः पृथक् पृथग् जनयितुं प्रभवन्ति; किन्तु तेषु योग्येषूत्तेजकेष्वपि किमप्येकमेवोत्तेजकमालोचनं ज्ञानं जनयितुं शक्नोति, यतो हि तदभिमुखान्येव ध्यानाभिप्रेरितानि नाडीस्रोतांसि विशदीभवन्ति, नाडीस्रोतसां वैशद्येनाभिमुखीभावेन चैवालोचनज्ञानं जायते। सत्स्वपि बहुषूत्तेजकेषु योग्येषु दृष्टिविताने दृष्टिमण्डलस्य सङ्कोचविकाससहकृतक्रियया, यस्य तेजोरश्मीनां संव्यूहनं जायते, तस्यैव प्रतिबिम्बस्य समीचीनं ग्रहणं जायते। तदुच्यते चालोचनं ज्ञानम्। तच्चोत्तेजकप्रतिघातजन्यम्। इन्द्रियप्रतिघातरूपोत्तेजनयैवालोचनं ज्ञानमभिनिर्वर्तते। नहीन्द्रियप्रतिघातरूपोत्तेजना विषयदेशे किमु तेजोरश्मिप्रभवस्थाने जन्यतेऽपि त्विन्द्रियगोलके तत्सम्बद्धमस्तुलुङ्गीयसंज्ञायतनेषु च। यदि वैज्ञानिकमिदं क्लृप्तं तथ्यमालोचनज्ञानं मस्तुलुङ्गीयसंज्ञायतनोत्तेजनाजन्यमित्यादृतं भवेदञ्जसैव तर्हि विषयदेशं प्रति वृत्तिनिर्गमनस्य फल्गुत्वं स्फुटं भवेत्। परितः समागच्छन्ति ध्वनितरङ्गा अभिकर्णविवरम्। परितः समागच्छन्ति तेजोरश्मयो वैद्युतचुम्बकतरङ्गमयाः[1]। कस्य ग्रहणं जायत इति न मनोवृत्तिबहिर्देशनिर्गमनापेक्षम्; प्रत्युत ध्यानक्लृप्तनाडीस्रोतसां संज्ञादानक्षमाणामभिमुखीभवनायत्तं हि तद् भवति। प्रत्यक्षं नाम चैतन्यस्य सक्रियो व्यापारः, यस्मिन् रुच्यनुकूलपदार्थचयनं तदभिमुखीभवनञ्च नाडीस्रोतसां

१. तुलनार्थम्—Electro-magnetic waves.

प्राधान्येन सँल्लक्ष्यते। अतो वृत्तिगमनक्षेत्रं नाडीसंस्थानमेव भवति। नहि विषयदेशं प्रति मनोवृत्तीनां विनिर्गमनमर्वाचीनमनोविज्ञानानुसन्धानदृष्ट्या भौतिकविज्ञानदृष्ट्या वा युज्यते।

६. हेल्महोल्ट्ज़मतम्[1]

अस्माकमिदं विवेचनं जर्मनदेशीयवैज्ञानिकप्रवरहेल्महोल्ट्ज़मतानुव्याख्यानादृतेऽपूर्णमेव भविष्यतीति वयं मन्यामहे। एकोनविंशशताब्द्यां जर्मनदेशीयवैज्ञानिकानुसन्धानेषु भौतिकविज्ञानशारीरकविज्ञानमनोविज्ञानपारङ्गतानां हेल्महोल्ट्ज़महोदयानामनुसन्धानजातमग्रगण्यतमम्। श्रावणप्रत्यक्षं चाक्षुषप्रत्यक्षं चाधिकृत्य तेषां गवेषणाः सुप्रथिता एव विद्वद्वरेषु। त्रिंशद्वर्षायुः प्रागेव स शोधपूर्णनिबन्धान् प्रकाशयति स्म। चक्षुरिन्द्रियस्य सूक्ष्मान्तर्निरीक्षणस्य सौकर्य्येण सम्पादनार्थं स एकं 'चक्षुरन्तर्वीक्षणयन्त्रम्'[2] निर्मितवान्। अस्य यन्त्रस्य साहाय्येन दृष्टिवितानस्य साक्षादध्ययनं कर्तुं शक्यते। चक्षुरिन्द्रियस्य बाह्यस्थपेशीनामध्ययनेन स निर्णीतवान्—कथं हि दृष्टिमण्डलकेन्द्रीकरणं संव्यूहनञ्च विविधविषयाणां दूरत्वापेक्षया निष्पद्यत इति। केन्द्रीकरणं नाम[3] सन्निकृष्टपदार्थाद् दूरस्थवस्तु प्रति चक्षुरिन्द्रियाङ्गस्य दृष्टिमण्डलस्य वैशद्येन स्थिरीकरणम्। संव्यूहनं नाम दूरस्थपदार्थात् सन्निकृष्टपदार्थमभि चक्षुरिन्द्रियाङ्गस्य दृष्टिमण्डलस्य कोरोदरस्येषत्सङ्कोचेन स्थिरीकरणम्, येनाधिकतमतेजोरश्मय एकस्मिन् दृष्टिवितानस्थले प्राचुर्य्येण केन्द्रिता भवेयुरिति।

सुविख्यातेन हेल्महोल्ट्ज़मतेन विविधवर्णानामालोचनज्ञानं कथमभिनिर्वर्तत इत्यपि व्याख्यातुं शक्यते। पूर्वं व्याख्यातचरमप्येतत् सर्वम्। आङ्ग्लदेशीयभौतिकविज्ञानविशारदेन टामसयङ्गमहाभागेन[4] हेल्महोल्ट्ज़ानुसन्धानजातमवलम्ब्य पल्लवितं किल यंगहेल्महोल्ट्ज़मतम्, यदनुसारं त्रिविधसंज्ञावाहिनाडीकन्दाणुकानि दृष्टिनाड्यां दृष्टिवितानें चाङ्गीक्रियन्ते। तानि यथा—एकप्रकारकं नाडीकन्दाणुकं रक्तवर्णात्मकालोचनज्ञानग्राहि भवति, रश्मिरक्तवर्णप्रतिघातोत्तेजनाक्षमत्वात्तस्य। द्वितीयप्रकारकं नाडीकन्दाणुकं हरितवर्णसंज्ञावाहि भवति, रश्मिहरितवर्णप्रतिघातोत्तेजनाक्षमत्वात्तस्य। तृतीयप्रकारकं नाडीकन्दाणुकं हि नीलजाम्बववर्णं[5] गृह्णाति। वर्णश्च तेजोरश्मीनां तरङ्गदैर्घ्येण जायते। यस्तेजोरश्मिः गभीरहरितवर्णो भवति, स हरितवर्णोचितां संज्ञामेव जनयति। तद्ग्रहणमपि तद्वर्णोत्तेजनाग्राहिनाडीकन्दाणुकविशेषैर्व्याख्यातचरैर्जायते। पीतवर्णेन मृदुमात्रया द्विविधान्येव नाडीकन्दाणुकानि रक्तवर्णोचितोत्तेजनाक्षमाणि नीलवर्णोत्तेजनाग्रहणक्षमाणि च उत्तेजितानि भवन्ति। श्वेतवर्णेन सर्वविधरश्मिमिश्रणजन्येन त्रिविधान्येव नाडीकन्दाणुकान्युत्तेजितानि जायन्ते। वर्णान्धत्वकारणं हि रक्तहरितवर्णोचितसंज्ञाग्राहिनाडीकन्दाणुकानामेकविधानां द्विविधानामन्यतमानां वाभाव एव दृष्टिवितानें भवति। वैज्ञानिकचूडामणेः श्रीहेमहोल्ट्ज़महोदयस्य मौलिकानुसन्धानसंग्रहः "शारीरिक-

---

१. तुलनार्थम्—Helmholtz, Herman.

२. तुलनार्थम्—Ophthalmoscope.

३. तुलनार्थम्—Accommodation.

४. तुलनार्थम्—Thomas young.

५. तुलनार्थम्—Blue-violet.

विज्ञानीयं चाक्षुषविज्ञानम्[1]" इतिसंज्ञकः १९१८ वैक्रमाब्दे जर्मनभाषायां सर्वप्रथमं प्रकाशितो जातः।

सङ्गीतेऽपि वीणायाः स्वरोत्पादनविधिमधीत्य तेन महाशयेन निर्णीतं यद्धि कथं ध्वनितरङ्गकम्पनैः स्वरभेदा जायन्ते। व्याख्यातमिदं तेनैव प्रथमं यत् कथं विविधवादनयन्त्रेषु वीणातन्त्रीवायलिनाख्यादिषु यन्त्रभेदोपोद्बलिता एकस्यैव स्वरस्योपभेदा ध्वनिभेदा वा जायन्ते। तस्यानुसन्धानानामस्मिन् विषये प्रौढं विवेचनं ग्रन्थादेवावगन्तव्यम्।[2] स्थानाभावाद् वयमत्र विरमामहे।

१०. हेमहोल्ट्ज़वुडवर्थमहोदययोर्मतभेदः

हेल्महोल्ट्ज़महोदयानुसारं देशदूरत्वप्रत्यक्षं दृष्टिमणेः संव्यूहनकेन्द्रीकरणायत्तं भवतीति व्याख्यातपूर्वम्। अर्थाद् दूरत्वादिप्रत्यक्षे केवलं शारीरिकावयवानामेव क्रियया तज्ज्ञानमुत्पद्यते। वुडवर्थमहोदया नैतन्मतमनुमोदन्ते। तन्मते 'स्टीरयोस्कोप'[3] इत्यभिधादर्शद्वययुक्तयन्त्र-साहाय्येनावधार्य्यते यद्धि शारीरिकावयवक्रियाव्यतिरिक्तं मनोव्यापाररूपमप्रत्याशितपूर्वम्। तच्च चक्षुषोर्व्यापारजन्यं स्थूलवस्तुनस्त्रिपार्श्वतोऽध्ययनमिति[4]।

११. द्वयादर्शकयन्त्रेण 'स्टीरयोस्कोप' इति संज्ञकेन प्रयोगः

ननु द्वयादर्शकयन्त्राध्ययनेन किमायातम्? अथवा किं चक्षुषोः प्रत्येकं समानं वस्तु-प्रतिबिम्बं गृह्णाति? आङ्गलदेशीयभौतिकविज्ञानविशारदेन ह्वैट्स्टोनमहाशयेन १८९५ वैक्रमाब्दे द्वयादर्शकयन्त्रमाविष्कृत्येदं निर्णीतं यद्धीषद्विशिष्टमेव प्रतिबिम्बं प्रत्येकेन चक्षुषा गृह्यते। प्रागपि स्यौनार्डविन्सिप्रभृतिभिर्विद्वद्भिः प्रमाणीकृतमिदं यच्चक्षुर्द्वयजन्यं सन्निकृष्टवस्तुनः पृष्ठभागप्रत्यक्ष-ज्ञानमपि सम्भाव्यमिति। आदर्शद्वयं प्रयुज्य 'स्टीरयोस्कोप' नाम्नि यन्त्रे ह्वैट्स्टोनमहाशयः प्रमाणी-चकार यदेकस्मिन् चक्षुषीतरापेक्षया किञ्चिद् भिन्नं प्रतिबिम्बं जायते। द्वयोरेव चक्षुषोः प्रतिबिम्बयोः सम्मेलनेन गाम्भीर्यस्य सुस्पष्टमालोचनं जायते। यदि चापरथ, समानचित्रद्वय-सम्मेलनं भवेन्नहि तेन तादृशगाम्भीर्यस्यालोचनं ज्ञानं जायत इति। इमं निष्कर्षं प्रमाणी-कृत्यैवोपर्युक्तं वुडवर्थमहोदयानां मानसिकक्रियाकलापोपेतत्वं दूरत्वप्रत्यक्षस्य स्फुटं जायते।

स्मरणीयमत्र यद्धि हेल्महोल्ट्ज़महोदयो दूरत्वाद्यध्ययनविषये निर्णीतवान् यत्परस्परं सन्निकृष्टपदार्थयोर्दूरस्थयोर्यः पदार्थः सन्निकृष्टतरो भवति, स इतरस्य व्यवधानं करोति। किञ्च वयं स्थगनापेक्षया शिरश्चालनेन पश्चादग्रे च चलनेन दूरत्वप्रत्यक्षं सम्यक्तया कर्तुं शक्नुम इति।

१२. भ्रमस्वरूपम्

अथातो वयं भ्रमस्वरूपमनुव्याख्यास्यामः। प्रत्यक्षस्वरूप साङ्गोपाङ्गं व्याख्यात-चरम्। स्थाने खल्विदं यद्वयं भ्रमविभ्रमादिमिथ्याज्ञानप्रकाराणामपि विवेचनमत्र कुर्मः।

१. तुलनार्थम्—Physiological OPtics (1861 A. D.)

२. तुलनार्थम्—On the sensations of tone.

३. तुलनार्थम्—Stereoscop.

४. तुलनार्थम्—Three-dimensional effect produced by two-eye-vision.

भारतीयदर्शनसाहित्येऽर्वाचीने च मनोविज्ञानसाहित्ये भ्रमादिमिथ्याज्ञानस्य यादृशं प्रौढविवेचनं संवृत्तम्, तस्य निखिलस्य समालोचनात्मकविवेचनायैकोऽपरोऽप्येतादृशो ग्रन्थो नालम्। अतो वयं संक्षेपेणैव तस्य सर्वस्यारुन्धतीन्यायेन स्थालीपुलाकन्यायेन वा विवेचनं करिष्यामः। भ्रममधिकृत्य भारतीयदार्शनिकानां निम्नलिखितानि मतानि भवन्ति। तानि यथा—

१. विज्ञानवादिनामात्मख्यातिवादः।

२. सांख्यानां सत्ख्यातिवादः, प्रसिद्धार्थख्यातिवादो वा।

३. प्राभाकराणामख्यातिवादः।

४. नैय्यायिकानामन्यथाख्यातिवादः।

५. भाट्टानां विपरीतख्यातिवादः।

६. शून्यवादिनां शून्यख्यातिवादः।

७. अद्वैतवादिनामनिर्वचनीयख्यातिवादः।

एतेषां मतानां विस्तरतोऽध्ययनमस्माभिरद्वैतप्रमाणमीमांसायां समाश्रितम्। अत्र तु केवलं निर्देशमात्रमेवाश्रीयते।

१३. आत्मख्यातिवादः

विज्ञानवादिनो बौद्धमतावलम्बिन आत्मख्यातिमङ्गीकुर्वन्ति। तेषां मते बाह्यार्थप्रतीतिर्मिथ्या। केवलं विज्ञप्तिमात्रमेव चरमं तत्त्वम्। भ्रान्त्या ग्राह्यग्राहकभेदा उपलभ्यन्ते। वस्तुतो विज्ञाने केवलं ग्राह्यग्राहकस्य भेदावकाशो न विद्यते। तदुक्तं विज्ञप्तिमात्रतासिद्धिनामके ग्रन्थे आचार्य्यवसुबन्धुना—

अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥[1] इति।

'इदं रजतम्' इति स्थले आत्मख्यातिवादिनो 'रजतम्' इति ज्ञानं सत्यत्वेनाङ्गीकुर्वन्ति। 'इदम्' इति ज्ञानन्तु मिथ्या, असत्त्वात्।

१४. सत्ख्यातिवादः

अयं वादः सांख्याचार्याणां सत्कार्यवादिनां भवति। यदस्ति तदेवानुभूयते प्रतीयते वा। यन्नास्ति, यस्य सत्तैव नास्ति, कथं तस्य प्रत्यक्षं नाम! अतः सत एव वस्तुनः प्रत्यक्षं जायते, न तु सर्वथालीकस्यासतो वा वस्तुनः। अतो युज्यते सत्कार्यवादाभिमता सत्ख्यातिः। कथं तर्हि भ्रम उत्पद्यते? अविवेकात्। अपूर्णे ज्ञाने सति समीचीनं प्रत्यक्षं नोत्पद्यते। अत एव दृश्यते यदि भ्रमबाधे नाधीयते किमपि नवीनवस्तुज्ञानम्, अपि तु पूर्वमेव सद्वस्तुनो ज्ञानमविविक्तं विविच्यते, सम्यक्तयोद्घाट्यते[2]। अर्वाचीनाः साङ्ख्याचार्याः सदसत्ख्यातिव्यपदेशेन प्रसिद्धार्थख्यातिसंज्ञया वास्य व्याख्यानं कुर्वन्ति।

१५. अख्यातिवादः

अयं वाद आचार्यप्रभाकरस्य तदनुयायिनाञ्च प्रथते। सत्यं रजतज्ञाने स्मरण-

---

१. द्रष्टव्या—विज्ञप्तिमात्रतासिद्धिः

२. द्रष्टव्यम्—योगसू० २।२६; योगसूत्र-भोजवृत्तिः ४।३३

रूपम्, सत्यञ्चास्ति इदमाकारकं प्रत्यक्षज्ञानम्। केवलं तयोर्भेदाग्रहनिबन्धनैव 'इदं रजतम्' इति भ्रान्तिः। तदुक्तं प्रकरणपञ्चिकायाम्[१]—

नन्वत्र रजताभासः कथमेष घटिष्यते।
उच्यते शुक्तिशकलं गृहीतं भेदवर्जितम्॥
शुक्तिकाया विशेषा ये रजताद् भेदहेतवः।
ते न ज्ञाता अभिभवाज्ज्ञाता सामान्यरूपता॥
अनन्तरं च रजतस्मृतिर्जाता तथापि च।
मनोदोषात्तदित्यंशपरामर्शविवर्जितम्॥
रजतं विषयीकृत्य न तु शुक्तेर्विवेचितम्।
स्मृत्यातो 'रजताभास उपपन्नो भविष्यति॥ इति।

अपि च—

न ह्यसंनिहितं तावत्प्रत्यक्षं रजतं भवेत्।
लिङ्गाद्यभावाच्चान्यस्य प्रमाणस्य न गोचरः।
परिशेषात् स्मृतिरिति निश्चयो जायते पुनः॥[२] इति।

अत एवेदं रजतमिति ग्रहणस्मरणाभिधस्य बोधद्वयस्य व्यवहारकारणत्वाङ्गीकारात् शुक्तिकायां रजतार्थिनः प्रवृत्तिर्लक्ष्यते। स्मर्यमाणं तावद्रजतम्। स्मृतिसम्प्रमोषादासादित एवोपलभ्यमानेदम्पदार्थस्मर्यमाणरजतपदार्थयोः पारस्परिको भेदाग्रहः। ज्ञानयोर्विषययोश्च विवेकाग्रहाद् भ्रमः। विषयापेक्षातो रजतज्ञानं इदन्ताज्ञानञ्चेति द्वयमेव यथार्थम्। तदुक्तं हि प्रकरणपञ्चिकायाम्—"रजतमिदमिति नैकं ज्ञानम्, किन्तु द्वे एते विज्ञाने। तत्र रजतमिति स्मरणम्, तस्यानुभवरूपत्वान्न प्रामाण्यप्रसङ्गः। इदमिति विज्ञानमनुभवरूपं प्रामाण्यमिष्यत एव। भ्रान्तिरूपता चात्र रजतज्ञानस्य स्मरणरूपस्यैव ग्रहणव्यवहारप्रवर्तकतया व्यवहारकाले विसंवादकत्वात्" इति[३]। सोऽयमख्यातिवादः विवेकाग्रहख्यातिव्यपदेशेनापि प्रथते।[४]

१६. अन्यथाख्यातिवादः

अयं वादो नैय्यायिकानामभिमतः। अन्यस्य शुक्तिशकलस्यान्यस्येवावभास आपणस्थस्य रजतस्यावभासोऽन्यथाख्यातिरिति। तदुक्तं हि "सर्वं ज्ञानं धर्मिण्यभ्रान्तम्, प्रकारे तु विपर्ययः" इति[५]। नूनं प्रतीयमानस्य रजतस्य देशान्तरसत्त्वं सम्भाव्यम्। अन्यथा तस्य प्रतिषेधप्रतियोगित्वानुपपत्तिर्भविष्यति। नहि कश्चित्प्रेक्षावान् गगनकुसुमं वन्ध्यापुत्रं शशविषाणं वा प्रतिषेद्धुं प्रभवति। उदनाचार्य्योऽप्येवं व्याचष्टे। तथा हि—

---

१. द्रष्टव्या—प्रकरणपञ्चिका, ४।२६-२९, श्लोकाः
२. द्रष्टव्या—प्रकरणपञ्चिका, ४।३१-३२, श्लोकाः
३. द्रष्टव्या—प्रकरणपञ्चिका, पृ० ४३
४. द्रष्टव्यः—नयविवेकः, पृ० ८६-९२
५. द्रष्टव्या—सप्तपदार्थी, पृ० २५ (विजयनगरसंस्कृतग्रन्थमालासंस्करणम्)

व्यावर्त्याभाववत्त्वैव भाविकी हि विशेष्यता ।
अभावविरहात्मत्वं वस्तुनः प्रतियोगिता ॥ इति[१] ॥

प्राभाकरमतं निराकुर्वाणैः जयन्तभट्टैरप्येवमुक्तम्—"रजतस्य ज्ञानमनुभूयमानतया 'इदं रजतम्' इति भ्रमस्थले प्रकाशते, न त्वनुभूततया; येन तस्य स्मरणापत्तिः सम्भवेत् ।" तदुक्तं हि तेन न्यायमञ्जर्याम्—"अनुभूततया हि न रजतमत्र प्रकाशते, किन्त्वनुभूयमानतया" इति[२] । भ्रमस्तु व्यभिचारि ज्ञानमिति, प्रत्यक्षञ्च तस्माद् विलक्षणमिति 'अव्यभिचारि' पदस्य सूत्रोक्तस्यानुव्याख्यानं कुर्वता भाष्यकारेणोक्तम्—"ग्रीष्मे मरीचयो भौमेनोष्मणा संसृष्टाः स्पन्दमाना दूरस्थस्य चक्षुषः सन्निकृष्यन्ते । तत्रेन्द्रियार्थसन्निकर्षादुदकमिति ज्ञानमुत्पद्यते । तच्च प्रत्यक्षं प्रसज्यत इत्यत आह–अव्यभिचारि" इति । वार्त्तिककारेणास्य टीकायामन्यथाख्यातिस्वरूपं सम्यक्तया विवेचितम्[३] । तच्च सर्वं तस्मादाकरादेवावगन्तव्यम् ।

१७. विपरीतख्यातिवादः

अयं वादो भाट्टानाम् । अस्ति ह्यस्य नैयायिकमतेन सह महत्साद्दृश्यम् । अकार्यस्य कार्यतया भानमेव विपरीतख्यातिर्भाट्टानाम् । शुक्तिविषयकं ज्ञानं शुक्तित्वप्रकारकं भवति । रजतविषयकं ज्ञानञ्च रजतत्वप्रकारकं भवति । 'इदं रजतम्' इति भ्रमस्थलेऽन्यस्मिन् विषये शुक्तिकाशकलेऽन्यप्रकारकं ज्ञानमुत्पद्यत इत्यन्यथाख्यातिरेव विपरीतख्यातिर्नाम । अस्ति हि भाट्टमतस्यैको विशेषः । नहि भाट्टा भ्रमप्रत्यक्षमलौकिकसन्निकर्षजन्यमित्यभ्युपगच्छन्ति । तन्मते नहि शुक्तिरजतत्वसंसर्गोऽसन् भवतीति । मुरारिमिश्रा अपि विपरीतख्यातिमेवाङ्गीकुर्वन्ति[४] । स्मरणीयमत्र यद्द्वयसंसर्गाग्रहरूपो गुरूणामख्यातिवादः । संसर्गाग्रहरूपश्च विपरीतख्यातिवादः कुमारिलभट्टमुरारिमिश्राणामिति ।

१८. शून्यख्यातिवादः

वादोऽयं शून्यवादिनां माध्यमिकानाम् । तेषां मते रजतादिभ्रमालम्बनमसदिति प्राचीनाचार्य्याभिमतानुसारं व्याख्यानमस्माभिः कुत्रापि नागार्जुनाचार्य्यस्य मूलमाध्यमिककारिकायां चन्द्रकीर्तिरचितप्रसन्नपदाख्यतट्टीकायां वा शून्यख्यातिस्फोरणमेवंविधं नोपलब्धम् । निःस्वभावतावादिनां माध्यमिकानां शून्यताख्यातिरन्यथैव व्याख्येयेति वयं मन्यामहे । शून्यं नाम नैःस्वाभाव्यं माध्यमिकानां नागार्जुनप्रभृतीनाम्, न तु वस्तुमात्रशून्यत्वमसत्त्वं वेति । तदुक्तं हि मूलमाध्यमिककारिकायाम्—

शून्यमिति न वक्तव्यमशून्यमिति नो भवेत् ।
उभयं नोभयञ्चेति प्रज्ञप्त्यर्थं तु कथ्यते ॥ इति[५] ।

---

१. द्रष्टव्या—न्यायकुसुमाञ्जलिः ३।२
२. द्रष्टव्या—न्यायमञ्जरी, पृ० १८०
३. द्रष्टव्या—न्यायसूत्रभाष्यवार्त्तिकतात्पर्यटीका १।१।४
४. द्रष्टव्यम्—श्लोकवार्त्तिकम्, पृ० २४५, श्लो० ११७
५. द्रष्टव्या—मूलमाध्यमिककारिका, २२।११

अन्यच्च—

"येषां तु शून्यतादृष्टिस्तानसाध्यान् बभाषिरे।" इति[१]।

शून्यतादृष्टिरत्र वस्तुमात्राराहित्यवादोऽवगन्तव्यः। तस्या दृष्टेरपि सर्वग्राहनिषेधमात्रार्थं परिहाणमेवेष्टं शून्यवादिनाम्।

अपि चोक्तं चन्द्रकीर्तिना—

"न कर्मकर्तृफलादिकं नास्तीति वयं ब्रूमः। किन्तर्हि? निःस्वभावमेतदिति व्यवस्थापयामः" इति[२]।

अतो भ्रमपक्षेऽपि शून्यवादिनां निःस्वभावताख्यातिरेव शून्यताख्यातिः सांवृतिकत्वादित्यवगन्तव्यम्। सर्वतन्त्रस्वतन्त्राचार्य्यवाचस्पतिप्रभृत्यास्तिकदार्शनिकानामेतद्रूपं शून्यवादिमतोपस्थापनं तदानीन्तनबौद्धग्रन्थप्रचाराभावजन्यमेवेत्यस्मान् प्रतिभातीति।

१६. अनिर्वचनीयख्यातिः

अयं भ्रमस्वरूपपक्षोऽद्वैतवादिनामित्यवसेयम्। विशिष्टाद्वैतवादिनां रामानुजाचार्य्याणामप्रसिद्धार्थख्यातिरूपं मतं साङ्ख्याचार्य्यैरुद्घोषितसत्ख्यात्यभिन्नमेवेत्यन्यत्रास्माभिः स्फोरितं वैशद्येन। अद्वैतवादिनो भ्रमपक्षे रजतस्य प्रातिभासिकसत्तामङ्गीकुर्वन्ति। ननु शुक्तौ कथमनिर्वचनीयस्य रजतस्य भानं जायते? अस्य प्रश्नस्य समाधानं वेदान्तिन एवम्प्रकारेण कुर्वन्ति। तथा ह्युक्तं वेदान्तपरिभाषायाम्—"नहि लोकसिद्धसामग्री प्रातिभासिकरजतोत्पादिका, किन्तु विलक्षणैव। तथा हि काचादिदोषदूषितलोचनस्य पुरोवर्तिद्रव्यसंयोगादिदमाकारा चाकचिक्याकारा च काचिदन्तःकरणवृत्तिरुदेति। तस्याञ्च वृत्ताविदमंशावच्छिन्नं चैतन्यं प्रतिबिम्बते। तत्र पूर्वोक्तरीत्या वृत्तेर्बहिर्निर्गमनेनेदमंशावच्छिन्नचैतन्यं वृत्त्यवच्छिन्नचैतन्यं प्रमातृचैतन्यं चाभिन्नं भवति। ततश्च प्रमातृचैतन्याभिन्नविषयचैतन्यनिष्ठा शुक्तित्वप्रकारिकाऽविद्या चाकचिक्यादिसादृश्यसन्दर्शनसमुद्बोधितरजतसंस्कारसध्रीचीना काचादिदोषसमवहिता रजतरूपार्थाकारेण रजतज्ञानाभासाकारेण च परिणमते।" इति[३]। इदं प्रातिभासिकं रजतमविद्यापेक्षया परिणामोऽभिधीयते, चैतन्यापेक्षया च विवर्त इति कथ्यते। किं तर्हि विवर्तो नाम? तदुच्यते—उपादानसमसत्ताककार्योपत्तिः परिणामः। उपादानविषयसत्ताककार्य्यापत्तिर्विवर्त इति। अथवा—

सतत्त्वतोऽन्यथा प्रथा विकार इत्युदीरितः।
अतत्त्वतोऽन्यथा प्रथा विवर्त इत्युदीरितः॥[४] इति।

सच्चेन्न बाधेत। असच्चेन्न प्रतीयेत। अत उभयविलक्षणैव शुक्तौ रजतभ्रान्तिः, रज्जौ वा सर्पप्रतीतिः। अत एव प्रातिभासिका एते रजतसर्पादिपदार्था अनिवर्चनीया इति निगद्यन्ते। तत्रभगवतां श्रीमच्छङ्कराचार्य्याणां प्रसन्नगम्भीरं शारीरकभाष्यं भ्रमस्वरूपणेनैवारभ्यत इत्येतस्मादेव भ्रमस्य दार्शनिकतत्त्वनिरूपणे चरमं महत्त्वमस्तीत्यवसेयम्।

१. द्रष्टव्या—मूलमाध्यमिककारिका, २४।२४
२. द्रष्टव्या—प्रसन्नपदा, पृ० ३२६
३. द्रष्टव्या—वेदान्तपरिभाषा, पृ० ३६-३७।
४. द्रष्टव्यः—वेदान्तसारः, पृ० ८० मुम्बईसंस्करणम्।

२०. भ्रमस्वरूपविषये निर्गलितं मतम्


भ्रमस्य यद्रूपं निष्पन्नं तत्त्विदमेव यत् 'परत्र पूर्वदृष्टावभासः।' परत्र शुक्तौ पूर्वदृष्टस्य रजतस्यावभास एव भ्रम इत्यभिधीयते। "अध्यासो नाम अतस्मिंस्तद्बुद्धिः" इति[1]। भ्रमे हि सत्यानृते मिथुनीकृते उपलभ्येते। अर्वाचीनमनोविज्ञानाभिमतमेवेदं व्याख्यानम्। प्रागुक्तरीत्या प्रत्यक्षे न केवलमालोचनं ज्ञानमेव विद्यते, अपि तु केचन विशेषा अपि सक्रिया उपलभ्यन्ते; यथा—पृष्ठभूम्याकृतिविशेषः, संयोजनं सङ्घट्टनं वा, मानसिकसँल्लग्नता, अनुमितिश्च; येषां विवेचनं व्याख्यातचरम्। एतेषु विशेषेषु यदा कश्चन प्रत्यक्षजनकसामग्रीविशेषो विकृतो जायते, तदा भ्रमो जन्यते। प्रत्यक्षजनकसामग्रीविशेषोपोद्बलिता एव विविधा भ्रमभेदा जायन्ते।

प्राचीनसंस्कृतदर्शनवाङ्मये भ्रमविभ्रमयोः किमपि भेदजनकं लक्षणं नोपलभ्यते। किन्त्वस्मिन् ग्रन्थेऽर्वाचीने च मनोविज्ञाने नहि तावनर्थान्तरौ। भ्रमे[2] हि प्रत्यक्षगोचरं वस्तु यथापूर्वं विद्यते, किन्तु तज्जनितालोचनज्ञानमेव दुष्टं भवति, यथा—शुक्तौ रजताभासो भ्रमः। अस्ति हि शुक्तिश्चाकचिक्यादिलक्षणा प्रत्यक्षगोचरा; तस्या आलोचनं नूनं जायते; किन्तु तस्यानुव्याख्यानं तत्तद्विशेषविकृतिसमुपेतं दुष्टं भवति। अत्र रजतार्थिनो मानसिकभावप्रवणता सँल्लग्नता वा तां शुक्तिं वस्तुभूतामपि रजतमिवानुव्याख्यातां करोति। 'कामी स्वतां पश्यति' इति न्यायानुसारं रजतार्थी शुक्तौ रजतमेव पश्यति, नेतरत्। एवमेव पिपासुर्मृगो जलं मार्गयमाणो मरुमरीचिषु जलप्रत्यक्षमनुभवति। नहि तत् प्रत्यक्षम्, अपि तु भ्रम एव। प्रागुक्तान्यथाख्यातिविपरीतख्यातिवादादिषु प्रत्यक्षानुभवविशेषा प्राग्वर्णिता नैव विविच्यन्ते। अत एव मानसिकसँल्लग्नताद्यासादिता एव रजतसर्पजलादिभ्रमाः शुक्तिरज्जुमरुमरीच्यादिषु जायन्ते।

नहि विभ्रमे[3] प्रत्यक्षगोचरं वस्तु वर्तमानं विद्यते। यथा अधिष्ठानं विना (रज्जुं विना) भ्रमस्य (सर्पभ्रमस्य) उत्पत्तिर्न जायते, तथा नास्त्यपेक्षा सद्वस्तुभूतस्याधिष्ठानस्य विभ्रमे। वयमग्रे भ्रमस्य विभ्रमस्य च स्वरूपं कैश्चिदुदाहारणैरनुव्याख्यास्यामः।

२१. म्यूलरलायरस्य भ्रमोदाहरणम्

जर्मनदेशीयमनोवैज्ञानिकेन म्यूलरलायरमहोदयेन[4] भ्रमस्यैकमतिरमणीयमुदाहरणं प्रदत्तम्। निम्निलिखितरेखयोर्या रेखा वामतो विद्यते सा यद्यपि दक्षिणस्थरेखासमानैव वस्तुत आयतत्वापेक्षया, तथापि सा ह्रस्वतरा दृश्यते। किं कारणम्?



बहिर्मुखानां कर्णाकाराणां[5] रेखाणां यो दैर्घ्यप्रभावो दर्शनोत्थो जायते, सोऽन्तर्मुखरेखाणां प्रत्यक्षापेक्षया नूनं महीयान्। कुतः? दक्षिणतः स्थिता रेखा बृहत्तराकृत्यङ्गत्वेन प्रतीयमाना दीर्घतरा

---


१. द्रष्टव्यम्—ब्र० सू० शारीरकभाष्यम् १।१।१।
२. तुलनार्थम्—Illusion.
३. तुलनार्थम्—Hallucination.
४. तुलनार्थम्—F. C. muller-Lyer.
५. तुलनार्थम्—Diagonal Lines.

प्रतीयते । इदमनुव्याख्यानं समष्टिवादाभिमतम् , अधिकतमैश्च मनोवैज्ञानिकैरनुमोदितमवतिष्ठते, यद्यप्यस्यान्यप्रकारकाणि स्पष्टीकरणानि समुपलभ्यन्ते ।


२२. पौगेनडोर्फ-जूलनरमहोदययोर्भ्रमोदाहरणानि

पौगेनडोर्फमहोदयो[1] जूलनरमहोदयश्च[2] दिग्भ्रमोत्पादकरेखाचित्रद्वयं निर्मितवन्तौ ।

तद्यथा



श्रीपौगेनडोर्फोद्भावितम्



श्रीजूलनरोद्भावितम्

पौगेनडोर्फमहोदयस्याकृतौ या कर्णाकारा रेखा वर्तते, यद्यपि सा एकैव तारतम्येन विद्यते, तथापि तस्याः प्रत्यक्षरूपता ईषच्छिन्नेव । निम्नो भागः सातत्यापेक्षया निम्नतरो दृश्यते । जूलनरमहोदयस्य रेखाचित्रेषु भ्रमोदाहरणभूतेषूर्ध्वं प्रसरन्त्यो रेखा वस्तुतः समानान्तराः सन्ति, तथापि प्रत्यक्षेण तद्रूपं संव्यूहनात्मकं विशरणरूपं वा दृश्यते । नन्वेतेषां भ्रमाणां किं कारणम् ? प्रायः सर्वानुमोदितमनोवैज्ञानिकानां मतमिदं यद्धि वयं ह्रस्वकोणानां परिणामं वर्धयामः, दीर्घकोणानाञ्च परिमाणं लघूकर्तुं तद्दैर्घ्यं वापाकर्तुमिच्छाम इति ।

२३. विभ्रमोदाहरणम्

प्रत्यक्षज्ञानस्य विकृतं रूपं भ्रमाख्यम् । विभ्रमश्च वस्त्वभावेऽपि प्रत्यक्षानुभवनमिति सामान्यतया भ्रमविभ्रमयोर्भेदं स्फुटीकरोति, तथापि सूक्ष्मान्वेषणं नेदं प्रयोजकं सोढुं समर्थम् । विभ्रमो हि नूनं भ्रमस्य विशिष्टं प्रकृष्टं वा रूपं भवति, यस्मिन्नुत्तेजकस्य स्पष्टं निर्देशनं न सम्भवति । तथापि विभ्रमा मानसरोगग्रस्तानामेव प्राय उत्पद्यन्ते । अपि च, प्रगाढक्लमेऽपि शारीरिकरोगेषु च विभ्रमा रोगिभिरनुभूयन्ते । सम्मोहनावस्थायामपि विभ्रमविशेषा अनुभूयन्ते । अन्यच्च, सर्वे स्वप्ना विभ्रमभूता एव भवन्ति, यतो ह्यधिष्ठानस्य स्पष्टज्ञानाभावेऽपि पदार्थानामनुभवनं तु स्वप्नेषु जायत एव । विभ्रमेषु ह्येकेन्द्रियक्रिया किं वा बहिरिन्द्रियव्यापारा-

१. तुलनार्थम्—J. C. Poggendorff.

२. तुलनार्थम्—F. Jollner.

पेक्षा तु यथार्थं दृश्यते। विभ्रममनुभवन्तं पुरुषं प्रायः सामान्यजनाः 'भूताविष्टो हि सः' इति व्यवहरन्ति। आकाशवाणीश्रवणमेको विभ्रम एवंविध एव। पापकलुषिताः स्वयमेव शत्रूणां प्रतिशोधपराणि वाक्यानि शृण्वन्ति। श्रावणप्रत्यक्षमिव प्रतीयमाना विभ्रमाः प्रायोऽनुभूयन्ते। कदाचन अनुभूयते, कोऽपि दिवङ्गतः पुरुषो वदति 'एवमेवम्' इति। नहीमे श्रावणविभ्रमा अन्तःकरणध्वनिसमानाः। अन्तःकरणध्वनयस्तु सत्त्वगुणोद्रेकात् प्रेक्षावतां पश्यन्तीवाग्रूपाः पौनः-पुन्येन शब्दं बाह्योत्तेजकं विना भावनाप्रधानावसरेष्वनुभूयन्ते। एतद्विषय एवेदमुक्तं भवति— "सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः" इति। नहि तथाविधा विभ्रमाः, येषु शब्दप्रत्यक्षमिव प्रतिवचनान्यनुभवगोचराणि भवन्ति। तथा ह्येकदा कस्मिंश्चिद्वने निशीथे भयत्रस्तेनैकेन पुरुषेण भूतास्थिपञ्जरप्रोद्भूता इयं वाणी साक्षात् श्रुता—"तिष्ठ! तिष्ठ!! भो गच्छन् पुरुष! तिष्ठ!!! अन्यथाहं त्वां कालकवलितमचिरादेव करिष्यामि" इति। एतस्मिन्नेवान्तराले स तस्य भूतपञ्जरस्य अस्थिघर्षणोत्थं 'चट चट' इति ध्वनिमपि श्रुतवान्। वस्तुतो विषयाभावेऽपि यदैवंविधा ध्वनय एव श्रूयन्ते, ते ध्वनयो नहि वस्तुभूता भवन्ति, प्रत्युत विभ्रमरूपा हि ते। लौकिका जना विभ्रमोत्थाननेकानेवम्भूताननुभवान् सत्यानिव विश्वसन्ति।

चाक्षुषा विभ्रमा अपि भवन्ति। प्रोषितमित्रस्य दर्शनं कदाचन विभ्रमरूपेण जायते। चाक्षुषविभ्रमेषु विषयोऽवस्तुभूतः कदाचन दीर्घः, कदाचन ह्रस्वः; एकदा स्थितः, अन्यदा गतिशीलोऽपि जायते। भावनाप्रधानमानसिकसँल्लग्नतया या पृष्ठभूमिः प्रस्तूयते तयैव विभ्रम-स्वरूपं निर्धार्यत इत्यस्माकं मतम्।

फ्रांसदेशीयमनोवैज्ञानिकप्रवरेण बिनेमहोदयेन[१] सर्वप्रथमं भ्रमविभ्रमयोर्भेदजनकं प्रागुक्तं प्रयोजकं दुर्बलीकृतम् १ तत्प्रतिपादितारम्भकबिन्दु[२]-मतानुसारमतिन्यूनमपि सर्वदैवा-रम्भकबिन्दुभूतमुत्तेजकं भ्रमे विभ्रमे समानमुपलभ्यते। बिनेमहोदयेन चित्ररहितपत्रकेषु स्वप्रयोगाः समारब्धाः। सम्मोहनविषयीभूताः केचन पुरुषा नैपोलियनप्रभृतीनां चित्राणि द्रष्टुं प्रभवन्ति स्म, 'तेषु महापुरुषाणां चित्राणि सन्ति' इति तत्संकेतं श्रुत्वा। यदा च नेपोलियनसंज्ञकचित्रं परावर्तितम्, तदापि सम्मोहनविषयीभूतेन पुरुषेणोक्तम्—'इदं नैपोलियनचित्रं परावर्तितमव-तिष्ठते' इति। एतेन प्रयोगेण साधितवान् बिनेमहोदयो यद्धि चित्ररहितेषु पत्रकेष्वपि कश्चन बिन्दुरेवम्प्रकारकोऽवश्यमेव भवति, येन परावर्तितमपरावर्तितं वा विभ्रमस्वरूपं सम्मोहनविषयेणावधार्यते[३]। अतस्तन्मते विभ्रमेष्वप्यारम्भको बिन्दुर्भ्रमेष्विव अवश्य-मेव वर्तते।

अस्तु तावद् भ्रमविभ्रमयोर्भेदः स्वल्प एव। किन्तु केषाञ्चिन्मनोवैज्ञानिकानां मते विभ्रमा असामान्यावस्थारम्भकस्य व्यक्तित्वस्य द्वैधीभावजनिता भवन्ति[४]। नहि पूर्णद्वैधीभावं

---

१. तुलनार्थम्—Alfred Binet.

२. तुलनार्थम्—Point de repere.

३. द्रष्टव्यम्—Alfrd Binet and Charles Fire "Animal magnetism" (1888) pp. 211-276.

४. द्रष्टव्यम्—Edward Parish "Hallucinations and Illusions." (Scribrner, 1897)

विभ्रमोऽपेक्षते। व्यक्तित्वद्वैधीभावो लघुमात्रायां स्वस्थेषु पुरुषेष्वपि कदाचन जायत इति तु वयमग्रेऽनुव्याख्यास्यामः। स्वस्थमानसिकशक्तिसम्पन्नानां क्लमे भावनाप्रकर्षेऽर्धसुषुप्तिदशायामपि व्यक्तित्वद्वैधीभवनं कदाचन दृश्यते।

सन्ति हि विभ्रमव्याख्यानपराण्यपराणि मतानि। यथा मनोविश्लेषणाख्यमनोविज्ञान-सम्प्रदायानुसारं मानसिकसङ्घर्षोत्थपूर्वेच्छावदमनस्य प्रतीकभूता विभ्रमा इति। अयं हि विशुद्धो मनोवैज्ञानिको वादः। अत एवास्य समीचीनत्वं दुर्निवारम्। व्यक्तित्वद्वैधीभवनमपि प्राक्तने-च्छावदमनजनितमिति त्ववदातम्। इच्छाभावनारुचिविशेषेण मानसिकसँल्लग्नतास्वरूपनिर्धा-रणे कियान् प्रभावो जायत इति तु सर्वं स्पष्टमेव। अतो यथा भ्रमेषु दुर्निवार्यपरिस्थित्यासा-दितमानसिकसँल्लग्नता कारणं भवति, सैव विभ्रमेष्वपि कारणं बोद्धव्या, किन्त्वत्र व्यक्तित्वस्य मनागधिकं वा द्वैधीभवनं जायते। व्यक्तित्वे द्वैधीभूते सुप्तवासना अदमिता इच्छाश्च विभ्रम-नाट्यमभिनयन्ति। अलमतिविस्तरेण॥

इति अर्वाचीने मनोविज्ञाने सविकल्पकप्रत्यक्षविवेचनीयोऽष्टमोऽध्यायः॥

नवमोऽध्यायः

अभ्यासशिक्षणादिविवेचनम्

१. कोऽयमभ्यासो[1] नाम ?

अथातो वयं शिक्षणमनुव्याख्यास्यामः। अभ्यासो नाम शिक्षणस्यापरो व्यपदेशः। प्रागुक्तमूलप्रवृत्तिसामान्यप्रवृत्त्यादिषु मानवव्यवहारस्य निम्नतमं रूपं प्रारम्भिकं वा सामान्यं रूपं वयं लभामहे। मानवव्यवहारस्योच्चतमा अवस्थाविशेषास्तासां मूलप्रवृत्तीनां परिवर्तनेनाभिनिवर्तन्ते। मूलप्रवृत्तिसामान्यप्रवृत्त्यादीनां परिवर्तितं रूपं विविधाभ्यासैच्छिकप्रयत्नादिषु चोपलभ्यते। पौनःपुन्येन यत् कर्म क्रियते, तदभ्यासरूपं कालान्तरे बिभर्त्ति। अनभ्यासदशायां शिक्षणं नाभिसम्पद्यते, अत एव वारं वारं कर्मसम्पादनेन योऽभ्यासः क्रियारूपो विचाररूपो वा जायते, तच्छिक्षणाय कल्पते, तदेव शिक्षणं वेति वयं वदामः। मूलप्रवृत्त्यादयो नैसर्गिक्यः क्रियास्तु व्याख्यातपूर्वाः। ऐच्छिकप्रयत्नस्वरूपमग्रे वयं विमृशामः। सम्प्रति वयमभ्यासस्वरूपं विमृश्य शिक्षणप्रकाराननुव्याख्यास्यामः।

२. मूलप्रवृत्त्यभ्यासयोर्भेदः

मूलप्रवृत्तिसदृश एवाभ्यासो भवति, यतो ह्यभ्यासरूपा प्रतिक्रिया समानरूपेणानायासेन च नियतपरिस्थित्यां समुपस्थितायां प्रवर्तते। एवम्प्रकारेण केषाञ्चन पुरुषाणां प्रातर्ब्राह्मे मुहूर्ते व्युत्थानरूपोऽभ्यासो भवति। चतुर्वादने ते उत्थाय शौचादितो निवृत्ता भूत्वा भगवद्भागीरथीतीरे स्नानार्थं गच्छन्ति। नह्यभ्यासमन्तरा पौनःपुन्येन कर्मसम्पादनेन सततविचारेच्छासहकृतेन प्रतिफलितशिक्षणं विना चतुर्वादने पर्यङ्काद् व्युत्थानं सम्भवति। किन्त्वभ्यासे निष्पन्ने सर्वमेतदनायासमेव समानरूपेण प्रत्यहं निष्पद्यते। कालान्तरे विचारेच्छासहकृतमेवाभ्यासरूपं वयं लभामहे। विशिष्टप्रकारकोत्तेजकीभूतायां परिस्थित्यां नियतोऽभ्यासः प्रवर्तते, नियता प्रतिक्रिया प्रसूयते। या प्रतिक्रिया प्रारम्भे विचारेच्छासहकृता, किन्तु कालान्तरे नियतरूपा अनायासा प्रायो विचारेच्छासहकृता भवति, सैव 'अभ्यास' इति व्यपदिश्यते।

तथाप्यभ्यासो नाम मूलप्रवृत्त्यसदृशोऽपि भवति। अभ्यासो नाम अधीता प्रतिक्रिया, मूलप्रवृत्तिस्त्वनधीता जन्मजाता वंशानुक्रमागता प्रतिक्रियेति विशेषः। किञ्चाभ्यासाः प्रतिपुरुषं भिद्यन्ते, मूलप्रवृत्तयश्चापरथा जातिगतसामान्यगुणायत्ताः प्रतिक्रियारूपाः। यथा कश्चन पुरुषः प्रातर्दशवादने, कश्चिदन्यो द्वादशवादने, अपर एकः प्रातरेवाष्टवादने प्रातराशार्थं प्रवर्तमानो दृश्यते। एवमेवैको रात्रौ दशवादने स्वपिति, अन्यश्चैको द्वादशवादनं यावच्चलचित्रादीनि सम्पश्यन् जागर्त्ति। अपरश्चैकोऽष्टवादनानन्तरं जागरणं कथमपि सोढुं न प्रभवति। सिद्धं तर्हि प्रतिपुरुषं भिद्यमानानामभ्यासानामानन्त्यम्। अभ्याससौष्ठवान्वितप्रकर्षानुसारमेवाचरणज्ञानचिन्तनप्रकारभेदाः सिध्यन्ति। अभ्यासभेदान् वयमग्रे व्याख्यास्यामः। अत्र तु प्रकृतमधिकृत्येदमुक्तं

---

[1] तुलनार्थम्—Habit.

भवति—मूलप्रवृत्तिसामान्यप्रवृत्त्यादयो जन्मजाता अनधीताः क्रिया भवन्ति। अभ्यासश्च अधीतं क्रियारूपम्, यच्च व्यवहारानुभवप्रकर्षेण सह प्रकृष्टमनायासं सफलं स्वतः सिद्धश्च जायते।

३. सहजक्रियाभ्यासयोर्विशेषः

सहजक्रिया नैसर्गिकी जन्मजाता क्रिया या सुषुम्णायां स्थितेन नाडीसम्बन्धेन सम्पाद्यते। नाडीसम्बन्धेषु खल्वेवंविधा क्षमता जन्मतः प्रागेव विधात्रा प्रदीयते, यया लघूनि नितान्तमावश्यकानि कार्याणि मस्तुलुङ्गायासं विनैव सम्पद्येरन्। अभ्यासोऽपि सहजक्रियासदृश एव भवति, अनायासक्रियारूपत्वात्; किन्त्वभ्यासो हि खल्वधीता क्रिया, या शनैश्शनैर्विचारेच्छासंवलितकर्मानुष्ठानेनोपार्जिता जायते। समागते धूल्यतिरेके चक्षुषी निमील्येते। एषा चक्षुर्निमीलनाख्या क्रिया जन्मजाता। अतो नेयमनुभवद्वारा अध्ययनविशेषमपेक्षते; किन्तु नवजातः शिशुर्यदा रोदिति, तदा माता आगत्य क्रोडीकृत्य तं दोलायति, ततः परं शिशुः स्वपिति। एकवारं द्विवारं वेत्थम्भूतानुभवनेन शिशुः कालान्तरेऽभ्यासं गृह्णाति शिक्षते वा। यावन्न क्रोडे संनिधाप्य स दोलायितो जायते, तावन्न स निद्रामवाप्नोति, प्रत्युत रोदित्येव। धनिकानां केचन शिशवो लघुपर्य्यङ्केषु दोलायमानेष्वेव निद्रां लभन्ते। एवम्प्रकारकोऽभ्यासः कालक्रमेण तेषां जायते। जलं पीत्वा शौचाय केचन गच्छन्ति। अपरे 'चाय' इति क्वाथं पीत्वैव शौचाय कल्पन्ते। एते सर्वेऽनुभवनानन्तरं समुत्पद्यन्ते। अत एव तेऽधीता इत्यभिधीयन्ते, अनुभवजन्यशिक्षणायत्तत्वात्। सहजक्रियाः स्वत एव जायन्ते, स्वायत्तास्ताः। नहि तथाभ्यासाः, ते तु प्रयत्नजन्या भवन्ति। प्रयत्नाश्च विचारेच्छानिश्चयाद्यारूढाः सम्भवन्ति। अभ्यासाः प्रथमं विचारेच्छासहकृतप्रयत्नरूपाः कालान्तरे परिपक्वा जायन्ते। परिपाके सति तेषां निष्पन्नं रूपमनायासं स्वायत्तमिव[1] परिणमते।

४. अभ्यासनिर्माणप्रकारः

ननु कथमभ्यासा निर्म्मिता भवन्ति? अभ्यासनिर्म्माणं हि खलु मस्तुलुङ्गीयमृदुपदार्थे नवीननाडीस्रोतसां निर्माणेन जायते। मस्तुलुङ्गीयमृदुद्रव्येऽभिनवकर्षाः कार्यानुरूपाः सम्भवन्ति। कर्षगाम्भीर्यमप्यभ्यस्तक्रियायाः पुनरावृत्तिव्यपेक्षया जायते। मस्तुलुङ्गीयकर्षानुरूपं तत्तत्कार्यसम्पादनार्थं विशिष्टानि नाडीकन्दाणुकानि समुत्पद्यन्ते, ये चेष्टावहनाडीवेगान् वोढुं समर्था भवन्ति। अत एव अभ्यासो नाम अभिनवनाडीवेगस्रोतोनिर्माणमिति। अभिनवनाडीस्रोतांसि तदैवाविर्भवन्ति, यदा मस्तुलुङ्गीयं द्रव्यं मृदु संस्काराधानक्षमं वा भवति। तच्च निसर्गतो बाल्ये भवति। अन्यच्च, प्राणिनोऽवयवानां विकासस्तथैव जायते, यथाऽयं तस्य तस्यावयवस्योपयोगं कुरुते। एकदा कस्यापि कार्यस्य सम्पादनं तस्यैव कार्यस्यापरेद्युस्तदनन्तरं वा सम्पादनं सुकरं करोति। वारं वारं तदभ्यासेन सा क्रिया नूनं स्वभावाङ्गत्वमवाप्नोति। प्रथमक्षणेऽनभ्यासदशायां प्रयत्नापेक्षा भवति। किन्तु कियद्वारं तत्कर्मसम्पादनानन्तरं प्रयत्नापेक्षा न भवति। तदैव सा क्रियाभ्यस्ता 'अभ्यासः' वेति निगद्यते। पौनःपुन्येन कर्माभ्यासेन अल्पशक्तिक्षयो जायते, कार्येऽल्पतमप्रयत्नापेक्षा भवति, कार्यञ्च सुष्ठुतरमल्पकालेन च सम्पद्यते। कार्यविशेषेऽभ्यस्ते सति प्रतिपदं ध्यानस्य सक्रियस्यापेक्षा न भवति। यदा काचन बाधा सामान्यतोऽभ्यस्तक्रियायां जायते,

---

१. तुलनार्थम्—**Automatic.**

तदैव ध्यानस्य किं वा ध्यानान्वितप्रयत्नस्यावसरः समुपस्थितो भवति। अनेन प्रकारेण अभ्यासनिर्माणेन प्रयत्नकालादिमितव्ययता जायते, ययान्येषां कर्मणां सम्पादनायावसरोऽपि सुलभो भवेत्।

शरीरविकासोन्मुखवेलायां नाडीगतद्रव्यं मृदुतमं भवति। आचरणाध्ययनसुकार्यविषयकाभ्यासास्तदानीन्तनमृदुनाडीगतद्रव्यस्य संस्काराधानक्षमत्वेन चिरप्रभावा जायन्ते। अत एवोक्तं भवति—"बाल्यं हि सद्वृत्तस्य रमणीयमुद्यानम्" इति। मूषास्थानीयं हि मस्तुलुङ्गीयं नाडीद्रव्यम्। कार्यस्वरूपवैचित्र्यानुसारमेव तस्मिन् संस्कारा आधीयन्ते। किन्तु यदा केचन अभ्यासा निर्मिता जायन्ते, तदा तद्विपरीताभ्यासनिर्माणं द्विगुणं कालमपेक्षते, द्विगुणं प्रयत्नम्, द्विगुणश्चेच्छाशक्तिवेगमपेक्षते। कथम्? प्रथमं तु पूर्वाभ्यासखचितमस्तुलुङ्गीयद्रव्यगतकर्षाणां पाटनं करणीयम्, तदनन्तरमेवाभिनवाभ्यासजननाय नवकर्षाधानं क्रियते। पूर्वाभ्यासोपयुक्तचेष्टावाहिनाडीवेगानां नियन्त्रणं परिष्कारश्चानवरतध्यानोपेतप्रयत्नेनैव सिध्यति। प्रथमाभ्यासस्तु सौकर्य्येणोत्पद्येत; किन्तु तदपाकरणानन्तरमेवाभिनवस्तद्विपरीतोऽभ्यासो जायते। अतः सर्वमवदातमेवेदं नाडीगतद्रव्यस्वरूपावधारणेन। एवमेव कैशोरावस्था यौवनमपि चाभिनवाभ्यासानां ग्रहणाय समुपयुक्ततमा वेला भवति। तस्मिन् काले येऽभ्यासविशेषा आचारविचारव्यवहारादिषु प्रादुर्भवन्ति, तेषामदम्यः प्रभाव आमरणं दृश्यते, तेषामपाकरणमपि दुर्निवारमेवेति मन्यन्तेऽर्वाचीना मनोवैज्ञानिकाः। कारणञ्चात्र प्राक्तननाडीस्रोतसां प्रतिरोध एवेति। गृहे पाठशालायां हि सर्वेषामभ्यासानां सद्वृत्तात्मकानामसद्वृत्तात्मकानाञ्च शिलान्यासः क्रियत इत्यवधार्य सर्वैः सदाचारोपयोग्यभ्यासनिर्माणाय सर्वदैव प्रयतनीयम्। एतदर्थमभ्यासस्वरूपविषयकमनोविज्ञानाध्ययनमपि पितृभ्यां गुरुवे च बालकेषु सद्वृत्तात्मकाभ्यासनिर्माणायापरिमेयां सहायतां प्रदत्त इति स्फुटमेव प्रेक्षावताम्। दुर्वृत्तात्मकोऽभ्यासः सद्वृत्तात्मकेनाभ्यासेनैवापाकर्तुं शक्यते, नान्यथा एतेनाभ्यासस्य गौरवं सर्वैः सम्यक्तया बोद्धव्यम्।

५. अभ्यासपदार्थः

अभ्यासशब्दस्य स्पष्टार्थविवेचनमावश्यकम्। नन्वभ्यस्ता क्रिया किं वाभ्यास इति वचनेनेदं प्रतिभाति यदभ्यासो नाम शरीरावयवानां चेष्टानां नियतं रूपमभिव्यञ्जयति, किमेतावानेवाभ्यासपदस्य प्रतिफलितोऽर्थः? नूनं सन्ति हि केचन मनोवैज्ञानिका येऽस्मिन् संकुचितेऽर्थे एवाभ्यासपदस्य व्यवहारं कुर्वन्ति। अस्मिन्नेवार्थे प्रायो लोकेऽप्यभ्यासशब्दो व्यवहृतो दृश्यते; किन्तु मनोविज्ञानेऽभ्यासस्य किञ्चिद् विस्तृतमेव क्षेत्रमस्तीति वयं मन्यामहे। नहि खल्वभ्यासाश्चेष्टामात्रपरिमिताः, प्रत्युत चिन्तनविषयेऽपि लोकानामभ्यासा उपलभ्यन्ते। उदाहरणस्वरूपं साम्यवादिनां विचारसम्बन्धिन्यभ्यासे धनिकवर्गपददलितशोषितवर्गादिप्राचुर्य्ये तेषां विचाराभ्याससरणिं द्योतयति। अन्यच्च, यदि विचारानुगतोऽभ्यासो न भवेत्, कथं तत्प्रवर्तितचेष्टास्तत्तदवयवानां नियतं रूपमभ्यासोपनीतमावहेत्? प्रागुक्तमेवास्माभिर्यदभ्यासः प्रारम्भे विचारेच्छाप्रवर्तितो जायते। अनेनेदं प्रतिफलितं भवति यद्धि नाडीगतचेष्टावाहिस्रोतसामेव नियतमार्गे वैशारद्यं न केवलं जायते, अपि तु तत्सहकृतमेव विचारचिन्तनसरण्यामप्यभ्यास उत्पद्यते, तत्सम्बन्धिमस्तिष्कावयवेष्वपि नाडीस्रोतसां तदनुरूपमार्गा नियतरूपेण विशदीभवन्ति। अतः सिद्धमभ्यासाः शरीरावयवचेष्टासम्बन्धिनः, विचारचिन्तनादिसम्बन्धिनश्च भवन्तीति। चेष्टामात्र-

परिमितोऽभ्यासपदस्य सङ्कीर्णार्थः। चेष्टाविचाराद्यनुगतोऽभ्यासपदस्य प्रयोगो विशदं समीचीनं व्यापकमर्थं निर्दिशति। एतस्मिन्नेवार्थेऽस्मिन् ग्रन्थेऽभ्यासपदं व्यवहृतम्।

उपरिवर्णितमर्वाचीनानां मनोवैज्ञानिकानां मतमस्माकं महर्षिभिरप्यनुमोदितमस्ति। तदुक्तं हि यजुर्वेदीयब्राह्मणे—

"यन्मनसा ध्यायति, तद्वाचा वदति ; यद्वाचा वदति, तत्कर्मणा करोति ; यत्कर्मणा करोति, तदभिसम्पद्यते" इति।

अतो यदि चिन्तनाद्यभ्यासविशेषा न भवेयुः, वाग्हस्तादिकर्मसम्बन्ध्यभ्यासानपि वयं व्याख्यातुं न प्रभवामः। अतोऽभ्यासपदस्य विस्तृतोऽर्थ एव ग्राह्यः।

६. अभ्यासभेदाः

प्रागुक्तमेवास्माभिर्यद्धि प्राणिन एष स्वभावो यथैकदा व्यवहरति चिन्तनं करोति, तदनन्तरं तदनुभवसंस्काराभिप्रेरितः सन् तथैव व्यवहरति, चिन्तयति चेति। अयं साधारणो नियमो यथा चेष्टाक्षेत्रे तथैवान्यमानसिकव्यापारेष्वप्युररीकृत इति बोद्धव्यम्। अतो वयमभ्यासानां त्रेधा वर्गीकरणं स्वीकुर्मः। ते यथा—चेष्टाऽभ्यासाः, चिन्तनाभ्यासाः, सदाचाराभ्यासाश्चेति। वयमेतान् प्रतिपदमनुव्याख्यास्यामः।

(अ) चेष्टाभ्यासाः—एवंविधेष्वभ्यासेषु वयं निरर्थकानां क्रियाणामन्तर्भावं कुर्मो यथा यदा कदा स्वदन्तैर्नखकर्तनम्, पीठे उपासीनस्य पादकम्पनम्, पाददोलनं वा, वार्तालापं कुर्वतां हानव्यकेशश्मश्र्वादिसम्प्रसाधनं पुरुषाणाम्, स्त्रीणां च यदा कदा मूर्धजसंप्रसाधनम्। निरर्थकानि खल्वेतान्यभ्यासरूपाणि। यद्यपि कैश्चन मनोवैज्ञानिकैस्तदन्तर्हितार्थोद्घाटनाय सुमहान् प्रयत्नः संवृत्तः। तन्मते सुप्तस्मृतीनां दमितेच्छानां प्रभावेण हीनभावतिरोधानाय वैतेऽभ्यासा बाह्यतो निरर्थकाः प्रतीयमाना आविर्भवन्ति। कालान्तरे खल्विमाश्चेष्टा अभ्यासरूपेण परिणमन्ते, तासां मौलिकं प्रयोजनञ्च तिरोहितं भवति। उदाहरणतो बालको वक्ता हीनभावमपाकर्तुं स्वस्कन्धावुपरीषत्कर्षति। कालक्रमेण तदेवाभ्यासरूपेण परिणमते। स्मृत्यभावे स्वकेशाकर्षणमङ्गुल्या मस्तकघर्षणं वाश्रीयते। स्थाने खल्वेतन्मनोवैज्ञानिकाभिमतं व्याख्यानम्। सप्रयोजना अप्येताश्चेष्टाः पश्चान्निरर्थिका इति प्रतीयन्ते; साक्षात्प्रयोजनविशेषानुपकारित्वात्। केचनैवंविधा अभ्यासाः स्वच्छतास्वास्थ्यदृष्ट्यानुपयुक्ता भवन्ति। तेषां निराकरणं शैशवादेव तद्विरोध्यभ्यासनिर्म्माणद्वारा करणीयम्। नखचर्वणम्, अङ्गुलीनां 'चटचट' इति करणं च स्वाभिमानायायशस्करमिति शिक्षणेन किशोरस्यैवैवंविधा अभ्यासा न प्रादुर्भवन्ति, प्रादुर्भूता वाचिरादेव विलीयन्ते। दुष्टाभ्यासस्य विपरीताभ्यासनिर्म्माणमेव परममौषधम्। तच्च शिक्षणेन विचारप्रदानेन सौकर्य्येणाभिनिष्पद्यते।

(आ) चिन्तनाभ्यासाः—यथा शरीरावयवचेष्टासम्बन्धिनोऽभ्यासा जायन्ते, तथैव विचारचिन्तनतर्कादिविषयसम्बन्धिनोऽप्यभ्यासाः प्रादुर्भवन्तीति वयं पूर्वमवोचाम। अध्यापको विशिष्टप्रकारेण स्वपाठं कक्षाभिमुखं प्रस्तौति। अयं पाठप्रस्तावविधिः प्रत्येकाध्यापकस्य स्वकीयो विशिष्टो भवति, सोऽप्यभ्यासरूप एव। धार्म्मिको जनः प्रत्येकदुःखसुखदारिद्र्यैश्वर्यादीनां व्याख्यां पूर्वजन्मकृतकर्मविपाकायत्तरूपेण करोति। तथैव भगवती सीता नहि रघुकुलशिरोमणिं श्रीमद्राम-

चन्द्रं दूषयति, तस्यं निष्ठुरत्वं वा लक्ष्यीकरोति; अपि तु स्वकीयप्राक्तनकर्मणां दुर्निवारं फलमेव विचिन्त्य भृशं रोदिति। तथा हि—

कल्याणबुद्धेरथवा तवायं
न कामचारो मयि शङ्कनीयः।
ममैव जन्मान्तरपातकानां
विपाकविस्फूर्जथुरप्रसह्यः[1] ॥ इति।

किञ्च—

न चावदद् भर्तुरवर्णमार्या
निराकरिष्णोर्वृजिनादृतेऽपि।
आत्मानमेव स्थिरदुःखभाजं
पुनः पुनर्दुष्कृतिनं निनिन्द ॥[2] इति।

धार्मिकजीवनवृत्तरहितानामभ्यासाश्चिन्तनात्मका नैवंविधा दरीदृश्यन्ते लोके। यदि कुत्रापि न्याय्योऽन्याय्यो वा विवादो भवेत् साम्यवादिनामभ्यासानुगतचिन्तनगर्भिता तद्व्याख्या शोषकशोषितधनपतिश्रमिकसमस्यारूपेणैव प्रस्तूयते। अस्ति हि तेषां चिरसेवितो विशिष्टप्रकारकश्चिन्तनाभ्यासः। तं चिन्तनविधिं विहाय न ते किमपि वक्तुं शक्नुवन्ति, नापि चिन्तितुमेव शक्नुवन्ति। अस्ति हि सर्वमेवंविधं चिन्तनादिकं दृढभूम्यभ्यासायत्तम्।

चेष्टाभ्यासचिन्तनाभ्यासयोस्तुलनात्मकमध्ययनमपि सम्प्रति करणीयम्। विशिष्टकौशलेनैको मल्लः प्रतिद्वन्द्विनं मल्लं पराजयते। यदा स युद्धक्षेत्रेऽवतरति तदा तस्य ध्यानं सामान्ययोजनामभि समाकृष्टो जायते। सा सामान्ययोजना प्रतिद्वन्द्विनो गतिविमर्शानुकूला भवति, परन्तु मल्लस्याभ्यासेन कृतदङ्गपेशीदृढिमा यथापूर्वं सम्पन्नो विद्यते। प्रत्येकविधिरपि युद्धकौशलस्याभ्यस्त एव। मुष्टामुष्टियुद्धे, केशाकेशियुद्धे, दण्डादण्डियुद्धे तु तत्तत्कौशलाभ्यासगौरवं विजयाय कल्पते। किन्तु प्राड्विवाकस्याध्यापकस्य वा विषये प्रत्येकं पाठान्तर्गततथ्यानामभियोगपत्रकान्तर्गतानां तथ्यानां विविधघटनानां ज्ञानं चिरसेविताभ्यासजन्यं नास्ति। यदभ्यासायत्तं तत्तु पाठविषयोपस्थापनपाटवम्, किं वाभियोगपक्षं युक्तिसमुच्चयपूर्वकं समुपस्थापनपाटवम्। तच्च सामान्यायोजनारूपम्, किन्तु प्राध्यापकस्य पाठान्तर्गतप्रत्येकपङ्क्तिग्रथिततथ्यानामुद्घाटनाय चिरं ध्यानमपेक्षते। एवमेव प्राड्विविकोऽपि प्रत्येकं विविक्तां घटनां ध्यायं ध्यायं विवादविपक्षं प्रस्तौति युक्तिजालसमुच्चयपूर्वकम्। नहि विविक्ततथ्यानां ज्ञानं प्राक्तनाभ्यासजन्यम्। एतावानेव भेदश्चेष्टाभ्यास-चिन्तनाभ्यासयोरवगन्तव्यः।

स्मरणीयं यद्वयं चिन्तनाभ्यासं मर्यादायुक्तमेव स्तुत्यं मन्यामहे। चिन्तनाभ्यासो नाम विचारमयीं सामग्रीं कथं क्रमबद्धां बोधगम्यां वा वयं कर्तुं प्रभविष्याम इतिप्रकारको भवति; किन्तु सोऽयं चिन्तनाभ्यासोऽमर्यादितोऽभिनिवेशग्रस्तो वा जायते, तदासामान्यां मानसिकीमवस्थामाशु आनयति। तत्प्रकारकाभिनिवेशान् वयमग्रे विमृशामः। यदि चिन्तनाभ्यासेन बुद्धिर्दुराग्रहनिगडिता जायेत, अलमनेन महतायासेन! चिन्तनाभ्याससहकृतं बुद्धिस्वातन्त्र्यं निष्पक्षं घटनानां निरूपणञ्च द्वयमेवानिवार्य्यमिति विभाव्यम्।

१. द्रष्टव्यम्—रघुवंशम्, १४।६२
२. द्रष्टव्यम्— ,, १४।५७

(इ) आचरणाभ्यासाः—आचारविषयकोऽभ्यासस्त्वाबालवृद्धं सर्व एव जानाति। 'प्रातरुत्थाय मातापितृभ्यां नमस्कारः कर्त्तव्यः इति सद्वृत्तं चिराभ्यासजन्यम्। 'सत्यं ब्रूयात् प्रियं ब्रूयात्', 'प्रियं च नानृतं ब्रूयात्' इति बाल्यादेव सततं यद्गृहेषु शिक्षणं प्रचलति, तत्सर्वमाचरणाभ्यासगौरवं निर्दिशति। यद्यपि मनोविज्ञानदृष्ट्या तु सद्वृत्तात्मकाभ्यासाः, असद्वृत्तात्मकाभ्यासाश्चाविशेषेण प्रतिपाद्याः; तथापि लोके सद्वृत्तस्य महिमा प्रथते। तद्यथा—

वृत्तं यत्नेन संरक्षेद्वित्तमेति च याति च।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ॥[1] इति।

अपि च, न जन्म ब्राह्मणत्वायोच्चकुलत्वाय वा कल्पतेऽपि तु वृत्तमेव सद्भिरनुमोदितं कुलीनत्वाय कल्पते। तथा हि—

न कुलं वृत्तहीनस्य प्रमाणमिति मे मतिः।
अन्त्येष्वपि हि जातानां वृत्तमेव विशिष्यते ॥[2] इति।

श्रूयते हि खलु जानश्रुतो जन्मना शूद्र आसीत्, शूद्रकुलोत्पन्नत्वात्; किन्तु स्वपवित्रधर्माचरणेन ब्राह्मणत्वमवाप्तवान्। "शुचं द्रवतीति शूद्रः", शूद्रत्वं शीलराहित्यं सद्वृत्ताभावत्वं मनोवचःकर्मपवित्रत्वराहित्यं वाभिव्यनक्ति, न तु जन्मविशेषवत्त्वम्। लोकप्रसिद्धभेदमनुगृह्येदं मनोविज्ञानं यथाभूततथ्यनिरूपणपरं सदाचरणनिर्म्माणाय प्रयतते, दुर्वृत्तोपशमाय। चिरं यावदभ्याससेवितं वृत्तं समाजे समादृतं जायते। यच्चोक्तम्—

मातृवत् परदारेषु परद्रव्येषु लोष्टवत्।
आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः ॥ इति।

एवम्भूतः सदाचारोऽभ्यासरूपो भवति। यस्य कोऽप्यभ्यासो नास्ति, तस्याचरणमविश्वसनीयं भवति, तस्य प्रतिक्रियावधारणं ब्रह्मापि कर्तुं न शक्नोति। सत्यमुपलभ्यन्ते ह्यभ्यासविशेषाः प्रत्येकं पुरुषस्य। सदाचारिणां पुरुषाणां व्यवहारे वयं यमनियमासनप्राणायामाहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहशौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानादीनामेकस्यान्यतरस्य विशेषेण सर्वेषां वा सामान्यतयोदाहरणं लभामहे। अरिस्टाटलमहोदयैर्यवनदेशीयदार्शनिकप्रवरैरुक्तं यद्धि धार्मिकः पुरुषः स एव यः सद्वृत्तं धर्मभूताभ्यासवन्नियतरूपेणाचरतीति।[3]

ननु किं सद्वृत्तात्मका अभ्यासा निष्कामा भवन्ति ? नहि सदाचाररूपाभ्यासाः प्रयत्नेच्छादिव्यतिरिक्ताः प्रादुर्भवन्ति। अभ्यासपरिपाके ते सद्वृत्ताभ्यासाः स्वभावाभिन्ना जायन्ते, तेषामाचरणमपि निष्कामतागर्भितमिव जायते। भगवता मनुनापि मनोवैज्ञानिकमिदं तथ्यमेवम्प्रकारेण स्पष्टीकृतम्—

कामात्मता न प्रशस्ता न चैवेहास्त्यकामता।
काम्यो हि वेदाधिगमः कर्मयोगश्च वैदिकः ॥[4]

---

१. द्रष्टव्यः—विदुरप्रजागरः, ४।३०
२. द्रष्टव्यः—विदुरप्रजागरः, २।४१
३. द्रष्टव्यम्—Nichomachean Ethics, "A good man is one who habitually wills the right act"
४. द्रष्टव्या—मनुस्मृतिः, २।२८

काम्यकर्मणां स्वरूपमग्रे वयं व्याख्यास्यामः। इच्छाप्रयत्नादिनिष्पन्नं सद्वृत्तरूपं नियतत्त्वं बिभर्ति। तथा हि—

घृष्टं घृष्टं पुनरपि पुनश्चन्दनं चारुगन्धं
छिन्नं छिन्नं पुनरपि पुनः स्वादु चैवेक्षुकाण्डम्।
दग्धं दग्धं पुनरपि पुनः काञ्चनं कान्तवर्णं
प्राणान्तेऽपि प्रकृतिविकृतिर्जायते नोत्तमानाम्॥ इति।

नूनं यस्य शीलं सद्वृत्तं नियतप्रतिक्रियारूपाभ्यासान्वितं नास्ति, तस्य जीवितेन किं प्रयोजनम्? किं तस्य वित्तेन वा? तदुक्तं विदुरेण—

शीलं प्रधानं पुरुषे तद्यस्येह प्रणश्यति।
न तस्य जीवितेनार्थो न धनेन न बन्धुभिः॥ इति[1]।

ननु किमिदं सद्वृत्तं सर्वदापरिवर्तनीयं भवति? वस्तुतोऽयं प्रश्न आचारमीमांसान्तर्गतत्वान्नास्माकं प्रतिपाद्यत्वं भजते। मनोविज्ञानदृष्ट्या वयमेतावदेव वक्तुं शक्नुमो यद्धि यैर्यैरभ्यासैः स्थाणुत्वमयं मानवोऽवाप्नोति, नहि ते सर्वथा श्लाघनीयाः। विवेकपुरस्सरमेव धर्माचरणं भवति। तच्च सततं धर्माधर्मविचारणामपेक्षते। अभ्यासाः सदुपयुक्ता अपि निरर्थकत्वमापद्यन्ते यदा तत्प्रकर्षेण बुद्धिः कुण्ठिता रूढ्यन्धविश्वासावरुद्धव्यापारा च जायते। तथापि सिद्धमेवाभ्यासानामुपयोगित्वं सामान्यजनेभ्यः सद्वृत्तपरायणेभ्यो यथा धर्मधुरन्धरेभ्यो महात्मभ्यो लोकनायकेभ्यः। अभ्यासातिरेकवशीभूतोऽयं मानवः स्थाणुरिव नवीनपरिस्थित्यां समुपस्थितायां साम्प्रतिकीं प्रतिक्रियां प्रदातुं न शक्नोति। अभ्यासाभावे किं नाम चरित्रमिति वक्तुं न शक्यते। चरित्रं वृत्तमिति यावत्, सदभ्याससमुच्चयमात्रम्। सदभ्यासानामभावेऽध्यवसायात्मको निश्चयो नोपलभ्यते। एकदा संवृत्तोऽपि निश्चयोऽकिञ्चित्कर एव भवति, चलायमानत्वात्। चिन्तनाभ्यासैरेव चेष्टाभ्यासानां तन्नियामकनिश्चयानां स्थैर्यमुपचीयते। तदभावे च 'क्षणे रुष्टाः क्षणे तुष्टाः' इत्येवम्प्रकाराणां पुरुषाणां चलायमानं निश्चयमस्थिरं क्रियाकलापं कोऽपि निश्चेतुं न प्रभवति। यदभिवाञ्छनीयं तत्तु जीवनोपयोगिमहनीयादर्शानुकूलाभ्यासानामुपार्जनं संग्रहणं वा, तेषाञ्च परिस्थितिपरिवर्तनविशेषे विवेकपुरस्सरं परिवर्तनमपि, यदि तल्लोककल्याणोपकारित्वादावश्यकं भवेत्।

अतः परं कांस्कान् नियमान् परिपाल्य सद्वृत्ताभ्यासानुष्ठानमुपचीयते, कांस्कान् नियमान् वानुसृत्य दुर्वृत्तात्मकाभ्यासानुष्ठानमपचीयत इति सर्वं वयं गवेषयामः।

७. अभ्यासविशेषाः

अभ्यासजन्याः क्रिया यान्त्रिकक्रिया इव भवन्ति। तासु न केवलं प्रयत्नस्य कालस्य च मितव्ययिता सम्पाद्यते, अपि तु कार्ये सौकर्येण योजनाक्रमानुसारं ध्यानविशेषासहकृतमेव जायते। पूर्वाभ्यासाद् मानवस्तत्तत्कार्येषु स्वेच्छया रुचिं प्रदर्शयितुमिप्रवृत्तो जायते। अभ्यासाः नियतरूपा अपरिवर्त्याः प्रायो भवन्ति। अस्माकं चारित्रमभ्यासानां पुञ्जीकृतं रूपमेव। सामाजिकजीवनं सर्वमभ्यासैः प्रतिपदमोतं प्रोतञ्च भवति। यः कोऽपि भेदश्चरित्रगत एकस्य पुरुषस्यान्यस्माद्

१. द्रष्टव्यः—विदुरप्रजागरः, २।४८

विद्यते, स द्विविधो जायते। प्रथमत उत्कृष्टाभ्यासोपार्जनापेक्षया प्रतिपुरुषं चरित्रभेदविशेषाः समुत्पद्यन्ते। एकस्य सदभ्यासशेवधिरन्यस्यापेक्षया विपुलतरो भवति, अत एव स शीलसदाचारशालित्वात् पूज्य इत्युच्यते। तथा हि—

न हायनैर्न पलितैर्न वित्तेन न बन्धुभिः।
ऋषयश्चक्रिरे धर्मं योऽनूचानः स नो महान्[1] ॥ इति।

द्वितीयं भेदजनकं कारणं भेदान्वितमनोविज्ञानेन साधितं खल्विदं यद्धि कस्यचित् पुरुषस्य दुष्टाभ्यासमूलप्रवृत्त्यादिनियन्त्रणमधिकतरं गरीयो वान्यस्माद् भवति। सामाजिककल्याणविरोध्यभ्यासमूलप्रवृत्तिनियन्त्रणमपि पुरुषेषूपलभ्यमानभेदस्य प्रयोजकमिति सिद्धम्। अतः परं वयं कथं तदभ्यासान् शीघ्रतरं जनयितुं शक्नुमः, कथं वा दुष्टाभ्यासान् परित्यक्तुं प्रभवाम इति विवेचयामः।

विलियमजेम्समहोदयेन हरवर्डविश्वविद्यालयीयप्राध्यापकप्रवरेण मनोवैज्ञानिकसत्तमेन दार्शनिकशिरोमणिना १९४७ वैक्रमाब्दे स्वकीयं ग्रन्थरत्नं "मनोविज्ञानसिद्धान्ताः[2]" इति संज्ञकं खण्डद्वये प्रकाशतामानीतम्। तदा प्रभृति खल्वयं ग्रन्थो मनोवैज्ञानिकानां समादरास्पदीभूतः। तस्य ग्रन्थस्य दशमोऽध्यायोऽभ्यासविवेचनपरायणोऽधिकतममवान्तरकालिकमनोवैज्ञानिकप्रवरैरुल्लिखितः। तदुल्लिखितनियमान् वयमिदानीं पुरस्कुर्मः।

८. अभ्यासनिर्माणार्थं नियमविशेषाः

तत्रैते नियमा भवन्ति—

(१) **सङ्कल्पदृढिमा**—अभ्यासोत्पादनाय सङ्कल्पस्य द्रढिमात्यर्थं कल्पते। दोलायितमानसाः किमपि साधयितुं न समर्था भवन्ति। 'संशयात्मा विनश्यति' इति भगवद्गीतायां श्रीकृष्णोक्तिः सर्वांशेन सत्या। संशयारूढचित्तः पुरुषः 'किं शुभम्, किमशुभम्, किमेष्टव्यम्, किं हातव्यम्' इत्यादिविकल्पेषु समुपस्थितेषु कस्याप्येकतरस्य पक्षे निश्चेतुं न प्रभवति। दृढनिश्चयाभावे प्रवृत्तिर्न जायते। अतः शुभाभ्यासोपार्जनाय सङ्कल्पस्य द्रढिमा परमावश्यक इति मन्तव्यम्, सर्वैर्दृढसङ्कल्पाधानं प्रति स्वमनसि स्वशिष्यपुत्रादीनां मनःसु च सर्वदा प्रयतितव्यम्।

(२) **शुभस्य शीघ्रम्**—त्वरितमेव शुभसङ्कल्पानां समारम्भः कर्त्तव्यः। कालातिक्रमेण सुनिर्णीतसङ्कल्पविषयेऽपीच्छाशक्तिह्रासो जायते। इच्छाह्रासान्नहि तथाविधो द्रढिमा सङ्कल्पस्य कालान्तरे विद्यते, यादृशः पूर्वमेवासीत्। यदि कश्चन चतुर्वादने प्रातरुत्थानायाद्य निश्चयं करोति, किन्तु यदा श्वश्चतुर्वादनकालो जायते, शीतभयमभिनीय स पर्य्यङ्कान्नोत्तिष्ठति। स्मरणीयम्, नह्येतद् व्यवधानमेकदिनपरिमितमेव। एकदिनव्यवधानेन य इच्छाह्रासो जायते, सोऽपरिमेयः। सम्भाव्यं खल्विदं यदग्रिमेऽपि दिने चतुर्वादन उत्थानं शीतजन्यव्याजव्यवधानेन न भवेत्। अतो यदा कोऽपि शुभनिश्चयः क्रियते, तस्य कार्यरूपेण परिणत्यर्थं शीघ्रमेव प्रयतितव्यम्। आरम्भश्च साग्रहः करणीयः।

---

१. द्रष्टव्या—मनुस्मृतिः, २।१५४

२. तुलनार्थम्—William James, 'Principles of psychology' (1890) chapter X.

(३) अभ्यासपरिपाकं यावन्नियमेन शुभकार्यं सम्पादनीयम्—यावन्न कोऽप्यभ्यासविशेषः स्थिरीभवेत्तावदेकस्याप्यपवादस्यावसरो न देयः। एकेनाप्यपवादेन महतीच्छाशक्तिविनष्टिरापद्यते। अतो द्रढिम्ना निरपवादं कार्यं सम्पादनीयम्। नियमेन निरालस्यं यदि कार्यसम्पादनं भवेत्तर्हि शुभाभ्यासोपार्जनं दुष्टाभ्यासस्य परित्यागो वाचिरेण साधितो भवेत्।

(४) अध्यवसायोऽपि समाश्रयणीयः—सततं नियमेनानवरतं कार्यं करणीयम्। प्रतिदिनं कियच्चिरं सङ्कल्पप्रभवशुभकर्मानुष्ठानं नूनमभ्यासोपार्जनं सुकरं करोति। एवंविधेन प्रत्यहमनुष्ठानेन चिन्तनाभ्यासाः, चेष्टाभ्यासाश्च दृढीभवन्ति। यदि वर्षे वर्षे मासं मासं वा किमपि कार्यं भवेत्तर्हि तस्याभ्यासो नैवार्जितो भवति, रुच्यभावे व्यवधानं कालोपात्तं क्लेशवहं भवति। अतः शुभकर्मणां समारम्भः साग्रहं दृढसङ्कल्पेनैव न केवलं कर्तव्यः, अपि तु तस्य वारं वारमभ्यासपरिपाकं यावद् नियतरूपेण प्रतिदिनमनुष्ठानमपि सम्पादनीयम्। दीर्घसूत्रित्वमालस्यं वा सुनिश्चितस्यापि शुभकर्मणः समारम्भे बाधामुपस्थापयति। तच्च त्याज्यमेव सर्वदा। बाल्यादेव बालकेष्वनुशासनाय प्रवृत्तिरुत्पादनीया। गृहे यस्य मातापितरावाहारविहारे शौचस्नानाध्ययनादिदैनिकचर्यासु नियमानुसारं कर्मसम्पादनमुपदिशतः, स्वयञ्च तथैवाचरतः, तस्यैवाचरणमनुशासनसंवलितसदभ्यासप्रचुरं जायते। यदा गृहे पित्रोर्जीवनं स्वच्छन्दमनुशासनविरहितं युक्ताहारविहारस्वप्नावबोधनिरस्तं भवेत्, नूनमेवंविधवातावरणपोषितबालकोऽपि तथैव प्रतिक्षणं परिवर्तमानक्रिय उच्छृङ्खलोऽनुशासननिरस्तश्च भविष्यति। तस्योपचारं गुरुरपि कर्तुं न प्रभवति। सदभ्यासान्वितमनुशासनमनुशासनोपात्तसदभ्यासजातं गुरुमातापितॄणां सहकारित्वं सहयोगं च कामयते। तेषां सहयोगे सत्यपि यदि मित्रमण्डली दुष्टाभ्यासग्राहग्रस्ता भवेत्, समुद्धारस्त्वसम्भाव्य एव। अत एतादृश्यः परिस्थितय एतादृशो विषया अपि निवारयितव्या यैस्तेषामभ्यासानां परिपाके बाधोत्पादनं जायेत।

इच्छाशक्त्युत्कर्ष एव साग्रहसमारम्भाय कल्पते। इच्छाशक्तिश्चाभिरुच्यायत्ता। अभिरुचिश्च वस्तुस्वरूपोपयोगित्वज्ञानं विशदमपेक्षते। एतत्सर्वं विज्ञायैव गुरुजनैर्मातापितृभ्याञ्च बालकानां सद्वृत्ताभ्यासनिर्माणाय समीचीनं यथाकालं पथप्रदर्शनं कर्त्तव्यम्।

६. दुष्टाभ्यासोपशमनम्

ननु कथं दुष्टाभ्यासानां धूम्रपानमद्यपानस्तेयासत्यभाषणादीनामुपशमनं करणीयम्? अत्रोच्यते—प्रागुक्तरीत्यैव। अन्यच्च, यदि परिस्थितिविशेषः, येन तदभ्यासविरोध्युत्तेजकं प्रदीयते, निवारयितुं शक्यते, तर्हि स निवारयितव्यः। धूम्रपानाभ्यासी धूम्रपेयापणमभि न गच्छेत्। यदि कश्चनोद्धतो बालकोऽन्यान् शिशून् ताडयति तर्हि तैर्बालकैः सह स यथा एकान्ते ताडयितुं न शक्येत, तथा वृद्धैर्गुरुजनैः प्रयतितव्यम्। यदि बालकानां सम्मिलनावसरोऽपरिहार्यो भवेत्तर्हि गुरुभिरनुशासमपूर्वकं तथा वर्तितव्यं यथौद्धत्यप्रदर्शनमसम्भाव्यं सर्वथा भवेत्। अभिनवाभ्यासनिर्माणार्थं दमनविधिर्यथाशक्यं परिहर्तव्यः। दुष्टाभ्यासविरोधिस्थायिभावोत्पादनाय यदि सुदृढः प्रयत्नो भवेत्तर्हि शुभाभ्यासाङ्कुरोत्पादनाय स्थायिभावासादितेच्छाशक्ती रुचिश्च बलवत्तमे भविष्यतः। यदि बालकस्य रुचिर्दुष्टाभ्यासदुर्गुणज्ञानात् प्रकृष्टा भवेत्तर्हि दुष्टाभ्यासमपाकर्तुं स साग्रहमभिप्रवृत्तो भविष्यति, अचिरेणैव शुभाभ्यासस्य बीजारोपणं सफलं च भविष्यतीति वयमाशास्महे।

उपर्यस्माभिर्यो नियमो व्याख्यातः, स एषोऽस्ति—दुष्टाभ्यासोऽप्रयोगेण समापनीय इति। यदि कस्यचिदङ्गविशेषस्योपयोगो न भवेत्तर्हि तस्य क्रियाशक्तिर्ह्रासं नयते। एवम्प्रकारेण यदि कथञ्चित् कियच्चिरं धूम्रपानादिकं न भवेत्, तदभ्यासनिराकरणमपि तेन सुकरं जायते।

अस्ति हि केषाञ्चिन्मनोवैज्ञानिकानां मते एष नियमः समीचीनो यद्धि निर्वृत्त्यतिशयेनापि दुष्टाभ्यासोपशमनं जायते। काश्मीरपाठशालासु प्रयोगैः साधितमिदं तथ्यं यद्धि वावदूको बालकः 'शुक-शाखा'[1] संज्ञकस्थानविशेषे कियच्चिरमवस्थानादनवरतमुच्चरन्नुच्चरन्नेकस्मिन्नेवैवंविधे प्रयोगेऽतिवादात्मकाभ्यासं परित्यजति। दुष्टाभ्यासस्य प्रयोगातिशयासादितवैराग्येण शुभाभ्यासस्याधानं क्रियत इति तेषामभिसन्धिः। नहि वयमेतन्मतमाद्रियामहे। बाढमासुरये परमकारुणिको भगवान् कपिलः सांख्यतत्त्वोपदेशं सहस्रवारं गार्हस्थ्यसुखभोगानन्तरमेवोपदिष्टवान्। अन्यच्च, श्रूयते भर्तृहरिरपि सप्तवारं गार्हस्थ्यं प्रविश्य गृहस्थोचितान् भोगान् भुक्त्वा च निर्वेदमवाप्तवान्। परन्तु द्वित्रदृष्टान्तैरपवादभूतैः सार्वभौमं तथ्यमिदमालोडितुं न शक्यते। सुष्ठूक्तं भगवता मनुना—

न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते॥ इति।

विषयसम्प्रयोगेणातिशयेन चिरेणैकैकस्याभ्यासस्य निर्माणं यदि सम्पाद्येत तर्हि मानवोचितजीवनयात्रायै सदाचरणजातं साधनीभूतं कदा सुलभं भविष्यतीति वक्तुं न शक्यते। सदभ्यासनिर्माणे मनोविज्ञानप्रस्तुतप्रतिपाद्ये समुपस्थितपरिस्थितेः पलायनं पराङ्मुखीभवनं नहि वयं समीचीनं मन्यामहे। दुष्टाभ्यासविरोधिस्थायिभावोत्पादनेन या रुचिर्जन्यते सैवंविधामिच्छाशक्तिं प्रसूते, यया विकारहेतावपि मानवः प्रलोभनैर्विविधैरप्याबद्धो न जायते। सदभ्यासा धीरत्वाय कल्पन्ते। धीरश्च "विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः" इति। स्मरणीयमत्र यद्धि 'शुक-शाखा'दृष्टान्ते आत्महीनभावेन प्रेरितः सन् बालको वावदूकत्वं परित्यजति, न त्वतिवादातिशयेन। अतो बालकस्य विचारोन्नयनं दुष्टाभ्यासपरिशोधस्य चरममुत्कृष्टं साधनमिति वयं मन्यामहे।

१०. दुष्टाभ्यासपरित्यागाय दण्डोपयोगित्वम्

दुर्वृत्तोपशमाय किं दण्डविधानं समीचीनम्? उदाहरणस्वरूपं स्तेयाभ्यासोपशमनाय दण्डस्योपयोगित्वमस्ति न वेति विचारणीयम्। प्रायो लोके शासने च दण्डोपयोग आश्रीयते। मनोवैज्ञानिकं यत्तथ्यं दण्डशासनान्तर्निहितं तद्वयमित्थं व्याख्यातुं शक्नुमः—या याः क्रियाः सुखप्रदास्तास्ताः पुनरावर्त्यन्ते प्राणिभिः। तद्विपरीतं या याः क्रियाः क्लेशवहास्तास्ताः पुनरावृत्तिं न लभन्ते, परित्यक्ताश्च कालक्रमाजायन्त इति। प्राणिविज्ञानमनोविज्ञानाभिमतोऽयं सिद्धान्तो वस्तुस्थितिपरिचायको महाप्रभावं बिभर्ति। प्रकृत्या समाश्रितेनानेन नियमेनेदं साध्यते यद्धि प्राणी स्वरक्षोपकारिण्यः क्रियाः सम्पादयेदिति। पशवः प्रायो विषाक्तमौषधं वानस्पत्यं वा घ्राणजादिप्रत्यक्षेण विज्ञाय निसर्गत एव न खादितुमुपक्रमन्ते। नहि शूकरः खरो वा धूम्र-

१. तुलनार्थम्—"Parrot-perch"

पेयपत्राणि[1] क्षेत्रस्थितानि गृह्णाति। एवमेव विषाक्तपत्राणि गावोऽपि न भक्षयन्ति। किन्तु विवेकसम्पन्ने मनुष्येऽस्य नियमस्यावितथ्यं सर्वांशेन नोपपद्यते। तथाप्ययं नियमः सामान्यतः सर्वत्रोपलभ्यत इति वक्तुं शक्यते। ये केचनापवादा अस्य भवन्ति ते त्वापत्कालोपात्ताः, किमुतेच्छाशक्तिनिरङ्कुशप्रभावासादिता नैतिकविवेकापादिता वा विशेषेण भवन्ति। अन्यच्च, कदाचनैवंविधाः क्रिया भवन्ति या विप्रकृष्टदुःखप्रदाः, किन्तु सम्प्रति तासां कोऽपि दुःखप्रदः परिणामो नोपलभ्यते; किमुत तासां दुःखदपरिणामस्य मात्रा सूक्ष्मत्वान्नोपलभ्यते। तस्माच्च दुष्टाभ्यासोपरमोऽपि न जायते। बाधाविशेषाभावाद् विशेषेणापवादानामवसरो नैतिकमर्यादापेक्षातो जायते। दण्डं नाम अवाञ्छनीयव्यवहारेण सह दुःखप्रदपरिणामस्य कृत्रिमसम्बन्धस्थापनरूपं साधनमिति। दुर्वृत्ताचरणस्य दुःखपरिणतिरेव भविष्यतीति विज्ञापनाय सामाजिकानुशासनोपकारकं दण्डं नाम साधनं समाश्रीयते।

आचारमीमांसायां नीतिशास्त्रापरनामधेयायां दण्डस्य किं स्वरूपं मानञ्च भवितव्यमिति नास्त्यस्माकं मनोविज्ञानविवेचनीये ग्रन्थेऽस्मिन् प्रतिपाद्यम्। वयन्तु दुर्वृत्तोपशमनाय दण्डोपयोगित्वं दण्डस्य वा मनोवैज्ञानिकदृष्ट्या बाधकत्वेन साफल्यमत्र विचारयामः। सम्प्रस्तुतायां विचारणायामिदं वक्तुं शक्यते यद्यावद् दण्डं समानरूपेण प्रचलति, तावदस्य मनोवैज्ञानिकबाधकत्वेन साफल्यं निरस्तसमस्तशङ्कं सुनिश्चितम्। 'समानरूपेण' इति पदेनास्माकमभिप्रायोऽयमेव यन्निष्पक्षं दण्डानुशासनं पालनीयम्। एको दुर्वृत्तो दण्ड्यतेऽन्यश्च न दण्ड्यते; किं वैक एकस्मादपराधाद् दण्डमात्राविशेषमवाप्नोत्यन्यश्च तदनुरूपापराधेऽपि लघ्वीं दण्डमात्रामेवाप्नोति। दण्डमतो निष्पक्षं विधेयम्। अन्यच्च, यदा यदा कश्चनापराधो भवेत्, तदा तदा दण्डशासनमवश्यमेवानुसरणीयम्। एकेनाप्यपवादेन दण्डगौरवं क्षीयते, तच्छासननिष्पक्षत्वमपि लुप्यति। किञ्च, न्याय्यमेव दण्डशासनं विधेयम्। अन्याय्यं दण्डशासनं क्रान्तिबीजमेव वपति। अपि च, यदा दण्डगुरुत्वं दुर्वृत्तात्मकक्रियाजन्यसुखानुभूतिरूपपरिणाममतिशेते, तदैव दण्डस्य मनोवैज्ञानिकबाधकत्वेन साफल्यं सुनिश्चितमवगन्तव्यम्; नेतरथा। यद्येतेषां परिस्थितिगतकारणानामवधारणं विनैव दण्डशासनं जायते, तर्हि नूनं हानिप्रदं फलमेव जन्यते।

स्मरणीयं यद्धि दण्डं नाम साधनं बाधकरूपेणैव प्रतिफलति। दमनमेव दुष्प्रवृत्तीनां दुष्टाभ्यासानां तस्याभावात्मकं फलम्। तच्च सदभ्यासानामाराद्रुपकारकम्। अन्यच्च, दमनोत्थाः सामान्यमनोविज्ञानावस्थाविशेषाः केचनाविर्भवन्ति, येषां विवेचनमग्रतः पुरस्करिष्यामहे। दमनं विक्षिप्ताद्यवस्थाविशेषान् नेष्यति। सर्वमेतद् विचार्य विवेकिभिः सदभ्यासोपार्जनायानुकूलस्थायिभावोत्पादनं करणीयम्, येन दुर्वृत्तात्मकाभ्यासानामुपशमः स्वत एवासादितो भवेत्। शुभाभ्यासारम्भश्च प्रागुक्तनियमानुसारमेव विधेयः।

११. शिक्षणस्वरूपम्

सर्वं शिक्षणमभ्यासनिर्म्माणरूपम्। अभ्यासस्वरूपमनिर्म्माणनियमादिविवेचनन्तु व्याख्यातचरम्। वयं सम्प्रति शिक्षणसामान्यक्रिया वस्तुतः कथं घटते? इति सर्वं पशुमनोविज्ञानाध्ययनोपात्तानुसन्धानस्यानुसारं विवेचयामः। अभ्यासरूपन्तु शिक्षणस्योत्कृष्टं लोकगोचरं रूपम्;

---

[1]. तुलनार्थम्—'तम्बाकू' इति हिन्दीभाषायाम्।

किन्तु प्रारम्भिकीस्ववस्थासु शिक्षाप्रक्रियायाः किं स्वरूपम् ? कांश्च नियमाननुसृत्य शिक्षणं सम्यक्तया जायते ? इति सर्वं विविधैः पशुमनुष्यप्रयोगैरधुना प्रपञ्चितं कुर्मः । वस्तुतो निखिलं जीवनं शिक्षणापरनामधेयम् । शिक्षणं नाम परिस्थितिसामञ्जस्यार्थं व्यवहारपरिवर्तनं वस्तुस्वरूपावबोधपुरस्सरम्, किमुत यथोचितचिन्तनाभ्यासचेष्टाभ्यासनिर्म्माणम् । प्रतिक्षणं प्रतिपदं वयं किमपि नूनं शिक्षामहे । यत्कर्म वयं कुर्मः, यमनुभवं वयमनुभवामः, तेनैव वर्धते खल्वस्माकं चेष्टाभ्यासचिन्तनाभ्यासोपोद्बलितो वस्तुस्वरूपावबोधः ; तदेव शिक्षणमित्याचक्षते । नहि कश्चिच्छिक्षणं विना क्षणमप्यवतिष्ठते । प्रतिपुरुषं ये मनुष्येषु बुद्धिभावनाक्रियाभेदा जातु वर्तन्ते, ते सर्वे एव शिक्षणभेदा इति वक्तुमुपपद्यते । अस्मासु केचन शीघ्रं शिक्षन्ते, अपरेषु शिक्षणाभिमुखी प्रवृत्तिर्नोपलभ्यते । केचन जिज्ञासाप्रकर्षात्, बुद्धिप्रकर्षात्, साधनविशेषसम्पन्नत्वादधिकं शिक्षितुं प्रभवन्त्यन्येषामपेक्षया । नहि केवलमिदं मनुष्याणामेव शिक्षणम् । व्याख्यातचरे द्वितीयाऽध्यायोपवर्णितमनोविकासावसरेऽस्माभिः जेनिङ्ग्समहाभागानां[1] प्राणिशास्त्रविशारदानां मतमुद्भावितमासीत् । तैर्महानुभावैः १९६३ वैक्रमाब्दे "निम्नस्तरीयप्राणिनां व्यवहारः" इति नामके ग्रन्थे प्रतिपादितं यद्धि सर्वे जन्तव आ अमीबप्राणिनो मनुष्यपर्यन्तं शिक्षन्ते । अमीबन्तु हानिप्रदखाद्यपदार्थेभ्यः स्वाङ्गानि विकर्षति, किमुत विषाक्तखाद्यकणेभ्य उपरमते । एतदेव तस्य शिक्षणरूपम् । किन्तु मनुष्यस्तु साम्प्रतमणुबमं निर्मिमीते, वायुयानचालनं शिक्षते, मस्तिष्ककरोटिपटलमपसार्य संज्ञाचेष्टायतनानामध्ययनमुपक्रमते । यः कश्चिद् भेदो द्वयोरेव शिक्षणे विद्यते, स जाटिल्यमात्राव्यपेक्षया वर्तते ।

शिक्षणस्वरूपनिर्धारणाय प्रथमो हि श्लाघ्य उपक्रमो हरवर्टमहोदयानां[2] जर्मनदेशीयदार्शनिकमनोवैज्ञानिकप्रवराणामेव । तैस्तु १८७३ वैक्रमाब्दे खलु मनोविज्ञानविषयमधिकृत्य प्रथमं पुस्तकमर्वाचीनमनोविज्ञानस्य "मनोविज्ञानस्य पाठ्यपुस्तकम्" इत्याख्यं प्रणीतम् । तैर्महानुभावैः शिक्षोपयोगिमनोविज्ञानसिद्धान्ताः सर्वप्रथमं प्रतिपादिताः । अत्रैवाङ्ग्लभाषीय-'साइकोलाजी' इति पदस्याद्यः प्रयोगो वैज्ञानिकशैल्यनुमत उपलभ्यते । तदनन्तरं पेस्टालजी-स्पैंसर-जेम्स-थार्नडाइकप्रभृतिभिर्ये ये प्रयोगाः समारब्धास्तैस्तैः शिक्षणस्य मनोवैज्ञानिकरूपं विशदतया आविष्कृतम् । वयमत्र कांश्चन प्रयोगान् विविच्य शिक्षणसिद्धान्तान् व्याख्यास्यामः ।

१२. पशूनामध्ययनम्

ननु किं पशवोऽपि बुद्धिमन्तो भवन्ति ? किमुत तेऽपि शिक्षन्ते ? किंस्विद् मस्तुलुङ्गीयाः क्रियास्तेष्वप्युपलभ्यन्ते ? डार्विनमहोदयैर्विकासवादमतस्फोरणान्तरं बहुभिर्मनोवैज्ञानिकैः शारीरविज्ञानविशारदैश्च पशूनामध्ययनं समारब्धम् । रोमानीसमार्गनप्रभृतिभिः[3] पशूनामध्ययनानन्तरं मूलप्रवृत्तिबौद्धिकक्रियारूपं तेषां क्रियाकलापमुद्भावितम् । वयं सम्प्रति थार्नडाइकमहोदयानां पशुमनोविज्ञानतुलनात्मकमनोविज्ञानयोः प्रवर्तकानां प्रयोगविवेचनमारभामहे । १९५४

---

१. तुलनार्थम्—Herbert S. Jenings, "Behaviour of Lower Organisms", (1906).

२. तुलनार्थम्—Joham Friedrich Herbart, (1816)

३. तुलनार्थम्—George Romanes. Leyod morgan.

वैक्रमाब्दे प्राध्यापकजेम्समहोदयानामन्तेवासी थार्नडाइकमहोदयो[1]ऽध्ययनकाल एव कुक्कुटशावकेषु प्रयोगान् समारब्धवान्। एकवर्षानन्तरं स कोलम्बियाविश्वविद्यालये मनोवैज्ञानिकानुसन्धानशालां स्थापयित्वा मार्जारेषु श्वसु वानरेषु च प्रयोगान् समारब्धवान्। उदाहरणतो बुभुक्षित एको मार्जारः काष्ठमयपिटिकायां छिद्रबहुलायां निक्षिप्तः। तत्पुरतश्च भोजनमेकस्यां स्थाल्यां पिटिकाया बहिः प्रस्तुतम्। लौहतन्तुसङ्कर्षणेन[2] कीलकशीर्षकस्य 'बटना'ख्यस्य प्रत्यावर्तनेन द्वारमपावृतं कृत्वैव स मार्जारो भोजनमादातुं प्रभवति स्म। प्रथमवारं काष्ठमयपिटिकायाः स्तम्भान्तरालेषु गन्तुकामो मार्जारः सक्रोधं विविधायासैर्नखाकर्षणघर्षणादिक्रियाभिः प्रयत्नान् बहुशश्चकार। प्रयत्नस्खलितविधिना मार्जारोऽन्ततो गत्वाकस्मात् कीलकशीर्षकं बटनाभिधं परिवर्त्य द्वारमपावृतं कृत्वा भोजनं बहिःस्थं लब्धवान्। द्वितीयवारं यदा मार्जारस्तद्विधायां काष्ठपिटिकायां निक्षिप्तो जातः, स पूर्वापेक्षया किञ्चिच्छीघ्रतरमेव प्रयत्नस्खलितात्मकैरनिर्दिष्टप्रयत्नैरेव कीलकशीर्षकं बटनमवाप्तवान्। तत्परिवर्तनेन द्वारमपावृत्य च भोजनं लब्धवान्। थार्नडाइकमहोदयैर्निर्णीतं यत्प्रतिवारं किञ्चिन्न्यूनतरकालानन्तरमेवाल्पतरप्रयत्नस्खलितात्मकैरायासैश्च स भोजनार्थं बटनं गृहीतवान्। अन्ते च साक्षादेकमपि स्खलितं विना स बटनं परिवर्त्य द्वारमपावृतमकरोत्। मार्जाराध्ययनप्रगतिर्यद्यपि प्रतिपदं समानरूपेण न वर्धते इति स्पष्टं प्रतिभाति, तथापि कियत्कालान्तरं बटनपरिवर्तनमचिरेण सम्पाद्यते इति निष्प्रत्यूहमध्ययनं शिक्षणं वा मार्जारस्य साधयति। इतरेषां प्राणिनामध्ययनेनापि समर्थितोऽयं निष्कर्षः। वानराणां शिक्षणप्रगतिर्विशेषेण शुनां मार्जाराणाञ्चापेक्षया शीघ्रतरा भवतीति प्रयोगैः साधितम्।

थार्नडाइकमहोदयः पशूनामध्ययनेन महत्त्वपूर्णनिष्कर्षानालोडितवान्। क्षुत्पिपासाशारीरिकावश्यकताद्यवसरेषु कोऽपि पशुः प्रयत्नस्खलितात्मकं व्यवहारं प्रदर्शयति। कियत्सफलप्रयत्नानन्तरं शिक्षणं जायते, अनिर्दिष्टनिरर्थकप्रयत्नाश्च क्रमात् परित्यक्ता भवन्ति। किञ्च, अन्यपरिस्थित्यामपि कश्चित् पशुः पूर्वावसरानुभूतसफलप्रतिक्रियाविधेरुपयोगं करोत्येव। अर्थादेकस्मादुत्तेजकादन्यदुत्तेजकं प्रति प्रतिक्रियाः प्रतिनियता जायन्ते। थार्नडाइकमहोदयेन 'सम्बन्धजन्यपरिवर्तनम्' इति व्यपदेशोऽस्य प्रतिक्रियापरिवर्तनस्य कृतः। किन्त्वस्य पेवलोवमहोदयैः प्रागुक्ताभिः प्रतिनियतसहजक्रियाभिः साम्यं सुमहदित्यवगन्तव्यम्।

१३. मानुषीयमध्ययनम्

कथं मनुष्याणामध्ययनं खलु घटते? कथं नु बालकः शिक्षते? अस्य प्रश्नस्य समाधानार्थं शिकागोविश्वविद्यालयीयप्राध्यापकप्रवरैः कारमहोदयैः[3] प्रयोगशतानन्तरं निर्णीतं यद्धि पटपिहितनेत्रा वयस्का मानवा बालकाश्च जटिलचक्रेषु मार्गान्वेषणाध्ययने मार्जाराणामिव शुनामिव वाचरन्ति। यथा पशवः प्रयत्नस्खलितविधिना समीचीनं प्रतिक्रियारूपमधीयते, तथैव बालका अपि। प्राध्यापकप्रवरपैरिनमहाशयानां[4] मते मनुष्याणां प्रतिक्रिया जटिलचक्रेषु बाह्यस्थेषु समुपस्थितेषु-

१. तुलनार्थम्—Edward L. Thorndike.

२. तुलनार्थम्—'तार' इति लोकभाषायां प्रसिद्धम्।

३. तुलनार्थम्—Harvey Carr, Univesity of Chicago.

४. तुलनार्थम्—Fleming A. C. Perrin.

ध्यानादिषु पिहितचक्षुर्भिश्च मार्गणादिप्रयोगेषु च द्विविधा एवाकस्मात् प्रेरितानिर्दिष्टक्रियारूपा न भवन्ति; प्रत्युत तैस्तैर्मनुष्यैः कल्पनाप्रत्यक्षं (प्रत्यक्षमेव वा) योजनाविशेषकल्पनम्, तर्कणम्, सफलताभिनिष्क्रमणपरञ्च समाश्रितम्। अतो मनुष्याणां शिक्षणं पशूनामिव केवलमाकस्मिकप्रयत्नस्खलितोपात्तमेव न भवति, प्रत्युत तस्मिन्नेकस्यान्यतरस्य सर्वेषां वा अग्रतो वर्णितसाधनानामुपयोगः क्रियते। तानि च कारणानि—(अ) मौखिकं क्रियासम्पादनम्, (आ) कल्पनाप्रतिमानिर्माणम्। (इ) चेष्टात्मकं शिक्षणम् यथा—प्रयत्नस्खलितविधिरूपम्। एतेषु मौखिकं क्रियासम्पादनं सर्वोत्कृष्टम्, चेष्टात्मकं निकृष्टम्, कल्पनाप्रतिमानिर्म्माणं मध्यमं साधनमिति मनोवैज्ञानिका मन्यन्ते। कल्पनाप्रतिमानिर्म्माणन्तु सर्वत्रैव मात्राभेदेन विद्यते, अतस्तस्यैव सर्वोपर्युपयोगित्वमापाततः सिद्धमित्यस्माकं मतम्।

१४. प्रतिनियता प्रतिक्रिया

१९५८ वैक्रमाब्दे रूसदेशीयशारीरविज्ञानविशारदैः पैवलोवमहोदयैः[१] प्रतिनियतसहजक्रियाविषयकः प्रयोगः कुक्कुरेष्वभिनिर्वृत्तश्चतुर्थाध्याये सहजक्रियाव्याख्यानावसरेऽस्माभिर्व्याख्यातचरः। मनोवैज्ञानिकदृष्ट्यास्य महत्त्वमपरिमेयम्। यदा कुक्कुराय भोजनं प्रदीयते तदा प्रतिवारं घण्टिकावादनमपि जायते। भोजने सम्प्रस्तुते कुक्कुराय लालारसनिःस्रवणं जायते। कालान्तरे भोजनासंस्कृतमपि घण्टिकावादनं यदा जायते, कुक्कुरस्य लालारसनिःस्रवणरूपसहजक्रियायाः क्रियाकारित्वं दृश्यते। अनेन प्रयोगेण पैवलोवमहाशयेन शिक्षणस्यैकं विशिष्टं रूपमाविष्कृतम्। प्रयोगैः सिद्धं यद्धि केवलं लालारसनिःस्रवणरूपसहजक्रिया घण्टिकावादनेन सह प्रतिनियता अभिसम्बद्धा वा जायते, अपि तु प्रकाशेन, गन्धविशेषेण, स्पार्शनोत्तेजकेन वा सार्धमपि कुक्कुरस्य लालारसनिःस्रवणसहजक्रियाया प्रतिनियतत्वमभिसम्बद्धत्वं वा सम्पद्यते इति। पैवलोवमहोदयैः स्वप्रयोगैरेतदपि साधितं यद्धि घण्टिकाभोजनयोर्युगपद्भावेनायुगपद्भावेन वापि लालारसनिःस्रवणसहजक्रियायाः प्रतिनियतत्वमभिसम्बद्धत्वं साधितुं शक्यते। उदाहरणतो यदि भोजनप्रदानाद् द्वित्रकलापूर्वमेव घण्टिकावादनं जायेत, तर्हि लालारसनिःस्रवणं तावन्न भविष्यति यावन्न घण्टिकावादनान्तरमपि द्वित्रकला[२] व्यतीता न भवेयुः। अन्यैर्बहुभिर्मनोवैज्ञानिकैः साधितं यद्धि न केवलं सहजक्रिया एवापि त्वन्याः प्रतिक्रिया अपि प्रतिनियता भवन्ति। तेषां मते 'सहजक्रियाप्रतिनियतत्वम्[३]' सङ्कीर्णपदम्, अत एव 'प्रतिक्रियाप्रतिनियतत्वम्', 'प्रतिक्रियाभिसम्बद्धत्वम्[४]' वा तत्स्थाने ते व्यवहरन्ति। प्रतिक्रियाभिसम्बद्धत्वेन जातु सकलसम्बन्धजन्याध्ययनस्य व्याख्या कर्तुं शक्यते। वाट्सनप्रभृतिभिः, यैः पशुशिक्षणस्य महतायासेन परिशीलनं संवृत्तम्, 'प्रतिनियता सहजक्रिया' इति रूपं पैवलोवमतं नितरां समादृतम्, प्रकृष्टाध्ययनविधित्वात्। लिखितभाषावचनहावभावविशेषेषु जाग्रदवस्थायां प्रतिनियतप्रतिक्रियारूपवं शिक्षणमनुपदमुपलभ्यते।

---

१. तुलनार्थम्—Petrovich Pavlov.

२. तुलनार्थम्—'मिनट' इति हिन्दी भाषायाम्।

३. तुलनार्थम्—Conditioned Reflexe.

४. तुलनार्थम्—Conditioned response.

१५. अन्तर्दृष्टिजन्यं शिक्षणम्

शिक्षणमन्तर्दृष्टिप्रभवमिति समष्टिवादिनां वर्दीमार-बुलफेंग[1]-कोहलर–कोफ्काप्रभृतीनां मतम्। तन्मते थार्नडाइकवाट्सनादिभिः प्रतिपादिता पशुशिक्षणस्वरूपव्याख्या समीचीना नास्ति। यदि जटिलचक्रं सम्यक्तया प्रस्तुतं भवेन्नहि पशवस्तर्हि सर्वदा प्रयत्नस्तलितविधिद्वारैव सर्वदा शिक्षन्ते, यथा थार्नडाइकमहोदया मन्यन्ते। नापि शिक्षणं साधारणोत्तेजकविषयप्रतिक्रिया-सम्बन्धस्थापनमात्रम्, यथा व्यवहारवादिनो वाट्सनप्रभृतयः प्रतिपादयन्ति। यदि प्रस्तुता समस्या लक्ष्यबिन्दुमार्गणपरा[2], किमुत सम्बन्धावधारणपरा[3] भवेत्, पशुरपि मनुष्य इव द्रुतं तामवगन्तुं शक्नुयात्। वस्तुतस्तेषां मते शिक्षणं नाम समष्टिपरिस्थितिं प्रति समष्टिप्रतिक्रिया। उपर्युक्तं मतद्वयमेवांशतः प्रतिक्रियारूपमङ्गीकुर्वन्ति।

प्रथममहायुद्धे बन्दीभूतेन कोहलरमहोदयेन कैनारीद्वीपसमूहे बहवः प्रयोगा वानराणां शिक्षणप्रगतिविषयमधिकृत्य सम्पादिता। ते यथा—एकस्य कक्षस्य गोपानस्यां तेन रज्ज्वैकं कदलीफलमाबद्धम्, एकस्मिन् कक्षकोणे पिटिका काष्ठनिर्मितैका च निक्षिप्ता; तामभिरुह्य लम्बमानकदलीफलादानं दुष्करं नासीत्। कोहलरमहोदयेन—'किं वानराः समीचीनं स्थलं निर्धार्य्य, पिटिकां यथास्थाने निक्षिप्य, कदलीफलान्यादातुं शक्नुवन्ति?'—इति प्रश्नस्य समाधानार्थमेते प्रयोगाः समारब्धाः। नर्तनक्रन्दनोत्पतनानन्तरं ते पिटिकां यथास्थानं संस्थाप्य कदलीफलानि गृहीतवन्तः। एकस्मिंश्चान्ये प्रयोगे यष्टिमादाय कदलीफलानि तैः प्राप्तानि। सुल्तानो नाम वानरसत्तमः सर्वाधिकं चातुर्य्यं प्रदर्शितवान्। वंशयष्टिद्वयमादाय, बन्धेनैनैकीकृत्य तया दीर्घयष्ट्या स्वभोजनं गृहीतवान्। अन्यच्च, वृक्षाच्छाखामेकामादाय तया कदलीफलं समाहृत्य स्वकीये पिञ्जरे निक्षिप्तवान्।

कोहलरस्यैतेषु प्रयोगेषु पशुभिर्नूनं प्रयत्नस्खलितानि कृतान्येव, किन्तु तैस्तत्तद्वस्तुसम्बन्धा अप्यवधारिताः। कदाचन त्विदं सम्बन्धावधारणमतीव शीघ्रं सम्पन्नम्। परिस्थितिसमष्ट्यवबोधेनैव प्रतिक्रियासमष्टिरूपं सम्बन्धावधारणात्मकं निष्पद्यत इति तेषां तात्पर्यम्।

१६. शिक्षणनियमाः

शिक्षणस्वरूपमधिकृत्योपर्यस्माभिः केचन प्रयोगा मूर्धन्यमनोवैज्ञानिकानां व्याख्याताः। तानालोच्यैते नियमाः प्रतिपाद्यन्ते—

(अ) कर्मानुभवप्रभवं शिक्षणम्।
- १. परिणामनियमः।
- २. अभ्यासनियमः।
- ३. तत्परतानियमः।

(आ) अनुकरणजन्यं शिक्षणम्।

(इ) प्रतिनियतप्रतिक्रियानिष्पन्नं शिक्षणम्।

(ई) अन्तर्दृष्टिप्रभवं शिक्षणम्।

साम्प्रतं वयमेतान् क्रमशो विचारयामः।

---

१. तुलनार्थम्—Wolfang.
२. तुलनार्थम् -"Getting the point" problem.
३. तुलनार्थम्—"Grasping relationships".

१७. कर्मानुभवप्रभवं शिक्षणम्

इदं मतं थार्नडाइकमहोदयैरुद्भावितं लायडमार्गनप्रभृतिभिरनुमोदितञ्चास्ति । कर्म-सम्पादनेन वारं वारं मनुष्यस्तत्कर्म शिक्षते, कर्तुं प्रभवतीति यावत् । 'प्रयत्नं कुरु, स्खलितानि भवन्तु नाम' एष आदेशः । यः कर्म करोति, नूनमारम्भे तेन स्खलितान्यपि क्रियन्ते । किन्तु कियच्चिरं यावदेव स्खलितानि जायन्ते । तदनन्तरं तानि दूरीभवन्ति । स च तत्कर्मसम्पादने कुशलोऽभ्यस्तो वा जायते । प्रयत्नस्खलितविधिरिति[1] व्यपदेशेनाप्ययं नियमः प्रथते । अस्य रूपं गौरवञ्च स्मृतिकारैरेवमुन्नीतम्—

> आरभेत हि कर्माणि, श्रान्तः श्रान्तः पुनः पुनः ।
> कर्माण्यारभमाणं हि पुरुषं श्रीर्निषेवते ॥

कर्म कुर्वन्नेव मानवः स्खलितान्यपाकृत्य तदभ्यासोपेतो जायते ।

एतन्मतस्फोरणाय थार्नडाइकमहोदया निम्नलिखितनियमत्रयमपि निर्धारयन्ति । ते यथा—

१. परिणामनियमः ।
२. अभ्यासनियमः ।
३. तत्परतानियमः ।

वयमेतान् सर्वान् प्रतिपदमनुव्याख्यास्यामः ।

परिणामनियमः[2]—नूनं कर्माभ्यासेनैव शिक्षणमभिसम्पद्यते । ननु कथं कर्मसम्पादन-मात्रं शिक्षणाय कल्पते ? अस्य प्रश्नस्य समाधानं थार्नडाइकमहोदयेन सन्तोषासन्तोषनियमेन व्याख्यातम् । यस्याः क्रियायाः परिणामः प्राणिनं सुखीकरोति, कर्त्रे सुखं पुरस्कारं वादत्ते, सा क्रिया पौनःपुन्येन सम्पाद्यतेऽभ्यस्यते च प्राणिना । यच्च कर्म परिणामे दुःखं जनयति, कष्टमावहति, दण्डाय वा कल्पते, तदचिरेण परित्यज्यते, तदर्थं प्राणी नैवाभिप्रवृत्तो भवति । किञ्च तस्याभ्यासो-ऽपि न जायते । तस्य शिक्षणमप्यसम्भाव्यम् । पुरस्कृतो बालकः प्रतिदिनं पाठशालां गच्छति । अग्निना दग्धः शिशुर्नैवाग्निं स्पृशति । अतः परिणामानुसारं शिक्षणमिति बोद्धव्यम् ।

अभ्यासनियमः[3] - अभ्यासस्वरूपं व्याख्यातचरम् । अभ्यस्ते कर्मण्युत्तेजकविषय-प्रतिक्रिययोः सम्बन्धाः स्थायित्वमापद्यन्ते । अनभ्यासदशायां कर्मसम्पादने उत्तेजकस्य प्रतिक्रियया सह सम्बन्धाभिनवत्वात् कश्चनायासो जायते, कालोऽप्यधिक एव कर्मसम्पादनार्थमपेक्षते । सङ्गीत-नृत्यगायनादीनि कर्माणि नूनमभ्यासेनैव शिक्षितानि भवन्ति । व्यापकेऽर्थे सर्वं शिक्षणं खल्वभ्यासरूपं बिभर्त्ति ।

तत्परतानियमः[4]—अनेन नियमेन प्रतिपाद्यते यद्धि खल्वभिरुचिं विना नाप्यभ्यासः, न च परिणामविशेष एवाध्ययनाय कल्पते । शिक्षणमभिरुच्यधीनम्, यतो ह्यभिरुचिसन्निधाने ध्यानं सर्वदा विद्यते । नहि शिक्षणं नाम ध्यानासहकृतमभिनिर्वर्तते । अतो मनोवैज्ञानिकाः प्रतिपादयन्ति—तत्परतायां विद्यमानायां शिक्षणमभिसम्पद्यत इति । तत्परताया अभावे बालका न

---

१. तुलनार्थम्—Trial and Error method.
२. तुलनार्थम्—Law of effect.
३. तुलनार्थम्—Law of exerceise.
४. तुलनार्थम्—Law of readiness.

पठन्ति, ध्यानाभावात्। अतोऽध्यापकैस्तथा प्रयतितव्यं यथा बालकानामभिरुचिसहकृता पाठं प्रति तत्परता जायेत। शिक्षणप्रगतिरपि तत्परतासद्भावे नितरां संवर्धत इति निष्प्रत्यूहम्।

१८. अनुकरणेन शिक्षणम्[1]

परमविश्वस्तमध्ययनं तदेव यत्स्वयं कर्म सम्पाद्य कोऽपि मनुष्यः शिक्षते ; किन्तु जटिलमानवव्यवहारस्येयत्तावगाहनं ज्ञानवैचित्र्यवैपुल्यावगाहनं वा स्वकीयैः कर्मभिर्जन्मसहस्रेणापि कश्चिन्मानवः कर्तुं न प्रभवति। अतः काँश्चन विषयान् वयमनुकरणेन गुरूणामवगच्छामः। केवलं प्रयत्नस्खलितरूपैः कर्मभिः प्रशस्ततरोन्नतिर्दुःसाध्येति वयं मन्यामहे। गुरुमातापितॄणामनुकरणेन बालकः सामाजिकसदाचारानभिजानाति। भोजनाच्छादनगमनविधीनामवबोधोऽन्येषाञ्चासङ्ख्येयानां कर्मणामनुकरणेनैव सम्भाव्यते।

१९. अन्तर्दृष्टिप्रभवं ज्ञानम्

एतत्सर्वं पूर्वं समष्टिवादव्याख्याने व्याख्यातचरम्। जटिलपरिस्थित्यां बालको मिष्टान्नमादातुं पीठिकासमुच्चयं रचयति। तमारुह्य च मिष्टान्नमादत्ते। नूनं सर्वमिदं कल्पनोपेतान्तर्दृष्टिजन्यम्, किमुत प्रातिभज्ञानासादितं भवतीति तात्पर्यम्। कोहलरमहोदयस्य वानरेण सुलतानेनान्यैश्च वानरैरेवम्प्रकारकं कौशलं प्रातिभं ज्ञानमन्तर्दृष्टिर्वा सुष्ठुतरं प्रदर्शिता।

२०. प्रतिनियतप्रतिक्रियाप्रभवं शिक्षणम्

एतत्सर्वं प्रागेव पैवलोवमहोदयानां प्रयोगविवेचनावसरे व्याख्यातम्।

२१. शिक्षणानुगतनाडीतन्त्रक्रियाविवेचनम्

ननु शिक्षणे नाडीतन्त्रीयाः क्रियाः कीदृश्यो भवन्ति ? नाडीतन्त्रस्य विशदं विवेचनं व्याख्यातचरम्। तत्रास्माभिर्वर्णितं यद्धि द्विविधानि नाडीकन्दाणुकानि भवन्ति—संज्ञावाहीनि, चेष्टावाहीनि च। विलियमजेम्समहोदयेन १९४७ वैक्रमाब्दे सर्वप्रथममुद्भावितं यद्धि मानवस्यैकस्य चाक्षुषप्रत्यक्षे तन्नामश्रावणप्रत्यक्षे च मस्तुलुङ्गीयायतनद्वयमेव क्रियान्वितं जायते। मस्तुलुङ्गे तयोः संज्ञावाहिचेष्टावाहिनाडीस्रोतसोरेव संयोजनं सम्पद्यते। संयोजनरूपेणानेन सम्बन्धेन कालात्यये नामश्रवणमात्रेण तदाननस्य स्मृतिरुत्पद्यते। किं वा, तस्मिन् दृष्टे सति, तन्नामस्मरणमनायासेन जायते। तदेकवर्षानन्तरं १९४८ वैक्रमाब्दे जर्मनदेशीयनाडीविज्ञानपारङ्गतेन[2] वाल्डेयरमहोदयेन[3] नाडीकन्दाणुकमतमुद्भावितम्[4]। नाडीकोषाणुकानि तन्मते 'नाडीकन्दाणुकम्' इति व्यपदेशेन व्याख्यातानि। परस्परं नाडीकन्दाणुकानां मेलनं नाडीसम्बन्धस्थले व्याख्यातपूर्वं सम्पद्यते। यद्यपि तत्प्रतिपादितं नाडीकन्दाणुकमतमद्यावधि शारीरकमनोविज्ञानवेत्तृभिरङ्गीक्रियते, तथापि विद्यते हि नाडीविज्ञानविशारदानां कश्चन व्यामोहः—किन्तु खलु नाडीसम्बन्धस्थले नाडीकन्दाणुकानां वस्तुतो मेलनं जायते ? किमुत पृथग्भूते द्वे अपि नाडीकन्दाणुके नाडीवेगान्

1. तुलनार्थम्—Learnning by imitation.
2. तुलनार्थम्—Neurologist.
3. तुलनार्थम्—Wilhelm Waldeyer (1836–1921)
4. तुलनार्थम्—Neuron theory.

परस्परं मिलिते इवाचरत ! इति । नाडीसम्बन्धस्थलैर्नाडीस्रोतसां वेगातिशये बाधाः समुपस्थाप्यन्ते । वाल्डेयरमहोदयेनानुव्याख्यातं यद्धि शिक्षणे नाडीसम्बन्धजनितबाधा क्षयति, तद्व्यावृत्त-नाडीसम्बन्धेषु च बाधा वर्धते । नाडीवेगा बाधारहितमार्गैरेवाभिगच्छन्ति । अभ्यासेन केचन नाडीसम्बन्धा विशदीभवन्ति, येषु नाडीस्रोतांस्यप्रतिहतगत्या वहन्ति । अभ्यासप्रतिकूलनाडी-सम्बन्धेषु बाधा वर्धन्ते । अध्ययनं तर्हि नाडीसम्बन्धान् विशिष्टमार्गेषु विशदीकरोति, अभिनव-नाडीस्रोतांसि चोन्मुखानि करोति ।

शैरिङ्गटनप्रभृतिभिस्तदनन्तरं वाल्डेयरमहोदयानां नाडीकन्दाणुक्रमतं परिवर्धितं विशदतया व्याख्यातञ्च । नाडीसम्बन्धक्रियाकलापव्याख्यानं तथापि यथापूर्वमद्यावधि प्रचलति ।

२२. स्थायिशिक्षणविशेषाः

शिक्षणनियमास्तु व्याख्यातपूर्वाः । सम्प्रति वयं स्थायिशिक्षणस्य के के विशेषा भवन्तीत्यधिकृत्य विवेचनं करिष्यामः । अत्र प्रागुक्तप्रयोगाणामुपसंहारः करिष्यते ।

(१) यदा मूलप्रवृत्तिप्रयोजनादिजन्या प्रेरणा विद्यते, तदैव शिक्षणस्य प्रगतिर्विशेषेण दृष्टिगोचरा भवति । भोजननिवृत्तो मूषको जटिलचक्रे प्रवेष्टुं मार्गमन्वेष्टुं वा नोपक्रमते । बुभुक्षितो मूषको भृशं धावति । अन्ततो गत्वा मार्गं समीचीनमन्वेष्टुं प्रभवति । दृश्यते हि लोके यद्धि परीक्षासन्निधाने परीक्षार्थिनोऽत्यर्थं पठन्ति । धनिकानां पुत्राणामपेक्षया दरिद्राणां पुत्राः सर्वदैव शिक्षणे चरमं साफल्यमवाप्नुवन्ति । प्रेरणाविहीना दरिद्राणां पुत्रा अपि विफला भवन्ति । अध्ययनवेलायां शिक्षणाय प्रेरणावबोधोऽपेक्षतेऽध्येतुः, न तु परिस्थितिविशेषान्तर्भूत-प्रेरणासत्त्वमात्रम् ।

(२) यदि प्रेरणा प्रयोजनं वा बाधिते भवतस्तर्हि शिक्षणं न जायते । अर्थाद् मार्ग एव इच्छापूर्त्यप्रतो मार्गान्वेषणार्थं मूषको न प्रवर्तते । बाधामतिक्रम्य नूनं प्रयोजनानुकूलप्रतिक्रियाव-धारणं सम्भवति । सङ्घर्षमयजीवनं येषां भवति, तेषामनुभवप्रकर्षोऽपि भवति । अनुभवप्रकर्षो नाम परिस्थित्यनुकूलप्रतिक्रियाज्ञानमिति । प्रतिक्रिया नामाचरणमिति ।

(३) प्रथमं तावच्छिक्षणक्रियायामुच्छृङ्खला निर्दिष्टक्रियाः प्रादुर्भवन्ति । एवंविधाः क्रियाः पशुप्रयोगेष्वाविर्भवन्ति, मोटरयानवहने टङ्कणाध्ययने वा दृश्यन्ते ।

(४) सफलाः प्रतिक्रियाः प्रायोऽकस्मात् जायन्ते । प्रयत्नस्खलितविधौ विशिष्ट-परिस्थित्यां पूर्वनियोजितायां तदनुरूपं विशिष्टमेव फलं जनयिष्यत इति वक्तुं न शक्यते । प्राणी कुर्वन्नेव कर्माकस्मात् सफलां प्रतिक्रियां प्रदत्ते । तेन वाधीता शिक्षिता वा क्रिया पुनरावर्त्यते ।

(५) मानवशिक्षणे कल्पनाप्रतिमानिर्माणेन शिक्षणसौकर्यमभिसम्पद्यते । कल्पना-निर्माणासादितं वस्तुस्वरूपसम्बन्धनिर्धारणं जायते । सम्बन्धबोधादृते शिक्षणं नाभिनिर्वर्तते इति सुष्ठूक्तं समष्टिवादिना ।

(६) परिणामाभीष्टत्वं नूनं स्थायिशिक्षणाय कल्पते । येन येन कर्मणा सुखावहः परिणामो नन्यते, तत्तदेव कर्म पौनःपुन्येनाभ्यस्यते प्राणिना । कष्टप्रदं कर्म, यन्न रोचते, नैवाऽभ्यासविषयत्वमवाप्नोति ।

(७) अभिरुचिप्रकर्षेणाध्ययनं द्रुततरमधिकञ्च जायते। प्रयत्नस्खलितविधिना प्रतिनियतप्रतिक्रियया च शिक्षणप्रगतिः क्रमशः ईषद्विलम्बेन जायते। किन्तु मूलप्रवृत्तिपुरस्कारादर्शादिकारणसामग्रीसन्निधानेऽध्ययनं शीघ्रतरं जायत इति निःसन्देहम्। अन्यच्च, अन्तर्दृष्टिसमुपेतं शिक्षणं समुत्साहं वर्धते।

(८) यस्मिन् शिक्षणे पृथग्भूतज्ञानेषु सम्बन्धाः सुदृढा निर्मीयन्ते, बाधाश्च विजित्य यस्य स्वरूपं निष्पन्नं भवति, यच्च वारं वारं कर्मसम्पादनेनावाप्यते, तन्नूनं प्राणिनोऽनुभवस्य राशौ स्थायित्वं लभत इति।

सम्बन्धविशेषान् वयमग्रतो विचारप्रकरणेऽनुव्याख्यास्यामः॥

इति अर्वाचीने मनोविज्ञानेऽभ्यासशिक्षणादिस्वरूपविवेचनीयो नवमोऽध्यायः॥

दशमोऽध्यायः

विचारस्वरूपविवेचनम्

१. चिन्तनक्रियास्वरूपम्

अस्माभिः पूर्वं प्रत्यक्षमनुभवनं तदुपोद्बलितमध्ययनं शिक्षणं वा साङ्गोपाङ्गमनुव्याख्यातम्। सम्प्रति वयं विचारस्य स्वरूपं विशदं व्याख्यास्यामः। प्रत्यक्षमनुभवनं शिक्षणञ्च चिन्तनरूपक्रियाया मूलतमं रूपम्। ज्ञानसामान्येन चिन्तने तेषामन्तर्भावः। चिन्तनस्योत्कृष्टं स्वरूपं विचाराख्यमनोव्यापारे समुपलभ्यते। तच्चैवंविधम्—"दशवादनेऽहं भोजनं कृत्वा संस्कृतमहाविद्यालयं प्रतिदिनं गच्छामि, किन्त्वद्य महाविद्यालयभवनं पिहितद्वारं वर्तते। 'किन्नु खल्वद्यावकाशोऽस्ति ? किंस्विदद्य प्रतिपत्तिथिः ? किमुताष्टमी ? अथवा, दौवारिक एव कारणविशेषादन्यत्र गतः ? किंस्वित् राजाज्ञया अवकाशविशेषो घोषितः ? किमुत कोऽपि महान् शिक्षाविशारदो राजकीयनेता वा पञ्चत्वमवाप्तवान्' एवम्प्रकारके चिन्तनेऽहं कियच्चिरं स्थित्वा विचारयामि, 'किं कर्त्तव्यम् ? केन कारणेन महाविद्यालयभवनं पिहितद्वारमद्य वर्तते' ? इति। ततः परमहं दौवारिकस्य गृहं गत्वा पृच्छामि, 'किमद्यावकाशोऽस्ति ?' इति। 'नूनमद्यावकाशोऽस्ति, डाक्टरेत्युपाह्व- अमरनाथझामहोदया दिवङ्गताः। तच्छोकादद्य महाविद्यालयेऽवकाशो भवितव्य इति प्रधानाचार्याणां राजकीयसंस्कृतमहाविद्यालयस्यायमादेशो वर्तते।' इति। आदेशं पठित्वा, तत्पत्रके हस्ताक्षराणि च लिखित्वाऽहं प्रत्यागच्छामि" इति। विविधप्रकारकविकल्पात्मकचिन्तनं तदनन्तरं फलरूपमवधारणमिति विचारस्वरूपम्। सहजक्रियामूलप्रवृत्त्यादिक्रियास्तु विचारविस्तरविशेषमन्तरैवानायासेन प्रवर्तन्ते। यो दण्डेन मां ताडयति, अचिरेणाहमपि तस्य प्रत्युत्तरं ददामि। अथवान्यद्दण्डमानीय तमपि तथैव ताडयितुमिच्छामि। अथवा, स्वापेक्षया प्रतिद्वन्द्विनं बलवत्तरं दृष्ट्वा पलायितुमिच्छामि। प्रत्युत्तरदानं प्रतिशोधात्मिका क्रिया वा मूलप्रवृत्तिजन्या। एवमेव पलायनमपि मूलप्रवृत्तिरूपम्। अचिरेणैवैताः क्रिया अभिनिर्वर्तन्ते; किन्तु विचारश्चिन्तनं वा कालमपेक्षते। विविधविकल्पचिन्तनावसरस्त्वचिरात्प्रवर्तितक्रियासु न विद्यते। विविधैर्विकल्पैर्विचिन्त्य विशिष्टमेकं विकल्पं निश्चित्य तस्य स्वीकरणं 'विचारः' इत्यभिधीयते। विविधविकल्पचिन्तनमन्तराले सम्पद्यते। विचारात्मकचिन्तनेन संशयात्मका विकल्पा निराकृता भवन्ति। वस्तुस्वरूपं क्रियास्वरूपं वा कार्यकारणभावेनावधार्यते। तन्मूला या क्रिया प्रादुर्भवति सा 'प्रयत्नः' इति व्यपदिश्यते। अतश्चिन्तनकालेऽर्थाद् विषयप्रत्यक्षे तत्सम्बद्धक्रियाप्रादुर्भावे च यः कालो व्यत्येति, तस्मिन् नहि मानवोऽयं निष्क्रियोऽवतिष्ठते। बाह्यक्रियानिरोधे सत्यपि मानसव्यापारविशेषश्चिन्तनाख्यस्तु प्रचलत्येव। स एव मानसव्यापारः, यस्मिन् विविधविकल्पाः विचार्यन्ते, 'विचारः' इति व्यपदेशं भजते।

२. कल्पन(प्रतिमास्वरूपम्

विचाराः प्रत्ययैर्विनिर्म्मिता भवन्ति। विचारा हि वाक्यरूपा भवन्ति। प्रत्ययाश्च[1]

---

१. तुलनार्थम्—Idea.

कल्पनाप्रतिमापेक्षया जटिलतरा भवन्ति। केयं कल्पनाप्रतिमा[1] नाम? यदा वयं कमपि वस्तुविशेषं पश्यामः, यथा—गाम्, चत्वरम्, गृहं वा, तत्प्रत्यक्षानन्तरं यन्मानसं चित्रं प्रतिबिम्बं वा संस्कारमयमवशिष्यते, तत्कल्पनाप्रतिमेति संज्ञां बिभर्ति। प्रत्येकं पदार्थो यश्चाक्षुषादिप्रत्यक्षं जनयति, स स्वानुरूपकल्पनाप्रतिमामप्युत्पादयति। प्रत्यक्षोत्थकल्पनाप्रतिमाः प्रतिपुरुषं गाम्भीर्य-व्यपेक्षातो भिद्यन्ते। कस्यचित्पुरुषस्य चाक्षुषकल्पनाप्रतिमा वस्तुसविकल्पप्रत्यक्षमिव वर्णाकृति-विशेषयुक्ता भवति, किन्तु नहीतरस्य पुरुषस्य कल्पनाप्रतिमा चाक्षुषी तथाविधगभीरत्वपारदर्शित्व-समुपेता भवति। किञ्च, भवन्ति तत्र कल्पनाप्रतिमाविशेषयुक्ताः पुरुषविशेषाः। केषाञ्चन पुरुषाणां चाक्षुषकल्पनाप्रतिमा विशेषेण जायन्ते। अन्येषाञ्च शाब्दकल्पनाप्रतिमाः प्रकृष्टतमा भवन्ति। सन्ति चान्ये येषां स्पार्शनकल्पनाप्रतिमाः, अथवा घ्राणजकल्पनाप्रतिमा एव सातिशया गमीराश्च भवन्ति। कल्पनाप्रतिमाः प्रत्ययाश्च पूर्वानुभवसंस्कारजन्या भवन्ति। प्रत्ययानामपेक्षया कल्पना-प्रतिमासु पूर्वानुभवसंस्काराणामाधिक्यं विद्यते। पूर्वानुभवसंस्कारोत्थाः कल्पनाप्रतिमाः स्मृत्यात्मक-कल्पनाप्रतिमा[2] इत्यभिधीयन्ते। भाविविषयाः कल्पनाप्रतिमा आशामय्य[3] इति व्यपदिश्यन्ते। सन्ति हि काश्चन कल्पनाप्रतिमा यासु कालादिभेदजनकं किमपि प्रयोजकं नास्ति। भूतभविष्यदादि-भेदविरहिताः कल्पनाप्रतिमा हि खलु स्वच्छन्दा[4] इति निगद्यन्ते। कल्पनाप्रतिमानां क्रिया-कारित्वं स्मृतिकल्पनाविचारादिमानसिकव्यापारेषु प्राचुर्येण समुपलभ्यते।

३. प्रत्ययस्वरूपम्

उक्तमेवास्माभिर्यत् प्रत्ययाः कल्पनाप्रतिमापेक्षातो जटिलतरा भवन्तीति। सविकल्पक-निर्विकल्पकप्रत्यक्षयोः प्रागुक्तयोर्मध्ये यदन्तरं विद्यते, तदेव प्रत्ययकल्पनाप्रतिमयोर्मध्येऽवतिष्ठते। वस्तुतत्त्वस्य यन्मौलिकं तद्भवति तत्प्रकारकं स्वरूपमालोचनज्ञाने समुपलभ्यते, तदधिकमेवानुव्याख्यानपुर-स्सरं सविकल्पकप्रत्यक्षे समुपलभ्यत इति तु पूर्वं वयमवोचाम। एवम्प्रकारेणैव प्रत्ययः कल्पना-प्रतिमाया अपेक्षातः सातिशयो भवति। तदुक्तं हि स्टाउटमहोदयैः प्राध्यापकप्रवरैर्मनोविज्ञान-विशारदैः—"प्रत्ययो हि कल्पनाप्रतिमाया ऋते तथैव नोत्पत्तुमर्हति, यथा निर्विकल्पकं प्रत्यक्ष-मन्तरा सविकल्पकं प्रत्यक्षं नैवोत्पत्तुं प्रभवति। किन्तु यथा सविकल्पकं प्रत्यक्षं निर्विकल्पकज्ञान-सदृशमेव न भवति, तथैव प्रत्ययोऽपि कल्पनाप्रतिमासदृश एव न भवति। कल्पनाप्रतिमा प्रत्ययनिर्माणाङ्गभूता भवति। तदधिकमहत्त्वपूर्णमङ्गं प्रत्ययनिर्माणस्य अर्थोऽस्ति, यं कल्पना प्रतिमाभिव्यञ्जयति[5]" इति। यदा वयं महात्मगान्धिमहोदयानां कल्पनाप्रतिमां स्मरामः, सा हि

---

१. तुलनार्थम्—Image.

२. तुलनार्थम्—Memory images.

३. तुलनार्थम्—Anticipatory images.

४. तुलनार्थम्—Free images.

५. द्रष्टव्यम्—G. F. Stout, "A manual of Psychology," page 529 (University Tutorial press, edn. 1913)

"An idea can no more exist without an image than perception can exist without sensation. But the image is no more identical

खलु न तद्विधं गभीरत्वं प्रोज्ज्वलत्वञ्च बिभर्ति, यद्विधं तेषां प्रत्यक्षदर्शनमासीद् वर्णाकृतिप्राकट्य-व्यपेक्षया। अपि च, महात्मगान्धिनो राष्ट्रपितुः कल्पनाप्रतिमा अपि प्रकरणानुसारं तात्पर्यानुसारं च प्रतिपुरुषं भिद्यन्ते, एकैकस्य पुरुषस्य वा परिस्थित्याकाङ्क्षादिभेदानुसारं ता भिद्यन्ते। उदाहरणतया राजनीतिज्ञस्तस्य सत्याहिंसानीतिपुरस्सरदेशस्वातन्त्र्यप्रदात्रीं मूर्त्तिं कल्पनाप्रतिमारूपतयादधाति; काचन महिलोपदेशिका तस्य कल्पनाप्रतिमां स्त्रीजातिसमानाधिकारसिद्धान्तप्रवर्तकरूपामादधाति; हरिजनैश्च तस्य शूद्राणां सामाजिकराजनीतिकसमानाधिकारसिद्धान्तप्रवर्तकरूपा कल्पनाप्रतिमा आधीयते। प्रकरणभेदात् तात्पर्यभेदाच्च अर्थभेदेन समुपोढा कल्पनाप्रतिमा जायते। एक एव पुरुषः, अतो विविधसमयेषु विविधकालेषु विशिष्टां कल्पनाप्रतिमामेकस्यैव वस्तुनोऽनुभवति। अर्थविशेषयुक्ता कल्पनाप्रतिमा हि खलु प्रत्ययव्यपदेशेन प्रथते। परस्परं सम्बद्धाः प्रत्ययाः पदान्वयमुखेन वाक्यरूपं विचारं जनयन्तीति विशेषः।

४. प्रत्ययभेदाः

प्रत्यया द्विविधा भवन्ति—मूर्तप्रत्ययाः, अमूर्तप्रत्ययाश्चेति। अमूर्तप्रत्यया[1] भावप्रत्यया[2] इति यावत्। रमेशमहाशयानामश्वस्य प्रत्यक्षज्ञानानन्तरं कश्चन प्रत्ययविशेषस्तद्विषयको मयाधीयते, सोऽश्वप्रत्ययो मूर्तप्रत्यय इत्यभिधीयते, मूर्तवस्तुसम्बन्धित्वात्। दृश्यवस्तुसम्बन्धी प्रत्ययोऽयं मूर्तप्रत्यय इति व्यपदिश्यते, सत्याहिंसास्तेयादिप्रत्यया हि खल्वमूर्तप्रत्यया इति व्यपदिश्यन्ते; भावगोचरवस्तुविषयत्वात्। नहि सत्यं मूर्तं वस्तु, अपि तु भावमात्रगोचरम्। अत एव तस्य प्रत्ययोऽपि नूनममूर्त एवेति। एवम्प्रकारेण प्रशंसाप्रत्ययोऽमूर्त एव मन्तव्यः। शूकरकुक्कुटवृक्षगृहदृश्यविशेषादिप्रत्यया मूर्तप्रत्यया अवगन्तव्याः।

प्रत्ययानामपरो विभागोऽप्यनुमन्यते मनोवैज्ञानिकैः। तथा हि प्रत्यया द्विविधा भवन्ति—सामान्यप्रत्ययाः, विशेषप्रत्ययाश्चेति। रमेशाश्वस्य यः प्रत्ययो मम वर्तते, स विशेषवस्तुसम्बन्धित्वाद् 'विशेषप्रत्यय' इति व्यपदेशेन प्रथते। एवम्प्रकारेण मदीयायाः कृष्णाया गोर्यः प्रत्ययोऽद्य मयि विद्यते, स विशेषवस्तुसम्बन्धित्वाद् 'विशेषप्रत्यय' इति संज्ञां बिभर्त्ति। किन्तु शूकरजातिप्रत्ययः 'सामान्यप्रत्यय' इत्युच्यते। वृद्धविषयकप्रत्ययो द्विविध एव भवितुमर्हति, प्रकरणविशेषात्। मम पितामहस्य यः प्रत्ययः पलितकेशवलितत्वगित्यादिविशेषणयुक्तः, स वृद्धत्वप्रत्ययो विशेषप्रत्ययतां भजते। परन्तु सर्वान् वृद्धानधिकृत्य यः प्रत्ययो मय्युत्पद्यते, स नूनं 'सामान्यप्रत्ययः' इति। एवम्प्रकारेणाङ्गलदेशीयव्यक्तिविशेषस्य हैलेटगवर्नरमहोदयस्य निरङ्कुशशासकस्य मयि यः प्रत्ययो विद्यते, स विशेषप्रत्ययः। तस्यैवोद्बोधनं प्रसङ्गवशात्तात्पर्यवशादाकाङ्क्षावशाद् वा जायते, नहि खल्वाङ्गलदेशीयजनसामान्यप्रत्ययस्य। किन्तु वारं वारमाङ्गलदेशीयव्यक्तिविशेषान् संदृश्य, तैः सह व्यवहारम्, राजनीतिकम्, सामाजिकम्,

---

with the idea than sensation is identical with perception. The image is only one constituent of the idea, the other more important constituent is the meaning which image conveys."

१. तुलनार्थम्—Concrete ideas.

२. तुलनार्थम्—Abstract ideas.

ज्ञानार्जनात्मकं वा कृत्वा मम मनसि यः प्रत्ययो जायते, स वै 'सामान्यप्रत्यय' इति निगद्यते; यतो हि स आङ्गलदेशीयसमस्तमानवानां संस्कारैर्वासितो भवति। बाल्ये सर्वे प्रत्ययाः मूर्तप्रत्ययाः, विशेषप्रत्ययाश्च भवन्ति। कालक्रमेण बुद्धिप्रकर्षानुसारं सामान्यप्रत्ययानाममूर्तप्रत्ययानां चाविर्भावो दृश्यते। कथमेते सामान्यप्रत्यया जायन्ते ?—इतीदानीं वयं विवेचयामः।

५. सामान्यप्रत्ययप्रादुर्भावः

ननु कथं सामान्यप्रत्यया जायन्ते ? एवम्प्राप्तायामाशङ्कायां वयं ब्रूमः—बाल्ये प्रथमतो विशिष्टवस्तुविषयकाणां प्रत्ययानामेव प्रादुर्भावो जायते। यथा वृद्धादेशम् 'गामानय' इति श्रुत्वा गाञ्च तदनन्तरमानीयमानां दृष्ट्वा कश्चिच्छिशुः प्रत्येति—'अयं गौः' इति, वारं वारं यदा स तं पशुं पश्यति, 'गौरायाति' इति वदति। किन्तु यदैकदा अश्वमपि धावन्तं स 'गौरायाति' इति वदति, तदा वृद्धस्तस्य स्खलितं परिमार्ष्टुं यतते। यथा हि—"नायं गौः, अयं हि खल्वश्व इत्यभिधीयते। अन्यच्च, अयमश्वो धावति, न तु आयाति। स गौर्नूनं आयाति स त्वामभि मां प्रति च। किन्त्वयमश्वस्तु द्रुतमागच्छति। तत आगत्य द्रुतमेव दूरं गच्छति। अतो जना ब्रुवन्ति, 'अश्वो धावति' इति। सास्नाशृङ्गद्वययुक्तो हि गौरिति पशुः। गौर्दुग्धं ददाति, किन्तु अयमश्वस्तु शृङ्गादिविहीनः दीर्घग्रीवः। नहि अश्वो दुग्धं ददाति। त्वं तु गोदुग्धं प्रतिदिनं प्रातः पिबसि" इति। शिशुस्तदा अश्वेन सार्धं गोस्तुलनां करोति, पार्थक्यं चाश्वादवगच्छति। तदनन्तरं यदा गामायान्तीं गच्छन्तीं वा पश्यति स शिशुस्तदाञ्जसैव वदति—'गौरायाति, गौर्गच्छति' इति। 'इमे गावो गच्छन्ति' इति च। अतोऽनन्तरं कतिपयानि वर्षाणि यावत् शैशवे विशिष्टप्रत्ययानामेव शिशोरनुभवे प्राचुर्यं जायते। किन्तु तदनुभवपरिपाके क्रमशोऽश्वगवादिसामान्यप्रत्ययानामाविर्भावः समुपलभ्यते। विशिष्टप्रत्ययानामनुभवावसरे तत्तद्वस्तुजन्यकल्पनाप्रतिमाः प्रत्ययसहकृता भवन्ति, प्राय उज्ज्वलाश्च तास्तदा। अत एव सामान्यप्रत्ययनिर्म्माणे एते पञ्च सोपाना अनुभवपथमारोहन्ति। ते यथा—निरीक्षणम्, सन्तुलनम्, पृथक्करणम्, जातिनिर्देशनम्, लक्षणनिर्धारणञ्चेति।

(अ) निरीक्षणम्[1]

वारं वारं गोदर्शनं निरीक्षणम्। प्रथमं गोदर्शनेन वस्तुविषयकं शुद्धमालोचनं ज्ञानं जायते। तस्मात् स्फुटं सविकल्पकं प्रत्यक्षमुदेति। सविकल्पकप्रत्यक्षज्ञानं बाह्यस्य वस्तुनो विषयीभूतस्य मानसं प्रतिबिम्बं भवति। अथवा बाह्यवस्तुनः मानसी प्रतिकृतिर्ज्ञानमयी हि तत्। तस्यैव 'प्रत्यय' इति व्यपदेशो मनोविज्ञाने प्रथते। द्वितीयं वारं यदा गोः सविकल्पकं प्रत्यक्षमुदेति, नहि तच्छुद्धवस्तुजं भवति, अपि तु प्रथमवारोत्पन्नेन गोप्रत्ययेन या कल्पनाप्रतिमा चाक्षुषी जन्यते, तस्याः स्मरणसमवेतानुव्याख्यानसंवलितं द्वितीयं सविकल्पकं प्रत्यक्षं भवति। अतो द्वितीयवारं सविकल्पकप्रत्यक्षज्ञानप्रत्यये नूनमालोचनज्ञानं पूर्वचाक्षुषकल्पनाप्रतिमा च समाश्लिष्टे अनुव्याख्यानाङ्गभूते भवतः। निरीक्षणं नाम नितरामीक्षणम्। अवहितस्य पुंसो वस्तुसविकल्पकप्रत्यक्षज्ञानं कल्पनाप्रतिमादियुक्तं यदुदेति, तस्य सर्वस्य निरीक्षणेऽन्तर्भावः।

---

१. तुलनार्थम्—Observation.

नहि निरीक्षणं ध्यानापेतं कदापि भवति। ध्यानाख्यमनोव्यापारस्य प्रतिपदं सक्रियत्वमत्र समुपलभ्यते। जिज्ञासुश्च प्रमाता भवति।

(आ) सन्तुलनम्[1]

सन्तुलनं नाम सामान्यप्रत्ययनिर्म्माणे द्वितीयः सोपानः। प्रथमां गां द्वितीयया गवा सह तुलयति, द्वितीयायाः प्रथमायाश्च सन्तुलनं तृतीयया सह शिशुः करोति। सास्नाशृङ्गविहीनादश्वात् पार्थक्यमपि स उन्नयति। व्यावर्तकगुणाश्च वारं वारं प्रत्यक्षेण स्फुटाः स्वयमेव भवन्ति। वृद्धव्यवहाराद् वृद्धवाक्यश्रवणाद् बालोऽचिरेणैव पदार्थमुन्नेतुं समर्थो भवति।

(इ) पृथक्करणम्[2]

विशिष्टगुणान् कृष्णपिङ्गलकर्बुरवर्णदीर्घह्रस्वाद्याकारविशेषमयान् विहाय सामान्यगुणानां पृथक्करणं परमावश्यकं सामान्यप्रत्ययनिर्म्माणाय, वस्तुसामान्यप्रतिपत्तये च। तच्चानुभवपरिपाकेनैवायाति। वृद्धोपदेशाच्च सुकरं जायत इति बोद्धव्यम्।

(ई) जातिनिर्देशनम्[3]

सामान्यगुणानां पृथक्करणेन सामान्यप्रत्ययनिर्म्माणं विशदीक्रियते। किन्तु स्पष्टतरं सामान्यप्रत्ययाधानं तदैव सम्पद्यते, यदा जातिनिर्देशनमभिनिर्वर्तते। 'इमे गावः' इति कथनेन 'इमे सर्वे गावः' इत्युन्नेतुं शिशुः स्वयमेव प्रभवति। तच्च 'सास्नादिमान् गौः' इत्येवम्प्रकारकलक्षणविशेषोपकथनेनैव सम्भाव्यते। जातिनिर्देशनञ्च जात्याश्रयगतसामान्यगुणानां प्रतिपत्त्येति। अयं चतुर्थः सोपानोऽवसेयः।

(उ) लक्षणनिर्धारणम्[4]

लक्षणं नाम अनतिप्रसक्तव्यापकसामान्यगुणानामवधारणम्। यद्यपि जातिनिर्देशने सामान्यगुणावबोधो भवत्येव, तथापि लक्षणावधारणं पुनः परीक्षणेन सम्पाद्यते। अत एवोदारवैज्ञानिकशैल्युद्भावितसामान्यगुणसमुच्चये परिष्कारोऽभिनिर्वर्तते कदाचन लक्षणावधारणसोपान इति सर्वमवदातमेव।

६. अन्विताभिधानवादाभिहितान्वयवादमतसादृश्यम्

अत्रान्विताभिधानवादिनां प्राभाकराणां मतं विशेषत उल्लेखनीयमस्ति। प्रागुक्तसोपानानां विवेचनमन्विताभिधानवादिनां शब्दशक्तिविवेचनविषये पदं लभते। "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' इति सूत्रं गुरुमतानुयायिभिः शब्दशक्तिविषयेऽपि समाकृष्यते। वाक्यप्रामाण्यनिश्चयो वेदप्रामाण्यनिश्चयो वा वाक्यार्थबोधपरम्परया सङ्गतिग्रहणायत्तो भवति। सङ्गतिग्रहणं च वृद्धव्यवहारायत्तं भवति। व्यवहारस्य च लोके कार्यैकनियतत्वमुपलभ्यते। नह्यस्ति

---

१. तुलनार्थम्—Comparison.
२. तुलनार्थम्—Abstraction.
३. तुलनार्थम्—Generalisation.
४. तुलनार्थम्—Definition.

सम्भवः शब्दानां कार्येऽर्थे सङ्गतिग्रहः सिद्धार्थाभिधायकत्वम्, तत्र वा प्रामाण्यमिति। नहि तुरङ्गत्वे गृहीतसङ्गतिकं तुरङ्गपदं गोत्वमाचष्टे तत्र वा प्रामाण्यं भजते। तस्मात् कार्ये गृहीतसङ्गतिकानां शब्दानां कार्य एव प्रामाण्यम्" इति[1]। भाट्टास्तु अभिहितान्वयवादमङ्गीकुर्वन्ति। तेषां मते सिद्धार्थपराणां शब्दानां प्रामाण्यमपि सिद्ध्यति। किन्तु विशिष्टप्रत्ययावबोधे बाल्यकाले कार्यैकनियतव्यवहारजन्यो हि शब्दसङ्गतिग्रहो भवतीति तु द्वयोर्वादिनोरभिमतम्। कालान्तरे सिद्धार्थपरकपदार्थानामपि प्रामाण्यं सिध्यति। अद्वैतवादिभिः भाट्टमतानुसरणमेव शब्दशक्तिविषये क्रियते। अत्रेदं स्मरणीयं यद्धि मनोवैज्ञानिकानामभिरुचिः प्रत्ययनिर्म्माणे यथावस्तुभूते वर्तते, किन्त्वन्विताभिधानवादिनामभिहितान्वयवादिनाञ्च विवेचनं वेदप्रामाण्यमनुगृह्य शब्दशक्तिप्रपञ्चनं करोति। अर्वाचीनमनोवैज्ञानिकानामन्विताभिधानवादिनाञ्च महत्सादृश्यं विशिष्टमूर्तप्रत्ययनिर्म्माणमधिकृत्य वर्तते। अभिहितान्वयवादिनामर्वाचीनमनोवैज्ञानिकानाञ्च सादृश्यं प्रौढानां प्रत्ययनिर्म्माणमभिलक्ष्य विशेषतोऽवगन्तव्यम्। प्रौढानामनुभवे मूर्तप्रत्ययानां स्थानेऽमूर्तप्रत्ययाः सामान्यप्रत्ययाश्च प्राचुर्य्येण समुपलक्ष्यन्ते। अत एव सिद्धार्थपरकवाक्यानामपि प्रामाण्यमर्वाचीनमनोविज्ञानदृष्ट्योपपद्येत।

७. प्रत्ययसम्बन्धनियमाः[2]

धारावाहिकप्रत्ययप्रवाहरूपा हि खलु विचारक्रिया। तस्यां प्रत्ययेषु परस्परं केचन सम्बन्धा जायन्ते। तैर्विना वाक्यान्तर्गतप्रत्ययानां सङ्गतिर्नोपपद्यते। अरस्तूमहोदयेन यवनदेशीयदार्शनिकप्रवरेण सान्निध्यनियम एव व्याख्यातः। तदनन्तरं विविधैर्दार्शनिकैर्मनोवैज्ञानिकैश्च प्रत्ययसम्बन्धनियमानां विशदतो व्याख्यानं स्वकीयग्रन्थेषूपनिबद्धम्। वयमत्र तान् नियमान् संक्षेपतोऽनुव्याख्यास्यामः। तत्रैते नियमा भवन्ति—

(अ) सान्निध्यनियमः[3]।
(आ) सादृश्यनियमः[4]।
(इ) वैषम्यनियमः[5]।
(ई) तारतम्यनियमः[6]। इति।

वयमेतान् प्रतिपदमनुव्याख्यास्यामः।

(अ) सान्निध्यनियमः—सान्निध्यनियमेनेदं प्रतिपाद्यते यद्धि देशकालसान्निध्येन तत्रानुभूतप्रत्ययेष्वपि सम्बन्धा अभिनिर्वर्तन्ते। यथा काशीहिन्दूविश्वविद्यालयीयपुस्तकालयेऽस्माभिराचार्य्यबलदेवोपाध्यायमहोदयानां सर्वप्रथमं दर्शनं कृतम्। ततश्चासाद्यते गायकवाडपुस्तकालयप्रत्यक्षोत्थप्रत्ययविशेषस्याचार्य्यबलदेवोपाध्यानां गुरुवर्य्याणां प्रथमदर्शनोद्भूतप्रत्ययविशेषेण सह विषयसान्निध्यजः सम्बन्धविशेषः। यदा वयं काशीहिन्दूविश्वविद्यालयपुस्तकालयविशालभवन-

१. द्रष्टव्यः—सर्वदर्शनसंग्रहः, पृ० १५१ (आनन्दाश्रमसंस्करणम्)
२. तुलनार्थम्—Laws of the Association of Ideas.
३. तुलनार्थम्—Law of contignity.
४. तुलनार्थम्—Law of similarity.
५. तुलनार्थम्—Law of contrast.
६. तुलनार्थम्—Law of continuity.

स्याद्यं दर्शनं स्मरामः, पुस्तकालयभवनप्रत्ययेन सह वयं गुरुवर्याणां दर्शनोत्थप्रत्ययमपि स्मरामः। एकदेशे समवधानाद् एकानुभवप्रत्ययोऽपरानुभवप्रत्ययेन सह सम्बन्धं बिभर्ति। एवम्प्रकारेणैकस्मिन् काले घटितानुभवप्रत्यया अपि परस्परं सम्बद्धा जायन्ते। अस्तु तर्हि देशसान्निध्यसम्बन्धः कालसान्निध्यसम्बन्धश्चानुभवप्रत्ययानाम्। किन्त्विदं स्मरणीयं यदेकघटनासम्बद्धप्रत्ययेषु बहुषु सत्स्वपि कश्चनैक एव स्मृतिपटले जागर्ति, यथाचार्य्यबलदेवोपाध्यायदर्शनानुभवप्रत्ययः, न त्वन्ये। कथं तदासाद्यत इति तु वयमग्रे विचारयामः।

(आ) सादृश्यनियमः—समानवस्तुप्रत्ययाः सादृश्यसम्बन्धोपनिबद्धा जायन्ते। 'अनेन सदृशी मदीया गौः' इत्यस्मिन्ननुभवे द्वयोरेव गोप्रत्यययोः सादृश्यमासादितप्रत्ययसम्बन्धविशेषं विद्यते। प्रायः कश्चन आगन्तुक आगत्यैवं कथयति—'अमुकवस्तु मद्वस्तुसदृशम्' इति। पानीपते सञ्जातं तृतीययुद्धं द्वितीयं प्रथमञ्च युद्धं भृशं स्मारयति। केन कारणेन? सादृश्यप्रत्ययसम्बन्धगोचरत्वात्।

(इ) वैषम्यनियमः सादृश्याभावो हि वैषम्यं भवति। स्वरूपवैषम्येणापि प्रत्ययसम्बन्धो जायते। बालकप्रत्ययेन बालिकाप्रत्ययोऽपि स्मर्यते, विरुद्धलिङ्गत्वात्। कृष्णवर्णा गौः पिङ्गलां स्मारयति। कस्मात्? प्रत्ययस्वरूपवैषम्यासादितसम्बन्धत्वात्। अनृतं कस्यचिद् व्यापारिणोऽन्यस्य व्यापारिणः सत्यनिष्ठत्वप्रत्ययं जनयति। अस्तु तर्हि वैषम्यप्रयुक्ताः प्रत्ययसम्बन्धाः सिद्धा इति।

(ई) तारतम्यनियमः—प्रागुक्तमेवास्माभिर्यद् धारावाहिकतारतम्ययुक्तं रूपं ह्यस्माकं विचारक्रिया बिभर्ति। नहि केवलं देशकालसान्निध्यसादृश्यवैषम्यप्रत्ययसम्बन्धा एव जायन्ते, अपि तु कालक्रमापादितोऽप्यपरः प्रत्ययसम्बन्धः समुपलभ्यते। कश्चन घटनाप्रत्ययस्तदनन्तरकालिकां घटनां घटनाहेतुं वा स्मारयति, स चान्यम्। एवम्प्रकारेण पौर्वापर्यसम्बन्धोपनिबद्धाः प्रत्ययाः नैरन्तर्येण जायमानां विचारशृङ्खलां जनयन्ति। पौर्वापर्यसम्बन्धस्य केचन मनोवैज्ञानिकाः सान्निध्यसम्बन्ध एवान्तर्भावमिच्छन्ति। अन्ये च केचन मिलप्रभृतयश्चतुर्णामेव[१] प्रत्ययसम्बन्धानां सान्निध्यसम्बन्ध एवान्तर्भावत्वं प्रतिपादयन्ति[२]। तन्मते सादृश्येन वैषम्यप्रत्ययोऽपि जायते। सान्निध्ये च सादृश्यवैषम्यतारतम्यादिजन्यप्रत्ययानां प्रादुर्भावः स्वत एवोपलभ्यते। अत एव सान्निध्यनियम एव समादरणीय इति तेषामभिसन्धिः। नहि वयमेतादृशं कल्पनालाघवमाद्रियामहे। परमरमणीयं कल्पनालाघवं वैयाकरणानां सुरभारतीसेवासक्तमानसानां सुप्रथितमेव सर्वेषां प्रेक्षावताम्। तदुक्तं हि महाभाष्ये—"अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः" इति। किन्तु तेऽपि शब्दादर्थबलीयस्त्वमङ्गीकुर्वन्ति। परन्तु यथा भूतमानसव्यापाराध्ययनपरं हि मनोविज्ञानतन्त्रम्। अनुभवसिद्धं हि खल्विदं यदुपर्युक्ताश्चत्वार एव प्रत्ययसम्बन्धाः प्रत्ययेषु पारस्परिकसम्बन्धवैशारद्याय कल्पन्ते। स्मरणेऽप्येतेषां समुपयोगो यथा क्रियते तथा वयं व्याख्यास्यामः। संस्कारसमुद्बोधने तारतम्ये ज्ञातेऽपि देशसान्निध्यज्ञानं विना, कालसान्निध्यप्रत्ययं

१. द्रष्टव्यः—James mill, "Analysis of the Phenomena of the Human mind" (edn 1829)

२. द्रष्टव्यः—An out-line of Educational Psychology (Revised) Barnes & Noble, page 79.

विना, अथवा सादृश्यवैषम्यप्रत्ययस्मरणं विना तारतम्यसम्बन्धोऽपि प्रकृतप्रत्ययसम्बन्धनिर्देशनायाकिञ्चित्करः। नहि तारतम्यप्रत्ययसम्बन्धोऽपि तान् प्रत्ययसम्बन्धानन्तरा स्वयं स्फुटीभवति। अतश्चत्वार एव प्रत्ययसम्बन्धा अनुभवोपात्ता इति युज्यते।

८. प्रत्ययसम्बन्धनियमविमर्शः

एवं सिद्धाः प्रत्ययसम्बन्धाः। सुतरामेकः प्रत्ययोऽपरेण प्रत्ययेन बहुभिश्चापि प्रत्ययैः सह सम्बद्धो भवति। एकदा प्रत्ययविशेषः कं प्रत्ययमुद्बोधयितुं प्रभवतीति कथं निश्चेतुं शक्यते? प्रत्ययसम्बन्धवादाभ्युपगमेन नूनं विचाराख्यमानसव्यापारस्य रासायनिकविश्लेषणकल्पं[1] विश्लेषणमभिनिर्वर्तते; किन्तु तस्य[2] गतिशीलत्वं नैव व्याख्यातुं शक्यते। उदाहरणतो गोदर्शनानन्तरं गोप्रत्ययेन गोपालकस्य स्मरणं भविष्यति, अथवा गोवत्सस्य, किं वा गोसदृशमदीयगोप्रत्ययोद्बोधनं भविष्यति, अथवा गोखाद्यस्य महार्घत्वस्येति कथं निश्चेतव्यमिति तु प्रत्ययसम्बन्धाभ्युपगममात्रेण प्रतिपाद्यते। कस्येतरप्रत्ययस्यावयुत्योद्बोधनं भविष्यतीति तु प्रत्ययाभ्यासकालसान्निध्योज्ज्वलत्वभावानुकूलत्वाकाङ्क्षातात्पर्यादिकारणजातायत्तं भवति। आदिपदेन सन्दर्भः संग्राह्यः। गोप्रत्ययेन सह वारं वारं दुग्धप्रत्ययस्यानुभूतत्वात् पौनःपुन्येन सम्पादितं दुग्धप्रत्ययोद्बोधनं सम्पद्यते। किन्तु यदि गोदर्शनात् प्रागेव तद्वत्सदर्शनं भवेत्तर्हि गोप्रत्ययो वत्सप्रत्ययमेव स्मारयति, यथा—'अयं गोवत्सोऽस्या एव गोरस्ति' इति। गोप्रत्ययेन दुग्धप्रत्ययोद्बोधनं पौनःपुन्येन दर्शनोत्थम्। गोवत्सस्य स्मरणं सादृश्यसद्भावे कालसान्निध्यापादितप्रत्ययातिरिक्तम्। अन्यच्च, वृद्धां महिलां संदृश्य यदा वयं स्वकीयां मातरं स्मरामस्तदा मातृमूर्त्तिः परमोज्ज्वलरूपेण दृष्टिपथं कल्पनापथं वा कल्पनाप्रतिमारूपतया समायाति। दृष्टिगोचरायाः पलितकेश्याः सौम्यमूर्त्तित्वं समुज्ज्वलं विस्पष्टं वा स्वमातृमूर्त्तिमत्यर्थमचिरेणैव स्मारयति, समानन्दयति चास्मान्। पूर्वं प्रत्ययोज्ज्वलत्वसम्पादितमेवेदमितरप्रत्ययावचयनम्। अपि च, सम्बन्धिप्रत्ययोद्बोधनाय वर्तमानभावानुकूलत्वमप्यपेक्ष्यते। यदा वयं मुदितास्तदा दीनेभ्योऽर्थिभ्यो यथाकामं भोजनवस्त्रद्रव्यादीनि वितरामः, मनागपि सङ्कोचविचारं न कुर्मः। किन्तु यदा वयं क्रुद्धास्तदा सत्पात्रायापि लघुद्रव्यमपि न दद्मः। तद्याच्ञा मोघैवावतिष्ठते। अस्माकं प्रमोदभावानुकूला हि प्रार्थियाच्ञा तदा भवति। किन्तु क्रोधभावेऽर्थिकृता लघुप्रार्थना खलु मनागपि नास्माकं सहानुभूतिं भजते। अनवसरे रुदन्तं प्रियमपि सुतं माता ताडयत्येव। किं कारणम्? तदानीन्तनभावप्रतिकूलत्वात् सुतक्रन्दनस्य। आकाङ्क्षाऽपि प्रत्ययावचयनाय कल्पते। पूर्वानुभवप्रत्ययेन काचन सन्दर्भानुकूलाकाङ्क्षा जायते तत्पूर्त्यर्थमितरप्रत्ययोद्बोधनं सम्पाद्यते विचाराख्यमानसव्यापारेण। यथा गोपालकेन सार्धं दुग्धमूल्यं वर्धयितुं या वार्त्ता प्रचलति स्म, तया गोखाद्यमहार्घत्वविषयकः प्रत्ययः स्वत एव स्मर्यते। प्रत्येकं वारं परिस्थितसमुद्भूतं सन्दर्भगतं वा प्रयोजनं यदस्माकं सम्मुखं प्रस्तुतं भवति, तदेव प्रत्ययावचयनाय कल्पते। कः प्रत्ययसम्बन्धो बलवत्तरः, केन कारणेन बहुषु सम्बन्धिप्रत्ययेषु सत्स्वप्येक एव प्रत्ययः समायातीति तु सर्वमस्माकं प्रस्तुतप्रयोजनायत्तम्। प्रयोजनाभिप्रेरितं हि ध्यानं प्रबलानपि

१. तुलनार्थम्—Chemical analysis.

२. तुलनार्थम्—Dynamic Cheracter.

सन्दर्भविशेषानतिक्रम्य स्वेच्छानुसारं स्वाभिरुच्यनुकूलं ध्यानं नयति। ध्याने हि मानसव्यापारस्य चरमं सक्रियत्वमुपलभ्यत इति तु वयं पूर्वमवोचाम। देशकालसान्निध्यादिप्रत्ययसम्बन्धाद्यपेक्षया ध्यानस्य तारतम्यं विशेषेण प्रत्ययोद्बोधनाय कल्पते। केचन शारीरिकमनोविज्ञानवेत्तारो मस्तुलुङ्गीयसंस्कारविशेषैः कर्षरूपैः प्रत्ययसम्बन्धान् व्याख्यातुं यतन्ते; तत्तु नेष्टम्। तन्मते सन्निकृष्टानुभवोद्भूतप्रत्ययानां मस्तुलुङ्गीयसूक्ष्मद्रव्येऽपि [1]कर्षरूपसंस्काराणां जायमानानां परस्परं सम्बन्धा अभिनिर्वर्तन्ते। सदृशसन्निकृष्टप्रत्ययोद्बोधने तत्तत्कर्षाणां तत्सम्बन्धिकर्षाणां क्रियाकारित्वं सदैव विद्यते। अत एव नाडीद्रव्यसंस्कारमयं खल्विदं प्रत्ययचयनमिति तेषां तात्पर्यम्। यथास्माभिः प्रागुक्तं सम्बन्धवादाभिमतं[2] नास्मभ्यं रोचते, तथैव प्रत्ययोद्बोधनस्य नाडीद्रव्यानुगतसंस्कारमयत्वमपि नास्मभ्यं रोचते। सन्ति हि प्रत्ययसम्बन्धा नूनम्; किन्तु तैरेव केवलं प्रत्ययचयनात्मकविचाराख्यमानसव्यापारस्य क्रियाशीलत्वं नोपपद्यते। एवमेव सन्ति हि खलु मस्तुलुङ्गीयकोमलनाडीद्रव्यानुगतकर्षाख्यसंस्कारविशेषाः; किन्तु तैरपि मानसव्यापारस्य प्रत्ययावचयपरस्य क्रियाशीलत्वं यथातथं व्याख्यातुं नैव शक्यते। नहि मानसव्यापारो नाम शारीरिकरासायनिकभौतिकपरिणाममात्रम्। मस्तुलुङ्गीयनाडीद्रव्यानुगतकर्षाणामभ्युपगमस्त्वस्माभिरपि क्रियते, किन्तु नाडीद्रव्यकर्षवादाख्यमैकान्तिकं मतं नाद्रियामहे। [3]कर्षवादानुसारं प्रत्ययचयनं शारीरिकभौतिकरासायनिकपरिणामाभिन्नमिति निश्चीयते। विचाराख्यव्यापारेऽभीष्टप्रत्ययचयनपरे चरमं चैतन्यक्रियाशीलत्वमुपलभ्यते। ध्याने हि प्रयोजनं तदापादिताभिरुचिश्च परमं प्रयोजकम्। लक्ष्यमवाप्तुं सर्वो विचारसन्तानः प्रत्ययसम्बन्धमयः प्रवर्तते। प्रत्ययचयनरूपता प्रयोजनायात्ता। या प्रत्ययसम्बन्धमयी विचारशृङ्खला प्रयोजनविशेषाऽभिप्रेरिता भवति, तस्यां यः प्रत्ययसम्बन्धो वर्तते, स नियन्त्रितः परिचालितो वा प्रत्ययसम्बन्ध इति निगद्यते। एतस्माद्व्यावृत्तः पृथग्भूतो यः प्रत्ययसम्बन्धः सोऽनियन्त्रतः स्वच्छन्दः प्रत्ययसम्बन्धो वा इत्यभिधीयते, यतो हि तस्मिन् किमपि दृश्यं चेतोऽभिमुखं प्रयोजनं नोपलभ्यते। तस्य प्रयोजनमस्त्येव, किन्तु तन्न दृश्यम्। जाग्रच्चैतन्यव्यापारेभ्यस्तत्प्रयोजनमुन्नेतुं न वयं शक्नुमः। तत्प्रयोजनं मनोविश्लेषणाख्यासामान्यमनोविज्ञानविधिनैव सूक्ष्मचैतन्यस्य तैजसाख्यस्य कारणचैतन्यस्य प्राज्ञाभिधस्य च रहस्योद्घाटनेनैव कथञ्चिद् दृष्टिपथमारोहति।

अतः परं वयं स्वच्छन्दप्रत्ययसम्बन्धस्य प्रयोगविवेचनं करिष्यामः।

६. स्वच्छन्दप्रत्ययसम्बन्धप्रयोगः[4]

प्रत्ययसम्बन्धमधिकृत्य परमोपयोगी हि खलु स्वच्छन्दप्रत्ययसम्बन्धप्रयोगः। अनेन न केवलं प्रत्ययसम्बन्धस्वरूपमेव स्फुटीक्रियते, अपि त्वनेकास्तिरोहितस्थायिभावग्रन्थयोऽप्याविर्भवन्ति, याः प्रमाता प्रकटयितुं नेच्छति, सामाजिकनैतिकमर्यादातिक्रमणभयात्। तेन तस्य स्वभावस्य चरित्रस्यावबोधोऽपि जायते। अस्य प्रयोगस्य विशेषतोऽसामान्यमनोविज्ञानविशारदा असामान्यमानसिकदशोद्घाटनायोपयोगं कुर्वन्ति। अस्य प्रयोगस्य विधिरेवम्प्रकारेण भवति—

---

१. तुलनार्थम्—Nervous traces.
२. तुलनार्थम्—Associationism.
३. तुलनार्थम्—Nervous trace theory.
४. तुलनार्थम्—Free association test.

प्रयोक्ता एकां बृहच्छब्दसूचीं निर्माय प्रतिशब्दं पठति। प्रयुक्तश्च पुरुषस्तं तं शब्दं श्रुत्वा तत्तत्सम्बन्धिशब्दोच्चारणपूर्वकमचिरेणैव प्रत्युत्तरं ददाति। एकं घटिकायन्त्रं स्वनियन्त्रितं[1] प्रयोक्तुः पार्श्वे विद्यते। यं शब्दं प्रयोगकर्त्ता उच्चारयति स 'उत्तेजकः शब्दः' इत्याख्यायते। यञ्च शब्दं प्रत्युत्तररूपेण स प्रयोगविषयीभूतमानव उच्चारयति स 'प्रतिक्रियाशब्दः' इति निगद्यते। यदा प्रतिक्रियाशब्द उच्चार्यते, तदा घटिकायन्त्रस्तम्भनं क्रियते। प्रतिक्रियाशब्दोच्चारणकालाकलनं च तथा सुकरं निष्पद्यते। अत्र स्मर्तव्यं यदा प्रतिक्रियाशब्दोच्चारणं कियत्क्षणानन्तरं जायते, तदा तत्र कस्याश्चिद् भावग्रन्थेर्बलात्तिरोहितायाः क्रियाकारित्वं वर्तते, येन स्वतः प्राप्तमपि जिह्वाग्रे तिष्ठन्तमपि, प्रत्ययसम्बन्धं तिरोहितं कर्तुमिष्यते; यदा चायं प्रतिक्रियाशब्दः प्रकटीभवति, तदेषदधिकः कालोऽपेक्ष्यते। चिरादागतेन प्रतिक्रियाशब्देन सहकृतमुखमुद्रावर्णभेदादिनिरीक्षणेन प्रयोक्ता मनोवैज्ञानिको भावग्रन्थिरूपविशेषस्य क्रियाकलापमनुमिनोति, निश्चिनोति च कथं स हि खलु परिहर्त्तव्य इति। अस्य स्वच्छन्दप्रत्ययसम्बन्धप्रयोगस्य [2]युङ्गमहाशयैर्भावग्रन्थ्यभिव्यक्तये परमोपयोगोऽनुव्याख्यातः।

अस्य प्रत्ययसम्बन्धप्रयोगस्यैकमुदाहरणं वयमुपस्थापयामः। कस्यचिद् हत्यापराधगवेषणपरमिदमुदाहरणम्। अपराधिनं प्रत्यनेके प्रश्नाः पृच्छयन्ते, किन्तु स तेषामुत्तरं समीचीनं न प्रदत्ते। प्रत्ययसम्बन्धप्रयोगेण पृच्छयमानायां शब्दसूच्यां केचनैतादृशाः शब्दाः सन्निविष्टा क्रियन्ते, येषां सम्बन्धिप्रत्ययोत्तरदाने प्रतिक्रिया किञ्चिच्चिरेण समायाति। एतादृशाः शब्दाः 'खड्गः', 'उत्तरीयकम्', 'वातायनम्', 'निशीथः' इत्यादयः सन्ति। निशीथे समागत्य स चौरो वातायनद्वारेण धनिकविशेषस्य कक्षे प्रविष्टवान्। खड्गेन तं निहत्य, धनमादाय च बहिर्गतवान्। तेन साहसिकेन गच्छतोत्तरीयकं स्वकीयं तत्रैव विस्मृतिवशात् परित्यक्तम्। कालान्तरे राजपुरुषैर्निगडितः स पृच्छयते प्रश्नशतानि। स्वच्छन्दप्रत्ययसम्बन्धप्रयोगविधिना निश्चीयते यद्धि खड्गनिशीथवातायनादिशब्दानां सम्बन्धिशब्दानामचिरेण प्रत्युत्तरं न समायाति। मुखविवर्णताभयानुभूत्यादीनि शारीरिकमानसिकलक्षणानि जायन्ते। तैश्चानुमीयतेऽपराधी सोऽस्तीति।

स्मरणीयं यद्धि स्वच्छन्दप्रत्ययसम्बन्धप्रयोगेण निष्पन्नमनुमानमेव किल्विषावधारणाय नालम्। तथाप्यस्त्येवेदमपराधस्य महत्त्वपूर्णं संसूचकम्। एवमस्य प्रयोगस्योपयोगित्वं कैश्चन मनोविज्ञानविशारदैः सामान्यमनोविज्ञानानामसामान्यमनोविज्ञानानां पुरुषाणामितरेतरव्यावर्तकत्वेनाप्यासादितम्। तत्त्वग्रतो वक्ष्यामः।

१०. स्वशासितप्रत्ययसम्बन्धः[3]

अस्माकं स्वस्थमानसिकदशायां दैनन्दिनमुपलभ्यमानो विचारप्रवाहो वै स्वशासितप्रत्ययसम्बन्धरूपः। एवंविधोऽयं विचारप्रवाहो निश्चितप्रयोजनसमारूढो भवति। नहि विचारव्यति-

१. तुलनार्थम्—Stop-watch.

२. तुलनार्थम्—C. G. Jung. "The Association mathod" American Journal cf psychology, 1910, PP. 219-269

३. तुलनार्थम्—Voluntary Association.

३०

रिक्तानां केषाञ्चनाप्यैकच्छिकप्रयत्नानां रूपं व्यवहार उपलभ्यते। अत एवोक्तं भवति हि लोके—"प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति। अत्र त्विदं विवेचनार्हं यद्धि प्रत्यक्षं सर्वं वर्तमानवस्तुस्वरूपोद्घाटनपरम्, स्मृतिश्चातीतानुभवसंस्कारासम्प्रमोषनिरता, विचारो नाम प्रौढतमोऽयं मानसो व्यापारश्च भाविवस्तुस्वरूपावधारणे तद्योगक्षेमसाधनीभूतप्रयत्नसौकर्यादि-निश्चयाय प्रसरति। विचारे हि खलु कल्पनारूपेण प्रयोजनानामुद्देश्यानां वा फलावधारणमिष्यते—अयं प्रयत्नोऽमुकफलान्वित एतत्फलविवर्जितश्च भविष्यतीति। नहि केवलं विचाराख्यमानस-व्यापारेण साध्य एव निश्चीयते, अपि तु तदुपयोगिसाधनान्यपि मृग्यन्ते। यमर्थं मानसं भौतिकं वाधिकृत्य प्रवर्तते तत्प्रयोजनम्। लक्ष्यावधारणमिव साधननिश्चयोऽपि महज्जाटिल्यं बिभर्ति। कथम्? साधनोपयोगिदेशकालादिपरिस्थित्या निखिलाया एवाकलनं क्रियते, अपि तु स्वक्रियाया इतरपुरुषेषु कः प्रभावो जनिष्यते? का च तेषां प्रतिक्रिया भविष्यति? इति सर्वं विचारेणैवा-कलय्यते। तद्यथा नीतिवचनं विचारस्य सर्वेक्षणत्वं प्रतिपादयति—

कः कालः कानि मित्राणि को देशः कौ व्ययागमौ।
कः शत्रुः का च मे शक्तिरिति चिन्त्यं मुहुर्मुहुः॥ इति।

विचारश्चायं धाराप्रवाहेण नैरन्तर्येण प्रचलति, तस्मिंश्चोर्मिरूपविविधमनोरथानामितरेतरा-न्वितानां बहुशाखः क्रियाकलापोऽहर्निशमुपलभ्यते। असामान्यमानसिकदशासु विचारशृङ्खलायां केषाञ्चन प्रत्ययानामनन्वितं रूपं जायत इति विशेषः।

११. विचारव्यापारस्य संश्लेषणविश्लेषणात्मकत्वम्[1]

नवीनपरिस्थित्या नवीनसमाधानानुसन्धानपरो हि विचाराख्यमनोव्यापारः। या परि-स्थितिश्चिन्त्यते, विचारविषयतयावतिष्ठते, सा वै नवीना; न तु प्राक्तनपरिस्थित्यनुकृतिरेव। पूर्वाभिन्ना परिस्थितिः स्मृतिं जनयति। पूर्वभिन्ना तु विचारमनुभवनात्मकम्। अत एव विचारक्लृप्तसमाधानमपि नवीनपरिस्थित्या नवीनमेवेत्यवगन्तव्यम्। ननु कथं हि विचारोऽ-भिनवसमाधानमाधत्ते? अथवा कथं वै विचाराख्यमनोव्यापारे प्रतिपदमभिनवत्वमासाद्यते प्रमात्रा? सत्यम्, विचारस्यावयवभूता सामग्री पूर्वानुभवोपात्ता। तस्या विश्लेषणं मूलभूत-प्रत्ययेषु विचारेण प्रथमतो निष्पन्नं भवति, ततश्च संश्लेषणाख्यव्यापारेण तेषामङ्गभूतप्रत्यया-नामभिनवविधिना संश्लेषणं क्रियते। नहि विचारसंश्लिष्टं रूपं प्रत्यक्षानुभवाभिन्नम्, भिन्नमस्य रूपं वै भवति। नवीनसाधनसमाधानव्याख्याद्याविष्कारोऽप्यत एव प्रमोदाय कल्पते। नहि विचारे पूर्वानुभवस्य पिष्टपेषणमेवोपलभ्यते, नाप्यन्यपुरुषस्यैव। पूर्वानु-भूतप्रत्यया अपि, अन्येषां विचारा अपि, विश्लेषणसंश्लेषणरूपसरोवरे निमज्ज्य, आत्मसाद् भूत्वा, तदनन्तरञ्च सज्जीभूयाभिनवस्वविचाराङ्गत्वमापद्यन्ते। पूर्वानुभवपिष्टपेषणं तु सर्वाधिकं स्मृत्यामुपलभ्यते। विचारश्च पूर्वापरसम्बन्धपुरस्सरोऽभिनवरीत्या साध्यसाधनस्वरूपावधारणात्मकः प्रयोजनेच्छानियन्त्रितप्रत्ययविश्लेषणसंश्लेषणमयो भवति।

रेलशकटस्येञ्जिनाभिधं यन्त्रं कथमाविष्कृतमित्यधिकृत्य वयमेकेनोदाहरणेन विचारा-नुगतविश्लेषणसंश्लेषणाख्यक्रियास्वरूपदिग्दर्शनं करिष्यामः। आङ्गलदेशीयो वाट्सनमहोदय[2]

१. तुलनार्थम्—Analysis and synthesis in thinking.
२. तुलनार्थम्—Watson.

एकदा महानसे जलपात्रमुत्ताप्यमानं (Boiling) दृष्टवान्, तस्यावरकपात्रं बहिर्निर्गच्छद्बाष्पप्रवेगेण ध्मायमानमासीत्। नहि तेन कदापि रेलशकटस्येञ्जिनं तत्सदृशं वा किञ्चिद्वस्तु पूर्वं दृष्टम्; किन्तु बाष्पप्रवेगं महानसे दृष्ट्वा तेनानुमितं यदि बाष्पशक्तेर्विधिवदुपयोगो भवेत्, तर्ह्ययं बाष्पवेगः शकटवाहकयन्त्रमिञ्जनाख्यमपि चालयितुं शक्नोतीति। बाष्पचालितमिञ्जनम्, तच्चालितं शकटं वा दृष्टचरं नैवासीत्। तथापि कल्पनया सूक्ष्मेक्षिकया तद्बाष्पप्रचालितेञ्जनस्य स्वरूपं तच्चालितशकटस्य स्वरूपं तेन सुविचारितम्। पूर्वानुभवानुगतप्रत्ययघटकानां प्रयोजनानुसारिप्रविभाजनं विश्लेषणम्। पृथग्भूतानां प्रत्ययघटकानां नवीनभावियोजनानिर्माणे साध्यसाधनेतिकर्तव्यताद्यवधारणार्थमुपयोगविशेषः संश्लेषणम्। नहि वाट्सनमहोदयेन रेलशकटस्य इञ्जनस्याविष्कारो यद्यपि सम्पादितस्तथापि तन्मतस्य चिन्तनेन भाविवैज्ञानिकानां स्टीफेन्सप्रभृतीनां मार्गः सुप्रशस्तो जातः, तच्चिन्तनपरिणामरूपेणैव कार्पासवस्त्रनिर्माणयन्त्रस्य बाष्पसाहाय्येन परिचालनं सुकरं जातम्।

विचाराख्यो व्यापारो गृहनिर्माणमिव भवति। तथा काष्ठलोहमृत्तिकाजलपाषाणचूर्णादीनि सर्वाण्येव सम्प्राप्तपूर्वाणि; किन्तु तेषां प्रकारविशेषेण संयोजनं यदाभिनिर्वर्तते, तदा रमणीयः प्रासादो दृष्टिगोचरो भवति। एवमेव विचाराख्यमानसव्यापारे वयं प्रत्यक्षावगतसामग्रीं मौलिकघटकेषु प्रत्ययभूतेषु प्रविभाज्याभिनवरीत्या संयोजयन्तोऽभिनवसमन्वितरूपे प्रयोजनानुकूले क्लृप्तविचारे तस्याः परिणतिं कुर्मः। अभिनवप्रत्ययसंश्लेषणस्य पथप्रदर्शनं प्रयोजनमेव करोतीत्यवसेयम्।

१२. भाषाविचारयोः सम्बन्धः

भाषामन्तरा विचार एव प्रसरं न लभते। प्रायो जना मन्यन्ते—भाषा विचाराभिव्यञ्जनायैव कल्पत इति। नूनं विचाराभिव्यञ्जनस्य भाषा परमोत्कृष्टं साधनम्। विचारोत्कर्षाय भाषाया महत्यावश्यकता वर्तते; परन्तु भाषा तु वस्तुतो विचारवाहनं भवति। विचारमात्रं भाषासाहाय्यं न केवलं स्वाभिव्यञ्जनाय, अपि तु स्वकीयस्वरूपनिर्धारणार्थमप्यपेक्ष्यते। तदुक्तं हि भर्तृहरिणा—

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥ इति[1]।

अर्वाचीनानां मनोवैज्ञानिकानां मतं परमोत्कृष्टशब्दब्रह्मवादिना भर्तृहरिणातीव स्फुटतया स्फोरितम्। सर्वं ह्यस्माकं लौकिकं ज्ञानं शब्दैरनुविद्धमिव अनुव्याप्तमिव भवतीति तेषां तात्पर्यम्। एकोऽपि प्रत्यय एवंविधो नोपलभ्यते, यस्य चिन्तनं शब्दादृते कर्तुं शक्येत, ज्ञानस्य प्रत्ययसमुच्चयोत्थस्य तु वार्ता कुतः! ननु किमृषीणां ज्ञानमात्मसाक्षात्काररूपं शब्दब्रह्मसाक्षात्काररूपं वा तादृशं न भवति यादृशे शब्दव्यापारो नोपलभ्यते? ऋषीणां ज्ञानं शब्दातीतं भवतु नाम, नहि तेनार्वाचीनमनोविज्ञानस्य मानवव्यवहाराध्ययनदक्षस्य किमपि प्रयोजनं साध्यते। यज्ज्ञानं तदलौकिकं शब्दातीतं भवतीति सर्वं साम्प्रतम्। तद्विषयमधिकृत्य भर्तृहरिर्ज्ञानं विशिनष्टि—

1. द्रष्टव्यम्—वाक्यपदीयम्।

ऋषीणां दर्शनं यच्च तत्त्वे किञ्चिदवस्थितम् ।
न तेन व्यवहारोऽस्ति न तच्छब्दनिबन्धनम् ॥ इति[1] ।

अलौकिकज्ञानेनैकरसेनाशब्देन मनोविज्ञानलक्ष्यं मानवव्यवहारस्य यथातथं निरूपणं तु नाभिनिर्वर्तयितुं शक्यते । अतः परमोपयोगितया लोकानामैहिकाभ्युदयदृष्ट्या लौकिकं ज्ञानं यस्मिन् समन्वित एकैकः प्रत्ययः शब्देन निष्पाद्यते, तदेवास्माकमस्मिन् ग्रन्थे प्रतिपाद्यम्; यद्यपि ह्यलौकिकज्ञानस्य स्वरूपावधारणं मनोविज्ञानस्य साङ्गोपाङ्गाध्ययनाय परमावश्यकमपरिहार्यं चेति व्याख्यातचरम् । मूर्तानुभवराशेः पृथक्कृता वै विचारसहकारिणः प्रत्ययाः । प्रत्ययास्तावदस्फुटा भवन्ति, यावन्न भाषामाध्यमेन तदभिव्यञ्जनं निष्पाद्यते । भाषा वै अमूर्तान् प्रत्ययान् मूर्तरूपत्वेन दृश्यत्वेनालङ्करोति ।

उदाहरणस्वरूपं शौचप्रत्ययो विचारणीयः । शुचेर्भावः शौचमिति । शौचाभावोऽशौचम् । यदि भाषामाध्यमेन शौचस्वरूपमभिव्यक्तं न भवेत्तर्हि तत्स्वरूपं स्फुटं न भवेत् । अपि च, शौचमिति प्रत्ययो बहुलार्थगर्भितः । अत एव कस्यचिदप्यन्यतमस्यार्थ उन्नेतुं शक्यते, अथ वा सर्वेषामेव युगपत् । स यथा—किन्नु अङ्गानां शौच एव शौचप्रत्ययस्य तात्पर्यम् ? किमुत शौचप्रत्ययेन मनःशुद्धिरभिव्यक्ता ? किं वा वचःशुद्धिरेव शौचप्रत्ययेनोन्नीयत इति ? नहि भाषामाध्यममन्तरा शौचप्रत्ययार्थावगमः कर्तुं शक्यते । भाषा वै प्रत्ययस्यात्मरूपस्य शरीरमिति निर्गलितोऽर्थः । भाषामाध्यमेन प्रत्ययः संज्ञाविशेषं लभते । संज्ञाविशेषेण तदभिव्यञ्जनं सुकरं भवति ।

किं तावत्प्रत्यया पूर्वं सम्भवन्ति ? किमुत भाषा ? भाषाया आविर्भावस्वरूपं त्वग्रे विचारयिष्यते । भाषा नाम प्राणिनां पुरुषाणां वा परस्परं विचारादानप्रदानसाधनीभूता । प्रत्ययानां विचाराङ्गभूतानां स्वतःसत्त्वन्तु प्रागेव प्रतिपादितम् । प्रत्ययो वै आत्मस्थानीयः, भाषा तु शरीरकल्पा । प्रत्ययपरिच्छेदस्तु भाषयैवाभिसम्पद्यते । विचारोत्कर्षे प्रायः सर्वेषामेव प्रत्ययानां चिन्तनं भाषागर्भितं भवति । किन्तु बालमूकानां प्रत्ययानुभवो भाषाविहीनो दृश्यते । शिशवः पिपासवोऽपि पानीयमिति वक्तुं न प्रभवन्ति । 'अँ' 'अँ' इत्येवम्प्रकारकं ध्वनिमस्फुटमेव कियच्चिरमनुवदन्ति । यदा तेषामभीप्सितं नावाप्यते, ते क्रन्दितुमारभन्ते । अत्र प्रत्ययानुभवः प्राक्कालिकोऽस्फुटश्च, ध्वनिस्तु तदनन्तरमुत्पद्यते । अस्पष्टो ध्वनिविशेष एवात्र 'भाषा' इति वयं वदामः । मूकानां भाषा इङ्गितमयी भवति । तेऽङ्गुलिनिर्देशमात्रेण स्वकीयभावान् प्रकटयन्ति । अपि च, प्रत्ययान् स्पष्टीकर्तुं स्पष्टतश्चिन्तयितुमभिव्यञ्जयितुञ्च भाषासाधनं नितान्तमपरिहार्यमिति तु वयं ब्रूमः ।

सेयं भाषा नूनं प्रत्ययस्याभिध्यानकेन्द्रीकरणार्थं परमपेक्ष्यते । भाषामाध्यमेन च विचारानुगतविश्लेषणसंश्लेषणाख्यौ मानसौ व्यापारौ बहुशाखौ सुसूक्ष्मौ च प्रसरतः । नव्यनैयायिकानां परिष्कारग्रन्थेषु प्रौढविज्ञानग्रन्थेषु परिनिष्ठितपारिभाषिकशब्दावलिषु च सर्वमिदं भाषासौष्ठवं केनाप्यवलोकयितुं शक्यते । येषां जनानां भाषाऽविकसितैवावतिष्ठते, तेषां विचारप्रकर्षोऽपि नोपलभ्यते । ज्ञानकलासंस्कृतिराजनैतिकसामाजिकविकासोऽपि तेषामत्यन्तं निम्नस्तरीयो विद्यते । वस्तुतो भाषाविचारयोरभिन्नतमः सम्बन्धो भवतीति विभाव्यम् ।

---

१. ब्रह्मकाण्डम्—वाक्यपदीयम् ।

१३. वैयाकरणमतम्—स्फोटवादः

तत्र वैयाकरणदर्शनानुसारिणः शब्दार्थयोर्नित्यसम्बन्धमङ्गीकुर्वन्ति। शब्दो नित्यः। नहि ध्वनिरनित्य एव शब्द इति वक्तुं शक्यते। नित्यशब्दस्य ध्वनिस्त्वभिव्यञ्जक एव। अन्यथा कथं 'क' 'क' इति दशवारमुच्चारणेऽपि 'क' इति वर्णस्यैवावगमो भवेत्? स च शब्दो निरवयवो वर्णक्रमहीनो नित्यश्च, स च तन्मते स्फोटाख्यः। अतो वर्णातिरिक्तो वर्णाभिव्यङ्ग्योऽर्थप्रत्यायको नित्यः शब्दः[1]। स्फुटत्यर्थोऽस्मादिति स्फोटः। सन्ति स्फोटस्य अष्टौ प्रकाराः, यथा–(१) वर्णस्फोटः, (२) पदस्फोटः, (३) वाक्यस्फोटः, (४) अखण्डपदस्फोटः, (५) अखण्डवाक्यस्फोटः, (६) वर्णजातिस्फोटः, (७) पदजातिस्फोटः, (८) वाक्यजातिस्फोटश्चेति[2]। एतत्सर्वं पण्डितप्रवरेण बालकृष्णपञ्चोलिमहोदयेन वैयाकरभूषणसारस्य प्रभाटीकायां श्रीमद्रामाज्ञापाण्डेयमहोदयेन च स्वकीये 'वैयाकरणं दर्शनम्'[3] इति गवेषणापूर्णग्रन्थे सपरिकरं प्रपञ्चितम्। श्रीमद्रामाज्ञापाण्डेयमते तु षोडशप्रकारकः स्फोटो भवतीति विशेषः। वाक्यस्फोटो हि खलु शब्दस्फोटादतिरिच्यते, यस्मिन् नित्योऽखण्डो वाक्यार्थ एव निरवयववाक्यार्थस्यावबोधं जनयति। वाक्यस्फोट एव तेषां मते वस्तुतो नित्यः, तदङ्गभूतानि वर्णपदादीनि सर्वाणि मिथ्या। वैयाकरणानां मते सर्वं बाह्यं जगत् कल्पनात्मकम्। स्फोटब्रह्म एव नित्यं तत्त्वम्, तदेव शब्दतत्त्वम्; तदङ्गमादाय सर्वोऽयं जगद्व्यवहारः प्रवर्तते। तदुक्तं हि शेषकृष्णेन स्फोटतत्त्वनिरूपणाख्ये ग्रन्थे—

न प्रत्येकं न मिलिता न चैकस्मृतिगोचराः।
अर्थस्य वाचका वर्णाः किन्तु स्फोटः स च द्विधा॥ इति[4]।

जगद्व्यवहारस्य मृषात्वञ्च भर्तृहरिरप्येवं व्याचष्टे—

उपायाः शिक्षमाणानां बालानामुपलालनाः।
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते॥ इति[5]।

अपि च, वैयाकरणा वाचो भेदचतुष्टयमङ्गीकुर्वन्ति मनुष्याणां वाग्व्यवहारमधिकृत्य। तद्यथा—परा, पश्यन्ती, मध्यमा, वैखरीति। इह परा वाक् तु परशक्तिरूपा वाङ्मनसोऽगोचरा योगिभिरेव निर्विकल्पसमाधौ विज्ञातुं शक्यते। तज्जन्यायां पश्यन्त्यामपि न शब्दार्थयोः प्रविभाग इति सापि सम्मुग्धज्ञानरूपा नहि साक्षादर्वाग्दृशां प्रत्येतव्या भवति। तदनु मध्यमायां तु शब्दार्थप्रविभागो भवति, किन्तु केवलं मानस एव। सापि परेण पुरुषेण प्रतिपत्तुं न शक्या। चतुर्थी वैखरी तु सर्वैः शब्दरूपतया विज्ञायते। श्रुतिरप्येवं वाक्चतुष्टयसिद्धान्तं विशिनष्टि—

चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति॥ इति[6]।

---

१. द्रष्टव्यः—सर्वदर्शनसंग्रहः, पृ० ३०० (पाणिनीयं दर्शनम्)
२. द्रष्टव्यः—वैयाकरणभूषणसारः, प्रभाटीकायुक्तः, पृ० ४४१।
३. द्रष्टव्या—व्याकरणदर्शनभूमिका।
४ द्रष्टव्यम्—स्फोटतत्त्वनिरूपणम्, श्लो० ३
५. द्रष्टव्यम्—वाक्यपदीयम्।
६. द्रष्टव्यम्—महाभाष्यम्, प्रथममाह्निकम्।

१४. वैयाकरणमतार्वाचीनमनोविज्ञानाभिमतयोस्तुलना

स्थाने खल्विदं यद्द्वयं संक्षेपत उपरिवर्णितयोर्द्वयोरेव मतयोस्तुलनात्मकं समीक्षणमपि किञ्चित् पुरस्कुर्मः। दार्शनिकपक्षस्य जगन्मिथ्यात्वादिकस्य समालोचनाय नायमवसरः, यतो हि मनोविज्ञानं व्यावहारिकजगद्व्यवहारसत्यत्वमधिकृत्यैव प्रवर्तते। जगतो मिथ्यात्वममिथ्यात्वं वेति समस्या दार्शनिकपक्षमुपैति। किन्तु भाषाप्रत्यययोर्यः सम्बन्धोऽस्माभिः प्राग्वर्णितः, तस्य रमणीयमुद्भावनं वै वैयाकरणदर्शने समुपलभ्यते। यद्यप्यर्वाचीनं मनोविज्ञानं वाच्यवाचक-विभागं सत्यत्वेनाङ्गीकृत्यैव विचारप्रक्रियां व्याख्यातुं प्रवर्तते, न तु मृषात्वेनोपायरूपत्वेनैव वा, यथा वैयाकरणा यतन्ते; तथापि तेषां मतयोः साम्यं सुस्पष्टमेवायाति, यदा वैयाकरणा व्याकरणशास्त्रस्यैहिकं लक्ष्यं प्रतिपादयन्ति। वार्त्तिककारोऽप्येवं विशिनष्टि—"किमर्थं शास्त्रम्? सिद्धे शब्दार्थसम्बन्धे, रक्षोहागमलघ्वसंदेहाः प्रयोजनम्" इति[1]। भाषा परिष्कृता यदा भवति तदाल्पशब्दैरेवाभीष्टप्रत्ययानामर्थानां वाभिव्यक्तिः सुष्ठुतरं जायते, असन्देहश्च प्रत्यया-वबोधो भाषामाध्यमेन व्याकरणशास्त्रसुनियन्त्रितेनैव सम्भाव्यत इति सर्वमर्वाचीनमनोविज्ञाना-भिमतेन व्याख्यातपूर्वेण सार्धं सङ्गच्छते। प्रत्ययविपर्यासोपशमो व्याकरणशास्त्राध्ययनेन जायते, अत एव भर्तृहरिः सगर्वमुक्तवान्—

> इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः।
> अत्रातीतविपर्यासः केवलामनुपश्यति॥ इति[2]।

१५. भाषाविर्भावः

ननु कथं भाषाणामाविर्भावो जायते? अयं प्रश्नो भाषाविज्ञानस्य प्रतिपाद्यः। तथापि विचारेण सह भाषाया अतीव सन्निकृष्टसम्बन्धत्वादस्य किञ्चिद् विवेचनमत्रापि प्रस्तूयते। या या भाषाः प्रचलिता उपलभ्यन्ते सर्वास्ता लोकसंकेतायत्ताः। मानवव्यवहारे परम्परया तेषां समुद्गमो भवति। लोकसंकेतजन्यास्ता इत्यर्वाचीनानां भाषाविज्ञानपारङ्गतानां मनोविज्ञानविशारदानाञ्च मतम्। प्राचीननैयायिकानां मते भाषाणामाविर्भाव ईश्वरसंकेताज्जायते। "अस्मादयमर्थो बोद्धव्य इतीश्वरसंकेतः शक्तिः।" शक्तञ्च पदं भवति। शक्तिर्नाम घटादिविशेष्यकघटादिपदजन्यबोधविषयत्व-प्रकारक ईश्वरसङ्केतः। ईश्वरसङ्केतो नाम ईश्वरेच्छा। सैव शक्तिरित्यर्थः। अर्वाचीना नह्येतन्मतं समर्थयितुमुत्सहन्ते। तेषां मते विविधानां भाषाणां विकासः कालक्रमाद् वर्षसहस्राणि यावत् सञ्जातः। भाषाश्च प्रतिजनपदं प्रतिदेशं वा भिद्यन्ते। व्यक्तिरितरेषां जनानां साहचर्य्येण भाषां वेत्ति। भाषाभ्यासश्चानुकरणमैच्छिकं प्रयत्नश्चेति द्वयमेवापेक्षते।

ननु कथं प्रागैतिहासिके काले भाषाया उद्गमः सञ्जातः? यदि भाषामन्तरा चिन्तनं नाभिनिर्वर्तते, तर्हि वर्तमानाभिः प्रचलिताभिर्विविधाभिर्लोकसंकेतायत्ताभिर्भाषाभिः साध्यमानो विचारविनिमयो वर्तमानमानवजात्याः प्राक् कथं प्रचाल्यते स्म। एवम्प्राप्तायामाशङ्कायां वयं ब्रूमः—नूनं तदाद्यतनोपलभ्यमानभाषाभ्यो विभिन्नैव काचिद्भाषा प्राकृता (न तु प्राकृतम्) प्रचलति स्म। तत्साधनेनैव तदा परस्परं मानवानां विचारः प्रचलति स्म। ननु का हि सा भाषा

---

१. द्रष्टव्यम्—पातञ्जलमहाभाष्यम्।
२. द्रष्टव्यम्—वाक्यपदीयम्।

आसीत् ? न हि वयमधुना प्रचलितोपलभ्यमानभाषाभ्यः प्राक्कालिकं किमपि तथ्यमैतिहासिकप्रमाणतयोद्घाटयितुं प्रभवामः। अस्माकं समाधानं त्वस्य प्रश्नस्य बालविकासान्तर्गतभाषाविकासमनुसृत्यैव प्रसरति। बालकाः कथं स्वकीया आवश्यकताः प्रकटयन्ति ? कथं वा बर्बरवन्यमानुषाद्यसभ्यजातिपुरुषाः स्वमनोगतभावान् प्रकटयन्ति ? कथं वा अज्ञातविदेशभाषा वयमास्माकीनां भाषामजानतां विदेशीयानां मध्ये व्यवहरामः ? इत्यादिपरिस्थितिविशेषानवधार्यैवास्माकं समाधानमस्य प्रश्नस्य प्रसरति।

शिशुषु प्रायः प्रौढविचाररूपं नोपलभ्यते। तथापि विचाराख्यव्यापारस्य यत् किञ्चिन्मौलिकं रूपं क्रमशस्तदाविर्भवति, याँश्च भावान् याँश्च मूलप्रवृत्त्यात्मकवेगाँस्तेऽनुभवन्ति, ताँस्ते शरीरावयवचेष्टाभिः प्रकटयन्ति। यदा स बुभुक्षामनुभवति, पिपासां वानुभवति, स भृशं क्रन्दति। क्रन्दनप्रकारेऽपि केचन भेदा उपलभ्यन्ते। ते भेदा अभ्यासजन्या नैसर्गिका भवन्ति। प्रायः शिशुमाता क्रन्दनं श्रुत्वैव तदावश्यकतामवधारयति। यदा स पर्य्यङ्के शयानो व्युत्थितो वा कष्टमनुभवति, तदा स रोदिति। यदा स भयभीतो जायते, तदापि रोदित्येव। किन्तु प्रत्यवसरविशेषं तस्य रोदनं भिद्यते। अन्यच्च, यदा दुग्धमानीयते धात्र्या मात्रा वा, तदा स हस्तावुत्थाय हर्षातिरेकं व्यग्रतां शीघ्रतां च प्रकटयति। रोदनध्वनिरपि तदनुसारं परिवर्तते। यदा कुक्कुराय भोजनं प्रदीयते सहर्षं स पुच्छमितस्ततः परिचालयति। एवम्प्रकारेण जापानदेशे गत्वा वयं कथं भोजनावश्यकतामभिव्यञ्जयितुं शक्नुमः ! जापानीयस्तु संस्कृतहिंन्दीगुजरातीत्यादिभाषा न जानाति, या वयं जानीमः। वयञ्च तद्भाषां न परिचिनुमः। अतो भोजनं हस्तमुखादिशरीरावयवविशेषचेष्टेङ्गितादिभिरेव वयं प्रार्थयामहे। अतोऽनुमीयत एतदस्माभिर्यद्धि प्रागैतिहासिके कालेऽपि प्रथमा प्राकृता भाषा शरीरावयवविशेषचेष्टारूपासीदिति। तदनन्तरं सा प्रतीकविशेषानादाय विकसिता सञ्जाता। मिस्रदेशीयपिरैमिडोत्खननादिसामग्रीगवेषणेन निष्पन्नं तथ्यमेतदायाति यत्पक्षिविशेषचित्रमेकं वस्तुविशेषमावश्यकताविशेषं वा द्योतयति स्म इति। नहि खल्वियमवस्था बौद्धिकोच्चस्तरं प्रकटयति, यतो हि प्रौढबौद्धिकव्यवहारेऽसङ्ख्येयप्रत्ययवाचकशब्दानामावश्यकतानुदिनमनुभूयते। शरीरावयवचेष्टामयी सेङ्गिता भाषा प्रतीकात्मकभाषा वा ज्ञानशैशवमात्रमभिव्यनक्ति। यथोक्तं हि शुक्राचार्य्येण—

नानुवाकहता बुद्धिर्व्यवहारक्षमा भवेत्।
अनुवाहकता या तु न सा सर्वत्र गामिनी ॥ इति[1]।

देवभाषायाः प्रागपि भाषाविकासस्येयमेव रूपरेखा आसीदिति सम्भाव्यं विकासवादनयानुसारम्।

ननु नन्दिकेश्वरकृतकाशिकायां प्राचीनं मतमेव वर्णितं यद्धि साक्षान्महेश्वराद् व्याकरणशास्त्रमधीत्य पाणिनिमुनिः व्याकरणशास्त्रेऽष्टाध्यायीरूपं सूत्रपाठम्, गणपाठम्, धातुपाठम्, लिङ्गानुशासनम्, शिक्षा चेति ग्रन्थपञ्चकं चकार। अत्रोच्यते—

येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥ इति[2]।

---

१. द्रष्टव्या—शुक्रनीतिः, ३।२६१

२. द्रष्टव्या—नन्दिकेश्वरकृतकारिका।

अन्यच्च, मानवमस्तिकस्य शिरोऽलङ्कारभूतमिदं पाणिनीयं व्याकरणशास्त्रं महतायासेन दैर्घकालिकानुसन्धानपर्यटनादिक्रियायोगेन निष्पन्नं पाणिनिमुनिना प्रणीतम्। मन्ये महेश्वरः कोऽपि गुरुविशेष एवासीद्, अथवा सर्वज्ञाननिधिस्वरूपपरमेश्वरस्य सर्वेषामेव गुरोरेवेदं सामान्यं वचनम्। "स पूर्वेषामपि गुरुः कालेनानवच्छेदात्" इति योगसूत्रकाराः। भाष्यकारोऽपि पाणिनिपरिश्रमक्रियायोगादिकं साक्षात्कारयति प्रातःस्मरणीयैः खल्वेभिश्शब्दैः—

"प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्र वर्णेनाप्यनर्थकेन न भवितव्यम्, किं पुनरियता सूत्रेण" इति[1]।

पूर्वं सूत्रप्रत्याख्यानं कृत्वाप्यपरिमेयां श्रद्धां भाष्यकारः प्रादर्शयत्।

१६. भाषाविकासः

ननु कथं बालकानां भाषावबोधक्रमो भवति? षण्मासानन्तरं सप्तमे मासे वा बालको 'माँ माँ' 'बा बा' 'द द' वोचारयति। ततः पूर्वमप्यस्फुटां 'एँ' 'एँ' इत्यादिकध्वनिविशेषयुक्ताम्, मातरं धात्रीं दुग्धपात्रं वा दृष्ट्वा, शिशुश्चतुर्थमासादारभ्य भाषां प्रयुङ्क्ते। प्रतिमासमनुकरणेन च स शब्दाधिकारं क्रमशोऽवाप्नोति। यदा शिशुः सार्धद्विवर्षीयो जायते, लघुवाक्यैः स्वमन्तव्यं प्रकटयति, यथा—'मैं रोटी खाता हूँ।' 'उसने मुझे मारा' इति। तस्य शब्दसंग्रहोऽतीव न्यूनो भवति, अतः स शरीरावयवचेष्टाभिः स्वमनोगतं भावं प्रकटयति, यदाधीतशब्दैरभिनववस्तु-परिस्थितिविशेषानभिव्यङ्क्तुं समर्थं नात्मानं मन्यते।

स्मिथमहोदयैः शिशूनां भाषावबोधविकासमधीत्य निम्नलिखितमायुः शब्दसङ्ख्याधिकार-संवलितं निर्णीतम्। तथाहि—

आयुः	अधीतशब्दसंख्या
८ मासे	०
१ वर्षे	३
२ वर्षयोः	२७२
३ वर्षेषु	८७६
४ वर्षेषु	१५४०
५ वर्षेषु	२०७२
६ वर्षेषु	२५६२

उपरिलिखितेनाकलनेन स्पष्टमेवेदं यद्धि बालकस्य प्रारम्भिकवर्षेषु भाषावबोधविकास-स्तीव्रगत्या जायते। स्मरणीयञ्चात्र यद्धि भाषाविकासो वंशपारम्पर्यपरिस्थितिविशेषायत्तो भवतीति।

१७. अनुमानम्

अनुमानं तर्कश्च बौद्धिकविचारस्य परमां कोटिं द्योतयतः। ज्ञातेभ्यः केभ्यश्चिद्वाक्येभ्यो यदा कश्चन निर्णयोऽज्ञातपूर्वं उन्नीयते, तदा तदनुमानमिति वयं ब्रूमः। ज्ञातेभ्यो वाक्येभ्यो

1. द्रष्टव्यम्—व्याकरणमहाभाष्यम्।

लिङ्गलिङ्गिसम्बन्धः साध्यसाधनसम्बन्धो वा नियतसाहचर्यरूप उन्नीयते। तदनुमानं लिङ्गलिङ्गिपूर्वकमिति साङ्ख्याः प्राहुः। अथवा मितेन लिङ्गेन लिङ्गिनोऽर्थस्य पश्चान्मानमनुमानम्। प्रत्यक्षं ज्येष्ठप्रमाणम्। नह्यनुमानं प्रत्यक्षतः प्राप्तेऽर्थे साधयितुं प्रयतते। "पाणौ प्रत्यक्षत उपलभ्यमाने नानुमानम्, नागमः" इति वात्स्यायनाचार्याः। अनुमानेऽनधिगततत्त्वावबोधनं प्रत्यक्षव्यतिरिक्तं भवति, अत एव तस्य प्रमाणत्वं सिद्धं भवति। का प्रमा, का चाप्रमा, किञ्च तत्साधनम्? इति सर्वं वस्तुतो न्यायशास्त्रस्य प्रतिपाद्यम्। नह्यस्य सर्वस्य चिन्तनं मनोविज्ञानस्य लक्ष्यम्; किन्तु निखिलमनोगतव्यापारपरायणं हि खल्वर्वाचीनं मनोविज्ञानम्। अतोऽनुमानतर्कादिविचारव्यापाराः कथमभिनिर्वर्तन्ते? इति सर्वं मनोव्यापारयाथात्म्येन, न तु प्रमाणतया विवेचनं मनोविज्ञानेऽप्यर्हति।

अनुमानं खलु त्रिविधं भवति—पूर्ववत्, शेषवत्, सामान्यतोदृष्टञ्चेति। तदुक्तं सूत्रकृद्भिः—

"अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतोदृष्टं च" इति[1]। तत्पूर्वकमित्यनेन लिङ्गलिङ्गिनोः सम्बन्धदर्शनं लिङ्गदर्शनं चाभिसम्बध्यते। साध्यसाधनयोः सम्बद्धयोर्दर्शनेन लिङ्गस्मृतिरभिसम्बध्यते। स्मृत्या लिङ्गदर्शनेन चाप्रत्यक्षोऽर्थोऽनुमीयते।

(अ) पूर्ववदनुमानम्—तत्र भवति यत्र कारणेन कार्यमनुमीयते। यथा—'मेघोन्नत्या भविष्यति वृष्टिः' इति।

(आ) शेषवत्—तत्र भवति यत्र कार्येण कारणमनुमीयते। पूर्वोदकविपरीतमुदकं नद्याः पूर्णत्वं शीघ्रत्वं च दृष्ट्वा स्रोतसोऽनुमीयते 'भूता वृष्टिः' इति।

(इ) सामान्यतोदृष्टम्—व्रज्यापूर्वकमन्यस्यान्यत्र दर्शनम्। अत्रानिर्दिष्टसाध्यसाधनसम्बन्धो भवति। पूर्ववदनुमाने शेषवदनुमाने च नियतकार्यकारणभावो वर्तते; किन्तु सामान्यतोदृष्टेऽनुमानेऽनिर्दिष्टः कार्यकारणसम्बन्धो भवति। "केनचिदर्थेन लिङ्गस्य सामान्यादप्रत्यक्षो लिङ्गी गम्यते; यथेच्छादिभिरात्मा। इच्छादयो गुणाः, गुणाश्च द्रव्यसंस्थानाः। तद्यदेषां स्थानं स आत्मा" इति भाष्यकाराः।

अनुमानं पञ्चावयववाक्यं समीहते। प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः[2]। यथा—

पर्वतोऽयं वह्निमान्। (प्रतिज्ञा)
धूमात्। (हेतुः)
यत्र यत्र धूमस्तत्र तत्र वह्निर्यथा महानसम्। (उदाहरणम्)
तथा चायम्। (उपनयः, परामर्शः)
अतः पर्वतो वह्निमान्। (निगमनम्)

तत्र साध्यनिर्देशः प्रतिज्ञा[3]। प्रज्ञापनीयेन धर्मेण धर्मिणो विशिष्टस्य परिग्रहवचनं प्रतिज्ञेति भाष्यकारः। प्रस्तुते पञ्चावयववाक्योदाहरणे 'पर्वतोऽयं वह्निमान्' इति प्रतिज्ञावाक्यम्।

१. द्रष्टव्यम्—गौतमन्यायसूत्रम् १।१।५
२. द्रष्टव्यम्—गौतमन्यायसूत्रम् १।१।३२
३. द्रष्टव्यम्—गौतमन्यायसूत्रम् १।१।३३

तत्रोदाहरणसाधर्म्यात् साध्यसाधनं हेतुः[१]। उदाहरणसाधर्म्यादुदाहरणवैधर्म्याद् वा साध्यसाधनं हेतुरिति। उपर्युक्ते पञ्चावयववाक्ये 'धूमात्' इति हेतुः। स च प्रत्यक्षगोचरः, तस्य च पक्षेण सह सम्बन्धोऽपि प्रत्यक्षगम्यः।

तत्र साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्त उदाहरणम्[२]। उपरि वर्णितेऽनुमानवाक्ये 'यत्र यत्र धूमस्तत्र तत्र वह्निः, यथा महानसे' इति उदाहरणम्। तच्च साध्यसाधनयोर्व्याप्तिनिदर्शनपूर्वकम्। व्याप्तिश्च 'साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः' इति। येन सम्बन्धेन हेतुता तेनैव सम्बन्धेन साध्यवदन्यावृत्तित्वमिति बोध्यम्।

तत्र उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः। 'तथा चायम्' इति उपनयः। स एव परामर्शो लिङ्गपरामर्शो वेत्यभिधीयते। कारिकावल्यां विश्वनाथेनैवं व्याख्यातः—

"व्याप्यस्य पक्षवृत्तित्वधीः परामर्श उच्यते॥" इति[३]।

अत्र सन्दिग्धसाध्यवान् पक्षः। यथा धूमादिति हेतौ पर्वतः। व्याप्तिविशिष्टस्य हेतोः पक्षेण सह वैशिष्ट्यावगाहिज्ञानमनुमितौ जनकम्।

तत्र हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम्[४]। अथवा सिद्धनिर्देशो निगमनम्। "निगम्यन्तेऽनेनेति प्रतिज्ञाहेतूदाहरणोपनया एकत्र' इति निगमनम्। निगम्यन्ते समर्थ्यन्ते सम्बध्यन्ते" इति भाष्यकाराः।

अनुमितिश्चेयं द्विधा भवति—स्वार्थानुमितिः, परार्थानुमितिश्चेति। यत्र स्वयमेव भूयोदर्शनेन यत्र यत्र धूमस्तत्र तत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतः, तद्गते चाग्नौ सन्दिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति—'यत्र यत्र धूमस्तत्र तत्राग्निः' इति; तदनन्तरम् 'वह्निव्याप्यधूमवानयं पर्वतः' इति ज्ञानमुत्पद्यते। अयमेव 'लिङ्गपरामर्शः' इत्युच्यते; तस्मात् 'पर्वतो वह्निमान्' इति ज्ञानमनुमितिरुत्पद्यते। तदेव स्वार्थानुमानम्[५]।

परार्थानुमाने धूमात् स्वयमग्निमनुमाय परं प्रति बोधयितुं पञ्चावयववाक्यं प्रयुज्यते। अनेन पञ्चावयववाक्येन प्रतिपादिताल्लिङ्गात् परोऽप्यग्निं प्रतिपद्यते।

१८. प्रतीच्यानुमानद्वैविध्यनिदर्शनम्

प्रतीच्यास्तु यवनदेशीया अरिस्टाटलमहोदयानुयायिनो द्विविधमनुमानवाक्यं त्र्यवयवमेव स्वीकुर्वन्ति। तच्च निगमनानुमानमेवम्प्रकारकं भवति[६]—

---

१. द्रष्टव्यम्—गौतमन्यायसूत्रम् १।१।३४

२. द्रष्टव्यम्—गौतमन्यायसूत्रम् १।१।३६

३. द्रष्टव्या—सिद्धान्तमुक्तावली, का० ६८

४. द्रष्टव्यम्—न्यायसूत्रम् १।१।३९

५. द्रष्टव्यः—तर्कसंग्रहः

६. तुलनार्थम्—Deductive Reasoning.

'सर्वे मानवा मरणशीलाः।
रमेशचन्द्रोऽपि मानवोऽस्ति।
अतो रमेशचन्द्रोऽपि मरणशीलः।' (निर्णयः)

आगमानुमानं[1] प्रतीच्यानुसारमेवम्भूतम्—

'रामो मृतः, श्यामो मृतः, मोहनो मृतः, उर्वशी मृता, इत्यादिः।
देवदत्तोऽपि मानवस्तत्सदृश एव।
अतो देवदत्तोऽपि मर्त्यः॥'

त्र्यवयववाक्यमनुमानप्रकारं वेदान्तिनो मीमांसकाश्चापि स्वीकुर्वन्ति। उपर्युक्ते पञ्चावयववाक्य आद्यावयवत्रयमन्तिमावयवत्रयं वाङ्गीकृत्यापि लाघवेनानुमितिसाधनं सम्पाद्यते।

मनोविज्ञानदृष्ट्या भारतीयन्यायदर्शनाभिमतमनुमानं पञ्चावयववाक्यात्मकमेवोपादेयम्। पञ्चावयववाक्यात्मकानुमानस्योपयोगित्वमाङ्गलदेशीयनैयायिकशिरोमणिना ब्रैडलीमहोदयेनापि मुक्तकण्ठेनोररीकृतम्[2]। यथार्थानुभवविश्लेषणोत्थितत्वाद् भारतीयनैयायिकाभिमतमेव पञ्चावयववाक्यात्मकमनुमानं प्रतीच्यप्रतिपादितानुमानवाक्यापेक्षया रमणीयतरं विश्वासावहमपीति वयं मन्यामहे।

१६. प्राचीनतमानां नैयायिकानां मतम्

अस्ति हि खल्वेकं प्राचीनतमं न्यायमतम्, तदनुसारं न्यायवाक्ये दशावयवाः स्वीक्रियन्ते। उपरिवर्णितपञ्चावयववाक्यात् पूर्वं जिज्ञासा, संशयः, शक्यप्राप्तिः, प्रयोजनम्, संशयव्युदास इतीतरे पञ्चावयवा अपि मन्तव्याः। इदं हि खलु दशावयववाक्यात्मकमनुमानं मनोविज्ञानरीत्या नितान्तमुपादेयं रमणीयतमं चेति वयं मन्यामहे।

(अ) तत्र "अप्रतीयमानेऽर्थे प्रत्यक्षार्थस्य प्रवर्तिका जिज्ञासा। अप्रतीयमानमर्थे कस्माज्जिज्ञासते? सामान्येनावगते धर्मिणि पर्वते विशेषेण अग्निमत्त्वादिना सन्दिग्धेऽग्निमत्त्वावधारणं 'प्रत्ययः', तस्य अर्थः प्रयोजनं हानोपादानोपेक्षाबुद्धयः, तस्य प्रवर्तिका उत्पादिका 'जिज्ञासा' इति बोद्धव्यम्।

(आ) तत्रैकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहिज्ञानं 'संशयः' इति[3]। जिज्ञासाधिष्ठानं संशयश्च व्याहतधर्मोपसङ्घातात् तत्त्वज्ञाने प्रत्यासन्नः। परस्परं विरुद्धयोर्हि धर्मयोरन्यतरत् तत्त्वं भवितुमर्हति।

(इ) प्रमातुः प्रमाणानि प्रमेयाधिगमार्थानीति शक्यप्राप्तिः। सा द्वेधा—प्रमाणानां शक्यप्राप्तिः, प्रमातुश्च शक्यप्राप्तिः। प्रमेयं शक्यम्, तस्मिन् शक्तिः शक्यशक्तिरित्याचक्षते। शक्तता प्राप्तिरिति।

(ई) प्रयोजनं तत्त्वावधारणमर्थसाधकस्य वाक्यस्य फलम्।

(उ) संशयव्युदासस्तत्र प्रतिपक्षोपवर्णनं तत्प्रतिषेधे तत्त्वाभ्यनुज्ञानार्थम्। मनोविज्ञानाभिमता एते पञ्चावयवाः प्रतिपाद्यस्वरूपोद्घाटनं कुर्वन्ति। भाष्यकारै-

---

१. तुलनार्थम्—Inductive Reasoning.

२. तुलनार्थम्—Principles of logic by Bradley.

३. द्रष्टव्यः—तर्कसंग्रहः।

रपि तेषामवधारणीयार्थोपपादकत्वमङ्गीकृतम्। तथा हि—"प्रकरणे तु जिज्ञासादयः समर्थाः, अवधारणीयार्थोपकारात्" इति।

जैननैयायिकभद्रबाहुमतानुसारमपि दशावयवात्मकं न्यायवाक्यमेवाऽभ्युपगन्तव्यम्। तद्यथा—

(१) अहिंसा परमो धर्मः। (प्रतिज्ञा)
(२) जैनशास्त्रानुसारेण अहिंसा परमो धर्मः। (प्रतिज्ञाविभक्तिः)
(३) अहिंसकानां देवप्रियत्वात्। (हेतुः)
(४) अहिंसकेभ्योऽन्ये धर्मलोकेषु वस्तु न लभन्ते। (हेतुविभक्तिः)
(५) याज्ञिकहिंसापरायणा अपि स्वर्गे वसन्तीति वर्ण्यते। (विपक्षः)
(६) अहिंसकाः कदापि देवप्रिया न भवन्ति। (विपक्षप्रतिषेधः)
(७) अर्हन्तो हिंसाभयादन्नं न पचन्ति। (दृष्टान्तः)
(८) अन्ये पुरुषा यदन्नं पचन्ति, तदन्नमर्हन्तोऽपि भुञ्जन्ते, अतस्तेऽपि हिंसादोषेण दुष्यन्त एव। (आशङ्का)
(९) अर्हदुद्देशेनैव यन्न पच्यते, तद्वतहिंसादोषेण ते न दुष्यन्ति। (आशङ्काप्रतिषेधः)
(१०) अतोऽहिंसा परमो धर्मः। (निगमनम्)

भाष्योक्तसंशयसंशयव्युदासयोः स्थाने भद्रबाहुना शङ्काशङ्काप्रतिषेधावुक्ताविरयवसेयम्।

कल्पनागौरवभयादेव पञ्चावयववाक्यस्य ग्रहणं करणीयम्, अन्यथा प्रमाणत्वेन विश्वासजनकत्वात्तु दशावयववाक्यात्मकं परार्थानुमानमेवाश्रयणीयम्, यतो हि तस्मिन्नुपपत्तिक्रमः प्रतिपदं यथाभूतं व्याख्यातो भवति। अतः प्राचीननैयायिकैकदेशिभिरङ्गीकृता दशावयवा मनोविज्ञानदृष्ट्यातीव रमणीया यथातथं विचाराख्यमनोव्यापारनिदर्शकाश्चेति वयं मन्यामहे।

२०. स्वार्थानुमानविशेषाः

स्वार्थानुमाने नहि सदा परार्थानुमानापेक्षितः पञ्चावयववाक्यक्रमो लक्ष्यते। प्रायो बुद्धिप्रकर्षाद् आशुकारित्वाच्च फलं निर्णयो वा सद्यः प्रथममुदेति, तदनन्तरं क्रमागतपूर्ववाक्यानां संग्रथनं क्रियते। क्रमप्राप्तपूर्ववाक्यानामभावो भवतीति न वाच्यम्। तेषां क्रमो ध्यानानन्वितमस्पष्टं द्रुतं वा भवतीति मन्तव्यम्। भावनावेगात् प्रायो जना निगमनं सहसा प्रतिपादयन्ति। प्रतिक्रियानन्तरं यदि कश्चन पृच्छति—कथं हि तदनुमानमुपपद्यते? इति, तर्हि वयं पूर्वक्रमागतवाक्यान् योजयितुमारभामहे। परार्थानुमाने तु पञ्चावयववाक्यक्रम एवाश्रयणीयः, कदाचन दशावयववाक्यक्रमश्चापि विशेषविश्वासजननाय।

२१. वाक्यैकवाक्यता

अस्माभिः पूर्वं व्याख्यातमेव यत्कथं प्रत्ययेषु परस्परमाकाङ्क्षायोग्यतासत्तितात्पर्यविशेषा वाक्यजन्यज्ञानाय कल्पन्ते। तत्र प्रत्ययानां परस्परसन्दर्भगतजिज्ञासाविषयत्वयोग्यत्वमाकाङ्क्षा। अथवा प्रत्ययस्य प्रत्ययान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वमाकाङ्क्षेति बोद्धव्यम्। अर्थावबोधः प्रत्ययानां योग्यता। 'वह्निना सिञ्चति' इति न प्रमाणम्, योग्यताऽसत्त्वात्। प्रत्ययानामविलम्बेना-

नुभवनमासत्तिः सन्निधिरित्यवसेयम्। 'गौरश्वः पुरुषो हस्ती' इति न प्रमाणम्, तत्राकाङ्क्षाविरहात्। पदस्य मानसप्रतिबिम्बभूता कल्पनाप्रतिमा 'प्रत्ययः' इत्युन्नेयम्।

एवमेवाकाङ्क्षादिसमुत्थितो विचारक्रमो वाक्यैकवाक्यरूपतामाधत्ते, नहि केवलमेकवाक्यता विचारान्तर्गतप्रत्ययेष्वेव भवति, प्रत्युत "प्रत्येकं भिन्नभिन्नसंसर्गप्रतिपादकयोर्वाक्ययोराकाङ्क्षा-वशेन महावाक्यार्थबोधकत्वं वाक्यैकवाक्यत्वम्" इति[1]। आचार्यप्रवरैः कुमारिलभट्टपादैरपि तन्त्रवार्त्तिके व्याख्यातमिदम्—

स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया।
वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते॥ इति[2]।

वाक्यैकवाक्यत्वमिव विचारैक्यमपि, विचारसामञ्जस्यमपि स्वस्थविचारशृङ्खलायाः परमं लक्षणम्। प्रत्ययेषु यदि ह्याकाङ्क्षासन्निधीत्यादिर्न भवेत्, विचारदुष्टत्वमापद्येत। विचारैक्यं विचारेषु यदि न भवेत्तर्हि सर्वमसमञ्जसमेवोपपादनमापतेत्। असामञ्जस्यं पौर्वापर्यसम्बन्धनिरस्तत्वम्, कारणकार्यक्रमाभावयुक्तत्वम्, विचारैक्यविरहितत्वं वेत्यवसेयम्। अस्वस्थमानसिकावस्थास्वेव विचारो विशृङ्खलः सामञ्जस्यापेतो दृश्यते। सन्दर्भशृङ्खलं विचारतार-तम्यमासाद्यैवाकाङ्क्षादिनिर्वचनमुपपद्यते। असमञ्जस उन्मत्तप्रलापे विचारशृङ्खला पदे पदे छिन्ना भिन्ना च जायते।

२२. हेत्वारोपणम्[3]

यदा स्वप्रतिक्रियाया वास्तविकं प्रयोजनं तिरोहितमन्तर्हितं वा कृत्वा वयं तत्सदृशप्रयोजने-तरारोपणं करिष्यामहे, तदा हेत्वारोपणमित्युच्यते। नहि केवलमितरपुरुषैः सह व्यवहार एव वयं हेत्वारोपणं व्यवहरामः, अपि तु स्वात्मप्रवञ्चनायापि हेत्वारोपणमाश्रीयते। विक्रेता आपणे न्यूनमानं वस्तु तोलयित्वा ग्राहकाय प्रदत्ते। यदि स्वगृहं गत्वा ग्राहकस्तद्वस्तुमानं स्वयमाकलय्य प्रत्यागच्छति, प्रतिवदति च—"किम्भोः! न्यूनमानमिदं वस्तु भवता मह्यं प्रदत्तम्" इति। आपणिकस्ततः परं हेत्वारोपणात्मकं प्रत्युत्तरं प्रदत्ते—"नेदं वस्तु भवदभीप्सितम्, अपि तु परस्मै ग्राहकाय देयमासीत्" इति। हेत्वारोपणमिदं ग्राहकप्रवञ्चनाय प्रयुक्तम्। अन्यश्चास्यात्मानमभिप्रेत्य पक्षः। यदा स न्यूनमानं वस्तु तोलयति, तस्यान्तरात्मा नोत्सहतेऽनीतिमार्गं स्वीकर्तुम्। मनसि च स्वकीये स्वान्तःकरणपरितोषाय प्रतिवदति—"राजकर्मचारिणो ह्येते धनिकाः! तेभ्योऽधिकं वस्तुमूल्यं ग्रहणीयमेव; ते उत्कोचधनं हि प्रतिगृह्णन्ति। मया तु दुर्गादेवीपूजायै दैनन्दिनलाभ-शतांशः प्रदीयते" इति। एका सामान्यलोकनीतिर्धर्मच्छद्मपरायणा, अपरा च स्वकीय-वैयक्तिकधनोपार्जनादिव्यवहारानुगा लोकायतिका नीतिः। इदं नीतिद्वैविध्यं हेत्वारोपणेन संरक्षितम्। अतो हेत्वारोपणं न केवलमितरेषां पुरुषाणामेवास्मच्छिद्रान्वेषणादस्मान् गोपयति संरक्षति, प्रत्युत स्वात्मप्रत्यालोचनादपि प्रतिरक्षति। कारणारोपणेन स्वकीयव्यवहारं प्रति, नय-विरहितं प्रति, स्वात्मजुगुप्सा न वर्धते। धर्मान्धत्वं धार्मिकश्रद्धानामधेयेन कारणारोपणत्वं लभते। सभ्यताविकाससहकृतमेव कारणारोपणमिति वयं मन्यामहे। एतस्मादेव प्राचीनैरस्माकं महर्षिभिः कायिकवाचसिकमानसिकशौचत्रयमेवानुमोदितम्। तथाविधमेव कारणारोपणत्वं निवारयितुं शक्यते।

१. द्रष्टव्या—वेदान्तपरिभाषा, पृ० ७१

२. द्रष्टव्यम्—तन्त्रवार्त्तिकम्, पृ० ३२१–३३०

३. तुलनार्थम्—Rationalisation.

खलपुरुषाणामसामान्यमनोविकारग्रस्तानां रोगिणाञ्च कार्यवचनविचारेषु तथाविधं शौचासादितं सामञ्जस्यं नोपलभ्यते। तदुक्तं हि—

"मनस्यन्यद् वचस्यन्यद् कर्मण्यन्यद् दुरात्मनाम्" इति।

मनोविज्ञानदृष्ट्या वक्तुमिदं शक्यते यद्धि कारणारोपणमंशतः स्वप्रतिष्ठासंरक्षणाय सामाजिकमर्यादाधारणाय कदाचनाश्रयणीयम्। धार्मिकजीवनयापनसंसक्तचेतसामाडम्बरविहीनानां कारणारोपणात्मको व्यवहारः कथमपि श्लाघ्यो नास्ति। सततमात्मनिरीक्षणेन पूर्वकृतकर्मप्रत्ययालोचनेन कारणारोपणं वै निवारयितव्यम्। कारणारोपणं विहायैव "आत्मैव ह्यात्मनो बन्धुः" इति श्रीमद्भगवद्गीतावचनं संगच्छते।

२३ तर्कस्वरूपम्

यदनुमीयते, तत्तर्केणापि साध्यते। प्रमाणानामनुग्राहकस्तर्क इति वयं ब्रूमः। विपक्षनिराकरणपूर्वकं पक्षस्थापनं तर्कः। व्याप्यारोपेण व्यापकारोपस्तर्क इति वा। अथवा सिद्धव्याप्तिकयोर्धर्मयोर्व्याप्याङ्गीकारेणानिष्टव्यापकप्रसञ्जनरूपस्तर्कः[१]। यथा—'यद्यत्र घटोऽभविष्यद् तर्हि भूतलमिवाद्रक्ष्यत्। भूतले तु न दृश्यतेऽत एव घटोऽत्र नास्ति' इति। तथा च 'पर्वतोऽयं साग्निः, उतानग्निः ?' इति सन्देहानन्तरं कश्चिद् यदि मन्येत—

"अयं पर्वतोऽनग्निः इति। यद्ययमनग्निरभविष्यत्, तर्हि अयमधूमोऽप्यभविष्यत्, अनग्निकत्वात्; किन्तु धूमवाँश्चायम्, अतः पर्वतोऽयं वह्निमान्।" इति।

सोऽयं तर्कः प्रतीच्यन्यायशास्त्रे प्रसञ्जितमृषात्वसाधनमित्यभिधीयते[२]।

२४. निर्णयस्वरूपम्

निर्णयो नामाध्यवसायात्मकं ज्ञानम्, तच्च प्रमाणानां फलम्। नहि सर्वेषां मनुष्याणां निर्णयशक्तिः समानरूपेण समुपलभ्यते। निर्णयशक्तिरिच्छाशक्तिमपेक्षते। यस्य मानवस्य प्रत्ययसञ्चयानां स्फुटत्वं नोपलभ्यते, तस्य निर्णया अपि नूनं दोलायिता एव। नहि पक्षपातिनां जनानां निष्पक्षा निर्णया जायन्ते। अपि च, निर्णयः कालमपेक्षते। पक्षप्रतिपक्षविचारणानन्तरमेव निर्णयः समुत्पद्यते। तदुक्तं गौतममहर्षिणा—"विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः" इति[३]। परमतसहिष्णुत्वमन्धविश्वासरूढिविरहितत्वमुदारदृष्टित्वञ्चेति गुणाः सम्यङ्निर्णयाय कल्पन्ते। तद्व्यतिरिक्तो मानवः सङ्कीर्णविचारत्वादैकान्तिकमेव मतमनुगृह्णाति। बुद्धिपारतन्त्र्यं वै निर्णयस्य परमः शत्रुः। सत्यैकपक्षपातिनां बुभुत्सूनां निर्णयो नीरक्षीरविवेक इवाचिरेण तमसस्पारं नयति, श्रोतॄणाञ्च मनस्सु परमं विश्वासं जनयति।

२५. विश्वासस्वरूपम्

विश्वसनं नाम मनोव्यापारविशेषो विचारात्मकः, यस्मिन् वस्तुस्वरूपं सत्यत्वेनावधार्यते तथाभूतं विश्वस्यते च। विश्वासाः सत्यीभूतानि तथा च स्वीकृतानि मतानि भवन्ति। यथायं मे विश्वासः—'पृथ्वी वर्तुलाकारा' इति। विश्वासास्पदीभूतस्तर्हि विचारविशेषो भवति। यथाबुद्धि

१. तुलनार्थम्—Reductio ad absurdum.

२. द्रष्टव्या—तर्कभाषा

३. द्रष्टव्यम्—न्यायसूत्रम् १।१।४१

यथाज्ञानं निर्णयं कृत्वैवायं पुरुषो विश्वसिति। नहि विश्वासमन्तरा लोके क्रियायोगसाफल्यं दृश्यते। विश्वासो हि विचारस्थैर्यं प्रयत्नवेगं चावहति।

२६. संशयः

विश्वासाभावो नाम संशयः। नहि विश्वासाभावोऽविश्वास इति भवितुमर्हतीति। संशयस्वरूपन्तु व्याख्यातचरम्। तदुक्तं वै अन्नम्भट्टेन—"एकस्मिन् धर्मिणि विरुद्धनानाधर्म-वैशिष्ट्यावगाहिज्ञानं संशयः इति; यथा स्थाणुर्वा पुरुषो वा" इति। यथा विश्वासो निर्णयात्मको भवति, तथैवाविश्वासोऽपि निर्णयात्मको भवति। यथाहं न विश्वसिमि—'प्रेताविष्टाः पुरुषा भवन्ति' इति, किमुत 'भूतप्रेतादयो न विद्यन्ते' इति; किन्तु यदा विश्वासाभावो भवति, तदा संशय एव वर्तते, मानवश्च अस्तिनास्तीतिकोटिद्वये दोलायते—'किं तावदहमिदं करिष्यामि? किमुतान्यद्?' इति। विश्वासोऽविश्वासश्चावधारणात्मके ज्ञाने। संशयेऽनिश्चयो भवति। विश्वासेन क्रिया प्रवर्तते, तथैवाविश्वासेन; किन्तु संशये समुत्पन्ने क्रियासङ्कोचो जायते। संशयासादित-विचारव्यापारस्य विश्वास एव फलम्। नहि संशयं विना वैदुष्यप्रकर्षः सम्भाव्यते। तदुक्तं हि—

"न संशयमनारुह्य नरो भद्राणि पश्यति" इति।

अतः संशयो जिज्ञासाया भाविबुद्धिप्रकर्षस्य च मूलम्।

स्मरणीयं यद्धि विश्वासाख्ये विचारव्यापारे केवलं वस्तुस्वरूपावधारणमेव न वर्तते; प्रत्युत तद्व्यतिरिक्तं भावनाप्रचयोऽपि तत्र संनिविशते। अन्यच्च, इच्छासम्पृक्तो हि विश्वासः; अत एव चेष्टान्वितत्वमपि तस्य सुकरमायाति। भावनातिशयत्वं विश्वासेन द्योत्यते। अपि च, विश्वासे समुत्पन्ने क्रियाप्रसरोऽपि सम्भाव्यते। विश्वासः श्रद्धामयो भवति।

२७. अभ्युपगमः

यत्र किञ्चिदर्थजातमपरीक्षितमेवाभ्युपगम्यते, ततश्च विशेषपरीक्षणमारभ्यते, सः 'अभ्युपगमः' इत्यभिधीयते। तदुक्तं महर्षिगौतमेन—"अपरीक्षिताभ्युपगमात्तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः" इति। अभ्युपगमाभिधे विचारे न विश्वासो नाप्यविश्वासो भवति। वस्तुपरीक्षणार्थमेवाभ्युप-गमाङ्गीकरणं समर्थ्यते वादिभिः। परीक्षणानन्तरमेवाभ्युपगमस्य प्रमात्वमप्रमात्वं वा साधयितुं शक्यते। अभ्युपगमस्तावत् संशयानुविद्धो विचारविशेषः, यस्य साधनं निराकारणं वा तर्केणानुमानेन वा सम्पाद्यते।

२८. विश्वासावहकारणानि

प्रागुक्तमेवाऽस्माभिर्यद्धि विश्वासे भावनेच्छादयः सन्निविष्टा भवन्ति। अस्माकमनुमान-प्रक्रिया वस्तुतोऽस्माकमिच्छामनिच्छां वानुसरति। यन्नेष्टं तत्कथमपि न समर्थितं भवत्यनुमान-शतेनापि। अनुमानेनानुमिते सत्यपि विश्वासो नोत्पद्यते। विश्वासास्तर्हि प्रत्यक्षानुमितिशब्दजन्या भवन्ति। तथापि सर्वेष्वेतेषु ज्ञानप्रकारेषु भावनाक्रियायोगादिभिः विकृतयो जायन्ते। दुष्टप्रत्यक्षेण दुष्टानुमानप्रक्रियया हेत्वाभासैर्वा अप्रत्यक्षगोचरसंकेतप्रभावेण वा स्खलितानि जातु सम्भाव्यानि। संकेतस्वरूपन्तु व्याख्यातपूर्वम्। युक्त्यनुमानं विना परपुरुषजन्यो यो विश्वासो गृह्यते स संकेताख्य-परामर्शरूपः। यथा—आप्तपुरुषजन्यः श्रद्धासंकेतो भवति।

अन्यच्च, सर्वेषामेव संकेतो नैवास्माकं विश्वासमावहति। प्रकृष्टतरगुणप्रतिष्ठाबलैश्वर्यशालिनामेव पुरुषाणामसँल्लक्षितप्रभावे आस्माकीनं विश्वासमुत्पादयति। किञ्च, यद्विषये मज्ज्ञानं नास्ति तद्विषये परेषां मतं मयि प्रत्ययं विश्वासमावहति; किन्तु यद्विषयेऽस्मज्ज्ञानं प्रौढिङ्गतम्, नहि तस्मिन् विषये यस्य कस्यचिदुपदेशोऽस्मासु विश्वासमुत्पादयति। अस्माकमपेक्षया तद्विषयेऽपि येषां शेमुषीशेवधिः वरीयान् भवति, तेषामेव मतमस्मास्वचिरेण विश्वासोत्पादनाय कल्पत इत्यवगन्तव्यम् ॥

इति अर्वाचीने मनोविज्ञाने विचारस्वरूपविवेचनीयो दशमोऽध्यायः ॥

एकादशोऽध्यायः

कल्पनास्वरूपविवेचनम्

१. कल्पनास्वरूपम्[1]

अथातो वयं कल्पनास्वरूपमनुव्याख्यास्यामः। पूर्वं प्रत्ययनिर्म्माणप्रकारविवेचनावसरेऽस्माभिः कल्पनाप्रतिमानिर्म्माणं[2] तदुपयोगश्च प्रत्ययनिर्म्माणे सम्यगनुव्याख्याते। तद्विवेचनेनैवेदं प्रतिफलति यद्धि पूर्वानुभवस्य कल्पनाप्रतिमानां देशकालस्मृतिपूर्वकमुद्बोधनं 'स्मृतिः' इत्याचक्षते। आलोचनज्ञानस्य कल्पनाप्रतिमासाहाय्येनानुव्याख्यानं सविकल्पकं प्रत्यक्षम्। नूनमत्र कल्पनाप्रतिमासहकृतं प्रत्ययसम्बन्धादिकमप्यनुव्याख्यानेऽन्तर्भाव्यते। सामान्यप्रत्ययविशेषप्रत्ययादिनिर्म्माणे कल्पनाप्रतिमाक्रियाकलापस्तु व्याख्यातचरः। पूर्वानुभवानुगतदेशकालस्मृत्युद्बोधनं विनैव पूर्वानुभवकल्पनाप्रतिमानामभिनवरूपेण संयोजनं परिणामो वा 'कल्पना' इत्यभिधीयते। स्मरणे कल्पनाप्रतिमाशृङ्खला यथापूर्वं यथाक्रममुद्बोध्यते; किन्तु कल्पनायां पूर्वानुभवकल्पनाप्रतिमानां क्रमो यथापूर्वं न भूत्वा किञ्चिदभिनवत्वमाधत्ते, तत्र रचनावैचित्र्यं समाविशति।

कथं तर्हि कल्पना विचाराद् भिद्यते? विचारणायां विचारे वा कल्पनाप्रतिमानां क्रमो यथापूर्वं नोपलभ्यते। तथापि सिद्धो हि भेदः कल्पनाविचारयोः। कल्पनायां प्रयोजनं स्पष्टं प्रत्यक्षगोचरं न भवति। विचारश्च प्रयोजनाभिप्रेरितो भवति। विचार आत्मनियन्त्रितः प्रयोजनान्वितो भवति। अस्ति हि कल्पनाया अपि प्रयोजनविशेषः, तथापि स सूक्ष्मचैतन्येन कारणचैतन्येन वाज्ञाततया नियन्त्रितो भवति। प्रत्यक्षतस्तु सोऽप्रत्यक्षगोचर इव प्रतिभाति। जुङ्गमहोदयेन स्वकीये ग्रन्थे 'कारणचैतन्यमनोविज्ञानम्[3]' इत्याख्ये स्वनियन्त्रितविचारस्वच्छन्दविचारयोर्भेदः सुष्ठुतरमुपबृंहितः। किं तर्हि स्वच्छन्दविचारप्रवाहः, किमुत स्वच्छन्दप्रत्ययसम्बन्ध एव कल्पनेति वक्तुं शक्यते? नैतदिति वयं ब्रूमः। विचारस्तु प्रस्तुतविषयं प्रत्यक्षगोचरमधिकृत्य प्रवर्तते। प्रयोजनानुविद्धं विचारक्रियाविषयीभूतं वस्तु त्रैकालिकं भूतभविष्यद्वर्तमानकालिकमेव भवितुमर्हति। प्रत्यक्षप्रयोजनविशेषरहिता प्रस्तुतप्रत्यक्षज्ञानव्यतिरिक्ता पूर्वकल्पनाप्रतिमापुञ्जस्याभिनवसंयोजनात्मिका कल्पना भवति। तस्या विषयीभूताः पदार्थाः प्रायो भाविनः, यद्यपि त्रैकालिका अपि ते भवितुमर्हन्ति। अन्यच्च, स्वच्छन्दप्रत्ययसम्बन्धे नहि तथाविधं सौष्ठवम्, रचनाचातुर्यम्, अभिनवत्वं चोपलभ्यते; यादृशं कल्पनायां समुपलभ्यते।

२. कल्पनोदाहरणानि

वयं सम्प्रति स्मृतिविचारकल्पनानामुदाहरणैः स्पष्टीकरणं कुर्मः। विश्वनाथस्य भूत-

१. तुलनार्थम्—Imagination.

२. द्रष्टव्यम्—Images.

३. द्रष्टव्यम्—C. G. Jung, "Psychology of the unconcious" Chepter I.

भावनस्य काशीस्थे मन्दिरे या मूर्त्तिर्वर्तते, तस्याः कल्पनाप्रतिमानामुद्बोधनं स्मृतिं जनयति। अथवा सम्प्रति स्वर्णमयी अन्नपूर्णादेवीमूर्त्तिरिति कल्पनाप्रतिमाविषयीभूता देशकालसंस्मरणसह-कृता स्मृतिरित्यभिधीयते। किन्तु सुवर्णकुण्डलमस्माभिः पूर्वं दृष्टम्। सुवर्णदेवमूर्त्तिरप्यस्माभिः दृष्टपूर्वा। एवमेव मृगा अपि बहुवारमस्माभिः कान्तारेषूद्यानेषु च दृष्टचराः। यदा कश्चन ब्रवीति—'सुवर्णमृगोऽयम्' इति, तदा वयं 'सुवर्णमृगः कदापि दृष्टपूर्वः' इति न स्मरामः। अत एव सुवर्णमृगः स्मृतिगोचरत्वं नापद्यते। नापि सुवर्णमृगस्य प्रत्यक्षज्ञानमेवोपपद्यते; अवस्तुभूतत्वात्। अत एव सुवर्णमृगप्रत्ययः कल्पनेत्यभिधीयते। कल्पनाऽवस्तुभूतत्वमेताव-तोन्नेतुमर्हम्—

नीतो न केनापि न दृष्टपूर्वो
न श्रूयते हेममयः कुरङ्गः।
तथापि तृष्णा रघुनन्दनस्य
विनाशकाले विपरीतबुद्धिः॥ इति।

यद्यपि हेम्नः केयूरकुण्डलादीनि प्रत्यक्षानुभवास्पदीभूतानि, मृगोऽपि बहुवारं दृष्टः; तथापि 'हेममयः कुरङ्गः' इत्यभिनवकल्पनामात्रम्। पूर्वानुभवोत्थप्रत्ययाः कल्पनाप्रतिमाश्चाभिनव-संयोजनव्यापारेण नवीनं रमणीयमदृष्टपूर्वं यद्रूपमापाद्यन्ते तत्कल्पनेति सञ्चक्षते। अन्यानि कल्प-नोदाहरणानि—सुगन्धिसुवर्णम्, इक्षुफलम्, चन्दनपुष्पम्, आकाशकुसुमम्, वन्ध्यापुत्रः—इत्यादीनि भवन्ति। तत्रोक्तं भवति—

गन्धः सुवर्णे फलमिक्षुदण्डे नाकारि पुष्पं खलु चन्दनेषु।
विद्वान् धनाढ्यो न च दीर्घजीवी धातुः पुरा कोऽपि न बुद्धिदोऽभूत्॥ इति।

अन्यच्च, नारीप्रत्ययोऽहर्निशमनुभवास्पदीभूतः, एवमेव पुरुषप्रत्ययोऽपि सर्वेषामेवोपास-कानामितरेषां च पुरुषाणामनुभवास्पदम्; किन्तु भगवतोऽर्धनारीश्वरस्य कल्पनायां कल्पना-सौष्ठवस्य चरममुदाहरणमुपलभ्यते। शिवस्य देहवामार्धं नारीरूपम्, दक्षिणार्धं पुरुषरूपम्। निखिलं शिवस्वरूपं सकलचराचरप्रतीकभूतार्धनारीश्वरकल्पनायामेव समुपलभ्यते। तत्स्वरूपसौन्दर्यकल्पनां कालिदासोऽप्येवं विशिनष्टि—

एकैश्वर्ये स्थितोऽपि प्रणतबहुफलो यः स्वयं कृत्तिवासाः
कान्तासंमिश्रदेहोऽप्यविषयमनसां यः परस्ताद्यतीनाम्।
अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिर्बिभ्रतो नाभिमानः
सन्मार्गालोकनाय व्यपनयतु स वस्तामसीं वृत्तिमीशः॥ इति[1]।

एवम्प्रकारेणैव भगवन्नरसिंहावतारस्वरूपरचनायामपि कल्पनावैचित्र्यं किन्नरगन्धर्वोर्वशी-चित्रगुप्तादिवर्णनेषु कल्पनायाः क्रियाकलापं स्पष्टतरं जायते। अन्यच्च, शकुन्तलाया लोकोत्तरं सौन्दर्यं कविकुलगुरुर्महाकविः कालिदासोऽसम्भाव्यपदार्थकल्पनया कथमुद्भावयति—

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः।

---

१. द्रष्टव्यम्—मालविकाग्निमित्रम् १।१

वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्म्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ॥ इति[1] ।

न चन्द्रः शकुन्तलां निर्म्मातुं शक्नोति, तथापि कविरसम्भाव्यकर्तृकतया लोकोत्तरत्वं तल्लावण्यस्योद्भावयति ।

विचारस्य विषयः प्रतिपदं प्रयोजनान्वितः कार्यकारणभावपुरस्सरः साध्यसाधनेतिकर्त्तव्यताचिन्तनमयो भवति । स यथा—सार्धद्विसहस्राब्दमहोत्सवे बुद्धजयन्त्याख्ये सारनाथमूलगन्धकुटीसकाशे रमणीयमुद्यानमेकं प्राक्तनमृगदावसङ्काशं योजनीयम्, यस्मिन् पालितेभ्यः कृष्णमृगेभ्योऽकुतोभयमास्पदमपि सुलभं भवेदिति विचारः । अत्र प्रतिपदं प्रयोजनानुकूलकार्ययोजनाविकासक्रमो दृष्टिगोचरः । अन्यच्च, विचारभूमौ यथार्थवादो राजते । कल्पनाक्षेत्र आदर्शवादप्राचुर्यं समुपलभ्यते ; यथा—सेयं धेनुः पयस्विनी, पुष्टवत्सा, मया अवश्यं क्रेतव्या, यया परिवारजनेभ्यः पुष्कलं दुग्धं सुलभं भवेदिति लौकिकविचारनिदर्शनम् ।

३. कल्पनाप्रतिमाभेदाः

कल्पनाप्रतिमा द्वेधा—

(अ) स्वस्थपुरुषाणां सामान्यकल्पनाप्रतिमा[2] ।

(आ) मानसिकरोगिणामसामान्यकल्पनाप्रतिमा चेति[3] ।

वयं सम्प्रत्येते सपरिकरमनुव्याख्यास्यामः ।

४. स्वस्थपुरुषाणां सामान्यकल्पनाप्रतिमाभेदाः

स्वस्थपुरुषाणां कल्पनाप्रतिमानां समुपलभ्यमानानां पञ्चसु वर्गेषु वर्गीकरणं विवेचनसौकर्याय क्रियते—

(क) उत्तरकल्पनाप्रतिमाः[4]—आलोचनज्ञानप्रकरणेऽस्माभिरेतासां विवेचनं साङ्गोपाङ्गं व्याख्यातचरम् । संज्ञावाहिनाडीकन्दाणुकानां वल्कस्थमस्तुलुङ्गोचस्तरेष्वत्यर्थं क्रियाशालित्वाद्धि उत्तरकल्पनाप्रतिमा जायन्ते । वस्तुतस्तु ता उत्तरनिर्विकल्पकज्ञानभूताः । ताश्च द्वेधा—(१) अनुरूपोत्तरकल्पनाप्रतिमाः[5], (२) पूरकोत्तरकल्पनाप्रतिमाश्चेति[6] । अनुरूपोत्तरप्रतिमाः पूर्वालोचनज्ञानानुगतवर्णका भवन्ति । पूरकोत्तरकल्पनाप्रतिमास्तद्भिन्नवर्णका भवन्तीति सर्वं वर्णितपूर्वम् । तासां हि द्वौ विशेषौ भवतः । आलोचनज्ञानानन्तरं यत्र कुत्रापि तासां प्रक्षेपानुभवः प्राप्तुं शक्यत इति तु प्रथमो विशेषः । अपरश्च तासामयं विशेषो यद्धि तासां प्रक्षेपोद्भवो[7] दैर्घ्यादिपरिमाणविशेषो द्रष्टुः प्रक्षेपस्थलविशेषदूरत्वाद्यायत्तो भवतीति ।

---

१. तुलनार्थम्—विक्रमोर्वशीयम्, १।१०
२. तुलनार्थम्—Normal images.
३. तुलनार्थम्—Abnormal images.
४. तुलनार्थम्—After-images.
५. तुलनार्थम्—Positive after-images.
६. तुलनार्थम्—Negative after-images (Complementary images)
७. तुलनार्थम्—Projection.

(ख) प्रारम्भिकस्मृतिकल्पनाप्रतिमाः[1]—एताः कल्पनाप्रतिमा उपर्युक्तकल्पनाप्रतिमाभ्यो व्यावृत्ताः। आलोचनज्ञानादनन्तरमेवोत्तरकल्पनाप्रतिमा जायन्ते। तदनन्तरं यदा संज्ञावाहिनाडीकन्दाणुकानां नाडीक्रियायास्तिरोभावो जायते, तदा पूर्वानुभूतपदार्थस्मरणे प्रारम्भिकस्मृतिकल्पनाप्रतिमाः समुपलभ्यन्ते। आलोचनज्ञानापेक्षया वर्णोज्ज्वलत्वगभीरत्वह्रासो वै उत्तरकल्पनाप्रतिमासु जायते। तथापि तयोरल्पमेवास्त्यन्तरम्। उत्तरकल्पनाप्रतिमापेक्षया प्रारम्भिकस्मृतिकल्पनाप्रतिमासु वर्णोज्ज्वलत्वगभीरत्वह्रासो जायते। संज्ञावाहिनाडीकन्दाणुकानां समुत्तेजनानन्तरमेव प्रारम्भिकस्मृतिकल्पनाप्रतिमाः सुस्पष्टाः समुज्ज्वलवर्णाश्च सम्भवन्ति; किन्तु तासां वर्णप्राचुर्य्यं कालात्ययेन सह ह्रासोन्मुखः प्रतिक्षणं संलक्ष्यते। पिपठिषुणा श्रुतलेखने[2] हि वयं प्रारम्भिकस्मृतिकल्पनाप्रतिमाया उत्कृष्टमुदाहरणं लभामहे। गुरुपाठध्वन्यनन्तरमपि प्रारम्भिकस्मृतिकल्पनाप्रतिमासाहाय्येन विद्यार्थी श्रुतपूर्वं यथार्हं लिखितुं प्रभवति। प्रारम्भिकस्मृतिकल्पनाप्रतिमास्वनुगतध्वनिवर्णाद्यनुकारित्वं प्रतिपुरुषं भिद्यते। निर्विकल्पकज्ञानानुगतध्वनिवर्णादिगभीरत्वं स्वच्छत्वमपि नोपलभ्यते।

(ग) साधारणस्मृतिकल्पनाप्रतिमाः[3]—एतास्तु प्रायेण सर्वैः सर्वदाऽनुभूयन्ते। पुरातनानुभवाहितसंस्कारमय्यसाधारणस्मृतिकल्पनाप्रतिमाः। यस्यानुभवस्य संस्कारसमुत्था एताः, स कालेन सन्निकृष्टं विप्रकृष्टं वेति नास्ति विशेषः। किन्तु प्रारम्भिकस्मृतिकल्पनाप्रतिमाभ्य एतासामयमेव विशेषो यद्धि प्रारम्भिकस्मृतिकल्पनाप्रतिमा अनुभवविशेषोत्तरं तत्क्षणमेव सङ्घटन्ते; किन्तु साधारणस्मृतिकल्पनाप्रतिमानामुत्पत्तिस्तदपेक्षया कियता चिरेण सम्भवति। एतादृशस्मृतिकल्पनाप्रतिमानामुपयोगस्त्रिविधो भवति। प्रथमोपयोगः साधारणस्मृतिकल्पनाप्रतिमानां भूतकालानुबन्धी दृश्यते प्रत्यभिज्ञारूपः, यस्मिन् पूर्वानुभूतवस्तूनां स्मरणं तज्जन्यपूर्वसंस्कारोद्बोधनद्वाराभिसम्पद्यते। वयमग्रिमेऽध्याये प्रत्यभिज्ञास्वरूपमनुव्याख्यास्यामः। द्वितीयोपयोगः साधारणस्मृतिकल्पनाप्रतिमानां भविष्यत्कालिको दृश्यते। स यथा—दिवास्वप्ने कश्चन कल्पते, "अहं वै खलु लोकसभाप्रतिनिधिभिः राष्ट्रपतिपदेऽभिमन्त्रितोऽस्मि। अहं श्वः सर्वान् वैदेशिकराजदूतान् समाहूयितास्मि। तदनन्तरं काश्मीरप्रदेशभ्रमणाय सुरभिकेसरोद्यानहिमाच्छितशुभ्राभ्रमरकण्टकोत्तुङ्गशृङ्गदर्शनाय परिजनैः सह गन्तास्मि" इति। तृतीयोपयोगः साधारणस्मृतिकल्पनाप्रतिमानां नवीनविचारक्रियायां समुपलभ्यते। तत्र जटिलसमस्यासमाधानाय क्रमविशेषे प्रयोजनान्विते तासामभिव्यक्तिर्यथार्थवस्तुसमाकलनपुरस्सरा जायते। साधारणस्मृतिकल्पनाप्रतिमातिशयेन प्रत्ययाः सुस्पष्टाः प्रचुराश्रया जायन्ते। प्रत्ययानामर्थवैशारद्ये संवृत्ते विचारसौष्ठवमभिनिर्वर्तत इति निष्प्रत्यूहम्। तासां विचारविकासे य उपयोगो जायते, स निखिलः पूर्वस्मिन्नध्यायेऽनुव्याख्यात एव।

(घ) पुनरावर्तककल्पनाप्रतिमाः[4]—यदा वारं वारं प्रसभं पूर्वानुभवस्मृतिकल्पनाप्रतिमा अनुभूयन्ते, कालात्ययेऽपि भृशं पुनरावर्तन्ते, तदा ताः 'पुनरावर्तककल्पनाप्रतिमाः'

---

१. तुलनार्थम्—Primary memory images.

२. तुलनार्थम्—Dictation.

३. तुलनार्थम्—Secondary memory images.

४. तुलनार्थम्—Recurrent images.

इत्यभिधीयन्ते । यथा हि कदाचन अप्रियवस्तुदुर्गन्धश्चिरादनुभूयते । धनागारस्य[1] कर्मचारिभिः कार्यालयकर्मचारिभिः कार्यालयायव्ययनिरीक्षकैश्च सततं संख्यापंक्तिसमनुगताङ्कानामावर्त्तक-कल्पनाप्रतिमाः प्रायेणानुभूयन्ते ।

(ङ) अभ्यस्तकल्पनाप्रतिमाः—एताः कल्पनाप्रतिमाः सामान्यप्रत्ययैः सह सन्निविष्टा भवन्ति ; यथा—ईश्वरप्रत्ययेन सह जगत्कर्तृत्वनियन्तृत्वादिमूर्त्तकल्पना चिरेणाभ्यस्ता भवति । इतरैरीश्वरामूर्त्तप्रत्ययेन सह दयालुत्वजगदधिष्ठानत्वादिजन्यमूर्त्तकल्पना स्वाभ्यासानुसारमनु-भूयते । एवम्प्रकारेण धर्मपुण्यपापशौचसत्यादिविषयमधिकृत्यानेका अभ्यस्तकल्पनाप्रतिमा अभिनिर्वर्तन्ते ।

५. असामान्यकल्पनाप्रतिमाः[2]

एताः कल्पनाप्रतिमा असामान्यमनोविज्ञानान्तर्गताः । तासां वर्गीकरणं त्रिधा कर्तुं शक्यते ।

ता यथा—

(क) विभ्रमात्मककल्पनाप्रतिमाः[3] ।

(ख) आलोचनेतरकल्पनाप्रतिमाः[4] ।

(ग) सजीवकल्पनाप्रतिमाश्च[5] ।

वयमेताः क्रमशोऽनुव्याख्यास्यामः ।

(क) विभ्रमात्मककल्पनाप्रतिमाः—एतासु कल्पनाप्रतिमासु विषयीभूताः पदार्थाः प्रत्यक्षानुगतप्रत्यया इवानुभूयन्ते । तेषां पदार्थानां चेन्द्रियसन्निहितं सत्त्वमप्यनुभूयते । वस्तुतः, तत्तु कुत्रापि नोपलभ्यते । उदाहरणतया विक्षिप्तो नर एवम्प्रकारेणाचरति व्यवहरति च येनेदमायाति यद्धि सोऽन्यपुरुषसन्निधानादेवमाचरति प्रतिवदति च । असत्यपि चान्यपुरुषे, स तस्मिन् क्रुद्धो जायते, ताडयितुं यतते, अपशब्दानुच्चारयति । स्मरणीयं यद्धि व्याख्यातपूर्वे विभ्रमेऽपि वास्तविकनिर्विकल्पकप्रत्यक्षोत्तेजकविषयाभावेऽपि निर्विकल्पकप्रत्यक्षसदृशोऽनुभवविशेषोऽभिनिर्वर्तते । स च 'विभ्रमः' इत्युच्यते । विभ्रमात्मककल्पनाप्रतिमास्वप्युत्तेजकविषयाभावे सति तादृशो-ऽनुभवः सङ्घटते । सम्मोहनदशायामपि[6] प्रयोक्त्रा सम्मोहनसङ्केते प्रदत्ते सति तत्क्षणमेव विषयीभूतो बालकः साक्षात् प्रत्यक्षानुभवविषयीभूतानिव पदार्थान् वर्णयति । नहि तस्य प्रत्यया निर्वर्ण्यमानाः प्रत्यक्षजन्याः, तथापि प्रत्यक्षजन्यप्रत्ययसङ्काशा उज्ज्वलाः स्पष्टा वर्णगभीरत्वा-दियुक्ताश्च सम्भवन्ति । बाह्योत्तेजकाभावेऽपि विभ्रमात्मककल्पनाप्रतिमाः सङ्घटन्ते—इत्येव तासां विशेषः ।

(ख) आलोचनेतरकल्पनाप्रतिमाः—आलोचनेतरकल्पनाप्रतिमासु ज्ञानेन्द्रियविशेष-

१. तुलनार्थम्—Bank.

२. तुलनार्थम्—Abnormal images.

३. तुलनार्थम्—Hallucinatory images.

४. तुलनार्थम्—Synasthetic images.

५. तुलनार्थम्—Eidetic images.

६. तुलनार्थम्—Hypnosis.

सम्बन्ध्यालोचनज्ञानेनान्येन्द्रियजन्यप्रत्ययरूपं ज्ञानं निर्विकल्पकं जन्यते। स्वानुरूपयोग्यविषयाभावे तत्तु निर्विकल्पकं ज्ञानमिति न भवितुमर्हति। अतः कल्पनाप्रतिमारूपं तदिति वयं ब्रूमः। तदुदाहरणं च वर्णमयं श्रावणं प्रत्यक्षम्, यत्र शाब्दजज्ञानोत्तेजकं वर्णप्रकाशविशेषयुक्तं चाक्षुषप्रत्यक्षालोचनं ज्ञानं जनयति। केषाञ्चित् पुरुषाणां रणश्रृङ्गशब्देन रणभेरिशब्देन च वैद्युतप्रकाशालोचनमिव कल्पनाप्रतिमा साक्षाज्जन्यते। एकेनालोचनज्ञानविशेषेण यदा भिन्नेन्द्रियप्रत्यक्षानुरूपप्रत्यया जन्यन्ते, तदा आलोचनेतरकल्पनाप्रतिमा जायते इति वयं ब्रूमः।

लैङ्गफील्डमहोदयमतम्

लैङ्गफील्डमहोदयेन[१] अमेरिकनदेशीयप्रिंसटनविश्वविद्यालयीयमनोविज्ञानप्राध्यापकप्रवरेण आलोचनेतरकल्पनाप्रतिमाया एकस्योदाहरणस्य विशिष्टमध्ययनं सम्पादितम्। अध्ययनविषयीभूतेन पुरुषेण अष्टवर्षपर्यन्तमेकस्यैव ध्वनिविशेषस्य साहचर्य्यमेकेन वर्णविशेषेण सहानुभूतम्। यदि द्वयोः ध्वन्योः स्वरविशेषयोः सम्मिश्रणं युगपद् भवेत्तर्हि तस्य आलोचनेतरवर्णप्रतिमा अपि तदनुरूपवर्णसम्मिश्रणमाधत्ते स्म। आङ्गलभाषीयस्वरसङ्केतसहितं तद् वयमग्रतोऽङ्कितं करिष्यामः। १९६२ वैक्रमाब्दे १९६९ वैक्रमाब्दे च द्विवारमिदं प्रयोगाभ्यां साहचर्य्यमुपोद्बलितम्।

	१९६२ वैक्र०
स	रक्तवर्णः
द[१]	केसरवर्णः[२]
द	नीलकृष्णवर्णः[३]
इ[१]	ईषन्नीलवर्णः
इ	सुवर्णाभपीतवर्णः
फ	ईषत्केसरवर्णः[४]
फ[१]	सुवर्णाभनीलवर्णः
ग	हरिततरनीलवर्णः
ग[१]	स्वच्छनीलवर्णः
अ	ईषत्पीतवर्णः
व[१]	नारङ्गकवर्णः
व	उत्कृष्टताम्रवर्णः।

एवम्प्रकारेण आलोचनेतरकल्पनाप्रतिमोदाहरणभूतानि तथ्येतराण्यपि सम्प्राप्तानि। यथा—वर्णान्वितो गन्धः, वर्णमयो वा गन्धः, स्वादो वेति।

(ग) सजीवकल्पनाप्रतिमाः[५]—एता आङ्गलभाषायाम् 'ईडेटिक' इत्यभिधीयन्ते। १९६४

१, तुलनार्थम्—H. S. langfield of Princeton Uinversity. (Psychologil Bulletin 1914)

२. तुलनार्थम्—Purple.

३. तुलनार्थम्—Violet.

४. तुलनार्थम्—Pink.

५. तुलनार्थम्—Eidetic images.

वैक्रमाब्दे अरबैण्टिशमहोदयेनाविष्कृतं[1] यद्धि केषाञ्चन बालकानां कल्पनाप्रतिमा वास्तविकप्रत्यक्ष-सङ्काशाः समुज्ज्वला भवन्तीति। ततो जर्मनदेशीयमारवर्गविश्वविद्यालयस्य मनोविज्ञानाचार्य्येण जेन्शमहोदयेन[2] विशेषाध्ययनानन्तरम् 'ईडेटिक' इति विशेषणेन तादृश्यः समुज्ज्वलाः प्रतिमा अनुव्याख्याताः। एताः सजीवकल्पनाप्रतिमा आलपोर्टमहोदयानुसारं स्मृतिकल्पनाप्रतिमानामेको वर्गविशेषः। जेन्शमहोदयानुसारं तास्तु कल्पनाप्रतिमा आलोचनोत्तरकल्पनाप्रतिमास्मृतिकल्पना-प्रतिमयोश्चान्तराले विशिष्टमेव रूपं बिभ्रतीति तासु ये ये प्रत्यया अनुभूयन्ते तेऽतीव सुस्पष्टाः साक्षात् प्रत्यक्षानुगता इव सजीवाः, गभीरवर्णप्रान्तीयरेखान्विता भवन्ति। शिशूनामनुभवे सजीव-कल्पनाप्रतिमाः प्राचुर्य्येणोपलभ्यन्ते; किन्तु सर्वेषु बालकेष्वेव तदनुभवक्षमता नोपलभ्यते। आ अष्टमवर्षात् त्रयोदशवर्षं यावदस्या बालकैरनुभवः सुष्ठुतरं प्रयोगार्हः; किन्तु अष्टवर्षा-न्न्यूनवर्षीयबालकानामप्यनुभवो द्रष्टुमेव शक्यते। चित्राङ्कितं पृष्ठं दृष्ट्वा ते प्रत्येकं वर्णरेखा-क्रमादिविशेषं वर्णयितुमारभन्ते। तेषां वर्णनं घटनानामेतादृशं भवति येनेदं प्रतिभाति यद्धि ते चित्रं पुरस्ताद् दृष्ट्वैव वर्णनं कुर्वन्तीति। सुकवीनाम्, सफलचित्रकाराणाम्, नृत्यसङ्गीताभिनयकला-विदामेताः सजीवकल्पनाप्रतिमा नितरामुत्कृष्टा भवन्तीति बोद्धव्यम्।

६. कल्पनाप्रतिमापेक्षया व्यक्तिवर्गीकरणम्

किन्तु खलु वयं कल्पनाभेदविशेषमधिकृत्य पुरुषाणां व्यक्तीनामपि वर्गीकरणं कर्तुं शक्नुमः? चिरादेव मनोवैज्ञानिकानामियं धारणासीत्, मान्यतासीद् यद्धि विविधव्यक्तीनां कल्पनाविशेषानुसारं वर्गीकरणं कर्तुं शक्यत इति। जर्मनदेशीयप्रायोगिकमनोविज्ञानविशारदेन फैच-नरमहोदयेनेदं तथ्यं १९१७ वैक्रमाब्दे प्रतिपादितं यद्धि कासुचिद् व्यक्तिषु कल्पनाप्रतिमानुभवाभावो विद्यते। विंशतिवर्षानन्तरं फ्रांसिसगाल्टनमहोदयेन विशदप्रश्नावलीपूर्वकं मानसिककल्पना-प्रतिमाविषयस्य गवेषणा समारब्धा। मनोविज्ञानक्षेत्रे प्रश्नावलीसम्प्रयोगस्यायं प्रथमोऽवसर आसीत्।

शुद्धोत्तराशया वैज्ञानिकप्रवराणां विदुषामेव समावेशमस्यां प्रश्नावलीतालिकायां गाल्टन-महोदयः कृतवान्, येन तेषामुत्तराणि यथातथानि भवेयुः। तेन समालोडितमिदं यद्धि केषुचिद् विख्यातवैज्ञानिकेषु कल्पनाप्रतिमाभावो विद्यते। अन्यच्च, अवैज्ञानिकपुरुषेषु कल्पनाप्रतिमान्त-र्गतवर्णप्रकाशवर्णनविशेषादितथ्यानां प्राखर्य्यं सुस्पष्टत्वं च्यायातम्। अपि च, तत्प्रयोगेणेदमपि निष्पन्नं यद्धि कल्पनाप्रतिमाविशेषप्रकर्षमधिकृत्य विविधव्यक्तीनां वर्गीकरणं नैव कर्तुं शक्यते। तदनन्तरमेव कैश्चन मनोविज्ञानाचार्य्यैः प्रतिपादितं यद्धि केचन पुरुषाश्चाक्षुषालोचनज्ञानकल्पना-प्रतिमाप्राखर्य्यात् चाक्षुषकल्पनाप्रतिमाविशिष्टा[3] भवन्ति, अन्ये च केचन श्रावणकल्पनाप्रतिमा-न्विता[4] भवन्ति। फ्रान्सदेशीयोपन्यासकार-ऐमिलजोलामहोदयस्याध्ययनेन विवृतं यद्धि स घ्राणज-कल्पनाविशेषान्वित[5] आसीदिति।

१. तुलनार्थम्—V. Urbantschitsch.

२. तुलनार्थम्—Erich R. jensch.

३. तुलनार्थम्—Visiles.

४. तुलनार्थम्—Audiles.

५. तुलनार्थम्—Olfactory.

किन्तु, अमेरिकादेशीयबेट्समहोदयेन[1] माल्टनमहोदयापेक्षयात्यर्थं सुनिष्पन्नकल्पनाप्रतिमाप्रश्नावलीं रचयित्वा तदुत्तराणां गवेषणया स्फोरितमिदं रहस्यं यद्धि मनुष्याणां कल्पनाप्रतिमाविशेषानुसारं वर्गीकरणं नैवं कर्तुं शक्यते। सन्ति हि काश्चन व्यक्तयः, यासु चाक्षुषकल्पनाप्रतिमाशाब्दजकल्पनाप्रतिमाभिः सह रासनकल्पनाप्रतिमाः समुपलभ्यन्ते, तथापि तेनेदं तथ्यं न निराकृतं यद्वै येष्वेकाधिकप्रकारककल्पनाप्रतिमाः समुपलभ्यन्ते, तेषु पुरुषेषु कल्पनाप्रतिमाप्रकारैकविशेषस्येतरापेक्षया प्राखर्य्यं समुपलभ्यत इति। अतः कल्पनाप्रतिमाविशेषमधिकृत्य पुरुषाणामितरेतरव्यावृत्तवर्गीकरणं नैव समीचीनमिति सिद्धम्।

७, कल्पनाप्रकारविशेषाः

कल्पनाविकासे मौलिकतासङ्कल्पशक्तिविश्वासोपयोगिताविशेषानधिकृत्य बहवः कल्पनाभेदा अभिनिर्वर्तन्ते; किन्तु तेषामन्यतमविशेषमधिकृत्येतरेतरव्यावृत्तलक्षणोपेतं कल्पनावर्गीकरणं न सम्भाव्यते। वयमत्र मनोविज्ञानविशारदद्वयेन प्रतिपादितं कल्पनावर्गीकरणद्वयं क्रमशोऽनुव्याख्यास्यामः। प्रथमं तावन्मैकडूगलमहोदयाभिमतं कल्पनावर्गीकरणम्। कल्पनाप्रकारा हि—

(अ) पुनरुत्पादनात्मिकाकल्पना[2]

(आ) उत्पादनात्मिका कल्पना[3] { (क) रचनात्मिका[4] / (ख) सर्जनात्मिका[5] }

(अ) **पुनरुत्पादनात्मिका कल्पना**—सोऽयं कल्पनाप्रकारविशेषः स्मृत्यविशेषः, यतो ह्यस्मिन् पुरातनानुभवस्य कल्पनाप्रतिमा यथापूर्वमाधीयन्ते। उदाहरणतो मया ह्यो वाराणसेयभारतमातृमन्दिरं दृष्टम्। अद्य यदाहं तत्कल्पनाप्रतिमां स्मरामि, सा यथापूर्वमेवायाति तत्तद्विशेषणोपेता। पुनरुत्पादनात्मिकायां कल्पनायां पूर्वानुभवसंस्काराणामुद्बोधनमात्रमनुभूयते।

(आ) **उत्पादनात्मिका कल्पना**—सर्वाः कल्पना नहि पूर्वानुभवप्रतिकृतिरूपाः, प्रत्युत नवीनमैक्यं कल्पनाप्रतिमासंयोजनात्मकं तेषु समुपलभ्यते। पूर्वानुगतक्रमविशेषं विहाय नवीनः क्रमस्तासु कलात्मकत्वेनाभिनिर्वर्तते। अतस्तासामुत्पादनात्मिका अभिनवकल्पनापदार्थोत्पादनात्मिकेति व्यपदेशः सार्थकः। सोऽयं पदार्थः पूर्वं तद्रूपेण नोपलभ्यते। अभिनवपदार्थस्य कल्पनासृष्टिरत्र विधीयते, अत एवेयमुत्पादनात्मिका कल्पनेति सुप्रथिता। अस्या द्वौ विभागावपरावपि कर्तुं शक्येते—(क) रचनात्मिका कल्पना, (ख) सर्जनात्मिका कल्पना चेति। वस्तुतो रचनात्मकसर्जनात्मकोत्पादनात्मकादिविशेषणपदैरनर्थान्तरैरेकैव सर्जनात्मिका कल्पना संसूच्यते, तथापि लक्ष्यविशेषमधिकृत्य तत्सूक्ष्मभेदाः स्वीक्रियन्ते।

(क) **रचनात्मिका कल्पना**—अत्रोपयोगिताविशेषमभिलक्ष्य विचारान्वितं कल्पनारूपं निष्पन्नं भवति। अस्याः कल्पनाया उदाहरणं चरमं वैज्ञानिकानुसन्धानेष्वभिलक्ष्यते। सरगङ्गाराममहोदयैः स्वनामधन्यैः काशीस्थहिन्दूविश्वविद्यालयस्यादर्शमानचित्रमलभ्यपूर्वं

1. तुलनार्थम्—G. H. Betts.
2. तुलनार्थम्—Reproductive.
3. तुलनार्थम्—Productive.
4. तुलनार्थम्—Constructive.
5. तुलनार्थम्—Creative.

रचनात्मककल्पनारूपमतिरमणीयं निर्म्मितम्। नूनं तत्र महामनोमालवीयमहोदयानामपि कल्पनासौष्ठवं सुलभमासीत्। तन्निष्पादितं चित्रं विचारसहकृतं क्षणिकावश्यकतानिर्वाहक्षमं किल कलाकल्पनासूक्ष्मेक्षिकायाश्चरममुत्कृष्टं रूपम्। रचनात्मककल्पनायां भौतिकपदार्थकल्पनाप्राधान्यं विशेषेण वर्तत इति विशेषः। अस्यां कल्पनावाटिकायां दर्शनविज्ञानधर्मशास्त्ररूपः कल्पवृक्षो यथाकामं सुरभिपुष्पफलानि प्रदत्ते।

सर्जनात्मिका कल्पना--सोऽयं कल्पनाविशेषः सुकवीनां कलाविदाञ्च रसात्मकः शेवधिः। यथा काशीहिन्दूविश्वविद्यालयस्य कल्पनायां कस्यचिदेकस्य प्राक्तनपदार्थस्य कल्पनानुकृतिर्नासीत्, एवम्प्रकारेणैव काशीविद्यापीठसन्निकृष्टे भारतमातृमन्दिरे यद् भारतमातुः मानचित्रं स्फटिकाङ्कितम्, तस्यापि कल्पनायामेकस्य कस्यचित् प्राक्तनचित्रस्यानुकृतिमात्रं नासीत्; विविधकल्पनाप्रतिमानां विचित्रसंयोजनविशेषसमुत्थं समञ्जसं वै तन्निदर्शनम्। तथैव साहित्यसङ्गीतकलाक्षेत्र उत्पादनात्मिकायाः कल्पनाया यद्रूपमुपलभ्यते, तत् 'सर्जनात्मकम्' इति विशेषणपदेन विशिष्यते। नहि पूर्वं दुग्धकुल्या केनापि दृष्टा, नापि स्नेहेन कमपि कोऽपि स्नपयितुमर्हति, नैव च स्नेहस्यामूर्त्तप्रत्ययस्य मूर्त्तपयस्विनी प्रवहमाना केनापि दृष्टपूर्वा, यद्यपि दुग्धस्नेहनिष्यन्दिकुल्यास्नानादिप्रत्ययविशेषाः पूर्वं विविधस्थलेष्वनुभूता आसन्। महाकविभवभूते रसमयी तूलिका कियद्रमणीयं सर्जनात्मिकायाः कल्पनायाः सुनिष्पन्नं चित्रं मूर्त्तमिव प्रतीयमानममूर्त्तकल्पनाप्रतिमाभिर्विनिर्मितं रचयति। तथा हि—

"स्नपयति हृदयेशं स्नेहनिष्यन्दिनी ते
धवलबहलमुग्धा दुग्धकुल्येव दृष्टिः॥" इति[1]।

सीतामभिमुखीकृत्य भगवतो रामचन्द्रस्य खल्वियमुक्तिर्वस्तुतो दाम्पत्यप्रणयस्य परमाभिरामं चित्रं पुरस्करोति। अन्यच्च, भगवत्याः शैलाधिराजतनयायाः पार्वत्या हृदयाभिरामं स्मितं कविकुलगुरुः कियत्सौष्ठवेन निर्वर्णयति। तथा हि—

पुष्पं प्रवालोपहितं यदि स्या-
न्मुक्ताफलं वा स्फुटविद्रुमस्थम्।
ततोऽनुकुर्याद्विशदस्य तस्या-
स्ताम्रौष्ठपर्यस्तरुचः स्मितस्य॥ इति[2]।

अन्यच्च, इटैलीदेशीयपुनरुत्थानकालिकश्चित्रकारः स्वनामधन्यो धन्यो माइकेल-एञ्जेलो-महोदयो मोनालिसा[3]महाभागाया यथार्थभूतामिव यां सस्मितां स्फटिकमूर्तिं निर्म्मितवान्, सा हि खलु सम्प्रत्यपि कोटिशो दर्शकान् चित्रकलाविशेषज्ञाँश्च स्मर्यमाणैव नन्दयति।

८. ड्रेवरमहोदयाभिमतं कल्पनावर्गीकरणम्

प्राध्यापकवरेण्या मनोविज्ञानधुरन्धरा ड्रेवरमहाभागाः[4] कल्पनावर्गीकरणमन्यप्रकारेणा-

---

१. द्रष्टव्यम्—उत्तररामचरितम् ३।२३
२. द्रष्टव्यम्—कुमारसम्भवम् १।४४
३. तुलनार्थम्—Monalisa by michael Angello.
४. तुलनार्थम्—Drever, University of Edinbura

ङ्गीकुर्वन्ति । एतन्मतानुसारं कल्पना प्रथमतो द्विधा विभजनीया; यथा – आदानात्मिका कल्पना[1], सर्जनात्मिका कल्पना[2] चेति । आदानात्मिका कल्पना तदा भवति यदाऽदृष्टपूर्वाः पदार्थाः कल्प्यन्ते । यदा शिक्षकः पृथिवीं नारङ्गकसङ्काशां निर्वर्ण्य पृथिव्या वर्तुलाकारत्वं छात्रकल्पनाभूमाववतारयति । कल्प्यते च छात्रैरियं वर्तुलाकारा पृथिवी नारङ्गकमिव भवतीति । तदा नारङ्गकफलानुभवजन्यप्रत्ययेन सह सादृश्यं स्पष्टीकृत्य पृथिव्या वर्तुलाकारत्वं स्फुटमेव बालसुलभसुकुमारकल्पनायै भवतीत्यवगन्तव्यम् । सेयमादानात्मिका कल्पनेत्युच्यते ।

सर्जनात्मिकया कल्पनयाभिनववस्तुनिर्म्माणाविष्कारादयोऽभिनिर्वर्तन्ते । सेयं कल्पना द्विधा विभज्यते तैर्महानुभावैः ; यथा—उपयोगितान्विता[3] कल्पना, रसात्मिका[4] कल्पना चेति । उपयोगितान्विता कल्पना तु प्रागुक्तमैकड्गलाभिमतरचनात्मककल्पनासदृशी भवति । तस्याश्चरममुदाहरणमणुत्रमनिर्म्माणे सँल्लक्ष्यते । यथा यथा सामाजिकप्रबन्धजनिता आवश्यकताविशेषा अनुभूयन्ते, तथा तथा यान्त्रिकवैज्ञानिकानुसन्धानजातमप्याविष्कृतं संवर्धितञ्च जायते ।

सेयमुपयोगितान्विता कल्पना पुनर्द्विधा विभक्तुं शक्यते—सैद्धान्तकी[5] उपयोगितान्विता कल्पना, व्यावहारिकी[6] उपयोगितान्विता कल्पना चेति । सैद्धान्तिकी उपयोगितान्विता कल्पना तु सिद्धान्तपरायणा सामान्यक्रियोपयोगिनियमनिर्धारणसंसक्ता भवति । व्यावहारिकी उपयोगितान्विता कल्पना किल 'व्यवहारे सिद्धान्तानां कथं परमोपयोगः कर्तुं शक्यते ?' इति सर्वं कल्पते । प्रागुक्तभारतमातृमन्दिरनिर्म्माणमेवंविधकल्पनाभिव्यक्तिरूपम् । रसात्मिका कल्पना मैकड्गलमहोदयोक्तसर्जनात्मककल्पनासदृशी । तस्या वर्गीकरणं पुनः द्विधा क्रियते – कलात्मिका रसान्विता कल्पना[7], उन्मुक्तकल्पना[8] चेति । यदा स्वनिर्मिते स्वर्गे मानवोऽयं रमते यथार्थसम्बन्धविनिर्मुक्तः, तदोन्मुक्तकल्पना तस्येति कथ्यते । दिवास्वप्नेष्वर्धनिमीलितनेत्राः पुरुषाः प्रायेण स्वच्छन्दकल्पनाप्रवाहं विश्रान्तिकाले च प्रकाममनुभवन्ति । कलात्मिका रसान्विता कल्पना विशेषेण साहित्यसङ्गीतकलाप्रवीणेषु दरीदृश्यते ।

वस्तुतो निखिलं मानवजीवनमेव कल्पनारङ्गभूमिः । पशुजीवनान्मानवसभ्यतासंस्कृतिसाहित्यरूपोत्कर्षस्यैकमेव मूलकारणं मानवस्य कल्पनाक्षमतेति वयं मन्यामहे ।

---

१. तुलनार्थम्—Receptive imagination.

२. तुलनार्थम्—Creative imagination.

३. तुलनार्थम्—Pragmatic imagination.

४. तुलनार्थम्—Aesthetic.


५. तुलनार्थम्—Theoretical imagination.

६. तुलनार्थम्—Practical imagination.

७. तुलनार्थम्—Artistic.

८. तुलनार्थम्—Fantasy.

ड्रेवरमहोदयप्रतिपादितं वर्गीकरणं निम्नलिखित रेखाचित्रेण स्फुटतां लभते—



९. उन्मुक्तकल्पना

उन्मुक्तकल्पनायां कल्पनातिशय्यं वर्तते। दिवास्वप्नेषु विश्रान्तिकाले चास्या अभिव्यक्तिर्जायते। कैशोरावस्थाया ये ये गगनप्रासादा निर्म्माणं लभन्ते चिन्तानिरस्तविश्रामक्षणेषु, ते सर्वे उन्मुक्तकल्पनया निष्पद्यन्ते। शैशवे विशेषेण उन्मुक्तकल्पनायाः प्रत्यक्षानुभूतवस्तुभ्यो भेदप्रयोजकं नोपलभ्यते; यतो हि बाल्यकाले कल्पनाया अतिस्वच्छाश्रयत्वं वर्तते। शिशुः बालको वा काल्पनिकक्रीडनसहयोगिनां रचनां करोति। स वै तेन कल्पितसहयोगिना सह तं ताडयित्वा रोदिति, शाययति च तं स्नेहमयहस्तावलेपेन सह, दुग्धं च पाययति। बालिकाः कृत्रिमाः पुत्तलिका[1] निर्म्माय तासां विवाहं रचयन्ति, प्रसाधनस्नानादिकं कारयन्ति, भोजनं पचन्ति। मध्ये मध्ये कदाचन विवदमानास्ताः परस्परं क्रुध्यन्ति। पुच्छं धारयित्वा हनुमतो रूपं विरचय्य लङ्कादहनमभिनयन्ति। शैशवसुलभा कल्पना इयती उर्वरोन्मुक्तानर्गला च भवति यद्वै वृद्धमातामह्या कथिता बह्वयः कथास्तेषां सन्तृप्त्यै न कल्पन्ते। तेषां विश्वासश्च जायते पशुवृक्षादिकथासु। पञ्चतन्त्रजातककथा हितोपदेशकथाश्च सर्वाः शिशुभ्यो वस्तुभूताः सत्याः सर्वांशेन। सप्तवर्षोत्तरं विचारप्रकर्षे सत्युन्मुक्तकल्पना ह्रासं नीयते। शिशुः कदाचन कुड्यप्रतिबिम्बितं स्वचित्रानुगतप्रतिद्वन्द्विनं दृष्ट्वा रोदिति, परावर्तते, ताडयति, लालयति, शामयति चेति। उन्मुक्तकल्पनासौख्यं दुर्लभं लोके। तच्च शैशवे निसर्गतोऽनुभूयते, तत्स्मृतिमात्रं तदनन्तरं सुखयति।

उन्मुक्तकल्पना भावप्रचयेच्छाप्रयत्नाभिलाषजन्या भवन्ति। तास्त्ववदमितेच्छानां शैशवोचितानां सामाजिकवस्तुस्थितिमभिमुखीकृत्यासम्भाव्यानां वा परम्परया सन्तृप्तिजनिकाः। साक्षात्सन्तृप्तिस्तु तथाविधेच्छादीनां यथार्थभूते जीवने सँल्लक्ष्यते। तन्मार्गस्य चावरुद्धत्वाद्

---

1. तुलनार्थम्—'गुडिया' इत्यार्यभाषायाम्।

उन्मुक्तकल्पनाद्वारमनर्गलं सर्वसुलभमप्रत्यक्षसन्तृप्तिजनकम्। उन्मुक्तकल्पनासु खल्वहम्भावोत्कर्षोचितवासनापूर्तिरनायासेनाभिसम्पद्यत इत्यर्वाचीनानां मनोवैज्ञानिकानां मतम्। प्राचामायुर्वेदज्ञानां मते वातपित्तकफादिविकाराश्रया उन्मुक्तकल्पनाः। तत्तु सर्वं तत्तदाकरग्रन्थेभ्यः चरकसंहिता-सुश्रुतसंहिता-अष्टाङ्गहृदय-भावप्रकाशादिभ्य उन्नेयम्।

१०. स्वप्नस्वरूपम्

कल्पनोत्कर्षस्य रमणीयं प्रकृतिप्रदत्तं साधनं वै स्वप्नः[1]। स्वप्नावस्थाभिमानि सूक्ष्मचैतन्यं तैजसाख्यमिति तु वयं पूर्वमवोचाम। आङ्गलभाषायां सूक्ष्मचैतन्यम् 'सब-काँशस[2]' इति निगद्यते। फ्रायडमहोदयः स्वप्नानां व्यक्तविषयत्वमव्यक्तविषयत्वं चानुव्याख्यातवान्। वयमत्र कल्पनां विशेषेणाधिकृत्य व्यक्तविषयत्वमेव स्वप्नस्य प्रतिपादयिष्यामः।

स्वप्नेषु प्रायश्चाक्षुषकल्पनाप्रतिमानामेव सद्भावो विद्यते। तदर्धं प्रायः शाब्दजकल्पनाप्रतिमा आविर्भवन्ति। अनियन्त्रितस्वच्छन्दविचारमयः स्वप्नो भवति। स्वप्ने प्रत्यया इतस्ततो विकीर्णा बौद्धिकप्रयोजनान्वितिविरहिताश्च भवन्ति। दृश्यानामाविर्भावः स्वप्नेऽभिनयात्मकरीत्या सङ्घटते। पेशीजन्यालोचनज्ञानप्रत्ययानां मृदुस्पर्शपुलकादीनामनुभवोऽपि तत्राभिनिर्वर्तते। स्वप्नद्रष्टा स्वप्ने मृदुसङ्गीतं प्रेयस्याः कलनादं मञ्जुलरवं सानन्दं शृणोति। बाह्यसामाजिकनैतिकमर्यादाविनिर्मुक्तोऽयं कल्पनाप्रवाहोऽबाधगत्या प्रसरति। स्वप्नद्रष्टा आत्मानं चलन्तं भ्रमन्तं ब्रुवन्तं युध्यन्तमाकाशे वायुयानेन विहरन्तमुत्पतन्तञ्च स्वप्ने पश्यति, तत्तद्भावसहकृतानुभवविशेषानप्यनुभवति। स्मरणीयं यद्धि प्रत्ययाः कल्पनाप्रतिमाश्च स्वप्नावस्थायां यथार्थवस्तुप्रत्यक्षमिव प्रतीयन्ते, अनुभूयन्ते च सत्यत्वेन युक्ताः। जागरणापादितावबोधेन तेषामलीकतमवस्तुभूतत्वं बुद्ध्या विविच्यते। अतः स्वप्नविभ्रमयोः सादृश्यं सिद्धं भवति। वस्त्वभावे सत्यपि विभ्रमा जायन्ते प्रत्ययमात्रजन्या इति तु व्याख्यातपूर्वम्।

ननु कथं केन कारणेन वा स्वप्ना आविर्भवन्ति? फ्रायडमहोदयानां मते मानसिकसङ्घर्षाणामवदमितेच्छानां तिरोहितं स्वरूपं प्रतीकभूताः स्वप्ना अभिव्यञ्जयितुं प्रवर्तन्ते[3]। वयमिदं सर्वमग्रेऽनुव्याख्यास्यामः।

एडलरमहोदयानां मते स्वप्नेषु विषमसमस्यानाम्, यासां समाधानं पूर्वं सम्यक्तया नोपलब्धम्, विचारो जायते, अभिनवसमस्यानां वा कल्पनाधीयते। ताश्च समस्याः प्रतीकरूपैरभिव्यज्यन्ते। यथा काचन भाविन्यापत्तिर्गर्तपतनेन किं वा गर्तेनाभिव्यज्यते। इदं मतमस्माभिरप्यनुमोद्यते।

समष्टिवादिनां मनोवैज्ञानिकानां मतानुसारमपूर्णकार्यैरेको मानसिकचिन्ताविशेषो जायते, यस्य समाधानं स्वप्नेषूपलभ्यते। विशेषत उल्लेखनीयमस्मिन् विषयेऽस्ति बालकानामपूर्णकार्यसम्बन्धि स्वप्नदर्शनम्।

---

१. तुलनार्थम्—Dream.

२. तुलनार्थम्—Sub-Conscious.

३. तुलनार्थम्—Sigmund frend, "The Interpretation of Dreams" by A. A. Brill (macmillan & Co. 1962).

स्वप्नगोचरकल्पनाप्रतिमास्तर्हि पूर्वानुभवसंस्कारजन्याः। स्वप्नगतविषयाणां प्रातिभासिकं सत्त्वमित्यवगन्तव्यम्। यत् प्रतीतिमात्ररूपतया सत्यमवभासते, अवबोधे च बाध्यते, तत् प्रातिभासिकसत्त्वस्य लक्ष्णम्। तथापि कल्पना मनोव्यापाररूपेण सर्वा वस्तुभूताः। अतो मनोविज्ञानविषयीभूतत्वात् कल्पनाप्रतिमानां प्रातिभासिकं सत्त्वमिति न वाच्यम्। तत्त्वज्ञानदृष्ट्या पदार्थविज्ञानदृष्ट्या वा कल्पनायाः कल्पनाप्रतिमानां वा प्रातिभासिकं सत्त्वं भवतु नाम; किन्तु मनोवृत्तितया कल्पनायाः कल्पनाप्रतिमानां स्वप्नगतविषयाणां च पारमार्थिकसत्त्वं निष्प्रत्यूहमायातं भवति। स्मरणीयमत्र यद्धि तत्त्वज्ञानपरकदर्शनेषु कल्पनाविषयीभूतपदार्थसत्त्वमवधार्यते, प्रस्तुते मनोविज्ञानतन्त्रे च मनोव्यापारतया वस्तुभूतकल्पनास्वरूपप्रपञ्चनमुपपद्यत इति ॥

इति अर्वाचीने मनोविज्ञाने कल्पनास्वरूपविवेचनीय एकादशोऽध्यायः ॥

द्वादशोऽध्यायः

स्मृतिस्वरूपविवेचनम्

१. स्मृतिलक्षणम्

अथातो वयं स्मृतिस्वरूपमनुव्याख्यास्यामः। सर्वा एव कल्पनाप्रतिमाः पूर्वानुभवसंस्कारजन्याः; किन्तु कासुचित् कल्पनाप्रतिमासु किञ्चिदभिनवत्वं सन्निविशते, नवीनमेव कल्पनाप्रतिमानां संयोजनमभिनिर्वर्तते। अन्यासु च किमपि कल्पनाप्रतिमासंयोजनासादिताभिनवत्वं न सङ्घटते। तास्तु पूर्वानुभवसंस्कारजन्याः पूर्वानुभवप्रत्ययानुकृतिरूपाः। प्रथमप्रकारकल्पनाप्रतिमानां स्वरूपमस्माभिः पूर्वस्मिन्नध्याये व्याख्यातमेव। द्वितीयप्रकारककल्पनाप्रतिमाः 'स्मृतिः' इति व्यपदेशेनाभिधीयन्ते। वर्तमानकाले प्राक्तनानुभवसंस्कारोद्बोधनं स्मरणमिति स्मृतिलक्षणम्। तदुक्तम् अन्नम्भट्टपादैः—"संस्कारमात्रजन्यं ज्ञानं स्मृतिः" इति[1]। वार्त्तिककारोद्योतकराचार्योऽपि स्मृतिलक्षणमेवं व्याचष्टे—"प्रत्यक्षबुद्धिनिरोधे तदनुसन्धानविषयः स्मृतिः" इति[2]। योगसूत्रकारैर्महर्षिप्रवरैः स्मृतिलक्षणमेवं व्याकृतम्—"अनुभूतविषयासम्प्रमोषः स्मृतिः" इति[3]। असम्प्रमोषोऽस्तेयमिति; 'मुष् स्तेये' इत्यस्मात् प्रमोषपदव्युत्पत्तेः। कस्माद् 'असम्प्रमोषः' इत्युक्तं भवति? सर्वे प्रमाणादयोऽनधिगतमर्थं सामान्यतः प्रकारतो वाऽधिगमयन्ति। स्मृतिः पूर्वानुभवमर्यादां नातिक्रमति। स्मृतिस्तत्समानविषया, तदूनविषया वा, न तु तदधिकविषया भवति। अनुभवविषयाधिकविषयग्रहणं सम्प्रमोषः। तदभावश्चासम्प्रमोषः। अत एवासम्प्रमोष इत्युच्यतेऽनुभूतविषयाणामिति। प्राध्यापकपिल्सबरीमहोदयानुसारं प्राक्तनानुभवप्रत्ययानां पुनराधानं स्मरणमिति[4]। श्रीवुडवर्थमहोदयानां मतानुसारं पूर्वशिक्षितज्ञानस्यापरोक्षोपयोगरूपं स्मरणमिति[5]।

स्मृतिमन्तरा चैतन्यस्य किमपि स्वरूपमवधारयितुं न सम्भाव्यते। स्मृतिविधुरं वै चैतन्यमनेकानुभवविशेषखण्डानां परस्परमसम्बद्धानां क्षणिकप्रभासन्तानसङ्काशं मध्ये मध्ये मानसिकतमोभिः शबलीकृतमिवावतिष्ठते। चैतन्यखण्डेष्वसम्बद्धेषु व्यतीतश्चैतन्यखण्डस्तदौत्तरकालिकचैतन्यखण्डेनासंसृष्ट एव भविष्यति। स च साधारणालोचनप्रत्यक्षसंवेदनप्रयत्नेच्छादीनां विशिष्टानवगाहिरूपमेव बिभर्ति। तस्मात् कथमपि सविकल्पकप्रत्यक्षस्य विशेषावगाहिज्ञानस्य सम्भवो भवितुं नार्हति। स्मृतिव्यापारमन्तरा न स्थायिभावाः, न च संवेगाः, नापि च विचारा एव भविष्यन्ति।

---

१. द्रष्टव्यः—तर्कसंग्रहः

२. द्रष्टव्यम्—न्यायसूत्रभाष्यवार्त्तिकम्

३. द्रष्टव्यम्—योगसूत्रम् १।११

४. द्रष्टव्यम्—W. B. Pillsbury, psychology.

५. द्रष्टव्यम्—R. S. Woodworth—psychology, A study of mental life, page 324.

कल्पनाप्रतिमानामाधानम्, उपयोगश्च स्मरणव्यापारमन्तरेण न सिद्ध्यति। किं बहुना, व्यक्तेः सत्त्वमात्मैक्यस्वरूपमपि स्मृतिं विहाय नोपपद्यते। अतः स्मृतिव्यापारेण सुष्ठुतरं चैतन्यस्वरूपं साधितं भवति। सा च स्मृतिः क्षणिकचैतन्यवादाभ्युपगमेन न सम्भाव्यते। अत एवाचार्यप्रवरेण हेमचन्द्रेण वैनाशिकक्षणिकवादो भृशं समालोचितः—

कृतप्रणाशाकृतकर्मभोग-भव-प्रमोक्ष-स्मृतिभङ्गदोषान् ।
उपेक्ष्य साक्षात् क्षणभङ्गमिच्छन्नहो महासाहसिकः परस्ते ॥ इति[1]।

आत्मसत्त्वोपपादनाय स्मृतिगौरवमत एवोन्नेतुमर्हम्। अत एव महर्षिगौतमेन प्रणीतं सूत्रम्—

"स्मरणं त्वात्मनो ज्ञस्वाभाव्यात्" इति[2]।

अस्यानुव्याख्यानं वात्स्यायनाचार्य एवम्प्रकारेण कृतवान्—"आत्मन एव स्मरणम्, न बुद्धिसन्ततिमात्रस्येति। 'तु' शब्दोऽवधारणे। 'कथम्? ज्ञस्वभावत्वात्। 'ज्ञ' इत्यस्य स्वभावः स्वो धर्मः" इति[3]। आत्मा एव चैतन्यम्, यस्य व्यापारविशेषः स्मृतिः। व्यक्तिविशेषस्य स्वात्म-प्रत्यभिज्ञानमात्मनित्यत्वापादितस्मृतिस्वरूपाभ्युपगमेनैव सिध्यति। आचार्यवाचस्पतिमिश्रोऽपि आत्मनित्यत्वोपपादनाय स्मृत्युदाहरणान्युद्धरति स्म चतुःसूत्रीभाष्यटीकायाम्। तद्यथा—

"न च 'अहं कृशः स्थूलो गच्छामि' इत्यादिदेहधर्मसामानाधिकरण्यदर्शनाद्देहालम्बनोऽय-महङ्कार इति साम्प्रतम्। तदालम्बनत्वे हि 'योऽहं बाल्ये पितरावन्वभवं स एव स्थविरे प्रणप्तॄननुभवामि' इति प्रतिसन्धानं न भवेत्। नहि बालस्थविरयोः शरीरयोरस्ति मनागपि प्रत्यभिज्ञानगन्धः, येनैकत्वमध्यवसीयेत" इति।

एतावता सिद्धं तर्हि स्मृतिरूपमनोव्यापारस्य परमं गौरवम्। स्मृतिरेव विविधानुभवजातं त्रिकालविषयकमेकसूत्रेण निबध्नाति। स्मरणं चेदं चैतन्यस्य स्वभावगतो व्यापारः। नेदमन्यथा-सिद्धमिति वक्तुं शक्यते।

सेयं स्मृतिर्मनोव्यापाररूपा। अर्वाचीना मनोवैज्ञानिकाः स्मृतिं मनःशक्तिविशेषरूपत्वेन नाभ्युपगच्छन्ति। विविधशक्तिघटकेषु मनसः प्रविभाजनमर्वाचीनेभ्यो मनोविज्ञानपारङ्गतेभ्यो न रोचते। प्राच्यप्रतीच्यमनोवैज्ञानिका मनसो विविधशक्तिघटकेषु प्रविभाजनमङ्गीकुर्वन्ति स्म। एवंविधशक्तिवादेन मनस ऐक्यं विशृङ्खलं जायते। अतस्ते स्मृतिं मनोव्यापाररूपत्वेन प्रतिपादयन्ति। मनश्चित्तमित्याख्यायते। चित्तवृत्तिरूपमेव स्मरणमिति सुप्रसिद्धम्। चेतनोऽयं प्राणी विविधव्यापारान् कुर्वाणस्तेषु परममैक्यमादधाति। नहि विशिष्टं चैतन्यं जीवाख्यम्, यदस्मिन् ग्रन्थे मनोऽभिधानेन प्रथते, विविधस्मृतिप्रभृतिशक्तीनामितरव्यावृत्तरूपाणां समुच्चयमात्रम्। चैतन्यतत्त्वस्यैकस्य मनोऽभिधेयस्य विविधवृत्तिष्वेकः स्मृत्याख्यो वृत्तिविशेषः। एकात्मकं चैतन्यतत्त्वं स्वभावादेव बाल्यकैशोरयौवनवार्धक्याद्यवस्थानुगतज्ञानेषु सङ्गतिमाधत्ते। यदि पूर्वानुभवप्रत्ययसंस्काराणां स्मृतिवृत्तिविशेषापादितानां कालान्तरे क्रियाकारित्वं न भवेत्, समुपयोगो न जायेत; नूनं सर्वं शिक्षणमध्ययनं मानवसदाचारविज्ञानकलाप्रगतिविशेषादिक-मसम्भाव्यं भवेत्। सिद्धं तर्हि स्मरणवृत्तेर्महन्मानवव्यवहारोपकारित्वमात्मस्वरूपनिर्णायकत्वं चेति।

१. द्रष्टव्यम्—अ० यो० व्य०, श्लो० १८
२. द्रष्टव्यम्—न्यायसूत्रम्, ३।२।४०
३. द्रष्टव्यम्—न्या० सू० भा०, ३।२।४०

२. स्मृतिस्वरूपविश्लेषणम्

सर्वं स्मरणं[1] प्राक्तनसंस्कारसमुद्बोधनात्मकं भवति। मानसप्रत्यक्षेण जायते यद्धि पूर्वसंस्कारोद्बोधनाख्यं कर्म स्तरविशेषद्वयं बिभर्ति। तद्यथा—

(१) संस्कारोद्बोधनम्[2]।

(२) प्रत्यभिज्ञा, प्रत्यभिज्ञानं वेति[3]।

वयमेते प्रतिपदमग्रेऽनुव्याख्यास्यामः।

३. संस्कारोद्बोधनम्

संस्कारोद्बोधनं नाम स्मृतिव्यापारस्य पूर्वावस्था। प्रत्यभिज्ञानं च स्मृतिव्यापारस्य निष्पन्नावस्था, पूर्णावस्था वेति। संस्कारोद्बोधनाख्ये कर्मणि पूर्वानुभवप्रत्यया मनःपटले पुनराधीयन्ते, पुनरुद्बोध्यन्ते। यथा सुप्तः कश्चन नरः प्रातःकाले भृत्येन मित्रेण वोद्बोध्यते, तथैव सुप्तानतीतान् संस्कारान् पुनर्जागरितान् वयं कुर्मः। यथा—रमेशचन्द्रं कञ्चन पुरुषविशेषं दृष्ट्वा तत्क्षणं वयं चिन्तयामः, 'को नु खल्वयं पुरुषः? किमस्य नाम? कुत्र वै अस्माभिः पूर्वं दृष्टः? किमर्थमस्माकं पूर्वं सम्मेलनं सञ्जातम्? ननु कदा वयमिमं दृष्टवन्तः?' इति। नहि दर्शने सञ्जाते तत्क्षणमेव पुरुषनाम स्मर्यते। कियत्कालानन्तरं देशकालसम्मिलनप्रयोजनादिप्रत्ययोत्थसंस्कारान् समुद्बोध्य वयं परिचिनुमः, प्रत्यभिजानीमः—'सोऽयं रमेशचन्द्रनामा पण्डितवर्यः। पूर्वमस्माभिर्जयपुरनगरे मित्रवर्यजगदीशप्रसादस्य पाणिग्रहणसंस्कारावसरे एकेन वैयाकरणकेसरिणा सह विवदमानः शास्त्रार्थकाले परिचितः सञ्जातः' इति। एतादृशो देशकालाद्यनुभवविशेषानुसन्धानमयो व्यापारः संस्कारोद्बोधनसंज्ञां भजते। संस्कारोद्बोधनं विना स्मृतिः सम्यक्तया नोत्पद्यते। प्रत्यभिज्ञानं नाम स्मृतिपरिपाकावस्थाविशेषः। संस्कारोद्बोधनमन्तरा प्रत्यभिज्ञानं नैव प्रतिफलति। संस्कारोद्बोधनं नाम स्मृतिजननाय संस्कारोद्दीपनमिति।

४. प्रत्यभिज्ञानम्, प्रत्यभिज्ञा वा

प्रागुक्तोदाहरणे पण्डितप्रवररमेशचन्द्रशास्त्रिमहोदयस्य पूर्वदर्शनापादितप्रत्ययानां देशकालपरिस्थितिविशेषसंस्कारसमुद्बोधनं यदा जायते, तदा प्रत्यभिज्ञानं प्रत्यभिज्ञा वा उदेति। यथा—'सोऽयं रमेशचन्द्रः' इति। पूर्वानुभवप्रत्ययैः सह पूर्णपरिचयनिदर्शकं वै प्रत्यभिज्ञानम्। किञ्च, यदा कश्चनास्मान् श्रावयति—

स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।
आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा॥ इति[4]।

तत् श्रुत्वा क्षणं यावद् वयं चिन्तयामः—'कुत्र वै एष श्लोकोऽस्माभिः पठितः' इति। एतस्मिन्नेवान्तराले पुनः पृच्छति, 'ब्रूहि, ब्रूहि भोः पण्डित! केन कविना प्रणीतमिमं श्लोकमहं

---

१. तुलनार्थम्—Memory.

२. तुलनार्थम्—Recall.

३. तुलनार्थम्—Recognition.

४. द्रष्टव्यम्—उत्तररामचरितम्, १।१२

वच्मि ? इति। क्षणं यावद् विचिन्त्य वयं ब्रूमः—"परिचिनोम्यहम्। तत्कविप्रणीतोऽयं श्लोकः, येनायं श्लोकोऽपि निर्मितः—

वज्रादपि कठोराणि मृदूनि कुसुमादपि।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति[1] ॥" इति।

तदनन्तरं निश्चयपूर्वकमस्माभिः स्मर्यते, प्रत्यभिज्ञायते, "महाकविभवभूतिना प्रणीते उत्तररामचरिते राघवेन्द्रोक्तः पूर्वश्लोक इति। उत्तरश्लोकश्च रामचन्द्रविषये वासन्त्या आत्रेयीं प्रत्युक्तिरूपस्तस्यैव नाटकस्य द्वितीयेऽङ्के वर्णितः" इति। यावत् सादृश्यादिसाहाय्यपूर्वकं तन्मार्गणमभि मानसिकप्रयत्नो वर्तते, संस्कारोद्बोधनं हि तत्; किन्तु यदा वस्तुस्वरूपावधारणं देशकालविनिश्चयपूर्वकं जायते, तदा 'प्रत्यभिज्ञा' 'प्रत्यभिज्ञानम्' इति वा वयं ब्रूमः। सेयं स्मृतिव्यापारस्य चरमावस्था। प्रत्यभिज्ञायां प्रत्यक्षवस्तुसम्बन्धे प्राक्तनसंस्कारोद्बोधनजन्यं सुनिश्चितं ज्ञानं जायते। स्मरणीयं यत् प्रत्यभिज्ञानेऽस्माकं स्वकीयपूर्वानुभवमधिकृत्य मानसव्यापारः प्रवर्तते। परिस्थितिविशेषे स्मृतिविषये परिचयातिशय एव प्रत्यभिज्ञाया लक्षणमिति।

५. प्रत्यभिज्ञानद्वैविध्यम्

प्रत्यभिज्ञानमपि द्विविधं भवति—निश्चितं प्रत्यभिज्ञानम्, अनिश्चितं प्रत्यभिज्ञानञ्चेति। निश्चिते प्रत्यभिज्ञाने भूतकालिकदेशकालादिप्रत्ययसम्बन्धाः स्फुटतया स्मृतिपटले स्मर्यन्ते। अतस्तज्जनितप्रत्यक्षवस्तुपरिचयरूपं स्मरणमपि प्रगाढं निश्चितमिति यावद् भवति। अनिश्चिते प्रत्यभिज्ञाने उपलभ्यमानवस्तुपरिचयस्तु प्रत्यक्षमिव स्फुटं प्रतीयते, पूर्वज्ञातमिवानुभूयते; किन्तु तद्विषये देशकालादिप्रत्ययसंस्कारोद्बोधनाभावे प्रत्यभिज्ञानमनिश्चितमित्यभिधीयते।

सेयं स्मृतिः प्राचीनन्यायाचार्यैः प्रमात्मिका, अप्रमात्मिका चेति भेदाभ्यामप्यनुव्याख्याता। उपरि वर्णितं निश्चितं प्रत्यभिज्ञानमेव प्रमात्मकमित्यवगन्तव्यम्। अनिश्चितं प्रत्यभिज्ञानं वै अप्रमात्मकं भवतीत्यवसेयम्। प्राचीनानां मते स्वप्नेऽपि स्मृत्यभ्युपगमोऽभिप्रेतः। स्वाप्निकस्मृतिरप्रमात्मिकेति तेषां मतम्, तत्तु नेष्टम्। स्वप्नगतकल्पनाप्रतिमा नूनं स्मृतिक्रियाकलापैरेवाभिनिर्वर्तन्ते; तथापि स्वप्नो नाम कल्पनासृष्टिः। तदुक्तं हि बृहदारण्यकोपनिषदि—"अथ रथान् रथयोगान् पथः सृजते, स हि कर्ता" इति[2]। किन्तु स्मरणाख्यो मानसव्यापारो जागरित एव सम्भवति। स्मरणे मानसप्रत्यक्षेण देशकालादिप्रत्ययसम्बन्धानुसन्धानं सम्यक्तया जायते। प्रत्यक्षवस्तुनो निश्चितपरिचयात्मकं प्रत्यभिज्ञानमनुव्यवसायोपोद्बलितं जागर एव भवितुमर्हति। अत एव प्रमात्मकाप्रमात्मकस्मृतिभेदावपि जागरित एव सम्भवतः। स्वप्नसृष्ट्यनुगतकल्पनाप्रतिमा नूनमव्यक्तस्मृतिव्यापारेण संस्कारसमुद्बोधनात्मकेनानुस्यूता भवन्ति; तथापि ताः कथमपि स्मृतिसंज्ञया नाभिधातुं शक्यन्ते।

६. संस्कारोद्बोधनप्रत्यभिज्ञानयोस्तुलना

प्रायः संस्कारसमुद्बोधनसहकृतमेव प्रत्यभिज्ञानं जायते; परन्तु नैषः सार्वकालिको नियमः। नापि संस्कारसमुद्बोधन एव नियतपूर्ववृत्तिता सर्वदा समुपलभ्यते प्रत्यभिज्ञोत्पादनाय। सम्भाव्यते

---

१. द्रष्टव्यम्—उत्तररामचरितम् २।७
२. द्रष्टव्या—बृहदारण्यकोपनिषद्।

खल्विदं यद् वयं संस्कारोद्बोधनानन्तरमपि वस्तुस्वरूपं सम्यक्तया परिचेतुमभिज्ञातुं वा न शक्नुमः। कदाचनैवम्प्रकारकोऽप्यनुभवो दृश्यते यद् वयं प्रत्यभिज्ञानं सन्निकृष्टप्रचुरपरिचयात्मकमात्मीयानुभवत्वमुपगतमनुभवामः; किन्तु पूर्वानुभवविशेषसम्बन्धिदेशकालप्रत्ययसम्बन्धपुरस्सरं संस्कारमुद्बोधयितुं न शक्नुम इति। उदाहरणतो यदा पूर्वे छात्रा दर्शनार्थमस्माकं सविधे समागच्छन्ति, भवति खल्विदं कदाचन यद् वयं काँश्चन सम्यक्तया परिचिनुमः; प्रत्यभिजानीमः, किन्तु कस्मिन् वर्षे ते समुत्तीर्णा जाता इति न वयं निर्देष्टुं शक्नुमः। सन्ति चापरे, येषां प्रत्यभिज्ञानं तत्तद्वर्षीयघटनाविशेषसंस्मरणसंवलितं स्मृतिपथमायाति। अतः संस्कारोद्बोधनप्रत्यभिज्ञानसम्बन्धे वक्ष्यमाणे वयं ब्रूमः—अनिश्चितं प्रत्यभिज्ञानं संस्कारोद्बोधनापेक्षया व्यापकं भवति; किन्तु निश्चितं प्रत्यभिज्ञानं संस्कारोद्बोधनापेक्षया समानक्षेत्रं भवति। नहि देशकालप्रत्ययसम्बन्धनामादिसंस्कारसमुद्बोधनमन्तरा निश्चितं प्रत्यभिज्ञानं सम्भवति। यदा हि खलु वयं किञ्चन मित्रमात्मीयतया परिचिनुमः, किन्तु तस्य नाम न स्मरामः, यद्वा कुत्रत्यः स इति संस्कारोद्बोधनं कर्तुं न प्रभवामः, तदा निश्चितं प्रत्यभिज्ञानं नोदेति; यतो हि निश्चितरूपेण प्रत्यभिज्ञातविषयाणां प्रायो देशकालनामादिसंस्कारोद्बोधनमपि जायते। यावन्न तत्तत्संस्कारोद्बोधनं भवेत्, प्रत्यभिज्ञानमपि निश्चिततां स्फुटतां वा वैशारद्यं वा नावाप्नोतीति विशेषः।

७. स्वस्थस्मृतिलक्षणम्

ननु स्वस्थस्मृतेः किं लक्षणम्? स्वस्थस्मृतेश्चत्वारि लक्षणानि भवन्ति।

(अ) शीघ्रं स्मरणमिति स्वस्थस्मृतेः प्रथमो विशेषः। अनुभूतपदार्थस्य पौनःपुन्येन चिन्तनं विना, वारं वारं चर्वणमन्तरा यत् स्मरणं शीघ्रमभिनिर्वर्तते, तत् 'सुन्दरं स्मरणम्' इत्यभिधीयते। दुष्टस्मृतीनां वारं वारं पिष्टपेषणोद्भवं स्मरणम्, अत एव सुन्दरं स्मरणं तदेव यच्छीघ्रमभिनिर्वर्तते।

(आ) अभीष्टकाले पूर्वानुभवस्य प्रत्यभिज्ञानमिति स्वस्थस्मृतेर्द्वितीयो विशेषः। पूर्वानुभवदेशकालप्रत्ययसम्बन्धानुद्बोध्य सम्यग्ज्ञानमेव वस्तुनो यदा यथावसरं जायते, तदा 'स्वस्था स्मृतिः' इत्याचक्षते। दुष्टस्मृतीनां यथेष्टकाल उपयुक्तपदार्थोपस्थितिर्न जायते। संस्कारोद्बोधनाभावे प्रत्यभिज्ञानमपि निश्चितं नाभिनिर्वर्तते।

(इ) स्मरणं स्थायि भवेदिति स्वस्थस्मृतेस्तृतीयो विशेषः। यद्यद्य शिक्षितं श्वो विस्मृतं भवेत्, किं नाम तत् शिक्षणम्! किं तेनाध्ययनेन, यस्योपयोगः कालान्तरे न सम्भवेत्! अत एव स्मरणं न केवलं शीघ्रं स्यात्, अपि तु स्थायि अपि, येनास्य समुपयोगो भाविष्ववसरेष्वपि कर्तुं शक्येत।

(ई) अनभीष्टपदार्थविस्मरणं स्यादिति स्मृतेस्तुरीयो विशेषः। नहि कश्चन व्यक्तिविशेषः सर्वान् पदार्थानवबोध्य तान् स्मर्तुं सर्वदा प्रभवति। स्मृतेः खल्विदं गौरवाय कल्पते, यदनभीष्टपदार्थविस्मरणं भवेत्। अस्माकं ज्ञानमेकस्यां दिशि प्रौढिमवाप्नोति, तत्र स्मृतिः प्रतिविषयं प्रखरा सुदीप्ता च भवति; किन्तु तद्व्यतिरिक्तविषयाणामौदासीन्योपात्तं विस्मरणमापद्यते। स्वस्थस्मृतित्वमनुपयुक्तविस्मरणमन्तरा जीवकोटौ न सम्भवति।

सन्ति हि केचन पुरुषा ये बहुश्रुताः, बहूनि तत्त्वानि जानन्ति; किन्तु यथावसरं प्रकरणविशेषानुकूलं तेषां स्मरणं नाभिसम्पद्यते। ज्ञानभाण्डारमात्रं सुन्दरस्मृतित्वाय न कल्पते। स्मृतिर्नाम मानसिकक्रियायाः र्वानुभवकोषाच्चयनमपेक्षते। चयनं च समीचीनं तदैव जायते, तदैव

स्मृतिरूपतामाधत्ते, यदाध्ययनमपि व्यवस्थितं भवति। येषां शिक्षणमेवाव्यवस्थितं भवति, तेषां स्मरणमदुष्टं नोपलभ्यते। संस्कारोद्बोधनं नाम चयनरूपं कर्म। तेनासङ्ख्यसुप्तसंस्काराणां केचन एव व्यवस्थाविशेषयुक्ता यथाकालं समुद्बोध्यन्ते। अन्यच्च, समीचीनप्रकृष्टस्मरणार्थं व्यर्थपदार्थानां विशेषाणां विस्मरणमप्यावश्यकम्। तद् विना शिक्षितज्ञानराशौ व्यवस्था नाभिनिर्वर्तते। व्यवस्थाभावे क्रमराहित्याद् यथेष्टसंस्कारचयनात्मकं प्रत्यभिज्ञानं न समुत्पद्यते। विलियमजेम्समहोदयानुसारं नहि सा सुन्दरी स्मृतिर्या प्रत्येकं वस्तुजातं स्मरति, प्रत्युत सा यानावश्यकान् महत्त्वहीनान् पदार्थान् विस्मरतीति। अतः परं वयं स्मृतिगुणविशेषोपकारकाणि कारणान्यनुव्याख्यास्यामः।

८. स्मृत्युपकारका गुणविशेषाः

कथं शोभना स्वस्था स्मृतिरवाप्तुं शक्यते? काँस्कान् वा गुणविशेषानधिकृत्य स्मृतिसौष्ठवमभिसम्पद्यते? एतदर्थमध्ययनसौष्ठवं धारणाक्षमत्वं[1] संस्कारसमुद्बोधनसौष्ठवमिति गुणत्रयसमुपस्थितिं स्मृतिसौष्ठवमपेक्षते। यदि शिक्षणं समीचीनं न भवेत्, व्यवस्थाहीनं वाध्ययनं यदि भवेत्, तर्हि देवगुरुशतमपि स्मृतिप्रखरत्वं जनयितुं न प्रभवति। शिक्षणं वै स्मरणस्य बीजभूमिः। अध्ययनसौष्ठवं स्मरणसौकर्यमावहतीति निःसन्दिग्धम्। अन्यच्च, स्मरणसौष्ठवाय धारणापि कल्पते। धारणा नाम मनसः संग्राहिका शक्तिः, या तत्तदनुभवजन्यप्रत्ययसंस्कारानाधत्ते। धारणाव्यपेक्षया कालान्तरे पूर्वज्ञानोपयोगः क्रियते। येषां धारणाशक्तिर्दुर्बला भवति, तेषां विस्मरणं शीघ्रं जायते। स्मृतिरपि स्थायिनी नैव दृश्यते। एवम्प्रकारेण संस्कारसमुद्बोधनमपि काँश्चन विशेषानाधत्ते। तद्विहीनं स्मरणं निश्चितरूपतां स्फुटतां वा न लभते। अतो वयमग्रेऽस्य सोपानत्रयस्य स्मृत्युपकारकान् विशेषान् प्रतिपदमनुव्याख्यास्यामः। तत्रैते विशेषा उल्लेखनीया भवन्ति—

(१) पूर्वानुभवस्य समुज्ज्वलत्वम्।[2]

(२) पूर्वानुभवस्य सान्निध्यम्।[3]

(३) पूर्वानुभवस्य पुनरावृत्तिः।[4]

(४) शिक्षितसामग्रीक्रमव्यवस्था।

(५) विषयाभिरुचिः, ध्यानान्वितत्वं चेति।

(१) **पूर्वानुभवस्य समुज्ज्वलत्वम्**—बहुषूत्तेजकेषु विषयेषु कश्चन एक एवास्माकं ध्यानं समाक्रष्टुं प्रभवति, यद्यपि ते सर्वे एव सक्रिया भवन्ति; तथापि तेषां युगपदुपलब्धिर्न जायते। किं कारणम्? बहुषूत्तेजकेषु यः कश्चन समुज्ज्वलतम उत्कटतमस्तीव्रतमो वा विषयो भवति, स एवोपलभ्यतेऽस्माभिः; यतो हि स एवास्माकं ध्यानविषयत्वमापद्यते। इतरे विषया उत्तेजका गौणीभूताः प्रत्यक्षपृष्ठभूमित्वमापद्यन्ते। समुज्ज्वलतम उत्तेजको विषयः प्रत्यक्षानुगताकारविशेषो भवति। एष सामान्यनियमोऽवधारणीयो यद्धि यावदधिकं कश्चन विषयोऽस्माकं ध्यानं समाक्रष्टुमर्हति, तावदधिकमेव तदनन्तरं तत्स्मरणस्य सम्भावनापि भविष्यतीति। न केवलं प्रत्यक्षविषयानधिकृत्यैवास्य नियमस्यावितथ्यं सिद्धं भवति, प्रत्युत अनुमित्यादिस्थलेष्वप्यस्य सत्यत्वमुपपद्यते।

---

१. तुलनार्थम्—Retantion.

२. तुलनार्थम्—Vividness of the original experience.

३. तुलनार्थम्—Recency.

४. तुलनार्थम्—Repetition.

मौलिकानुभवप्रत्ययानां ध्यानविषयीभूतत्वं भावितप्रत्ययसंस्कारोद्बोधनं सुकरं करोति । विषयतीव्रत्वं ध्यानोपकारकत्वात् स्मृत्युपोद्बलकमिति तावत् सिद्धम् ।

ननु कदाचनेत्थं भवति यद्वै प्रारम्भिकानुभववेलायां ध्यानानन्विता अपि प्रत्यया विचाराश्च समर्थ्यन्ते, यथा दिवास्वप्नेषून्मुक्तकल्पनासु च स्मृतिप्रवाहो भवति । ये कदापि ध्यानस्य केन्द्रीभूता विषया नाभवन्, तेऽपि तदा स्वत एव स्मृतिपटल आविर्भवन्ति । दिवास्वप्नोन्मुक्त-कल्पनादिविवेचनं कल्पनाप्रकरणे व्याख्यातचरम् । यदृच्छया स्मृतिविषयीभूताः प्रत्ययकल्पना-प्रतिमादयो यथा दिवास्वप्नादिषूपलभ्यन्ते, नहि स्मृतिरूपतां भजन्ते; कल्पनासृष्टित्वात् । उन्मुक्त-कल्पनादिस्वप्नादिकल्पनाप्रतिमाप्रत्ययादयस्तु स्वच्छन्दप्रत्ययसम्बन्धा इव भवन्ति, येषु प्राक्तनानुभव-सम्बन्धनिर्देशाभावो विद्यते ; तथाप्येवम्भूतानां यदृच्छयासादितानां प्रत्ययानां कल्पनाप्रतिमानां च स्मरणं पूर्वसञ्चितवासनानामवदमितेच्छानामदम्यप्रभावापादितमिति विज्ञेयम् । अथवा, अनुभवसौक्ष्म्यादभिरुचिप्रकर्षाच्च ध्यानापेतमिव प्रतीयमानमप्युत्तेजकं वस्तु नूनमतिशीघ्रसञ्चारि-ध्यानविषयतां भजते ।

(२) पूर्वानुभवस्य सान्निध्यम् मूलानुभवस्य सन्निकृष्टं स्मरणं सुकरं भवति । अनुभूत-पदार्थानां कालविप्रकर्षे विस्मरणं जायते । वयं प्रातःकालेऽधीतपाठविषयं सायङ्काले स्मर्तुं शक्नुमः; किन्त्वेकवर्षानन्तरं तत्पाठस्मरणं तादृशं सौकर्यं नाधत्ते । कालरूपेयं यवनिका स्मृतिपटलात् पूर्वानुभवसंस्कारान् तिरोहितान् करोति । एतस्मादेव कारणात् सन्निकृष्टानुभवविषये स्मरणं सुकरम्, विप्रकृष्टानुभवविषयस्मरणं दुष्करमपूर्णमनिश्चितं च भवतीति सर्वमवदातम् ।

एबिनघॉसप्रभृतिभिर्मनोवैज्ञानिकैर्बहुभिः प्रयोगैः साधितं खल्विदं तथ्यं यद्धि मूलानुभवा-नन्तरं विस्मरणं शीघ्रं जायते । कियत्कालानन्तरं विस्मरणं तथाविधद्रुतगत्या न जायते । वयमग्रे विस्मरणगतिक्रममनुव्याख्यास्यामः ।

(३) पूर्वानुभवस्य पुनरावृत्तिः—पूर्वानुभवस्य पूर्वाधीतपाठस्य वा पुनरावृत्तिः पौनः-पुन्येन पठनं स्मृतेः परमोपकारकं भवति । वारं वारं पठनेन तदनुभवसंस्काराः सुदृढा भवन्ति । प्राचीनैराचार्य्यैः पिष्टपेषणं चर्वितचर्वणं वा परमं साधनं बहुमानितं चासीत् । फारसीभाषायां सुप्रथितम् "आमोख्तः" इति पदं पाठपुनरावृत्तेर्महद् गौरवमभिव्यञ्जयति । पाठपुनरावृत्त्या पूर्वा-नुभवसान्निध्यमप्येकेन प्रकारेणावाप्यते । पौनःपुन्येन पठनं तद्विषयसान्निध्यमावहति ।

ननु पुनरावृत्तिः कथं स्मृतिसंस्कारान् द्रढयति ? ये स्मृतिस्वरूपं नाडीद्रव्यानुगत-संस्कारगर्भितं मन्यन्ते, तेषां मते यथा प्रतिवारं शकटचालनेन पौर्वकालिकी चक्ररेखा सुस्पष्टा, सुस्थिरा, सुदृढा च जायते, एवम्प्रकारेणानुभवविशेषपुनरावर्तनमपि तदनुभवसंस्कारान् मृदुनाडी-द्रव्ये मस्तुलुङ्गीये सुविनिहितरूपान् विधत्ते । अनुभवपुनरावर्तनं तदनुभवसम्बन्धिनाडीस्रोतांसि विशदीकरोति । कालान्तरे प्रत्यभिज्ञानार्थं यदा संस्कारोद्बोधनं क्रियते, तदा मृदुनाडीद्रव्याहित-नाडीस्रोतसां कर्षरूपसंस्कारसमुद्बोधनमेवाभिसम्पद्यते । यस्यानुभवस्य पुनरावृत्तिर्जायते, स गभीर-कर्षो भवति । गभीरकर्षस्यानुभवस्य संस्कारसमुद्बोधनक्षमत्वं प्रत्यभिज्ञायै कल्पत इत्यवसेयम् ।

इदं मतं सोपपत्तिकं न प्रतिभाति ? बाढं स्मरणाख्यमानसिकव्यापारस्य मृदुनाडी-गतद्रव्येण सह सम्बन्धो भवतु नाम, किन्तु स्मरणं नाम चेतनव्यापारः । तदनुव्याख्यानं निष्क्रियमृदुमृत्तिकाकर्षादिभिरिव नाडीद्रव्याहितकर्षरूपैः संस्कारैः कथमपि कर्तुं न सम्भाव्यते ।

स्मरणाख्ये कर्मणि प्रत्ययसम्बन्धानां चयनमभिनिर्वर्तते। कस्य संस्कारविशेषस्योद्बोधनं जायते? कस्य न वा? इति निष्क्रियनाडीद्रव्यकर्षजातेन व्याख्यातुं न शक्यते। स्मरणीयं यन्त्रीरसं पिष्टपेषणं चर्वितचर्वणं वा स्मृतिदार्ढ्याय नैव कल्पते। प्रथमानुभवस्य समुज्ज्वलत्वं स्पष्टत्वं स्मरणोपोद्बलकमिति तु व्याख्यातपूर्वम्। यन्त्रवद् नीरसरटनेन चर्वितचर्वणेन वा प्रथमानुभवस्य सौष्ठवं समुज्ज्वलत्वं च ह्रासं नीयते। एतावता पुनरावृत्तिर्निरस्ताभिरुचिः सामग्रीव्यवस्थाविहीना स्थायिनीं विषयस्मृतिं नैव जनयति। बहुशः पठितमपि आङ्ग्लराज्याधिकारिणां गवर्नरजनरल 'वायसराय'इत्युपाह्वानां भारतीयशासकानां तदानीन्तनमितिवृत्तम्, यस्मिन् स्वातन्त्र्यप्रेरणानुप्राणितार्य्याणां क्रान्तिकारिसेनानीनां चरितं नोपवर्णितं लभ्यते, मयाधुनापि न स्मर्यते। एको 'वायसराय'इत्यभिधः शासको गतः, द्वितीय आयातः। मया नीरसपुनरावर्तनेन पाठेन स्मृतिपटले तेषां कापि कालक्रमपूर्विका स्थायिनी स्मृतिर्न सम्प्राप्ता। सुतरां तर्हि स्मरणं रुचिसंवर्धनेन ध्यानप्रकर्षेण पूर्वज्ञानराशिना सह कालदेशसम्बन्धव्यवस्थासम्पादनेनोपयुक्तप्रत्ययसम्बन्धावचयेन चाभिनिर्वर्तते। पुनरावृत्तिः नूनमाश्रयणीया; किन्तु तस्या नीरसं यन्त्रवदाश्रयणं मनोवैज्ञानिका नातिरमणीयमनुमन्यन्ते।

(४) शिक्षितसामग्रीक्रमव्यवस्था[१]—केवलं पुनरावृत्तिरूपं स्मरणमभ्यासमयं भवति। उपर्युक्तमेवास्माभिर्यद्धि पूर्वानुभवसामग्र्या क्रमव्यवस्था पुनरावृत्तिगौरवादतिरिच्यते। प्रत्ययसम्बन्धा विचारप्रकरणे व्याख्यातचराः। प्रत्ययसम्बन्धाः प्रस्तुतानुभवसामग्र्यां शिक्षणकाल एव योजनीयाः। सान्निध्यसम्बन्धः, तारतम्यसम्बन्धश्च पूर्वापरदेशकालसम्बन्धरूपावनुभवसामग्रीघटकेषु प्रत्ययसम्बन्धस्थापनेन बुद्धिपूर्वकं संयोजनं सम्पाद्यते। अयं सामग्रीव्यवस्थाक्रमः कालान्तरे संस्कारसमुद्बोधनाय कल्पते। एवमेव सादृश्यसम्बन्धो वैषम्यसम्बन्धश्चापि स्थापनीयौ। प्रत्यभिज्ञानाय संस्कारसमुद्बोधनावसरे प्रस्तुतं वस्तु पूर्वं स्वसदृशमनुभवप्रत्ययं स्वविसदृशं वा पूर्वानुभवप्रत्ययं स्मारयति। बुद्धिपूर्विका यदि शिक्षणसामग्रीव्यवस्था वर्गीकरणसम्बन्धस्थापनविचारक्रमादिभिरभिनिर्वर्तेत, तर्हि न केवलं संस्कारोद्बोधनं प्रत्यभिज्ञानं च सुकरं शीघ्रं च सञ्जायते, प्रत्युत पुनरावृत्तिरूपो महान् आयासोऽपि निराकर्तुं शक्यते। स्मृतिस्त्वेवम्प्रकारेण स्थायिनी जायते। बुद्धिपूर्वकं कर्म ध्यानोपेतं भवति। अत एव सुव्यवस्थितानुभवसामग्री स्मृतिसौष्ठवाय कल्पत इत्यवधार्यम्।

(५) विषयाभिरुचिर्ध्यानान्वितत्वञ्च[२]—स्मृतिसंवर्धनाय परमावश्यकं मानसिकं कारणद्वयम्। "यादृशी भावना यस्य सिद्धिर्भवति तादृशी" इति न्यायः स्मरणप्रकरणे नूनमुपपद्यते। यस्मिन् विषयेऽस्माकमभिरुचिर्भवति, तत्प्रतिपादकमप्यस्माकं कण्ठाग्रे वर्तते। एतावता लोकदृष्टमिदं वृत्तं यत् प्राड्विवाको हत्याभियोगवृत्तं प्रतिपदं प्रत्यभिजानाति; किन्तु स प्राणिविज्ञानपुस्तकं स्वपुत्रस्य वारं वारं पठित्वापि स्मर्तुं न शक्नोति, यतो हि प्राड्विवाकस्य प्राणिविज्ञानेऽभिरुचिर्न लक्ष्यते। ध्यानप्रकरणेऽस्माभिर्विशदतया व्याख्यातं यत् कथं रुचिप्रकर्षेण ध्यानप्रकर्षोऽभिसम्पद्यते? इति। यत्र प्रमातुरभिरुचिर्वर्तते, विषयानुभवनं ध्यानान्वितं भवति। ध्यानोपेतस्यानुभवप्रत्ययस्य स्मरणमनायासेनाभिनिर्वर्तते, संस्कारवैशारद्यादित्यवगन्तव्यम्।

---

१. तुलनार्थम्—Organisation of knowledge.

२. तुलनार्थम्—Subjective interest and attentiveness.

६. महर्षिगौतममतम्

स्मृतिहेतुविवेचनावरे महर्षिगौतममतोपन्यासोऽप्यत्रोपपद्यते। अथ केभ्यो हेतुभ्यः स्मृतिरुत्पद्यते? इति सम्प्राप्तायामाशङ्कायां भगवान् सूत्रकार इदं सूत्रमवतारयति—

"प्रणिधाननिबन्धाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रयाश्रितसम्बन्धानन्तर्यवियोगैककार्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्माधर्मनिमित्तेभ्यः" इति[1]। उपरिलिखिते सूत्रे महर्षिः पञ्चविंशतेः स्मृतिहेतूनामुल्लेखं कृतवान्। वयमत्रैतान् प्रतिपदं भाष्यकारोक्तरीत्याऽनुव्याख्यास्यामः—

(१) प्रणिधानम्—सुस्मूर्षया मनसो धारणं प्रणिधानम्। तच्च सुस्मूर्षितलिङ्गानुचिन्तनरूपत्वेन स्मृतिकारणम्।

(२) निबन्धः—अर्थानामेकग्रन्थोपयमो निबन्धः। एकग्रन्थोपयताः खल्वर्था अन्योऽन्यस्मृतिहेतव आनुपूर्व्येणेतरथा वा भवन्तीति। एकग्रन्थोपयता अनुभवरूपैकग्रन्थिबद्धाः, एकानुभवारूढा इति यावत्।

(३) अभ्यासः—समाने विषये ज्ञानानामभ्यावृत्तिः। अभ्यासजनितः संस्कार आत्मगुणोऽभ्यासशब्देनोच्यते।

(४) लिङ्गम्—तच्च चतुर्धा भवति—संयोगि, समवायि, एकार्थसमवायि, विरोधि चेति। उदाहरणतः—धूमोऽग्नेर्लिङ्गम्। लिङ्गत्वात् स्मृतिहेतुश्च भवति। गोर्विषाणम्। पाणिः पादस्य। रूपं स्पर्शस्य। अभूतं भूतस्य चेति।

(५) लक्षणम्—पश्ववयवस्थं गोत्रस्य स्मृतिहेतुः। यथा—विदानामिदम्, गर्गाणामिदमिति। 'यथा' इत्यनन्तरं 'वा' इति देयम्, अस्य वाक्यस्य पूर्ववाक्येनासम्बद्धत्वात्।

(६) सादृश्यम्—चित्रगतं प्रतिरूपकं देवदत्तस्येत्येवमादिः।

(७) परिग्रहात्—स्वेन वा स्वामी स्वामिना वा स्वयं स्मर्यते।

(८) आश्रयात्—ग्रामण्या तदधीनं संस्मरति।

(९) आश्रितात्—तदधीनेन ग्रामण्यमिति। तदधीनेन ग्रामेणेत्यूह्यम्।

(१०) सम्बन्धात्—अन्तेवासिना गुरुं स्मरति, ऋत्विजा याज्यमिति।

(११) आनन्तर्यात्—करणीयेष्वर्थेषु। पूर्वस्मिन् कार्ये कृतेऽनन्तरस्य कार्यस्य स्मृतिरिति।

(१२) वियोगात्—येन विप्रयुज्यते, तद्वियोगप्रतिसंवेदो भृशं स्मरति।

(१३) एककार्यात्—कर्त्रन्तरदर्शनात् कर्त्रन्तरे स्मृतिः।

(१४) विरोधात्—विजिगीषमाणयोरन्यतरदर्शनादन्यतरः स्मर्यते।

(१५) अतिशयात्—येनातिशय उत्कर्ष उत्पादितः स स्मर्यते।

(१६) प्राप्तः—यतो येन किञ्चित्प्राप्तमाप्तव्यं वा भवति तमभीक्ष्णं स्मरति।

(१७) व्यवधानात्—कोशादिभिरसिप्रभृतीनि स्मर्यन्ते।

(१८-१९) सुखदुःखाभ्याम्—तद्धेतुः स्मर्यते।

---

१. द्रष्टव्यम्—न्यायसूत्रभाष्यम् ३।२।४१, पृ० २२० (पूनासंस्करणम्)

(२०-२१) इच्छाद्वेषाभ्याम्—यमिच्छति यं च द्वेष्टि तं स्मरति।

(२२) भयात् यतो बिभेति।

(२३) अर्थित्वात्—येनार्थी भोजनेनाच्छादनेन वा।

(२४) क्रियायाः—रथेन रथकारं स्मरति।

(२५) रागात्—यस्यां स्त्रियां रक्तो भवति, तामभीक्ष्णं स्मरति।

(२६) धर्मात्—जात्यन्तरस्मरणमिह चाधीतश्रुतावधारणमिति। जातिस्मरणं जन्मान्तर-स्मरणं धर्मप्रकर्षाद् भवति। इह जन्मनि अधीतस्य श्रुतस्य च निःसन्दिग्धं ज्ञानं जायते।

(२७) अधर्मात्—प्रागनुभूतदुःखाधनं स्मरति।

उपर्युक्तं स्मृतिहेतूनां वर्णनं निदर्शनमात्रम्, न तु स्मृतिहेतूनामशेषेण परिसङ्ख्यानमिति भाष्यकाराचार्यवात्स्यायनमुनीनां मतम्। प्रागुक्ते स्मृत्युपकारके नियमपञ्चकेऽर्वाचीनमनोविज्ञाना-भिमते नूनमेतेषां पञ्चविंशतिहेतूनामन्येषाञ्चावशिष्टानामन्तर्भावः कर्तुं शक्यत इति तु वयं मन्या-महे। पूर्वोक्तविषयसमुज्ज्वलत्वमधिकृत्येदमपि स्मर्तव्यं यद् रागद्वेषादिभावविशेषैः सह सम्बद्धत्वादि-विषये कश्चिदतिशयः सन्निविशते, येन स्फुटीभूतो विषयः कालान्तरे सौकर्येण स्मर्तुं शक्यते। अतोऽध्ययनकाले यदि पाठ्यविषयसामग्री भावविशेषैरनुषिक्ता क्रियेत, तर्हि तस्याः स्मृतिर्नूनं स्थायित्वं प्राप्स्यति।

१०. स्मरणानुगतनाडीक्रिया

जर्मनदेशीयशारीरविज्ञानवेत्तारो हेरिङ्गमहोदयाः[1] प्रतिपादितवन्तो यद्धि स्मरणाख्य-मानसिकक्रियाया आधारभूताः शारीरिकक्रिया नाडीतन्त्रीयाः क्रियाश्च भवन्ति। किमपि प्रत्यक्षं कमपि नाडीस्रोतसां क्रियाविशेषं जनयति, येन संज्ञावाहिनाडीकन्दाणुकविशेषाणां क्रियाकारित्वं आपरिसरीयनाडीमण्डलान्मस्तुलुङ्गीयसंज्ञायतनपर्यन्तं जायते। एकदा प्रत्यक्षविशेषे येन नाडीस्रोतसा नाडीवेगा धावन्ति, तेनैव नाडीस्रोतसा तदनन्तरमपि तत्प्रत्यक्षे नाडीवेगानामभीक्ष्णं तदभि-मुखं धावनं सँल्लक्ष्यते। स्मरणाख्ये कर्मणि पूर्वसिद्धनाडीस्रोतसां समुद्बोधनं सम्पद्यते। विषयानु-भवपुनरावृत्त्या नाडीस्रोतसां परिष्कारो गभीरत्वं वा वर्धते। अत एव पुनरावृत्तिः पाठ्यविषयस्य पौनःपुन्येन पठनं स्मृत्युपकारकमित्यवसेयम्। पूर्वमस्माभिः स्मरणं सचेतनकर्म इति प्रति-पादितम्। स्मरणे कस्य प्राक्तनप्रत्ययसम्बन्धस्य समुद्बोधनं कदा भविष्यति, कदा च न भविष्यती-ति सर्वं बौद्धिकव्यवस्थायत्तम्, यस्मिन् चैतन्याहितकर्मणि मृदुनाडीद्रव्यानुगतकर्षानुव्याख्यानेन स्वतो निष्क्रियत्वात् सर्वः स्मृतिजटिलव्यापारो व्याख्यातुं नार्हति। स्मरणं मानसिकं कर्म, बौद्धिको व्यापारः। तस्य प्रागुक्तरीत्या शकटचक्ररेखया साद्दश्यं ग्राम्योपमनिदर्शनम्। दार्ष्टान्तिके यज्जा-टिल्यं बुद्ध्याहितं प्रत्ययसम्बन्धचयनात्मकम्, तद् दृष्टान्ते नोपलभ्यते। अतो नाडीस्रोतसां वैशारद्यमनिराकृत्यापि स्मरणमिति विशेषेण बौद्धिको मानसिको वा व्यापार इति वयं मन्यामहे।

११. स्मरणविषये प्रयोगाः

१९४२ वैक्रमाब्दे जर्मनदेशीयाः प्रतिभाशालिमनोवैज्ञानिकवरेण्या एबिनघॉसमहाभागाः[2]

१. तुलनार्थम्—Edwald Hering (1834–1914)

२. तुलनार्थम्—Hermann Ebbinghaus (1885)

स्वकीयं ग्रन्थरत्नम्, 'स्मृतिः'[१] इत्यभिधं प्रणीतवन्तः। पञ्चवर्षाणि यावत्स्वकीयमनुसन्धानं स्वमनोव्यापारानधिकृत्य ते सम्पादितवन्तः। तादृशमौलिकगवेषणापूर्णनिबन्धः स्मृतिमधिकृत्य कदाचित् केनापि विदुषा पूर्वं न लिखितः, नापि तदनन्तरम्। सर्वासामेव स्मरणविषयकसमस्यानां प्रायः प्रयोगात्मकमनुसन्धानं तत्रोपलभ्यते। एब्रिनघॉसप्रयोगाणां निष्कर्षास्तदौत्तरकालिकानुसन्धानजातेनापि समर्थिताः। वयमत्र काँश्चन स्मृतिसमस्याविशेषानधिकृत्य केषाञ्चन प्रयोगाणां निरूपणं करिष्यामः।

स्मरणमधिकृत्य प्रश्नत्रयं विचारास्पदीभवति; यथा—

१. पाठ्यसामग्रीविस्तारस्य स्मरणे कः प्रभावो भवति? किं पाठदैर्घ्यं तत्स्मरणं चिरेणावहति?

२. पुनरावृत्तिसंख्यायाः पठितविषयस्य धारणायां प्रभावः कीदृशो भवति?

३. कालापेक्षया विस्मरणं कथं जायते? अत्र विस्मरणगतिरन्वेष्टव्या।

वयमत्रैतान् प्रश्नान् प्रतिपदमनुव्याख्यास्यामः।

१२. पाठविस्तारस्य स्मरणे प्रभावः

किन्तु स्मर्यमाणविषयदैर्घ्यानुपातेन कालोऽपि वर्धते? किं कस्यचित् काव्यस्य विंशतिपङ्क्तिस्मरणार्थं यावान् कालोऽपेक्ष्यते, किन्तु खलु चत्वारिंशत्पङ्क्तिस्मरणार्थं तद्द्विगुणः कालोऽपेक्षितो भविष्यति? एब्रिनघॉसमहोदयः प्राक्तनसंस्कारप्रभावं निराकर्तुं निरर्थकवर्णानामुपयोगं स्वकीयस्मरणप्रयोगेषु कृतवान्। स इमं निष्कर्षमवाप्तवान् यत् सप्ताष्टौ वा यावन्निरर्थकवर्णान् एकदा पठित्वैव शिक्षितुं प्रभवति; किन्तु दश वर्णान् निरर्थकान् स्मर्तुं त्रयोदशवारं पठनमावश्यकं प्रतिभातीति। तदुपर्येकैकवर्णवृद्ध्या सह कालोऽपि वर्धते। तेषां निष्कर्षसूची निम्नलिखिता[२]—

वर्णसङ्ख्या	पाठसङ्ख्या	समयः		प्रतिवर्णं कालपरिमाणम्	
७	१	३	सेकण्डाख्यविकलाः	.४	सेकण्डाख्यविकलाः
१०	१३	५२	,,	५.२	,,
१२	१७	८२	,,	६.८	,,
१६	३०	१९६	,,	१२.०	,,
२४	४४	४२२	,,	१७.६	,,
३०	५५	७९२	,,	२२.०	,,

अत्रेदं स्पष्टं यत् कोऽप्यनुपातविशेषान्वितो वर्णसङ्ख्या सह कालवृद्धिनियमो निर्देष्टुं न शक्यते। तथापि यदि स्मर्यमाणसामग्री पूर्वपरिचिता भवेत्, अथवा लयविशेषणगर्भिता भवेत्तर्हि समयपरिवृद्धिसङ्कोचोऽपि जायते। द्वादशवर्णस्मरणाय यावान् कालोऽपेक्ष्यते, चतुर्विंशति-

१. तुलनार्थम्—Memory.

२. द्रष्टव्यम्—Garret Henry E, Great Experiments in Psychology, 1941, Page 262.

वर्णस्मरणाय तस्य सार्धद्विगुणः कालोऽपेक्ष्यत इति। अतो वर्णसङ्ख्यावृद्ध्या सह कालवृद्धि-रप्यपेक्षत इति सर्वमवदातम्।

१३. पाठसङ्ख्याया धारणायां प्रभावः

मनोवैज्ञानिकप्रयोगैरभीक्ष्णं साधितं यद्धि बहुवारं पठनमपि तादृशीं स्थायिनीं स्मृतिं जनयितुं न प्रभवति, यादृशी बौद्धिकसम्बन्धस्थापनेन पाठसाग्र्यामवाप्तुं शक्यते। किञ्च, पाठपुन-रावृत्तिर्यदि व्यवधानेन भवेत्, तर्हि पाठ्यविषयस्य धारणा चिरस्थायिनी जायते। अविरलमध्ययनं विषयधारणापेक्षया प्रशस्तं न भवति; किन्तु यदि पठने मध्ये मध्ये विश्रामो जायेत, मनोरञ्जनं वावाप्तुं शक्येत, तर्हि पठनस्य चिरस्थायिनी स्मृतिर्भविष्यति। यद्यनवरतं पाठाध्ययनं भवेत्, तर्हि कालोऽप्यधिकोऽपेक्षितो भविष्यति; किन्तु तदपेक्षया मनोरञ्जनविश्रामशबलीकृतेनाध्ययनेन लघुतरकालापेक्षा भवतीति मनोविज्ञानविशारदानामालोडितं तथ्यम्। तद्रहस्यं चेदमस्ति यत् पूर्वपाठानां संस्काररूपप्रभावास्तावदात्मसात्कृता जायन्ते, यावदवान्तरकालिकपाठानां समुप-योगावसर आयाति। विलियमजेम्समहोदया व्यङ्ग्यात्मकरीत्या तदनुवदन्ति—"वयं शरत्काले तरणमधीमहे, ग्रीष्मे च तुषारविस्तरक्रीडाम्" इति[१]। अत एकदा बहुवारं पठनापेक्षयेयं योजना प्रशस्ता भवति यद् द्वित्रिवारं समग्रं पाठं पठित्वा तदनन्तरं विश्रम्य पुनस्तदध्ययनं सम्पाद्यते। साइकिलसंज्ञकयानचालकाः सुष्ठुतरं जानन्ति यद् विश्रम्य विश्रम्य तच्छिक्षणं कथं सुकरं जायते, अविरलञ्च तच्छिक्षणं कियद् दुष्करं भवतीति। विश्रामकाले संज्ञावाहिनाडीकन्दाणुकानि नाडी-स्रोतांसि च पुनः स्वास्थ्यलाभं कृत्वा तदधिकज्ञानोपार्जनाय कृतपरिकरा भवन्तीति विशेषः।

१४. विस्मरणम्


कथं कियच्चिरेण वाधीतसामग्रीविस्मरणं सञ्जायते? एब्बिनघाँसमहोदयेनैका निरर्थकवर्ण-सूची कण्ठाग्रीकृता। कियच्चिरं प्रतीक्ष्य स सञ्चितविधिना[२] स्वकीयधारणाक्षमतां परीक्षितवान्। सञ्चितविधिस्तस्य प्रतिभाया विलक्षण आविष्कारः। अनेन विधिना पूर्वाधीतविषयस्य कियान् अंशः सञ्चितोऽवशिष्यते, सुरक्षितोऽवशिष्यते, तस्य च व्यतीतेन कालेन साकं केनानुपातेन सम्बन्धः? इति सर्वमवधार्यते। एकेनोदाहरणेन वयमिमं विधिं स्पष्टीकरिष्यामः। षोडशवर्णसूचीं चतुर्विंशति-कलाभिः (मिनटाभिधाभिः) अधीत्य, स घटिकैकानन्तरं सार्धत्रयोदश (१३½ मिनट) कलाभिरेव तत्पाठं पठति स्म, स्मरति स्म। समयह्रासानुपातं वयमेवम्प्रकारेण ४४% प्रतिशतं लभामहे। कालमितव्ययितैषावगन्तव्या।

---

१. तुलनार्थम्—W. James, "We learn to swim in winter and skate in sumner."

२. तुलनार्थम्—Saving Method.

विस्मरणगतिर्निम्नलिखितवक्ररेखाचित्रेण प्रदर्श्यते—



उपरिलिखितेन रेखाचित्रेणेदं स्फुटं भवति यद्धि पाठानन्तरं प्रथमघटिकास्वेव विस्मरणमधिकतमं जायते। तदनन्तरं विस्मरणं क्रमशो ह्रासमवाप्नोति। एकघटिकानन्तरं तेनाऽधीतविषयस्य ५६% प्रतिशतं विस्मृतम्। नवघटिकानन्तरं ६४%, दिनद्वयानन्तरं ७२%, एकत्रिंशद्दिनानन्तरम् ७९% प्रतिशतमेव विस्मृतम्। विस्मृतिवक्ररेखाचित्रमुपरिनिर्दिष्टं धारणावक्ररेखाचित्रमपीत्यवसेयम्। अवान्तरकालिकैः प्रयोगैः एबिनघोंसनिष्कर्षाः प्रमाणिता जाताः। अस्माकं विस्मरणं नूनं प्रथमदिने प्रथमदिनद्वये वाधिकतमांशे जायत इत्यभीक्ष्णं प्रयोगैः साधितम्।

१५. स्मरणं खण्डशः समग्रतो वा ?

किन्तु खलु स्मर्यमाणं पद्यं श्लोकखण्डेषु विभज्य पठनीयम्, येन स्मरणं सुकरं भवेत् ? अथवा समग्रं पद्यं द्वित्रिवारं पठनीयम् ? अत्र विचारणीयोऽयं प्रश्नो मनोवैज्ञानिकैर्भृशं परीक्षणैः प्रयोगैश्च समाहितः। कालापेक्षया यथाशीघ्रमवबोधो भवेत्, पठितमधीतं वा पद्यं स्थायिनीं स्मृतिं जनयेदिति च पक्षद्वयं विचार्य्यास्य प्रश्नस्य समाधानमन्वेष्टव्यम्। प्रायो जनाश्छन्दोखण्डेषु प्रविभक्तस्य पद्यस्याध्ययनं स्मृत्यर्थं सुखावहं मन्यन्ते; किन्तु प्रयोगैस्तु यन्निगर्लितं तथ्यं प्रतिफलति तत्तु समग्रं पद्यमाद्योपान्तं पठित्वा तत्स्मरणं सुकरं भवतीति। एकेन प्रयोगेण साधितं यत् समग्रपाठेन खण्डपाठापेक्षया १२% प्रतिशतं न्यूनः कालात्ययो जायते। अपरेण प्रयोगेण साधितं यद्धि समग्रपाठेन पठनं खण्डशः पठनापेक्षया १५% प्रतिशतं स्मरणसौकर्य्यमावहतीति।

मनोवैज्ञानिकप्रवरा बुडवर्थमहोदया अभिमन्यन्ते यद्धि पाठकः खण्डशोऽध्ययनं ग्राह्यं मन्यते, तत्र साफल्यमवाप्यान्यत्र तत्समस्या(पाठा)वयवानां स्मरणेऽपि सौकर्य्यमनुभवति। तथापि तेन ते पाठांशा नूनमेकीभावेन परस्परं योजनीयाः। यदि स समग्रपाठानुकूलमध्ययनं कर्तुं शक्नोति, तर्हि जटिलसमस्यानामध्ययनेऽपि तस्यैवम्प्रकारकमध्ययनं साहाय्यं प्रदास्यति। बुडवर्थमहाभागा विषयोपसंहाररूपेणेमं निष्कर्षमालोडितवन्तो यद्धि समग्रपाठविधिना पाठाध्ययनमारभ्य यथेच्छं मध्ये मध्ये तत्खण्डेषु ध्यानैकाग्रीकरणं श्लाघनीयमिति।

श्रीमैकगोचमहोदयाः 'मानवशिक्षणस्य मनोविज्ञानम्'[1] इत्याख्ये ग्रन्थे प्रतिपादयन्ति यद्धि समग्रतः पाठविधिरुन्नतमानसिकशक्तीनां पुरुषाणां हिताय परमोपयोगी। यदा अभ्यासकालोऽविरलो भवति, खण्डशोऽध्ययनं नूनं सम्पादनीयम्। यदा चाभ्यासकालो विकीर्णो भवति, अर्थात् पाठशिक्षणं यदा बहुदिनानि यावत् करणीयं भवति, मध्ये मध्ये वा पर्याप्तविश्रामावसरो भवति, तदा समग्रतः पाठविधिर्नूनमाश्रयणीयः।

---

१. द्रष्टव्यः—John A. mc. Gooch, "Psychology of human lerning"

अत्रेदं स्मर्तव्यं यद्धि पाठसामग्र्यामतिदीर्घायां सत्यां तस्याः खण्डशः प्रविभाजनं कर्त्तव्यम्, अन्यथा समग्रतः पठनीयम्। कलात्मिकायां रचनायाम्, बौद्धिके वा प्रबन्धे तात्पर्यासादितमैक्यं मुख्यं भवति। समग्रतः पठने काव्यस्य गद्यस्य वा तत्केन्द्रीभूतमभिलक्ष्य सर्वमध्ययनं तदनुबन्धित्वेन प्रचलति। विचारपूर्वकं च तद् भवति। अतः समग्रतः पठने बौद्धिकक्रियाबाहुल्यं वर्तते। खण्डशः पठनं तद्विपरीतं यन्त्रवद् रटने पुनरावृत्तिसर्वस्वे कण्ठाग्रीकरणे बहुधा पर्यवस्यति। खण्डशः पठने द्विविध आयासो जायते, यथा—प्रथमं त्वेकैकः श्लोकः कण्ठाग्रीक्रियते, तदनन्तरञ्च श्लोकानां परस्परमन्वितानां स्मरणं सम्पाद्यते। यदि कदाचन पाठकैः पाठावयवानां परस्परं सम्बन्धो विस्मर्यते, तर्हि पथभ्रष्टः स जायते। प्रयत्नं कृत्वापि संस्कारोद्बोधनं दुष्करं भवति। यदि च स्मर्यमाणा सामग्री बृहदाकारा भवेत्तर्हि समग्रतः पठनविधिः, खण्डशः पठनविधिश्च द्वावेव मिश्रीकृत्य प्रयोक्तव्यौ। प्रथमं समग्रं पाठं बहुवारमधीत्य तदनन्तरं खण्डशः पठित्वा, मध्ये मध्ये च खण्डानां परस्परं विचारसम्बन्धं ध्यात्वा, पाठस्मरणं सौकर्येण नरः सम्पादयति। पाठावयवानां सम्बन्धो मध्ये यदा कदा समग्रपाठेन दृढीभवतीति बोद्धव्यम्।

१६. स्मृत्या भावैः सह सम्बन्धः

भावानां संवेगाभिधानां रागद्वेषमोहादीनामपरिमितः प्रभावोऽध्ययने शिक्षणे दृश्यते। साक्षिणां साक्ष्येषु ये भेदा जायन्ते, ते प्रायो भावविशेषनिरूढा भवन्ति। भावविशेषेण घटना-विशेषस्यैकः पक्षस्तिरोहितो भवति, पक्षान्तरञ्च सातिशयं वर्ण्यते।

स्वनामधन्यानां मनोवैज्ञानिकवरेण्यानां फ्रायडमहाभागानां मतानुसारं भावानां स्मृत्यां प्रभावो नूनं सञ्जायते। विस्मरणं खलु भावाऽवदमनापादितमिति फ्रायडमहाशयानां सुसाधितं मतम्। दुःखवेदनीया घटनास्तत्सम्बद्धाः पुरुषाश्च विस्मृता भवन्ति। येषां पुरुषाणां चरित्राणि कार्याणि चास्माकमनभीष्टानि भवन्ति, तेषां नामानि विस्मृतानि जायन्ते। विस्मरणं चेदमवदमनक्रियया-भिनिर्वर्तते। बहूनामवाञ्छनीयचरित्राणां पुरुषाणां विस्मरणोदाहरणानि स्वमतसाधनायोद्धृतानि फ्रायडमहाभागैः[१]।

अन्यैर्मनोवैज्ञानिकैरपि फ्रायडमतमभीक्ष्णं परीक्षितम्। तेषां मते सुखवेदनीया घटना दुःखवेदनीयघटनानामपेक्षया अधिकस्थायिनीं स्मृतिं जनयन्ति। अन्येषां मनोवैज्ञानिकानां मते दुःखवेदनीयाः सुखवेदनीयाश्चानुभवा द्विविधा एव भावविशेषयुक्ता भावविशेषविरहितानामनु-भवानां व्यपेक्षया स्मरणार्हा भवन्तीति।

१७. धारणा[२]

अनुभवाहितसंस्काराणां धारणं सञ्चयो वा मनसा सम्पाद्यते। शिक्षणानन्तरावस्थेयं स्मृति-सौष्ठवाय परमोपयोगिनी। धारणां विनावधृतोऽपि विषयः कालान्तरेऽकिञ्चित्करो भवति। धारणा नाम मनोरूपचैतन्यस्य शक्तिविशेषः; यया पूर्वानुभवसंस्कारा धार्यन्ते, परिपाकं नीयन्ते, संरक्षिताश्च भवन्ति। सम्यक्तया शिक्षितोऽपि विषयो धारणादौर्बल्यान्नहि भाविस्मरणाय कल्पते। सेयं धारणाशक्तिर्नहि सर्वेषु पुरुषेषु समानरूपेण विद्यते। इयं वै वंशपारम्पर्यगुणायत्ता विशेषेण भवतीति

---

१. द्रष्टव्यम्—Sigmund frend, "Psychopathology of Everyday life" chap. I.

२. तुलनार्थम्—Retention.

प्रायेण मनोवैज्ञानिका मन्यन्ते। निसर्गतः प्रतिपुरुषं भिद्यमानापि धारणाशक्तिरुपयोगानुप्रयोग-सद्भावे स्वाभिव्यक्तिं न्यूनाधिकमात्रायां लभते। अर्थादपेक्षाकृतदुर्बलधारणाशक्तिसम्पन्नोऽपि मानवः सम्यगुपयोगेनोत्कृष्टधारणायुक्तस्य निष्क्रियस्य पुरुषस्यापेक्षया महनीयं बौद्धिकसाफल्यमवाप्तुमर्हति। सेयं धारणा 'मेधा' इत्यपि व्यपदिश्यते संस्कृतवाङ्मये।

धारणाशक्त्यभिव्यक्तिः मस्तुलुङ्गरचनास्वास्थ्यरुचिप्रकर्षचिन्तनादिकं व्यपाश्रित्य जायते। दुर्बलमस्तिष्को मानवः शिक्षणकार्यं सम्यक्तया न कर्तुं शक्नोति, अत एव तस्य धारणापि दुर्बला भवति। धारणावतः स्मृतिः स्थायिनी भवति। येषां मस्तुलुङ्गं पूर्णतो विकसितं स्वस्थञ्च भवति, तेषामनुभवसंस्कारधारणा चिरेणापि संस्कारोद्बोधनक्षमतां बिभर्ति। मस्तुलुङ्गविकासश्च सांसिद्धिकः शेवधिः। अपि च, रुग्णदशायां शारीरिकशक्तिह्रासेन साकं कार्यक्षमताह्रासोऽप्यासाद्यते। शारीरिकमानसिकक्रियाह्रासाद्धारणाशक्तिरपि नैसर्गिककार्यक्षमतां न बिभर्ति। अन्यच्च, धारणाशक्ती रुचिध्यानैकाग्र्यायत्तापि भवति। यदि स्मर्यमाणे विषये पाठकस्य रुचिर्न भवेत्तर्हि ध्यानैकाग्र्यं न जायते। ध्यानैकाग्र्याभावे धारणाशक्तिप्रकर्षोऽपि स्मृतिसौष्ठवं न लभते। ध्यानैकाग्र्यञ्च सत्त्वगुणोद्रेकात्, युक्ताहारविहारात्, ब्रह्मचर्यसेवनाच्चाभिनिर्वर्तते। तथा हि श्रुतिः—

"आहारशुद्धौ सत्त्वशुद्धिः, सत्त्वशुद्धौ ध्रुवा स्मृतिः" इति।

सात्त्विकाहारात् सत्त्वस्य बुद्धेः विशुद्धिर्जायते, बुद्धिप्रसादे च ध्रुवा स्थायिनी स्मृतिर्जायते। स्मृतिर्धारणेत्यत्रावसेयम्। पवित्रभोजनब्रह्मचर्य्यादिसेवनेन ध्यानैकाग्र्यं सौकर्य्येण जायते। ध्यानावहितस्य धारणा बलवती भवतीति निःसन्दिग्धम्।

१८. स्मृतिविकासोपायाः

किन्नु खलु स्मृतिविकासः कर्तुं शक्यते? अथवा किं स्मृतिर्विविधौषधविशेषसेवनेन संवर्धते? अथवास्ति कोऽपि मनोवैज्ञानिको विधिविशेषः, येन स्मृतिसंवर्धनमापादयितुं शक्यते? नहि रोगिणः कार्यविशेषे चित्तैकतानतां लभन्ते। औषधविशेषेण स्वास्थ्यं वर्धते, ततश्चासाद्यते कार्यक्षमतावृद्धिः। स्मृतिविकासस्तु पूर्वोक्तमनोविज्ञानाभिमतनियमानामनुपालनेन सञ्जायत इति वयं मन्यामहे। विषयसामग्र्याः सार्थकत्वम्, पठनातिशयः, विश्रामशबलीकृतपठनकालः; पाठावयवेषु परस्परं प्रत्ययसम्बन्धानां विचारपूर्वकं स्थापनञ्चेति स्मरणसौकर्य्यमावहन्ति। यद्यपि धारणाशक्तिं निसर्गजन्यां वयं संवर्धयितुं न शक्नुमः; तथापि शिक्षणवेलायां ध्यानैकाग्र्यमभिरुचिप्रकर्षश्च पाठ्यविषये स्मृतिसंवर्धनाय कल्पेते। निद्रा, मनोरञ्जनम्, विश्रामः, शिक्षणानन्तरं क्रियाक्षेत्रपरिवर्तनं चैते धारणासहाया भवन्ति। स्मर्यमाणविषयस्य स्वगतात्मपरीक्षणेन[1] पठनानन्तरं विषयावगमः परिपाकं नेनीयते। स्वगतात्मपरीक्षणविधिश्चैवम्प्रकारको भवति। पाठको वारं वारं पाठमधीयानो मध्ये मध्ये आत्मपरीक्षणमुपक्रमते; यथा—कियान् पाठांशोऽधीतः सम्यक्तया, कियान् भागश्चावशिष्ट इति। एवंविधात्मपरीक्षणेन प्रत्ययसम्बन्धावधारणं ध्यानसक्रियत्वं चानायासेन सम्पाद्येते। पूर्वसाफल्येनोत्साहवृद्धिर्जायते। उत्साहसद्भावे दुर्बोधोऽपि पाठः सुकरो जायते। किञ्च, आत्मपरीक्षणेन पूर्वाधीतस्खलितानां निवारणमचिरेणाभिसम्पद्यते। प्रतिवारमनुभवजन्याः स्थायिसंस्कारा जायन्त इति तु निःसन्दिग्धम्। तेषां संस्काराणामसम्प्रमोषेयत्तावधारणं नहि सर्वदा

---

१. पुनर्गणनार्थम्—Self-recitation method.

संस्कारोद्बोधनेन प्रत्यभिज्ञानेन वा सम्पाद्यते । पूर्वपाठस्य पुनरध्ययनेनात्मपरीक्षणेन सञ्चय-विधिना वा तदवधारणं सुकरं भवतीति बोद्धव्यम् ।

सञ्चयविधिश्चायं[1] एबिनघॉसमहोदयोद्भावितो विस्मृतिविवेचनावसरे व्याख्यातचरः । पुनरध्ययनं नाम पाठपुनरावृत्तिः । पठनातिशयोऽत्र यावदध्ययनं स्मरणार्थं पर्याप्तं सम्भावितं भवेत्, तस्मादप्यधिकं बहुवारं पठनम्; यतो हि तेन पाठ्यविषयः पूर्णतयात्मसात्कृतः सञ्जायत इति ।

१६. स्मृतिविकाराः

स्मृतिस्वरूपं सपरिकरमनुव्याख्यातम् । सम्प्रति विकाराणां विवेचनमपि महत्त्वपूर्णमस्मान् प्रतिभाति; यतो हि तेषामपरिमितः प्रभाव इतरमानसिकव्यापारेषु प्रत्यक्षानुमानविचारकल्पना-प्रभृतिष्वनुदिनं सँल्लक्ष्यते । प्रायः सामान्यपुरुषाणामसामान्यपुरुषेभ्यो भेदप्रयोजकं दुरवगमं भवति; यतो हि सामान्यविस्मरणमसामान्यस्मृतिभ्रंशाद् भिद्यमानमपि दुर्बोधं भवति । तथापि मनोवैज्ञानिकानां रमणीयं प्रतिपाद्यं हि खलु स्मृतिविकाराणां विवेचनम्, तेषां दैनन्दिनं सामाजिक-क्षेत्रेषु यत्र तत्रोपलभ्यमानत्वात् ।

स्मृतिविकारास्त्रिविधा भवन्ति—स्मृतिभ्रंशः[2], स्मृतिव्यतिरेकः[3], स्मृतिविपर्यासश्चेति[4] । वयमेतान् स्मृतिविकारान् प्रतिपदं संक्षेपतोऽनुव्याख्यास्यामः । अत्रेदं स्मर्त्तव्यं यद्धि स्मृतिसहायानां तदङ्गानामसामान्यव्यापारेण तत्तद्विकारा आविर्भवन्तीति ।

२०. स्मृतिभ्रंशः

स्मृतिभ्रंशो नामासामान्यं विस्मरणं स्मृत्यभावो वा । स्मृतिभ्रंशोऽपि द्विविधो भवति—साधारणस्मृतिभ्रंशः[5], आंशिकस्मृतिभ्रंशश्चेति[6] । साधारणस्मृतिभ्रंशे निखिलविचाराणामभ्यस्त क्रियाणाञ्चापि विस्मरणं जायते । आंशिकस्मृतिभ्रंशे सङ्ख्याविशेषस्य, नामविशेषस्य, घटना-विशेषस्य, इन्द्रियविशेषजन्यानुभवस्य वा विस्मरणं जायते । साधारणस्मृतिभ्रंशः समेषामेवैतेषां जायते यदा कतिपयवर्षपर्यन्तं निखिलपूर्वानुभवस्य विस्मरणं जायते । उदाहरणस्वरूपमेकस्य पुरुषविशेषस्य सप्तवर्षानुभवजातं सर्वथा विस्मृतिं गतम् । स तत्पूर्वानुभवान् स्मरति स्म । स तदवान्तरकालिका-नुभवानपि स्मरति स्म; किन्तु तदन्तराले परिचितपुरुषाणाम्, सङ्घटितघटनानां किमपि स्मरणं स कर्तुं न प्राभवत् । कदाचन स्मृतिभ्रंश आत्मविस्मरणरूपतां बिभर्त्ति । आत्मविस्मृतिकः[7] पुरुष आत्मानं न विजानाति, यथा—कुत्रत्यः सः ? किं च तस्य नाम ? कश्च तस्य व्यवसायो वा ? इति ।

---

१. तुलनार्थम्—Savings method.

२. तुलनार्थम्—Amnesia.

३. तुलनार्थम्—Hypermnesia.

४. तुलनार्थम्—Paramnesia.

५. तुलनार्थम्—General amnesia.

६. तुलनार्थम्—Partial amnesia.

७. तुलनार्थम्—Fuge.

एतादृशपुरुषाणामात्मविस्मृतिग्रस्तानां[1] वृत्तान्ता अनुदिनं समाचारपत्रेषु प्रकाश्यन्ते। सामाजिकहितापेक्षया स्मृतिभ्रंशकारणानुसन्धानं परमावश्यकम्।

२१. स्मृतिभ्रंशकारणम्

किन्नु खलु स्मृतिभ्रंशस्य कारणम्? सन्ति हि बहूनि तत्कारणानि। प्रथमं तावत् स्मृतिभ्रंशस्य कारणमनुभवकाले स्मर्यमाणं वस्तु प्रति ध्यानाभावः। अवहितो भूत्वा यदनुभवनं पुरुषः करोति, तत् कालान्तरे स्मर्तुं शक्यत इति तु वयं पूर्वमवोचाम। अनवहितस्यानुभवनं स्मृतिभ्रंशमासादयति। शिक्षणवैकल्याद् ध्यानदोषाद् वा स्मृतिभ्रंशो जायते। अन्यच्च, मस्तुलुङ्गप्रतिघातान्मस्तुलुङ्गीयनाडीतन्तु(tissue)दौर्बल्याच्चापि स्मृतिभ्रंश आपद्यते। द्विविधो हि स्मृतिभ्रंशो भवति—धारणात्मकः स्मृतिभ्रंशः[2], संस्कारोद्बोधनात्मकः स्मृतिभ्रंशश्चेति[3]। धारणात्मके स्मृतिभ्रंशे मृदुनाडीद्रव्यस्थसूक्ष्मकर्षाणां दुर्घटनाप्रतिघातेन विपरिलोपो जायते। कदाचन तु रोगी दुर्घटनायाः पूर्वं घटिताया वर्षं यावद्, दिनानि यावद्, घटिका यावद् वा तथ्यानां स्मरणं न कर्तुं प्रभवति। कदाचन तदुत्तरं कासाञ्चिद् घटनानां पुरुषाणां वा स्मृतिः पुनरावर्तते।

संस्कारोद्बोधनात्मके स्मृतिभ्रंशेऽसामान्यमानसिकदशायां प्रत्ययानामभ्यस्तपूर्वाणां क्रियाणां वा अवदमनक्रियासादितसंस्कारोद्बोधनं न जायते। एतादृशः स्मृतिभ्रंशः शारीरिकविकारजन्यो नास्ति, प्रत्युत मानसिकसङ्घर्षेणावदमनेन च व्यक्तित्वद्वैविध्यं जायते। ये ये प्रत्यया भावा विचाराश्चावदमनविषया भवन्ति, अहङ्कारेण जाग्रच्चैतन्यक्षेत्रात्तिरोहिताः क्रियन्ते, ते ते नूनं विस्मृता जायन्ते। फ्रायडमहाभागैः खल्वेतादृशस्मृतिभ्रंशरूपमाविष्कृतं सपरिकरमनुव्याख्यातं चापि। सम्मोहनविधिना मनोविश्लेषणविधिना च परिस्थितिविशेषे तद्विधानां प्रत्ययानां भावानां विचाराणाञ्च रोगिणां पुनः स्मरणं सम्भाव्यते। अतो वयं मन्यामहे, संस्कारोद्बोधनात्मकः स्मृतिभ्रंशो मस्तुलुङ्गावयवविकारजन्यो नास्तीति।

सोऽयं संस्कारोद्बोधनात्मकः स्मृतिभ्रंशः सामान्यविस्मरणरूपो निष्क्रियो व्यापारो नास्ति। अयं वै सक्रियो व्यापारः योऽस्माकं चित्तेषु ज्ञानाविषयीभूतः सन्नपि प्रवर्तते। नहि दुःखप्रदघटनानां स्मरणमस्मभ्यं रोचते। मनस्तर्हि तासां घटनानामनुभवानामवदमनं करोति। कारणचैतन्यासादितं तिरोधानं तेषामनुभवानां तदा सञ्जायते। अनेनैव कारणेन वयं स्वकीयान्यृणानि विस्मर्तुं यतेमहि; यतो हि ऋणं प्रायेण कष्टप्रदमनुभूयते जनैः। आदेयानि द्रव्याणि भृशमस्माभिः स्मृतिपथं नेनीयन्ते। आशामयानि ह्यादेयानि द्रव्याणि भवन्ति। ये ये विचाराः स्मृतिभ्रंशेन विलुप्तास्तिरोहिता विस्मृता वा, ते सर्वे भावग्रन्थिसन्नद्धा अवदमनविषयीभूतस्थायिभावान्विता वासन्। यत् प्रत्ययजातं विचारजातं वा विस्मृतिं नेनीयते, तद्बलवत्तरभावग्रन्थिप्रभावविरोधात्तिरोधीयत इति मनोविश्लेषणपारङ्गतानां युक्तिबलान्वितं मतं युज्यते।

२२. स्मृतिव्यतिरेकः

स्मृतिव्यतिरेको नाम स्मृत्याधिक्यम्, यत्रासाधारणं वर्णोज्ज्वलत्वं स्मरणं बिभर्ति। पूर्वानुभवस्य संस्कारोद्बोधनमतीव स्फुटमत्र जायते। अनेकाः पूर्वविस्मृताः प्रत्ययाः स्मृतिपथे

1. तुलनार्थम्—Loss of Personal identity.
2. तुलनार्थम्—Amnesia of Conservation.
3. तुलनार्थम्—Amnesia of reproduction.

विस्पष्टं समागच्छति। अयं स्मृतिव्यतिरेकस्तीव्रज्वरे प्राणान्तकदुर्घटनायां भावगर्भितायां वा सङ्घटते। स्मृतिव्यतिरेको नाडीस्रोतसामतिशयक्रियाकारित्वेन नाडीसम्बन्धानामसामान्य-प्रतिरोधाभावे[1] वाभिनिर्वर्तते।

प्राध्यापकजेम्समहोदयेनैकस्या बालिकायाः स्मृतिव्यतिरेकोदाहरणमुद्धृतम्। अशिक्षितैका बालिका अकस्माद् हिब्रूभाषाद्वारा वार्तालापमारब्धवती। तया कदापि हिब्रूभाषा नैवाधीता आसीत्। प्रायशो जना एतादृशव्यक्तीः दैवशक्तिसम्पन्ना मन्यन्ते। अनुसन्धानेन तद्बालिका-पूर्ववृत्तान्तस्याविष्कृतं खल्विदं तथ्यं यत् सा पूर्वमेकदा हिब्रूभाषापण्डितस्य भृत्या आसीदिति। तस्या बालिकायाः स्मृतवाक्यानि धर्माचार्य्यवाक्यसदृशान्यासन्। अतस्तदानीन्तनशाब्दसंस्कार-धारणावशात्तदनन्तरमपि तदभिव्यञ्जनं भाषाद्वारेण सुकरं सुस्पष्टं च सञ्जातम्। एतावता प्रति-फलतीदं यद्धि परिस्थितिविशेषे यावन्तो विषयाः स्मर्यन्ते, तेभ्योऽप्यधिका अनुभवसंस्कारा बुद्ध्या आधीयन्ते, तेषां धारणा च संरक्षिता जायते।

२३. स्मृतिविपर्यासः

स्मृतिविपर्यासो नाम अननुभूतविषयाणां स्मरणमिति। स्मृतिभ्रमो हि 'स्मृतिविपर्यासः' इति व्यपदिश्यते। स्मृतिविपर्यासोऽपि सर्वांशतो मिथ्यास्मृतिर्न भवति। स्मृतिमिथ्यात्वं नाम पूर्वस्मृतेर्भिन्नदेशकालसम्बन्धिप्रत्ययसंस्कारोद्बोधनमिति। वस्तुस्मरणं धारणामुखेन संस्कारोद्बोधन-मुखेन वा स्वतो वितथं न भवति; किन्तु देशकालप्रत्ययसम्बन्धाः स्थानभ्रष्टा जायन्ते। अथवा, कल्पनोद्भावितानां प्रत्ययानामभिनवं विचित्रं वा प्रघट्टनं संयोजनं निर्म्माणं वा यदा वास्तविक-पूर्वानुभवव्याजेन स्मर्यते स्मृतिरूपतयोद्घोष्यते च, तदा 'स्मृतिविपर्यासः' इति निगद्यते। कदाचन पुस्तकाधीतविचाराः स्वकीयानुभवसंस्काररूपेणानुभूयन्ते। अघटितानामपि घटनानां स्मरणं स्मर्ता करोति। स्मृतिविपर्यासः कल्पनिकसृष्टेश्चरमं रूपं सन्दिशति।

अर्वाचीना मनोवैज्ञानिका मन्यन्ते यद्धि अनवबुद्धाभिलाषासादिताः स्मृतिविपर्यासा भवन्ति। एवंविधः पुरुषस्तदेव स्मरति यत्स यथार्थभूतमिवाभिवाञ्छति। स्मर्यमाणप्रत्ययानामन्त-राले कल्पनासृष्टिः प्राचुर्य्येण संनिविशते। अत्र रोगी यथार्थभूताया घटनायाः काल्पनिकोद्भावि-ताद् घटनाविशेषात् पृथङ्निर्देशं बुद्धिसम्भ्रमेण कर्तुं न शक्नोतीत्यवसेयम्॥

इति अर्वाचीने मनोविज्ञाने स्मृतिस्वरूपविवेचनीयो द्वादशोऽध्यायः॥

---

1. तुलनार्थम्—Abnormal decrease in synaptic resistance or due to excessive neural irritability.

त्रयोदशोऽध्यायः

संवेदनभावादिविवेचनम्

१. विषयोपोद्घातः

पूर्वेषु कतिपयाध्यायेष्वस्माभिश्चिन्तनमनुभवनापरनामधेयं साङ्गोपाङ्गमनुव्याख्यातम्। चिन्तनेन व्यक्तिर्बाह्यं जगदात्मगतं मानसं जगच्च जानाति। चिन्तनस्य फलं वै ज्ञानम्। आलोचनप्रत्यक्षविचारकल्पनास्मृत्यादिमनोव्यापाराणां चिन्तनप्रकारत्वेन विवेचनं सपरिकरं व्याख्यातचरम्। वयमधुनास्मिन्नध्याये संवेदनभावादिकमनुव्याख्यास्यामः। आदिपदेन स्थायिभावभावग्रन्थिविभावानुभावादीनां समावेशः करणीयः। नहि खलु चिन्तनमनुभवनाख्यं भावव्यतिरिक्तं प्रयत्नापेतं वा कदाचनावतिष्ठते। चिन्तनम्, संवेदनम्, प्रयत्नश्चेति मिश्रीभूयैकैकस्मिन् चैतन्यव्यापारे वर्तन्ते। जानाति, संवेत्ति, इच्छति, यतते—इति चैतन्यव्यापारक्रमो वर्णनसौकर्य्यात्र गृहीतः, यद्यपि चिन्तने संवेदनप्रयतने अप्यनुप्रविशतः। प्रत्यक्षादिविवेचनावसरेऽपि नूनमस्माभिर्यथावसरं संवेदनसंवेगादिविवेचनं परम्परया कृतम्, तथापि विशेषेण संवेदनभावादिस्वरूपमत्र वयमनुव्याख्यास्यामः।

२. संवेदनस्वरूपम्

ननु किमिति संवेदनं नाम ? संवेदनं[1] संवेदना वेति प्रत्येकमनुभवस्यानिवार्य्यमङ्गम्। वस्तुदर्शने सति तद्विषये कश्चन भावनाविशेषो जायते; यथा—सुखप्रदमिदम्, दुःखप्रदमिति वा। सेयं भावना 'संवेदनम्' इति निगद्यते। सन्ति हि भावनाया विविधाः प्रकाराः। कदाचन पुरुषविशेषं दृष्ट्वा क्रोधोऽनुभूयते। अन्यं पुरुषविशेषं दृष्ट्वा रागो जायते। क्रोधरागमात्सर्यादिविविधा भावा भवन्ति। ननु कथं संवेदनं प्रत्येकमनुभवस्यापरिहार्यमङ्गमित्युच्यते ? यद्यपि संवेदनं प्रत्येकानुभवेऽनुप्रविष्टं विद्यते, तथापि न्यूनमात्रस्य संवेदनस्य ध्यानविषयत्वं नोपलभ्यते। संवेदनस्य सान्द्रमात्रायां सत्यामेव तदुपलब्धिः सम्भाव्यते। ध्यानाविषयीभूतमपि संवेदनमनुभवपृष्ठभूमौ विद्यमानं तदनुकूलप्रवृत्तिं जनयति। 'संवेदनम्' इति पदं कैश्चन भारतीयैर्लेखकैर्निर्विकल्पकप्रत्यक्षार्थेऽपि प्रयुज्यते; तत्तु नोचितं प्रतिभाति। भवभूतिमहाकविना अस्माकमभिमतार्थ एव संवेदनपदं प्रयुक्तम्। तथाहि—

> दुःखसंवेदनायैव रामे चैतन्यमागतम्।
> मर्मोपघातिभिः प्राणैर्वज्रकीलायितं हृदि ॥ इति[2]।

अतो वयं 'संवेदनम्' इति पदं दुःखसंवेदनसुखसंवेदनख्यापनायैव व्यवहरिष्यामः। संवेदनपदस्य विशिष्टोऽयमर्थः। संवेदनसामान्येऽर्थे संवेदनपदेन संवेगभावादिकमपि द्योत्यते, यथा—चिन्तनेन सामान्येऽर्थे स्मृतिविचारकल्पनादिकमपि द्योत्यते।

---

१. तुलनार्थम्—Feeling.

२. तुलनार्थम्—उत्तररामचरितम् १।४७

किंलक्षणं दुःखं सुखं चेति ? तदुक्तमभियुक्तैः—'अनुकूलवेदनीयं सुखम्', 'प्रतिकूलवेदनीयं दुःखम्' इति[1]।

भगवान् मनुः सुखदुःखलक्षणमेवं व्याचष्टे—

सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्।
एतज्ज्ञेयं समासेन लक्षणं सुखदुःखयोः ॥ इति।

अत्रेदं वक्तव्यं भवति—सुखसंवेदनं दुःखसंवेदनं चेति मानसमाभ्यन्तरं व्यापारद्वयम्। संवेदनस्वरूपप्रयोजिका बाह्यपरिस्थितिरेव न भवति। संवेदनमिति तु मानसिकानुभवविशेषः। समानपरिस्थितिविषये कदाचन त्वेकेनैव पुरुषेणानुकूलवेदनीयत्वमनुभूयते, कदाचन च प्रतिकूलवेदनीयत्वम्। एकस्मिन्नेव काले च समानायां परिस्थितौ कस्यचिद् दुःखानुभूतिः, कस्यचित्सुखानुभूतिः। तस्मात् संवेदनं न बाह्यपरिस्थितिमात्रप्रयोज्यम्; अपि त्वनुभवितुराभ्यन्तरावस्थाप्रयोज्यम्। संवेदनं नहि ज्ञानव्यतिरिक्तं प्रयत्नविरहितं वावतिष्ठते। ज्ञानप्रयत्नपरिणद्धं वै सुखदुःखादिसंवेदनं भवति। संवेदनं विशुद्धो मानसो व्यापारो भवति, अतो ध्यानस्य विषयत्वं प्रायः संवेदनं नैवाप्नुते।

३. वण्टमहोदयानां त्रिपरिणाहात्मकं मतम्[2]

जर्मनदेशीयमनोवैज्ञानिकप्रवरा वण्टमहोदयाः प्रतिपादितवन्तो यत्संवेदनं षड्विधं भवति। त्रिषु युग्मकेषु षण्णां संवेदनानां वर्गीकरणं कर्तुं शक्यते। प्रथमे युग्मके सुखसंवेदनदुःखसंवेदनयोरन्तर्भावः करणीयः। शरीरविश्रान्तिं[3] व्यग्रतां[4] चादाय द्वितीयं युग्मकं निष्पन्नं जायते। तृतीये युग्मके उत्तेजितत्वं[5] शान्तिश्च[6] सन्निविष्टे भवतः। संवेदनायाः षड्विधोऽयं स्वरूपप्रसरो वण्टमहोदयानुसारं त्रिपरिणाहात्मकं मतमिति व्यपदिश्यते[7]।

अस्माँस्त्विदं प्रतिभाति यद्धि दुःखसंवेदनं सुखसंवेदनं चेति मौलिकं सरलतममविश्लेष्यं चैतन्यव्यापाररूपम्; किन्तु तदपेक्षया विश्रान्तिः, व्यग्रता, उत्तेजितत्वम्, शान्तिश्चेति जटिलतरं मानसक्रियारूपम्, यस्मिन् सुखदुःखातिरिक्तं पेशीजन्यनिर्विकल्पकप्रत्यक्षमपि सन्निविष्टं भवति। उत्तेजना च संवेदनापेक्षया भावविशेषयुक्ता प्रायो भवति। अतः संवेदनामधिकृत्य प्रतिपादितं त्रिपरिणाहवादान्तिमयुग्मकद्वयमालोचनसंवेदनात्मकं संश्लिष्टं मनोव्यापाररूपमिति वयं मन्यामहे। संवेदना तर्हि द्विविधैव भवति, न तु षड्विधेति सिद्धम्।

---

१. द्रष्टव्यम्—न्यायसूत्रभाष्यम्
२. तुलनार्थम्—Three dimensional theory of wundt.
३. तुलनार्थम्—Tension.
४. तुलनार्थम्—Relaxation.
५. तुलनार्थम्—Excitement.
६. तुलनार्थम्—Quiescence.
७. द्रष्टव्यम्—E. B. Titehner. A Text-book of Psychology, Pages, 225–264

४. संवेदनमालोचनव्यतिरिक्तं मानसं कार्यम्

नहि संवेदनमालोचनज्ञानाङ्गभूतमिति वाच्यम्। आलोचनज्ञानमिव संवेदनं संवेदना वापि मौलिकः सरलतमोऽविश्लेष्यो मानसो व्यापारविशेषः। वस्तुज्ञानमालोचनद्वारा जन्यते। वस्तुविषये सुखदुःखाद्यनुभूतिरेव च संवेदनम्। नहि विश्लेषणेन संवेदनं प्रविभज्य पेशीजन्यज्ञानादिषु सरलतमेषु निर्विकल्पकज्ञानविशेषेषु ज्ञानरूपतया व्याख्यातुं शक्यते। संवेदना मनसो रागात्मिका वृत्तिः। अन्यच्च, निर्विकल्पकं ज्ञानं तत्तदिन्द्रियसम्बन्धि ज्ञानं भवति, यथा—चाक्षुषमालोचनं चक्षुरिन्द्रियजन्यम्। उदरवेदनाज्ञानादिकमपि पेशीविशेषजन्यम्; किन्तु संवेदनं समग्रमानवस्य भवति। दुःखसंवेदनं नहि शरीरेन्द्रियविशेषजन्यम्। आलोचनमिन्द्रियविशेषव्यापारतया प्रत्यक्षरूपं भवति; नहि तथा संवेदनम्। यद् दुःखं तत्तु निखिलमानवस्यैकीभूतस्य। नहि संवेदनं मानसप्रत्यक्षेण तथा ग्रहीतुं शक्यते, यथालोचनं ज्ञानम्। मानसे प्रत्यक्षे सति संवेदनस्य दुःखादिरूपमपि विनिवर्तते प्रायः। मानसप्रत्यक्षविषयीभूतं संवेदनं शान्तमिवोदासीनमिव चावतिष्ठते। मानसप्रत्यक्षेण संवेदनजनकपरिस्थितिविशेषा उद्घाट्यन्ते।

५. महर्षिगौतममतम्

"बाधनालक्षणं दुःखम्" इति गौतममहर्षिः[१]। बाधना पीडा, तदेव लक्षणं यस्य तदित्यर्थः। दुःखं तु मनसैव गृह्यते। न्यायनये जीवमात्रवृत्ति चेति विज्ञेयम्। सांख्यमतानुसारम्—"सुखदुःखादिकं चित्तधर्मः" इति बोद्धव्यम्। सुखदुःखादिकं प्रत्यात्मवेदनीयं भवति। न्यायशास्त्रवेदान्तयोरस्ति हि भेदः। न्यायमत आत्मनिष्ठस्य सुखादेः शरीरनिष्ठत्वेनोपलम्भः, शरीरस्य सुखाद्यधिकरणतावच्छेदकत्वात्। किन्तु शाङ्करवेदान्तानुसारम्—"नहि सुखादीनामन्तःकरणावच्छिन्नचैतन्यनिष्ठाविद्याकार्यत्वप्रयुक्तम् 'अहं सुखी' इति ज्ञानम्। सुखादीनां शुद्धचैतन्य एव अध्यासात्" इति[२]। शुद्धचैतन्याश्रिताविद्याकार्यं सुखदुःखादिकमित्यवसेयम्। अत एव सुखदुःखादिकं केवलसाक्षिवेद्यमित्यायातं भवति।

६. संवेदनविषयकमतानि

केषाञ्चन मनोवैज्ञानिकानां मते सुखदुःखसंवेदने नहि मौलिकाविश्लेष्यमनोव्यापाररूपे; अपि तु ते अत्रापि विश्लेषणार्हे, जटिलरूपे चेति। तदनुसारं ते संवेदने सरलतरैर्व्यापारविशेषैरनुव्याख्यातुं प्रयतेते। वयमत्र आलोचनात्मकज्ञानात्मकं मतम्[३], प्राणिविज्ञानात्मकं मतं[४] चेति मतद्वयं विचारयिष्यामः।

७. आलोचनज्ञानात्मकं मतम्

केचन विद्वांसोऽभिमन्यन्ते यद्धि संवेदनं जटिलरूपं भवति। तस्य च विश्लेषणं सरलतमेषु मनोव्यापारघटकेषु कर्तुं शक्यत इति। तदनुसारं संवेदनमालोचनापरनामधेयमित्यालो-

१. द्रष्टव्यम्—न्याय० सू० १।१।२१
२. द्रष्टव्यम्—वेदान्तपरिभाषा, प्रत्यक्षखण्डम्, पृ० ३१ (आधार-संस्करणम्)
३. तुलनार्थम्—Sensationalist Theory.
४. तुलनार्थम्—Biological Theory.

चनात्मकवादेन प्रतिपाद्यते। संवेदनमिति जटिलमनोव्यापारः, यस्य रूपं शारीरेन्द्रियजन्येनालोचनज्ञानेन पेशीजन्येनालोचनज्ञानेन चाभिनिर्वर्तते। एतेषां विदुषां मते सर्वे ज्ञानं सर्वे मानसिका व्यापारा अन्ततोगत्वा आलोचनज्ञानप्रकारविशेषाः, किं वा आलोचनज्ञानरूपमौलिकघटकेभ्यो विनिर्म्मिता भवन्ति। अत्रेदं स्मर्तव्यं यद्धि संज्ञावाहिनाडीकन्दाणुकानां समुत्तेजनानन्तरं नूनं संवेदनं सुखदुःखाद्यनुभूतिरूपमनुभूयते; किन्तु तस्मान्नैतदायाति यत्संवेदनमित्यालोचनप्रत्यक्षरूपम्। मानसप्रत्यक्षेण संवेदनाया रूपमालोचनप्रत्यक्षव्यावृत्तं सुस्पष्टं सरलतममविश्लेष्यं निष्पन्नं भवतीति। अत एव संवेदनमालोचनज्ञानभिन्नं मानसव्यापाररूपमिति वयं मन्यामहे।

आलपोर्टमहोदयाः[1] संवेदनं स्वतन्त्रपरिस्वतन्त्रनाडीमण्डलक्रियानिबन्धनमित्युद्भावयन्ति। सुखसंवेदनं दुःखसंवेदनप्रतिकूलमित्यनेन प्रतिफलति यदेतत्सर्वं परस्परविरोधिव्यापाराभ्यां स्वतन्त्रपरिस्वतन्त्रनाडीमण्डलाभ्यां जायते। तथा हि स्वतन्त्रनाडीमण्डलक्रियातिशयजन्या दुःखानुभूतयो भवन्ति, सुखानुभूतयश्च परिस्वतन्त्रनाडीमण्डलस्य क्रियातिशयेन। मनोरञ्जकं हि नूनमालपोर्टमहोदयानामिदं मतं सारगर्भितमपि भवितुमर्हति। तथापीदं त्वस्मान् प्रतिभाति यद्धि स्वास्थ्यप्रदाः क्रियाः स्वाभाविकक्रियावेगनिर्बाधिकाः सुखानुभूतिजनिका भवन्ति। शारीरिकस्वास्थ्यसन्तुलनविनाशिका अभीष्टक्रियावेगाधिकाश्च क्रिया दुःखानुभूतिसहकृता भवन्ति। एतावता सुखानुभूतिर्वै स्वतन्त्रपरिस्वतन्त्रनाडीमण्डलयोः क्रियासन्तुलनोद्भवा क्रियासामञ्जस्यजन्या वेत्यवदातमेव सर्वम्। दुःखानुभूतिश्चैतयोरन्यतरस्य क्रियातिशयेन क्रियाह्रासेन वा सञ्जायते।

८. प्राणिविज्ञानात्मकं मतम्

प्राणिविज्ञानात्मकमतानुसारमिदं प्रतिपाद्यते यद्धि स्वास्थ्यप्रदक्रियाजन्यं सुखम्, स्वास्थ्याहितकरक्रियाप्रभवञ्च दुःखमिति। दृश्यते चेदं लोके यच्छारीरिकरोगादयः प्रायो दुःखावहाः। शारीरिकमानसिकस्वास्थ्यकराणि कर्माणि सुखप्रदानीत्यनुभूयते। यदि हि नूनं कष्टप्रदाः क्रियाः प्राणधारणोपयोगिन्योऽभविष्यँस्तर्हि सर्वेषां प्राणिनामचिरेण विनाशोऽप्यभविष्यत्। अत एव विधातुः कौशलमिदं यत् सर्वा जीवनधारणाय योगक्षेमकराः क्रियाः प्रायेण सुखावहा इति।

उपर्युक्तं मतं शारीरिकसुखदुःखाद्यनुभूतिमभिप्रेत्य विशेषेण सार्थकं भवति। 'प्रायेण' इति पदमत्रास्माभिः साकूतं सन्निवेशितम्। न वयं नियमरूपेणेदं प्रतिपादयितुमर्हा यद् व्यक्तेः सर्वाः सुखप्रदाः क्रियाः प्राणिविज्ञानाभिमतरीत्या हितावहाः, प्राणधारणक्षमा इति यावत्। विशेषतोऽभ्यस्तक्रियास्वर्जिताभिरुचिप्रवर्तमानासु क्रियासु नैतिकादर्शानुप्राणितमानवानां सद्वृत्तेषु च वयं प्राणिविज्ञानात्मकं संवेदनस्वरूपमतमवितथं न लभामहे। धूम्रपानसेवनं हि खल्वभ्यस्ता क्रिया फुफ्फुसव्याधिरक्तविकारादिजनिका; तथापि चिरसेविता साभ्यस्ता क्रिया प्राणिविज्ञानरीत्या स्वास्थ्याहितकरापि व्यक्तिमानन्दयत्येव। चलच्चित्रदर्शनोत्सुको मानवोऽनुदिनमचाक्षुष्यं चलच्चित्रदर्शनं दृष्ट्वा सुखं संवेत्ति, अनुभवति वा। चलच्चित्रदर्शनमहरहः शारीरिकसामाजिकार्थिकमानसिकहितनाशकं सदपि सुखोत्पादकम्। विषपानं प्राणिविज्ञाना-

१. द्रष्टव्यम् — F. H. Allport, Social Psychology, (Hughton mifflin 1924), PP. 84–98.

त्मकमंतरीत्या विप्रदुष्टमपि सत्यनिष्ठाय दार्शनिकपुङ्गवाय यवनदेशीयमहामुनिसुकरातमहोदयायारोचत, किन्तु क्रीटोनामधेयशिष्यानुज्ञातमपि कारावासवातायनद्वारेण पलायनं जीवितयोगक्षेमकरमपि नहि तस्मा अरोचत। पुण्यचरितानां कृतीनां स्वजीवनादपि कीर्तिरक्षणं वरीयो भवति। तदुक्तं हि भगवता श्रीकृष्णेन श्रीमद्भगवद्गीतायामर्जुनमभिसम्बोध्य—

"सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते" इति[1]।

अन्यच्च, रघुकुलतिलकेन भगवता रामचन्द्रेणाप्युक्तम्—

स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।
आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा॥ इति[2]।

सुखं दुःखञ्चेति मानसिकसंवेदनात्मिकानुभूतिः प्राणिविज्ञानाभिमता शारीरिकस्वास्थ्यकरापि क्रियानभीष्टत्वान्नहि सुखावहा कदापि भवितुमर्हति। अवमानपुरस्कृत'ममृतमपि सद्भिरत एव त्याज्यं भवति। अतः प्राणिविज्ञानात्मकं संवेदनस्वरूपमधिकृत्य प्रवृत्तं मतमंशत एव सत्यत्वेन ग्राह्यम्। तस्य नियमरूपत्वं तु मानसिकव्यापारजाटिल्याद् दूरमपास्तम्।

६. मिश्रितसंवेदनाः

ननु किं सुखदुःखे परस्परमितरेतरव्यावृत्तलक्षणे? किमुत ते सम्भूयैकस्मिन्ननुभवे मिश्रीभवतः? नहि कोऽपि मानसिकोऽनुभवः संवेदनविधुरो वर्तते। तदुक्तं हि भरतमुनिना—"न रसादृते कश्चिदर्थः प्रवर्तते" इति। प्रत्येकं तह्यनुभवविशेषः सुखानुषिक्तो दुःखानुलिप्तो वा भवति; किन्तु किमेकस्मिन्नपि खल्वनुभवविशेषे सुखं दुःखं च द्वे एव मिश्रीभावेन वर्तेते? सामान्यत इदं वक्तुं शक्यते यद्धि प्रायः प्रत्येकमेवानुभवस्यैकः सुखात्मकः पक्षो वर्तते, अपरश्च दुःखात्मक इति। यथा यदा किञ्चन मित्रं समागच्छति, तस्य बालसखस्य शुभागमनं वै हर्षोत्पादकम्; किन्तु तस्यार्थविषयिकाभ्यर्थना स्वकीयविवशताऽसामर्थ्यं च तद्विषये वारं वारं दुःखाकरोत्यस्मान्। अतो वयं ब्रूमः—अनुभवाङ्गविशेषमादायेदं वक्तुं शक्यते यदेकोऽनुभवविशेषः सुखात्मको दुःखात्मको वा भवति; किन्तु सोऽनुभवविशेषः किञ्चित् क्षणं यावदवतिष्ठते। नहि कश्चन चेतनानुभवः सरलरूपो भवति। प्रायस्तत्र महज्जाटिल्यमनुप्रविशति। अत एव यद्यपि सुखदुःखे परस्परमितरेतरव्यावृत्तलक्षणे वर्तेते, तथापि जटिलरूपेषूपलभ्यमानानुभवेषु तयोः सम्भिन्नं मिश्रितं वा रूपमुपलभ्यते। सामान्यानुभवस्याङ्गविशेषमधिकृत्यैव वयं तस्य दुःखात्मकत्वं सुखात्मकत्वं वा विनिर्णेतुं शक्नुम इति। निखिलानुभवेऽपि कश्चन सांवेदनिकप्रभावो[3] विद्यते, येनानुरञ्जितानि सर्वाण्येव सुद्धन्मिलनस्मृतिप्रभृतीनि खल्वनुभवाङ्गानि भवन्ति। केषां केषां प्रत्ययसम्बन्धानामुद्बोधनं तदा सम्पद्यते? इति सर्वमेव तत्सांवेदनिकप्रभावायत्तं बोद्धव्यम्। अथवा कः सांवेदनिकः प्रभावो निखिलानुभवस्य भविष्यति? इति तदानीन्तनस्मृतिविचारादिप्रत्ययसम्बन्धान् व्यपाश्रित्य वर्तते; परन्तु तत्तत्क्षणे ये ये त्वनुभवाङ्गविशेषा ध्यानैकविषयीभूता जायन्ते, ते ते दुःखात्मका

१. द्रष्टव्या—श्रीमद्भगवद्गीता, अ० २, श्लो० ३४
२. द्रष्टव्यम्—उत्तररामचरितम्, श्लो० १।१२
३. तुलनार्थम्—Feeling tone.

सुखात्मका वेति पृथक् पृथगनुभूयन्ते । सांवेदनिकः प्रभावः सामान्यः साधारणो वा भवति । सुखदुःखादिविशेषानुभवश्च गभीरतरः, तत्तत्क्षणस्थायी, स्पष्टतरश्च भवतीति बोद्धव्यम् ।

१०. संवेगस्वरूपम्

चतुर्थेऽध्यायेऽस्माभिर्मूलप्रवृत्तिस्वरूपविवेचनावसरे संवेगस्य[1] तदङ्गत्वेन वर्णनं कृतम् । संवेगे समुत्पन्ने मूलप्रवृत्तिरुदेति । नहि संवेगमन्तरा मूलप्रवृत्तिर्जायते । संवेगानुभवनं च वस्तूपलब्ध्यपेक्षं भवति । कदाचन प्रत्ययैः स्मृतिरूपैरपि संवेगाः समुत्पाद्यन्ते । संवेगो नाम 'संक्षोभः' इति । येनायं पुरुषः क्षुभ्यते; यथा क्रोधेन, रागेण, वात्सल्येन वा, स एव संक्षोभः 'संवेगः' इति व्यपदेशेन अर्वाचीने मनोविज्ञाने प्रथते, स च व्यभिचारिभावरूपः । प्राग्वर्णितमस्माभिर्यथा एकस्या मूलप्रवृत्तेः संवेगविशेषेण सह साहचर्य्यसम्बन्धो विद्यते । संवेगान् समारुह्य मूलप्रवृत्तिरूपा वेगाः प्रवर्तन्ते ।

नहि संवेदनमेव संवेगः । संवेदनं सरलतमश्चेतनव्यापारः । संवेगो वै जटिलतमो मानसव्यापारः, यस्मिन् संवेदनमपि तदङ्गत्वेनानुप्रविशति । संवेगाः संवेदनापेक्षया जटिलतरा भवन्ति । उदाहरणरूपेण भयं क्रोधो वात्सल्यं च संवेगाः । संवेगा नूनं प्रत्यात्मवेदनीया अनुभवविशेषाः । मानसप्रत्यक्षेण तेषां ज्ञानं जायते । भयं क्रोधश्च द्वावेव दुःखात्मकौ; किन्तु भयानुभवः क्रोधानुभवाद् भिद्यते । दुःखलेशे विद्यमानेऽपि समाने क्रोधस्य भयाद् विशेषो वर्तते । ततः संवेदनसंवेगौ समानार्थकाविति न वाच्यम् । संवेदनापेक्षया संवेगः प्रौढो जटिलश्च मानसानुभवो भवति ।

नहि संवेगस्य ज्ञानपक्षेऽन्तर्भावः कर्तुं शक्यत इति वाच्यम् । वस्तुस्वरूपावधारणात्मकं ज्ञानम् । नापि संवेगः कृतिरेवेति वाच्यम् । प्रयतनं नाम चैतन्यव्यापारं वयमग्रेऽनुव्याख्यास्यामः । प्रयत्ने वक्ष्यमाणे मानसव्यापारविशेषे पदार्थविशेषमुपादातुं हातुं वा प्रवृत्तिरिच्छाभिलाषो वा विद्यते; किन्तु ज्ञानप्रयत्नाभ्यामुभाभ्यां विलक्षण एव संवेगाख्यभावरूपो मानसव्यापारविशेषः, यस्मिन् समुत्पन्ने प्राणी आभ्यन्तरं कञ्चन संक्षोभमनुभवति, शरीरावयवेष्वपि कम्पनवैवर्ण्यरोमाञ्चादिकमनुभवति, हर्षशोकादिकमनुभवति, सुखदुःखादिकं संवेत्ति । इमे संवेगाः साहित्यशास्त्रेऽर्वाचीनमनोविज्ञाने च 'भावाः' इति पदेन व्यपदिश्यन्ते, तथापि काव्यशास्त्रमनोविज्ञानयोः भावस्थायिभावादिस्वरूपमादाय किञ्चित् सुसूक्ष्ममन्तरं वर्तते, तद्वयमग्रेऽनुव्याख्यास्यामः ।

११. भावादिस्वरूपविवेचनम्

संस्कृतवाङ्मये भावादिमनोविकाराणामतीव रमणीयं व्याख्यानं समुपलभ्यते । अतः स्थाने हि तद्विवेचनमग्रिमविवेचनसौकर्य्याय । विशेषतो मनोविज्ञानाभिमतं स्थायिभावादिस्वरूपं तेन विस्पष्टं भविष्यति । भावो नाम मनसो विकारः । भावा द्विविधा भवन्ति – स्थायिभावाः, व्यभिचारिभावाश्च । अनादिकालादात्मनि वासनारूपेण ये तिष्ठन्ति, ते स्थायिभावाः । प्रत्येकरसेन सहैकैकस्य स्थायिभावस्य परिणामरूपः कार्यकारणभावसम्बन्धो भवति । कारणसामग्र्यां समुपस्थिता-

---

१. तुलनार्थम्—Emotion.

यामेव रसनिष्पत्तिर्जायते। तदुक्तं भरतमुनिना नाट्यशास्त्रे—"विभावानुभावव्यभिचारिभावसंयोगाद्रसनिष्पत्तिः" इति[1]।

तत्र स्थायिभावा अष्टसंख्याका नवसंख्याका वा भवन्ति। तदुक्तं विश्वनाथेन—

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
बीभत्सोऽद्भुत इत्यष्टौ रसाः शान्तस्तथा मतः॥ इति[2]

	स्थायिभावनामानि	तदनुबन्धिरसनामानि
१.	रतिः	शृङ्गाररसः
२	हासः	हास्यरसः
३.	शोकः	करुणरसः
४.	क्रोधः	रौद्ररसः
५.	उत्साहः	वीररसः
६.	भयम्	भयानकरसः
७.	जुगुप्सा (घृणा)	बीभत्सरसः
८.	विस्मयः	अद्भुतरसः
९.	शमः	शान्तरसः

तथा हि—

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ताः शमोऽपि च॥

अत्रेदं स्मरणीयं यद्धि नवमो रसः श्रव्यकाव्य एव काव्यशास्त्रमर्मज्ञैरनुमोद्यते, न तु दृश्यकाव्येषु नाट्कादिषु। अष्टौ रसाः स्थायिभावाश्च सर्वैरेवाङ्गीक्रियन्ते। नवमरसस्य निर्वेदाख्यस्य शान्तरसस्य प्रतिपादने विप्रतिपत्तयः समुपलभ्यन्ते। निर्वेदोदाहरणम्—

अहौ वा हारे वा बलवति रिपौ वा सुहृदि वा
मणौ वा लोष्ठे वा कुसुमशयने वा दृषदि वा।
तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाः
क्वचित् पुण्यारण्ये शिव–शिव–शिवेति प्रलपतः॥[3]

अतो यत्तु वागीशाः—"अष्टाविति नाट्याभिप्रायेण शान्तस्य नाट्ये तादृक्पुष्टिविरहात्, तदुक्तम्—अष्टौ नाट्ये रसाः स्मृताः।" इति वदन्ति, तन्न विचारसहम्, "राजानकमम्मटाचार्यौ 'अष्टौ नाट्ये रसाः स्मृताः' इत्युपक्रम्य 'शान्तो नवमो रसः' इत्युपसंहृतवन्तौ" इति तद्विरोधस्य स्पष्टत्वात्।

ननु को नाम भावः? तदुक्तं वै भरतमुनिना—

यथा बीजाद् भवेद् वृक्षो वृक्षात् पुष्पं फलं यथा।
तथा मूलं रसाः सर्वे तेषु भावाः व्यवस्थिताः॥

---

१. द्रष्टव्यम्—नाट्यशास्त्रम्
२. द्रष्टव्यम्—साहित्यदर्पणः ३।१८२, पृ० २५२ (वाराणसेयसंस्करणम्)
३. द्रष्टव्यम्—वैराग्यशतकम्, श्लो० ११६

विभावेनाहृतो योऽर्थस्त्वनुभावेन गम्यते ।
वागङ्गसत्त्वाभिनयैः स भाव इति संज्ञितः ॥
वागङ्गमुखरागैश्च सत्त्वेनाभिनयेन च ।
कवेरन्तर्गतं भावं भावयन् भाव उच्यते ॥ इति[1] ।

भावयति सामाजिकमनोवृत्तीः सुखदुःखादिरूपेण परिणमयतीति व्युत्पत्तिलभ्यो भावः। तदुक्तं विश्वनाथकविराजेन—

"सुखदुःखादिभिर्भावैर्भावस्तद्भावभावनम् ॥" इति[2] ।

ननु किं नाम विभावानुभावाविति ? 'विभावः' इति स्थायिभावस्य कारणम् । 'अनुभावः' इति च स्थायिभावस्य कार्यम् । नहि तावत् स्थायिभावाः रसानुभवितुश्चेतसि पूर्णतोऽभिव्यक्तिं लभन्ते, यावन्न तेषां कार्यकारणसहकारिणां मधुरं सम्मिलनमभिनिर्वर्तेत । द्विविधं हि खलु रत्यादिस्थायिभावस्य कारणं भवति—आलम्बनकारणम्, उद्दीपनकारणञ्चेति । आलम्बनं तु स्थायिभावस्याधारभूतं कारणम्, तद्विना नहि स्थायिभावोन्मेषो जायते, यथा—रतिस्थायिभावस्यालम्बनं सुन्दरी स्त्री भवति । उद्दीपनमपरं कारणं रत्यादिस्थायिभावमुद्दीप्तं करोति । यथा हि हिमकरोपवनसुरभितपवनादिकम् । यथा ह्युद्दीपनकारणै रतिस्थायिभावैरुद्दीप्त उद्बोधितो वा जायते, तदा केचन स्वेदस्तम्भरोमाञ्चस्वरभङ्गादयः कायिकविकाराः, मोहासूयाचिन्तास्मृतिव्रीडादयो मानसिकाश्च विकाराः प्राकट्यं लभन्ते। तत्रालम्बनं स्थायिभावकारणम् । तदेव 'विभाव'पदेन व्यपदिश्यते । उद्दीपनं 'विभावः' इत्युच्यते, तच्च बाह्यं कारणं भवति । सहकारीणि स्थायिभावकारणानि तान्येव भवितुमर्हन्ति यान्यन्तःकरणवृत्तिरूपाणि, यथा—निर्वेदग्लानिशङ्काख्या अन्तःकरणधर्माः । एतदेवान्तरमुद्दीपनसहकारिकारणयोर्भवतीति विभाव्यम् । तान्येव व्यभिचारिकारणानीति निगद्यन्ते । एवम्प्रकारेण कार्यकारणसहकारिकारणसामग्रीसमुपस्थितौ स्थायिभावोऽपि तत्तद्रसरूपेण तथैव परिणमते, यथा—दुग्धं कारणजाते समुपस्थिते दधिरूपेण परिणमते । स्थायिभावस्य रसरूपेण परिणतौ विभावानुभावव्यभिचारिभावानां संयोग एव कारणसामग्री ।

स च विभावानुभावव्यभिचारिभावसंयोगो रसगङ्गाधरकारैरेकादशप्रकारविशेषोऽनुव्याख्यातः । मम्मटाचार्य्यैस्तु चतुर्धा । अभिनवगुप्तपादमम्मटाचार्य्यास्तु व्यङ्ग्यव्यञ्जकभावरूप एव तत्संयोग इत्यभिमन्यन्ते । अर्थाद् विभावादीनां परस्परं सम्बन्ध एव रसोन्मेषाभिव्यञ्जक इति । अत्र 'रसो वै व्यङ्ग्यः' इत्यवसेयम् । तदिदमभिनवगुप्तपादमम्मटाचार्याणां मतम् 'अभिव्यञ्जनावादः' इति व्यपदेशेन संस्कृतसाहित्यशास्त्रे प्रथते । आलङ्कारिकैर्वैयाकरणैश्चाभिव्यञ्जनावादोऽयमाश्रीयते । अत्र विभावादयो व्यञ्जका अवगन्तव्याः । भट्टलोल्लटाचार्यास्तेषामनुयायिनश्चोत्पत्तिवादमङ्गीकुर्वन्ति । तेषां मते रसोत्पत्तिर्जन्यजनकभावरूपसंयोगेनाभिनिष्पद्यते । विभावादयो जनकाः, रसश्च जन्य इत्यवधार्यम् । मीमांसकैरपीदं मतमनुमोद्यते । श्रीशङ्कुकाचार्य्यास्तेषामनुयायिनश्च भरतोक्तसूत्रान्तर्गतं रसनिष्पत्तिरिति पदं रसानुमितिपरतया व्याचक्षते । अत्र संयोगो गम्यगमकभावरूपः । सोऽयमनुमितिवादो नैयायिकैरपि समर्थितः । भट्टनायका-

---

१. द्रष्टव्यम्—नाट्यशास्त्रम्
२. द्रष्टव्यम्—साहित्यदर्पणः, पृ० २१४

चार्य्यास्तु संयोगपदस्य भोज्यभोजकभावपरमनुव्याख्यानं स्वीकृत्य भुक्तिवादाख्यं मतं प्रतिपादयन्ति। सोऽयं वादः सांख्याचार्यैरप्यनुमोद्यते। एतेषु सर्वेषु वादेष्वभिव्यञ्जनावाद एव साधीयान् इत्यस्माकं मतम्।

तत्र के के सञ्चारिभावा व्यभिचारिभावा इति यावद् भवन्ति? तदुक्तं वै विश्वनाथकविराजेन[1]—

निर्वेदावेगदैन्यश्रममदजडता औग्र्यमोहौ विबोधः
स्वप्नापस्मारगर्वा मरणमलसतामर्षनिद्रावहित्थाः।
औत्सुक्योन्मादशङ्काः स्मृतिमतिसहिता व्याधिसंत्रासलज्जा
हर्षासूयाविषादाः सधृतिचपलता ग्लानिचिन्तावितर्काः॥ इति।

उपर्युक्तप्रकारेण त्रयस्त्रिंशत्सङ्ख्याका हि खलु सञ्चारिभावाः। स्थायिनि भावे कदाचिदुन्मग्ना जलबुद्बुदवत् झटिति प्रतीयमानत्वेन प्रादुर्भूताः, निर्मग्ना जलबुद्बुदवच्च कदाचनाप्रतीयमाना भावा व्यभिचारिणः कथ्यन्त इति शेषः। अन्यच्च, विभावानुभावापेक्षया विशेषेण रसपुष्टिजनकभावत्वं व्यभिचारित्वमिति लक्षणं फलितम्। तदुक्तं विश्वनाथेन—

विशेषादाभिमुख्येन चरणाद् व्यभिचारिणः।
स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंशच्च तद्भिदा॥ इति[2]।

भावास्तर्हि द्विविधा भवन्ति—स्थायिभावाः, व्यभिचारिभावाश्चेति।

ननु कथं रसाभिव्यक्तिर्निष्पद्यते? अत्रोच्यते रसगङ्गाधरकारैः—"भग्नावरणचिद्विशिष्टरत्यादिस्थायिभावो रसः।" नहि विभावादिसंयोगस्तावत् स्थायिभावेन सह रसोन्मेषाय कल्पते, यावन्नाविद्यावरणभङ्गो जायेत। अज्ञानावृतं यत् शुद्धं चैतन्यं विभावानुभावादिद्वारा काव्यभावनमज्ञानावरणभङ्गं सम्पाद्य स्वयं प्रकाशते, रत्यादिकांश्च रसभावेन प्रकाशितान् करोति। अत एवोच्यते आलङ्कारिकैः—"साक्षिभास्यो वै रसः।" रत्यादिप्रकाश एव रसः।

१२. जेम्सलैङ्गमतम्

भावसंवेगौ ह्यर्वाचीनमनोविज्ञाने पर्यायवाचकौ शब्दाविति वर्णितपूर्वम्। सम्प्रति वयं भावाभिव्यक्तिस्वरूपमधिकृत्य जेम्सलैङ्गमतमनुव्याख्यास्यामः। संवेगनिरूपकं विश्वविश्रुतं मतमिदममेरिकनदेशीयमनोवैज्ञानिकप्रवरैर्जेम्समहोदयैः डेनमार्कदेशीयशारीरविज्ञानवेत्तृभिर्लैङ्गमहाशयैश्च स्वतन्त्रतया प्रतिपादितत्वाद् जेम्सलैङ्गमतमिति समाख्यां भजते। तयोर्मूलभूतौ निबन्धौ डनलपनाइटमहोदयानां 'संवेगाः' इत्याख्यग्रन्थे[3] समुपलभ्येते। सामान्यतो जना मन्यन्ते यद्वयं प्रथमं संवेगजनकं वस्तु पश्यामः, तदनन्तरं तद्विषये कञ्चिद् भावविशेषं संवेगविशेषमिति यावदनुभवामः, तदनन्तरं तत्प्रतिक्रियारूपेण व्यवहरामः। यथा—वृकं वने दृष्ट्वा वयं भयमनुभवामः, ततश्च पलायनरूपां प्रतिक्रियामाचरामः। जेम्सलैङ्गमहोदयौ त्विमं क्रमं परिवर्तेते। तन्मते वृकदर्शनानन्तरं पलायनरूपा प्रतिक्रिया जायते, ततश्चोदेति मानसिकाङ्गिकप्रतिक्रियारूपसंक्षोभात्मको भयसंज्ञको भावः। जेम्समते, "वयं भयान्विताः, यतो हि वयं पलायनं कुर्मः, वयं क्रुद्धाः, यतो हि वयं

१. द्रष्टव्यः—साहित्यदर्पणः ३।१४१
२. द्रष्टव्यः— ,, ,, ३।१४०
३. द्रष्टव्यम्—Knight Dunlop, "Emotions." (William & wilkins, 1922)

ताडयामः ।" अत्र 'संवेग' इति शारीरिकमानसिकप्रतिक्रियाणां ज्ञानाभिन्नम्। प्राध्यापकविलियमजेम्समहोदयः स्वकीयं मतमित्थं व्याचष्टे—"अस्माकं मतानुसारं बाह्योत्तेजकं वस्तु दृष्ट्वा शारीरिकपरिवर्तनान्यभिनिर्वर्तन्ते, तेषाञ्च परिवर्तनानां यथाभूतानां संवेदनमेव संवेगः। सामान्यतो व्यावहारिकबुद्धयो ब्रुवन्ति—सम्पत्तौ विनष्टायां सत्यां शोकविद्धा वयं भवामः, अपि च, क्रन्दामः; ऋक्षे समुपस्थिते वयं भीत्वा धावामः, प्रतिद्वन्द्विनावमानिता वयं क्रुद्धा भवामः, अपि च, ताडयामः। नूनमधिकं बुद्धिसङ्गतं व्याख्यानमिदं भवितुमर्हति यद्वयं क्रन्दनात् शोकाभिभूता भवामः, ताडनाद्धि वयं क्रुद्धाः, प्रकम्पनाद् वयं भीता भवामः। नेदं वाच्यं यद्वयं शोकात् क्रन्दामः, क्रोधात् ताडयामः, भयाद् वेपथुमनुभवामः। प्रत्यक्षानन्तरं शारीरिकपरिवर्तनान्यन्तरा, प्रत्यक्षं नूनं विशुद्धं ज्ञानरूपं वर्णहीनं भावोष्मविनिर्मुक्तं चावतिष्ठते" इति[1]।

जेम्समहोदयैर्यैर्हेतुभिः स्वपक्षस्थापनं साधितम्, तान् वयमिदानीमनुव्याख्यास्यामः[2]। यदि चेत् संवेगविशेषस्य सकलशारीरिकाङ्गिकविचेष्टाविरहितं रूपमुपलब्धं भवेत्तर्हि तन्नूनं भावरूपं संवेगात्मकं वा न भविष्यति, अपि तु निष्पन्दबौद्धिकनिर्णयमात्रमेव। उदाहरणतो यदि मृगेन्द्रे समुपस्थिते मदीया मुखाकृतिर्विवर्णतां नापद्यते, नापि च मम हृद्गतिरेव वर्धते, भयाद् रोमाञ्चितेन सता मया पलायनमपि नाश्रीयते, तर्हि सिंहदर्शनेन कोऽपि भयसंवेगरूपो भावविकारो नोत्पादितः। पारिशेष्यात् 'सिंहोऽस्ति' इति केवलं ज्ञानात्मकं वाक्यं सिद्ध्यति, न त्विदं भयात्मकं भावरूपमभिव्यनक्ति। सुतरां तर्हि वैवर्ण्यहृद्गतिवर्धनरोमाञ्चमुखपरिशोषपलायनादिशारीरिकाङ्गिकविकारजातेनैव भवरूपसंवेगानुभूतिर्जायते। एतेभ्यो विभावाख्यशारीरिकविकारेभ्य ऋते भयरूपमपि

---

१. द्रष्टव्यम्—W. James; A Text-book of Psychology, (PP. 375–76)

"My theory is that the bodily changes follow directly the perception of the exiting fact and that our feeling of the same changes as they occur is the emotion. Common sense says, we lose our fortune, are sorry and weep; we meet a bear, are frightened and run; we are insulted by a rival, are angry and strike. The more rational statemant is that we feel sorry becouse we cry, angry becouse we strike, afraid because we tremble, and not that we cry, strike or tremble, because we are sorry, angry or fearful as the case may be. Without the bodily states following on the perception, the latter would be purely cognition in form, pale, colourless, destitute of emotional warmth."

२. द्रष्टव्यम्—William James, "principles of psychology", vol. II, pp. 449–467 (Mc. millan & Co.)

नोपलभ्यते। अतो जेम्समहोदयैर्निणीयते यद्धि सिंहदर्शनं विजने कान्तारे प्रथमं शारीरिकाङ्गिकविचेष्टा जनयति, ततश्च जायते भयसंवेगः, किं वा ता एव 'भयसंवेगः' इति व्यपदिश्यन्ते।

अन्यच्च, जेम्समहोदया मन्यन्ते यद्धि कस्यचिद् भावविशेषस्य शारीरिकाङ्गिकविकाराणां कृत्रिमोत्पादनेन वयं तद्भावभाविता भवितुमर्हामः। उत्तेजकपरिस्थितिं विनापि केवलं शारीरिकविकारजातस्य कृत्रिमोत्पादनेन संवेगविशेषानुभूतिर्जायते। चलचित्रतारिका अभिनेतारश्च क्रोधशोकमोहोपयुक्तविभावाभिव्यञ्जनेन तत्तद्भावभाविताः क्रोधशोकमोहादिसंवेगानुभवं कुर्वन्ति। अतः शारीरिकाङ्गिकविकारमात्ररूपाः संवेगा इति तेषां तात्पर्यम्।

अन्यच्च, मद्यादिकानुसेवनेन हर्षोत्साहवर्धनं जायते। अतः शारीरिकविक्रियाः संवेगमूलमिति सिद्धम्।

किञ्च, शारीरिकविकारजन्याः केचन भावविशेषा भवन्ति। ते यथा—यकृद्विकारजातेन वैवर्ण्यौदासीन्यक्रोधित्वादिभावविशेषाः सम्भवन्ति। नाडीजन्यविकारैर्भयनैराश्यादिभावाः समुत्पद्यन्ते। विषयविहीनेषु संवेगेष्वसामान्यविकाररूपेषु शारीरिकरोगादिप्रभावः सँल्लक्ष्यते। उन्मादग्रस्तानां रोगिणां नूनं विषयविहीनाः संवेगा दृष्टिगोचरा भवन्ति। तन्मूलं शारीरिकविकाराः। अतः शारीरिकविकारमूलाः क्रोधरागादिसंवेगा इति जेम्समहोदयानामभिसन्धिः।

अस्ति हि लैङ्गमहोदयानां जेम्समहोदयेभ्य एको विशेषः। जेम्समहोदयानां मते मस्तुलुङ्गीयशारीरिकविक्रियाणां प्राधान्यं वर्तते, किंतु लैङ्गमहोदयानां मते संवेगे रक्तवाहिसंस्थानविक्रियाणामेव प्राधान्यम्। विविधशरीरावयवेषु सहजक्रियाजन्या रक्ताधिक्यह्रासरूपा विकाराः, तत्समुद्भूतानि च विविधशरीराङ्गानां परिवर्तनानि भवन्ति। एतद्रक्तसंस्थानशरीरावयवचेष्टाव्यतिरिक्तः कोऽपि संवेगाख्यो मानसिकविकारो नास्ति। वस्तुप्रत्यक्षानन्तरं किमपि सुखदुःखादिसंवेदनं संवेगस्वरूपनिर्धारणेनानुप्रविशति, अतो लैङ्गमहोदयमतानुसारं भावो नाम संवेदनांशविरहितविविधशरीरावयवविचेष्टानां पेशीसमुद्भूतालोचनज्ञानानाञ्च पुञ्जीभावः। तेनोक्तं हि खलु "अस्माकं सुखदुःखहर्षशोकादिनिखिलमानसिकभावात्मकानुभवेभ्यो रक्तचेष्टावाहिसंस्थानमेव धन्यवादान् अर्हति" इति[1]।

१२. जेम्सलैङ्गमतसमालोचनम्

नैतन्मतं समीचीनम्। चित्रतारिकाणां साक्ष्यं द्विविधमेवोपलभ्यते। केचन अभिनेतारोऽनुमोदन्ते यत्तेऽभिनीयमानभावविशेषमनुभवन्ति। अन्ये च नैतन्मतं स्वीकुर्वन्ति। तन्मते भावविशेषमभिनयन्तोऽपि ते नहि तद्भावभाविता जायन्ते, नहि तद्भावविशेषानुभवं कुर्वन्ति। अतो जेम्समहोदयानां द्वितीया युक्तिरनवद्येति न वाच्यम्, सावकाशत्वात्।

प्रथमो हेतुरपि जेम्समहोदयानां परीक्षकैर्न समादरेण स्वीक्रियते। शारीरिकाङ्गिकविकारान् विहाय संवेगरूपं कल्पनापथं नैवावतरतीति तु निरवद्यम्। यदि हि खलु बाष्पनिरोधो भवेत्, नाडीमण्डले रक्तप्रवाहह्रासो न जायेत, हृदयस्फुटनाभावो देहबन्धस्रंसनाभावश्च भवेत्तर्हि शोकसंवेगोऽपि नोन्नेतुं शक्यते। यथा हि—

१. तुलनार्थम्—"It is the vaso-motor system that we have to thank for the whole emotional aspect of our mental life, for our joys and sorrows, our happiness and misery."

हा ! हा ! देवि ! स्फुटति हृदयं स्रंसते देहबन्धः
शून्यं मन्ये जगदविरतज्वालमन्तर्ज्वलामि ।
सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा
विष्वङ्मोहः स्थगयति कथं मन्दभाग्यः करोमि[1] ॥ इति ।

अत्रैतस्मिन्नुदाहरणे शारीरिकाङ्गिकप्रतिक्रियाजातं श्रीरामचन्द्रस्य शोकाभिव्यञ्जनाय दुर्निवारम् ; किन्तु नैतावता प्राध्यापकजेम्समतस्य याथातथ्यमवधारणीयम् । जेम्समते शारीरिकाङ्गिकविक्रियाजातमेव संवेगः, अथवा शारीरिकविक्रियाणां ज्ञानमेव संवेगानुभूतिरिति, तत्तु नेष्टम् । नापि जेम्समहोदयोक्तहेतुना तत् साधयितुं शक्यते । मदीया शोकानुभूतिर्यदा जायते, तदा शोकानुभवनं बाष्पमुञ्चनश्वासावरोधदेहबन्धस्रंसनादिशारीरिकविक्रियाणां ज्ञानमात्रमिति न वक्तुं शक्यते । शोकानुभूतिर्हि विशिष्टो मानसिको व्यापारः । नहि शोकमोहवात्सल्यक्रोधद्वेषेर्ष्यादिभावानां ज्ञानाख्ये मानसिके व्यापारेऽन्तर्भावः कर्तुं शक्यते । क्रोधे या याः शारीरिकविचेष्टा जायन्ते, तासां ज्ञानमेव संवेगो नास्ति । तासां विक्रियाणां समकालमेव ज्ञानविलक्षणः संक्षुब्धमनसो योऽनुभवः स एव 'संवेगः' इति, 'भावः' इति वा व्यपदिश्यते । यदा तासां शारीरिकविचेष्टानामनुव्यवसायो जायते, तदा संवेगसङ्क्षोभपरिहाणिर्दृश्यते । एतावतापि संवेगस्वरूपवैलक्षण्यमुन्नेयं भवति । अन्यच्च, शारीरिकविक्रियाः संवेगसहचारिण्यो विक्रियाः । संवेगस्तु संक्षोभात्मको विशिष्टो मानसिकोऽनुभवः । प्रायः संवेगस्य चरमां कोटिं व्यतीत्य तदनुव्यवसायो जायते ।

किञ्च, जेम्समहोदयानामियं प्रतिज्ञाऽपि यद्धि शारीरिकविक्रियाः प्रत्यक्षमूलाः, शारीरिकविक्रियानन्तरञ्च संवेगानुभूतिरुदेतीत्यपि नैव स्थाने । नहि जेम्समहोदयेन कोऽपि निर्णायकोऽनन्यथासिद्धो हेतुः प्रदत्तः, येनेदं साधयितुं शक्येत यत् शारीरिकविचेष्टानन्तरं संवेगोत्पत्तिर्जायत इति । अतो लोकविश्रुतं मतं यद्धि प्रत्यक्षानन्तरं संवेगानुभूतिः, ततश्च विविधाः शारीरिकविक्रिया अभिव्यक्तिं लभन्त इति नासङ्गतं प्रतीयते । बाढम्, संवेगसहचारिविविधविकाराणां शरीरावयवानां सत्त्वं संवेगारम्भादेव स्फुटमस्फुटं वा विद्यत एव । प्राच्यसाहित्यकोविदानां मतेऽपि शारीरिकाङ्गिकविकारा भावकार्यत्वेनानुव्याख्याताः । संवेगानुभवप्रकर्षह्रासव्यपेक्षाणि हि दृश्यन्ते विभावपरिवर्तनानि । शारीरिकविचेष्टानां मानसिकानुभवेन संवेगाख्येन साकं भूयिष्ठमितरेतरप्रभावोत्पादकत्वं हि खलु वर्तते, अनुभूयते चापि; किन्तु नैतावता कथमपि साधयितुं शक्यते यत् शारीरिकाङ्गिकविकारा मानसिकेभावविशेषानुभूतकारणभूता इति । किं वा, मानसिकानुभूतिः संवेगाख्या गौणत्वं भजत इति ।

किञ्च, शारीरिकविचेष्टानुभवसहकृता संवेगानुभूतिश्चलच्चित्रतारिकाभिनेत्रनुभवबत्र-लेपायिता इति जेम्सप्रदत्तं विनिगमकमपि नातिचिरेण फल्गुतां भजते; यदीदं स्मरणीयं भवेद् यद्धि प्रयत्नसाध्या बुद्धिविचेष्टाव्यापाराः, न तु स्वतन्त्रपरिस्वतन्त्रविकीर्णान्तःस्रावग्रन्थिजन्याः क्रियाः प्रयत्नजातेन मस्तुलुङ्गायत्तेन साध्याः । संवेगे स्वतन्त्रपरिस्वतन्त्रनाडीमण्डलान्तर्गतव्यापाराणामेव प्राधान्यं दृश्यते । अतो मनःसङ्क्षोभरूपा भावानुभूतिर्नहि शारीरिकविचेष्टानुकरणमात्रेण वर्णयितुं पारयितुं वा शक्यते । संवेगानुभवस्तु मान-

1. द्रष्टव्यम्—उत्तररामचरितम्, ३।३८

सिकानुभूतिविशेषः, नहि तस्य कस्मिंश्चिदप्यन्यस्मिन् मानसिकशारीरिकानुभवेऽन्तर्भावः कर्तुं शक्यते ।

प्राध्यापकप्रवराणां टिचनरमहोदयानां जेम्समतसमालोचनमतिरमणीयत्वात् स्फुटत्वाच्च अत्रोद्धृतं करिष्यते । तद्यथा—"शरीरावयवजन्यालोचनज्ञानानि नूनमन्ततो गत्वा शारीरिकविचेष्टाजातमात्रम् । हृद्गतिवर्धनं नहि स्वतो भयसंवेगानुभूतिः । मुखरक्तिमवर्णत्वं नहि लज्जां सूचयति । सहायविधुरं निरीक्षणं यत् प्रकटीकरोति तत्तु संवेगशारीरिकविचेष्टयोर्न गुणे, नाऽपि गभीरत्वे, नाप्यभिव्यक्तिकाले, न चापि समये नियतं साहचर्यं कथमपि भवति" इति[1] ।

यदुक्तं जेम्समहोदयैर्निर्विषयान् संवेगानुभवान् प्रति, तदपि साम्प्रतं नास्ति । उन्मादपीडितानां संवेगानुभवा नहि निर्विषया भवन्ति । तत्तत्संवेगविषयाणां विवेचनं मनोविश्लेषणविशारदैर्यथा सम्पाद्यते, तथा वयमग्रेऽनुव्याख्यास्यामः । नहि तेषां संवेगानुभवाः शारीरिकरोगमात्रजाः । तेषां मूलं मानसिकद्वन्द्वे सङ्घर्षे वाऽन्वेष्टुमर्हम् । निखिलमेतत् खल्वद्यतने मनोविज्ञानतन्त्रे फ्रायडप्रभृतिभिर्मनोविश्लेषणविचक्षणैरत्यर्थं साफल्येनाविष्कृतम् । अन्यच्च, मद्यादिसेवनं परिस्थितिरूपत्वेनानुभावकत्वं भजते । तदपि नहि संवेगविशेषं जनयति, अपि तु संवेगविशेषानुकूलावसरं प्रदत्ते, तदनुकूलं चित्तवैशारद्यं तत्तदङ्गशैथिल्यञ्चाभिनिर्वर्तयतीति । अत एव जेम्सलैङ्गमतं समीचीनं नास्तीति निःसन्दिग्धं प्रतिपादयितुं शक्यते ।

१४. भाव-स्थायिभावयोर्लक्षणम्

भाव-स्थायिभावलक्षणं प्राचीनसाहित्यशास्त्रार्वाचीनमनोविज्ञानोपबृंहितमत्र वयं विवृणुमः । प्राचीनैस्त्रयस्त्रिंशद्व्यभिचारिणः, अष्टौ स्थायिनः, अष्टौ सात्त्विकाश्चेत्येकोनपञ्चाशद् भावाः प्रतिपादिताः । तत्र निर्वेदादयो व्यभिचारिणो भावास्त्रयस्त्रिंशद् निम्नलिखिता भवन्ति—

निर्वेदग्लानिशङ्काश्रमधृतिजडताहर्षदैन्यौग्र्यचिन्ता-
त्रासेर्ष्यामर्षगर्वाः स्मृतिमरणमदाः सुप्तनिद्राविबोधाः ।
व्रीडापस्मारमोहाः सुमतिरलसतावेगतर्कावहित्थाः
व्याध्युन्मादौ विषादोत्सुकचपलयुतास्त्रिंशदेते त्रयश्च ॥ इति[2] ।

---

१. द्रष्टव्यम्—Titchner, "A Text-book of Psychology," (PP. 482)
"A group of organic sensations is, after all, a group of organic sensations; Palpitation of heart is not, in itself, the emotion of dread, and blushing is not, in itself, the emotion of shame. So far as unaided observation takes us, there is no necessary correspordence between emotion and orgainc reaction, either in intensity or quality, either in time of appearance or in duration".

२. द्रष्टव्यम्—धनञ्जयविरचितं दशरूपकम् ४।८

अत्र 'अवहित्थम्' लज्जाद्यैर्विक्रियागुप्ताववहित्थाङ्गविक्रिया । यथा—

एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वती ॥ इति ।

अथाष्टौ स्थायिभावाः—

विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः ।
आत्मभावं नयत्यन्यान् स स्थायी लवणाकरः ॥
रत्युत्साहजुगुप्साः क्रोधो हासः स्मयो भयं शोकः ।
शममपि केचित् प्राहुः पुष्टिर्नाट्येषु नैतस्य ॥ इति[1] ।

अथाष्टौ सात्त्विका भावाः—

स्तम्भप्रलयरोमाञ्चाः स्वेदो वैवर्ण्यवेपथू ॥
अश्रु वैस्वर्यमित्यष्टौ स्तम्भोऽस्मिन्निष्क्रियाङ्गता ।
प्रलयो नष्टसंज्ञत्वं शेषाः सुव्यक्तलक्षणाः ॥ इति[2] ।

एते सात्त्विका भावा एव विभावाः । नहि ते 'संवेगाः' इत्यवसेयम् । व्यभिचारिभावेष्वपि उन्मादापस्मारस्मृतितर्कसुप्तनिद्राशङ्काप्रभृतयो ये मनोव्यापाराः परिगणिताः, ते काव्यशास्त्रदृष्ट्या सिद्धान्तिता भवन्तु नाम; किन्तु मनोविज्ञानदृष्ट्या तेषां मनोव्यापाराणां स्वतः सिद्धत्वादन्यत्र वर्णितत्वाच्चास्मिन्नेव ग्रन्थे नैव संवेगेष्वन्तर्भावः कर्तुं शक्यते । अपस्मारो यथा मनसोऽसामान्य-मनोऽवस्थाविशेषः, उन्मादोऽप्यसामान्यमनोऽवस्थाविशेषः । नहि स्मृतिः कथमपि 'संवेगः' इति 'भावः' इति वा वक्तुं शक्यते । अतः काव्यशास्त्रविदां भावसूची नह्यर्वाचीनमनोविज्ञानाभिमत-संवेगानुव्याख्यानाय सर्वांशतो रमणीया । अतो भावाश्चतुर्दश इत्यवसेयम् । चतुर्दशमूलप्रवृत्तिभिः सह वर्तमानाः संवेगा एव मौलिका भावाः संवेगा अवबोद्धव्याः । ते च बुभुक्षाभयक्रोधाश्चर्यरचना-त्मकानन्दलोभघृणाकरुणावात्सल्यवासनाहङ्कारैकाकिभावात्मदैन्यहर्षाः । अन्ये भावास्तयोः संभेदमादायाभिनिर्वर्तन्ते । एते चतुर्दश निसर्गजाः ।

स्थायिभावा अपि अर्वाचीनमनोवैज्ञानिकैरन्यप्रकारकानुव्याख्यानं लभन्ते । प्राचीनैः स्थायिभावा अष्टाविति नवेति वान्वमन्यत । किन्त्वर्वाचीनैः स्थायिभावानां[3] नियतसङ्ख्याकत्वं नाङ्गीक्रियते । प्राचीनानां मते स्थायिभावा अनादिवासनाजन्या निसर्गजाः; किन्त्वर्वाचीनानां मनोविज्ञानपारदृश्वनां मते स्थायिभावा निसर्गजा अनादिवासनानैरन्तर्यसमुत्थिता इति नाभिमन्यते । केवलं मूलप्रवृत्तिसाहचर्यान्विता नियताः संवेगा एव निसर्गजा भावा इति तेषां मतम्; किन्तु स्थायिभावा ऐहिकसंस्कारोपचयसमुद्भूता भावविशेषाः, ते तु अर्जिताः । मनोवैज्ञानिकवरेण्यैः शैण्डमहाभागैः स्थायिभावस्वरूपं भावलक्षणाद्भिन्नं सर्वोपरि विवृतम् । यदा भावविशेषः कश्चन वस्तुव्यक्तिवादविचारभावादर्शविशेषमभि उपनिबद्धो जायते, हेतुहेतु-मद्भावेन साहचर्यस्थायित्वं तेन साकमुपैति, तदा स 'स्थायिभावः' इति व्यपदिश्यते । अभ्यासनैरन्त-र्येण भावनोपचयाद्विचारोपोद्बलितत्वाच्च भाव एवानुभवप्रकर्षे सति स्थायिभावत्वमापद्यते ।

१. द्रष्टव्यम्—दशरूपकम् ४।३४-३५
२. द्रष्टव्यम्—दशरूपकम् ४।५-६
३. तुलनार्थम्—Sentiments.

एवम्प्रकारेण भावा एव स्थायिभावरूपेण कालान्तरे परिणमन्ते। अस्ति हि प्रेमरूपसंवेगविशेषः। स एवानुभवनैरन्तर्येण गुणानुचिन्तनेन मैत्रीभावत्वमापद्यते। मैत्रीभावः स्थायिभावः। नहि एषोऽर्वाचीनमनोवैज्ञानिकानां मतेऽनादिवासनासमुत्थितः, अपि तु भावनोपचयजन्यः। संवेगापेक्षातः स्थायिभावा नूनं चिरकालवर्तिनः। स्थायिभावेषु समुपेतेषु तत्तत्परिस्थित्यां समुपस्थितायां तत्तत्संवेगानुभूतिरञ्जसैव जायते। स्थायिभावेषु तत्तत्पदार्थव्यक्तिविचारविशेषविषयेऽस्माकं मूलप्रवृत्तीनां संव्यूहनं सञ्जायते। तत्संव्यूहनं सङ्घटनं वा भावनोपचयेऽसाधारणं भावावेगमभिव्यञ्जयति। एवमेव सामान्यक्रोधरूपसंवेगो यदा अभिपुरुषविशेषं निबद्धो जायते, तदाऽस्फुटेऽपि तस्याभिव्यक्तिरवसरविशेषे समुपस्थिते तत्पुरुषविशेषस्योपरि विद्वेषमुद्गमति। अस्माकं व्यवसायसंस्थाजातिधर्मवर्गसमुदायविशेषमभिमुखीकृत्यापि स्थायिभावा अभिनिर्वर्तन्ते। साम्यवादिनां वर्गसङ्घर्षविषयः स्थायिभावः सुविदित एव परीक्षावताम्। एवमेव श्रमिकसङ्घटनानां सदस्येष्वपि स्थायिभावो जन्यते। स्थायिभावविशेषे निष्पन्ने विचारविवेकद्वारं पिहितं जायते, साग्रहं सवेगं साभिनिवेशं चास्याभिव्यक्तिर्जायते, अभ्यासनैरन्तर्याच्चैष विरोधिमूलप्रवृत्तिमार्गं रुणद्धि।

१५. भावसंकेतयोः सम्बन्धः

विलियमजेम्समहोदयमते निराकृतेऽपि तन्निर्दिष्टो भावानां शारीरिकविचेष्टाभिः सह भूयिष्ठः सम्बन्धो नूनमव्याहतः। यदि शारीरिकावयवपरिचालनेन अभिव्यञ्जनं समुपयुक्तं भवेन्नूनं भावाभिनिवेशोऽप्यायाति। अथवा, भावविशेषाभिमुखी प्रवणता सँल्लक्ष्यते। अर्वाचीनमनोवैज्ञानिकानां मते संकेतप्रभावादेषा भावविशेषाभिमुखी प्रवणताभिनिर्वर्तते। संकेतनाम्नी सामान्यप्रवृत्तिस्तु चतुर्थेऽध्याये सपरिकरं वर्णितपूर्वा। संवेगस्य तत्सम्बन्धिशारीरिकविचेष्टात्मकाभिव्यक्त्या सहैतादृशो घनिष्ठः साहचर्य्यसम्बन्धो हेतुहेतुमद्भावरूपसम्बन्धो वा वर्तते, यद्धि शारीरिकविचेष्टानां भावविशेषोपयुक्तानामभिनयेन, समाचरणेनोत्पादनेनेति यावत्, संवेगाख्यमानसिकानुभूतिप्रवणतां संकेतोऽनायासेन जनयति। अट्टहासप्रीतिभोजशुभ्रवस्त्रसङ्गीतगृहद्वारप्ररोचनताम्बूलधारणोन्मुक्तवार्तालापादिकेन हर्षरूपभावानुभवो जायते, संकेतप्रभावात्; किन्तु स्मरणीयमत्र यद्धि मनसि विरोधिभावस्थित्या संकेतप्रभावफल्गुता जायते। यदि कस्यचित्पुरुषस्य पुत्रो दिवङ्गतो जायेत, नहि तस्मै सङ्गीताट्टहासादिकं रोचते, हर्षोत्साहादिसंवेगानुभूतेस्तु कुतोऽवकाशः! नहि प्रोषितपतिकोद्विग्ना विरहिणी शकुन्तला दुर्वाससो महर्षेरुच्चैर्भाषणं श्रोतुं प्राभवत्। प्रबलतरविरोधभावः संकेतमार्गं रुणद्धि।

१६. भावविषये गौतममतम्

अस्माभिरत्र भावविषयमधिकृत्य गौतमवात्स्यायनप्रभृत्याचार्य्यप्रवराणां मतोपन्यासः क्रियते। रागद्वेषमोहा इति दोषा भवन्ति। "प्रवर्तनालक्षणा दोषाः"[1] इति सूत्रेण गौतममुनिर्दोषाणां सप्रवृत्तिहेतुत्वं प्रादर्शयत्। प्रत्यात्मवेदनीया इमे दोषा भवन्ति। आचार्य्यप्रवरो वात्स्यायनः रागादीनित्थं व्याचष्टे—"तेषां दोषाणां त्रयो राशयः, त्रयः पक्षाः। रागपक्षः—कामः, मत्सरः, स्पृहा, तृष्णा, लोभ इति। द्वेषपक्षः—क्रोधः, ईर्ष्या, असूया, द्रोहः, अमर्ष इति। मोहपक्षः—मिथ्याज्ञानम्, विचिकित्सा; मानः, प्रमाद इति। आसक्तिलक्षणो रागः,

१. न्यायसूत्रम्—४।१।३

अमर्षलक्षणो द्वेषः, मिथ्याप्रतिपत्तिलक्षणो मोह इत्येतत् प्रत्यात्मवेदनीयं सर्वशरीरिणाम्" इति[1]। अत्रोद्योतकराचार्य्योऽप्येवं विशिनष्टि—"तथा दोषाः तत्त्रैराश्यम्; रागद्वेषमोहार्थान्तर्भावात्" इति[2]। एवम्प्रकारेण त्रिष्वेव दोषेषु गौतमवात्स्यायनोद्योतकरप्रभृत्याचार्य्याणां मते सर्वेषां दोषाणामन्तर्भावः करणीयः। तत्र स्त्रीगताभिलाषः 'कामः'। अक्षीयमाणवस्त्वपरित्यागेच्छा 'मत्सरः'। अस्वपरस्वादानेच्छा 'स्पृहा'। पुनर्भवप्रतिसन्धानहेतुभूता 'तृष्णा'। प्रमाणविरुद्धपरद्रव्यापहारेच्छा 'लोभः'। 'क्रोधः' इति स्फुटम्। साधारणे वस्तुनि पराभिनिवेशप्रतिषेधेच्छा 'ईर्ष्या'। परगुणाक्षमता 'असूया'। परापकारेच्छा 'द्रोहः'। कृतापकाराक्षमता 'अमर्षः'। विचिकित्सा 'संशयः'। विद्यमानाविद्यमानगुणाध्यारोपेणात्मोत्कर्षप्रत्ययः 'मानः'। कर्त्तव्याकरणं 'प्रमादः'।

न्यायनये 'जानाति, इच्छति, यतते' इति क्रमोऽङ्गीकृतः। प्रवृत्तिहेतुत्वं हि खलु भावानां दोषापरव्यपदेश्यानां भवतीत्यवसेयम्।

१७. मूलप्रवृत्तिसंवेगयोः सम्बन्धः

चतुर्थेऽध्याये मूलप्रवृत्तिस्वरूपं सपरिकरं वर्णितपूर्वम्। तत्र मैकडूगलाचार्य्यप्रवरोक्त-मूलप्रवृत्तिलक्षणव्याख्यानप्रसङ्गेऽस्माभिरुक्तं यद्धि वस्तुप्रत्यक्षानन्तरं भावानुभूतिर्जायते, संवेगानुभवनानन्तरं तद् वस्तु प्रति काचित् प्रवृत्तिः सँल्लक्ष्यते। एवम्प्रकारेण मूलप्रवृत्त्यङ्गत्रयस्य मध्ये केन्द्रीभूतो भावाख्यो मानसिकव्यापारः। नहि संवेगानुभवनमन्तरा मूलप्रवृत्तिरूपं स्फुटं समुज्ज्वलमभिनिर्वर्तत इत्येतत् सर्वमवदातम्।

'भयम्' इति पलायनमूलप्रवृत्तेः केन्द्रीभूतो भावः। भोजनान्वेषणमूलप्रवृत्तेर्बुभुक्षा संवेगो भवति। एवमेव प्रतिमूलप्रवृत्ति संवेगविशेषसम्बन्धः प्रागुक्तरीत्योन्नेयः। मूलप्रवृत्तीनां केन्द्रीभूता भावाः, संवेगा इति यावत्, मौलिकाः सन्तोऽपि महज्जाटिल्यं बिभ्रति। तेषां मौलिकं स्वरूपं त्वेतावतैवोन्नेयं यद्वयमेकैकस्य संवेगस्य विशिष्टमितरव्यावृत्तं स्वरूपं लभामहे; तान् समादाय मिश्रभावा[3] अभिनिर्वर्तन्ते। श्रद्धा-आतङ्क-लज्जा-कृतज्ञता-प्रशंसाप्रभृतयो मिश्रभावा एवम्प्रकारकाणां मूलप्रवृत्तिसम्बन्धिसंवेगानां मिश्रीभावेनाभिनिर्वर्तन्ते। मिश्रभावा जटिलतराः संवेगान्यपेक्षातः। नहि संवेगाः सरलानुभवरूपा इति वाच्यम्, संवेगानामपि जटिलानुभवरूपत्वात्। किञ्च, मिश्रभावानां स्वरूपमनुभूतरूपतया विलक्षणमितरव्यावृत्तं भवति। तज्जाटिल्यं च मूलप्रवृत्तीनां सङ्घटनेन जाटिल्येन चाभिनिर्वृत्तम्। मूलप्रवृत्तीनां सङ्घटनं जाटिल्यं चानपेक्ष्य तेषां स्वरूपमेवानुभवगोचरतां नापद्येत।

१८. भावावेशः[4]

सङ्क्षोभात्मका हि खलु संवेगा भावा इति। उग्रसंवेगानुभवो नह्यञ्जसा चेतसस्तिरोहितं जायते। जलोर्म्मिरिव संवेगोऽपि क्रमशश्चरमां कोटिं यावद् वर्धते, क्रमशश्च ह्रासं गच्छति। 'क्रोधज्वालमन्तर्ज्वलामि' इति क्रोधावसरे वियोगकाले वा प्रयोगः प्रायो दरीदृश्यते। 'निमज्जतीवाऽन्तरात्मा' इति प्रयोगो वियोगकाले रामस्य वियोगवेदनामत्यर्थं

---

१. न्यायसूत्रभाष्यम्—४।१।३

२. न्यायसूत्रभाष्यवार्त्तिकम्—४।१।३

३. तुलनार्थम्—Seconday emotions.

४. तुलनार्थम्—Emotional mood.

स्फुटमभिव्यञ्जयति । 'क्रोधाद् दह्यते मे चेतः' इत्यादिप्रयोगैरपि कामक्रोधशोककारुण्यादि-भावानामुन्मेषावस्था चरमावस्था ह्रासोन्मुख्यवस्था चेत्यवस्थात्रयं सिद्धं भवति । भावापगमेऽपि चेतसः संक्षुब्धावस्थानुवर्तते । यावत्सा संक्षुब्धावस्था संस्कारबहलाऽनुवर्तते, संवेगतिरोधानेऽपि पुनः क्षुद्रेऽप्युत्तेजके विषये समुपस्थिते तत्संवेगस्य तीव्रानुभूतेरवकाशो वर्तत एव । संक्षोभावस्थानन्तरमपि संस्कारमयी चेतसोऽवस्था संवेगाविर्भावानुकूला- वै 'भावावेशः' इति व्यपदिश्यते । दृश्यते हि लोके क्रोधानन्तरं मनागपि क्षुद्रमुत्तेजकवस्तु क्रोधानल-प्रज्वालनायालमिति । कदाचन त्वनागसं बालकं पुरुषं वाऽपि भावावेशप्रभावात् सहसा वयं ताडयामः । सिद्धा तर्हि संवेगोत्तरकालिका संवेगविशेषसंस्कारबहुलावस्था, यस्यास्तत्संवेगाविर्भावः सहसा प्रादुर्भवति ।

किं तावत् स्थायिभाव एव भावावेशः ? नैतद् वाच्यम् ; नहि स्थायिभाव एव भावावेशः । स्थायिभावस्तु चिरन्तनाभ्यासजन्या संवेगविशेषस्य परिणतावस्था । किन्तु भावावेशः संवेगविशेषस्यापगमेऽपि तदुत्तरानुवर्तमानावस्थाविशेषः । स्थायिभावः प्रगाढतमः संवेगो भवति, वासनाप्राचुर्यात् । नहि भावावेशः प्रधानसंवेग इव उग्रसङ्क्षोभ इत्यवगन्तव्यम् । भावावेशः संवेगविशेषजन्यमाविलचेतस्त्वमिति बोद्धव्यम् । भावावेशोऽशतोऽस्तं गच्छन्नाडीविक्रिया-जन्य इत्यवदातम् ।

१९. संवेगस्वतन्त्रनाडीमण्डलयोः सम्बन्धः

स्वतन्त्रनाडीमण्डलपरिस्वतन्त्रनाडीमण्डलविकीर्णग्रन्थिजालादिकस्य यो यः प्रभावोऽस्माकं मानसिकशारीरिकविकासे विशेषेण च संवेगानामुदये परिपाके तिरोधाने च दृश्यते, स निखिलोऽस्माभिर्द्वितीयेऽध्याये सपरिकरं वर्णितचरः । तत्रैवास्माभिरेका तालिकापि विवृता ।

केननप्रभृतिविपश्चिद्भिः[1] प्रमाणीकृतमिदं यद्धि भये स्वतन्त्रनाडीमण्डलस्य क्रियातिरेको विद्यते । हृद्गतिर्वर्धते, रक्ताधिक्यं रक्तचापो वा वर्धते, श्वसनं स्वच्छन्दं जायते, भोजनपचनादि-क्रियासङ्कोचनं जायते । उपवृक्कग्रन्थिक्रियाकारित्वं विशेषेणानुलक्ष्यते । उपवृक्कग्रन्थि-जन्यान्तःस्रावो रक्तप्रवाहे प्रक्षिप्तो जायते । तेनापि स्वतन्त्रनाडीमण्डलीयक्रियाकलापः संवर्धितो भवति । केननमहाभागेन क्रोधेऽपि तदनुकारिणी नूनमान्त्रिकक्रिया परिलक्षिता, निर्णीतं च तेन यद्धि भये क्रोध इवान्त्रिकप्रतिक्रिया जायत इति । किन्तु भये स्वेदातिरेको जायते, वैवर्ण्यं च । क्रोधे मुखस्य ताम्रवर्णत्वमिति रक्तप्रवाहक्रियाभेदं निर्दिशति । एतादृशीं निरीक्षणसामग्रीमादाय अन्याश्च विशेषोपोद्वलितामरनाल्डमनोवैज्ञानिकप्रवरा मन्यन्ते यद्धि केननमतानुसारं भयं विशेषेण स्वतन्त्रनाडीमण्डलीयक्रियाव्यापृतमिति समीचीनम् ; किन्तु केननमहोदयमतविप्रतिकूलं क्रोधस्तु विशेषतः परिस्वतन्त्रनाडीमण्डलीया क्रियेति बोद्धव्यम् । प्रहर्षः सङ्क्षोभो वा (Elation and excitement) सामान्यतः परिस्वतन्त्रनाडीमण्डलीया क्रिया भवति[2] । अथवा सामान्यतः

---

१ द्रष्टव्यम्—W. B. Cannon, Bodily changes in Pin, Anger, Fear and Rage (Appleton, 1920)

२ द्रष्टव्यम्—Arnold magde B. "Physiological Differentiation of emotional States'—Psychological Review, 1945, PP. 35–48

सर्वास्वेव संवेगानुभूतिषु कश्चित् परिस्वतन्त्रनाडीमण्डलीयक्रियाकलापो दृश्यः। अत्रोल्लेख्यं विशेषेण यद्धि प्रत्येकसंवेगानन्तरं तद्विरोधिक्रियानुवर्तते; यथा—विक्षोभानन्तरं (Excitement) देहबन्धविस्रंसनमङ्गानां शैथिल्यं वानुभूयते।

कामवासनायां वात्सल्यभावे च परिस्वतन्त्रनाडीमण्डलस्य प्रतिक्रियाणां प्राधान्यं वर्तते। विशेषेण कामवासनायां नाडीप्रतिक्रिया भयसंवेगानुगतनाडीविक्रियाविरोधिनी भवति, यतो हि भयेन कामवासनाविपरिलोपो दृश्यते। अन्तःस्रावग्रन्थिभेदोऽपि प्रतिसंवेगं भिद्यते। भये क्रोधे वा उपवृक्कग्रन्थिप्रतिक्रियाजन्यान्तःस्रावक्रियाकारित्वं वर्तते; किन्तु कामवासनायां मुष्कडिम्बग्रन्थिजन्यान्तःस्रावप्रतिक्रिया जायते। वात्सल्ये चान्यासामन्तःस्रावग्रन्थीनां पयोधरादीनां क्रियाकलापोऽनुवर्तते। मूषिकाणां वात्सल्यमये व्यवहारे भृशं साधितं हि खलु प्रयोगजातेन यत् कियान् पयोधरस्थग्रन्थिजन्यान्तःस्रावस्य प्रभावो भवतीति।

संवेगानुभवस्य मृदुमध्यातिमात्रमयं रूपं वस्तुतो व्यक्तिगतानुभवात्मसंयमचरित्रादिकमपेक्ष्य प्रतिपुरुषं भिद्यते।

२०. संवेगानां मस्तुलुङ्गीयायतनम्

किन्तु खलु संवेगानां स्थायिभावानाञ्च मस्तुलुङ्गीयायतनं भवतीति? हारवर्डविश्वविद्यालयीयप्राध्यापकप्रवरेण केननमहाभागेन मस्तुलुङ्गीयक्रियाणामध्ययनेन निर्णीतं यद्धि संवेगानां विशेषेण मस्तिष्कस्याधस्तरीयभागावाज्ञाकन्दौ[1] आयतने भवत इति। स्वतस्त्वाज्ञाकन्दौ निष्प्रत्यूहं संवेगायतने भवतः। यद्याज्ञाकन्दपार्श्वस्थमस्तुलुङ्गभागा अपसारिताः कर्तिता वा भवेयुस्तह्यु ग्रतरं भावसञ्चरणं संवेगानुभवनं वा आज्ञाकन्दभागाभ्यामभिनिर्वर्तते। एतावता पार्श्वस्थभागा आज्ञाकन्दानुगतनाडीक्रियानिरोधं कुर्वन्तीति सर्वमवदातम्। केननमहोदयैः प्रतिपादितमिदमाज्ञाकन्दीयं मतं जेम्सलैङ्गप्रत्याख्यानायालम्। आज्ञाकन्दौ स्वतन्त्ररूपेण वल्कं तत्तत्पेशीः प्रति स्वतन्त्रनाडीमण्डलमार्गेणान्त्रिकाजालं प्रति च क्रियावेगान् प्रवाहयतः। अनेन साधितं भवति यद्धि संवेगानुभूतिर्नहि शारीरिकविक्रिया जनयति, नापि शारीरिकविचेष्टा एव भावानुत्पादयन्ति। नूनं प्रबलतरशारीरिकविचेष्टाजातेनान्त्रिकक्रियाभिः पेशीजन्यक्रियाभिश्च संवेगानुभूतिः प्रवृद्धा जायते। जेम्समतं केननमतेन सुष्ठुतरं निराकृतं भवति। सम्प्रति सर्वैर्मनोवैज्ञानिकैः समादृतेन केननमतेन संवेगा मस्तुलुङ्गीयायतनप्रभवाः, न तु शारीरिकविक्रियाजन्याः; यथा जेम्समहाभागो मन्यत इति साधितं भवतीति सर्वमवदातम्।

२१. संवेगपरिवर्तनम्

वयमिदानीं संवेगानां परिवर्तनानि यथाभिनिर्वर्तन्ते, तदनुव्याख्यास्यामः। विचारविवेकानुभवातिशयानुसारं संवेगानामात्मनियन्त्रणमभिसम्पद्यते; तच्च संवेगाभिव्यक्तौ भावानुभूतौ च महत्परिवर्तनमादधाति। अस्माकं निखिलः सभ्यतासंस्कृतिशोवधिश्चारित्र्ये सन्निविष्टः। चारित्र्यं च संवेगपरिशोधं भावसंयमनमपेक्षते। कथं तर्हि संवेगा भावा नियन्त्रिता भवन्ति? इति सर्वमस्माभिर्विवेच्यम्। संवेगानां परिवर्तनानि चतुर्धा जायन्ते। तद्यथा—

(अ) संवेगदमनेन।

---

1 तुलनार्थम्—Thalamus, Thalami.

(आ) मार्गान्तरीकरणेन ।
(इ) संवेगविरेचनेन ।
(ई) संवेगोन्नयनेन परिशोधेन वा ।

तानि वयं परिवर्तनसाधनानि प्रतिपदमनुव्याख्यास्यामः । तत्तत्संवेगपरिवर्तनेन तत्तन्मूलप्रवृत्तावपि परिवर्तनानि कल्प्यन्ते; यतो हि संवेगानुभूतिर्मूलप्रवृत्तेः केन्द्रीभूता विद्युच्छक्तिरिव प्रेरिका भवति । अतो येन येन विधिना संवेगपरिवर्तनान्यभिनिर्वर्तन्ते, स स मूलप्रवृत्तिपरिवर्तनायापि प्रभवतीति बोद्धव्यम् ।

(अ) संवेगदमनम्[१]—संवेगावदमनमेव दमनमिति व्यपदिश्यते । यदि कश्चन भावविशेषोऽन्येन प्रबलतरेण विरोधिभावेन तिरोधीयते, तर्हि पूर्वभावविशेषस्यावदमनमापद्यते । अवदमनं हि खलु नितान्तं त्याज्यमिति अर्वाचीनमनोवैज्ञानिकानां तारस्वरं डिण्डिमोद्घोषणम् । यदि भावद्वयस्येतरविरोधिरूपं भवेत्, तयोर्युगपदनुभूयमानत्वमपि भवेत्, तदैवावदमनस्यावकाशः । भयेन रागावदमनमभिसम्पद्यते । परस्परविरोधिभावाभ्यां मानसिकसङ्घर्षो जायते, मानसिकसङ्घर्षाच्च दोलायितचेतस्त्वमापद्यते । दोलायितमानसत्वात्क्रियाविपरिलोपो जायते । मानसिकसङ्घर्षेण संवेगावदमनेनानेके मानसिकविकारा आविर्भवन्ति । ये संवेगा अवदमनविषयीभूता जायन्ते, ते भावग्रन्थिरूपतां बिभ्रति । भावग्रन्थिनिर्माणं हि खलु घोरमानसिकोन्मादादिविकारान् जनयति । मूलप्रवृत्तिनिरोधाद्धै तत्संवेगनिरोधो जायते । मूलप्रवृत्तिविषयानुपलब्धिर्बलादानीता एव निरोधः । संवेगनिरोधेन निरुद्धसंवेगः प्रान्तीयचैतन्ये सूक्ष्मचैतन्ये वा स्वाभिव्यञ्जनावसरमवाप्तुं भ्रमतीव । निरुद्धः संवेगः सर्वथा विनष्टो जायत इति न वाच्यम्; यदि व्यक्तित्वसामञ्जस्यद्वारा सा भावग्रन्थिर्विलीयते, तर्हि कापि क्षतिर्नाविर्भवति । इतरथा भावग्रन्थिरत्युग्रा सती व्यक्तित्वद्वैधीभावमापद्यमानं दुर्ग्रस्तं मानवं साक्षादसामान्यमानसिकविकारपाशैः प्रतिबध्नाति ।

नहि बालकानां प्रकृष्टा जिज्ञासा मातापितृभ्यां गुरुणा वा तिरस्कारवाक्यैर्निरोद्धव्या । सामाजिकनिन्दाभयेन कामवृत्तेरवदमनं बहूनसामान्यमानसिकविकारान् जनयति । यदा सङ्घर्षगतसंवेगयोः समानबलयोः परस्परं तुमुलसङ्घर्षो जायते, चिन्ता परमक्लेशप्रदा अन्वागच्छति । तया च प्रयत्नविरहितोऽकिञ्चित्करत्वं भजते । नहि मूलप्रवृत्तिसुलभानां संवेगानामवदमनं प्रशस्तं मनोवैज्ञानिकैर्मन्यते ।

(आ) विरेचनम्[२]—संवेगाः क्षीयन्ते विरेचनमार्गेण । हासपरिहासद्वारा केषाञ्चन पुरुषाणामुग्रसंवेगानां क्षयः सञ्जायते । तत्प्रकारेण तेषामसामाजिककार्यप्रवृत्तिः विनष्टा जायते । दृश्यते हि होलिकाप्रदाहानन्तरं जनानां हर्षाभिव्यञ्जनम् । उन्मुक्तहासपरिहासद्वारा अवचनीयवाक्यैरपशब्दैश्च लोकानां कामवृत्त्यतिशयविरेचनं क्रियते । यद्यपि विरेचनं साधुभिर्विगर्हितं साधनम्, तथापि मनोवैज्ञानिकोपयोगित्वमस्य दुर्निवारम् । स्मर्तव्यं यद्धि विरेचनावदमनाख्ये साधने नहि संवेगानां सम्यक्तया पथप्रदर्शनं कुरुतः ।

(इ) मार्गान्तरीकरणम्[३]—संवेगानां परिवर्तनं मार्गान्तरीकरणेनापि महत्सौकर्येणाभि-

---

१. तुलनार्थम्—Repression of emotions.
२. तुलनार्थम्—Catharsis.
३. तुलनार्थम्—Transformation.

निवर्तते । कामवृत्तेरतिशयः चित्रकलाकाव्यरचनानृत्यगीतवाद्याभिनयचित्रपटदर्शनोपन्यास-पठनप्रभृतिसाधनजातेन मार्गान्तरं नीयमानः स्वकीयां सामाजिकरूपतां प्रजहाति । भर्तृहरिवचनं नूनं स्मरणीयम्—

"साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः ।" इति ।

अपरिष्कृता मूलप्रवृत्तिवेगाः पशुमनुष्यसमानाः । संवेगानां परिष्कारेण मार्गान्तरीकरणेन पशुत्वं विहाय नरो दैवीं प्रकृतिमभिसम्पद्यते । आसुरी प्रकृतिः पशुसंवेगरूपविनिर्मिता भवति । मार्गान्तरीकरणेन संवेगस्य चरमावस्थां प्रति खल्वनुभविता समाहितो जायते । अन्यमनस्कत्वं संवेगक्षयाय कल्पते । मार्गान्तरीकरणं शिष्टसम्मतं साधनम् । अन्यच्च 'पूरोत्पीडे तडागस्य परीवाहः प्रतिक्रिया' ।

(ई) उन्नयनम्, परिशोधो वा—संवेगपरिवर्तनस्याद्यं साधनं दमनाख्यं विद्वद्भिरसेव्य-मग्राह्यञ्चेति । कस्तावत्तर्हि श्रेष्ठः परमकल्याणवहः पन्थाः ? नूनं संवेगोन्नयनं संवेगपरिशोधो वा शिष्टैः सर्वथानुग्राह्यो विधिः । संवेगोन्नयनं हि खलु तत्तत्संवेगस्यादर्शविशेषमभिलक्ष्यानु-करणीयचरित्रश्लाघ्यगुणसम्पन्ननरशार्दूलं प्रति विचारभावनानैरन्तर्येण सम्बन्धनिर्माणमिति । संवेगानां पशुसुलभमाद्यमसंस्कृतं रूपं त्वस्माभिर्वर्णितपूर्वम् । तच्च विचारनैतिकादर्शविशेषपूतं भूत्वा सर्वथा परिवर्तितं तिरोहितमिव वा जायते । तस्य मूलरूपं च तदा इयत् परिवर्तनमादधाति, यद् वयं तदभिज्ञातुं न प्रभवामः । यद्यपि संवेगावदमनविधिनापि परिवर्तनं जायते; किन्तु तस्यान्ततो गत्वा क्लेशप्रदाः परिणामा भवन्ति, व्यक्तित्वद्वैधीभावप्रभृतिमानसिकविकारा जायन्ते । दृष्टिविषयस्य समाने सत्यपि विचारसंवेगानुभवतदभिव्यक्त्यादयः परिशोधेन परिष्कृत-रूपेणोपलभ्यन्ते । सामाजिकसहकारिताविश्वबन्धुत्वसमानताकर्तव्यपरायणत्वपरमतसहिष्णुत्वादि-नैतिकधार्मिकादर्शैः प्रतिसंस्कृता मूलसंवेगा आमूलचूडपरिवर्तितामभिव्यक्तिमनुभूतिं च धारयन्ति । वयमत्र कतिपयसंवेगानामुन्नीतं परिशुद्धमुदात्तीकृतं वा रूपं निदर्शयामः । एतावतैव तत्सम्बन्धि-मूलप्रवृत्तेरन्यासां चावर्णितानां मूलप्रवृत्तीनामुन्नयनासादितरूपाण्यपि बोद्धव्यानि ।

नूनं भोजनान्वेषणं स्वोदरपूर्त्यै आद्यं बुभुक्षासंवेगरूपम् । अतिथिसेवया धार्मिक-स्थायिभावनिर्म्माणेन च तत्कथं परिशोधमुन्नयनं वाऽर्हतीति भगवत्या श्रुत्यैव स्फुटं प्रतिपादितम्—

मोघमन्नं विन्दतेऽप्रचेताः सत्यं ब्रवीमि वध इत्स तस्य ।
नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी ॥ इति ।

अग्निहोत्रमन्त्रैः प्रतिपदं हव्याहुतिविषये 'इदं न मम' इति सिद्धान्तितेन वचनेन परोपकाराय देवार्चनाय च स्वार्थत्यागार्थे धार्मिकस्थायिभावनिर्म्माणं नूनं बुभुक्षा-संवेगोन्नयनकारकमित्युन्नेयम् । देशप्रेम्णाऽपि बुभुक्षासंयमनमभिनिर्वर्तते । दृष्टं चैतद् वीर-वरवन्दावैरागिशैक्ष्य(सिक्ख)गुरूणामनुयायिसैनिकानाम्, आजादहिन्दसेनाधिपतिसुभाषचन्द्रबोसस्य सैनिकानाम् 'इम्फल'युद्धे, यद् भोजनाभावेऽपि मातृभूमिबन्धनविमोचनाय निरन्तरं युद्धं समावृत्तम्, तच्चाप्यभूतपूर्वसाहसेन ।

अस्ति हि कामवासनेत्यन्यो तीव्रतमः संवेगः । स हि तीव्रतमो मानवानां पशूनां च संवेग इति फ्रायडमहाभागा उद्गिरन्ति । सोऽपि सम्यक्तया पथप्रदर्शनेनोन्नीतरूपमादधाति ।

नारीणां पातिव्रत्यं कुलव्रतमेकपत्नीव्रतं चार्य्याणां परस्त्रीमातृभक्तिश्च शिष्टानामाचरणराद्धान्ततया सुप्रथितमेव सर्वस्मिन् भूमण्डले ।

'वसुधैव कुटुम्बकम्' इति भावना यथा संकीर्णं प्रेम उन्नीतं विश्वकल्याणावहं करोति तथा निदर्श्यते—

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ॥ इति ।

अन्यच्च, यथा पातिव्रत्यसौरभेण कामवृत्तिर्लोकवन्द्यं परिशुद्धं रूपमादधाति, तथा स्फुटीक्रियते—

अग्निपरीक्षावसरे सीताया उक्तिः—

मनसि वचसि काये जागरे स्वप्नसङ्गे
यदि मम पतिभावो राघवादन्यपुंसि ।
तदिह दह ममाङ्गं पावनं पावकेदं
सुकृतदुरितभाजां त्वं हि कर्मैकसाक्षी ॥ इति ।

किञ्च, रावणप्रणयप्रार्थनावसरे—

दीनो वा राज्यहीनो वा यो मे भर्ता स मे गुरुः ।
तं नित्यमनुरक्तास्मि यथा सूर्यं सुवर्चला ॥
यथा शची महाभागा शक्रं समुपतिष्ठते ।
अरुन्धती वशिष्ठं च केशिनी सगरं यथा ॥
लोपामुद्रा यथागस्त्यं सुकन्या च्यवनं यथा ।
तथाहमिक्ष्वाकुवरं रामं पतिमनुव्रता ॥ इति[१]

किं बहुना—

सव्येनापि हि पादेन न स्पृशेयं निशाचरम् ।
रावणं किं पुनरहं कामयेयं विगर्हितम् ॥ इति ।

अथवा, वनवासार्थं प्रस्थानावसरे सीतोक्तिः—

यदि त्वं प्रस्थितो दुर्गं वनमद्यैव राघव !
अग्रतस्ते गमिष्यामि मृद्नती कुशकण्टकान् ॥ इति ।

राज्यप्राप्तिलोभो हि सञ्चयप्रवृत्तेश्चरमं रूपम् । किन्तु लोभसंवेगपरिशोधं वयं भरतेऽतिशयेन लभामहे, किन्तु तस्योदात्तीभावस्य तत्रोपस्थितविभीषणसुग्रीवादिष्वभावो नूनं संवेगानां मूलरूपपरिशुद्धरूपयोरितरेतरव्यावृत्तरूपं स्फुटं विचारपटल आदधाति । भरत उवाच—

यस्त्वां पश्यामि राजानमयोध्यां पुनरागतम् ।
अवेक्षतां भवान् कोशं कोष्ठागारं पुरो बलम् ॥
भवतस्तेजसा सर्वं कृतं दशगुणं मया । इति[१] ।

भ्रातृस्नेहस्य परमोज्ज्वलं निदर्शनं स्वार्थत्यागस्य चादर्शरूपं प्रातःस्मरणीयं भूयो भूयोऽस्माकं चेतांस्यानन्दयति निषादोक्तिः—

---

१. द्रष्टव्यम्—वाल्मीकिरामायणम् ६।१२०।२२–२६३

धन्यस्त्वं न त्वया तुल्यं पश्यामि जगतीतले।
प्रयत्नादागतं राज्यं यस्त्वं त्यक्तुमिहेच्छसि॥ इति[1]।

अपि च—

तथा ब्रुवाणं भरतं दृष्ट्वा तं भ्रातृवत्सलम्।
मुमुचुर्वानरा वाष्पं राक्षसश्च विभीषणः॥ इति[2]।

एवम्प्रकारेण बालकेषु समानतासहकारितादेशप्रेमपरोपकारसत्याहिंसादिचरमोदात्तादर्शविचारान् प्रति स्थायिभावानां सम्यक्तया निर्म्माणेन तेषां मूलसंवेगानां मूलप्रवृत्तीनां चोन्नयनं कर्तुं शक्यते। मूलसंवेगानां परिशोधो वै सभ्यतायाः शिष्टसमुदाचारस्य चाधारशिलेति निःसंशयम्। "अभ्यासवैराग्याभ्यां तन्निरोधः[3]" इति सूत्रेण भगवान् पतञ्जलिश्चित्तवृत्तिनिरोधस्य साधनद्वयं प्रतिपादितवान्। भगवता श्रीकृष्णेनापि खल्वभ्यासवैराग्याभ्यां चित्तवृत्त्युपशमनं प्रशस्तमुद्घोषितम्। तद्यथा—

असंशयं महाबाहो! मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय! वैराग्येण च गृह्यते॥ इति[4]।

योगाभिमतोऽयं निरोधो नास्त्यवदमनमिति पूर्वसंज्ञितम्। अभ्यासो हि खलु चिरकालिकभावनानुरञ्जितस्थायिभावायत्तदृढसङ्कल्पजन्यो भवतीति सर्वं वर्णितचरम्। वैराग्यमिति विरोधिस्थायिभावनिर्म्माणप्रभवम्। संवेगातिरेकदोषप्रदर्शनेन तद्विषये वैराग्यमुपजायते। अभ्यासेन वैराग्येण च आत्मसंयमो दृढसङ्कल्पश्च प्रवर्धितौ जायेते। अवदमनेऽवदमितसंवेगाः, प्रबलतरस्थायिभावे समुपस्थितेऽपि, पार्श्वभूमौ सूक्ष्मचैतन्यस्य सक्रिया दृश्यन्ते। नहि योगाभिमतनिरोधे परिशोधचरमरूपे उदात्तव्यक्तित्वलाभान्विते कुत्रचिदपि ह्यवदमनस्यावकाशः। अन्यच्च, मार्गान्तरीकरणे संवेगानां शक्तिरक्षुण्णा अप्रतिहता चावतिष्ठते। केवलमनवहितत्वान्मानवः संवेगाभिमुखः समुपस्थितेष्ववसरेषु न जायते। परिशोधसाधने वै संवेगानां मूलशक्तिरपि क्षयमवाप्नुते। परिवर्तितरूपनियतत्वं चैतेषामभिव्यक्तिर्बिभर्ति। यदा मार्गान्तरीकरणलक्ष्यीभूता कला 'सत्यं शिवं सुन्दरम्' इत्यादिचरममानवपुरुषार्थैः सहान्विता तदनुप्राणिता वा जायते, तदा सापि मार्गान्तरीकरणाख्यसाधनकक्षं विहाय परिशोधकक्षमनुप्रविशति, संवेगोदात्तचरमावस्थायां पर्यवस्यति चेति विशेषः॥

इति अर्वाचीने मनोविज्ञाने संवेदनभावादिस्वरूपविवेचनात्मकस्त्रयोदशोऽध्यायः॥

---

१. द्रष्टव्यम्—वाल्मीकिरामायणम् २।८२।१२
२. द्रष्टव्यम्— ,, ,, ६।१३०।२६-२७
३. द्रष्टव्यम्—पातञ्जलयोगसूत्रम् १।१२
४. द्रष्टव्या—श्रीमद्भगवद्गीता ६।३५

चतुर्दशोऽध्यायः

ऐच्छिकक्रियाविवेचनम्

१. प्रयत्नस्वरूपम्

अस्माभिः पूर्वं चिन्तनस्य संवेदनस्य चेति मानसिकव्यापारद्वयस्य सपरिकरमनुव्याख्यानं सम्पादितम्। प्रयत्नाख्यमनोव्यापारस्य विवेचनमांशिकरूपेण जन्मजातक्रियाणां सहजक्रियामूलप्रवृत्त्यादीनां विवेचनावसरे चतुर्थेऽध्याये व्याख्यातचरम्। सम्प्रत्यैच्छिकक्रियारूपमनोव्यापारस्य प्रयत्नव्यपदेशविशेषस्यानुव्याख्यानमवशिष्यते। अत्र वयं तदेव साङ्गोपाङ्गमनुव्याख्यास्यामः। प्रयतनमिति सर्वेषां मानसिकव्यापाराणां मूलकारणम्। अर्थमुपलभ्य ज्ञाता तमर्थमभीप्सति जिहासति वा। तस्येप्साजिहासाप्रयुक्तस्य समीहा 'प्रवृत्तिः' इति व्यपदिश्यते। प्रवृत्तिरेव प्रयतनम्। समीहमानः पुरुषोऽर्थविशेषमभीप्सन् जिहासन् वा तमर्थमवाप्नोति जिहासति वा।

सेयं समीहा शारीरिकक्रियाभिन्नां यान्त्रिकक्रियारूपां सहजक्रियां विहाय मूलप्रवृत्तिसहजप्रवृत्तिसामान्यप्रवृत्त्यभ्यासैच्छिकक्रियारूपान् मानसिकव्यापारेष्वाधत्ते; किन्तु तस्याः प्रत्यक्षविशेषप्रेरकत्वमपि निश्चप्रचम्। ध्यानाख्यचैतन्यव्यापारोऽपि समीहामन्तरा न वितनुते। अत एव कामस्य मनोमूलत्वं निखिलमानसव्यापारकारणत्वं प्रत्यपि सुष्ठुतरमाम्नातम्। तथा हि—

कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत्।
सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा॥ इति[१]।

भगवता मनुनापि कामस्य समीहापरनामधेयस्य[२] सर्वमनोव्यापारमूलत्वमुररीकृतम्। तद्यथा—

अकामस्य क्रिया काचिद् दृश्यते नेह कर्हिचित्।
यद् यद्धि कुरुते जन्तुस्तत्तत् कामस्य चेष्टितम्॥ इति[३]।

अत्र 'कामः' इति सामान्येऽर्थे 'समीहा' इति व्यपदिश्यते। इममर्थमभिप्रेत्य उपनिषत्स्वपि "काममय एवायं पुरुषः" इत्युक्तम्। सोऽयं कामः, सेयं समीहा, सर्वेषां सङ्कल्पानामाद्या प्रेरिका, ध्यानस्याद्या जनिका। तां विना नहि संवेदनमपि खल्वभिव्यक्तिं लभते; किन्तु कामस्य सर्वोपरि सुनिष्पन्नं रूपमैच्छिकक्रियासु समुपलभ्यते। ऐच्छिकक्रिया 'प्रयत्नः' इति विभाव्यम्। सर्व एव शिष्टाचारः सदाचारो वा एवेति।

कामस्य मनोमूलत्वमथर्ववेदेऽपि सम्यक्तयाम्नातम्[४]। किञ्च, प्रश्नोपनिषदि श्रूयते यद्धि

---

१. द्रष्टव्यम्—ऋग्वेदीयं नासदीयसूक्तम्, ८।७।१७
२. तुलनार्थम्—Conation.
३. द्रष्टव्या—मनुस्मृतिः २।४
४. द्रष्टव्यः—अथर्ववेदः १९।५२।१

कबन्धी कात्यायनः भगवन्तं महर्षिपिप्पलादमुपेत्य पप्रच्छ—"भगवन् कुतो ह वा इमाः प्रजाः प्रजायन्त ?" इति। तस्मै भगवान् पिप्पलादः प्रत्युवाच—"प्रजाकामो वै प्रजापतिः, स तपोऽतप्यत, स तपस्तप्त्वा स मिथुनमुत्पादयते" इति[१]। अत्र प्रजापतिविशेषणेषु प्रजाकामत्वमेव कामस्य मनोव्यापारमूलत्वं साधयति निरस्तसमस्तशङ्कम्। प्रश्नोपनिषद्वर्णितान्तिमप्रश्नान्तर्गतषोडशकलानां मूलमपि काम एवेति निर्गलितं तथ्यम्। ऐतरेयोपनिषदि तदेव 'ईक्षणम्' इति व्यपदेशेन प्रपञ्चितम्[२]। अत एव कामो निखिलमनोव्यापारबीजम्। तैत्तिरीयोपनिषद्ब्रह्मानन्दवल्ल्यां षष्ठानुवाकेऽपि 'सोऽकामयत' इति निर्देशः कामस्याद्यमनोव्यापारत्वमुररीकरोति।

२. कोऽयं कामो नाम ?

ननु कामप्रवृत्तिः प्राग्वर्णिता ; कोऽयं कामो नाम, यमभिप्रेत्यात्र प्रपञ्चनं क्रियते ? कामसूत्रकृद्भिर्महर्षिवात्स्यायनैः कामपदानुव्याख्यानमेवम्प्रकारेण सम्प्रस्तुतम्— "श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानामात्मसंयुक्तेन मनसाधिष्ठितानां स्वेषु स्वेषु विषयेष्वानुकूल्यतः प्रवृत्तिः 'कामः'। स्पर्शविशेषविषये त्वस्याभिमानिकसुखानुविद्धा फलवत्यर्थप्रतीतिः प्राधान्यात् कामः" इति[३]। अत्र कामपदस्य प्रथमः सामान्योऽर्थो बोद्धव्यः। अपरो विशिष्टोऽर्थः कामप्रवृत्तिं वर्णितचरां प्रकटयति। दृश्यते हि नूनमन्यः कामपदस्य प्रयोगो धर्मार्थकाममोक्षाख्यचतुर्वर्गान्तर्गततृतीयपुरुषार्थाभिव्यञ्जकः। स च लोकैषणापुत्रैषणादारैषणाजन्याभ्युदयः कामपदवाच्यस्तृतीयः पुरुषार्थः। सामान्येऽर्थे काम इच्छारूपमाधत्ते। यच्च वात्स्यायनमुनिना "विषयेच्छानुकूल्यतः प्रवृत्तिः कामः" इत्युक्तम्, तद्वै सुप्रथितार्वाचीनमनोविज्ञाने 'होर्मिक[४]' इति वादाख्यां भजते। 'होर्मे' इति पदेन प्राणशक्तेरन्तर्निहितो वेगः सूच्यते, येनाभिप्रेरितोऽयं प्राणी प्रवृत्तौ वा निवृत्तौ वाऽग्रेसरः। एतादृशः प्राण्यन्तर्निहितशक्तिवेगः प्रवृत्तिजनकः 'कामः' इति व्यपदिश्यते। काम एवाभिव्यक्तः सन् अवबुद्धो वा जायमानः 'प्रयत्नः' इति संज्ञां बिभर्त्ति। नूनं सर्वेषां मानवानां तदितरप्राणिनां च प्रयत्ना बाह्योत्तेजकपदार्थजन्याः; किन्तु प्राणिनामन्तर्निहितनैसर्गिकशक्तिवेगं विना नहि प्रयत्नरूपावधारणं कर्तुं शक्यते। कीदृशः प्रयत्नः कीदृशमाचरणं कस्यचिन्मानवस्य प्राणिनो वा भविष्यतीति सर्वं तस्य तस्य कामस्य चेष्टितं भवति, तस्य तस्य नैसर्गिकशक्तिवेगस्येच्छामयस्य प्रयोजनाभिमुखस्य वेति यावत्। कामे वै प्रयोजनं मुख्यं भवति। नहि लक्ष्यादृते कदाचनेच्छा प्रवर्तते, प्रयोजनं विना वा प्राणिनां प्रवृत्तिर्दृश्यते। मूलप्रवृत्तिष्वपि प्रयोजनं प्रायो निसर्गासादितम्। कदाचन मूलप्रवृत्तीनां प्रयोजनमव्यक्तं दृश्यते, निसर्गायत्तत्वात्। यदा च प्रयोजनं सुव्यक्तं भवति, तदैव क्रियारूपं स्फुटीभवति, तदनुकूलसाधनानां चयनं संग्रहश्च सम्पाद्यते। वातावरणोपयुक्तसाधनचयनं पूर्वानुभवायत्तं शिक्षणमिति बुद्धेर्लक्ष्यद्वयं वयं पूर्वमवोचाम। प्रयत्ने हि खलु मानसव्यापारे प्रयोजननिर्दिष्टं स्फुटं क्रियारूपमुपलभ्यते, इष्टानिष्टसाधनानामुपादानपरित्यागोऽपि यत्र सम्यगवधार्यते। अस्तु तर्हि कामस्य सुव्यक्तं रूपं प्रयतनमिति।

१. द्रष्टव्या—प्रश्नोपनिषद् १।४

२. द्रष्टव्या—ऐतरेयोपनिषद् १।१।१ तथा १।३।१

३. द्रष्टव्यम्—कामसूत्रम् १।२

४. तुलनार्थम्—Hormic theory.

सुतरां वयं प्रयत्नाख्यमनोव्यापारस्य लक्षणमनुव्याख्यास्यामः। प्रयत्नो नाम मानसव्यापारविशेषः, यस्मिन् लक्ष्यविशेषप्राप्त्यर्थं हानोपादानरूपावबोधान्विता प्रवृत्तिर्जायते, तल्लक्ष्यानुरूपं चोपकरणानां बुद्ध्यन्वितं चयनं सम्पाद्यते।

३. चिन्तनेन सह कामस्य सम्बन्धः

पूर्वमस्माभिरुक्तं यद्धि चिन्तनानन्तरं प्रत्यक्षानन्तरं वा संवेदनं जायते, ततश्च प्रवृत्तिः प्रादुर्भवतीति। 'जानाति, इच्छति, यतते' इति मनसो व्यापाराणां क्रमः सामान्यतोऽङ्गीक्रियते नैयायिकप्रभृतिभिः। आलङ्कारिका अभिनवगुप्तपादाचार्य्यप्रभृतयश्च प्रत्यभिज्ञावादिनश्च 'इच्छति, जानाति, यतते' इति मनोव्यापारक्रममङ्गीकुर्वन्ति। "ज्ञस्य इच्छाद्वेषनिमित्तत्वाद् आरम्भनिवृत्त्योः" इति न्यायसूत्रकाराः[१]। "इच्छाद्वेषपूर्विका धर्माधर्मप्रवृत्तिः" इति महर्षिप्रवराः कणभक्षाः[२]।

ननु कथङ्कारं मनोभवस्य कामस्य मनोमूलत्वमुपपद्यते? प्रत्यक्षस्मरणकल्पनं सङ्कल्पनचिन्तनादीनि मनोव्यापाररूपाणि वर्णितपूर्वाणि तत्पूर्वकेण कामेन[३] समारभ्यन्ते। कामो वै इच्छात्मकः क्रियाशक्तिवेगः। इमं क्रियाशक्तिवेगं निसर्गजं समाश्रित्य वयं प्रत्यक्षं कुर्मः, किञ्चन वस्तु स्मरामः तत्पदार्थविशेषोपादानाय प्रयतामहे। कामेन वै प्रत्यक्षस्मरणचिन्तनादीनि मनोव्यापाररूपाणि प्रेरितानि भवन्ति, कामानुरूपलक्ष्यमवाप्य च तानि विरमन्ते। केवलमन्तराले कामस्य क्रियात्मकं रूपं तिरोहितमवतिष्ठते, चिन्तनप्रत्यक्षकल्पनादिकं मनोव्यापारविशेषरूपं समुद्भूतं भवति, तच्च तच्च तथा तथा प्रथते। अनुभवनं चिन्तनं ज्ञानमयो मानसव्यापारो वा कामस्य प्रयत्नेच्छारूपस्य नैसर्गिकशक्तिस्रोतसोऽन्तरालेऽवतिष्ठते—कामः, ज्ञानम्, संवेदनम्, प्रयतनमिति ब्रूमः। अनेनालङ्कारिकाणामभिप्रेतं मनोव्यापारक्रमपरमनुव्याख्यानमपि सङ्गच्छते। किञ्च, अन्तरालेऽपि यदा प्रत्यक्षस्मरणचिन्तनादीनि मनोव्यापाररूपाणि नूनमनुभूयन्ते, तदा ध्यानाख्यमनोव्यापारतया कामस्य प्रयत्नात्मकस्य सक्रियत्वं तु संज्ञादानविचारकल्पनादिमनोव्यापाराणामवस्थितिहेतवे युज्यत एव। 'ध्यानम्' इति मानसप्रयतनरूपविशेषः। तस्मादृते नहि कोऽपि मानसव्यापारोऽत्रस्थातु प्रभवति। केवलं तदा कामः प्रयतनात्मक इच्छाशक्तिवेगः पृष्ठभूमाववतरति। कामस्य चरमाभिव्यक्तिः प्रयोजनान्विते प्रयत्ने जायत इत्यवधार्यम्।

४. प्रयत्नस्तरविशेषाः

नह्यव्यक्तरूपः कामोऽञ्जसैव प्रयत्नस्तरमवाप्नोति। तयोरन्तराले सन्ति हि बहवः स्तरविशेषाः, यानुपादाय सप्रयोजनप्रयतनमाविर्भवति। अयं परिणाम आपाततो न जायते, प्रत्युत क्रमशः। कामो वै सप्रयोजनप्रयत्नाभिमुखमिच्छामयं चैतन्यं क्रमिकविकासेन परिणममानो लक्ष्यविशेषाभिमुखमनुकूलोपकरणावचयपूर्वकं प्रयत्नरूपमादधाति। मूलप्रवृत्तिरपि काममूला; किन्तु तस्यां प्रयोजनं निसर्गसिद्धम्। लक्ष्यानुकूलोपकरणसंग्रहो बुद्ध्यन्वितः केवलं प्रौढमानवव्यवहार एव सँल्लक्ष्यते। प्रौढवयस्कानां क्रिया अपि कदाचन सामि अवबुद्धलक्ष्या भवन्ति। नहि सर्वदा तासां

---

१. द्रष्टव्यम्—न्यायसूत्रम् ३।२।३५

२. द्रष्टव्यम्—वैशेषिकसूत्रम् ६।२।१४

३ तुलनार्थम्—Conation.

साध्यानुरूपसाधनावचयनं समीचीनं प्रतिभाति। विशेषत एतादृशमाचरणं मूलप्रवृत्तिक्रियाकारित्वं बुद्ध्यपक्वत्वं वा द्योतयति। बुद्ध्यपरिपाके साध्यानुरूपं साधनानां चयनं सम्यङ् न सम्पाद्यते। तत्र यच्छिक्षणं पशुना मानवेन वावाप्यते, तत्सर्वं प्रयत्नस्खलितप्रचुरं भवतीत्यवसेयम्। प्रयतनानि बहुशः कृत्वा मानवो पशुविशेषो वा निश्चिनोति—कानि साधनानि लक्ष्यानुरूपाणि? लक्ष्यावाप्तिबाधकत्वात् कानि वा साधनानि हेयानि? इति। आरम्भकाले सर्वं शिक्षणं प्रयत्नस्खलितशबलीकृतमिति तु सर्वं वर्णितपूर्वं विचाराध्याये। नूनमत्रापि बुद्धयेषत्प्रदर्शितमार्गो व्यवहारो भवतीति बोद्धव्यम्। यावन्न प्रयोजननिर्धारणपूर्वकं साध्यप्राप्त्यनुकूलोपकरणानामवधारणं सम्पाद्येत, तावन्नूनं मूलप्रवृत्तिमयमाचरणम्, यदृच्छया प्रवर्तितं वाचरणं सूचीभेद्ये तमसि अन्ध इव पथो मार्गयति। यदा च बुद्धिविकासः सुप्रौढो जायते, कल्पनाविकासश्चाभिसम्पद्यते, लक्ष्यानुरूपोपकरणानां चयनं मार्गणं च सुयोजनानुसारं सुकरं भवति, बुद्धिकल्पनाविकाससहकृतत्वात्; तदा मानवव्यवहारो अन्ध इवाप्रदर्शितमार्गो नावतिष्ठते, प्रत्युत समवबुद्धप्रयत्नाख्यां भजते। सुनियोजितमात्मनियन्त्रितं हेतुफलादिविचारान्वितमेतादृशक्रियाजालमाचरणमिति प्रयतनमिति वा व्यपदिश्यते विपश्चिद्भिः। इष्टसाधनताज्ञानमयं प्रयतनमित्यवसेयम्।

५. इच्छास्वरूपम्

कामचैतन्यस्य शक्तिवेगरूपस्याभिव्यक्तिलाभे प्रयत्नो निष्पन्नो भवति। प्रयत्ने खल्वव्यक्ताः प्रेरणाः, निसर्गजानि शक्तिस्रोतांसि, यान्यत्र कामपदेन व्यपदेश्यानि, इच्छारूपेण परिणमन्ते। कामपदस्य प्रयोगः कदाचन व्यक्तेरिच्छामपि खल्वभिव्यञ्जयति। तद्यथा—

न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते॥ इति[1]।

अस्तु तावत्, इच्छा कामस्य बीजभूतस्य स्फुटोऽभिव्यक्तरूपो मानसव्यापारविशेषः। बुभुक्षितो बालको महाविद्यालयभवने यदा भोजनं खादितुमिच्छति, स भोजनं खादितुं भोजनालयमुपसर्पति, स्वगृहं वाभिगच्छति। यदा कस्यचिद् वस्तुनोऽभावो दुःखाकरोति चेतः, तदैवेच्छायाः प्रादुर्भावो मानसपटले सञ्जायते। यदा मम पुस्तकं चोरितं जायते केनापि तस्करेण, तदैवाहं तन्मार्गणेच्छामनुभवामि, 'मदीयं पुस्तकमन्वेष्टव्यम्' इति सहवासिनं वा ब्रवीमि। यदि च मत्सकाशे पुस्तकं भोजनं वा क्रेतुं धनं न भवेत्तर्हि जटिलसमस्या धनोपार्जनाय समुपस्थिता भवति। 'कुतो धनमवाप्तव्यम्?'—इति मे महती चिन्ता अभीक्ष्णं दन्दह्यते चित्तम्। नूनमत्र मत्या भाविनः कार्यस्य वस्तुनो वा, येन तद्विषयकेच्छायाः सन्तृप्तिर्भविष्यति, समाधानमनुसन्धेयम्। येन वस्तुना येनोपकरणेनेच्छाविशेषस्य पूर्तिर्जायते, तस्य तस्य कल्पनाप्रतिमाक्षणं मानसपटलेऽवतीर्य तदुपादानविधिं प्रशस्तं करोति। सन्ति हि प्रायः समीचीनोपकरणप्राप्त्यर्थमनेका बाधाः; किन्तु कथं ता दूरीभविष्यन्तीति सर्वं मत्या विचार्यते। स्मृतिरपि जटिलसमस्याग्रन्थिविध्वंसनाय स्वकीयं साहाय्यं पुरस्करोति। पूर्वानुभवसहायं विचिन्त्यैव खल्विच्छापूर्तिः करणीया। किं मित्रमस्माकं साहाय्यं करिष्यति? किं कार्यं कृत्वाचिरेण वयं भोजनं लप्स्यामहे?—इति सर्वा विचारशृङ्खला इच्छापूर्त्यै समारब्धा भवन्ति। अत एवेच्छा विविधं शारीरिकक्रियाजातं कल्पनाचिन्तनस्मरणप्रभृतिमानसिकव्यापारजातं च प्रेरयति। इच्छामूलं निखिलं प्रयत्नजातमिति रहस्यम्।

---

1. द्रष्टव्या—मनुस्मृतिः

६. [1]इच्छाऽभिलाषयोर्लक्षणम्

प्राचीनाचार्यैः प्रायः कामेच्छाभिलाषादिशब्दानां प्रयोगः पर्यायवाचकत्वेन कृतः समुपलभ्यते, यद्यपि सूक्ष्मान्तरमपि कदाचन तेषां सम्प्रयोगेषु नूनमुद्घाटयितुं शक्यते। अत्र पारिभाषिकपदावलीं परिष्कर्तुं यदुपक्रम्यते, तन्नूनं मानसिकव्यापाराणां जटिलानां सूक्ष्मान्तरान्वितानां याथातथ्यनिरूपणायाऽलं भविष्यतीति वयमाशास्महे। अभिलाषो[2] नाम इच्छाविशेषः, यस्मिन् प्रयत्नस्य भावि व्यावहारिकं रूपम्, इष्टफलावाप्तिश्च सन्दिग्धा भवति। अथवा यस्य फलभाक्त्वमव्यवहार्यम्, एतादृगभिलाषो वै कश्चन नाशु कार्यरूपतां धत्ते। यथा—अस्ति मेऽभिलाषो यदहं सार्वभौमप्रभुत्वसम्पन्नभारतीयगणतन्त्रस्य राष्ट्रपतिर्भूयासमिति। अथवा कस्यचन अमेरिकादेशीयस्य सुरभारतीचरणसंसिक्तमानसस्यायमभिलाषो भवेद् यद्वै देववाण्याः पुण्यसाहित्यसलिलेऽवगाहमानः कविकुलचूडामणिः कनिष्ठिकाधिष्ठितकविर्भूयासमिति। नहि खल्वभिलाषेच्छयोः लक्ष्यमव्यवहार्यं फलं वा सम्भावनाजुष्टं भवतीति गन्तव्यम्। इच्छाया लक्ष्याभिप्राप्त्यर्थं क्रियाः शीघ्रमेव जायन्ते। इच्छाविशेषे सति लक्ष्यसिद्ध्यर्थमितिकर्त्तव्यतानिश्चयपूर्वकं प्रयत्नविशेषो जायते। यथा—इदानीं यदि रामलीलाभिनयान्तर्गतभरतसम्मिलनं काश्यां 'जगतगञ्ज'मण्डले द्रष्टुमहमिच्छामि, तर्हि सद्योऽहमुत्तरीयकं गृहीत्वा गन्तुमारभे। इच्छात्र गमनपर्यवसाना। इच्छालक्ष्यं निर्दिष्टेतिकर्त्तव्यताविचारपुरस्सरं व्यवहार्यं च भवतीत्यवगन्तव्यम्।

७. क्रियाप्रयोजकस्य स्वरूपम्

किन्तु खलु क्रियायाः प्रवर्त्तिका प्रेरिका प्रयोजिका वा[3] इच्छा भवति? अथवा किमप्यन्यदेव प्रयोजकम्? एवं सम्प्राप्तायामाशङ्कायामिदमुच्यते—येन कर्त्ता कस्मिन्नपि कर्मविशेषे प्रयुज्यते तत् प्रयोजकं प्रेरकं वेत्युच्यते। अत्र केचनाहुः—इच्छा एव प्रयत्नरूपक्रियायाः प्रयोजिका भवतीति। अन्ये त्वाहुः—सुखदुःखादिसंवेदनमेव क्रियायाः प्रयोजकमिति। सन्ति वै चान्ये, येषां मते लक्ष्यज्ञानमेव प्रयोजकं भवतीति। वयमत्र सर्वमेतत् प्रतिपदं विचारयामः।

"प्रवर्तनालक्षणा दोषाः[4]" इति सूत्रनिर्दिष्टं सूत्रकाराणां महर्षिगौतमप्रभृतीनां मतम्। इदं सूत्रं व्याचक्षाणो भाष्यकार आह—"प्रवर्तना प्रवृत्तिहेतुत्वम्। ज्ञातारं रागादयः प्रवर्तयन्ति पुण्ये पापे वा। यत्र मिथ्याज्ञानं तत्र रागद्वेषौ" इति[5]। अपि चाहुः—"कर्मलक्षणाः खलु रक्तद्विष्टमूढाः। रक्तो हि तत्कर्म कुरुते, येन कर्मणा सुखं दुःखं वा लभते। तथा द्विष्टस्तथा मूढ इति। दोषा रागद्वेषमोहा इत्युच्यमाने बहु नोक्तं भवति" इति[6]। स्फुटत्वान्नेदं व्याक्रियते। रागद्वेषमोहाख्यदोषा एव पुण्यपापादिकर्मसु कर्तॄणां प्रवर्तका इति सूत्रकारभाष्यकारादिमतमनुसन्धेयम्।

---

१. तुलनार्थम्—Desire.

२. तुलनार्थम्—Wish.

३. तुलनार्थम्—Motive.

४. द्रष्टव्यम्—न्यायसूत्रम् १।१।१८

५. द्रष्टव्यम्—न्यायसूत्रभाष्यम् १।१।१८

६. द्रष्टव्यम्—न्यायसूत्रभाष्यम् १।१।१८

किञ्च, प्रतीच्यविचारका बेन्थम[1]-मिल[2]-प्रभृतयोऽपि मन्यन्ते यद्धि संवेदनमेव क्रियाप्रयोजकम्। प्रयोजकं हि तत्, येन कर्त्ता कर्मणि प्रयुज्यते। अतः संवेदनप्रयोज्या वै क्रिया इति द्वितीयं मतम्। तदेव विचारसौकर्य्याय प्राग् विचार्यते।

नेदं मतमस्मान् समीचीनं प्रतिभाति। मानवो हि खलु मननशीलो बुद्धिमान् प्राणी। नहि बुद्धयुपेतमन्धं संवेदनं निरतिशयेन क्रियां जनयितुं प्रभवति। यावन्न संवेदनं सङ्कल्पविकल्पात्मकचिन्तनेच्छारूपेण परिणमते, तावन्नहि संवेदनं प्रयोजकपदवीमधिरोहति। नूनं संवेदनं क्रियायाः प्रयत्नस्य वा निमित्तं भवति; किन्तु प्रयत्नाख्यक्रियाकरणं तु फलविषयकः प्रत्यय एव भवतीति बोद्धव्यम्। अस्मिन् विषये न्यायभाष्यवार्त्तिकतात्पर्यपरिशुद्धिकाराणामुदयनाचार्य्याणां व्याख्यानं नूनं विशेषेण समादरणीयम्। तैरुक्तम्—"फलगोचरौ मोहरागौ मोहद्वेषौ वा तत्तत्साधनविषयौ मोहरागौ मोहद्वेषौ वा जनयन्तौ पुरुषं प्रवर्तयतः[3]" इति। एतावतेदं स्फुटं जायते यद्धि रागद्वेषाख्यसंवेदने मोहाभिरूढे फलगोचरज्ञानासहकृते ज्ञातारं न प्रवर्तयतः; किन्तु फलगोचरप्रत्ययोपेते मोहाभिरूढे संवेदने जायमाने सत्येव ज्ञाता कर्मणि प्रवर्तते। अस्माभिर्यद् विवक्षितं तत्त्विदमेव यत् संवेदनमात्रं क्रियायाः प्रयोजकमिति मतमेकान्ततो नोपपद्यते। अन्यच्च, प्रयोजकलक्षणे फलज्ञानस्य महत्त्वमुदयनाचार्य्येणापि नूनमुररीकृतम्। सुतरां तावत् संवेदनं प्रयत्नस्य प्रयोजकं प्रेरकं वेति मतं न युज्यते, यतो हि संवेदनं न प्रेरयितुमलम्, यावन्न तदिच्छारूपां परिणतिमाधत्ते।

किन्तर्हि इच्छा एवैच्छिकक्रियाणां प्रयत्नसंज्ञिकानां प्रयोजिका? आहोस्वित् फलगोचरप्रत्ययः? यद्यपि सामान्यतो लोके इच्छायाः क्रियाप्रयोजकत्वमपि श्रूयते, तथापि द्वयोरेवेच्छाप्रयोजकयोर्लक्षणं स्पष्टीकरणमपेक्षते। लक्षणनिर्देशानन्तरं किमप्येकं मतं प्रतिपादयितुं निराकर्तुं वा शक्यते। इच्छा नाम कामाख्यशक्तिवेगस्यावबोधान्वितं रूपम्, येन शारीरिकं मानसं च विचारात्मकं (सङ्कल्पात्मकं चिन्तनात्मकं वा) प्रयतनं जन्यते[4]। एवम्प्राप्ते इच्छालक्षणे, इच्छा प्रयतनस्य प्रेरिका जनयित्रीति वक्तुं शक्यते। प्रयोजकं हि तत्, येन कर्त्ता प्रयत्नविशेषे कर्मविशेषे प्रयुज्यते। श्रीमन्तो वुडवर्थमहोदयाः प्रयोजकपदमस्मिन्नेवार्थे प्रयुञ्जाना आहुः—"मूलप्रवृत्तयो नैसर्गिक्यो विश्वास्याः क्रियाणां प्रयोजिकाः" इति। अतः प्रयोजकस्य किमप्यधिकं स्पष्टीकरणमपेक्ष्यते। फलगोचरं ज्ञानम्, यदधिकृत्य कर्त्ता कर्मणि प्रवर्तते, तद्वै प्रयोजकम्। इष्टफलाधिगमार्था प्रवृत्तिः पुरुषाणां दृश्यतेऽनिष्टोपरमार्था वा। सूत्रकारोऽप्येवं व्याचष्टे—"यमर्थमधिकृत्य प्रवर्तते तत्प्रयोजनम्" इति[5]। अस्य सूत्रस्यानुव्याख्यानं वात्स्यायनाचार्य्येणैवम्प्रकारेण कृतम्। तथा हि—"यमर्थमाप्तव्यं हातव्यं वा व्यवसाय तदाप्तिहानोपायमनुतिष्ठति, प्रयोजनं तद्वेदितव्यम्; प्रवृत्तिहेतुत्वात्। 'इममर्थमाप्स्यामि हास्यामि वा' इति व्यवसायोऽर्थस्याधिकारः। एवं व्यवसीयमानोऽर्थो-

---

१. तुलनार्थम्—Jeremy Bentham.

२. तुलनार्थम्—John Stuart mill.

३. द्रष्टव्या—न्यायसूत्रभाष्यवार्त्तिकतात्पर्यपरिशुद्धिः १।१।१८

४. तुलनार्थम्—A desire is a conscious drive or urge which prompts activity by way of action or thought.

५. द्रष्टव्यम्—न्यायसूत्रम् १।१।२४

ऽधिक्रियते" इति[१]। अतः प्रयोजकं प्रयोजनमिति च फलविषयकं व्यवसायात्मकं ज्ञानम्। तच्चाधिकृत्य क्रिया प्रवर्तते, न त्विच्छामात्रेण, नापि संवेदनमात्रेण। संवेदनजन्येच्छाप्रयुक्तं फलगोचरं ज्ञानं क्रियायाः प्रेरकमित्यवधार्यम्।

प्राध्यापकमैकेञ्जीमहोदया अपि प्रयोजकस्य लक्षणमेवंविधमेव प्रतिपादयन्ति। तद्यथा—"यदा कश्चन पुरुषः कस्मिंश्चित् कर्मणि प्रवर्तते, स तदा संवेदनातिरिक्तं साध्यस्य प्रत्ययमप्याश्रयते। नूनं प्रयोजकं तदेव यत् काम्यप्रापणायालम्, येन वयमिष्टमुपादातुं प्रभवेम" इति।[२]

अत्रेदं विवेचनीयम्। प्रयोजिका इच्छा समानविषयत्वादिति न वाच्यम्; यतः तत्रैको विशेषो वर्तते। इच्छा प्रायोऽनुद्बुद्धरूपा अविस्पष्टरूपा मिश्रिता वा दृश्यते। कदाचन तु व्यक्तिः स्वकीयेच्छानां हेत्वारोपणेन विचाराध्यायव्याख्यातचरेण रूपं प्रत्यवच्छिन्नं करोति। विशेषतो यदा तस्या इच्छाः समाजविरोधिन्योऽनैतिक्यो वा तदादर्शविप्रतिकूला वा भवन्ति, तदा नूनं तासां हेत्वारोपणं समुपलभ्यते। इच्छानां दमनेन हेत्वारोपणेन च व्यक्तिः स्वप्रयोजनानि यथाभूतानि न प्रकाशयति; किन्तु यथा तानि प्रशस्तानि प्रतिभान्ति, तथा सान्येभ्यः स्वप्रयोजनं प्रकटीकरोति। अतः प्रयोजनं हि तद्यत् कर्त्राविबोधदशायामङ्गीक्रियते, प्रकाश्यते च। कदाचन प्रयोजनसङ्घर्षोऽपि जन्यते; तदा व्यक्तिः किङ्कर्त्तव्यविमूढत्वमापद्यते, व्यक्तित्वं द्वैधीभूतं वा जायते, क्रियावरोधोऽकर्मण्यता वा दृश्यते। एतावतेच्छाया अपेक्षातः प्रयोजकस्य विशेषोऽवधारणीयः।

८. इच्छामूलप्रवृत्त्योः सम्बन्धविमर्शः

अस्माकं मुख्यतमानामिच्छानां यद्रूपं विद्यते, तत्सर्वं मूलप्रवृत्त्यनुबन्धि। मनुष्यो भोजनमिच्छति, स्वस्य स्वपरिवारस्य च सुरक्षां कामयते, जिज्ञासापूर्त्यर्थं नवीनमज्ञातं वस्तु ज्ञातुं प्रवर्तते कामयते वा, कामाभिप्रेतः परिणेतुमिच्छति, वात्सल्येन शिशौ स्निह्यति, त्रस्ताय बुभुक्षिताय अनाथाय वा धनं सुरक्षासाधनं वौषधं वा प्रयच्छति, आत्मनो वैभवबलविद्याप्रदर्शनार्थं विविधानां दम्भपूर्णसामाजिकायोजनानां समारम्भं करोति, प्रतिद्वन्द्विनं विजेतुं कामयते च। सर्वाण्येतानि नूनमिच्छाख्यानि मूलतो मूलप्रवृत्तिसमुद्भवानि। अत एव ता इच्छा अपि 'मूलेच्छाः' इति व्यपदिश्यन्ते। अस्मिन् विषये स्मर्त्तव्यमिदं यद्धि मूलप्रवृत्तयो निसर्गजाः। नहि तासां सर्वासां जन्मत एवं विकसितं प्रौढं रूपं समुपलभ्यते। समुचितकाले शरीरधातूनामुपचये शारीरिकसंस्थानानां विकासे जाते मूलप्रवृत्तिविशेषानुबन्धीच्छानां समुदयोऽपि सञ्जायते। किञ्च, स्वानुरूपोत्तेजकपदार्थविशेषं सम्प्राप्यैव तन्मूलप्रवृत्त्यनुबन्धीच्छानां समुदयो जायते। कदाचन तूत्तेजकपदार्थविशेषो बाह्यपरिस्थित्यायत्तः, कदाचिच्च प्रमातुराभ्यन्तरप्रत्ययविशेषानुचिन्तनेन स्मरणेन कल्पनेन च तादृशेच्छा उत्तेजिता जागृता वा सम्भवन्ति। उदाहरणतया मदीया भोजनेच्छा खल्वन्यं

१. द्रष्टव्यम्—न्यायसूत्रभाष्यम् १।१।२४

२. द्रष्टव्यम्—Mackenzie, manual of Ethics, PP. 51–52. "When a man is moved to action which he must have, besides the mere feeling, the conception of an end, to be attained. The motive that which induces us to act, is the thought of the desirable end."

पुरुषं स्वादिष्टभोजनमुपभुञ्जानं दृष्ट्वा समभिनिर्वर्तते। अपरस्मिन् काले स्वादिष्टभोजनालयोत्थ-पुपूलिकाशष्कुलिनिर्माणसुगन्धमात्रजन्या हि मदीयेच्छा जायते। अपि चान्यस्मिन् काले भुक्तपूर्वस्य श्रीखण्डस्य प्रत्ययस्मरणमात्रेणैव मदीयोत्कटेच्छा तद्भोजनविशेषमुपादातुं समुत्पद्यते। मूलप्रवृत्ति-विशेषे समुत्तेजिते सत्येव तद्विषयकेच्छासमुद्भवो जायते।

नहि योग्योत्तेजकपदार्थसमुपस्थितिः सर्वदैव मूलप्रवृत्तिविशेषानुकूलेच्छामुत्पादयति। कदाचन त्विदं दृश्यते यद्धि इच्छाविशेषे समभिनिर्वृत्ते सतीच्छाऽभावो कियत्कालपर्यन्तं जायते। तथा हि—

अपां हि तृप्ताय न वारिधारा
स्वादुः सुगन्धिः स्वदते तुषारः ॥ इति।

आकण्ठभुक्तश्रीखण्डशालिसुस्वादुशष्कुलिप्रभृतिपक्वान्नस्य नहि तदनन्तरमेव भोजनेच्छा समुत्पद्यते, तदभिनिर्वृत्तत्वात्। मूलप्रवृत्तिविशेषेऽपि तत्प्रतिकूलस्थायिभावादौ समुपस्थिते सति नहि तदुत्तेजकस्य क्रियाकारित्वं समुपलभ्यते। नहि विरक्तपुरुषस्य दम्भपूर्णदुकूलेषु इच्छा-विशेषः समुपलभ्यते, यथा हि भर्तृहरिवैराग्यशतके—

वयमिह परितुष्टा वल्कलैस्त्वं दुकूलैः
सममिह परितोषो निर्विशेषाविशेषः।
स तु भवति दरिद्रो यस्य तृष्णा विशाला
मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः ॥ इति[1]।

नहि सर्वदा कामः कामानामुपभोगेन शाम्यति; किन्तु कदाचन अवदमनेनासादितेच्छानामभावो जायते। केषुचित् परिशोधद्वारा प्रतिकूलोदात्तस्थायिभावनिर्माणेन, अथवा स्वानुकूलविषयानु-पलम्भाच्चिरं यावत् मूलप्रवृत्त्यनुरूपशरीरसंस्थानानां कुण्ठितत्वादुपनिरोधाद् वा हीच्छाविशेषाणां तिरोभावो जायते। नैष्ठिकब्रह्मचारिणामाजीवनकुमारिकाणां च कामप्रवृत्तिजनितेच्छानां परिशोष एव जायते। आत्मसंयमेन स्वनियन्त्रिता इच्छा देवत्वाय कल्पन्त इत्यूह्यम्। सुतरामिच्छानां मूलप्रवृत्तिविशेषैः सहातीव सन्निकृष्टसम्बन्धो वर्तते; तथापीच्छानां समुद्भवो यान्त्रिकक्रियावन्नोप-जायते यदा मूलप्रवृत्तिविशेषोत्तेजकपदार्थः सन्निधौ वर्तते। का हीच्छा प्रादुर्भविष्यति, का च नोत्पत्स्यते इति सर्वमुत्तेजकविषयायत्तमिति न वाच्यम्, यतो हि व्यक्तेः शारीरिकमानसिकावस्था-विशेषानुरोधेनेच्छाविशेषाः समुत्पद्यन्त इति।

६. इच्छास्थायिभावयोः[2] सम्बन्धः

यदृच्छाप्राप्तोत्तेजकपदार्थजन्यवेगरूपा इच्छाः सुकुमारतरे बाल्ये कामं भवेयुः, किन्तु शैशवं विहाय तदुत्तरमिच्छानामीदृशं रूपं क्वचिदपि नोपलभ्यते, रागद्वेषमोहभावस्थायिभाव-विशेषाकुलितत्वात्। पारिवारिकसामाजिकजीवनयापनशिक्षणाभ्यासादिना व्यक्तिसंस्थासमस्यावाद-विशेषमभि यादृशः स्थायिभावो व्यक्त्या सम्प्राप्यते, स एव तस्या इच्छानां रूपं निर्मिमीते। स्थायिभावाः सुदृढविचारात्मकलोकदृष्टिप्रभवा भवन्तीति सर्वे न्याख्यातचरम्। नहि सुदृढविचार-

१. द्रष्टव्यम्—भर्तृहरिवैराग्यशतकम् श्लो० ५०

२. तुलनार्थम्—Desire and sentiments.

भूमिमनादाय स्थायिभावा व्यक्तिसंस्थाविचारवादविशेषमुपरि नूनमभिनिर्वर्तन्ते। स्थायिभावानां निर्म्माणं व्यक्तेर्व्यक्तित्वस्य निर्णायके निश्चितरूपप्रदायकं यथा भवति तथा वयमग्रे वक्ष्यामः। यावच्चापल्यं वर्तते, शैशवं वर्तते। यावच्छैशवं वर्तते, विचाराणामदृढभूमिकत्वं वर्तते। यद्यपि शैशवेऽपि केचन स्थायिभावा अभिनिर्वर्तन्ते; यथा—मातृस्नेहः, पितृस्नेहः; भ्रातृस्नेहः; तथापि तेषु विचारविकासान्वितत्वमनुमातुं न शक्यते, नैसर्गिकमूलप्रवृत्तिप्रभवत्वात्। तदनन्तरं रागद्वेषभावस्थायिभावव्यापृता इच्छाः प्रादुर्भवन्ति। पशुजीवने मूलप्रवृत्तिवेगजन्या इच्छा विशेषेणोपलभ्यते। नहि तथा प्रौढन्यवहारानुगतमिच्छारूपं भवति। अहमिदं पुस्तकं लिखामि, यतो ह्यहं धनमुपार्जितुं काङ्क्षे। अथवा यशोलिप्सया प्रेरितोऽहं लिखामि। अथवा स्वान्तःसुखाय, आत्मज्ञानवैशारद्याय, गुरुजनपरितोषाय वा पुस्तकं मया लिख्यते। येन येन विचारविशेषेण प्रेरिता मदीयेच्छा भवति, नूनं सा हि ममाभिनिवेशस्य, मम रागद्वेषमोहजनितस्थायिभावस्य केन्द्रबिन्दुर्भवतीति निरवद्यम्। पिता पुत्राय कल्याणं कामयते, वात्सल्यस्थायिभावान्वितत्वात्। पारिवारिकसुखं शान्तिञ्च यः कामयते, स धनमुपार्जितुमिच्छति। अथवा वित्तोपार्जनेन ज्ञातिषु गौरवं लभते, अतः स धनोपार्जनलोलुपो भवति। स्वकीयं परिवारं प्रति यः स्थायिभावः समुत्पद्यते, स न केवलमभ्युदयप्रेप्सुत्वं करोति, प्रवासिनेऽपि धैर्यं व्याकुलतां वा प्रदत्ते। समानपरिस्थित्यामपि यदि वस्तुविशेषं प्रति दृष्टिभेदासादितस्थायिभावभेदो द्वयोः पुरुषयोर्भवेत्, नूनं तद्विषये तयोरिच्छाभेदोऽपि भविष्यतीति निश्चप्रचम्। सुतरामस्माकं रागद्वेषौ प्रियाप्रियस्थायिभावा अस्माकमिच्छानां स्वरूपं निर्धारयन्तीति निर्गलितं तथ्यम्। अनुभवप्रकर्षजन्या रागद्वेषस्थायिभावा भवन्तीति सर्वं वर्णितपूर्वम्।

१०. इच्छासङ्घर्षस्वरूपम्[1]

इच्छानां सङ्घर्षोऽपि कदाचन जायते। मानवानां स्थायिभावा नितान्तं जाटिल्यं बिभ्रति, तेषां विषया अपि बहुविधा भवन्ति। कदाचनेच्छानां भेदः स्थायिभावानां भेदादभिनिर्वर्तते। कदाचन चेच्छानां भेदः परिस्थितिभेदादुपजायते, यद्यपि खल्विच्छाविषयोऽभिन्न एवावतिष्ठते।

इच्छाविषयीभूते पदार्थे भिन्ने सत्यपि यथा दृष्टिभेदात् स्थायिभावभेदाद्वा विविधपुरुषाणां प्रतिक्रियासु वैविध्यमन्तर्निविशते। दृष्टिभेदोपोद्बलितं यद्भावानां सङ्घटनं व्यक्तिविशेषं वादविशेषं संस्थाविशेषं वादायामिसम्पद्यते, तदेव रागात्मिकानां वृत्तीनां परिणतिरूपः 'स्थायिभावः' इत्युच्यते; अभ्यासनैरन्तर्याच्चेदमुत्पद्यते। स्थायिभावशतानि हि तत्र भवन्ति। अतस्तेषां सङ्घर्षोऽपि कदाचन परस्परं सञ्जायते। एवम्प्रकारेण इच्छानां परस्परं विरोधित्वमप्यापाद्यते। तच्च द्विधा—प्रथमत एकस्मिन्नेव स्थायिभावे सत्यपि विविधानां परस्परं विरोधिनीनामिच्छानां सद्भावो दृश्यते। द्वितीयत इच्छानां परस्परं विरोधिभावस्य कारणं विरोधिस्थायिभावप्रभवत्वं भवति। एतत्सर्वं सोदाहरणमधस्ताद् व्याक्रियते।

कथं तावदिच्छानां विरोधित्वमेकस्मिन्नेव स्थायिभावे सत्यपि सञ्जायते? अत्र वयं ब्रूमः—वात्सल्यस्थायिभावे प्रकर्षङ्गते पिता पुत्रं लालयति, स्नेहेन स्नपयति च; किन्तु तस्यैव परीवादं श्रुत्वा, स्वाध्यायाद्विमुखं वा तं दृष्ट्वा ताडयत्यपि। नहि स्वपुत्रताडने वात्सल्यस्थायि-

---

१. तुलनार्थम्—Conflict of desires.

भावस्य तिरोभावो जायते। वस्तुतो यथा लालने तथैव ताडने स्थायिभावः पुत्रस्नेहप्रकर्षात्मकोऽक्षुण्णोऽवतिष्ठते। तथापि दृश्यते हि तज्जन्येच्छानां परस्परं विरोधित्वम्, परिस्थितिविशेषापादितत्वात्। नह्येतादृशेच्छाभेदो व्यक्तेर्व्यक्तित्वमसामान्यमनोविकारग्रस्तं करोति। यतो हि व्यक्तिः स्वयमेव तास्विच्छासु समन्वयं स्थापयितुं प्रभवति; किन्तु नहि तथा तादृशेच्छानां भेदो भवति, यादृश्यो विरोधिस्थायिभावसमुद्भवा भवन्ति। उदाहरणतो यदि वात्सल्येऽहङ्कारे च सङ्घर्षो जायेत, तर्हि नूनं तत्तत्स्थायिभावोत्थेच्छासु सङ्घर्षोऽपि भविष्यति। प्रह्लादहिरण्यकशिपुसंवादे वात्सल्यस्थायिभावं विजित्य हि खल्वहङ्कारस्थायिभावः सन्तिष्ठते। काः का यातना हिरण्यकशिपुना प्रह्लादाय बलाद् विरचिता इति कस्य सहृदयस्य चेतो न दुःखाकरोति। किन्तु खल्वहम्मन्यतायाः प्रकृष्टाया एवम्भूतं प्रदर्शनं मनोवैज्ञानिकदृष्ट्या नासम्भाव्यम्। महाराजदशरथेन प्रयाणकाले कैकेयिस्नेहरूपरतिभावस्य रामस्नेहरूपवात्सल्यस्थायिभावेन सह सङ्घर्षमवाप्य प्राणाः परित्यक्ता इति कस्य भारतीयस्य न श्रुतिगोचरम्? जायते हि खलु नैतिकधार्मिकदृष्टिप्रभवोऽपि दार्शनिकचिन्तनोपोद्बलितोऽन्यः स्थायिभावः। यथा नैतिकस्थायिभावस्य वात्सल्येन सह सङ्घर्षो जायते, तदेच्छानां विरोधित्वेन महती विचिकित्सा किङ्कर्तव्यतापत्तिश्चापद्यते। प्राय एतेषु स्थलेषु क्रियानिरोधो जायते, विलम्बाद्वा क्रिया प्रादुर्भवति, निर्णयविलम्बहेतुत्वाद्। अत्र वयं सुधन्वप्रह्लादवार्तालापनिदर्शनेन प्रह्लादस्य स्थायिभावविरोधेन जनितानामिच्छानां विरोधं स्फुटं करिष्यामः। तथा हि—

सुधन्वोवाच[1]—

उदकं मधुपर्कं च पथिष्वेवार्पितं मम॥
प्रह्लाद! त्वं तु मे तथ्यं प्रश्नं प्रब्रूहि पृच्छतः।
किं ब्राह्मणाः स्विच्छ्रेयांस उताहो स्विद् विरोचनः॥

प्रह्लाद उवाच—

पुत्र एको मम ब्रह्मंस्त्वं च साक्षादिहास्थितः।
तयोर्विवदतोः प्रश्नं कथमस्मद्विधो वदेत्॥

सुधन्वोवाच—

गां प्रदद्यास्त्वौरसाय यद्वान्यत् स्यात् प्रियं धनम्।
द्वयोर्विवदतोस्तथ्यं वाच्यं च मतिमँस्त्वया॥

अत्रेदं स्मरणीयं यद्धि केशिनीपरिणयोत्सुकौ सुधन्वविरोचनौ प्राणयोर्विपणे कृते क्रुद्धौ प्रह्लादं कः स्विच्छ्रेयान्? इति निर्णयितुमाजग्मतुः। प्रह्लादस्य नैतिकधार्मिकभावनायाः परिपाकः स्थायिभावरूप आसीदिति प्रागेव सुधन्वा "पुत्रस्यापि हेतोर्हि प्रह्लादो नानृतं वदेत्" इत्युक्त्वा साक्षीचकार।

प्रह्लाद उवाच—

मत्तः श्रेयानङ्गिरा वै सुधन्वा त्वद्विरोचन।
माताऽस्य श्रेयसी मातुस्तस्मात् त्वं तेन वै जितः॥

---

1. द्रष्टव्यम्—महाभारतम्, पृ० २१४४, श्लो० २६-३८ (गीताप्रेससंस्करणम्)

विरोचन ! सुधन्वायं प्राणानामीश्वरस्तव ।
सुधन्वन् पुनरिच्छामि त्वया दत्तं विरोचनम् ॥ इति ॥

अत्र स्पष्टमेव वात्सल्यस्थायिभावस्य धार्मिकनैतिकस्थायिभावेन सह सङ्घर्षः परिलक्ष्यते। तदर्थं प्रह्लादस्येच्छा अपि त्रिविधं मार्गमनुसरन्ती दृश्यते। अन्ततो गत्वा तेन महात्मना यो निर्णयः समावृत्तस्तेनापि तस्येच्छानां भेदस्तासां समन्वयश्च द्योत्यते। येषामिच्छाशक्तिः निर्णयशक्तिर्बलवती भवति, तेषामिच्छासु परस्परं विरोधिनीषु समन्वयो दुष्करो न भवति। किन्तु येषामिच्छासु समन्वयः पारितुं वा न शक्यते, तेषां विविधा असामान्यमनोविचारा जायन्ते। यदा द्वयोरिच्छयोर्विरोधो जायते, समन्वयाभावः प्रतीयते, तत्रेदं स्मरणीयं यद्धि इच्छाद्वयमात्रस्यायं विरोधो न वर्तते; किन्तु स्थायिभावविशेषान्तर्गतेच्छाग्रामयोऽयं[1] सङ्घर्षः, अथवैकस्य स्थायिभावस्यापरेण सह सङ्घर्षः, किं वा स्थायिभावसमूहस्यैकस्यापरेण स्थायिभावसमूहेन सहायं सङ्घर्षः समुपजायते। नूनं बहवः स्थायिभावाः कदाचन मिलित्वेच्छाद्वन्द्वं जनयन्तीति नाविदितं मनोविज्ञानार्वाचीनशेमुषीजुषाम्।

११. ऐच्छिकक्रियास्वरूपम्

ऐच्छिकक्रियैव प्रयतनमित्याख्यायते। निश्चयपूर्वकमिच्छासमन्वितं यत् कर्म, तत् 'प्रयतनम्' इति निगद्यते। किं मयेदं करणीयं न वेति प्रथमं विचिकित्सा जायते। यदा पक्षप्रतिपक्षविचारेण कश्चन निर्णयो जायते, तदा प्रयत्नस्य रूपमपि तेनैवावधार्यते। निश्चयाभावे हि क्रियानिरोधो जायते, दोलायति च कर्तुश्चेतः पक्षप्रतिपक्षदोलायाम्। कदाचन एव काँग्रेसप्रतिनिधिरनुमोदितव्य इति वितर्क उदेति। कदाचन तु एष प्रजासमाजवादसंस्थाप्रतिनिधिः समर्थनीय इति वितर्को जायते। पक्षप्रतिपक्षावधारणपूर्विका निरस्तसमस्तसंशयावकाशा या क्रिया प्रसरति सा 'प्रयतनम्' इति समाख्यां भजते। तस्यैते विशेषा मनोवैज्ञानिकप्रकाण्डवुडवर्थमहोदयानुसारं वर्ण्यन्ते।

(१) एवं तावत्प्रथमो विशेष ऐच्छिकक्रियाणां यदेतासु सुनिश्चिताभिप्रायमभिमुखीकृत्य क्रिया प्रवर्तते। विचारगोचरपूर्वाणां लक्ष्याणां सिद्ध्यै सप्रयोजना क्रिया प्रयत्नसंज्ञिका प्रवर्तते। परिस्थितिविशेषोपयुक्तसुनिश्चितानुकूल्योपस्थापनमिति[2] प्रथमो विशेषः।

(२) परिस्थितिविशेषोपयुक्तानुकूल्याभिनयत्वमिति[3] प्रयत्नस्य द्वितीयो विशेषः। अभ्यस्ताः क्रिया अनायासपूर्वकं प्रवर्तन्ते। ताश्च नहि विचारविवशसहकृता निर्णयपूर्विका इति वयं पूर्वमवोचाम। अभ्यस्तक्रियारूपं यन्त्रवदेकरसं दृढीभूतमनायासमभिसम्पद्यते; किन्तु नहि तथा ऐच्छिकक्रियाः। प्रयत्नेषु नवनवपरिस्थितिविशेषानुकूल्यस्थापनाय किञ्चित् कल्पनाविचारोहापोहजन्यमभिनवत्वमनुप्रविशति। नह्यैच्छिकक्रिया अनायासं प्रवर्तन्ते, विचारनिर्णयसमुद्भूतत्वात्। नहि प्रयतनानि यान्त्रिकक्रियारूपाणि भवन्ति, विचारेच्छोपेतत्वात्।

(३) परिस्थितिविशेषानुकूल्यगभीरत्वमित्यैच्छिकक्रियाणां तृतीयो विशेषः। यदि सप्रयोजनक्रियामार्गोऽनवरुद्धो भवेत्, क्रिया चाप्रतिहता प्रवर्तेत, तर्हि नानुकूल्यगभीरत्वस्य कार्या-

१. तुलनार्थम्—Systems of desires.

२. तुलनार्थम्—Precision of adjustment.

३. तुलनार्थम्—Novelty of adjustment.

वश्यकता जायेत ; किन्तु क्रियामार्गो यदि सकण्टको भवेत्, क्रिया वा प्रत्याशितफलमभि प्रवर्तते, तर्हि मानवा द्विगुणतरसमुत्साहपूर्वकं साध्यवसायं तत्प्राप्त्यर्थं प्रवर्तन्ते। तदा हि वयं ब्रूमः—अस्ति तस्यानुकूल्यविशेषगमीरत्वमिति[1], शक्तिसमुच्चयोत्थितत्वात्।

(४) परिस्थितिविशेषोपयुक्तानुकूल्यव्यापकत्वमिति[2] खल्वैच्छिकक्रियाणां चतुर्थो विशेषः। सप्रयोजना क्रिया हि पूर्वनिर्दिष्टानां निर्धारितचराणां लक्ष्याणामवाप्त्यर्थं प्रवर्तते। तस्याङ्गभूतानि विविधानि स्वतः प्रयोजनविरहितानि प्रतीयमानान्यपि तत्क्रियासमष्टिरूपेण सप्रयोजनात्मकं रूपं बिभ्रति। जटिलं हि कर्म समग्रत ऐच्छिकं प्रयोजनान्वितमिति निगद्यते। यथा स्वकीयनामाक्षराणि लिखन् कोऽपि पुरुषो नहि प्रत्यक्षरं ध्यानं कुरुते, समग्रनामाङ्कने तस्योद्देश्यं भवति। पृथग्भूतानामक्षराणां क्रमागतानां तु लेखनमनायासेन स्वत एवाभिनिष्पद्यते। नहि प्रत्यक्षरं ध्यानमपेक्षते। नापि मानवः प्रत्यक्षरलेखने सावहितो दृश्यते। स्वनामलेखनरूपो जटिलो मानसव्यापार एवैच्छिकक्रियाया लक्ष्यं भवतीति बोद्धव्यम्। समग्रव्यापारस्यैच्छिकक्रियारूपस्याङ्गभूता अन्ये व्यापारा नहि विशेषेण प्रयोजनविशेषान्विता भवन्ति। सिद्धं तर्हि चतुर्थो विशेष आनुकूल्यव्यापकत्वमिति।

१२. ध्यानैच्छिकक्रिययोः सम्बन्धविमर्शः

प्रयतनमिति नूनं ध्यानान्वितं कर्म। यद्ध्यानविरहितं कर्म तन्नैच्छिकक्रियारूपतामाधत्ते। ऐच्छिकानामुद्देश्यानां सङ्घर्षोऽपि ध्यानमपेक्षते। एकामिच्छां परित्यज्य तत्प्रतिकूलेच्छाग्रहणपरं निर्णयावधारणमपि ध्यानमपेक्षते। नहि ध्यानव्यतिरिक्तं पक्षप्रतिपक्षावधारणं सम्भाव्यते। गुणदोषविवेचनपूर्वको निर्णयः प्रतिपदं ध्यानमपेक्षते। नह्यनुपयुक्तोद्देश्यानां स परित्यागस्तावत् जायते, यावन्नाहङ्काराभिरूढो मानव एकमिच्छाविशेषमितिकर्त्तव्यताविनिश्चयेन साधीयांसमभिमन्यते। अध्यवसायोऽपि ध्यानान्वितो भवति। एञ्जेलमहोदयानां मते कोऽपि प्रत्ययः, यो नास्माकं ध्यानं समाक्रष्टुं प्रभवति, अस्माकं क्रिया अपि शासितुं नार्हति। वस्तुतो मानसिकव्यापारतयैच्छिकक्रिया ध्यानविषयापेक्षया न न्यूनाधिका भवति। यदस्माकं ध्यानविषयीभूतमेकं क्रियारूपं भवति, तदितरक्रियारूपाणि परित्यक्तानि च जायन्ते, तदा निर्णयस्तु सिद्धवस्त्वेव। स्वविचारसाधनैर्वयं भाविक्रियारूपाणि निश्चिनुमः, स्वक्रियाध्यानैकाग्रतापूर्वकं हि वयं कमपि खल्वेकं विचारविशेषं क्रियारूपेण परिणमयितुं प्रभवामः। ध्यानं नाम तत्कर्म भवति, येन मानसिकसम्भावना क्रियात्मकवास्तविकतामाधत्ते[3]। अतो ध्यानोपेताः प्रयत्नाः। प्रायो ध्यानोपेताश्चानायासक्रियाः, अभ्यासाः, सहजक्रियाः प्रयत्नाख्या व्यक्तेरात्माभिव्यक्तेः सर्वोत्कृष्टरूपाणि; ध्यानान्वितत्वादित्यवधार्यम्।

---

१. तुलनार्थम्—Intensity of adjustment.

२. तुलनार्थम्—Breadth of adjustment.

३. द्रष्टव्यम्—Angell, Psychology, PP. 402-403

१३. इच्छाशक्तिस्वरूपम्

श्रूयते हि श्रीमद्भगवद्गीतायाम्—

चञ्चलं हि मनः कृष्ण ! प्रमाथि बलवद् दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥ इति[१] ।

मनः सततं विषयप्रलोभनैः समाकृष्यते। कथङ्कारं तस्य निग्रहः कर्तुं शक्यते ? जना वदन्ति—'इच्छाशक्त्या मनोनिग्रहः कर्तुं शक्यते' इति। उदाहरणस्वरूपेण वयमेकां घटनां निदर्शयामः। एको मदीयमित्रवर्यः समागतः। तेन प्रार्थितोऽहं यत् 'झाँसी की रानी' इतिसंज्ञकं चलचित्रं द्रष्टुं मया सह समागच्छ इति। मत्सविधे कार्यद्वयमधुना वर्तते—अयमध्यायोऽद्य समापनीयः, अथवा मित्रवर्यस्याग्रहमङ्गीकृत्य तेन सार्धं चलच्चित्रदर्शनाय गन्तव्यम्। विकल्पद्वये किमप्येकं स्वीकर्तुमहं स्वातन्त्र्यमनुभवामि। क्षणद्वयं मदीया विचिकित्सा जायते—किं मित्रेण सह गन्तव्यम्, गृहे वा स्थातव्यमध्ययनसमाप्त्यर्थमिति। नहि चलच्चित्रं मह्यं रोचते। अतो मयाऽन्ततोगत्वाध्यवसीयते 'नहि मयाद्य गमनीयम्' इति। 'क्षन्तव्योऽस्मि मित्रवर्य ! लेखनभारादहमद्य गन्तुं नेच्छामि' इति। स्फुटमेवेदं यद्धि चलच्चित्रदर्शनजन्यप्रलोभनाद् भिन्नं निर्णयं कर्तुं किञ्चिदात्मनिग्रहोऽपेक्ष्यते। स चेच्छाशक्तिप्रभव इति प्रायो जना अभिमन्यन्ते। किं तावदिच्छाशक्तिस्वरूपम् ? किं चास्य निग्रहस्य स्वरूपम् ? किं मनसो निग्रहो मनसैव सम्पाद्यते ? किंस्विदिच्छाशक्त्या ? किं तावदिच्छाशक्तिर्मनस एव शक्तिविशेषो व्यापारविशेषो वा नास्ति ? एवंविधा बहवः प्रश्नाः समुपस्थिता जायन्ते, तेषां समाधानं कर्तुं वयमुत्सहामहे। अत्रेदं सर्वदा स्मरणीयम्—"शुभाशुभाभ्यां मार्गाभ्यां वहन्ती वासनासरित्" इति योगभाष्यकारमतानुसारं सर्वदा मनुष्यैः शुभाशुभप्रवृत्तिसङ्घर्षोऽनुभूयते। यदा सङ्घर्षं विजित्याध्यवसीयते—'अयं शुभो मार्गः', 'स एव मयाऽनुसरणीयः' इति निर्णयानन्तरं प्रवृत्तिरुदेति; सैव प्रयत्नाख्यां भजते। इच्छाप्रभवत्वात्सा ऐच्छिकी क्रियेति निगद्यते। किं मानवाः स्वतन्त्रेच्छासम्पन्नाः, अथवा कार्यकारणभावनियतिनिगडितस्तेषां व्यवहारो भवति ? स्वातन्त्र्यवादिनां कार्यकारणभावोपोद्बलितनियतिवादिनां तुमुलसङ्घर्षोऽपीच्छाशक्तिस्वरूपविमर्शेन समाधातुं शक्यते ।

१४. इच्छाशक्तिविषये विलियमजेम्समतम्

प्राध्यापकवरेण्या विलियमजेम्समहाभागा लोकप्रचरितमिच्छाशक्तिविषयकं मतं स्वकीये 'मनोविज्ञानस्य सिद्धान्ताः' इति नामके ग्रन्थे समुद्घाटयन्ति। तन्मते, अस्ति हि प्रायो दृष्टिगोचरो नैसर्गिकमूलप्रवृत्तिजन्येच्छाया आदर्शोद्देश्येन[२] सह सङ्घर्षः। सामान्यतो दृश्यते यद्धि मूलप्रवृत्तिजन्येच्छा आदर्शजन्येच्छाया अपेक्षातो बलीयसी भवति; किन्तु कदाचन, विशेषतो नैतिकधार्मिकमर्यादासम्पन्नेषु बुद्ध्युत्कर्षालङ्कृतेषु प्राणिषु, आदर्शोद्देश्यजनितेच्छानां बलीयस्त्वं दृष्टिगोचरं भवति। जेम्समहोदयानां मते पुण्यानुगाः प्रवृत्तयो हि तीव्रतमविरुद्धदिशि क्रियाविशेषा इति भवन्ति[३]। तेऽनुमन्यन्ते यद्धीच्छाशक्तिरिति काचन अव्यक्ता

१. द्रष्टव्या—श्रीमद्भगवद्गीता ६।३४

२. तुलनार्थम्—Conflict between instinctive desire or propensity and an ideal motive.

३. तुलनार्थम्—Acts in the live ef greatest resistence.

रहस्यमयी शक्तिः, तदनुगृहीतं निर्बलमपि ह्यादर्शोद्देश्यं मूलप्रवृत्त्यपेक्षया बलवत्तरेच्छां जनयितुमलम् । तथा च पुण्यवर्गीयाः प्रवृत्तय एवम्प्रकारेणासुरीः प्रवृत्तीर्विजयन्ते ।

१५. जेम्समतपरीक्षा

नैतन्मतं समीचीनं प्रतिभाति । अवैज्ञानिकं ग्राम्यकल्पनामण्डितं हि जेम्समहोदयाभिमतमिच्छाशक्तिस्वरूपव्याख्यानम् । नैसर्गिकशक्तिवेगात्मकमूलप्रवृत्तीनामभ्युपगमो यदि स्वीकृतो भवेत् तर्हि मूलप्रवृत्तिविरोधिशक्तिग्रहणाय कोऽप्यवकाशो नावशिष्यते । इच्छाशक्तिस्तर्हि इच्छायाः प्रकारविशेष एवेत्यवगन्तव्यः । अत इच्छाशक्तिर्मूलप्रवृत्तिनियामिका, अथवा अशुभप्रवृत्तिनियामिका, किं वा सर्वासामिच्छानां निग्रहे समर्था शक्तिर्भवतीति न वाच्यम् । यदा लोके इदं श्रूयते—'दुर्बलेच्छाशक्तिरयं माणवकः; यतो हि स कामप्रवृत्तेर्निग्रहं कर्तुं न प्रभवति' इति, तदैतावदेवावबोध्यं यद्धि तस्य ब्रह्मचर्य्यव्रतानुष्ठानेच्छा काममूलप्रवृत्तिजन्येच्छापेक्षातो दुर्बलतरा, यद्वा तस्य माणवकस्य शुभकर्मेच्छाऽशुभकर्मेच्छापेक्षया दुर्बलतरा भवति । वस्तुत इच्छाशक्तिस्वरूपावगमे लोके महान् व्यामोहः प्रचलति । नैतिकभावनां धार्मिकीमिच्छां वा वयं सर्वोपरि प्रतिष्ठाप्य तामिच्छाशक्तिरिति ह्यलङ्कारभूतव्यपदेशेन सज्जीकर्तुं प्रयतामहे । एतावता शुभकर्मानुगेच्छा सर्वाभ्य इतरेच्छाभ्यः पृथक्कृता इव प्रतीयते, यद्यपि इच्छात्वं समानमेव शुभाशुभेच्छयोः । यदा लोका वदन्ति—'दुर्बलेच्छाशक्तिरयं माणवको धनाभावेऽपि चलचित्रदर्शनव्यसनलोलुपः' इति, तदा 'माणवको दुर्बलेच्छाशक्तिः' इति न साधु व्याख्यानम्, अपि त्वेतद् वक्तव्यं यत्तस्य शुभकर्मानुगेच्छाऽशुभकर्मेच्छाया व्यपेक्षातो दुर्बलतरेति ।

अर्वाचीनमनोविज्ञानाचार्य्याणां मते इच्छा नहीच्छाशक्तिविशेषप्रवर्त्या, नापि शक्तिविशेष एव । तत्त्वत इच्छाशक्तिरिति वेगमात्रम्, येन कर्म आरभ्यते । नहीच्छाशक्तिः कश्चन शक्तिविशेषो येन मयेतिकर्त्तव्यमिति निश्चीयते । अध्यवसायो बुद्धिधर्मः । स च नेच्छाशक्तिव्यपाश्रितः । ननु किं कर्म करणीयमिति न इच्छाशक्त्या निर्णीयते । यदिच्छाशक्त्या द्योत्यते तत्तु क्रियावेगरूपम्, येन कश्चन निर्णयः कार्यरूपतामाधत्ते । यदोद्देश्यद्वयं परस्परं विरुध्यते, तदा यदन्यदुद्देश्यमतिशेते, तदेव गरीयो भवति, विजयीभवति । एकस्य कर्मप्रचोदकोद्देश्यविशेषस्यान्यापेक्षया गरीयस्त्वमेव इच्छाशक्तिरिति तात्पर्यम् । यदि कश्चनोद्देश्यविशेष इतरोद्देश्यापेक्षया बलीयान् भवति, तर्हि तस्य बलाबलमात्रामपेक्ष्यैवेच्छाशक्तिवेगो भवतीत्यध्यवसेयम् । यदि खलूद्देश्यद्वयं समानबलं भवेत्तर्हि तज्जन्येच्छाशक्तिर्दुर्बला, क्रियाह्रासो क्रियानिरोधो वा जायते । अत्रेदं स्मर्त्तव्यम्—नहीदृशो विरोध एकस्येच्छाविशेषस्यान्येनैकेनेच्छाविशेषेण सहैव भवति, अपि तु परस्परं विरुध्यमानेच्छाग्रामयोरयं सङ्घर्षो भवति । यदि कदाचन खल्वादर्शोद्देश्यं दुर्बलं प्रतीयेत, तर्हि तस्य कारणं तदिच्छासमूहविशेषे आत्मप्रतिष्ठात्मकस्थायिभावस्य स्वाभिमानाख्यस्य महत्त्वमस्माकं दृष्टिपथं नायाति । आत्मप्रतिष्ठात्मकस्थायिभावस्वरूपं वयमग्रे पञ्चदशेऽध्याये व्यक्तिस्वरूपव्याख्यानावसरेऽनुव्याख्यास्यामः । इच्छाशक्तिस्तर्हि विविधबलाबलयुक्तानामुद्देश्यानां सङ्घर्षसमुत्था । सा च बलिष्ठस्थायिभावनिरूढेच्छासमूहस्य दुर्बलस्थायिभावानुगतेच्छाजालस्योपरि विजयस्य चरमा कोटिरिति ।

अन्यच्च, यदा बुद्धिप्रयुक्तहेतुभिरुपोद्बलितः कश्चन निर्णयो जायते, तदनन्तरं तेन निर्णयेन चाभिप्रेरितः सन् कर्मण्यभिप्रवृत्तो भवति; तदा तेषां हेतूनां बलाबलायत्तो हि खल्विच्छाशक्तिवेगो भवति। भावप्रकर्षो नूनमिच्छाशक्तिं वर्धयति; किन्तु स फल्गुत्वमापद्यते, यदि तद्विरोधिहेतु-सामर्थ्यमतिरिच्यते। भावप्रकर्षो ज्ञानारूढः सन्निच्छाशक्तिं द्रढयति। यदि कश्चन मनुष्यः कस्याश्चित् समस्यायाः पक्षविपक्षसमर्थकहेतुविमर्शं कर्तुं शक्नोति, तर्हि नूनमस्य क्रियाशैथिल्यं जायते, उभयपक्षदोषगुणज्ञानं भावप्रकर्षजन्यं क्रियावेगह्रासं नयति। १९९९ वैक्रमाब्दे श्रावणमासे यदा अखिलभारतीयकाँग्रेसेन महात्मनां प्रातःस्मरणीयानां गान्धिमहोदयानां नेतृत्वे 'भारताद् गच्छत' इति डिण्डिमघोषपूर्वकमान्दोलनं प्रवर्तितम्, तदाऽस्माभिर्दृष्टं यद् भारतीयसैनिकाः कूपमण्डूका इव तदानीन्तनैराङ्गलशासकैर्निखिलराष्ट्रियक्रान्तिसमाचाराविदिताः कृताः। कस्मात्? ज्ञायमानाः पक्षविपक्षगुणदोषा भावप्रकर्षजन्यां राजभक्तिं शिथिलीकुर्वन्ति, स्वजनान् प्रति सहानुभूतिं च भारतीयसैनिकेषु जनयन्तितराम्।

सुतरां तावद् यदा निर्णयोऽध्यवसीयते, तदा तत्कारणसामग्र्यां तात्कालिकानुभवितुर्भाव-संवेदनादिप्रकर्षावस्थाजन्येच्छाः, हानोपादानादिप्रभावोत्पादकविचारानुभवस्मृतिविशेषाः प्रस्तुत-विषयस्य पूर्वार्जितज्ञानसंस्काराश्च अन्तर्भावयिष्यन्ते, निर्णायकस्य च ते तदानीन्तनमानसिकावस्था-निर्माणमापादयन्ति। अथवा वयं पक्षविपक्षविमर्शानन्तरं निर्णयं कर्तुं प्रभवामः; किन्तु स निर्णयोऽ-प्यस्माकं नैसर्गिकप्रकृतिशिक्षणाभ्यासार्जितस्वभावप्रभृतिसम्पद्भूपैर्भावैरेव मीयते। एतावता प्रति-फलितमेतद् यद्धि नूनस्माकं निर्णयो नियतकारणसामग्रीजन्य एव। इच्छाशक्तिश्चेत्थं निर्णयतुलाया मानाध्ययनम्, प्रतिफलितं मानं वेति। न तु किञ्चिदन्यत्, यत्प्रतिफलितमानस्यैच्छिकक्रियारूपस्य पूर्ववर्ति वक्तुं शक्यत इति।

१६. इच्छास्वातन्त्र्यस्वरूपम्

उपर्युक्तविवेचनेन इच्छास्वातन्त्र्यवादिनां कार्यकारणनियतिवादिनाञ्च विचारवैषम्यं समा-धानमर्हति। अस्ति हीच्छास्वातन्त्र्यम्, यतो हि तज्जनकनिर्णयोऽस्माकं भवति, नहि केनाऽ-प्यन्येनादिष्टोऽयं भवति, किञ्च, निर्णयं कर्तुमकर्तुमन्यथाकर्तुं वा सर्वमस्मदायत्तम्। अत एवैच्छिकः प्रयत्नोऽपि स्वतन्त्र एवेति। परपुरुषानधीनत्वात्, निसर्गजन्यान्धमूलप्रवृत्तिवेगा-परिचालित्वाच्च सार्थकमैच्छिकाचरणस्य स्वातन्त्र्यम्।

किन्तु कार्यकारणात्मकनियतिवादिनामभ्युपगमोऽपि फल्गुतां नापद्यते। ऐच्छिकमाचरणं नहि कारणविरहिता घटना। नापीदं यदृच्छया प्राप्तम्; अपि तु तात्कालिकमस्माकं विचारेच्छा-भावसंवेदनकल्पनास्मृतिप्रभृतिमानसिकावस्थाविशेषं हेतुस्वरूपमुपादाय निर्णयः प्रतिफलितो भवति। कारणं नियतम्। नियतपूर्ववर्तिकारणजन्यं कार्यम्। अस्माकं स्वरूपमस्मिताख्यमप्यभिन्नमेव। सुनिश्चिताश्च तत्तन्मानसिकावस्थाविशेषाः कारणजातान्तर्गताः। नियते कारणे नियतं सुनिश्चितं कार्यं समुत्पद्येत, तर्हि कथङ्कारं कार्यकारणभावनियतिवादिनां मतस्यापलापः कर्तुं शक्येत? ननु समान-परिस्थितौ प्रतिपुरुषं भिद्यमानमाचरणं द्योतयति यद्धि इच्छास्वातन्त्र्यवादिनां मतमुपपद्यते, न तु कार्यकारणभावनियतिवादिनां मतमिति? नेदं वाच्यम्। ऐच्छिकप्रयतनस्य स्वरूपावबोधो यदि सम्यक्तया भवेत्तर्हि खल्वस्या आशङ्काया अवकाशो नावशिष्यते। वस्तुतोऽस्माकमाचरणमेव,

ऐच्छिकं प्रयतनमेवेति यावत्, कार्यकारणभावगर्भितम्। कस्मात्? अस्माकं विचारेच्छानिर्णय-नियन्त्रितत्वादाचरणमेव कार्यकारणभावान्वितं तत्त्वतो भवति। अनैच्छिकं यदृच्छया प्राप्तं वा प्रयतनम्—नहि तत्प्रयतनमपीति वक्तुं शक्यते, क्रियेति तत्स्वरूपत्वात्—अन्धमूलप्रवृत्तिजन्यं वा कर्म स्वतन्त्रं भवतीति सर्वमवदातम्। ऐच्छिकं प्रयतनमाचरणाख्यं स्वतन्त्रम्, आत्मनियन्त्रितम्, आत्माभिव्यञ्जकञ्चेति। न च तत्कारणविरहितम्, पूर्वोक्तहेतोः। अस्माकं व्यक्तित्वं पराकाष्ठां नूनमैच्छिकप्रयतने स्वात्माभिव्यञ्जके स्वात्मनियन्त्रित एव लभत इत्यवधार्यम्।

१७. इच्छाशक्तिसम्प्रयोग.[1]

ननु कदा खल्विच्छाशक्तिसम्प्रयोगावसरो जायते? कदाचन निर्णयो महदाभ्यन्तरद्वन्द्वा-नुभवनानन्तरमापद्यते। नाचिकेतोपाख्याने श्रूयते—

श्रेयश्च प्रेयश्च मनुष्यमेत-
स्तौ सम्परीत्य विविनक्ति धीरः।
श्रेयो हि धीरोऽभि प्रेयसो वृणीते
प्रेयो मन्दो योगक्षेमाद् वृणीते॥ इति[2]।

अयं पुरुषो विवेकपूर्वकं यदाचरति, श्रेयस्करमार्गमनुसरति। यदा त्वस्येन्द्रियसुख-प्रलोभनेन चेतः समाकृष्यते, तदा लोभनीयं प्रियं पदार्थमुपादातुं प्रवर्तते। स्वकीये व्यवहारे सर्वत्र शुभाशुभकर्माणि पुरुषं बध्नन्ति। लोकसिद्धं शास्त्रप्रतिपादितं श्रुत्याम्नातञ्च तयोः श्रेयःप्रेयसोः पार्थक्यम्। तथाहि—

अन्यच्छ्रेयोऽन्यदुतैव प्रेय-
स्ते उभे नानार्थे पुरुषं सिनीतः।
तयोः श्रेय आददानस्य साधु
भवति हीयतेऽर्थाद्य उ प्रेयो वृणीते॥ इति[3]।

श्रेयस्करं मार्गं नहि सर्वदा सौकर्येण प्राप्तुमर्हति। महच्चिन्तनम्, आत्मद्वन्द्वमनुभूय, विवेकपूर्वकं यदा पुरुषो निर्णयं कुरुते, तदा श्रेयांसि विन्दते। यदा बुद्धेन बोधित्वं सम्प्राप्तम्, तथा 'मार' इतिसंज्ञकेन कामदेवेन भूयसी प्रताडना कारिता। नैषा प्रताडना शारीरिकी, प्रत्युत मानसिकी आसीत्, कामप्रवृत्तिप्रभृतिमूलप्रवृत्तिजन्या वेति। देवासुरसंग्रामोऽहर्निशं प्रवर्तते सर्वेषां कर्त्तव्यपरायणानां चेतःसु। इच्छाशक्तिसम्प्रयोगस्य विशेषावसरो नूनं यदा आयाति, तदा निगूढस्थायिभावोपात्तेच्छाजालयोः द्वन्द्वेन सङ्कुलिता भूत्वा वयमायास-विशेषपूर्वकं कर्मणि प्रवृत्ता भवामः। तदा कर्त्तव्यनिश्चये, येन नैतिकं कर्म समारभ्यते, अभूतपूर्वा तितिक्षा च प्रदर्श्यते। यदा हरिश्चन्द्रेण सत्यसन्धेन राज्यमपि सकोषं महर्षिविश्वामित्राय प्रदत्तम्, तदा तस्येच्छासम्प्रयोगस्य नूनं विशेषावसर आसीत्। ये हि खलु धार्मिकवरेण्याः, तेषां धर्माचरणं

१. तुलनार्थम्—Effort of the will.

२. द्रष्टव्या—कठोपनिषत् २।२

३. ,, ,, २।१

विशेषेणाभ्यस्तकर्म इव प्रतीयते। बहुकालं यावच्चिन्तनेन, अनिश्चयेन चायासो जन्यते, अत्यधिकविवेकपूर्वकत्वान्निर्णयस्य। प्रबलतरविरोधिस्थायिभावजनितेच्छाजालप्रशमनायाऽभूतपूर्वं प्रयत्नमपेक्ष्यते। अतो यदा इच्छाद्वयस्य तीव्रं द्वन्द्वं भवति, तदा इच्छाशक्तिरपि विशेषेण सम्प्रयुक्तेव प्रतिभाति। विरोधिस्थायिभावस्य परिशोधेन तदनुबन्धीच्छाजातं प्रशाम्यति; किन्तु यदा मूलप्रवृत्तिप्रकर्षेण स्थायिभावोपात्तेन इच्छाजालं बलवत्तरं भवति, तदा तस्य निग्रहो दुःसाध्यः। तेन क्षीयते चास्य क्रियोत्साहः। अक्रमो वा क्रियासमूहो दृश्यते। कदाचनैकप्रकारकमुद्देश्यं क्रियामारभते, कदाचनान्यप्रकारकम्। एष हि दुर्निवारोऽसामान्यमनोविकारः। तस्य वर्णनमग्रिमे षोडशेऽध्याये वयं करिष्यामहे। प्रबलतरेच्छादमनं निरन्तरं पश्चात्तापं जनयति। तिरस्कृतेच्छाजालं यतो ह्यस्माकमेव, अस्माकं व्यक्तित्वस्याङ्गभूतमेव; अत एव यदा तत्प्रशाम्यते निराक्रियते वा तदा महद्दुःखमनुभूयते, आयासपूर्वकं च इच्छाशक्तिसम्प्रयोगेण निर्णीतं कार्यमारभ्यते। अशुभप्रवृत्तिपरिशोध आयासं ह्रासमानयति, शुभकार्यसमारम्भे सौकर्य्यमावहति चेति तात्पर्यम्।

१८. क्रतुस्वरूपम्

कामक्रतुकर्मादिकस्य क्रमनिर्देश एवम्प्रकारेण पूर्वाचार्यैर्वर्णित उपलभ्यते। तथा हि शब्दकल्पद्रुमे—

रुचेरतिशयः काम्ये वस्तुनि क्रतुरीर्यते।
कामः क्रतुः कर्म जन्म इत्येतेषां क्रमो भवेत्॥ इति।

१९. इच्छाशक्तिसंवर्धनम्

ननु किमिच्छाशक्तिः संवर्धयितुं शक्यते? अथवा किं तावदिच्छाशक्तेः प्रशिक्षणं सम्भाव्यते? लोकानुगृहीतमिदं मतं यद्धि खल्विच्छाशक्तिप्रशिक्षणं जायते, इच्छाशक्तिः संवर्धतेऽपि चेति। प्रायो जनाः शिक्षायाश्चरममुद्देश्यमिच्छाशक्तिसंवर्धनमेवेति मन्यन्ते। इच्छाशक्तिस्वरूपमस्माभिर्वर्णितपूर्वम्। नहीच्छाशक्तिः दैवी काचिद्रहस्यगर्भिता शक्तिः, अथवा मानसिकशक्तिविशेष एव, यस्य संवर्धनं प्रशिक्षणं वा सम्पाद्येत। इच्छाशक्तिर्नाम निर्णीते कर्मणि इच्छातिशयजन्यवेगपूर्विका प्रवृत्तिरेवेति। अतो लोकानुरञ्जनपरं मतमिच्छाशक्तिविषयकं निरसनीयम्।

अस्ति ह्येकं निदर्शनं सामान्यलोकानुगृहीतमतोपोद्बलकम्। प्रतिदिनं किमप्यप्रियकार्यसमाचरणेन इच्छाशक्तिः संवर्धते। यथा रमणीयां चित्रावलीं रमणीयं वा चलचित्रं द्रष्टुं यदि कामना भवेत्, तर्हि सेच्छा परिहर्त्तव्या। यद्यल्लोभनीयं रमणीयमिन्द्रियस्पर्शजन्यं सुखं तत् परित्यज्य तितिक्षा सम्पाद्यते, तितिक्षयात्मवशित्वमात्मनिग्रहो वा जितेन्द्रियत्वं प्रापयति। तथा हि मनुर्भगवानब्रवीत्—

दृष्ट्वा श्रुत्वा च स्पृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः।
न हृष्यति वा ग्लायति स विज्ञेयो जितेन्द्रियः[1]॥ इति।

किञ्च, भगवान् हृषीकेशोऽप्याह श्रीमद्भगवद्गीतायाम्—

मात्रास्पर्शास्तु कौन्तेय! शीतोष्णसुखदुःखदाः।
आगमापायिनो नित्यास्ताँस्तितिक्षस्व भारत॥

---

१. दृष्ट्वा—मनुस्मृतिः

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ !
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥ इति[1]।

नूनमिन्द्रियसंयमः शिक्षायाश्चरमं लक्ष्यम्। ननु कथङ्कारमिच्छाशक्तिविषयकसामान्यजनमते निराकृते तत्सम्भाव्यते। अत्रोच्यते—प्रागुक्तमेवाऽस्माभिरभ्यासशिक्षणादिविवेचनीयेऽध्याये यद्धि भवन्ति हि खल्वभ्यासविशेषाः; यथा—शारीरिकाभ्यासाः, मानसिकाभ्यासाः, सामाजिकव्यवहाराभ्यासा इति। तस्यैते गुणविशेषा भवन्ति—

(१) अभ्यासनिर्माणेन क्रिया विलम्बेन प्रवर्तते।

(२) कार्यसम्पादनविधौ सौकर्यं समानरूपत्वञ्चायाति।

(३) अभ्यस्ताः क्रियाः स्खलितविरहिता विशुद्धाश्च भवन्ति।

(४) प्रौढाभ्यासेषु ध्यानापेक्षा प्रतिपदं न विद्यते।

(५) तथापि क्रियासौष्ठवं सौकर्यञ्चाबाधितमवतिष्ठते। अभ्यासध्यानविशेषापेता अपि अनायासेन सम्पाद्यन्ते।

(६) अभ्यासा महत्कष्टेन कालेन चापाकर्तुं शक्यन्ते।

(७) अभ्यासानां परिपाके क्लान्त्यभावोऽनुभूयते।

क्लान्तिकारणं मृदुनाडीद्रव्यस्य स्थायिसंस्काराभावे विरोधो भवति। यदा कश्चनाभ्यासः सञ्जायते, तदा मृदुनाडीद्रव्ये क्रियोपयोगि चेष्टावाहिनाडीकन्दाणुकानामविरोधात्मकक्रियाकारित्वमपाक्रियते। नवीनोऽभ्यासोपयोगिमार्गश्च प्रशस्तो जायते। एतत्सर्वं प्रागेवास्माभिः प्रपञ्चितम्। एतावतेदमायाति यद्धीन्द्रियजन्यसुखतिरस्कारेण आत्मनिग्रहजन्यात्मप्रतिष्ठारूपस्थायिभावो द्रढिमानं लभते। शमदमतपःप्रभृतिनियमानामनुपालनं नहि केवलमिन्द्रियसुखमात्रविवर्जनेन कृतकृत्यतां लभते, अपि तु शुभाभ्याससंस्कारक्षमत्वप्रदानेन। यद्यस्माकमात्मप्रतिष्ठाभावः स्थायिभावत्वमवाप्नोति, अवश्यं तर्ह्यस्मास्वियं योग्यता समुत्पत्स्यते-किं शुभम्, किं चाशुभम्, किं मदीयं हितमावहति ? किं च मां विपत्तिकुक्षौ निपातयिष्यति ? किं वा मदीयाय निःश्रेयसे कल्पते, किञ्चाऽभ्युदयाय ? इति। आत्मप्रतिष्ठाभावे समुत्पन्ने सुस्थिरे च जाते, सर्वगुणनिधिरूपाणां शुभाभ्यासानां बीजवपनाय भूमिः सुलभा जायते। स्मरणीयं यद् विषयोपरतिः विषयैपरित्यागो वा यदि स्वेच्छाजन्यः स्वविचारोहापोहसमन्वितो भवेत्, तर्हि स आत्मवशित्वाय ब्रह्मचर्यप्रतिष्ठायै च कल्पते; किन्तु यदि परपुरुषप्रयुक्तमिच्छाविषयपरित्यागाय नियन्त्रणं बालकोऽवाप्नोति, तस्यापकाराय तदनुशासनं भवति। औचित्यमर्यादामतिक्रम्य दण्डविधानपूर्वकं यदा बालकानामनुशासनं क्रियते, नियन्त्रणं सम्पाद्यते, तदा तेषां मूलप्रवृत्तिजन्येच्छाग्रामः सङ्कोचविशेषात् त्रासाच्च गुरुजनप्रभृतिलोकभयादन्तश्चैतन्ये तैजसाख्येऽवदमितो जायते। परप्रयुक्तमवदमनं बालकानां हि विषम्। अनैतिकभावनानां स्तेयाशौचानृतवादित्वविश्वासघातपारदारिकत्वाद्यसामाजिकदोषाणां नूनमव-

---

1. द्रष्टव्या—श्रीमद्भगवद्गीता २।१४-१५

दमनमेव बीजम्। तच्च वर्ज्यम्, सर्वैरेव हातव्यम्। अशुभप्रवृत्तीनां परिशोध आत्मप्रतिष्ठारूप-स्थायिभावोत्पादनेन करणीयः। नहि सर्वेन्द्रियविषयाणां परित्यागेन, अपि तु विवेकपूर्वकं हितावह-विषयाणां सम्यक्तयावचयनेन, अहितोपघातिपदार्थवर्जनेन च सदाचारबीजारोपणं क्रियते। विवेक-विकासः सुस्थिरनिर्णयाय कल्पते, इच्छाशक्तिश्च संवर्धते इत्याभासः समुत्पद्यते। येषामीदृशः सदाचारशेवधिः, त एव मनस्विनः, तेषां किमपि दुर्लभं नास्ति।

तदुक्तं हि महाकविमाघेन—

तुङ्गत्वमितरा नाद्रौ नेदं सिन्धावगाधता।
अलङ्घनीयताहेतुरुभयं तन्मनस्विनि ॥ इति[1]।

इति अर्वाचीने मनोविज्ञाने ऐच्छिकक्रियाविवेचनीयश्चतुर्दशोऽध्यायः॥

---

1. द्रष्टव्यम्—शिशुपालवधम् २।४८

पञ्चदशोऽध्यायः

व्यक्तित्वविवेचनम्

१. विषयोपोद्घातः

पूर्वमस्माभिश्चिन्तनसंवेदनप्रयत्नाख्यत्रिविधमनोव्यापाराणां साङ्गोपाङ्गं विवेचनं सम्पादितम्। अथातो वयं व्यक्तित्वमनुव्याख्यास्यामः। ननु किमिति व्यक्तित्वं नाम? लोकव्यवहारेऽयं शब्दो विविधेष्वर्थेषु प्रयुज्यते। प्रायो व्यक्तिगतमाकर्षकत्वं मनोहारित्वं व्यक्तित्वमित्युच्यते। मनोहारित्वमित्यपि स्त्रीणां पुरुषानुरागजनकत्वम्, पुरुषाणाञ्च स्त्रीमनोमुग्धकारित्वमिति विशिष्टेऽर्थे प्रयुज्यमानमुपलभ्यते। केचन व्यक्तित्वमिति पदेनाव्यक्तरहस्यमयपरपुरुषचित्ताकर्षकशक्तिविशेष इति व्याहरन्ति। अस्य पदस्य प्रयोगः कदाचन बौद्धिकभावात्मकगुणाभिव्यञ्जनायापि दृश्यते। मनोवैज्ञानिकानामपि व्यक्तित्वस्वरूपनिर्वचने मतैक्यं नोपलभ्यते। केश्चन व्यक्तित्वमिति पदं स्वभावचरित्राद्यनुगतगुणविशेषार्थे प्रयुज्यते। अपरे ईषद्व्यापकतरेऽर्थे व्यक्तित्वपदं व्याहरन्ति। तन्मते निखिलमानसिकशारीरिकविशिष्टगुणजातं व्यक्तित्वपदार्थान्तर्गतम्। अस्माभिरत्र विविधदृष्टिसमन्वयेन निष्पन्नं व्यक्तित्वस्वरूपमेव व्याकरिष्यते।

२. व्यक्तित्वसङ्घटनम्

व्यक्तित्वं नाम व्यक्तेर्विविधमानसिकव्यापाराणां मूलप्रकृतिचिन्तनसंवेदनविचारकल्पनाप्रयतनप्रभृतीनां समन्वयात्मकं सामञ्जस्यपूर्णं रूपम्। व्यक्तित्वं तावद् द्विविधं भवति—सङ्घटितं व्यक्तित्वम्[1], असङ्घटितं व्यक्तित्वञ्चेति[2]। यदा व्यक्तेर्ज्ञानानुकूलाः भावाः, भावानुकूलं प्रयतनञ्च भवति, बुद्धिभावेच्छाप्रयतनादिव्यापारेषु विप्रतिकूलत्वं नोपलभ्यते, तदा तस्या व्यक्तेः सङ्घटितं व्यक्तित्वं भवति। यदा तेषु तेषु व्यापारेषु परस्परं प्रतिकूलकारित्वं जायते, तदा तस्या व्यक्तेरसङ्घटितं व्यक्तित्वमिति निगद्यते। भयं प्राणिनां मूलप्रवृत्तिरिति व्याख्यातपूर्वम्। यदि काचन स्त्री कश्चन पुरुषो वा वृकस्योपस्थितौ भयमनुभवति, तत्तु समीचीनम्। किं वा यदि कश्चन सशस्त्रचोरेभ्य आतङ्कितो जायते, भयं वाऽन्वेति, तदपि समञ्जसम्; किन्तु यदि कश्चनाकारणमेव भयमन्वेति, भयकारणेऽवस्तुभूतेऽविद्यमानेऽपि त्रासमनुभवति, अनुक्रोशं च कुरुते भयकारणविशेषाभावेऽपि, तर्हि तस्य पुरुषस्य व्यक्तित्वमसङ्घटितमिति वक्तुं शक्यते; तस्येन्द्रियजन्यप्रत्यक्षसंवेगानुभूत्योः सामञ्जस्याभावात्।

ईदृशं भयं नूनमसामान्यमानसिकीष्ववस्थासु परिलक्ष्यते। प्रत्यक्षानुकूला संवेगानुभूतिर्नास्ति, अत एव कथं तस्य व्यक्तित्वं सङ्घटितमिति वचनुमपपद्येत! अन्यच्च, अस्ति हि सामाजिकप्रवृत्तिर्नाम मूलप्रवृत्तिः।

---

१. तुलनार्थम्—Integration of personality.

२. तुलनार्थम्—Disintegration of personality.

यदि कश्चन युवकः पुत्रकलत्रादिषु रमते, तेषां भरणपोषणादिनिमित्तं धनसञ्चयं प्रकुरुते, ततस्तस्येत्थमाचरणं मूलप्रवृत्त्या सह सङ्गच्छते। यदि कदाचन कार्यालयसम्बन्ध्युत्तरदायित्ववशात् स तथाविधं पुत्रकलत्रादिषु रन्तुं नार्हति, तर्हि तस्य कार्यविशेषानुरोधान्निवृत्तिरपि सङ्गच्छते। किन्तु यदि हि स युवा यौवन एव पारिवारिकोत्तरदायित्वादुपरम्य प्रियामपि स्वकीयां भार्यां परित्यज्य भैक्ष्यचर्यामाचरितुमिच्छति, प्रव्रज्यां चाकस्माद् गृह्णाति, कथङ्कारं तस्यैवंविधा निवृत्तिस्तस्य लोकविदितव्यक्तित्वेन सह सङ्गच्छते? ईदृशीं निवृत्तिमभिलक्ष्य कविकुलगुरुणा प्रयुक्तेयमुक्तिर्ब्रह्मचारिव्याहृतोपयुज्यते। तथा हि (पार्वतीं प्रति)—

किमित्यपास्याभरणानि यौवने
धृतं त्वया वार्धकशोभि वल्कलम्।
वद प्रदोषे स्फुटचन्द्रतारका
विभावरी यद्यरुणाय कल्पते॥ इति[1]।

किञ्च,

अलभ्यशोकाभिभवेयमाकृति-
र्विमानना सुभ्रु! कुतः पितुर्गृहे?
पराभिमर्शो न तवास्ति कः करं
प्रसारयेत् पन्नगरत्नसूचये॥ इति[2]।

अर्थाद् हे पार्वति! वद, कथं नाम भवत्या वार्धकशोभि वल्कलधारणं विभूषणानां परित्यागश्च यौवन एव युज्यते? कुमारित्वाद् भर्तृकृतानिष्टस्य तु शङ्कैव नास्ति; परं ते पिता त्वयि नितरां स्निह्यति, अतस्तव जनकस्य गृहेऽपि तेऽपमानः केनापि कर्तुं न शक्यते। भर्तृपित्राद्यतिरिक्तः कश्चिदन्यस्त्वां तिरस्कुर्यादिति शङ्कयाप्यलम्, नहि कश्चिदपि सर्पस्य शिरोमणिं ग्रहीतुमुद्यमं करोति। यथा हि सर्पमणेर्ग्रहणं दुष्करम्, एवमेव ते धर्षणमिति तात्पर्यम्। किञ्च, कारणं विना तव वार्धकशोभि वल्कलावधारणं तथैव न सङ्गच्छते, यथा दीप्यमानशशाङ्कतारके प्रदोषे सूर्यसुतस्यारुणस्योदयो नोपयुज्यते। अत एव निवृत्तिरपि यद्यकारणा भवेत्, तर्हि तस्या अप्यसामान्यमानसिकास्ववस्थास्वन्तर्भाव इष्यते।

किञ्च, मदीयेयं कल्पना यद् भारते रामराज्यं प्रवर्तेत तदैव सफलीभविष्यति, यदाहं स्वकीयविचारान् जनतायां प्रचारयिष्यामि, तदनुकूलराजनैतिकसमुदायविशेषसङ्घटनं कृत्वा तदर्हं प्रयतनमपि नूनमाचरिष्यामि। श्रूयते हि खलु रामराज्यविषये—

न पुत्रमरणं केचिद् द्रक्ष्यन्ति पुरुषाः क्वचित्।
नार्यश्चाविधवा नित्यं भविष्यन्ति पतिव्रताः॥ इति[3]।

---

१. द्रष्टव्यम्—कुमारसम्भवम् ५।४४

२. द्रष्टव्यम्—कुमारसम्भवम् ५।४३

३. द्रष्टव्यम्—वाल्मीकिरामायणम्, आ० स०, श्लो० ९१

सुतरां तावद् यत्रहमनुदिनमनर्गलायां कल्पनाधारायां निमग्नो भूत्वा कथमपि तदनुकूलं प्रयतनं न करिष्ये, तर्हि सोन्मुक्तकल्पनैव स्थास्यति, निर्बीजत्वात्। स्वविचारप्रचारार्थमुपयुक्त-साहित्यसर्जनमपि तदनुकूलप्रयतनमिति तात्पर्यम्; किन्तु यदि ह्याकाशे रमणीयस्वर्गस्वरूपकल्पनमेव मदीयं कर्म भवेत्, तेन च साकं कथमपि मदीयमाचरणं नानुगच्छेत्, तर्हि नूनं किमपि व्यक्तित्व-वैकल्यं मयि वर्तेत इत्याशङ्का निरालम्बा न भविष्यति। व्यक्तित्वनिर्माणोपयोगिघटकानां विचारेच्छाप्रयतनादीनां परस्परमानुकूल्यं सामञ्जस्यं नितान्तमपेक्ष्यमित्यूह्यम्। तदेव व्यक्तित्वं सुघटितं सङ्घटितमिति वक्तुं शक्यते। यदि हि खलु व्यक्तित्वे कस्यचन घटकस्य विशेषेणाधिकं क्रियाकारित्वं भवेत्, अथवा कस्यचन मनोव्यापारविशेषस्य नितान्तमभावो निरोधो वापद्येत, तर्हि तज्जनितासामान्यमनोविकारस्य कारणं कस्मिँश्चिद् भावग्रन्थिविशेषे तेन च सूक्ष्मचैतन्या-हितवासनासु कुशलैः परीक्षकैरनुसन्धेयम्। सूक्ष्मचैतन्ये या या भावग्रन्थयोऽवतिष्ठन्ते, ताभिरेव कलुषितं व्यक्तित्वं व्यक्तेः परिलक्ष्यते। येषां व्यक्तित्वविकासः क्रमशो न सञ्जायते, तेषां व्यक्तित्वे विविधव्यापारस्वारस्यं नोपलभ्यते। येषां व्यक्तित्वविकासः सम्यक्तया सञ्जायते, तेषां ज्ञानेच्छा-प्रयतनेषु कस्याप्येकतरस्य क्रियातिशयत्वं व्यापारन्यूनत्वं वा नोपलभ्यते। व्यक्तित्वनिर्म्माणाङ्गानां परस्परं संग्रथनं यदा सूत्रे मणिगणानामिव समापद्यते, तदा तेषु परस्परं समन्वयः सहकारित्वञ्चा-नुभूयते, व्यक्तित्वं प्रौढिमवाप्नुते। एकेनोदाहरणेन वयमिदं व्यक्तित्ववैरस्यं स्पष्टीकरिष्यामः। यदि हि खलु महाविद्यालयेऽध्यक्षपादैराहूयमाने प्रधानलेखके कश्चिदन्यो दौवारिकः समायाति, दौवारिके चाहूयमाने कश्चन पुस्तकालयाध्यक्षः समायाति; प्रधानलेखकोपयोगीनि पत्राणि प्राध्यापकं प्रति प्रेष्यन्ते; प्रधानाध्यापकस्य कक्षे प्राध्यापकोऽवतिष्ठते, प्राध्यापके चाहूयमाने लिपिकः समायाति, तर्हि महाविद्यालयीयकार्येषु सर्वत्राराजकता प्रवर्तेत। एवम्प्रकारेणैवाव्यवस्थितं सर्वमसङ्घटितं व्यक्तित्वं सन्तिष्ठते। वयमग्रे व्यक्तित्वनिर्म्माणपराणामङ्गानां प्रतिपदमनुव्याख्यानं करिष्यामः।

३. व्यक्तित्वात्मनोः स्वरूपवैलक्षण्यम्

ननु किं व्यक्तित्वमित्यात्मन एवापरनाम ?

प्लेटोमतम्—पुरातने दर्शनसाहित्ये व्यक्तिविशेषस्य मनस एकत्वं तस्यात्माधिष्ठितत्वात् प्रतिपादितमासीत्। नैयायिकानां मते आत्मनः संयोगे सतीन्द्रियार्थसन्निकर्षेण प्रत्यक्षं जायते, नापरथा। प्लेटोनामधेयो[1] विश्वविश्रुतो दार्शनिकवरेण्यो यवनदेशीयोऽपि मस्तुलुङ्गायतन-स्वरूपमात्मानं प्रतिपादितवान्। तन्मते आत्मनो व्यापारत्रयं भवति। यथा—भरणपोषणात्मको व्यापारः[2], अनुभवात्मको व्यापारः[3], बुद्धिमद्व्यवहारश्चेति[4]। भरणपोषणात्मको व्यापारो वृक्षा-दिषु विशेषेण सँल्लक्ष्यते। अनुभूतिमयो व्यापारः पशूनां दृश्यते। बुद्धिमद्व्यवहारस्तु मनुष्याणां मननक्षमाणामेव वैशिष्ट्यमावहतीति निश्चप्रचम्। अवरजातीयस्तु गुणेषु नूनमल्पीयस्त्वं प्रदर्शयति।

---

१. तुलनार्थम्—Plato (429 B. C. 347 B. C.)

२ तुलनार्थम्—Vegitative function.

३. तुलनार्थम्—Sensitive function.

४. तुलनार्थम्—Rational fuuction.

उद्भिज्जानां भरणपोषणमेव धर्मः । पशूनां भरणपोषणाद् व्यतिरिक्तमनुभूतिविशेषात्मकत्वमपि दृश्यते, अतः पशूनां खलूच्चजातीयत्वमुन्नेयम् । मनुष्याणां भरणपोषणमनुभूतिमद्व्यवहारान्वितत्वम्, बौद्धिकव्यापारवत्त्वमपि सँल्लक्ष्यते । अत एव गुणानामतिशयत्वाद् मनुष्यजातिरुच्चस्थानीया, तदपेक्षया पशुजातिरवरेत्यवसेयम् । मनुष्ये आत्मनो धर्मत्रयाणामेवाभिव्यक्तिर्निष्पद्यते, अत एव प्राणिवर्गे स शिरोऽलङ्कारभूतोऽवतिष्ठते ।

अरस्तूमतम्—अरस्तूमहोदयानां[1] मते आत्मनोऽधिष्ठानं मस्तुलुङ्गं नास्ति; किन्तु हृदयमेव । तेनैव सर्वप्रथमं मनोविज्ञानस्य शास्त्रीयं विवेचनं सम्पादितम् । तस्य मूलपुस्तकं "डि एनीमा[2]" इति यवनानीभाषायां लिखितं वर्तते । प्लेटोमहोदयानां मनोविज्ञानमधिकृत्य प्रतिपादिता विचाराः "प्लेटोमहाशयानां वार्तालापाः[3]" इतिसंज्ञके ग्रन्थे इतस्ततो विकीर्णाः समुपलभ्यन्ते । अरस्तूमहोदयानां मते रुधिरधमनीशिरासु वायुः प्रचलति । सोऽयं वायुः 'प्राणः' इति व्यपदिश्यते । रुधिरे वर्तमानः प्राणः 'न्यूमा[4]' इति संज्ञां बिभर्ति । यदा आहतस्य मानवस्य शरीराद् रुधिरक्षयो जायते, तदास्य मृत्युः सञ्जायते; रुधिरानुगतप्राणाश्रितचैतन्यापगमात् । रुधिरस्य केन्द्रीभूतमायतनं हृदयम्, अत एव हृदयमेव चैतन्याधिष्ठानम् । एतस्मादेव कारणाद् भगवता पुनर्वस्वात्रेयमहर्षिणा चरकेण चापि हृदयमेव चेतनाधिष्ठानमिति प्रतिपादितमिति वयं मन्यामहे । अरस्तूमते संज्ञावाहिनाडीकन्दाणुकानां सत्त्वं नास्ति; प्रत्युत पदार्थजनितगतिः "डायफेनस[5]" इत्याख्यमाध्यमविशेषे प्रविश्य चक्षुरिन्द्रियान्तवर्तिन्यूमाख्यं प्राणं स्पृशति, तेनोत्पद्यते संज्ञाविशेषः । न च ज्ञानमिन्द्रियजन्यम्, किन्तु हृदयजन्यम्; हृदयस्यैवेन्द्रियानुगत-न्यूमाख्यप्राणस्य केन्द्रीभूतत्वात् । नहि ज्ञानं हृदयस्य, प्रत्युत आत्मन एव । आत्मनो ज्ञानाद् व्यतिरिक्ता अन्येऽपि धर्माः सन्ति, अथवा शक्तयः सन्ति । अरस्तूमते मनोविज्ञानं नाम आत्मनो विविधशक्तीनामेवाध्ययनमिति । एतावता शक्तिवादसंज्ञकं मतं बोद्धव्यम् ।

सुतरामात्मनो रहस्यात्मकं स्वरूपमभिमुखीकृत्यार्वाचीनमनोवैज्ञानिकानां वैरस्यं व्याख्यातुं शक्यते । आत्मनोऽव्यपदेश्यमप्रतर्क्यमवाङ्मनसगोचरं रूपं मनोविज्ञानपारज्ञता वैज्ञानिकविवेचनसौकर्य्यायानुपयुक्तमभिमन्यन्ते । यदप्रतर्क्यम्, कथं तस्य कार्यकारणपरमनुव्याख्यानं सम्भाव्यते !

तथा हि श्रूयते माण्डूक्योपनिषदि—"नान्तःप्रज्ञं न बहिष्प्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम् । अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः" इति[6] ।

---

१. तुलनार्थम्—Aristotle.

२. तुलनार्थम्—De anima.

३. तुलनार्थम्—Dialogus of Plato.

४. तुलनार्थम्—Pneuma.

५. तुलनार्थम्—Diaphanous.

६. द्रष्टव्या—माण्डूक्योपनिषद्, ७

अन्यत्रापि नूनमात्मस्वरूपमित्थमेवानुव्याख्यातम्—

अशब्दमस्पर्शमरूपमव्ययं
तथारसं नित्यमगन्धवच्च यत्।
अनाद्यनन्तं महतः परं ध्रुवं
निचाय्य तन्मृत्युमुखात् प्रमुच्यते ॥ इति[1]।

ननु कथङ्कारमात्मस्वरूपमधिकृत्याऽर्वाचीनमनोवैज्ञानिकानां वैरस्यमुपपद्यते ? आत्मनो रहस्यमयस्वरूपत्वात् तस्य वैज्ञानिकशैल्युपयुक्तत्वं नोपपद्यते। व्यवहारविवेचनपरं हि खल्वर्वाचीन-मनोवैज्ञानिकानामभिमतं मनोविज्ञानलक्षणम्। प्रयोगात्मकं हि विज्ञानं भवति। विज्ञानसामान्य-लक्षणे सति मनोविज्ञानं कथमप्यव्यपदेश्याव्यवहार्याग्राह्यालक्षणवस्तुरूपात्मतत्त्वप्रतिपादनेन स्वकीयं लक्ष्यमवाप्तुं नार्हति। अव्यवहार्यं परमार्थरूपमात्मनोऽध्यात्मविद्यायाः प्रतिपाद्यमित्यवबोध्यम्। मनोविज्ञानं बाह्यव्यवहारानुगततथ्यजाताध्ययनं कुरुते। प्रयोगनिरीक्षणमनोविश्लेषणादिसाधनै-र्यन्मनोविज्ञानप्रतिपाद्यमस्ति, तत्तु कथमप्यव्यवहार्यमग्राह्यं न भवितुमर्हति। अतो मनोवैज्ञानिकानां व्यवहारगतितुरीयात्मतत्त्वानुशीलने रुच्यभावो दृश्यते, आत्मतत्त्वस्याविश्लेष्यत्वात्, रहस्यमयत्वात्, प्रयोगनिरीक्षणतुलनामनोविश्लेषणादिमनोविज्ञानाध्ययनसाधनागोचरत्वाच्च।

आत्मनोऽपेक्षया व्यक्तित्वगवेषणायां मनोवैज्ञानिकानां रुचिर्विशेषेण सँल्लक्ष्यते। आत्मतत्त्वं हि खल्वव्यपदेश्यमवाङ्मनसगोचरमविश्लेष्यं भवति। किन्तु व्यक्तित्वं नाम प्रत्ययो न तद्वत् शून्यमिवाविश्लेष्यमिव वा भवति। विचारेच्छाकल्पनाप्रवृत्तिरूपाणि विविधानि कर्माणि परित्यज्य यदात्मरूपमवशिष्यते, तत्तु पारमार्थिकं तत्त्वमिति; किन्तु विचारेच्छाकल्पनास्मृतिप्रवृत्तिप्रभृत्य-न्वितं यज्जीवात्मनो रूपं व्यवहारानुगतं सिद्ध्यति, तदेव 'व्यक्तित्वम्' इति व्यपदिश्यते। व्यक्तित्वं नाम व्यवहारोपयोगिसर्वप्रत्ययसारभूतम्; किन्त्वध्यात्मदर्शनप्रतिपाद्यमात्मतत्त्वं त्वेकात्मप्रत्यय-सारमित्याहुर्वेदान्तवादिनः। अन्यच्च, व्यक्तित्वं प्रतिपुरुषं भिद्यते। नहि खल्वात्मतत्त्वं प्रतिपुरुषं भिद्यते, नित्यशुद्धबुद्धमुक्तनिर्गुणनिर्विशेषनिराकारात्मतत्त्वस्य को नाम भेदः ? कथङ्कारं वा नानात्वं युज्यते ? किञ्च, आत्मतत्त्वमेकरसमपरिणामितत्त्वं भवति। नह्यात्मतत्त्वं कालेन परिणमते, विकारान् वाऽऽधत्ते; किन्त्वर्वाचीनमनोविज्ञानपारदृश्वनामभिमतं यद् व्यक्तित्वस्वरूपं तत्तु कालेन विकासं लभते। बहुविधशास्त्रसामाजिकव्यवहाराद्यनुशीलनेन व्यक्तित्वं प्रौढिमवाप्नोति। व्यक्तित्वं प्रतिपदं वंशानुक्रमवातावरणप्रदत्तस्वभावाचरणनैतिकादर्शधार्मिकविश्वासादिभिर्विकासं लभते। अनुभवायत्तप्रत्ययबहुलं हि व्यक्तित्वं नाम। एतावता व्यक्तित्वस्वरूपप्रतिपादनपरस्य व्यक्तिगतमनोविज्ञानस्य समाजोपयोगिव्यवहारानुशीलनपरायणस्य गौरवमुन्नेतुं शक्यते। अतः स्थाने हि खल्वेतद्यदर्वाचीनमनोविज्ञानविशारदेभ्यो व्यक्तित्वप्रतिपादनं रोचते। बोधगम्यं शास्त्रीय-शैल्युपयुक्तविवेचनार्हं व्यक्तित्वं नूनं भवतीति सर्वमवदातम्। अतोऽर्वाचीनानां मनोवैज्ञानिकानां मते व्यक्तित्वाङ्गभूतविशेषाणां विवेचनं करणीयम्। तस्य व्यक्तित्वस्य क्रमशो विकासोऽन्वेष्टव्यः, कथञ्च तत्तद्व्यक्तित्वविशिष्टमानव आचरतीति सर्वं विवेचनीयम्।

---

१. द्रष्टव्या—कठोपनिषत् ३।१५

४. ऐक्यमिति परमं व्यक्तित्वलक्षणम्

ननु व्यक्तित्वं नाम विविधक्रियावेगानां भावविचारप्रयतनानां पुञ्जीभूतं रूपमिति चेत् ? न; ऐक्यं हि व्यक्तित्वस्य सर्वोपरि विशेष इति मन्तव्यम् । ननु का नाम व्यक्तिः? इति सम्प्राप्तायां शङ्कायां वयं ब्रूमः—व्यक्तिर्नाम पुरुषविशेषः, यस्य विविधाचरणेषु केऽपि विश्वासार्हा विशेषा उपलभ्यन्ते, यस्य च सर्वे व्यापारा ऐक्यभावापन्नाः परस्परं सामञ्जस्यमविरोधित्वं वाऽन्यपुरुषानन्यपरिस्थितीश्च प्रति प्रदर्शयन्ति । मनोविज्ञानविवेचनीयं चैतन्यं व्यष्टिचैतन्यं भवति, न तु समष्टिचैतन्यमिति तु वयं प्रथमेऽध्याये पूर्वमवोचाम । अतो व्यक्तिर्नाम जीवात्मचैतन्यम्; किन्तु तस्यापि शारीरिकगुणविशिष्टस्यैव विवेचनं मनोविज्ञानविद्भिः समाश्रीयते । व्यक्तेः सर्वे चिन्तन-प्रत्यक्षकल्पनास्मृतिप्रवृत्तिविकल्पादिव्यापारास्तस्य विशिष्टत्वं सूचयन्ति । सर्वव्यापारानुसन्धातृत्वयुक्ताया एव व्यक्तेरेकीभावापत्तिर्युज्यते । व्यक्तित्वसङ्घटितत्वं च तथैव निष्पद्यते । ननु येषामाचरणानि परस्परं विप्रतिकूलानि दृश्यन्ते, किं तर्हि तेषां व्यक्तित्वाभावोऽवगन्तव्यः ? नूनं तेषां व्यक्तित्वाभावोऽल्पीयस्त्वं वा व्यक्तित्वस्य भवतीत्युच्यते । येषां च 'रामो द्विर्नाभिसन्धत्ते', 'रामो द्विर्नाभिभाषते' इतिवद् दृढेच्छाविचारकल्पनासङ्कल्पप्रयतनानि दृश्यन्ते, तेषां व्यक्तित्वं प्रौढं महिमान्वितं वेत्युच्यते । नहि व्यक्तित्वाभावो नाम निष्प्राणत्वं मृत्युर्वेति । सामाजिकव्यवहारोपयोगित्वापेक्षया नूनं व्यक्तित्वहीनानां जीवमानानां मृत्योरविशेषो भवति; किन्तु तेषां व्यक्तित्वं विकासयुक्तं भवति, तेषां यशो दिवङ्गतानामपि सामाजिकपुरुषाणां स्मृतिपटलेषु नूनममृतमिव चिरं स्थास्यति । तथा हि—

> जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः ।
> नास्ति येषां यशःकाये जरामरणजं भयम् ॥ इति ।

अपि चाहुः—

> स जातो येन जातेन याति वंशः समुन्नतिम् ।
> परिवर्तिनि संसारे मृतः को वा न जायते ॥ इति ।

अतो व्यक्तित्वविकासे कश्चन क्रमविशेषो विद्यते, केषाञ्चन सिद्धान्तानामनुसारी जीवनयापनव्यवहारविधिर्भवति । तैः सिद्धान्तविशेषैरेव तेषां स्वभावः, तेषां प्रकृतिः, तेषां व्यक्तित्वमिति यावत्, नितान्तमितरेभ्यः पुरुषेभ्यो भिद्यते । दैनिकविविधव्यापाराणां सङ्घटनमपि तेषां सिद्धान्तानामनुसारं सम्पाद्यते ।

अर्वाचीनं मनोविज्ञानं मौलिकविज्ञानमिव वस्तुभूतानुभूयमानविषयमधिकृत्य प्रवर्तते । अध्यात्मगवेषणोपरमात् तस्य विषयसङ्कोचो जायत इति निश्चप्रचम् । किन्त्वर्वाचीनं मनोविज्ञानं विज्ञानमस्ति, न तु दर्शनाङ्गमात्रम् । रहस्यमयलोकातीतविषयाणामनुप्रवेशेन मनोविज्ञानगवेषणा प्रयोगपरीक्षणहीना भविष्यतीति विचिन्त्य तेषां साम्परायिकानुसन्धानादनभिरुचिः समुत्पद्यते । व्यक्तित्वमहङ्कारविशिष्टचैतन्यस्य सामाजिकव्यापारेष्वाभ्यन्तरानुभवजाते चाभिव्यञ्जनां लभते । तदेवास्माभिः पल्लवितव्यम् ।

५. व्यक्तित्वोन्मेषः

ननु व्यक्तित्वं कदा समारभते ? अथवा किं जन्मत एव व्यक्तित्वं समुपलभ्यते ? अत्रोच्यते—नहि वयं पशूनाम्, बालानां सद्यो लब्धजन्मनां वा शिशूनां विषये व्यक्तित्वपदं व्यवहरामः। नहि तेषां जीवने व्यक्तित्वोपलब्धिः। यदायं मानवः स्वनिकटवर्तीतरपरिस्थिति-पुरुषादिभिः सह विचारसंवेगप्रवृत्त्यादिप्रदर्शनेन स्थायिप्रतिक्रियां प्रदातुं समर्थो भवति, स्थायि-प्रतिक्रियां वा समारभते, तदा हि वयं तस्य व्यक्तित्वसमारम्भो जात इति मन्यामहे, न त्वपरथा। स्थायिमानसिकदृष्टिरेव व्यक्तित्वोन्मेषस्य परमो हेतुः। स्थायिमानसिकदृष्टिर्बुद्धिविकासमपेक्षते। व्यक्तित्वं तर्हि बुद्धिविकासापेक्षं भवति। यावदस्या व्यक्तेर्जीवनं नैसर्गिकमूलप्रवृत्तिभिः सञ्चाल्यते, यावच्चास्याः क्रिया यन्त्रवत्परिचालिता भवन्ति, तावन्न व्यक्तित्वोन्मेष इति निःसन्दिग्धम्। न चापि परवशवर्तिनः स्वकीयव्यक्तित्वाभिव्यक्तिः। स्वनामधन्यानां महात्मनां गान्धिमहाभागानां प्राक्स्वातन्त्र्यकालिकेयमुक्तिः—"नहि परतन्त्राणां कोऽपि धर्मः" इति, उपरि वर्णितेन व्यक्तित्व-विवेचनेन सह सङ्गच्छते। यदा हि खलु व्यक्तिः स्वयमेव परिस्थितिविशेषमवधार्य निर्णयं कुरुते, विवेकेन शुभाशुभे मार्गे निश्चिनोति, तदैव तस्यास्तत्कार्यविशेषे उत्तरदायित्वं विद्यत इति वक्तुं साम्प्रतम्; किन्तु यावन्नास्या हिताहितविवेकपुरस्सरं परिस्थित्यवधारणान्वितं स्वकीयं प्रयतनं परिलक्ष्यते, तावन्नास्याः किमपि नीतिशास्त्रानुमोदितमुत्तरदायित्वम्, न चापि मनोविज्ञानाभिमत-व्यक्तित्वस्याभिव्यञ्जनमिति।

ननु कस्मिन् वर्षे वयसि सम्प्राप्ते व्यक्तित्वोन्मेषो जायते ? नहि खल्विदं सार्वजनीन-नियमेन प्रतिपादयितुं शक्यते, यतो हि शिक्षाभ्याससामाजिकानुभवप्राचुर्यपैतृकगुणानां गरीयस्त्वं यदा चतुर्दशे षोडशे वा वर्षे जायते तदा व्यक्तित्वोन्मेषः, द्वाविंशतितमे वर्षे च व्यक्तित्वं प्रौढिं लभते; तदा सम्यक्शिक्षासामाजिकानुभवविशेषाभावे केषाञ्चन पुरुषाणां चतुर्विंशति-वर्षं यावदपि विचारभावप्रयत्नेषु स्थैर्याभावो विद्यते। अतो व्यक्तित्वोन्मेषस्य व्यक्तित्व-विकासस्य शिक्षानुभववंशायत्तगुणसापेक्षत्वाद् बहवः स्तरा भवन्तीति बोद्धव्यम्। पारिवारिकोदात्त-वातावरणं व्यक्तित्वोन्मेषाय कल्पत इति निश्चप्रचम्।

६. व्यक्तित्वाङ्गभूतगुणविशेषाः

व्यक्तित्वविवेचनमधिकृत्य विविधैर्मनोविज्ञानपारङ्गतैरेते विशेषा वर्णिताः समुपलभ्यन्ते। ते यथा—

(१) व्यक्तित्वमिति प्रत्यये शारीरिकगुणाः मानसिकगुणाश्च समावेशमर्हन्ति। अतो व्यक्तित्वं शारीरिकमानसिकगुणान्वितमित्यवगन्तव्यम्।

(२) व्यक्तित्वं नाम व्यक्तेः नैसर्गिकाणामर्जितानाञ्च सर्वेषां व्यापाराणां सङ्घटनं समष्टिभावश्चेति। 'समष्टिभावः' इत्यनेन पदेन द्योत्यते यन्नहि कश्चन मानसिकः शारीरिकव्यापारविशेषो व्यक्तित्वपदार्थाद् बहिरवतिष्ठते। समेषां व्यापाराणा-मेकीभावापन्नत्वं सङ्घटनं च व्यक्तित्वपदेन सूचितम्। 'अर्जितम्' इति पदं शिक्षा-ऽभ्यासानुभवायत्तमिति तात्पर्यम्।

(३) व्यक्तित्वे परस्परानुबन्धि चिन्तनसंवेदनप्रयतनसंज्ञकमनोव्यापारत्रयं तदङ्गत्वेनानुप्रविशति।

(४) एतेषु त्रिविधमनोव्यापारेषु व्यक्तित्वाङ्गभूतेष्वेकैको व्यापारस्तथाविधं सङ्घटनं विकासं चावाप्नोति। चिन्तनात्मकं सङ्घठनं बुद्धिपदेन व्यपदिश्यते। भावसंवेदनादिसङ्घठनं 'स्वभाव' इति पदेन व्यपदिश्यते। प्रयतनादिसङ्घठनं 'चरित्रम्' इति पदेनाऽभिव्यज्यते।

(५) व्यक्तित्वाङ्गभूतानामेतेषां त्रिविधव्यापाराणां नूनं परस्परानुबन्धिविकासो जायते। सर्वास्वेव विकासभूमिषु तेषामितरेतरसापेक्षत्वं समुपलभ्यते।

(६) व्यक्तित्वाङ्गभूतघटकानां सङ्घठनेन, अनुपातशो विद्यमानतया, मृदुमध्यमातिशयमात्राभेदेन, अभिव्यञ्जनाप्रकारविशेषेण च व्यक्तीनां व्यक्तित्वभेदा अभिनिर्वर्तन्ते।

(७) व्यक्तित्वस्यासामान्यावस्था तदा अभिनिर्वर्तते, यदा व्यक्तित्वाङ्गभूतघटकेषु कस्यचिदेकस्य बहूनां वेतरापेक्षया प्रकामं विकासो सञ्जायते। कस्यचिदेकस्य निरोधो वा ह्रासो वा नितान्तं सञ्जायते। असाधारणविकासेन ह्येकस्य व्यक्तित्वाङ्गस्येतराङ्गानां निरोधो जायते। विकासस्य ह्रासस्य वा असाधारणकोटौ सङ्घठनं श्लथीभवति। व्यापारसङ्घठनाभावः सामान्यविकारान् जनयति।

(८) सर्वे शारीरिकविकारा मानसिकविकारा वा व्यक्तित्वविकृतय एव। तथापि केश्चन विकारैः खलु तदितरापेक्षातो निखिलं व्यक्तित्वं नितरां दूष्यते।

अथातो वयं व्यक्तित्वाङ्गभूतगुणविशेषाननुव्याख्यास्यामः। यतो हि मानसिकव्यापारान् सङ्घठनगोचरीभूतान् विहाय कतिपयेतरगुणविशेषा अपि भवन्ति, येषां सद्भावे वा व्यक्तित्वभेदा अभिनिर्वर्तन्त। वयं ताँस्तान् गुणान् प्रतिपदं क्रमशोऽनुव्याख्यास्यामः। यथा—

(अ) शारीरिकगुणाः।

(आ) मानसिकगुणाः
- (क) चिन्तनविषयका बुद्धिपदवाच्याः।
- (ख) संवेदनविषयकाः स्वभावपदवाच्याः।
- (ग) प्रयतनविषयकाः चरित्रपदवाच्याः।

(इ) सामाजिकगुणविशेषाः।

(ई) उपर्युक्तगुणानां प्राचुर्यं दाढर्यञ्चेति।

७. शारीरिकगुणाः

ननु किं शारीरिकगुणा अपि व्यक्तित्वपदार्थान्तर्भावत्वमर्हन्ति? नूनं शरीरस्य वर्णाकृतिस्वरपरिमाणादिविशेषा व्यक्तित्वं नितान्तं प्रभावयन्ति। गौरवर्णः, दीर्घाकृतिः, विशाल नेत्रे, मधुरः स्वरः, मनोहारिवक्त्रम्, महोरस्कत्वं च कस्य चेतो न प्रसभं समाकर्षन्ति! जनसेवायोगस्य सर्वासु प्रवेशपरीक्षासु मांसलस्वस्थशरीरं परीक्षकान् नाल्पं प्रभावयति। कमनीयाकृतिं नारीमायान्तीं दृष्ट्वा सर्वेषां चेतांसि तस्या मुखमलोकयितुमविचलदृष्टीनि

जायन्ते । एवमेव महोरस्कमाजानुबाहुं वृषभस्कन्धं पुरुषमायान्तं सन्दृश्य सर्वे समादरप्रदर्शनार्थं समुत्तिष्ठन्ति ।

८. एडलरमहोदयाभिमता हीनताग्रन्थिः

नहि तस्मादिदमायाति यद्धि दुर्बलशरीराः पुरुषा लोकेऽसफला भवन्ति, कुब्जा वा किमपि पुरुषार्थं प्राप्तुं न प्रभवन्ति । आङ्ग्लदेशीयो बायरनमहाकविः[१] पङ्गुरासीत्; किन्तु सोऽतिपाटवेन तर्तुं जानाति स्म । आङ्ग्लदेशीयो महाकविः मिल्टनमहाभागो[२]ऽन्धोऽपि सन् यशस्वी महाकविर्बभूव । अस्माभिः आगरानगरस्थानाथालये एकः प्रज्ञाचक्षुर्दृष्टः । स हि खलु अनेकान् ऋग्वेदीयमन्त्रान् श्रुत्वैव लिपिविशेषेण लिखितुमशक्नोत्, लिखित्वा च तान् क्रमशो यथातथमुच्चार्यासाधारणं पाटवं प्रदर्शयति स्म । अमेरिकादेशस्य राष्ट्रपतिर्महामतिरूजवेल्ट-महोदयः[३] पद्भ्यां स्वतस्तु गन्तुमसमर्थोऽभवत्; तथापि तेन प्रतिभाशालिना द्वितीये विश्वमहायुद्धेऽमेरिकादेशस्य प्रतिष्ठा सर्वोपरि संरक्षिता परिवर्धिता च । कस्माद् हेतोरिमे प्रकृत्या दुर्बला अपि खल्वेवंविधं गौरवं लेभिरे ! एका हि अमेरिकनमहिला हेलननामधेया[४] विद्यते, सा जन्मान्धा सत्यपि कतिपयविषयेषु 'एम० ए०' इत्याख्यपदवीं 'डाक्टर' इति च गौरवान्वितां पदवीं विश्वविद्यालयेभ्यः प्राप्तवती । एडलरमहोदयैः[५] प्रतिपादितमिदं यद्वै प्रकृत्या सुदुर्बलेषु मानवेष्वेका हीनताभावग्रन्थिः[६] जायते, तया भावग्रन्थिक्रियया स आत्मशक्तिसञ्चयं कृत्वा तत्प्रदर्शयितुकामोऽन्यानन्ततोगत्वा अतिशेते । अस्ति हि मनुष्याणां पशूनां चैका निसर्गजा आत्मप्रदर्शनसंज्ञिका मूलप्रवृत्तिः, तस्या वृत्तं वर्णितपूर्वम् । सुतरां प्रकृत्या दुर्ग्रस्तो मानवः समाजेऽन्यपुरुषाणामपेक्षया हीनतां दैन्यं वानुभवति । तं दैन्यमपाकर्तुं विजेतुं सोऽपरिमित-चित्ताभोगेन कार्ये सँल्लग्नो जायते । अन्ततोगत्वा सोऽसाधारणकार्याण्यनन्यलभ्यानि कर्तुं प्रभवति । दृष्टं चास्माभिर्यद्धि श्रावयिता छात्रः शाङ्करभाष्यं प्रतिपदं स्मर्तुं व्याख्यातुं वा न प्रभवति, किन्तु अद्वैतवेदान्तविषयकाचार्य्यपरीक्षायां श्रोताऽन्धश्छात्रः प्रतिपदं शुद्धं कण्ठीकृतं भाष्योदाहरणपूर्वक-मुत्तरं दातुमर्हतीति । ये वामना भवन्ति, ते लम्बायमानं शरीरं कृत्वा प्रयान्ति । येषां पीठासनमुच्चं वर्तते, तेषां लम्बायमानकटिप्रदेशेन गत्यामपि किमपि विशेषमाधीयते । कस्मात् सर्वमिदं जायते ? एडलरमहोदया अभिमन्यन्ते यत्तेषां निसर्गजदौर्बल्यं हीनभावग्रन्थिं जनयति, ते दैन्यविचाराः सूक्ष्मचैतन्ये तिरोहिताः सन्तो द्विगुणतरशक्तिवेगेन शक्तिप्रदर्शनं सन्निनिवेशं कर्तुमिच्छन्ति । यथा हि रोमदेशीयो 'नीरो'नामकः सम्राट्, फ्रांसदेशीयो विश्वविश्रुतो विजेता 'नेपोलियन'संज्ञकः सम्राट् चैवंविधहीनभावग्रन्थिप्रभावेणैव निरङ्कुशप्रभुत्वैषणां[७] प्राप्तवन्तौ । आत्मदैन्यभावजन्यसंस्काराः

---

१. तुलनार्थम्—Byron.
२. तुलनार्थम्—Milton.
३. तुलनार्थम्—D. Roosewelt.
४. तुलनार्थम्—Hellen Keller.
५. तुलनार्थम्—Adler.
६. तुलनार्थम्—Inferiority Complex.
७. तुलनार्थम्—Lust for power.

४२

सूक्ष्मचैतन्येऽन्तर्मनसि बाधीयन्ते, कालक्रमेण च ते मानसिकविकाररूपेण दुर्धर्षप्रभुत्वैषणामार्गेण प्राकट्यं लभन्ते।

नहि वयं समग्रत एडलरमहोदयमतं समर्थयितुं प्रभवामः; यतो हि नेदमनिवार्य्यसम्बन्धपुरस्सरं वक्तुं शक्यते यद्धि तेषामेव सर्वं साफल्यं येषां निसर्गसिद्धं दैन्यं वर्तते, विकलाङ्गत्वं वा वर्तत इति। एडलरमहोदयानां मते आंशिकं महत्त्वपूर्णं सत्यं निहितं वर्तते।

किन्तु प्रायो दृश्यते यद्वयाकृतिवर्णवस्त्रगतिश्लक्ष्णवाणीकमनीयविशालनेत्रविपुलांशादिशारीरिकगुणविशेषा अस्मानितरपुरुषसम्बन्धिस्वव्यवहारनिश्चये प्रभावयन्ति, अन्ये जनाश्चास्माकं कृते तथाविधव्यवहारप्रदर्शनकालेऽस्मदीयैस्तादृशैः शारीरिकगुणैरेव प्रभाविता भवन्ति। "किमिव हि मधुराणां मण्डनं नाकृतीनाम्" इति कालिदासोक्तिर्नूनं सत्या, तथापि प्रसाधनसुन्दरवस्त्रादिभिर्नाल्पो व्यक्तित्वावधारणे प्रभावो जायते; सत्यम्, व्यक्तित्वं नाम शारीरिकगुणो नास्ति, तत्तु मानसिकगुणायत्तं विशेषतो भवति। तथाहि "गुणहीना न शोभन्ते निर्गन्धा इव किंशुकाः" इति; तथापि शरीरस्य व्यक्तित्वेन सह नितरां सन्निकटसम्बन्धो वर्तते, प्रभावश्चास्यानुदिनं भूयिष्ठो गभीरश्च प्रकाममनुभूयते। अत एव मानसिकव्यक्तित्वस्य शारीरिकगुणानां च सम्बन्धं वयं राजतरूप्यकस्य पटलद्वयमिव मन्यामहे। वस्तुतो या व्यक्तिर्मनोविज्ञानप्रतिपाद्यत्वं भजते, सा शरीरास्मिताविशिष्टजीवात्मचैतन्यमिति। अतो व्यक्तित्वेऽपि शरीरगुणानां प्रभावो भवत्येवेति युज्यते।

६. आयुर्वेदशास्त्रानुसारं व्यक्तित्ववर्गीकरणम्

प्राचीनभारतीयायुर्वेदविशारदानां मते वातपित्तकफाधिकारविशेषेण मनुष्याणां प्रकृतिभेदाः (प्रकृतिदोषा एवायुर्वेददृष्ट्या) अभिनिर्वर्तन्ते, अर्थाद् यदि कस्यचिन्मानवस्य वातप्रकोपाद् वातप्रकृतिस्तदा तस्य चारित्र्ये स्वभावे व्यवहारे च विशिष्टा गुणाः सँल्लक्ष्यन्ते। अन्यच्च, पित्तप्रकृतीनां स्वभावा व्यवहाराश्च वातप्रकृतिभ्यः पुरुषेभ्यो भिद्यन्ते। तेषां चापि कफप्रकृतिभ्यः पुरुषेभ्यः। विविधप्रकृतिभाजां पुरुषाणां गुणाः सुश्रुतसंहितायामेवमुपलभ्यन्ते। तथाहि—

(अ) वायुप्रकृतिः[1]—

"तत्र यः प्रजागरूकः शीतद्वेषी दुर्भगः स्तेनो मत्सर्यनार्यो गन्धर्वचित्तः स्फुटितकरचरणोऽल्परूक्षश्मश्रुनखकेशः क्राथी दन्तनखखादी च भवति।

अधृतिरदृढसौहृदः कृतघ्नः
कृशपरुषो धमनीततः प्रलापी।
द्रुतगतिरटनोऽनवस्थितात्मा
वियति च गच्छति सम्भ्रमेण सुप्तः॥

अव्यवस्थितमतिश्चलदृष्टि-
र्मन्दरत्नधनसञ्चयमित्रः।

1. द्रष्टव्या—सुश्रुतसंहिता, शारीरस्थानम्, अ० ४, पृ० ३०६ (निर्णय० सं०)

किञ्चिदेव विलपत्यनिबद्धं
मारुतप्रकृतिरेष मनुष्यः ॥ इति ।

अत्र 'क्राथी' इति हिंसाशीलः । 'क्राथी' इति स्थाने 'क्रोधी' इत्यपि पाठान्तरं समुपलभ्यते । 'अनवस्थितात्मा' इति च चलचित्तः । 'दुर्भगः' इति अमनोरमाकारः ।

(आ) पित्तप्रकृतिः[१]—

"स्वेदनो दुर्गन्धः पीतशिथिलाङ्गस्ताम्रनखनयनतालुजिह्वौष्ठपाणिपादतलो दुर्भगो वलिपलितखालित्यजुष्टो बहुभुगुष्णद्वेषी क्षिप्रकोपप्रसादो मध्यमबलो मध्यमायुश्च भवति ।

मेधावी निपुणमतिर्विगृह्य वक्ता
तेजस्वी समितिषु दुर्निवारवीर्यः ।
सुप्तः सन् कनकपलाशकर्णिकारान्
संपश्येदपि च हुताशविद्युदुल्काः ॥ इति ।

अत्र 'विगृह्यवक्ता' इति परवाक्यमुच्छिद्य वक्तुंशीलः ।

(इ) कफप्रकृतिः[२]—

"दूर्वेन्दीवरनिस्त्रिंशार्द्रारिष्टशरकाण्डानामन्यतमवर्णः सुभगः प्रियदर्शनो मधुरप्रियः कृतज्ञो धृतिमान् सहिष्णुरलोलुपो बलवाँश्चिरग्राही दृढवैरश्च भवति ।

दृढशास्त्रमतिः स्थिरमित्रधनः
परिगण्य चिरात् प्रददाति बहु ।
परिनिश्चितवाक्यपदः सततं
गुरुमानकरश्च भवेत् स सदा ॥ इति ।

१०. क्रेश्मरमहोदयानां वर्गीकरणम्[3]

लम्बह्रस्वशरीरपरिमाणशरीराकृतिविशेषानधिकृत्य क्रेश्मरमहोदयैर्मनुष्याणां चतुर्विधं वर्गीकरणं सम्पादितम् । तदनुसारं पुरुषाश्चतुर्विधा भवन्ति । क्रेश्मरमहोदयाः हि खलु असामान्यमानसिकव्याधिग्रस्तानां चिकित्सालयागतानां रोगिणां पर्यवेक्षणेन चतुर्विधवर्गीकरणं शारीरिकगुणानुबन्धिस्वभावभेदप्रतिपादनपरं निर्णीतवन्तः । चतुर्विधाः पुरुषास्तावत् प्रांशवः[४], सुघटितशरीराः[५], ह्रस्वाः[६], तदितराश्चेति[७] ।

---

१. द्रष्टव्या—सुश्रुतसंहिता, शारीरस्थानम्, अ० ४, पृ० ३०६ (निर्णय० सं०)

२. द्रष्टव्या—सुश्रुतसंहिता, शारीरस्थानम् अ० ४ " "

३. द्रष्टव्यम्—Ernest Kretschmer, "Physique and Character."

४. तुलनार्थम्—Asthenic.

५. तुलनार्थम्—Athletics.

६. तुलनार्थम्—Pyknics.

७. तुलनार्थम्—Dysplastics.

(अ) क्रेश्मरमहोदयमते 'प्रांशवः' ते पुरुषा भवन्ति येषां शरीरतौलमानं शरीरलम्बत्वादिव्यपेक्षया न्यूनं भवति, येषां शरीरमपि रजकस्याश्वतरीभारवदितस्ततो दोलायमानमिवावतिष्ठते ।

(आ) 'सुघटितशरीराः' पुरुषास्ते भवन्ति येषां सुदृढमांसलपेशीस्नायुबन्धनानि शरीराणि भवन्ति, सर्वाङ्गानि च समानरूपेण विकसितानि भवन्ति ।

(इ) 'ह्रस्वाः' पुरुषाः शरीरतौलमानापेक्षया ह्रस्वा भवन्ति, तेषां श्लिष्टं शरीरं पार्वतीयपुरुषाणामिव सुघटितं भवति ।

(ई) चतुर्थप्रकारकास्त्वितरे जना भवन्ति । क्रेश्मरमहोदयः प्रांशुसुघटितशरीराणां बाहुल्यमकालोन्मादग्रस्तेषु रोगिषु प्राप्तवान् । ह्रस्वाश्च पुरुषाः प्रायोऽवसादोन्मादरोगपीडिता आसन् । स्वस्थपुरुषाणामपि तथैव चतुर्विधं वर्गीकरणं कर्तुं शक्यते, तेषु च तत्तद्गुणानामुन्मादग्रस्तरोगिणामपेक्षया न्यूनाभिव्यक्तिर्भविष्यतीति तेषां मतम् ।

प्राध्यापकप्रवराभ्यां शैल्डन-स्टीवेन्समहोदयाभ्यामपि क्रेश्मरमतं संशोधितम् । तन्मते पुरुषाणां शरीराकृतिविशेषानुसारं त्रिधा वर्गीकरणं कर्तुं शक्यते । शरीराकृतिभेदानुसारं स्वभावभेदा निष्पन्ना भवन्ति[१] ।

नेदं मतं सर्वांशतः समीचीनम् । शरीराकृतिगुणैः सह स्वभावभेदानां केनापि प्रतिपादनमद्यावधि निर्विवादं न सम्पादितम् । मन्ये भारतीयायुर्वेदाचार्याणां मतं किञ्चित् साधु, तथापि अनन्यथासिद्धसाहचर्य्ययुक्तं नाद्यावधि साधितम् । स्वभावभेदाः शिक्षाभ्याससामाजिकपरम्परया कालक्रमेण विकासमर्हन्ति । खलमैत्री कस्याकल्याणं नावहति ! शरीरभेदा निसर्गजाः । नहि तथाविधा स्वभावभेदाः । यद्यपि वयमन्तःस्रावग्रन्थीनां क्रियातिशयह्रासजन्यं प्रभावं स्वभावप्रतिक्रियोत्पादनेऽप्यङ्गीकुर्मः, तथापि शरीराकृतेरपि स्वभावभेदेन सह कश्चित् साहचर्य्यसम्बन्धो वर्तत इति न बुद्धिपथमारोहति; सुदृढहेत्वभावात् ।

यवनदेशीया अरस्तूमहाभागा अपि चतुर्धा मानवानां वर्गीकरणं कृतवन्तः । तस्य चायुर्वेदमतेन सार्धं भूयिष्ठं साम्यं वर्तते । यवनानां मते चत्वारो रसा[२] नृणां शरीरेषु भवन्ति । यकृज्जन्यकृष्णपित्तातिशयान्मानवः कुण्ठितबुद्धिर्नैराश्ययुक्तो[३] भवति । पीतपित्तातिरेकान्मानवः क्रोधनो जायते[४] । रुधिराधिक्यान्मानव आशावादी जायते[५] । कफातिशयान्मानवः पीनो जायते[६] । अरबदेशीया यवनदार्शनिका नामानुवादमात्रजीविन आसन् । तेषां विवेचनेऽपि

---

१. द्रष्टव्यम्—Sheldon and Stevens, "Varieties of Temperament" (Harper. 1942 Ed).

२. तुलनार्थम्—Humours.

३. तुलनार्थम्—Melancholic.

४. तुलनार्थम्—Choleric.

५. तुलनार्थम्—Sanguine.

६. तुलनार्थम्—Phlegmatic.

'सौदा' इति वायुः, 'सफ़रा' इति पित्तम्, 'बलगम' इति कफः, 'खून' इति रक्तम्। एवं-प्रकारेण चतुर्धा मानवानां प्रकृतिभेदायत्तवर्गीकरणं तेषामभिमतम्।

११. मानसिकगुणाः

मानसिकगुणाः शारीरिकगुणानामपेक्षयाऽत्यर्थं महत्त्वपूर्णानि व्यक्तित्वाङ्गानि। बुद्धिभाव-कृतिप्राधान्यानुसारं व्यक्तित्वभेदा अभिनिर्वर्तन्ते। दार्शनिका वैज्ञानिकाश्च बुद्धिप्रधानाः पुरुषा भवन्ति, यतो हि तेषां व्यक्तित्वं विचारचिन्तनबहुलं दृश्यते। महाकविकालिदासभवभूतिप्रभृतयो भावप्रधाना पुरुषाः, यतो हि तेषां व्यक्तित्वं रागात्मिकानां वृत्तीनां चरमं विकासं द्योतयति। तथैव गायकाश्चित्रकाराश्चापि भावप्रधाना व्यक्तयो भवन्ति, तेषां जीवने ललितकलानां मानव-भावजगतः सूक्ष्मानुभूतीनामुदात्तं रूपमुपलभ्यते। तृतीयो वर्गः कृतिप्रधानानां पुरुषाणां भवति। तेषां जीवने प्रयत्नस्य प्राचुर्यमुपलभ्यते। राजनीतिज्ञानां किं वा राजनीतिकदलनेतॄणां च जीवनं कृतिप्रधानमेव दृश्यते। सैनिकस्य, सेनापतेः, नाविकस्य च कर्मप्रधानं व्यक्तित्वं भवति। यत्र यत्र कर्मसु कौशलं वर्तते, तत्र तत्र कृतिप्रधानमेव व्यक्तित्वमन्वेष्टव्यम्, किन्तु नृत्ये सुरुचि-पूर्णा भावाभिव्यक्तिर्नर्तनकर्मणि कौशलमपि च विद्यते। अत एव तस्य व्यक्तित्वं भावकृतिसंयोगाद् मिश्रीभावापन्नं बोद्धव्यम्। अथवा भावात्मकमेवेति, भावप्राचुर्यात्। सुतरां तावद् बुद्धिप्रकर्षात्, भावप्रकर्षात्, कृतिप्राधान्याच्च व्यक्तित्वस्य मानसिकगुणविशेषभेदात् त्रयो भेदा भवन्ति।

स्मरणीयमेतदस्मिन् विषये यद्धि परस्परानुबन्धीनि खलु बुद्धिस्वभावचरित्राणि व्यक्तित्वा-ङ्गानि भवन्ति। नह्येकस्य प्रकर्षेऽन्यतरस्याभाव इष्यते। चिन्तनसंवेदनप्रयत्नाख्यमानसिकव्यापार-त्रयाणामन्योऽन्याश्रयत्वं सङ्घटनं सहकारित्वं च पदे पदे व्यक्तित्वविकासस्य प्रत्येकभूमौ विद्यत एव। नहि तस्मादृते स्वस्थं व्यक्तित्वं भवितुमर्हति।

ननु कथं बुद्धिप्रकर्षभेदानुसारं व्यक्तित्वभेदा अभिनिर्वर्तन्ते? व्यक्तित्वविवेचनं हि सर्वं व्यक्तिगतमनोविज्ञानस्य भेदान्वितमनोविज्ञानस्य च प्रतिपाद्यम्; किन्तु व्यक्तित्वविकासमभि-मुखीकृत्य शिक्षामनोविज्ञानविशारदैर्मुहुर्मुहुर्यच्छ्लाघ्यं प्रयतितम्, तन्नूनं लोके महीयते। वयमत्र व्यक्तिनिर्णयार्थं बिने-साइमन-टरमैनप्रभृतीनां शिक्षामनोविज्ञानपारङ्गतानां बुद्धिपरीक्षणानां संक्षेपतो व्याख्यानं करिष्यामः।

१२. बिने-साइमनबुद्धिपरीक्षणप्रणाली[1]

बुद्धेः परीक्षणाय कैश्चन शिक्षामनोविज्ञानविशारदैर्बहूनि परीक्षणानि समारब्धानि। तेषामग्रगण्यो हि खलु फ्रांसदेशीयमनोविज्ञानपारङ्गतो बिनेमहोदयः[2]। फ्रांसदेशीयमनो-वैज्ञानिकेषु स सर्वोत्तमां विश्वख्यातिं लब्धवान्। फ्रांसदेशीयानां पाठशालानां प्रबन्धकर्तारस्तं १९६१ वैक्रमाब्दे मन्दबुद्धिबालकानां गवेषणाय नियुक्तवन्तः, येन तेषां कृतेऽध्ययनस्य विशिष्टपाठशालासु प्रबन्धः कर्तुं शक्येत। साइमननामाऽ-

---

१. तुलनार्थम्—Binet simon mental Test.

२. तुलनार्थम्—Alfred Binet (1857—1911 A. D.)

परः[1] फ्रांसदेशीयो मनोवैज्ञानिक आसीत्। तेनापि विनेमहोदयानां बुद्धिपरीक्षणकार्य्ये साहाय्यं प्रदत्तम्। अत एव बुद्धिपरीक्षणस्य या प्रणाली ताभ्यामाविष्कृता, सा 'बिने-साइमन-बुद्धिपरीक्षणप्रणाली' इत्याख्यां भजते। १९६३ वैक्रमाब्दे आभ्यां मनोविज्ञानविचक्षणाभ्यां स्वकीया बुद्धिपरीक्षाप्रणाली चतुःपञ्चाशत्प्रश्नगर्भिता सुनिष्पादिता। तृतीयवर्षादारभ्य यौवनारम्भपर्यन्तं विविधैः प्रश्नैस्तौ महानुभावौ बालकानां शारीरिकायुषोऽपेक्षया मानसिकायुर्विषयनिर्धारणं कृतवन्तौ। यदि त्रिवर्षीयो बालकस्त्रिवर्षीयबुद्धिपरीक्षणस्य सर्वेषां प्रश्नानां प्रत्युत्तराणि प्रदातुं प्रभवेत्, तर्हि तस्य मानसिकायुरपि वर्षत्रयमेवानुमीयते। प्रत्येकवर्षीयो बालकः पञ्चभिः प्रश्नैः परीक्षितः। यदि स तेषु प्रश्नेषु द्वयोरेकस्य वा प्रत्युत्तरं दातुं नार्हति, तर्हि तस्य मानसिकायुर्वर्षत्रयान्न्यूनमेवावधार्यते। एकैकः प्रश्नः तद्वर्षस्य तावन्मात्रं खण्डं निर्दिशति। मानसिकायुर्यदि शारीरिकवर्षायुषा विभज्यते, शतगुणीक्रियते च, तर्हि बुद्धिलब्ध्यङ्कोऽन्वेष्टुं शक्यते। यथा—

$$\text{बुद्धिलब्ध्यङ्कः} = \frac{\text{मानसिकायुः}}{\text{शारीरिकवर्षायुः}} \times १००$$

यदि अष्टवर्षीयो बालकः पञ्चवर्षीयबुद्धिपरीक्षणोपयुक्तप्रश्नानामेवोत्तराणि प्रदातुं शक्नोति, तर्हि तस्य बुद्धिलब्ध्यङ्को निम्नलिखितानुसारं भविष्यति—

$$\text{बुद्धिलब्ध्यङ्कः} = \frac{५}{८} \times १००$$
$$= ६२.५$$

यदि चायमष्टवर्षीयो बालको दशवर्षीयबुद्धिपरीक्षणोपयुक्तप्रश्नानामुत्तराणि प्रदातुमर्हति, तर्ह्यस्य मानसिकायुर्दशवर्षाण्येवेति। बुद्धिलब्ध्यङ्कश्चापि—

$$\text{बुद्धिलब्ध्यङ्कः} = \frac{१०}{८} \times १००$$
$$= १२५$$

प्रथमो बालको मन्दबुद्धिः, द्वितीयश्च प्रतिभाशाली भवतीति बोद्धव्यम्। आरम्भकाले विने-साइमनमहोदयाभ्यां सप्तवर्षादारभ्य दशवर्षपर्यन्तं परीक्षणोपयोगिनस्त्रिंशत् प्रश्नाः सम्पादिताः। किन्तु १९६५ वैक्रमाब्दे तस्याः प्रश्नावल्याः संशोधनमभिनिर्वृत्तम्। १९६८ वैक्रमाब्देऽन्तिमवारं विनेमहोदय एनां प्रणालीं संशोधितवान्। तस्याः संशोधितरूपे चतुःपञ्चाशत्प्रश्ना आसन्।

---

१. तुलनार्थम्—TheoPhile Simon.

प्रश्नप्रकारनिदर्शनम्—

आयुः	प्रश्नाः
३ वर्षाणि	नासाचक्षुर्मुखादीनि सूचय ? इति ।
५ वर्षाणि	वर्गाकृतिमनुकुरु ? चतुर्विधमुद्रागणनां कुरु ? इति ।
७ वर्षाणि	अपूर्णचित्रे किन्नु खल्ववशिष्यते ? इति ।
१० वर्षाणि	संवत्सरस्य मासान् गणय ? पुनरावृत्तिं च तेषां कुरु ? इति ।
१३ वर्षाणि	भाववाचकसंज्ञानां युग्मकेषु किमन्तरं विद्यते ? इति कथनम् ।

१३. टरमेनमहोदयाभिमतं बुद्धिपरीक्षणम्

विनेमहोदयो बुद्धिपरीक्षणप्रणाल्याः प्रवर्तक आसीत्, किन्तु तदनन्तरं बहुभिर्विद्वद्भिः बिने-साइमनप्रणाल्याः स्वस्वदेशानुसारं संशोधनानि समावृत्तानि । बर्टमहाभागैः[1] आङ्गल-देशीयैर्विनेमहोदयानां सहयोगिनः साइमनमहोदयस्य सहयोगमवाप्य विनेबुद्धिपरीक्षणप्रणाली प्रति-संस्कृता । तस्य प्रश्नसूच्यां पञ्चषष्टि (६५) प्रश्ना आसन् । सा प्रणाली त्रिवर्षीय-बालकेभ्य आरभ्य षोडशवर्षीयबालकानां कृतेऽपि प्रयुक्ता । नहि प्रत्येकवर्षोपयोगिप्रश्नाः समसंख्याकाः ।

अमेरिकादेशे स्टैनफोर्डविश्वविद्यालयस्य मनोविज्ञानवेत्तृभिः टरमैनमहोदयैरियं[2] विने-साइमनपरीक्षणप्रणाली १९७३ वैक्रमाब्दे प्रतिसंस्कृता । बहूनि वर्षाणि यावत् टरमैन-महोदयो द्विसहस्रबालकान् परीक्ष्य सामान्यतः स्वस्थो बालकः किं किं जानातीति निर्णीत-वान् । एतावता तेन बुद्धिपरीक्षणार्थं स्वकीया प्रश्नावलिर्निर्मिता । बिनेमहोदयानां काश्चन समस्या अपि यथास्थानं सन्निवेशिताः । अस्यां प्रश्नावल्यां तेन प्रतिवर्षं षट् प्रश्ना विनि-र्मिताः । निखिलाः प्रश्ना नवतिसङ्ख्याका आसन् । त्रिवर्षादारभ्य दशवर्षपर्यन्तम्, तद-नन्तरं च १२, १४, १६, १८ वर्षाणि यावत् टरमैनप्रयुक्तप्रश्नावलिः बुद्धिपरीक्षणार्थं प्रयुज्यते । एवम्प्रकारेण प्रतिमासद्वयार्थमेकः प्रश्नो बुद्धेः परीक्षणायालं भवति । शतेन गुणनं दशमलव-मपाकर्तुमिष्यते ।

१९९४ वैक्रमाब्दे टरमैनमहोदयो मैरिलमहोदयानां[3] साहाय्येन स्टैनफोर्ड-बिने-बुद्धिपरीक्षणप्रणालीं पुनः संशोधितवान् । तेन द्विवर्षं यावदस्याः परीक्षणोपयोगित्वं साधितम् ।

टरमैनमहोदयैः स्वकीयैः परीक्षणैर्बुद्धिप्रकर्षानुसारमेते व्यक्तित्वभेदा अङ्गीक्रियन्ते । ते यथा—

---

१. तुलनार्थम्—Burt.

२. तुलनार्थम्—Terman of Stanford Uinivercity.

३. तुलनार्थम्—Maud A. merrill.

बुद्धिलब्ध्यङ्कः

१५० त	ऊर्ध्वम्	प्रतिभाशाली[1]
१४० तः	१५० यावत्	उपप्रतिभाशाली[2]
१२० तः	१४० यावत्	अत्युत्कृष्टः[3]
११० तः	१२० यावत्	उत्कृष्टबुद्धिः[4]
९० तः	११० यावत्	सामान्यबुद्धिः[5]
८० तः	९० यावत्	मन्दबुद्धिः[6]
७० तः	८० यावत्	मूर्खः, हीनबुद्धिः[7]
७० तो	न्यूनम्	मूढः[8]
५५ तो	न्यूनम्	जडबुद्धिः[9]

उपर्युक्ततालिकायां १०० बुद्धिलब्ध्यङ्कः स्वस्थविकासयुक्तबालकस्य प्रतीत्युन्नेयम्। एते व्यक्तित्वभेदा न केवलं बालकेष्वेवोपलभ्यन्ते, प्रत्युत तथैव वयस्कव्यक्तिष्वपि। अलमतिविस्तरेण।

केचन समालोचका बुद्धिपरीक्षणानि भृशं समालोचयन्तस्तेषां दुष्टत्वं प्रतिपादयन्ति। यथा—अध्ययनसुविधानां प्रवर्धनेन बुद्धिलब्ध्यङ्कोऽपि वर्धते। अतः कथङ्कारमिदं प्रतिपादयितुं शक्यते यद्धि यो बुद्धिलब्ध्यङ्को दशवर्षीयबालकस्योपलभ्यते, स एव अष्टादशवर्षीयस्य बालकस्याप्युपलभ्येतेति। अन्यच्च, ये बालकाः परीक्षणकाले पटवस्तेषां परीक्षणफलं प्रशस्यं भवति। ये प्रतिभाशालिनोऽपि छात्राः परीक्षणवेलायामुदासीना इवावतिष्ठन्ते, परीक्षायां कथं प्रत्युत्तरं प्रदातव्यमिति वा ये न जानन्ति, तेषामपि बुद्धिलब्ध्यङ्को न्यून एव भवति। अतस्तेषां मते टरमैनपरीक्षणानि सामान्यबुद्धिं निसर्गजां परीक्षितुं नाऽलमिति तेषां तात्पर्यम्।

नहि विद्योपार्जनमात्रं बुद्धिप्रकर्षः। तदुक्तं विष्णुशर्मणा—

वरं बुद्धिर्न सा विद्या विद्यया बुद्धिरुत्तमा।
बुद्धिहीना विनश्यन्ति यथा ते मूर्खपण्डिताः॥ इति।

---

१. तुलनार्थम्—Genius.
२. तुलनार्थम्—Near genius.
३. तुलनार्थम्—Very Superior Intelligence.
४. तुलनार्थम्—Superior Intelligence.
५. तुलनार्थम्—Normal, average.
६. तुलनार्थम्—Backward.
७. तुलनार्थम्—Moron or feeble-minded.
८. तुलनार्थम्—Dull.
९. तुलनार्थम्—Idiot or Imbecile, deficient.

बुद्धिर्हि विद्याभ्याससञ्चयस्यापरनाम नास्ति। अनुभवोपात्तविषयाणां संग्रहनं सङ्कलनं तथानया करणीयम्, यथा तेषामन्यनवनवपरिस्थितिषु समुपस्थितासु कर्तुमावश्यकं भवेत्। स च बुद्धिप्रकर्षः कदाचन विद्याविशेषविरहितेष्वपि अकबर-नैपोलियन-क्लाइवप्रभृतिषु साधूपलभ्यते, अन्ये च विद्यावैभवयुक्ता अपि विश्वविद्यालयीयबहूपाधिधारिणोऽपि व्यवहाराकुशलाः स्वजीवने शान्तिपूर्णसामञ्जस्यमलभमाना दृश्यन्ते। भाषणे लेखने च सुसङ्गतविचाराभिव्यञ्जनम्, विचारेषु परस्परमविरोधित्वञ्च बुद्धेर्विकासस्य चरमं लक्षणम्। सर्वेषु बुद्धिप्रयोगेषु तदवधारणमेवोपेयम्।

१४. स्वभावस्य व्यक्तित्वाङ्गत्वम्

स्वभावोऽपि व्यक्तित्ववैशिष्ट्यमावहति। स्वभावे हि खलु भावाः, सुखदुःखाद्यनुभूतिः, स्थायिभावाः, विचाराश्च विशेषेणाऽन्तर्भावमर्हन्ति। प्रायः स्वभावस्य वर्गीकरणं यवनदेशीयैर्दार्शनिकैः, अरबदेशीयैश्च लेखकैश्च भारतीयायुर्वेदाचार्याणां सदृशं वातपित्तकफप्रकृत्यनुसारं स्वीक्रियते। यवनानां मते रक्तमयस्तुरीयः पुरुषस्वभावेऽपि स्वीक्रियते। अस्माभिरिदं मतं प्राग्वर्णितम्। सर्वतोऽधिकां ख्यातिमिदं मतं लब्धवान्।

नैतन्मतं रमणीयं प्रतिभाति। वातपित्तकफादिकं शारीरिकरासायनिकपरिवर्तनमात्राधीनम्। शारीरिकपरिवर्तनस्वभावयोस्तादात्म्यं नैतावता सिध्यति। मनोवैज्ञानिकवरेण्यौ रोसस्टेगनर[1]-किम्बलयङ्गमहोदयौ[2] व्यक्तित्वस्य अन्तर्वर्तिग्रन्थिस्रावायत्तत्वं नाङ्गीकुरुतः; दुष्टत्वात्। अन्यच्च, वातपित्तकफासाम्यजन्या विकारा भवन्ति। तेषां साम्यावस्था 'स्वास्थ्यम्' इति निगद्यते। सा च प्राणिनां प्रकृतिश्चरकमते। कथं शारीरिकरासायनिकविकारैः स्वस्थपुरुषाणां संवेगविचारस्थायिभावायत्ता प्रकृतिः स्वभावो निर्म्मातुं शक्यत इति नास्माकं बुद्धिपथमारोहति। नूनं कफपित्तादिविकारातिशयेन स्वभावविक्रिया अपि कदाचन दृश्यन्ते। स्वभावे शिक्षाभ्यासस्य सामाजिकवातावरणस्य च भूयिष्ठः प्रभावो भवति। स चोपरिलिखितमतेन निराक्रियते।

स्वभावस्य त्रेधा वर्गीकरणं सुरभारतीसेवकानामुपलभ्यते। यथा सात्त्विकः स्वभावः, राजसः स्वभावः, तामसः स्वभावश्चेति। सात्त्विकराजसतामसप्रकृतीनां व्यक्तीनां बहवः स्वभावानुगतभेदा भवन्ति। केषाञ्चन वर्णनमत्र क्रियते। तथा हि—

सात्त्विकव्यक्तित्वलक्षणम्—

> आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः।
> रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः॥[3]
>
> दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।
> देशे काले च पात्रे च तद् दानं सात्त्विकप्रियम्॥ इति[4]।

---

१. तुलनार्थम्—Ross Stagner.
२. तुलनार्थम्—Kimball young.
३. द्रष्टव्या—श्रीमद्भगवद्गीता १७।८
४. द्रष्टव्या—श्रीमद्भगवद्गीता १७।२०

राजसव्यक्तित्वलक्षणम्—

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥[1]

अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ ! तं यज्ञं विद्धि राजसम् ॥[2]

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद् दानं राजसं स्मृतम् ॥ इति[3] ।

तामसव्यक्तित्वलक्षणम्--

यातयामं गतरसं पूति पर्युषितं च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥[4]

विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥[5]

अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥ इति[6] ।

सात्त्विकव्यक्तित्वे सारल्यमार्जवम्, कर्त्तव्यनिष्ठा, ज्ञानम्, तपः, श्रद्धा, सत्यम्, निःस्पृहा, सर्वप्राणिनामुपकारकत्वं चेत्यन्तर्भाव्यते ।

राजसव्यक्तित्वे हि स्वल्वात्मप्रदर्शनम्, दम्भः, सामाजिकराजनीतिकयशोलिप्सा, क्रियानुरागः, वित्तैषणाप्राचुर्यम्, उत्तेजकपदार्थानां विषयाणाञ्च सेवनम्, स्वार्थे सर्वसमारम्भोपक्रम इत्यादयो विशेषा अनुप्रविशन्ति ।

तामसव्यक्तित्वे हि दीर्घसूत्रत्वम्, आलस्यम्, वर्जितद्रव्यसेवनम्, शुद्धाशुद्धधर्माधर्मविवेकशून्यमाचरणम्, पैशुन्यम्, अशौचमित्यादिदुर्गुणानामन्तर्भाव इष्यते ।

स्वभावस्यायं सात्त्विकराजसतामसभेदेन वर्गीकरणं सर्वथा मनोविज्ञानशैल्या सह सङ्गच्छते । श्रीमद्भगवद्गीताकारेणान्यः स्वभावभेदः पर्युद्भावितः । तदनुसारं स्वभावः, प्रकृतिर्वा द्वेधा विभक्तुं शक्यते; यथा—दैवी प्रकृतिः, आसुरी प्रकृतिश्चेति । दैवीप्रकृतिर्येषां वर्तते तेषां सर्वे स्तुत्या विहिता समारम्भाः, शुभगुणसम्पत्तयश्च भवन्ति । किन्तु येषामासुरी प्रकृतिर्भवति, तेषां विहितकर्म्माण्यशुभानि, सद्भिर्विगर्हिता गुणाश्च भवन्ति । तथा हि—

---

१. द्रष्टव्या—श्रीमद्भगवद्गीता १७।९
२. द्रष्टव्या— ,, १७।१२
३. द्रष्टव्या— ,, १७।२१
४. द्रष्टव्या— ,, १७।१०
५. द्रष्टव्या— ,, १७।१३
६. द्रष्टव्या— ,, १७।२२

दैवीप्रकृतिगुणाः—

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥
अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दयाभूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥
तेजः क्षमाः धृतिः शौचमद्रोहो नातिमानिता ।
भवन्ति सम्पदं दैवीमभिजातस्य भारत ॥ इति[1] ।

"'अलोलुप्त्वम्' इतीन्द्रियाणां विषयसन्निधावविक्रिया । 'दमः' इति बाह्यकरणानामुपशमः । अवदमनादयं भिद्यते, यतो ह्यवदमनेऽसाधुः तिरस्कृतो विधिः प्रयुज्यते । परवशाद् विप्रतिकूल-सामाजिकपरिस्थितिभयवशादवदमनमभिनिर्वर्तते । दमश्च स्वेच्छया शुभाचरणाङ्गत्वेनाऽत्मनि-यन्त्रणम्, अतश्चायं परिशोधाङ्गत्वं भजते । दमावदमनयोरयं भेदोऽस्मिन् ग्रन्थे सर्वत्र प्रयुज्यते । 'शान्तिः' इति अन्तःकरणस्य उपशमः। 'तेजः' प्रागल्भ्यम्, न त्वग्नितापदीप्तिः । 'अचापलम्' इत्यसति प्रयोजने वाक्पाणिपादादीनामव्यापारयितृत्वम्" इति शङ्कराचार्याः ।

आसुरीप्रकृतिगुणाः—

दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ।
अज्ञानं चाभिजातस्य पार्थ ! सम्पदमासुरीम् ॥[2]
प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ।
अशौचं नापि चाचारो न सत्यं तेषु विद्यते ॥
असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।
अपरस्परसम्भूतं किमन्यत् कामहैतुकम् ॥
काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः ।
मोहाद् गृहीत्वाऽसद्ग्राहान् प्रवर्तन्तेऽशुचिव्रताः ॥ इति[3] ।

"'असत्यम्' इति यथा वयम् अनृतप्रायास्तथेदं जगत् सर्वमसत्यम् । 'अपरस्परसम्भूतम्' इति कामप्रयुक्तयोः स्त्रीपुरुषयोरन्योऽन्यसंयोगाद् जगत् सर्वं सम्भूतम् । 'किमन्यत् कामहैतुकम्' इति कामहेतुकम् एव कामहैतुकम् । किमन्यद् जगतः कारणम् ? न किञ्चिददृष्टं धर्माधर्मादि-कारणान्तरं विद्यते, 'जगतः काम एव प्राणिनां कारणम्' इति लोकायतिकदृष्टिरियम्" इति भगवत्पादश्रीमच्छङ्कराचार्याः ।

---

१. द्रष्टव्या—श्रीमद्भगवद्गीता १६।१–२
२. द्रष्टव्या— ,, १६।४
३. द्रष्टव्या— ,, १६।७–८–१०

पाश्चात्त्यदार्शनिकेषु नीट्शेमहोदयो[1] द्विविधं जीवनदर्शनं प्रतिपादितवान्। एकम् "एपोलोनियन[2]" इति संज्ञकम्, अपरञ्च "डायोनिसियन"[3] इतिसंज्ञकं भवति। प्रथमो दर्शनाभिमन्ता शान्तः, विवेकशीलः, आत्मसंयमी, मितसेवी च भवति। 'मितसेवी' इति विशेषणपदे मिताहारी, मितभाषी, मितव्ययीत्यादिविशेषणान्यूह्यानि। अपरश्चोच्छृङ्खलो दम्भी विकत्थनो यशोलिप्सान्वितो भवति।

१५. युङ्गमहोदयाभिमतं व्यक्तित्ववर्गीकरणम्

स्विट्ज़रलैण्डदेशीय-ज्युरिखविश्वविद्यालस्य प्राध्यापकप्रवरो युङ्गमहोदयः[4] 'विश्लेषणात्मक-मनोविज्ञान'नाम्नो मनोविज्ञानसम्प्रदायस्य संस्थापकः प्रतिपादितवान् यद्व्यक्तीनां द्विविधा प्रकृतिर्दृश्यते—अन्तर्मुखी प्रकृतिः, पराङ्मुखी प्रकृतिश्चेति। तेनेदं प्रकृतिद्वयं सर्वप्रथममसामान्यमानसिकविकारग्रस्तरोगिणां लक्षितम्। तदनन्तरं तेन स्वस्थपुरुषाणामपि प्रकृतिद्वयमुपकल्पितम्। अन्तर्मुखी प्रकृतिर्यस्या व्यक्तेर्भवति सा स्वकीयान्तःकरणवृत्तिचिन्तने निमग्नावतिष्ठते। तस्याः स्वकीयमानसिकव्यापारानुचिन्तनं प्रियतमो विषयः। पराङ्मुखी च यस्याः प्रकृतिः, सा व्यक्तिर्बाह्यजगतो व्यापारेषु बाह्यपदार्थेषु च प्रवर्तमाना दृश्यते। तस्यै बाह्यसामाजिकसम्बन्धाः, न तु आध्यात्मिकविचारचर्चा रोचन्ते। अन्तर्मुखप्रवृत्तिर्दार्शनिकः, कविः, चिन्तकः, तत्त्ववेत्ता वा भवति। पराङ्मुखप्रवृत्तिः क्रियाशीलो भवति, पदलोलुपो विकत्थनश्च स दृश्यते। नहि युङ्गमहोदयो विशेषेणोल्लिखितवान् यत् पुरुषाणामन्तर्मुखप्रकृतित्वेन पराङ्मुखप्रकृतित्वेन वा वर्गीकरणं भवितव्यमिति। तेनोक्तं यत् प्रत्येकपुरुषस्यैवान्तर्मुखी प्रकृतिः पराङ्मुखी प्रकृतिश्च। भवति चेदं यत् काचिदेका अपरामतिशेते। वस्तुत एक एव पुरुषो द्वयोः स्वभावयोः कदाचन दोलायते इव। कस्यचिदेका प्रकृतिः कदाचन विशेषोन्मुखी जायते।

१६. स्वभावपरिभाषा

ननु कोऽयं स्वभावो नाम? अथातो वयं स्वभाववर्गीकरणं कृत्वा स्वभावपरिभाषामनुव्याख्यास्यामः। प्राचीनैर्बहु मन्यमानमपि शारीरिकरासायनिकलक्षणपरं स्वभावानुव्याख्यानं खल्वस्माभिर्निराकृतम्। व्यक्तेः सामान्यतो भावसंवेदनादिसङ्घट्टनेनाभिनिर्वृत्तरूपः स्वभावः। कस्य कस्य संवेगविशेषस्य प्रभावो मानवव्यवहारस्य निर्णायको भवतीति सर्वं स्वभावायत्तम्। संवेगविशेषप्रभावमुद्दिश्य वयं ब्रूमः—अयं लोभी, अयं जिज्ञासुः, अयं कामी, अयं क्रोधनः, अयं विकत्थनः, अयं दम्भी इति। संवेगप्राबल्यं स्वभावरूपस्य हृदयम्। अथवा विविधभावानां प्रभावाभिमुख्यं स्वभावत्वम्। मूलप्रवृत्तीनां संवेगा हि खलु निसर्गजा वंशानुक्रमायत्ता भवन्ति। नहि सर्वेषु सर्वे संवेगाः साम्येन विद्यन्ते। केषाञ्चन युयुत्साप्रवृत्तिरुद्दामा भवति, अन्येषामात्मप्रदर्शनमत्युग्रं दृश्यते, अन्ये च केचन महतीं जिज्ञासां प्रदर्शयन्ति। विविधमूलप्रवृत्तयो व्यक्तेः पैतृकगुणपारम्पर्येऽनुप्रविष्टाः प्रतिपुरुषं भिद्यन्ते, सामाजिकपारिवारिकशिक्षाभ्यासानुशीलनादिप्रभावजन्म-

१. द्रष्टव्यम्—Nietgsch, "Birth of Tragedy" (1844-1900)

२. तुलनार्थम्—Apollonian.

३. तुलनार्थम्—Dionysian.

४. तुलनार्थम्—Ernest Jung, "Analytical Psychology".

मूलसंवेगानां सङ्घटनवैचित्र्यात्। अतः सांसिद्धिकः स्वभावो लोकानुभवेन विपरिवर्तितो जायते। यथा क्रोधनो बालको यदि बाल्येऽनुदिनं गृहे बाह्यखेलासु च सर्वत्र क्रोधाभिमुखो जायेत, अन्यैर्बालकैश्चोत्तेजितो जायेत; नूनं स यौवने नृशंसः, क्रूरः, क्रोधी च भविष्यति। किन्तु यदि तस्य सम्यक्पथप्रदर्शनं सम्पाद्यते, तर्हि स क्रोधस्वभावं विहाय आत्मसंयमं शान्तिं चापद्यते। तस्य क्रोधनः स्वभावः सम्यक्पथप्रदर्शनेन नैतिकसदाचारदार्ढ्यरूपतां शुभाचरणदक्षसंरक्षणपरत्वञ्चापद्यते।

१७. विश्वासश्रद्धयोर्व्यक्तित्वाङ्गत्वम्

एकस्या व्यक्तेः स्वभावो नूनमितरस्या व्यक्तेः स्वभावाद् भावस्वरूपसङ्घटनविशेषमादाय भिद्यते। एवं व्यक्तेर्विश्वासाः श्रद्धा चापि व्यक्तित्वे वैलक्षण्यमापादयन्ति। कथमेका व्यक्तिरात्मविषये बाह्यजगतो राजनीतिकसामाजिकनैतिकसमस्यानां विषये च चिन्तयति ? इति सर्वं तस्या व्यक्तेर्भावान्, संवेगान्, विचारान्, प्रयत्नाँश्च प्रभावयति। विचारा विश्वासाश्च सङ्घटिताः प्ररूढाश्च कालक्रमाज्जायन्ते। तत्पश्चात्तेषामुन्मूलनमपि दुष्करं भवति। यतो हि ते परस्परानुबद्धाः स्थायिभावाङ्गभूताश्चाभिनिर्वर्तन्ते। प्राकृतपुरुषाणां शिक्षाऽभावाद् भूतप्रेतादिषु बहवोऽन्धविश्वासा भवन्ति। ते आयुर्वेदाभिमतं खगोलशास्त्रसम्मतमनुव्याख्यानमविज्ञायैव प्रत्येकं घटनां देवविशेषकोपात्, असुरविशेषकोपात्, भूतप्रेतादिकोपाद् वाभिमन्यन्ते। येषामीदृशा अन्धविश्वासाः, नहि तेभ्यो विधिप्रयुक्तायुर्वेदचिकित्साप्रणाली रोचते। प्रत्येकं शारीरिकविकारं ते भूतपिशाचप्रयुक्तमेवाभिमन्यन्ते। अयञ्च तेषामभिनिवेशो भवति। अहो दौर्भाग्यं हि खलु भारतीयग्रामीणजनताया यदत्र न केवलमशिक्षिता एव, अपि तु सुरभारतीचरणसंसिक्तमानसाः पण्डिता अपि वैज्ञानिकार्वाचीनानुसन्धानानां परिचयाभावादनेकान् शारीरिकविकारान् भूतपिशाचपितृप्रभृतिभिः क्रूरदृष्टिभिः जन्यमानानद्यापि स्वीकुर्वन्ति! चन्द्रग्रहणे राहुकेतुभ्यां चन्द्रमसः शिरः कृत्तं भवतीति सर्वमज्ञानस्य महती विडम्बना। खीष्टीयमुहम्मदीयधार्मिकसम्प्रदायेष्वपीदृशा बहवोऽन्धविश्वासा जनान् त्रासयन्ति। नहि विश्वासाः श्रद्धा वा सर्वदा बुद्धितर्कमधिकृत्य प्रवर्तन्ते, अपि तु भावावेशात्, श्रद्धाजन्यसंकेतात्, सामाजिकपारम्पर्याद्वा बहुवारमभिनिर्वर्तन्ते। एकवारं सुनिर्मिता विश्वासास्तदनन्तरं सर्वासु क्रियासु भावसंवेदनादिषु भाविचिन्तनादिषु च नितान्तं प्रभावमावहन्ति। सुदृढा विश्वासास्तु वस्तुतः संवेगा इव स्वभावानिर्वार्याङ्गत्वेनानुप्रविशन्ति व्यक्तित्वगुणेषु। विश्वासाः सुदृढां श्रद्धां जनयन्ति। यत्र यस्य श्रद्धा भवति, तत्रैव तस्य व्यक्तित्वं सुनिहितम्। तदुक्तं हि भगवता श्रीकृष्णेनाऽपि—

सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत!
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः॥ इति[1]।

सत्त्वानुरूपेति विशिष्टसंस्कारोपेतान्तःकरणानुरूपा सर्वस्य प्राणिजातस्य श्रद्धा भवति। यादृशी मानवस्य श्रद्धा भवति, तादृशोऽयं मानवो भवति। अर्थात् श्रद्धानुरूपमेव व्यक्तित्वं भवतीति तात्पर्यम्। विश्वासस्य चरमा कोटिः 'श्रद्धा' इति कथ्यते। विचारविवेकविधुरा श्रद्धाऽन्धविश्वासमयत्वादपायिनी भवति। विचारविवेकसहकृता श्रद्धा दृढविश्वासभूमिस्था, सर्वासां

1. द्रष्टव्या—श्रीमद्भगवद्गीता १७।३

सिद्धीनां जनयित्री, प्रयत्नेषु च साधारणं वेगमाधत्ते, लोके स्वर्गे च महाभ्युदयाय निःश्रेयसे च कल्पते।

१८. स्थायिभावान्वितं चारित्र्यसङ्घटनम्

स्थायिभावस्वरूपं नूनमस्माभिस्त्रयोदशेऽध्याये सविस्तरं पल्लवितम्। तदनन्तरमिच्छा-विवेकनिर्णयाद्यधिकृत्य ऐच्छिकक्रियैच्छिकनिर्णयविवेचनीये चतुर्दशेऽध्यायेऽप्यस्माभिस्तदनुबन्धित्वेन स्थायिभावप्रभावः स्फोरितः[1]। पूर्वमस्माभिरुक्तं यद् व्यक्तेः प्रायोऽनुभवागतानां पुरुषाणां परिस्थितीनां वा विषये भावविचारेच्छानुचिन्तनादिनैरन्तर्येण या स्थायिनी दृष्टिर्जन्यते, सैव 'स्थायिभावः' इति निगद्यते। अर्वाचीनमनोविज्ञानक्षेत्रे मनोवैज्ञानिकप्रवरेण शेण्डमहोदयेन सर्वोपरि सर्वप्रथमं स्थायिभावविषयकमीदृशं मतं विवृतम्। स्थायिभावे हि तन्मतानुसारं भावानां संवेगानां वा सङ्घटनं शृङ्खलाबद्धीकरणमिति यावद् विशेषेणाभिसम्पद्यते। यदा वस्तुविशेषमादायास्माकं सर्वे भावास्तत्सन्निविष्टा जायन्ते, अनुदिनं च वयं तद्विषय एव चिन्तयामः, तद्दुःखं ज्ञात्वा दुःखमनुभवामः, तस्य दुःखमपाकर्तुमिच्छामः, तदर्थं प्रयतामहे च, तस्य सुखं ज्ञात्वानन्दमनुभवामः, तल्लाभे परितोषं विन्दामहे, तद्विरहे च व्यग्रतां स्वचेतस्यनुभवामः, तदास्माकं तद्वस्तुविषयेऽनु-रागाख्यः स्थायिभावो विद्यत इति निगद्यते। स्थायिभावे नहि केवलं भावसंवेदनादीनाम्, अपि तु प्रयतनविचारचिन्तनेच्छादीनामपि सङ्घटनं तस्य वस्तुविशेषस्य पुरुषविशेषस्यैवोपरि वासना-नैरन्तर्यादभिनिर्वर्तते। अपि चास्माभिरुक्तं यदर्वाचीनानां मनोवैज्ञानिकानां मते स्थायिभावानामा-नन्त्यं विद्यते। नहि तेऽनादिवासनाजन्याः, प्रत्युत अनुभवनैरन्तर्याद्वासनोपचयाद् मूलप्रवृत्त्य-न्तर्गतसंवेग एव तत्स्थायिभावरूपत्वमभिसम्पद्यते। कदाचन बहूनां संवेगानामेकस्मिन् स्थायि-भावे मिश्रीभावो वर्तते। नह्येकस्मिन् पुरुषे स्थायिभाव एक एव भवतीति वाच्यम्; बहवोऽपि स्थायिभावा विषयभेदादेकस्यैव पुरुषस्य भवितुमर्हन्ति। अत्र काप्यसङ्गति-र्नास्तीत्यवधेयम्।

किञ्चेदमपि स्मर्त्तव्यं यत् स्वस्थव्यक्तित्वे सर्वे विविधाः स्थायिभावाः सङ्घटिताः शृङ्खलाबद्धा मालायां सुग्रथितपुष्पाणां सदृशमवतिष्ठन्ते। असामान्यमानसिकविकारग्रस्त-व्यक्तित्वे च स्थायिभावसङ्घर्षो विद्यते। तस्माच्च जायते व्यक्तित्वद्वैधीभावो व्यक्तित्व-विशृङ्खलनं वेति[2]।

वयमत्र मर्यादापुरुषोत्तमभगवतां रामचन्द्राणां सीतानुरागाख्यस्थायिभावस्य महाकवि-भवभूतिवर्णनानुसारमेकमुदाहरणं प्रस्तोतुमिच्छामः, येन भावविचारप्रयत्नादीनां सङ्घटनं स्फुटी-भवेत्। तथा हि—

सीताविरहे रामोक्तिः—

विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा
प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः।

---

१. द्रष्टव्यम्—चतुर्दशाध्यायस्य नवमाधिकरणम्।
२. तुलनार्थम्—Disintegration of Personality.

तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो
विकारश्चैतन्यं भ्रमयति च सम्मीलयति च[1] ॥

म्लानस्य जीवकुसुमस्य विकासनानि
सन्तर्पणानि सकलेन्द्रियमोहनानि ।
एतानि ते सुवचनानि सरोरुहाक्षि
कर्णामृतानि मनसश्च रसायनानि[2] ॥

इयं गेहे लक्ष्मीरियममृतवर्त्तिर्नयनयो-
रसावस्य स्पर्शो वपुषि बहुलश्चन्दनरसः ।
अयं बाहुः कण्ठे शिरसि मसृणो मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः ॥ इति[3] ।

अन्यच्च—

आ विवाहसमयाद् गृहे वने
शैशवे तदनु यौवने पुनः ।
स्वापहेतुरनुपाश्रितोऽन्यया
रामबाहुरुपधानमेष ते ॥ इति[4] ।

महर्षिवाल्मीकिवाक्येन सार्धमप्येतत् सङ्गच्छते । तथाहि—

"न रामः परदारान् वै चक्षुर्भ्यामपि पश्यति" इति ।

प्रेम स्थायिभावमापद्यमानं भावप्रयत्नेच्छाविचारपरिवर्धितं जायते । उक्तमेवाऽस्माभिः पूर्वं कथमिच्छाः स्थायिभावनियन्त्रित' भवन्तीति । विचारचिन्तनादिकमपि स्थायिभावोपात्तम् । स्थायिभावनियन्त्रितं हि चिन्तनं दृश्यते । यस्य यो हि प्रियो जनः न स तस्य परीवादं शृणोति, निन्दं वा कुरुते, तिरस्कारं वा सहते । राजनीतिकदलानुगतस्थायिभावापन्नाः सदस्या नहि विरोधिदलस्य विचारशैली समञ्जसामपि स्वाभिनिवेशात् समर्थयितुं प्रवर्तन्ते । राजनीतिकस्थायिभावनियन्त्रिता हि तेषां विचारसरणिर्भवति । श्रद्धानिर्म्माणे तु स्थायिभावस्य गौरवं सुव्यक्तमेव । नहि स्थायिभावमन्तरा श्रद्धा जायते । श्रद्धा विश्वासस्य चरमा परिणतिः । अस्ति हि स्थायिभावानामुपचितेरेक उपयोगविशेषः । स्थायिभावोत्पत्त्याऽस्माकं सुनिश्चिता व्यवहारा जायन्ते । एतावतान्ये जना अस्माकं प्रतिक्रियामनुमातुं शक्नुवन्ति । यस्य जीवने कोऽपि स्थायिभावो न विद्यते, तस्य निखिलं जीवनं विशृङ्खलम् । तस्य कस्मिन्नपि परिस्थितिविशेषे किं मतं विद्यते, का च तस्य प्रतिक्रिया भविष्यति, कथं च स तदा संवेगाद्यनुभवं करिष्यति, का वा तस्येच्छा वर्तते, कीदृशश्च तस्योत्साहः, इति विषये स्थायिभावाभावात् किमपि निश्चप्रचं वक्तुं न शक्यते । यस्य विचारभावसंवेगेच्छादिकं सर्वमविदितम्, तस्य नास्ति किमपि चारित्र्यमिति निर्गलितं

१. द्रष्टव्यम्—उत्तररामचरितम् १।३५
२. द्रष्टव्यम्— ,, १।३६
३. द्रष्टव्यम्— ,, १।३८
४. द्रष्टव्यम्— ,, १।३७

तत्त्वम्। सतां हि चरित्रे किञ्चिद् वैलक्षण्यं वर्तते। तद्वैलक्षण्यं चरित्रवैशिष्ट्यं स्थायिभावोपात्त-स्थायिविचारप्रयत्नादिरूपमाधत्ते। तथा हि—

उदेति सविता ताम्रस्ताम्र एवाऽस्तमेति च।
सम्पत्तौ च विपत्तौ च महतामेकरूपता॥ इति।

अन्यच्च—

घृष्टं घृष्टं पुनरपि पुनश्चन्दनं चारुगन्धं
दग्धं दग्धं पुनरपि पुनः काञ्चनं कान्तवर्णम्।
छिन्नं छिन्नं पुनरपि पुनः स्वादु चैवेक्षुकाण्डं
प्राणान्तेऽपि प्रकृतिविकृतिर्जायते नोत्तमानाम्॥ इति।

स्थायिभावानामितरेतराश्रयत्वेन सङ्घटनं तावच्चारित्र्यम्। व्यक्तेः स्थायिभावानां शृङ्खलारूपेण सङ्घटनमेव व्यक्तित्वमिति तात्पर्यम्। व्यक्तित्वे परिनिष्पन्ने व्यक्तेः कार्येषु व्यवहारेषु कश्चिद् व्यवस्थाविशेषः सँल्लक्ष्यते। सा व्यवस्था स्थायिभावानां निर्म्माणेनाऽभिसम्पद्यते। सिद्धं तर्हि यत् स्थायिभावानां सङ्घटनेन व्यक्तित्वं चरित्रापरनामधेयमभिनिर्वर्तत इति।

किन्तर्हि कूटस्थमपरिवर्त्यं व्यक्तित्वं चारित्र्यं भवति ? अत्रोच्यते—नैतदस्माकं तात्पर्यम्। परिस्थितिविशेषे समुपस्थिते विवेकपूर्वकमावश्यकं परिवर्तनं त्वभिनन्दनीयम्। नहि जडीभूतं पाषाणमिव व्यक्तित्वं विवेकशून्यमस्माकमभीष्टमिति। नितरां स्फुटमेव यत्परिवर्तनं व्यवहारेऽभिनिर्वर्त्यं परिस्थितिविशेषाविर्भावात्, तेन नूनं विवेकपूर्वकेण भवितव्यम्। स विवेको विचारो वा कारणारोपणं विनैव शुद्धचेतसावधार्य इति विशेषः।

यस्या व्यक्तेः स्थायिभावा विशृङ्खलिता जायन्ते, नहि तस्याश्चरित्रं सुघटितम्। तस्या जायते हि व्यक्तित्वद्वैधीभावः। व्यक्तित्वद्वैधीभावस्य मूलबीजं स्थायिभावानां सङ्घर्ष एवेत्यूह्यम्।

१६. स्वाभिमानसंज्ञकः स्थायिभावः

ननु कथङ्कारं स्थायिभावानामाविर्भावोऽभिसम्पद्यते ? नहि केवलमयं पुरुष इतरपुरुषविषये इतरवस्तुविषये वा स्थायिभावान् निर्मिमीते, प्रत्युत स्वविषयेऽपि स्थायिभावविशेषनिर्म्माणं करोति। नहि केवलमितराणि वस्तूनि, इतरे पुरुषा वा तस्य मूलप्रवृत्तीर्भावान् विचारमिच्छाश्चोत्तेजितान् कुर्वन्ति; किन्तु स स्वयमपि तांस्तथा करोति, येनेतरे जनाः स्वत एव समाकृष्टा भवन्ति। स स्वविषयेऽपि काञ्चिद् विशिष्टधारणां मन्यते, तस्याश्च प्रभावस्तस्य सर्वेषु व्यवहारेषु सर्वत्र दरीदृश्यते। ननु कथमयमात्मविषयकः स्थायिभावो विकासमाप्नुते ? अत्रोच्यते—प्रारम्भे शिशोः सर्वाः क्रिया नैसर्गिकमूलप्रवृत्तिजन्याः, यतः स स्वप्राणरक्षोपयोगिस्तन्यपानादिकं करोति; किन्तु शनैः शनैर्मासद्वयानन्तरं स्वमातरं प्रति स्थायिभावविशेषमारभते। मात्रैव स्तन्यपानम्, लालनम्, पालनं कामयते, मातुरुत्सङ्गे हर्षमनुभवति,

नान्यत्र। अन्यच्च, षष्ठे सप्तमे वा मासि स्थायिभावस्येयत्युपचितिर्जायते यत्स शिशुः स्वमातुरुत्सङ्गे तिष्ठन्तं स्तन्यपानं वा कर्तुंकाममन्यं शिशुं न सहते। तदनन्तरं पितरं प्रत्यपि स्थायिभावस्योन्मेषो जायते। यदि पिता अन्यस्मिन् बालके स्निह्यति, नह्येतत् शिशवे रोचते। 'इयं मदीया माता, नान्यस्य; अयं मदीयः पिता, नान्यस्य' इत्येवम्भूतः स्थायिभावः शिशोस्तदाभिनिर्वर्तते। यदेमाः पङ्क्तयो लिख्यन्ते, तदैव वयं क्षणद्वयात् पूर्वमेकां बालिकामेवम्भूतां स्थायिभावयुक्तां दृष्टवन्तः। प्राध्यापकविसारियामहोदयानाम् 'आभा' इति नाम्नी कन्या सप्तमे मासि वर्तते। तस्याः पितृस्थायिभावो नितरां रमणीयः। यदा विसारियामहोदयो मां स्पृशति, सा रोदिति, नैव सहते मम स्पर्शनमपि। यदि वा विसारियामहोदयोऽन्यं बालकं स्वोत्सङ्गे गृह्णाति, तदापि सा तमेवम्प्रकारेणाचरन्तं दृष्ट्वा रोदिति। अयं स्थायिभावः 'पितृस्थायिभावः' इत्युच्यते।

क्रमशः शिशुर्दशमे मासि प्रविशति। उत्थाय च गमनमारभते। माता हर्षोत्फुल्ला भूत्वा तद्गमनमभिनन्दति। करतलवादनध्वनिना तस्योत्साहं वर्धयति। सम्प्रति बालकः स्वविषये किञ्चित् ज्ञातुमारभते—कथं हि सोऽन्येषां हर्षस्य घृणाया वा विषयो भवति ? इति। यदा बालकः शुभं कार्यं करोति, परिजनास्तं प्रशंसन्ति; यदा च सोऽशुभं निषिद्धमनृतभाषणादिकं करोति, सर्वे परिजनास्तं निन्दन्ति परिवदन्ति च। प्रथमं नूनं बालक आत्मानं तथैवाभिजानाति, यथान्ये तद्विषये मन्यन्ते; किन्तु कालान्तरे स्वयमप्यात्मविषये विशिष्टस्थायिभावं निर्मिम्मीते। यदि मातापितृभ्यामतिलालितो जायते, तर्हि तस्य स्वभावो निरङ्कुशो जायते। मनोवैज्ञानिकपदावल्यां तस्य स्वभावो जटिलो भवति। स्वगृहे तस्यैकच्छत्रराज्यं वर्तते। स आत्मानं तथैव सर्वतोऽधिकं बुद्धिशालिनं सुन्दरं धनिकं वेत्ति; किन्तु पाठशालां यदा स दुर्लालितोऽभिगच्छति, तदा तस्य स्थायिभावस्तथाविधं निरङ्कुशत्वं न भजते, सर्वे बालकास्तद्विरोधेऽवतिष्ठन्ते। तदायं बालकः स्वाचरणं परिष्कर्तुमारभते, येनान्यैः सह तस्य व्यवहारस्य सामञ्जस्यमापद्येत। सामञ्जस्यस्थापनं तस्य स्वाभिमानस्थायिभावेऽपि परिवर्तनमाधत्ते। कैशोरावस्थायां यदा स प्रविशति, स्वात्मविषयेऽधिकं चिन्तनं कुरुते, स्वान्तर्गतभावसंवेगप्रयत्नविचारादिविषये तस्य चिन्तनं विशिष्टां सरणिं ग्रहीतुमारभते। सम्प्रति स आत्मानं परिवारतो भिन्नम्, समाजस्येतरपुरुषेभ्यो भिन्नम्, स्वतन्त्रं पुरुषमभिज्ञातुं प्रवर्तते। स्वमूल्यम्, स्वमतस्य गौरवमनुमिमीते। इतरैः पुरुषैः सहानुरक्तो द्विष्टो वा स जायते। इतः प्रभृत्यामरणं तस्य स्वकीय आत्मा शरीरसमाजतः पृथग्भूतस्तस्य कार्यकलापं प्रेरयति। कदाचनायं साफल्येन स्वाभिमानमनुभवति, कदाचन दुराचरणेन आत्मविगर्हणामनुभवति। यद्यत् स कुरुते, सङ्कल्पयति, चिन्तयति, संवेगमनुभवति, यद्यच्च स इच्छति, स्मरति, कल्पते, अभ्यस्यति; तत्तत् सर्वमस्य स्वाभिमानाख्यस्थायिभावान्तर्गतं भूत्वा सामञ्जस्यमवाप्नुते, व्यवस्थां भजते, व्यक्तित्वाङ्गत्वेनाभिसम्पद्यते। तथा हि श्रुतिः—"यत्क्रतुर्भवति तत्कर्म कुरुते, यत्कर्म कुरुते तदभिसम्पद्यते" इति। अयं स्वाभिमानाख्यस्थायिभाव एवास्माकं चारित्र्यमुन्नेतुं नैतिकधार्मिकादर्शविशेषाभिमुखं प्रेरयितुमात्मदैन्यभावेन वाऽधस्तान्नेतुमलं भवति। अत एवोच्यतेऽभियुक्तैः—"मन एव मनुष्याणां

कारणं बन्धमोक्षयोः" इति। अत्र 'मनः' इति मानसिकभावनाविशेषः स्वाभिमानाख्यस्थायिभावरूपव्यक्तित्वपदवाच्य इत्यवसेयम्।

नायं स्वाभिमानाख्यस्थायिभाव एवाहङ्कारः। "अहङ्कार इति बुद्धेः परिणामः" इति सांख्याचार्य्याः। अहङ्कारश्च मनोबीजमिति सांख्याभिमतम्। अर्वाचीने मनोविज्ञाने 'अहङ्कार' इति 'गर्व' इति च पर्यायवाचकौ शब्दौ। अत एवाऽहङ्कारो गर्वो मिथ्याप्रतीतिजन्यः। नहि स्वाभिमानाख्यस्थायिभावस्तथा बोद्धव्यः। स्वाभिमानाख्यस्थायिभावे आत्मप्रतिष्ठानुप्राणितजीवनादर्शं परितो व्यक्तेः सर्वाः क्रियाः, सर्वे भावाः, सर्वे विचाराः, सर्वा इच्छाश्च सङ्घटिता भवन्ति। सर्वव्यापारसमन्वयोऽत्थ एव स्वाभिमानः। अहङ्कारस्वरूपं वयमग्रतो षोडशेऽध्याये फ्रायड युङ्गमतविवेचनावसरे वक्ष्यामः।

यदा स्वाभिमानो विकासं लभते, तदा शिशुर्बालकः पुरुषो वात्मप्रतिष्ठारक्षार्थं प्रयतते। या बालिका जानाति यत्स्वच्छता सर्वोपरि आपादनीया, सा स्वगुरुजनानां प्रशंसनमवाप्तुं नित्यं स्नानं कृत्वा केशान् प्रसाध्य स्वच्छानि वस्त्राणि धारयित्वा पाठशालां गच्छति। स्वाभिमानाख्यस्थायिभावे विकसिते सति बालकः सर्वप्रथमं पदं परीक्षायां लब्धुमभिकाङ्क्षते। यथा स्वाभिमानाख्यस्थायिभावनिर्म्माणेन मूलप्रवृत्तीनां संवेगानां चोन्नयनं परिशोधो वाभिनिर्वर्तते, तथा सर्वं वर्णितचरम्। स्वाभिमानख्यस्थायिभावो हि खलु सर्वेषां स्थायिभावानां जटिलतमम्, सर्वनियामकं मौलिकं रूपम्। सर्वेषामितरस्थायिभावानां सुनियन्त्रणमनेनैव प्रबलतमस्थायिभावेनाऽभिनिष्पाद्यते। अनेनैव व्यक्तेर्विविधमनोव्यापारेष्वैक्यं निर्वर्तयितव्यम्।

मदीया विविधाः स्थायिभावा जायन्ते। यथा पुत्रस्नेहः, स्त्रीप्रेम, राजकीयमहाविद्यालयविषयकाध्यापनकर्त्तव्यपालनम्, स्वाध्यायश्चेति। यो मां द्वेष्टि, तस्मै अहमपि नूनमभिद्रुह्यामि। यो मयि स्निह्यति, यो मम कष्टं दृष्ट्वा दयमानो भवति, यस्य वा मम कष्टं दृष्ट्वा चेतो भृशं दूयते, तस्मिन्नहमपि स्निह्यामि। अस्ति चैको ममादर्शविशेषः सत्यज्ञानानुसन्धित्सा, तदर्थं प्राणोत्सर्गमप्येवाहं न्यूनमेवाभिमन्ये, यदि कदाचनैतादृश्यावश्यकतापद्येत। सुतरां तद्यत्र सप्त विषयानवलम्ब्य मयि सप्त स्थायिभावा विद्यन्ते, सुदृढाश्च ते स्वस्थाने भवितुमर्हन्ति। मदीये स्वाभिमानाख्यस्थायिभावे ते सर्वे एव सन्निविष्टा भवन्ति, तेषां परस्परं सामञ्जस्यमनेनैव स्थायिभावेनाभिसम्पाद्यते यथावसरमित्यवधार्यम्।

२०. व्यक्तित्वैक्यम्, सदाचारनियमानां प्रभावश्च

विविधेषु स्थायिभावेषु सुघटितेषु कथङ्कारं व्यक्तित्वमैक्यमापद्यते? कदाचन विविधेषु स्थायिभावेषु परस्परविरोधित्वमुपजायते, ननु कथं हि तन्निवारयितव्यम्? कदाचन राजसेवायाः स्वकीयप्रेमासक्तिस्थायिभावेन सह विरोधो जायते, यथा अमरसिंहेन राणाप्रतापपुत्रेण शाहजहाँनामक-यवनाधिपश्यालं सलावतखानाख्यं घ्नताऽनुभूतः, अथवा मेघदूतवर्णितयक्षस्य रामगिर्याश्रमेषु यातना तमेव राजकीयसेवोचितकर्त्तव्यकान्तानुरागस्थायिभावयोरानुकूल्याभावं नितरां स्फोरयति। एवं च व्यक्तित्वैक्यं विविधस्थायिभावानां परस्परानुकूल्यतः प्रवर्तनायत्तम्। यदि विविधेषु स्थायिभावेषु सामञ्जस्यमितरेतरान्वितत्वमुपलभ्येत, तर्हि व्यक्तित्वमेकमक्षुण्णमवतिष्ठते। अथ

च यदा तेषां स्थायिभावानां परस्परं सङ्घर्षो जायते, तदा व्यक्तित्वं विभज्यते द्वेधा, त्रेधा, चतुर्धा वेति। असामान्यमनोविकाराणां सा हि दुरवस्था सर्वथा हेया। अस्तु तावत्, प्रबलतमस्वाभिमानाख्यस्थायिभावनिर्म्माणेन विविधस्थायिभावानां सुनियन्त्रणं सामञ्जस्यं च सम्पाद्यते। व्यक्तित्वैक्योपचितेरयमेकः प्रकारः, अपरश्च सदाचारस्यादर्शविशेषस्थिरीकरणेन तदनुचिन्तनेन चात्मना सह तादात्म्यस्थापनेन च व्यक्तित्वैक्यं द्रढयितुं संरक्षितुं च शक्यते। यदि अहिंसासत्यास्तेयशौचादिसार्वभौमसनातनसदाचारादर्शानां विषये सुदृढस्थायिभावानां बीजवपनं शैशवादेवारभ्येत, तर्हि नूनमस्माकं युवजनानां जीवनेषु व्यक्तित्वैक्यं सुलभं भविष्यति। विविधाः स्थायिभावाः सौकर्य्येणादर्शसिद्धान्तरूपध्वजप्रश्रये सम्मिलिताः सङ्घटिताश्च जायन्ते। आदर्शसिद्धान्तानुकूल्यत आचरणावधारणमचिरेण महता सौकर्य्येण चाऽभिनिर्वर्तते। 'सत्यं शिवं सुन्दरम्' इति न्यायो विशेषतः सामाजिकन्यायः। समानत्वम्, विश्वबन्धुत्वमित्याद्युदारमानवीयचरमलक्ष्याणामनुचिन्तनेन मदीयेतरपरस्परविरोधिप्रतीयमानेषु स्थायिभावेषु रागद्वेषलोभादिषु विवेकपुरस्सरमानुकूल्यस्थापनं सुकरं सम्भाव्यम्। प्रायश्चित्तान्यपि सदाचारसिद्धान्तानुकूल्याय कल्पन्ते। क्लृप्तं व्यक्तित्वैक्यं व्यक्तेर्महते गौरवाय कल्पते।

सुतरां व्यक्तित्वं नाम आत्मेति वा नाम व्यक्तेर्विविधस्थायिभावानां वर्णितचराणामानुकूल्यं सामञ्जस्यं वेति। सामञ्जस्यस्य सर्वोपरि साधकं सदाचारादर्शनियमानुसारं परिनिष्ठितं स्वाभिमानाख्यस्थायिभावद्वारा विविधस्थायिभावानां सङ्घटनम्, सुनियन्त्रणम्, सुपरिचालनं चेति विभाव्यम्।

२१. व्यक्तित्वानुमापनम्, तत्परीक्षणं च

अर्वाचीनयुगेऽनेकैर्मनोविज्ञानविचक्षणैर्व्यक्तित्वानुमापनार्थं तत्परीक्षणार्थं च बहूनि प्रयतनानि समारब्धानि। वस्तुतस्तु तैस्तैः परीक्षणैर्नहि व्यक्तित्वं तावत्तया इयत्तया वा परिमाणसङ्ख्याविशेषपरया तुल्या परिमातुं सङ्ख्यातुं वा शक्यते। यत्परीक्ष्यते तैस्तैः प्रयोगैः, तत्तु व्यक्तित्वाङ्गभूतो गुणविशेषः। तेषु प्रयोगेषु केचन शारीरिकस्वभावविषयकव्यक्तित्वगुणाकलनार्थं प्रवर्तन्ते। मनोवैज्ञानिकप्रवराणां वुडवर्थमहोदयानां संवेगानामस्थायित्वपरीक्षणम्[१], बेलमहोदयानामानुकूल्यगवेषणा[२], बर्नरायटरमहाभागानां व्यक्तित्वानुसन्धानम्[३]—इत्यादि परीक्षणानि विशेषत उल्लेखनीयानि।

प्राध्यापकवुडवर्थमहाभागानां परीक्षणे षोडशोत्तरशतप्रश्नाः समाविष्टाः[४]। यथा—किं त्वं निशीथे प्रायो भयमनुभवसि? किं त्वं प्रायोऽवसादम्, आत्मदैन्यं वानुभवसि? इत्या-

---

१. तुलनार्थम्—Woodworth's "test of emotional instability".

२. तुलनार्थम्—Bell's "Adjustment Inventory".

३. तुलनार्थम्—Bernreuter's "Personality Inventory".

४. द्रष्टव्यम्—A Hand book of mental examination method, by S. I. Franz, (pp. 170–179) (mac. millan, 1920)

द्यः प्रश्नाः। तेषामुत्तराणि 'ओम्' 'नहि' इत्येवं प्रदातव्यानि। एतयोरेकमुत्तरं नूनमसामान्य-मनोविकारमभिव्यञ्जयति। सामान्यपरीक्षणैर्निर्णीतं यत् प्रायो जनाः प्रतिशतं दशोत्तराणि अस्वस्थपुरुषवद् प्रददति। एतावता तेषामस्थायिस्वभावत्वमवधारयितुं शक्यते। ब्रहवः प्रश्नाः स्वभावव्यतिरिक्तत्वाङ्गभूततत्त्वपरास्तस्यां सूच्यां सन्ति।

कानिचित् परीक्षणानि चरित्रानुमापनार्थमुपकल्पन्ते। तेषु डाउनीमहोदयानां स्वभावेच्छाशक्तिपरीक्षणानि[1] विशेषेणाल्लेखनीयानि। एतैः परीक्षणैः परीक्षार्हव्यक्तेः प्रतिक्रिया-निरोधः प्रतिक्रियासौकर्य्यं चावधार्यते। याः प्रतिक्रिया विशेषतोऽनुसन्धानस्य विषयीभवन्ति, तास्तु हस्तलेखमधिकृत्याधीयन्ते। एतावता परीक्षणानामुपयोगित्वं परिहीयते।

कानिचित् प्रश्नावलिसमन्वितानि परीक्षणानीतरमनोवैज्ञानिकैरुपकल्पितानि सन्ति। तस्मिन् प्रश्नजाते बौद्धिकस्वभावसम्बन्धिचारित्रिकगुणादीनां व्यक्तित्वाङ्गभूतानामियत्ता परीक्ष्यते। सर्वोत्तमा विशदा उपयोगिनी चैतादृशी प्रश्नावली मनोवैज्ञानिकप्रवराणाम् आलपोर्टमहोदयानां वर्तते। तेषां "व्यक्तित्वगवेषणाय क्रमिकप्रश्नावली" इति नामकं पुस्तकं[2] विश्वविश्रुतम्। अस्यां सूच्यां षट्सप्तत्युत्तरशतं प्रश्नाः (१७६) सङ्कलिताः। प्रश्नानां वर्गीकरणं निम्नलिखितशीर्षकानुसारं विभक्तमुपलभ्यते। तद्यथा—

१—व्यक्तित्वविकासः।
२—बुद्धिः, योग्यता च।
३—संवेगात्मकशारीरिकक्रियाजातम्।
४—आकाङ्क्षारुचिव्यावसायिकप्रवृत्तयः।
५—क्रियाभ्यासाः।
६—मनोरञ्जनानि।
७—सामाजिकनैतिकपक्षमधिकृत्य व्यक्तित्वगुणाः।
८—कामप्रवृत्तिः, पारिवारिकजीवनं च।
९—आत्मविषयः, चरमतत्त्वविषयश्च।
१०—आत्मविकासः।

अनया प्रश्नावल्या व्यक्तित्वाध्ययनमतीव सौकर्य्येण कर्तुं शक्यते। स्वकीयस्य परेषां च व्यक्तित्वाध्ययनं यर्कीसमहोदयद्वारा लारुईमहाभागेन सह लिखितेन "आत्मस्वाध्यायस्य रूपरेखा" इति नामधेयपुस्तकेन सम्पादयितुं शक्यते[3]। अस्मिन् पुस्तके वंशानुक्रमायत्तगुणानां वातावरणजनितप्रभावाणां व्यक्तित्वाङ्गभूततत्त्वानां च विश्लेषणपुरस्सरमनुसन्धानं प्रवर्तितम्।

---

१. द्रष्टव्यम्—J. E. Downey, "The will-temperament and its Testing".

२. द्रष्टव्यम्—C. H. Stoelting, 1925.

३. द्रष्टव्यम्—'Out line of a Study of the Self' (Harvard University Press.)

२२. व्यक्तित्वद्वैधीभावः

स्थायिभावसङ्घर्षेण कदाचन व्यक्तित्वं द्वेधा त्रेधा वा विभज्यते। व्यक्तित्वस्यैवंविध-विभागो 'व्यक्तित्वद्वैधीभावः' इति व्यपदिश्यते। एका एव व्यक्तिः स्वस्य विभिन्ने रूपे अजानाना द्वे व्यक्ती इवाचरति; यथा—एका शूद्रा यदा राजमार्गं मार्ष्टि, तदा मार्जनं कुर्वती सा आत्मानं राजमहिषीमिवाऽभिमन्यते। तस्या अयं स्थायिभावो राजमहिषीत्वकामनया-विर्भवति। व्यक्तित्वस्यैकं रूपमन्येन सह सामञ्जस्यं नापाद्यते। सूक्ष्मचैतन्येऽवस्थिता अभावग्रन्थिरेव व्यक्तित्वं द्वेधा विभजतीति सर्वमसामान्यमानसविकारजातं वयमग्रेऽनुपदं व्याख्यास्यामः॥

इति अर्वाचीने मनोविज्ञाने व्यक्तित्वविवेचनीयः पञ्चदशोऽध्यायः॥

षोडशोऽध्यायः

असामान्यमनोविज्ञानविवेचनम्

१ विषयोपोद्घातः

पूर्वेषु पञ्चदशस्वध्यायेष्वस्माभिः सामान्यमनोविज्ञानं सपरिकरमनुव्याख्यातम्। अथातो वयमसामान्यमनोविज्ञानस्वरूपमनुव्याख्यास्यामः।

सामान्यमनोविज्ञानं हि सामान्यतः स्वस्थपुरुषाणां मनोव्यापाराणां चिन्तनस्मृतिकल्पना-विचारप्रयत्नादीनां साङ्गोपाङ्गमध्ययनं प्रकुरुते। असामान्यमनोविज्ञानं तर्हि असामान्यमनो-व्यापाराणामस्वस्थमनुष्याणां मानसिकावस्थाविशेषाणां विशेषेणाध्ययनम्। अतो हि प्रस्तुतग्रन्थस्य प्रतिपाद्यं सामान्यमनोविज्ञानम्, असामान्यमनोविज्ञानं च; तयोराद्यं निरूपितमित्यतोऽसामान्यमनो-विज्ञानस्वरूपविवेचनमेवावशिष्यते। पूर्वस्मिन्नध्यायेऽस्माभिः प्रतिज्ञातमपि यदसामान्यव्यक्तित्व-विवेचनमग्रतः करिष्यत इति तत्प्रारभ्यते। असामान्यमनोविज्ञानविवेचनीयं ह्यसामान्यव्यक्तित्व-मिति तु स्फुटमेव। असामान्यमनोविकाराणां स्वरूपम्, तेषां हेतुः, तेषां चिकित्सा, चिकित्सा-पद्धतिश्चेति सर्वं प्रतिपदमनुव्याख्यास्यामः। असामान्यमनोविकारेषु हि खल्वपस्मारोन्माद-प्रभृतिविकाराणामन्तर्भाव इष्यते।

२. असामान्यमनोविज्ञानमानसिकचिकित्साविज्ञानयोर्भेदः

व्यावहारिकमनोविज्ञानस्य विविधान्यङ्गानि सन्ति; यथा— शिक्षामनोविज्ञानम्[1], मानसिक-चिकित्साविज्ञानम्[2], व्यावसायिकं मनोविज्ञानम्[3], वैज्ञानिकं मनोविज्ञानं[4] चेति। मानसिक-चिकित्साविज्ञानम्, असामान्यमनोविज्ञानं[5] चानर्थान्तरमिति न वाच्यम्। यद्यपि असामान्य-मनोविज्ञानं मानसिकासामान्यावस्थाविशेषाणां सपरिकरमनुव्याख्यानं करोति, तथापि मानसिक-चिकित्साविज्ञानं व्यावहारिकमनोविज्ञानस्यैका[6] विशिष्टा शाखा वर्तते, असामान्यमनोविज्ञानं च विवेचनात्मकविज्ञानस्याङ्गविशेष[7] इति मुहुर्मुहुः स्मर्तव्यम्। असामान्यमनोविज्ञानं हि विशुद्धं विज्ञानम्। वस्तुभूतासामान्यमनोऽवस्थानुगतानुव्याख्यानपरेणासामान्यमनोविज्ञानेन नूनं मानसिकचिकित्साविज्ञाने महत् सौकर्य्यमापद्यते, तदुपकारकत्वात्। अस्माकं यद् विवक्षितं तद-सामान्यमनोविज्ञानमेवेत्यूह्यम्। मानसिकचिकित्साविज्ञानेऽसामान्यमनोविज्ञानातिरिक्त व्यावसायिकव्यवहारकौशलमप्यन्तर्भवतीति सर्वमनुसन्धेयम्।

---

१. तुलनार्थम्—Educational psychology.
२. तुलनार्थम्—Psycho therapy.
३. तुलनार्थम्—Industrial psychology.
४. तुलनार्थम्—Psychology of Advertisement.
५. तुलनार्थम्—Abnormol psychology.
६. तुलनार्थम्—Applied Psychology.
७. तुलनार्थम्—Theoretical Psychology.

३. फ्रायडमहोदयानां वैशिष्ट्यम्

अर्वाचीनमनोविज्ञानस्य असामान्यमनोविज्ञानशाखाया वैज्ञानिकशिरोमणिफ्रायड-युङ्ग-एडलरप्रभृतिभिर्यादृशी समुन्नतिरल्पीयस्येव काले सम्पादिता, तादृशी समुन्नतिः मानवजातेर्महते कल्याणाय कल्पते। मानसिकरोगाणां चिकित्सापद्धतौ नूनमसामान्यमनोविज्ञानपारङ्गतैर्मनोविश्लेषणवादप्रवर्त्तकैः फ्रायडमहाभागैरामूलचूडं परिवर्तनं सम्पादितम्। इतः प्राक् सर्वदेशेषु मानसिकरोगिणां दुर्दशा आसीत्। यथा योरपीयदेशेषु तथैव भारतेऽपि मानसरोगिण उन्मादादिपीडिताः पाशैर्निबध्यन्ते स्म। 'भूतपिशाचदेवपितृविशेषप्रदत्तयातनामयोऽयमुन्मादादिरोगः' इति सामान्यजनानां मान्यता आसीत्। कुमारीडिक्समहोदयाभिर्यत् स्मृतिपत्रं संयुक्तराष्ट्रस्यामेरिकादेशस्य संसदि (काँग्रेसे) विचारार्थं प्रेषितमासीत्, तस्मिन् विविधा यातना विशदतया वर्णिताः समुपलभ्यन्ते। आर्यावर्त्ते घोरशिक्षाऽभावे वर्तमाना ग्रामीणजना नागरिकाश्चाद्यापि नूनमेतादृशान्धविश्वासनिगडिता दृश्यन्ते, यद्यपि स्वातन्त्र्योन्मेषादनन्तरं भारतीयसर्वकारेण निरन्तरमेतादृशरोगिणां कृते समुचितमायुर्वेदीयमनोवैज्ञानिकचिकित्सार्थं प्रयत्यते। का तर्हि सामान्यलोकानां पुरातनी मानसोन्मादादिरोगाणां चिकित्सापद्धतिरिति ? अत्रोच्यते—एकस्तान्त्रिकः समायाति, स च मद्यपो मांसाहारी प्रायो दुराचारी विधुरो भवति। उन्मादग्रस्तं मानसिकरोगिणं निशीथे भृशं ताडयति दण्डेन, मुष्टिभिः, पादाघातैर्वा। घृतदीपसम्मुखं दशवर्षीयबालकद्वारा प्रश्नमुखेनोच्चरति—

तान्त्रिकः—भो बाल, किं पश्यसि त्वम् ? कृष्णं राक्षसं किम् ?

बालः—ओम् ! एवमेव, कृष्णं विपुलकायं दण्डहस्तं राक्षसमहं पश्यामि।

तान्त्रिकः—अन्यत् किं पश्यसि ? किं राजानम् ?

बालः—ओम् ! एवमेव, अयं राक्षसः मामनुधावति। इत्यादि।

एवम्प्रकारेण 'देवपितृकोपजन्योऽयमुन्मादविकारः' इति साधयति। पुष्कलदक्षिणां प्राप्य स गच्छति। ताडनाद् द्वित्रदिनानि यावत् स्थित्वा स गच्छति। जना रोगिणमेकाकिनं गृहे बन्दिनं कुर्वन्ति। लोहमयशृङ्खलाभिः प्रतिबध्नन्ति। महाकाल्यै देव्यै दानविशेषः प्रदीयते। पुरोहितेन लक्षवारं जपः क्रियते। किं किं न कुर्वन्ति तेऽन्धविश्वासग्रस्ता अज्ञाननिबिडतिमिराभिभूताः ! काः का यातना मानसिकरोगिभ्यो न प्रदीयन्ते !

फ्रायडमहाभागा मनोविश्लेषणविधेराद्यप्रवर्तकाः सर्वोत्तममानसिकरोगाणामुन्मादापस्मारप्रभृतीनां सफलचिकित्साविशारदा नूनं मानवजातेः धन्यवादार्हाः। तैर्महानुभावैः प्रतिपादितं यद्धि मनोविकाराणां चिकित्सा मनोवैज्ञानिक्येव भवितुमुचिता। मनोविश्लेषणवादस्तैः प्रवर्तितो मनोवैज्ञानिकचिकित्सापद्धतिदिशि सफलः प्रयोगः। तैर्महानुभावैः सर्वप्रथममतिस्फुटं व्याख्यातम्—किं स्वप्नस्य कारणम् ? किं स्मृतिभ्रंशस्य कारणम् ? कश्चोन्मादापस्मारादिरोगहेतुः ? कश्च तस्योपचारविधिश्चेति ? तेषां गौरवं मानवीयोदारदृष्टिकोणनिर्म्माणायार्वाचीनविश्वसंस्कृतिसर्वस्वाय किलानुपमं वर्तते। वैज्ञानिकपरिशीलनदृष्ट्या यत्स्थानं प्राणिविज्ञाने डार्विनमहोदयानां विकासवादप्रवर्त्तकानां विद्यते, तदेवार्वाचीनमनोविज्ञानसाहित्ये फ्रायडमहाभागानां वर्तते। नहि मानसिकरोगाणामुन्मादप्रभृतीनां चिकित्सा आयुर्वेदप्रणाल्या कर्त्तव्या, अपि तु मनोविज्ञानरीत्यैव मानसिक

विकाराणां निदानमन्वेष्टव्यम्, चिकित्सा चापादनीयेति फ्रायडमहोदयानां मतम्। वयमग्रे फ्रायडमतम्, तदनुयायिनां तच्छिष्याणां वा युङ्ग-एडलरप्रभृतीनामन्येषां च मतानि विशदतयानुव्याख्यास्यामः।

४. यवनदेशीयहिपोक्रेटीजमतम्

यद्यपि फ्रायडमहोदयात् पूर्वं मानसिकरोगाणामुपचारचिकित्सादिकमत्यर्थमन्धविश्वासपूर्वकं प्रचलति स्म, तथापि पुरातनैः कैश्चन विद्वद्भिः प्रतिपादितमासीद् यद्धि मानसिकरोगाणां निदानं मनोवैज्ञानिकं भवतीति। वयमत्र विशेषतः चिकित्सकमूर्धन्ययोर्द्वयोः हिपोक्रेटीज–पुनर्वस्वात्रेयमहर्षिप्रवरयोर्मते स्फुटीकरिष्यामः। नूनं कथं तन्निदानं मनोवैज्ञानिकरीत्याऽन्वेष्टव्यम्? कथञ्च तस्य मनोवैज्ञानिकी चिकित्सा सम्पाद्यते? इति सर्वं प्रतिपदं सर्वोपरि स्फुटतया मौलिकरीत्या मनोविज्ञानपारङ्गतैश्चिकित्सकवरेण्यैः फ्रायडमहाभागैरेवानुव्याख्यातम्। सुतरां तावत् पुराकाले यवनदेशे एको हिपोक्रेटीजनामा[1] विद्वान् पेरिक्लीजनाम्नो[2] गणतन्त्राधिपस्य शासनकालेऽभूत्।

अयम् (५५२ वि० पू०–४८६ वि०पू०) आसीत्। तदानीं जना मानसिकरोगानपस्मारोन्मादादीन् भूतपिशाचादिभिर्जन्यानमन्यन्त। हिपोक्रेटीजमहोदयस्तदा प्रतिपादितवान् यदुन्मादापस्मारादिरोगा देवविशेषस्य कोपान्नह्याविर्भवन्ति, यथान्ये शारीरिकरोगा अपि न भवन्ति; प्रत्युत उन्मादादिरोगाणां कारणं शारीरिकमायुर्वेदविज्ञानगम्यं भवतीति। अस्मिन् ग्रन्थे 'आयुर्वेद' इति शब्दः पाश्चात्यप्राच्यचिकित्सापद्धतिसमन्वयोत्थचिकित्सापद्धतिसूचकोऽवगन्तव्यः। अथ चायुर्वेद इति 'यवनदेशीय आयुर्वेदः' अवसेयः। अपस्माररोगमधिकृत्य तैर्महाभागैरुक्तम्—"शिरःपटलं शल्यचिकित्सारीत्या विदीर्य त्वं तत्र मस्तुलुङ्गमार्द्रं पश्यसि, स्वेदमयं पूतिगन्धं च। एतावतेदं द्रष्टुं शक्यते यन्नायं देवविशेषो यः शरीराय कष्टं प्रदत्ते; प्रत्युतायं रोग एव" इति[3]। तेनानेकभयादिकस्य निदानमपि व्याख्यातम्।

हिपोक्रेटीजमहाभागो यवनदेशीयायुर्वेदपद्धतेः पितेति पुरातत्त्वविदां मतम्। अन्धविश्वासं यद्यपि नूनमपाकर्तुं तन्मतं प्रभवति, तथापि मनोवैज्ञानिकमसामान्यमनोविकाराणां निदानं मनोवैज्ञानिकी चिकित्सापद्धतिर्वा तैर्नोपकल्पिता। तेषां मतं विशुद्धायुर्वेदीयमिति वयं मन्यामहे।

५. पुनर्वस्वात्रेयमहर्षिमतम्

वैक्रमाब्दारम्भादष्टशतवर्षात् पूर्वं तक्षशिलास्थितविश्वविद्यालयस्यायुर्वेदप्राध्यापकप्रवराणां भगवतां पुनर्वस्वात्रेयमहर्षीणां मतं यद्यपि विशुद्धायुर्वेदीयपद्धतिमनुसरति,

---

१. तुलनार्थम्—Hippocrates.

२. तुलनार्थम्—Pericles (415 B. C.—421 B. C.)

३. तुलनार्थम्—"If you cut open the head, you will find the brain humid, full of sweat and smelling badly, and in this way, you may see that it is not a good that injures the body, but disease."

तथापि तस्मिन्नुन्मादापस्मारादिमानसिकविकाराणां निदानं मनोवैज्ञानिकं भवतीति निर्देशः समुपलभ्यते। यथा—

"इह खलु पञ्चोन्मादा भवन्ति; ते यथा—वातपितकफसन्निपातागन्तुकनिमित्ताः।···

"उन्मादं पुनर्मनोबुद्धिसंज्ञाज्ञानस्मृतिभक्तिशीलचेष्टाचारविभ्रमं विद्यात्।··"

यस्तु दोषनिमित्तेभ्य उन्मादेभ्यः समुत्थानपूर्वरूपलिङ्गवेदनोपशयविशेषसमन्वितो भवति, उन्मादं तमागन्तुकमाचक्षते। केचित् पुनः पूर्वकृतं कर्माप्रशस्तमिच्छन्ति तस्य निमित्तम्, तत्र च हेतुः प्रज्ञापराध एवेति। तथा हि भगवान् पुनर्वसुरात्रेयः—

"प्रज्ञापराधाद्धि यो देवर्षिपितृगन्धर्वयक्षराक्षसपिशाचगुरुवृद्धसिद्धाचार्य्यपूज्यानवमत्याहितान्याचरति, अन्यद् वा किञ्चिदेवंविधं कर्माप्रशस्तमारभते, तमात्मनोपहतमुपघ्नन्तो देवादयः कुर्वन्त्युन्मत्तम्" इति [1]।

उपर्युक्तमहर्षिपुनर्वस्वात्रेयमते यद्यपि तत्र च हेतुः प्रज्ञापराध एवेति, नूनं मनोवैज्ञानिकं कारणमुन्मादस्य निर्दिष्टम्; तथापि देवपितृगन्धर्वाद्यभ्युपगमेन महान्धविश्वासगौरवाभिभूतमपल्लवितं चेदं मतमकिञ्चित्करमेव मनोविज्ञानदृष्ट्येति वयं मन्यामहे।

८. योरपदेशे असामान्यमनोविज्ञानविकासः

यथा पूर्वमुक्तमस्माभिर्यद् योरपदेशे खीष्टीयाष्टादशशताब्द्यामायुर्वेदविज्ञाने प्रकर्षमुपगते 'देवपितृकृता उन्मादादिदोषा समभिनिर्वर्तन्ते' इति मतं निराकृतम्। पाश्चात्त्यायुर्वेदविज्ञानेन तदा साग्रहं प्रतिपादितं यद्ध्युन्मादादिदोषाः शारीरिकव्याधयो भवन्ति, यतो हि तेषां प्रादुर्भावो मस्तुलुङ्गीयमृदुनाड्डीद्रव्याघातजन्यो भवति। तत उन्मादादिरोगग्रस्ताः पुरुषा विविधयातनाभ्यो मुक्तिमवाप्तवन्तः। तेषां कृते उन्मत्तशरणालयाः[2] संस्थापिता जाताः, किन्तु तत्र तेषां दयनीयपरिस्थितिहेतोः परिरक्षणमेव क्रियते स्म। किं कारणं विशेषेणैतेषां रोगाणां भवति? इति निश्चयाभावात् तदानीं खीष्टीयाब्दस्य तच्चिकित्सायां प्रगतिविशेषोऽपि न जातः; किन्त्वेकोनविंशतिशताब्दीसमारम्भतो मनोविज्ञानरीत्या सामान्यमनोविकाराणामध्ययनं प्रवृत्तम्। तत्परिणामस्वरूपं चारकॉट-[3]जैनेट[4]-फ्रायड[5]प्रभृतिमनोविज्ञानपारङ्गतैः प्रयोगैर्नैरन्तर्येण साधितं यदुन्मादादिमनोविकाराणां मूलं मनोवैज्ञानिकमवश्यं भवति। तेषां चिकित्साऽपि मनोवैज्ञानिकरीत्यैवापादनीयेति। तेषां मतप्रचारेण असामान्यरोगिणां कृते सार्वत्रिको दयालुभावो मानवीयोदारदृष्टिश्च संवर्धिता। अधुना मनोवैज्ञानिकरीत्यैवासामान्यमनोविकाराणां चिकित्सा कुशलैर्मनोविश्लेषणज्ञैः सम्पाद्यते।

---

१. तुलनार्थम्—चरकसंहिता, निदानस्थानम् पृ० २४६–२५१ (निर्णयसागरप्रेस, मुम्बईसंस्करणम्)

२. तुलनार्थम्—Lunatic Asylums.

३. तुलनार्थम्—Charcot.

४. तुलनार्थम्—Janet.

५. तुलनार्थम्—Sigmund freud.

७. द्विविधा मानसिकरोगाः

मानसिकरोगाणां वर्गीकरणं नितरां दुष्करं भवति। केचन रोगाः वंशपारम्पर्यायत्ताः, केचनान्ये वातावरणप्रभावात् प्रादुर्भवन्ति। केचन चान्ये पौष्टिकभोजनाभावे जायन्ते। केचन चान्ये चिन्तनसंवेदनप्रयत्नादिमनोव्यापाराणां परस्परं समन्वयाभावादभिनिर्वर्तन्ते। कारणानि प्रायोऽतिव्याप्तिदोषाकुलितानि भवन्ति। अतः कथं समीचीनं मनोविकाराणां वर्गीकरणं सम्पादनीयम्! अस्तु तावदिदं वर्गीकरणम्; शरीरजा मानसिकरोगा मनोऽनवस्थव्यापारजन्याः, मानसिकरोगाश्चेति। यद्यपि शारीरिकविकारे जायमाने मानसिकव्यापारानुगतदोषा अप्यभिनिर्वर्तन्ते, मानसिकव्यापारानुगतदोषेषु जायमानेषु च शारीरिकरोगा अवश्यमेव प्रादुर्भवन्ति; तथापीदं वर्गीकरणं विचारविवेचने महत्सौकर्य्यमावहति। यदा मस्तुलुङ्गावयवविशेषोपघातात्, अथवा शरीरावयवरोगस्य परिणामतः शरीरान्तर्गतरासायनिकविषाक्तपरिवर्तनानि जायन्ते, किमुत रोगकृत्कोषाणुकानि[1] रक्तप्रवाहे समुत्पद्यन्ते; तदा यदि केचन मानसिकरोगाः प्राकट्यं लभन्ते, दृष्टिगोचरा वा भवन्ति, तदा तद्विधानां मानसिकरोगाणां मूलं शरीरजमन्वेष्टव्यम्। किन्तु यदि दैनन्दिनमानसिकव्यापारेषु चिन्ताप्रकर्षाद् इच्छाद्वन्द्वात् स्थायिभावसङ्घर्षाद्वा विचारेच्छाप्रयत्नादिषु किञ्चिदविशृङ्खलीकरणं विपर्यासं वा दृष्टिगोचरं भवति, अथवा व्यक्तित्वद्वैधीभाव एव प्रादुर्भवति, तदा ये येऽसामान्यमनोविकारा अभिनिर्वर्तन्ते, ते सर्वे मानसिकरोगा इत्यवसेयम्। न पूर्वोक्तशारीरिकरोगाणां निदानचिकित्सादिकमधिकृत्य विवेचनमसामान्यमनोविज्ञानप्रतिपाद्यान्तर्गतम्; किन्तु मनोव्यापारजन्यानां मनोविकाराणां निदानचिकित्सादिकमधिकृत्य सपरिकरविवेचनमसामान्यमनोविज्ञाने त्विष्यत एव। अथातो वयं तदेवानुव्याख्यास्यामः।

मनोविज्ञानपिपठिषुणा नूनमिदं स्मर्तव्यं यद्धि शारीरिकमानसिकरोगाणामन्योऽन्याश्रयत्वं विद्यते। शारीरिकरोगाणां प्रभावाद् मनोव्यापाराणामस्तव्यस्तता प्रादुर्भवति। असामान्यमनोविकाराणां प्रभावाच्च शरीरावयवेषु विकाराः समभिनिर्वर्तन्ते। मनोविश्लेषणादिमनोवैज्ञानिकविधिना यद्यपि शरीरावयवानां क्षतिः पूरयितुं न पार्यते, तथापि सा ह्रासोन्मुखी जायते। रोगिणां वैकल्यं शिथिलीकर्तुं कदाचन चापाकर्तुमपि क्षमते। अर्धाङ्गादिरोगेषु समुचितमनोवैज्ञानिकचिकित्सानुष्ठानात्तत्तदङ्गक्रियाकारित्वं पूर्ववदभिसम्पद्येत। मनोऽधिष्ठितत्वात् शरीरस्य साकूतमिदं वाक्यं भवति—"मन एव मनुष्याणां कारणं बन्धमोक्षयोः" इति। शारीरिकाघातादिचिकित्सा तु नूनमायुर्वेदविधिना चूर्णवटिकादिसेवनेन सम्पादनीयेति शेषः। असामान्यमनोविज्ञानमधीयाना मनोविश्लेषणविधिना ये मानसिकान् रोगान् परिहर्तुं चिकित्सितुं वा कामयन्ते, तेषां कृते यदि किञ्चिदायुर्वेदज्ञानमपि सुलभं भवेत्, तत्तु नूनमिष्टमेव।

८. असामान्यं मनोविज्ञानम्

किंस्वरूपं तर्हि खल्वसामान्यं मनोविज्ञानम्? असामान्यं मनोविज्ञानमिति न विशिष्टं मनोविज्ञानाद् व्यतिरिक्तं विज्ञानम्; प्रत्युत मनोविज्ञानस्यैवाद्यावधि उपेक्षितैका

१, तुलनार्थम्—Bacteria,

शाखा। विगतपञ्चाशद्वर्षेषु यादृशी प्रगतिरसामान्यमनोविज्ञानेन फ्रायडमहाशयानां नेतृत्वे सम्पादिता, तया बालमप्यर्वाचीनं मनोविज्ञानं प्रौढमिव प्रतिभाति। सर्वं वैज्ञानिकं जगच्च तेनाभीक्ष्णं चकितदृष्टि दृश्यते। असामान्यमनोविज्ञानं सुतरां तावत् किंलक्षणम्? अत्रोच्यते—मनोव्यापाराणामसामान्यावस्थापरिशीलनपरं विज्ञानमसामान्यमनोविज्ञानम्। अथवा, मानसिकरोगाणां वैज्ञानिकपरिशीलनमसामान्यमनोविज्ञानम्। स्वस्थमनुष्याणां मनोव्यापारानधिकृत्य यदध्ययनं प्रवर्तते, तत्तु 'सामान्यं मनोविज्ञानम्' इति प्रख्यायते। किन्तून्मादापस्मारस्मृतिभ्रंशव्यक्तित्वद्वैधीभावादिरोगपीडितानां मनोव्यापारानधिकृत्य यदनुशीलनं मनोवैज्ञानिकपद्धत्या सम्प्रवर्तते, तद् 'असामान्यमनोविज्ञानम्' इति निगद्यते। मनोव्यापारानुदिश्य को हि खलु स्वस्थः सामान्यो वा जनः? कश्चाऽसामान्योऽसाधारणो विलक्षणव्यक्तित्वयुक्तो वा स्वस्थो वा जनः? इति सौकर्येण निश्चेतुं न शक्यते। असामान्यम्, सामान्यमिति पदद्वयं नहि कञ्चन मनोव्यापारविशेषमधिकृत्य प्रयुज्यते; प्रत्युत तस्यानुस्यूतिं प्रयत्नेच्छादिसर्वेषु मनोव्यापारेषु लभामहे। यदि कल्पना काञ्चन मर्यादामतिशेते, सा नूनमुन्मादाय रोगाय कल्पते। कव्युन्मत्तयोरस्ति हि सूक्ष्मतमो भेदः। कवेः स्वस्थं व्यक्तित्वम्, उन्मत्तस्याऽस्वस्थमिति वयं ब्रूमः। नहि कविरात्मानं 'राजमहिषी' इति साभिनिवेशमभिमन्यते, यद्यपि स नाटके राजमहिषीपात्रस्य प्ररोचनां करोति; नाप्यभिनेत्री आत्मानं राजमहिषीं साग्रहमभिनयानन्तरमभिमन्यते, नापि सा मार्जनपरायणा शूद्रा बालिकेवात्मानं सर्वदा राजमहिषीमभिमन्यते; किन्तु राजमार्गे मार्जन्तीं शूद्राम्—"अहं राजमहिषी! मच्छासनात् मण्डलाधीशोऽप्यत्रैव पादप्रक्षालनं करिष्यति। इमे मे केयूरे ह्यो विनिर्मिते जाते" इति ब्रुवन्तीं वयं पश्यामः। तस्या व्यक्तित्वं द्वैधीभावापन्नं किल सर्वदा नावतिष्ठते। सा तु मानसिकरोगिणी। तस्या व्यक्तित्वमस्वस्थमितीर्यते। सुतरां तावत् प्रतिमानसव्यापारविशेषमादायेदं वक्तुं शक्यते यदस्येदं रूपं सामान्यम्, इदं चास्य रूपमसामान्यमिति। असामान्यमनोविज्ञानं नहि क्रमशः प्रक्रमते। सम्मोहनम्, स्वापे चङ्क्रमणम्, संकेतः, व्यक्तित्वद्वैधीभावो वा विलक्षणमसाधारणं मनोव्यापारविशेषमादायासामान्यमनोविज्ञानीयं परिशीलनं परीक्षकैः समारभ्यते। एतादृशमनोऽवस्थाविशेषाध्ययनपूर्वकं फ्रायडप्रभृतिविदुषां जिज्ञासा तद्गवेषाणार्थं समुत्पन्ना। वयमत्र तेषां मतानि सविस्तरं प्रतिपादयिष्यामः।

६. मेशमरमतम्

१८१७ वैक्रमाब्दे आस्ट्रियादेशीयो मैसमरनामा विद्वान् मानसिकरोगानपस्मारादिकान् हस्तद्वारा चुम्बकीयाकर्षणं प्रदाय रोगिणं सम्मोहनदशायां नीत्वा चिकित्सितुं समारब्धवान्। स विश्वविश्रुतां ख्यातिं लब्धवान्। तस्य सम्मोहनविधिः 'मेसमेरिज्म' इति व्यपदेशेन प्रथते। कथं नु पक्षाघातापस्मारादिरोगनिवारणं कर्तुं शक्यते सम्मोहनद्वारा? इत्याशङ्कयायुर्वेदविदां महती अश्रद्धा जाता। फलत एक आधिशासनिकायोगः[1] तद्विधिगुणगौरवलाघवं विनिर्णेतुं शासनेन नियोजितः। तस्मिन्नायोगे अमेरिकादेशीयफ्रांस-

---

१. तुलनार्थम्—Royal commission.

देशस्थराजदूतवैज्ञामिनफ्रैङ्कलिन[१]-रासायनिकप्रवरलेवोजियर[२]प्रभृतयो वैज्ञानिका आसन्। तेनायोगेन निर्णीतं यन्मैसमरस्य सम्मोहनप्रभावाद्रोगचिकित्सा न जायते; प्रत्युत रोगिकल्पनाप्रभावादेषा सम्पद्यते। यद्यपि तदानीन्तनवैज्ञानिकैर्मैसमरमहोदयानां विधिर्न प्रशंसितः; तथापि तस्य गौरवं तदनन्तरं श्री चॉरकाटमहोदयेन नितरां प्राकट्यं नीतम्।

१०. चारकॉटमतम्

मैसमरपद्धतिमाश्रित्य नांसीस्थितलिब्रॉलेवर्नहेममहोदयाभ्यां[3] बहुभिः प्रयोगैः सम्मोहनद्वारा अपस्मारजन्यान्धत्वार्धाङ्गसंज्ञाशून्यत्वमूर्च्छादिदोषाणां चिकित्सा सम्पादिता। सम्मोहनजन्यसमाधौ लिब्रॉलेमहोदया रोगिणं प्रत्यूचुः—"तव रोगो दूरीभूतः" इति। आश्चर्यं महदेतद्यदेतावतैव तस्य रोगो दूरङ्गतः।

एतस्मिन्नेवान्तरे चारकॉटमहाभागेन (१८८२ वै०–१९५० वै०) पेरिसनगरे नाडीतन्त्रविषयकमानसिकविकाराणामध्ययनं समारब्धम्। तदानीन्तनः सर्वश्रेष्ठो नाडीतन्त्रविशारदो हि स आसीत्। तस्य वैज्ञानिकक्षेत्रेषु बहुमानतया सम्मोहनस्य मनोवैज्ञानिकव्यापाररूपत्वं निश्चप्रचं सिद्धं जातम्। तेनापस्माररोगस्य निदानं तज्जनितनाडीमण्डलविक्रिया चेति सम्यक्तयावलोकितम्। अपस्मारमयं व्यक्तित्वं तन्मते यथा स्त्रीषु प्राचुर्य्येणोपलभ्यते, तथैव पुरुषेषु। तत्प्राग्भाविजनाः पुरुषाणामस्मिन् विषये कश्चन विशेषोऽस्तीत्यमन्यन्त।

अन्यच्च, नांसीविचारस्य प्रत्याख्यानतया तैः प्रतिपादितं यदपस्माररोगस्य सम्मोहनं लक्षणमिति। येषु जनेष्वपस्मारोपशयो वर्तते, अपस्माराभिमुख्यमुपलभ्यते, तेषु तेष्वेव आपस्मारिकसमाधिर्जनयितुं शक्यते, नान्येषु।

किञ्च, चारकॉटमहोदयेन सम्मोहनदशायाः सोपानत्रयमपि प्रतिपादितम्। तद्यथा—

(क) आलस्यम्, निद्रालुत्वं प्रथमः सोपानः[४]।
(ख) मूर्च्छा, शरीरावयवस्तम्भनं च द्वितीयः सोपानः[५]।
(ग) व्यक्तित्वद्वैधीभावः तृतीयः सोपानः[६]।

फ्रायड-जैनेटमहाभागौ चारकॉटमहोदयस्यैव शिष्यावास्ताम्।

---

१. तुलनार्थम्—Benjamin Franklin.

२. तुलनार्थम्—Lavoisier, the chemist.

३. तुलनार्थम्—Liebeault and Bernheim at Nancy.

४. तुलनार्थम्—Lethargy and drowsiness.

५. तुलनार्थम्—Catelapsy or rigidity of limbs.

६. तुलनार्थम्—Somuambulism or disassociation of personality.

११. जेनेटमतम्[1]

जैनेटमहोदयेन बहुवारं प्रयोगान् कृत्वा प्रतिपादितं यद्धि सम्मोहनावस्थायामपस्माररोगी ताँस्तान् वस्तुविशेषान् पूर्वानुभूतान् स्मर्तुं प्रभवति, यान् यान् स सामान्यतः स्वस्थदशायां स्मर्तुं नार्हति। सम्मोहनदशायां संकेतप्रभावाद् रोगानपाकर्तुमपि सोऽशक्नोत्। तन्मतेऽपस्मारो व्यक्तित्वविशृङ्खलीभावः, व्यक्तित्वद्वैधीभाव इति वाऽवगन्तव्यः। सामान्यव्यक्तीनां व्यक्तित्वं सङ्घटितं वर्तते, अपस्माररोगिणां नहि तथा। ननु कथं व्यक्तित्वं द्विधा त्रिधा वा विभज्यते? असंश्लिष्टत्वं वापद्यते? अस्य प्रश्नस्य समाधानं फ्रायडमहाभागैः करिष्यते।

१२. फ्रायडमतम्

फ्रायडमहाभागैः सर्वोपरि मनोविश्लेषणवादं प्रतिपाद्य तदुपकारकत्वेनाज्ञातचैतन्यस्य कारणचैतन्यस्य वोपकल्पनां प्रतिपाद्य यादृशी विश्वविश्रुता ख्यातिः सम्प्राप्ता, तादृशी केनापि मनोवैज्ञानिकेन तस्मात्प्राक् तदुत्तरं वा नैव लब्धा, विदुषां चेतांसि वा भृशमान्दोलितानि।

मनोविश्लेषणवादाख्यं मतमर्थद्वये प्रयुज्यते। प्रथमतोऽनेन मनोवृत्तीनां गवेषणाया विधिविशेषोऽभिव्यज्यते, येन रोगिणो मनोव्यापाराणां विश्लेषणमाश्रीयते। अस्मिन्नर्थे मनोविश्लेषणपदमन्यैर्मनोविज्ञानसम्प्रदायैरपि प्रयुज्यते। द्वितीये विशिष्टेऽर्थे मनोविश्लेषणमिति पदं रोगिणां मनोविश्लेषणेन सम्प्राप्तसामग्र्याः सुनिश्चितसिद्धान्तानामनुसारमनुव्याख्यानम्। 'सुनिश्चितसिद्धान्त' इति पदेन प्रतितन्त्रं प्रतिपादितसिद्धान्तेभ्यो व्यावृत्तलक्षणाः सिद्धान्ता इत्यवगन्तव्यम्। द्वितीयेऽस्मिन् विशिष्टेऽर्थे प्रयुज्यमानस्य मनोविश्लेषणशब्दस्यानुव्याख्यानं प्रथमं तावत् करिष्यते।

फ्रायडमहोदयानां मतानुसारं मनो नैसर्गिकप्रवृत्तिभिरनुप्रेरितं भवति। एताः प्रवृत्तयः सर्वदा स्वकीयामभिव्यक्तिमवाप्तुं यतन्ते। एवम्प्रकारेण सामाजिकवातावरणेन सह तदुपयुक्तोत्तरदायित्वनिर्वाहार्थं नैसर्गिकप्रवृत्तीनां सङ्घर्षो जायते। सुतरां तावद् मनसश्चैतन्यस्य वा यो भागो बाह्यवातावरणेन सह सम्पृक्तो भवति, क्रमशः शिक्षणेनाभ्यसनेन च लाभान्वितो जायते, नैसर्गिकप्रवृत्तीनां नियन्त्रणं च सम्पादयति। यस्या नैसर्गिकप्रवृत्तेर्नियन्त्रणं सामाजिकोत्तरदायित्वेन सहानुकूल्योपपादनं चापाद्यते, सा फ्रायडमते 'कामप्रवृत्तिः' इत्युच्यते। तदर्थं फ्रायडमहाभागा 'लिबिडो'[2] इति पदं व्यवहरन्ति। व्यावहारिकजगता सम्पृक्तो यो मनसो भागो नैसर्गिकप्रवृत्तिमभिभूय सभ्यतासंस्कृतिसदाचारादिकं शिक्षते, स 'अहङ्कार' इति पदेन व्यपदिश्यते। अहङ्कारपदस्य पर्यायवाचकः शब्दः 'ईगो'[3] इति फ्रायडमहाभागस्य ग्रन्थेषु प्रथते।

कामप्रवृत्तिर्नैसर्गिकस्वरूपत्वादात्माभिव्यक्तिं सततं चिकीर्षति। निखिलो मानवव्यवहारस्तन्मते कामप्रवृत्तिमूलः। बलवत्तमा हि सा प्रवृत्तिः। फ्रायडमहोदयाभिमतं कामप्रवृत्तेर्यद्रूपम्, तत्तु नूनं व्यापकतरम्। तन्मते नहि केवलं लोकव्यवहारानुगतकाममूलप्रवृत्तिं कामप्रवृत्तिः सूचयति,

---

१. तुलनार्थम्—Janet.

२. तुलनार्थम्—Libido.

३. तुलनार्थम्—Ego.

प्रत्युत सर्वाणि यानि कामप्रवृत्तेर्विकृतानि रूपाणि, तान्यसामान्यमनोऽवस्थासु प्राकट्यं लभन्ते। यानि वा कामवृत्तेः परिशोधनेन परिमार्जितानि रूपाणि, यानि च कामवृत्तेः साधनभूतानि परिपोषकाणि वा भवन्ति, यथा—वात्सल्यम्, रागद्वेषौ, अथ च स्त्रीपुरुषाणां परस्परं सम्बन्धनिर्वाहकाः सर्व एव संवेगस्थायिभावादयः, कामप्रवृत्तिकुक्षावन्तर्भावयितुमिष्यन्ते। ननु कथमेतत्सर्वं कामपदेनाभिव्यञ्जयितुं शक्यते? अत्रोच्यते—फ्रायडमते कामप्रवृत्तिशून्यान्यपि सर्वाणि लोकव्यवहाररूपाणि मूलतः कामप्रवृत्तेरेव परिवर्तितानि रूपाणि, नेतराणीति बोद्धव्यम्। कामश्च मूलतः स्त्रीपुरुषयोः पारस्परिकाभिलाषरूपः।

सुतरां तावल्लोकव्यवहारे प्रयुज्यमानस्य प्रीतिशब्दस्य व्यापकतमोऽर्थः फ्रायडमहोदयाभिमत इत्यवसेयम्। प्रीतिशब्दार्थे सर्वाः शारीरिकमानसिकविचेष्टा अन्तर्भाव्याः।

१३. फ्रायडमते बालविकासः

मनोविश्लेषणवादानुसारं पूर्वलक्षणानां निर्धारणे फ्रायडमहोदयैः प्रतिपादितानां बालविकाससम्बन्धिमतानां गौरवं नितान्तं परिलक्ष्यते। प्रारम्भकाले बालकस्य सर्वे व्यापारा मूलप्रवृत्तिजन्याः। दुःखं परिहातुमिन्द्रियजन्यं सुखञ्चोपादातुं शिशोः सर्वाः क्रियाः प्रवर्तन्ते; किन्तु कालक्रमात् चैतन्यविकासेन बाह्यवातावरणसम्बन्धिज्ञाने बालकस्य प्रतिक्रियासु किञ्चित् परिवर्तनमापद्यते। बाह्यवातावरणोपयुक्ताः कदाचन मूलप्रवृत्तिजन्याः प्रतिक्रिया विहाय तद्विलक्षणाः क्रियाः प्रादुर्भवन्ति, यासु सुखोपेक्षया दुःखातिरेको भवति। अतो दुःखानि कष्टानि वा सोढुं बालकोऽभ्यस्यति—स्वभ्रात्रे फलानि कथं प्रदेयानीति स्वीयांशादपि तदा स तस्मै वितरितुमारभते। सुतरां तावद् बालकस्य द्विविधं क्रियाजातं भवति—प्रथमप्रकारके क्रियाजाते इन्द्रियसुखप्रदानामनियन्त्रितानां क्रियाणां समावेशो भवति। द्वितीयप्रकारके क्रियाजाते बालकस्य बुद्धिविकासो जायते, प्रथमप्रकारकक्रियाणां नियन्त्रणं सञ्जायते। प्रथमवर्गान्तर्गताः क्रियाः कामप्रवृत्तिजन्याः। द्वितीयवर्गीयाश्च क्रिया अहङ्कारनियन्त्रिता वस्तुभूतसंसारेण सहानुकूल्यस्थापनाभिमुख्यो भवन्ति। अहङ्कारस्तर्हि नैसर्गिकप्रवृत्तिं बाह्यपरिस्थित्यानुकूल्योपस्थापनाय परिमार्ष्टि, प्रेरयति, नियन्त्रितां वा करोति। 'यद्यावश्यकता भवेत्, कामप्रवृत्तेरवदमनमपि नूनमहङ्कार एव करोति।

बालकस्य विकासस्तर्हि बालकस्य कामप्रवृत्तेर्विकासः। फ्रायडमतानुसारमेव बालकस्य कामप्रवृत्तिरिति वयं ब्रूमः[१] शैशवे कामप्रवृत्तिरनिर्दिष्टा असंस्कृता प्रारम्भिकी वा भवति; किन्तु सा अन्ततोगत्वा चतुरस्रं विकसिता भूत्वा प्रौढमानवस्य कामप्रवृत्तिरूपतामाधत्ते।

कामप्रवृत्तेर्विकासोऽनुरागविषयमधिकृत्य, अनुरागस्थलमधिकृत्य चेति द्वेधाऽन्वेष्टुं शक्यते।

१४. कामवासनायाः स्थलानुबन्धिविकासः

शिशोः कामप्रवृत्तिरिन्द्रियविषयाभिमुखी सती सर्वतः प्रसरा, अस्पष्टा निर्विशेषा वा भवति। निखिलत्वक्क्षेत्रं परिव्याप्येयमवतिष्ठते। अचिरादेवेयं केषुचित् स्थलविशेषेषु केन्द्रिता जायते। तानि स्थलानि कामप्रवृत्त्यनुकूलस्पर्शसुखसंवेदनार्हाणि भवन्ति। अव्यवस्थितनिर्विशेष-

कामप्रवृत्त्यनन्तरं द्वितीयावस्था समायाति, यस्यां कामप्रवृत्तिः मुखे केन्द्रिता जायते। तस्या अपि प्रथमकोटौ शिशुः सर्वाणि वस्तूनि मुखे प्रवेशयितुमिच्छति, तत्र च तद्वस्तुसन्धारणं तेन प्रयत्यते। इयं कोटिः 'रचनात्मिका' इतीर्यते। तत्पश्चाद् भाविन्यामपरायां कोटौ वस्तूनां विदारणम्, विशरणम्, परित्यागश्चेति शिशुना प्रयत्यते। इयं कोटिः 'विनाशमयी' इत्युच्यते। फ्रायडमते एतयोः कोट्योस्तस्या नृशंसप्रवृत्तेर्मूलबीजं निहितं वर्तते। यस्यां मानवोऽन्यस्मै दुःखं प्रदाय स्वयं च कष्टं प्रदीयमानं सोढ्वा ऐन्द्रियं सुखमनुभवति। अत्र कष्टप्रदाने सुखानुभूतिः 'साडिज्म[1]', प्रदीयमानकष्टसहनम् 'मैसोकिज्म[2]' इति संज्ञया आङ्गलभाषायां प्रथते। यौवने दृश्यते चैषा प्रवृत्तिः प्रणयाङ्गत्वेनोपलभ्यमाना, यथा काऽपि स्त्री पतिप्रेमाभावमध्यवस्यति; यतो हि स पूर्ववत् तां प्रतिशनिवासरं नैव ताडयतीति।

तदनन्तरं कामप्रवृत्तिः गुदस्थानं परितः केन्द्रिता जायते[3]। गुदस्थानीयकामप्रवृत्तेरपि द्वे कोटी भवतः—कामप्रवृत्तिरत्र फ्रायडमहाशयोक्तविस्तृतार्थे प्रयुज्यते। प्रथमायां कोटौ 'विनाशमयी कामप्रवृत्तिः[4]' इत्युन्मेषं लभते। तदनन्तरं धारणात्मिका, रचनात्मिका वा[5] कामप्रवृत्तिः समुदेति; सेयं द्वितीया कोटिः गुदस्थानीयकामप्रवृत्तेः। तत्पश्चात् सर्वा कामप्रवृत्तिः जननेन्द्रियस्थाने सुनिहिता केन्द्रिता वा जायते।

एवम्प्रकारेण कामप्रवृत्त्यनुभूतेः शरीरावयवविशेषानुसारं षड् रूपाणि भवन्ति। तानि यथा—

(१) अव्यवस्थितस्थलत्वम्।
(२) प्रारम्भिकमुखानुशयित्वम्।
(३) औत्तरकालिकमुखानुशयित्वम्।
(४) प्रारम्भिकगुदस्थानीयत्वम्।
(५) औत्तरकालिकगुदस्थानीयत्वम्।
(६) जननेन्द्रियानुशयित्वम् इति।

१५. प्रणयविषयस्य चयनम्

प्रारम्भकाले शिशोः कामप्रवृत्तिरव्यवस्थिता निर्विशेषविषया च भवति। आत्मेतरत् किञ्चिदपि तदर्थं नैव विद्यते। आत्मनोऽपि तदात्मत्वेन प्रतीतिर्नैवाऽनुभूयते। तदानीं शिशोरात्मकामोन्मुख्यः सर्वाः क्रियाः, यद्यप्यात्मानं वस्तुरूपतया स न जानाति। 'आत्ममुखे सुखानुभूतिः' इति आत्मकामत्वम्। तदनन्तरं शिशुरात्मानं पदार्थान्तरेभ्यः पृथक्त्वेन ज्ञातुमारभते। यद्यपि तदापि स आत्मानमेव परमप्रेमास्पदत्वेनानुमन्यते। स्वात्मन्येव स्निह्यति। तदास्यावस्था

---

१. तुलनार्थम्—Sadism.

२. तुलनार्थम्—Masochism.

३. तुलनार्थम्—Anal Sensuality.

४. तुलनार्थम्—Destructive sex tendency.

५. तुलनार्थम्—Consrtructive sex tendency.

'नार्सिसीया' इति निगद्यते। 'नार्सिसस' इति यवनदेशीयपौराणिकवाङ्मये कश्चन युवा आसीत्, यो नित्यमात्मप्रशंसायामेव निमग्न आसीत्। तदभिधानादियमात्मप्रशंसनपरा शिशोः कामप्रवृत्तिः 'नार्सिसीया[1]' इत्यभिधीयते। आत्मप्रदर्शनम्, स्वशरीरस्य पेशलावयवानां प्रकटीकरणम्, अन्येषां प्रशंसामवाप्तुकामत्वं चेति आत्मकामस्य लक्षणत्रयम्। तदनन्तरं कामरुचिर्हि अन्यान् पुरुषान् प्रति प्रेरिता जायते। तत्रापि प्रथममात्मसदृशान् पुरुषानेव प्रेमविषयत्वेनावचिनोति। सेयमवस्था 'स्वलैङ्गिकासक्तिः[2]' इति व्यपदिश्यते, यतो ह्यस्यां बालकस्य प्रेमविषयीभूतो बालक एव भवति, बालिकायाश्च बालिकैवेति। तदनन्तरं बालको युवा जायते। एतस्मिन्नेवान्तरे तस्य प्रेम आत्मेतरलैङ्गिकासक्ति[3]-रूपमभिनिर्वर्तते। तदा प्रौढस्य इव तस्य यूनः प्रेम स्त्रियं प्रति समाकृष्यते, स्त्रियाश्चानुरागः पुरुषं प्रति केन्द्रीभवति।

कामप्रवृत्तेर्विषयानुसारं तर्हि निम्नलिखिताः क्रमशो भेदा अभिनिर्वर्तन्ते। ते यथा—

(१) निर्विशेषविषयप्रेम।

(२) विषयासक्तिः।

(३) आत्मप्रेम।

(४) स्वीयलैङ्गिकसादृश्यान्वितव्यक्तिप्रेम।

(५) स्वेतरलैङ्गिकसादृश्यान्वितासक्तिरिति।

कामप्रवृत्तेर्विषयानुसारं कामोत्तेजनाशीलस्थलविशेषानुसारं वा भेदान् विमृश्याऽस्माँस्त्विदं प्रतिभाति यत् कामप्रवृत्तेः क्रमशो विकासो जायते। यद्येकां विकासभूमिं पारयित्वान्यां विकासभूमिमधिरोहति, तर्हि पूर्वस्या भूमेः सुष्ठुतरं क्रियाकलापसम्पादनमतीवावश्यकम्। उदाहरणतः स्वलैङ्गिकासक्तिमतीत्य स्वेतरलैङ्गिकासक्तिभूमौ यदा कश्चन पुरुषोऽवतरति, अर्थात् पुरुषप्रेम विहाय यदा स्त्र्यभिलाषस्तस्य चेतसि जागर्ति, तदा कामवृत्तेः पूर्वरूपस्य निरिन्द्रियीकरणमभिनिर्वर्तते[4]। कामप्रवृत्तेरेकस्मिन् रूपेऽपक्षीयमाणे सति नूनमन्यरूपस्य विकासः सम्भाव्यते, अथवा, एकस्य कामप्रवृत्तिभूमिविशेषस्योन्नयनं सम्पाद्यते। यद्यत् कामवृत्ते रूपं मानवः सामाजिकवातावरणप्रतिकूलमभिमन्यते, अयुक्तमसमीचीनं वा नीतिशास्त्रदृष्ट्या, तत्तद् हातुं प्रयतते। अर्थात् समाजहितविरोधिनीनामसंस्कृतानां मूलप्रवृत्तीनामवदमनं क्रियते, साधुप्रवृत्तिरूपाणि चाधीयन्ते, अर्थाद् विहितकर्मभूमिषून्नयनं सम्पाद्यते। यदा चेदमुन्नयनं सम्यक्तया जायते, व्यक्तित्वं सङ्घटितमेकीभावापन्नमेवावतिष्ठते। यदा चेदं परिवर्तनमेकस्मात् विकासस्तराद् द्वितीयं विकाससोपानोन्मुखं स्खलितं जायते, दुष्टं भवति, तदा नूनमनेके मानसिकविकारा अभिनिर्वर्तन्ते। फ्रायडमहोदया मन्यन्ते यदवशिष्यमाणस्वलैङ्गिकासक्तिरेव सामाजिकव्यवहारानुगतपुरुषाणां पारस्परिकसहानुभूतिं जनयति। स्वेतरलैङ्गिकानुरक्तिरेवोत्तरकालिकपरलैङ्गिकासक्तेर्मूलमिति।

---

१. तुलनार्थम्—Narcissistic Tendency.

२. तुलनार्थम्—Homo-sexual.

३. तुलनार्थम्—Hetero-sexual.

४. तुलनार्थम्—Desensualisation.

१६. बालकस्य पितरौ प्रति सम्बन्धः

बालकस्य विकासप्रसङ्गे तस्य मातापितृभ्यां सह सम्बन्धोऽपि विवेचनमर्हति। नूनं माता पोषयति, पिता च संरक्षति शिक्षयति च। अतस्तयोर्भूयिष्ठः प्रभावो बालकस्य विकासे जायते। यदा बालकस्य पितृभ्यां विच्छेदो जायते, तदा बालकः पितृसदृशान् पुरुषान् मातृसदृशीर्वा स्त्रियः स्निह्यति, ताभिः प्रेमालापं कर्तुमिच्छति। अत्रेदं सत्तव्यं यन्मातृसम्बन्धविच्छेदः पितृसम्बन्धविच्छेदो वा क्रमश एव करणीयः; न तु बलात्, दुर्धर्षपरिस्थितिवशाद्वा। येषां व्यवहाराचारविचाराः पितृसदृशाः, येषां व्यवसायो वा भाषणं वा पितृसमानं भवति, तैः सह स बाल्ये वर्तयितुम्, गन्तुम्, व्यवहर्तुं चेच्छति। अत एव मातापितृभ्यां स्नेहपरिवर्तनं पितृव्ये, ज्येष्ठभ्रातरि, गुरुजने च सौकर्य्येणाऽभिनिर्वर्तते। यदि च बालकः स्वपितरं द्वेष्टि, तर्हि भाविनि जीवनेऽध्यक्षेण सह विरोधस्तस्याभीक्ष्णं जायते, अधिशासनेन सह, सर्वैरेवाधिकारिभिः सह वा तस्य विरोधो जायते।

अन्यच्च, बालकस्य स्वेतरलैङ्गिकासक्तिः सर्वप्रथमं मात्रा सह जायते। फ्रायडमहाशयस्य मते मातृप्रेमापि कामप्रवृत्ते रूपम्। प्राय इदं प्रेम गभीरं वर्तते। फलतः स्वसदृशलैङ्गिकासक्तिसम्पन्नः पिता तस्य कोपभाजनत्वमापद्यते। किं वा स्वपितरं प्रति स्वप्रतिद्वन्द्विनमिवाचरति। इदं हि खलु फ्रायडाभिमतं 'ओडिपस भावग्रन्थिः[1]' इत्यभिधीयते। 'ओडिपस' इति नामक एकः प्राचीनो यवनदेशीयाधिप आसीद् यः स्वपितरं हत्वा स्वमात्रा सह व्यवायं चकार। भावग्रन्थिश्च विषयविशेषमभितो विचारभावप्रयत्नादीनां सङ्घटनमिति। मनोविश्लेषणवादे 'भावग्रन्थिः' इत्यर्थवैशिष्ट्यमावहति। भावग्रन्थिस्तदनुसारमवदमनविषयीभूतानां प्रवृत्तीनामनवबुद्धं रूपम्। सुतरां तर्हि ओडिपसभावग्रन्थिः सुप्तेवावतिष्ठते, तस्या मूलरूपमज्ञातमेव वर्तते, अत एव बालको मातृस्नेहस्य गभीरस्य रहस्यं नैव ज्ञातुमर्हतीति।

अन्यच्च, यदा अवदमनं सम्पाद्यते, तदा बालको न जानाति किमपि तस्यावदमनविषयीजातं न वेत्ति। नूनमवदमनं नाम इच्छाविशेषस्य अज्ञातचैतन्ये कारणचैतन्ये वर्णितचरे तिरोधानम्, तच्च नैव सम्पादयितुं शक्यते, यदि वयं जानीमो यद्वयमस्येच्छाविशेषस्य अवदमनं कुर्म इति; यतो हि खल्विच्छाया अवदमने ज्ञायमाने सति तदवदमनं तत्तिरोधानं वा नैव कर्तुं शक्यते। अपरथा ध्यानैकाग्र्यात्तस्य स्मृतिस्थायित्वमापद्यते। नहि वयं विस्मर्यमाणं किञ्चिदपि जानीमः। एतस्मादिदमायाति यदज्ञातचैतन्ये किञ्चिदेतादृशं वस्तु वर्तते, यद् वयं न जानीमः, येन चाज्ञातेनापि वयमवदमनार्थं प्रेरिता भवामः। तच्च वस्तु सद्भूतमस्माकं शुद्धात्मा आत्मादर्शो[2] वा भवति। स च व्यवहारानुगताहङ्कारव्यतिरिक्तोऽज्ञातचैतन्ये[3] कारणचैतन्ये वा वर्तमानस्तद्रूपतया वाऽवतिष्ठते। अहङ्कारस्तु लौकिकानुभवाशिक्षणसमुद्भूतम्, जाग्रदवस्थायां प्रतिक्षणं ज्ञायमानं

---

१. तुलनार्थम्—Oedipus Complex.

२. तुलनार्थम्—Ego-ideal or Super-ego.

३. तुलनार्थम्—Unconscious.

ज्ञातं वा चैतन्यमाप्तलोकानुकूल्यमिति । किञ्च, अज्ञातचैतन्यं कारणचैतन्यं वा बुद्ध्यावनुद्ध तायामविकसितायां सत्यां बाल्ये पितृप्रभावेण तेषां नियन्त्रणेन निषिद्धकर्मवर्जनं च संस्कारोपचयादभिवर्धते । पितृनिर्दिष्टादर्शाः सुकुमारमतिना बालकेन युक्तिपूर्वकं नात्मसात् क्रियन्ते । अत एव ते रमणीया अपि तेनाज्ञातचैतन्य एवाधीयन्ते, तिरोधीयन्ते इति यावत् ।

१७. स्थिरीकरणम्[1], प्रत्यावर्तनं[2] च

कामवृत्तिविकासः स्वाभाविकक्रमेण यदि न जायेत, तर्हि कामवृत्तेः स्थिरीकरणं प्रत्यावर्तनं वा सञ्जायते। तदेवम्प्रकारेणाभिसम्पद्यते—यदि कस्मिन्नप्यवस्थाविशेषे बालकस्य कस्यचिन्नैसर्गिकप्रवृत्तेः निरोधः क्रियेत, तस्य कार्य्याणामिच्छाविशेषाणां च निन्दा भृशं जायेत, तर्हि तदा बालकस्तस्य शक्तिवेगस्योन्नयनं कर्तुं समीचीनमवसरं न लभते, यतो हि तिरस्कारोपहतचित्तः स जायते। एतावता तस्येच्छाया अन्यत्रान्यस्मिन् विषये सन्धानमपि न सम्पादयितुं शक्यते, मनोदौर्बल्येन चित्तविक्षेपेण वा स नैव कर्तुं प्रभवति। अतस्तस्यासामाजिककामप्रवृत्तेरवदमनमज्ञातचैतन्ये कारणचैतन्ये वा तिरोधानेन वाऽभिनिर्वर्तते । तत्र तस्या अवस्थानमज्ञातं सक्रियत्वेन युक्तं भवतीत्यवधार्यम् । यदा नियन्त्रिता अहङ्कारशक्तिर्दुर्बला जायते, तदा अवदमनविषयीभूता वेगा इच्छासङ्कल्परूपविशेषाः व्यक्तित्वविस्फोटं सहसा आपादयन्ति । विविधा मानसिकविकारास्तदानीमभिनिर्वर्तन्ते । बाल्यकालिकेच्छाविषयेषु तस्यानुरागः स्थिरीभवति, शैशवोचितक्रियास्वेव तस्य मनस्कारोऽनुरज्यते । ततः परं तत्प्रवृत्तेः परिशोधस्यावसरो नायाति । अतो वयं ब्रूमः—'तदा तस्य शैशवकालिका इच्छाप्रवृत्तिविशेषाः स्थिरा जाताः' इति। तेषामविकसितं रूपमसामान्यमनोविकार एव। सामान्यतया स्वस्थपुरुषे तस्योन्नयनं विकासरूपं स्वत एव जायते। सुतरां स्थिरीभूता शैशवकालिकी प्रवृत्तिर्भाविमनोविकारस्यानुकूल्यं प्रदत्ते, येन कदाचनापि निरोधकशक्तिरूपाहङ्कारस्यावदमनविषयीभूतानुचितप्रवृत्तेश्च सङ्घर्षे सञ्जाते घोरासामान्यमनोविकाराणां पूर्वलक्षणानि प्राकट्यं लभन्ते । अतिदुर्घर्षमानसिकसङ्घर्षे समुपस्थिते स स्वकीयां रुचिं तेषु तेषु कार्यविशेषेषु प्रवर्तयति येषां सुखावहत्वं शैशवेऽनुभूतचरम्। स शैशवोपयुक्तरुचिकार्यादिषु प्रत्यावर्तनं करोति, तेषु पुना रमते, तदनुकूलामभिव्यक्तिं व्यवहारेष्वाचरति च। एतदेव 'प्रत्यावर्तनम्' इत्यसामान्यमनोविज्ञाने प्रथते। मानवोऽव्यक्तानामवदमनविषयीभूतानां प्रवृत्तीनां सक्रियत्वात् शैशवकालिकेच्छाप्रवृत्त्यादिकमभि प्रत्यागच्छति, पुनरावर्तते; एतस्मादेव 'प्रत्यावर्तनम्' इत्यसामान्यमनोविकाररूपं फ्रायडमहोदयानां मते सुप्रथितम् ।

स्थिरीकरणेन प्रत्यावर्तनेन च कानि कान्यसामान्यमनोविकाररूपाणां पूर्वलक्षणानि[3] प्रादुर्भवन्तीति वयमनुव्याख्यास्यामः । उदाहरणत आत्मकामाख्यावस्थाया नार्सिसीयावस्थायाश्च

---

१. तुलनार्थम्—Fixation.
२. तुलनार्थम्—Regression.
३. तुलनार्थम्—Symptoms.

स्थिरीकरणमेवोन्मादग्रस्तेषु रोगिषु प्रायेणोपलभ्यमानानां हस्तमैथुनप्रभृतिदुष्प्रवृत्तीनां मूलबीजम्। यद्यपि सामान्यत इदमुररीक्रियते यद् हस्तमैथुनं प्रतिशतं नवतिसंख्याकेषु सामान्यपुरुषेषु (९०%) प्रायेण मृदुमात्रायामुपलभ्यते। स्त्रीष्वप्यस्य प्रचारो वर्तते। अमेरिकादेशीयासु २२०० मध्यमवर्गीयासु महिलासु, या एकाकिन्य आसन्, तासु प्रतिशतं पञ्चोत्तरषष्टिसंख्याकासु स्त्रीषु (६५%) अन्यासु च विवाहितासु प्रतिशतमष्टोत्तरत्रिंशत्स्त्रीषु (३८%) हस्तमैथुनमुपलभ्यते। सुतरां कामवृत्तेर्विकासस्यावस्थाविशेषे हस्तमैथुनाचरणमसामान्यं नास्ति, किन्तून्मत्तस्य हस्तमैथुनाचरणे यदसामान्यं वैलक्षण्यं वर्तते, तत्तु निर्लज्जतया, सर्वेषां समक्षतः, भूयोभूयः, प्रबलवेगानुरोधेन च हस्तमैथुनाचरणम्। हस्तमैथुनेऽयमेव दोषो यदिदं स्वाभाविककामप्रवृत्तिमार्गं सङ्कोचयति, रुणद्धि[1] वा; यथा हस्तमैथुनाभ्यस्तानां पुरुषाणां स्त्र्यभिलाषोपरोधो जायते। अन्यच्च हस्तमैथुनाचरणेन जनिता चिन्ता आभीक्ष्ण्येन चित्तं दुःखाकरोति, पापभावना च सततमनुभूयते तेन, यो हस्तमैथुनमभ्यसति। नारसिसीयावस्थायाः स्थिरीकरणमपि खल्वेवम्प्रकारेण भिन्नव्यक्तित्वोन्मादे[2] उपलभ्यमानायाः स्वीयचिन्तननिमग्नतायाः प्रत्युत्तरं दातुमसमर्थतायाः मूलकारणं भवतीति बोद्धव्यम्। आत्मविषय एव ध्यानं नितान्तं केन्द्रितं भवति। अतो बाह्यसंसारस्य वस्तुचिन्तनाय ध्यानप्रेरणं दुःशकम्।

स्वलैङ्गिककामेच्छायाः प्रभावोऽपि मनो दूषयति, कियन्मात्रायामस्याः साफल्यपूर्वकं परित्यागः कृतो न वेति। सफलः परित्याग इति कामवृत्तेः परिशोध एव। सामान्यजनेषु—यथा पुरुषेषु तथैव स्त्रीषु—स्वलैङ्गिककामेच्छा उपलभ्यते; किन्तु येषां जीवने सा स्थिरीभूता जायते, तेषां स्वेतरलिङ्गिष्वासक्त्यभावो नितरां जायते।

एवम्प्रकारेण कामप्रवृत्तेः स्थिरीकरणं स्थलविशेषमधिकृत्यापि जायते। चुम्बनगौरवं कामप्रवृत्तेर्मुखसम्बन्धिस्थलविशेषमधिकृत्य उन्नेतुमर्हम्। यदि च मुखसम्बन्धिकामप्रवृत्तेर्ध्वंसात्मकरूपमवशिष्यते, तर्हि नखक्षतदन्तक्षतादिव्यवहारेषु तस्यावशिष्टं रूपं तदनन्तरमपि प्रचलति। मुखसम्बन्धिकामप्रवृत्तेर्मृदुमात्रं रूपं चोषणीयदन्तकर्तनाद्यभ्यासेसु धूम्रपानादिषु चोपलभ्यते। उन्मत्तपुरुषाणां निर्गलनप्रवृत्तिः सूचयति यदेतद् मुखसम्बन्धिकामप्रवृत्तेरवशिष्टं रूपम्। गुदस्थानीयकामवृत्तेर्विकासोऽप्युन्मादस्य बहूनां पूर्वरूपाणां मूलम्। सन्धारणात्मकं गुदस्थानीयकामप्रवृत्ते रूपमवसादोन्मादग्रस्तेषु[3] मलावरोधभ्रान्तिं जनयति। विसर्जनात्मकं गुदस्थानीयकामप्रवृत्तेर्ध्वंसशीलं रूपमुन्मत्तपुरुषाणां मलेन गृहभित्तीनामवलेपने समुपलभ्यते। अथवा, यदा उन्मत्तपुरुषा ब्रुवन्ति—"सर्वमस्माकं भोजनं यथापूर्वं निर्गच्छति" इति।

सुतरां फ्रायडमहोदयमते कामप्रवृत्तिरूपं नितान्तं व्यापकं वर्तते। यस्मिन्नङ्गुष्ठचोषणम्, शिशुना मुखे वस्तुग्रहणम्, अभ्यङ्गम्, हस्तपादप्रक्षेपणम्, मलविसर्जनम्, मूत्रत्यागः, सम्भोगः—इत्यादिविविधक्रिया अन्तर्भाव्यन्ते। कलाप्रेम, मित्रप्रेम, सङ्गीतप्रेम, पितृप्रेम, भ्रातृप्रेम, स्थावरजङ्गमप्रेम—इत्यादीनि सर्वाणि कामवृत्तिरूपाण्येवेत्यभिमतं तत्रभवतां फ्रायडमहाभागानाम्।

---

१. तुलनार्थम्—Resistence (प्रतिरोधः).

२. तुलनार्थम्—Schizophrenia.

३. तुलनार्थम्—Melancholia.

उपसंहाररूपेणेदं वक्तुं शक्यते यद्धि फ्रायडमतस्याधारभूतं मतत्रयम्। तद्यथा—

(अ) अवदमनस्य महत्त्वम्।

(आ) कामप्रवृत्तेर्गौरवम्।

(इ) बाल्यकालस्य संस्कारशालित्वं चेति।

मनोविश्लेषणवादावशिष्टान्यङ्गान्यग्रतोऽनुव्याख्यामः।

१८. त्रिविधं चैतन्यम्

फ्रायडमहोदयानां मते चैतन्यं त्रिविधं भवति। तद्यथा—चैतन्यम्[1], पूर्ववर्तिचैतन्यम्[2], अज्ञातचैतन्यं चेति[3]। चैतन्यं नाम जाग्रच्चैतन्यम्। पूर्ववर्तिचैतन्यं नाम चैतन्यविशेषः, यो यद्यपि वर्तमानकाले ज्ञायमानो नावतिष्ठते, तथापि तस्य प्रत्युद्बोधनप्रत्यभिज्ञानाख्य-सरलमानसक्रियाभ्यां प्रत्यक्षं कर्तुं शक्यते। अज्ञातचैतन्यं नाम चैतन्यविशेषः, यो न केवलं वर्तमानकाल एव ज्ञायमानो नावतिष्ठते; प्रत्युत तस्य साधारणसाधनैर्ज्ञानं कर्तुं न शक्यते। अज्ञातचैतन्यचैतन्ययोरन्तरालेऽज्ञातचैतन्यपूर्ववर्तिचैतन्ययोर्मध्ये च व्यवधानं वर्तते, यद् व्यतीत्य साक्षान्मार्गो ज्ञातचैतन्यादन्यचैतन्यमभि नैवोपलभ्यते; किन्तु यद्यज्ञातचैतन्यानुगत-क्रिया विकलाः, परिवर्तिताः, विरूपा वा जायेरन्, तर्हि तं व्यवधानविशेषं व्यतीत्य ता बहिर्गन्तुं शक्नुवन्ति। बहिरिति जाग्रच्चैतन्यम्। चैतन्यात् पूर्ववर्तिचैतन्याच्च अज्ञात-चैतन्यं प्रति यो मार्गो भवति, तद् 'अवदमनम्' इत्याख्यायते। व्यवधानं च प्रागुक्तं प्रतिरोधो विरूपकारिमाध्यमविशेषो भवति।

जाग्रच्चैतन्यं यथा विशालमस्माभिर्मन्यते तथा नैव विद्यते। चैतन्येऽस्माकं सङ्कल्पविकल्पस्मृतिकल्पनादिकमन्तर्भाव्यते; किन्तु फ्रायडमहोदया अभिमन्यन्ते यदज्ञातचैतन्यं चैतन्यापेक्षातोऽतिविशालक्षेत्रम्, यस्मिन् महाकोशे अज्ञातकालादागताश्चिरसञ्चिता वासना नैसर्गिकप्रवृत्तयश्च तिरोधीयन्ते। सामाजिकनैतिकमर्यादातिक्रमणपरा विगर्हिताः प्रवृत्ति-वेगा निरन्तरमज्ञातचैतन्याद् व्यवधानमतीत्य चैतन्यक्षेत्रे प्रवेष्टुं प्रयतन्ते। तत्र अहङ्कार-श्चैतन्यदेहल्यां तेषां प्रतिरोधं करोति, प्रवेशात् सततं निवारयति। यदि ते वेगाः प्रबल-तरा भवेयुः, तर्हि ते मानसिकसङ्घर्षं व्यक्तित्वद्वैधीभावादिकमानसिकविकारान् वा जनयन्ति। अत्रेदं स्मर्त्तव्यं यत् फ्रायडमते प्रतिपादितैर्विश्वतैजसप्राज्ञैस्त्रिविधचैतन्यरूपैः सह महत् सादृश्यं वर्तते। विश्वचैतन्यं जाग्रदवस्थाया अधिष्ठातृचैतन्यं भवति; तस्य क्षेत्रं स्थूलशरीरम्। फ्रायडाभिमतं चैतन्यं तत्समानमेव। तैजसाख्यं चैतन्यं स्वप्नावस्थान्तर्गतं चैतन्यम्, स्वप्ना-वस्थाभिमानि चैतन्यम्; सूक्ष्मशरीरं च तस्य क्षेत्रम्। तैजसाख्यं चैतन्यं पूर्ववर्तिचैतन्य-सदृशमेव; किन्तु तस्यायं विशेषोऽधिगन्तव्यः। फ्रायडमते स्वप्नावस्थाऽज्ञातचैतन्यस्य क्षेत्रं

---

१. तुलनार्थम्—Consciousness.

२. तुलनार्थम्—Foreconsciousness.

३. तुलनार्थम्—Unconsciousness.

वर्तते, न तु पूर्ववर्तिचैतन्यस्य। अथ च फ्रायडमते पूर्ववर्तिचैतन्यस्य प्रत्यक्षं प्रत्युद्बोधने प्रत्यभिज्ञाने च कर्तुं शक्यते। भारतीयदर्शनानुसारं जाग्रदवस्थायां स्वप्नाभिमानितैजस-चैतन्यस्य व्यापारयितृत्वं नोपपद्यते। अज्ञातचैतन्यस्यानुव्याख्यानं सोदाहरणं मनोविश्लेषण-पूर्वकं यथा फ्रायडमहाभागैः प्रस्तुतम्, तथा भारतीयमनोविज्ञाने नोपलभ्यते। तथापि तस्य प्राज्ञसंज्ञकेन चैतन्येन सहात्यर्थं तादात्म्यं वर्तते। तत्रापि नूनमयं विशेषो भवति। प्राज्ञसंज्ञकं चैतन्यं सुषुप्त्यभिमानि चैतन्यम्, यस्य कारणशरीरं क्षेत्रं विद्यते। अज्ञातचैतन्यरूपं यत्स्वप्ने जाग्रत्काले चासामान्यमनोविकारेषून्मादादिष्वात्मानमभिव्यञ्जयति। भारतीयमतं तत्त्वज्ञानदृष्ट्यातिरमणीयम्। फ्रायडमतेऽज्ञातचैतन्यं निराधारं वर्तते। प्राज्ञसंज्ञकचैतन्यस्य शान्तमानन्दमयं च रूपम्; किन्तु खल्वज्ञातचैतन्यं फ्रायडमतेऽशान्तिमयम्, अशिवानां प्रवृत्तीनां समुच्चयोत्थम्, स्वप्नाद्यवस्थास्वभिव्यक्तरूपमतिगभीरं च भवति। फ्रायड-महोदयानां मतेऽज्ञातचैतन्यं मनसोऽतिविशालमङ्गम्। प्राचां मते मनोव्यतिरिक्तं चैतन्यं भवति; किन्त्वर्वाचीनानां मनोवैज्ञानिकानां फ्रायडप्रभृतीनां मते मनोव्यतिरिक्तं चैतन्यं नास्ति; प्रत्युत मन एव चैतन्यरूपम्, चैतन्यं वेति विशेषः।

१६. एडलरमतम्

जिगमण्डफ्रायडमहाभागो मोरेवियननगरे[1] आस्ट्रियादेशे १९१३ वैक्रमाब्दे जन्म लब्धवान्। वियनानगरे स आयुर्वेदविज्ञानमधीत्य मनोविश्लेषणवादस्य प्रवर्तकत्वेन विश्व-विश्रुतो जातः। १९९५ वैक्रमाब्दे हिटलरस्य निरङ्कुशशासनेन निष्कासितः स लन्दननामानं नगरमागतः। तत्रैव १९९६ वैक्रमाब्दे पञ्चत्वङ्गतः।

तस्य द्वौ मनोविज्ञानशिरोऽलङ्कारभूतौ शिष्यप्रवरौ एडलर-युङ्गमहाभागावास्ताम्। अथातस्तयोर्मते वयमनुव्याख्यास्यामः।

प्रथमं तावद् एडलरमतमेव विचार्यते—

अलफ्रेडएडलरमहोदयः[2] प्रथमं फ्रायडमहाशयस्य शिष्य एवासीत्; किन्तु किय-त्कालानन्तरं तेन स्वकीयो "वैयक्तिकं मनोविज्ञानम्[3]" इति मनोविज्ञानस्य सम्प्रदायविशेषः प्रवर्तितः। अतीव भ्रामकोऽयं पारिभाषिकः शब्दः। अयमस्माकं महतो दौर्भाग्यस्य विषयः, यतो ह्यनेन व्यक्तेर्मनोविज्ञानप्रतिपादनपरेभ्य इतरेभ्यो मनोवैज्ञानिकेभ्यो व्यावर्तकं साधर्म्य-वैधर्म्यपूर्वकं किमपि लक्षणं न सूच्यते। एडलरमहोदयेन फ्रायडमहोदयैः प्रतिपादितानां केषाञ्चन सिद्धान्तानां भृशं प्रत्याख्यानं सम्पादितम्। तेनावदमनं नैव स्वीक्रियते, कामवृत्ते विकाससम्बन्धिमतमपि स नैवोररीकरोति, अज्ञातचैतन्यं प्रत्यपि स ध्यानं न प्रदत्ते। मानसिकपूर्वलक्षणानां मूलं कारणं स प्रथमं शारीरिकावयवानां वैरूप्ये दौर्बल्ये वाभिमन्यते स्म; किन्तु स इमां गवेषणादिशं परित्यज्य मानसिकमतस्फोरण एव तदनन्तरं सँल्लग्नो

---

१. तुलनार्थम्—Moravian town in Austria-Hungary.

२. तुलनार्थम्—Alfred Adler (1870 A. D.—1937 A. D.)

३. तुलनार्थम्—Individual Psychology.

जातः। एडलरप्रतिपादितं मानसिकरोगविज्ञानं पौरुषेये विरोधे सन्निविष्टम्। प्राक्तनैर्दार्शनिकैर्यः प्रभुत्वैषणाव्यपदेशेन[1] जीवनैषणाव्यपदेशेन[2] च व्याख्यातः, स एव पौरुषेयो विरोध[3] इतीर्यते। नूनमयमहङ्कार एव, येनाऽभिप्रेरितोऽयं मानवोऽन्यान् स्ववर्गीयान् बन्धुबान्धवान् वातिशयितुं कामयते, निरन्तरं बलधनाद्युपार्जनार्थं प्रयतते, स्ववातावरणं नियन्त्रयितुमभिवाञ्छति च। प्रभुत्वैषणा हि तन्मते शेषी; दारैषणा, वित्तैषणा, लोकैषणा इत्यादिकं तच्छेषरूपम्। यदि चायमहङ्कारः प्रतिरोधमवाप्नुते, जटिलसामाजिकव्यवहारे च तस्य सर्वतो दिशि आशा वर्तते, तदायं मानवो दैन्यमुपैति, हीनताग्रन्थिश्चास्य मनसि निरूढा जायते। तदा स एतां दुर्बलतामपाकर्तुं किं वा अन्यैरुपायैस्तत् पूर्तिं कर्तुं प्रयतते। यदि चेमे दैन्यक्षतिपूर्त्यर्थं सम्पादिताः प्रयत्नाः सफलीभवेयुस्तर्हि स दैन्यमपाकर्तुं सफलीभवति। यदि चैतानि क्षतिपूर्त्यर्थमभिप्रयुक्तानि प्रयतनानि न सामाजिकानि, न नैतिकानि, विगर्हितानि वा भवन्ति, तदा सा हीनताग्रन्थिः सुदृढा जायते, मानसिकविकारांश्चोन्मादादीन् जनयति। न कामप्रवृत्तेरवदमनं मानसिकविकाराणां मूलकारणम्, यथा फ्रायडमहोदया अभिमन्यन्ते; प्रत्युत आत्मप्रदर्शनेच्छायाः प्रभुत्वैषणाया वा प्रतिरोध एव असामान्यमनोविकाराणां बीजं भवतीति तेषामभिसन्धिः।

यदि हीनताभावस्य क्षतिपूर्त्यर्थं प्रयुज्यमानानि साधनानि समाजोपयोगीनि समाजप्रशस्तानि न भवेयुः, तर्हि मानवः सामाजिककार्येभ्यः सामाजिकसमुदायेभ्यश्चोपारमते, क्षुद्रे परिवारसमुदाय एव सङ्कीर्णतामुपैति, तत्रैव प्रभुत्वैषणापूर्तिं कर्तुमिच्छति। मानसिकविकारेभ्य उन्मादादिभ्यः सोऽवसरः प्रदीयते, यस्मिन् रोगी स्वेच्छया निरङ्कुशशासनं स्वगृहे कर्तुं प्रभवति।

एडलरमते कामप्रवृत्तिर्हि मैत्रीभावस्य पराकाष्ठा। तद्विपरीतं फ्रायडमहाभागानामेतदभिमतमासीद्यत् कामवासनायाः परिणामविशेष एव मैत्रीभाव इति। अथ च फ्रायडमहोदयाभिमतं यत् कामप्रवृत्तिरेव स्वलैङ्गिककामासक्तिद्वारा सामाजिकभावनारूपं विन्दतीत्यपि तेन प्रत्याख्यातम्। असामान्यमानसिकविकारा अपि फ्रायडमतानुसारं कामप्रवृत्त्यहङ्कारयोः सङ्घर्षाज्जन्यन्ते; परन्तु एडलरमतेऽहङ्कारप्रभवाण्येव सर्वाणि असामान्यमानसिकविकारपूर्वलक्षणानि।

ननु कस्माद् हेतोः विक्षिप्तस्य प्रतिक्रिया पौरुषेयविरोध इति व्यपदिश्यते? स्यादेतत् तस्मात् कारणाद् यन्मानव एव परमपुरुषार्थस्य चरमादर्शरूपम्। स्त्रीणाञ्च जीवनं पुरुषार्थस्य निम्नतमं स्तरं द्योतयति। कैश्चन लेखकैः प्रतिपादितं यद् वयं स्त्रीणां मानसिकक्रियासु नूनमविकसितमनसो रूपं लभामहे। तत्र मूलप्रवृत्तिप्राधान्यं प्रयोजनान्वितव्यापाराभावश्च विद्यते। पुरुषश्च बुद्धेः, इच्छाशक्तेः, आत्मसाक्षात्कारस्य चावबुद्धं मूर्तिमद्रूपमिति।

---

१. तुलनार्थम्—Will to Power.

२. तुलनार्थम्—Will to live.

३. तुलनार्थम्—Masculine protest.

सुतरां तावद् यदा विक्षिप्तः सामाजिकसमुदायेभ्य उपरतो जायते, तस्योन्मुक्तकल्पनाः प्रादुर्भवन्ति, यासु वस्तुस्थितिभ्यः परावर्तनं सन्निहितं भवति।

कस्तस्योपायः ? व्यक्तिगतमनोविज्ञानानुसारं विक्षिप्तस्य बाल्यकालिकजीवनयापनविधिरन्वेष्टव्यः। अयं जीवनयापनविधिर्विशेषेण परिवारे तस्य स्थानविशेषं किं वा बालकेषु स प्रथम आसीत्, द्वितीयो वाऽन्तिमो वा, तस्य जन्मनः कियद्वर्षानन्तरमन्यो बालो जातः—इत्यादिकं विज्ञायानुसन्धेयः, तस्य हीनताग्रन्थेः विमोचनोपायोऽयं भवितुमुचितः। यथा विक्षिप्तः सामाजिकदृष्ट्या अनैतिकं विगर्हितं कार्यं परित्यक्तुं समर्थो भवेत्, सामाजिकहितोपयोगिषु च तस्याऽभिरुचिः संवर्धेत, तथा तस्य पुनः शिक्षणमारब्धव्यम्। यथा तस्य अहङ्कारो जातीयादर्शमानमर्यादानुकूलो भवेत्, सार्वजनीनं कल्याणं चावहेत्; तथा तस्य क्रियाणां पथप्रदर्शनं विधातव्यम्। स्मरणीयं यद् यानि कार्याणि लक्ष्याणि वा तस्य शक्त्या सहानुकूल्यं भजन्ते, तान्येवोपदेष्टव्यानि, नेतराणि।

२०. युङ्गमतम्

कार्लयुङ्गमहोदयोऽपि[१] प्रथमं फ्रायडमहोदयानां शिष्य एव आसीत्; किन्तु कियत्कालानन्तरं स स्वकीयं स्वतन्त्रं 'विश्लेषणात्मकं मनोविज्ञानम्'[२] इतिसंज्ञकं सम्प्रदायविशेषं प्रवर्तितवान्। मनोविश्लेषणवादमभ्युपगच्छन्नपि स केषुचिद् मौलिकराद्धान्तेषु फ्रायडमहोदयाद् वैमत्यं प्रादर्शयत्। संस्कृतविद्वद्वरेण्येभ्योऽयं खलु हर्षविषयो यदयं स्विट्ज़रलैण्डदेशीयो मनोविज्ञानपारावारीणः सुरभारतीवाङ्मयस्याप्युदाहरणानि स्वकीयेषु ग्रन्थेषूद्धरति। तस्य च दृष्टिकोणस्य भारतीयदर्शनेन सह भूयिष्ठं साम्यं वर्तते।

'विश्लेषणात्मकं मनोविज्ञानम्' इति व्यपदेशोऽपि दौर्भाग्येन रमणीयो नैव प्रतिभाति, यतो ह्यनेन कथमपि युङ्गमहोदयानां फ्रायड-एडलरप्रभृतिभ्योऽसामान्यमनोविज्ञानाचार्य्येभ्यो सिद्धान्तभेदमुन्नेतुं न शक्यते। नहि युङ्गमहोदयानां विचाराननुपादाय कोऽपि मनोविश्लेषणपरायणो असामान्यमनोविज्ञानसम्प्रदायविशेषो 'विश्लेषणात्मकं मनोविज्ञानम्'[२] इत्याख्यां भोक्तुमर्हति।

युङ्गमहोदया हि खलु एडलर-फ्रायडमहोदयोर्मतयोः सामञ्जस्यप्रतिपादनपरं स्वकीयं मतं व्याकुर्वन्ति। युङ्गमहोदयानां मते एडलरमहाशयानां मतापेक्षया फ्रायडमहाभागोपबृंहितस्य मनोविश्लेषणवादस्याऽधिकतमांशो वर्तते। युङ्गमहोदया अपि फ्रायडमहाभागा इव कामप्रवृत्तिं मौलिकप्रवृत्तितयाङ्गीकुर्वन्ति; किन्तु तेषां मते कामप्रवृत्तिर्निर्विशेषशक्तिरूपा, या केषुचन पुरुषेषु कामप्रवृत्तित्वेन परिणमति, अपरेषु च केषुचिदहङ्कारभावमयप्रभुत्वैषणारूपेणाभिव्यक्तिं लभते। बालकेष्वियं कामप्रवृत्तिः[३] निर्विशेषविषया सत्यपि स्वरूपतो बुभुक्षारूपेणाभिव्यज्यते। तदनन्तरमियमात्मप्रदर्शनरूपेण प्रभुत्वैषणासंज्ञकेन, दारैषणारूपेण वा प्राकट्यं लभते।

---

१. तुलनार्थम्—Carl gustav Jung (1857 A.D.)

२. तुलनार्थम्—Analytical Psychology.

३. तुलनार्थम्—Libido.

अन्यच्च, युङ्गमहोदयानां मतेऽज्ञातचैतन्यं सर्वथाऽनैतिकपाशविकप्रवृत्तिमयमेव नास्ति; किन्तु फ्रायडमहोदयानां मतेऽज्ञातचैतन्यं सर्वथाऽनैतिकासामाजिकपाशविकप्रवृत्तीनां निधिरूपं वर्तते। युङ्गमहोदयानां मतेऽज्ञातचैतन्ये नैतिकधार्मिकतत्त्वान्यप्यवतिष्ठन्ते।

युङ्गमहोदयानां मतेऽज्ञातचैतन्यं नूनमतीव गौरवान्वितम्। मनोविश्लेषणवादानुसारं दृष्टमस्माभिर्यत् कथमहङ्कारो नैसर्गिककामप्रवृत्तेरवदमनं सम्पाद्य अज्ञातचैतन्ये तद्रूपान् प्रक्षिपति; किन्तु फ्रायडमते व्यक्तेर्व्यक्तिगतजीवने तिरोधीयमानानां कामप्रवृत्तिरूपाणां कोशरूपमज्ञातचैतन्यम्। युङ्गमहोदया एतत्सर्वमुररीकुर्वन्ति; अथ च तेऽभिमन्यन्ते यदज्ञातचैतन्यस्यान्यदेकरूपमीदृशमपि वर्तते, यस्मिन् व्यक्तेर्व्यक्तिगतोंऽशः कोऽपि न वर्तते; किन्तु निखिलमानवजातेर्वासनानैरन्तर्येण वंशानुक्रमादागतानां प्रवृत्तीनामुदाराध्यात्मिकादर्शानां च साम्येन सन्निधानं वर्तते, तच्च सर्वेषु मानवेषूपलभ्यते। युङ्गमहोदयाः फ्रायडप्रतिपादितमज्ञातचैतन्यरूपं 'पौरुषेयं चैतन्यम्[1]' इति व्यपदिशन्ति; किन्तु स्वप्रतिपादितमज्ञातचैतन्यरूपं 'सामूहिकमज्ञातचैतन्यम्[2]' 'अपौरुषेयम्[3]' इति वा व्यपदेशेन निर्दिशन्ति, यतो हि खल्वस्याऽज्ञातचैतन्यस्य कर्ता कश्चन व्यक्तिविशेषो न विद्यते। अत एवेदमुच्यते—'अपौरुषेयमज्ञातचैतन्यम्' इति।

युङ्गमहोदयाः स्वमतं द्रढयितुं पुरुषस्वभावस्य मुख्यतया द्विविधं वर्गीकरणमङ्गीकुर्वन्ति—बहिर्मुखप्रकृतयः, अन्तर्मुखप्रकृतयश्चेति। बहिर्मुखप्रकृतयः पुरुषाः स्ववातावरणेन सार्धं स्वस्थरागात्मिकसम्बन्धमिन्द्रियोपभोगयोग्यसम्बन्धं वोढुं समर्था भवन्ति। वस्तुत एतेषां कृते फ्रायडमहोदयोक्तकामवृत्तेर्व्याख्यानमवबोद्धव्यम्। अन्तर्मुखप्रकृतयस्ते पुरुषाः, येषां बाह्यवातावरणेन साकं सम्बन्धविच्छेदो भवति। नहि तेषामाशाकाङ्क्षादिपूर्त्तिर्बाह्यजगति कथमपि भवितुमर्हति; किन्तु स्वान्तःस्थितेऽज्ञातचैतन्ये सा सम्भाव्या। बाह्यजगतः स्वान्तर्जगति प्रत्याक्रमणं ते सोढुं न प्रभवन्ति; किन्तु स्वरक्षार्थमनेकानुपायान् विरचयन्ति। तदर्थमेडलरमहोदयस्यानुव्याख्यानं सङ्गच्छते। बहिर्मुखस्य दृष्टिः पराङ्मुखी भवति, अतश्च स इन्द्रियजन्यसंवेदनासहकृतां बाह्यजगद्विषयिणीं प्रतिक्रियामनुभवति। अन्तर्मुखस्य दृष्टिः स्वान्तर्मुखी भवति, अतश्च तस्य बाह्यवातावरणाभिमुखी प्रतिक्रिया अत्युग्रा विरोधमयी च दृश्यते। पूर्वोक्तं सामूहिकं चैतन्यं हि खल्वन्तर्मुखप्रकृतेः प्रतिक्रियाजातं निर्दिशति। तस्य ह्याकाङ्क्षास्रोतो भवन्त्याद्यमानवसभ्यताजन्याः कल्पनाप्रतिमाः[4], यासां तस्य स्वकीयशिक्षानुभवजीवनादिभिः सह कोऽपि सम्बन्धो न वर्तते। तस्य विलक्षणाचरणस्य मूलप्रेरणा नूनं निखिलमानवस्वभावस्य पृष्ठभूमिरूपं सामूहिकं चैतन्यमिति निरवद्यम्।

ननु कथं सामूहिकं चैतन्यमिति प्रतिपाद्यते? किमिदं मानसप्रत्यक्षविषयीभूतम्? अथवा किमिदमनुमानेन ज्ञायते? आहोस्विदन्येन केनापि प्रमाणेन? सामूहिकं चैतन्यं युङ्गमहाशया

---

१. तुलनार्थम्—Personal unconsciousness.

२. तुलनार्थम् Collective Unconciousness.

३. तुलनार्थम्—Impersonal.

४. तुलनार्थम्—Primitive images.

भिमतमतिजटिलरूपं मौलिकमस्पष्टं चेत्यवबोद्धव्यम्। नेदं प्रत्यक्षविषयम्, सर्वथा तिरोहितस्वरूपतया नूनमिदमनुमानेनावगन्तव्यम्। सामूहिकं चैतन्यं निखिलजातिगताकाङ्क्षासमुदायस्य रिक्थरूपस्य कोषागारसदृशमित्यनुमीयते। तस्य वर्णनमपि सौकर्य्येण नापादयितुं शक्यते। निखिलमानवजातेः सार्वकालिकादर्शाकाङ्क्षादीनां सनातनरिक्थरूपाणां मूलबीजमस्मिन् सामूहिके चैतन्ये सुनिहितं वर्तते। अलौकिकशक्तिग्रहणम्, सत्यान्वेषणम्, देवाऽसुरादिमान्यता, उच्चावचत्वेन मानवविभाग इत्यादिप्रत्ययाः सर्वे बीजरूपत्वेन सामूहिकचैतन्ये वर्तन्ते। अथ च यद्यपि साक्षाच्चैतन्ये स्फुटतया तेषामुपलब्धिर्न सम्भाव्यते, तथापि तेऽस्माकं चैतन्यं निरतिशयं सामान्यावस्थायामसामान्यावस्थायां च प्रभावयन्ति। येन सुप्तचराणामुपायानां मानवस्याध्यात्मिकस्वभावप्रतिनिधिभूतानां स्फुटमुन्मेषः सम्पाद्येतेति।

युङ्गमहोदया 'एयोन्[1]' इत्याख्यं जीवात्मचैतन्यं 'साइके[2]' इत्यभिधेयात् चैतन्याद्व्यतिरिक्तमनुमन्यन्ते। 'एयोन्' इति तु निखिलमानवजीवनस्य केन्द्रीभूतमवतिष्ठते। 'साइके' इति त्वपरथा निखिलचैतन्यस्य समष्टिरूपं द्योतयति। अन्यच्च, युङ्गमहाभागाः स्त्रीचैतन्यपुरुषचैतन्ययोः कञ्चन भेदविशेषं प्रतिपादयन्ति। पुरुषचैतन्यं 'एनिमा[3]' इति व्यपदिश्यते। स्त्रीणां चैतन्यञ्च तेन 'एनिमस[4]' इति व्यपदेशेन सुव्यक्तम्। 'एनिमा' 'एनिमस' इति पदाभ्यां तर्हि स्त्रीपुरुषयोर्लिङ्गभेदानुसारं 'साइके' इत्याख्यं चैतन्यं द्वेधा वर्गीकर्तुं शक्यते।

युङ्गमहोदयाः फ्रायडमहाभागाभिमतं स्थिरीकरणाख्यं मतं वर्णितचरं नाद्रियन्ते। तन्मतानुसारं यदा कस्यचिन्मानवस्य वर्तमानं वातावरणं तस्य कामवृत्तेरभिव्यक्तिं नितान्तमवरुणद्धि, कामवृत्तिश्चावरुद्धा जायमाना प्राक्तनशैशवोचितमभिव्यक्तिरूपमाधत्ते, तत्र च स्थिरत्वमवाप्नुते; तदा तस्य विक्षिप्तावस्था जायते; किन्तु यदि वर्तमानपरिस्थितिजाटिल्यासादितकामवृत्त्यभिव्यक्त्यवरोधो नाऽभिनिर्वर्तेत, तर्हि नूनमेते बाल्यकालिककामवृत्तिरूपाणि नैव विक्षिप्तामवस्थां नेतुं प्रभवन्ति। सुतरां वर्तमानदशायां कामवृत्तेः समीचीनविकासावरोध एव विक्षिप्तावस्थाया मूलकारणमिति तेषां तात्पर्यम्।

युङ्गमहोदयानुसारमद्यतन्यो घटनाः पूर्वतनघटनानामेव फलमिति न मन्तव्यम्, प्रत्युत ताः श्वस्तनघटनाभिरपि प्रभाविता जायन्ते। अतस्तासां व्याख्यानं प्रयोजनदृष्ट्यातीव युज्यते। निखिलं ब्रह्माण्डं योजनान्वितं परिचाल्यते। अस्मिन् विश्वे मानवस्योपस्थितिरपि सप्रयोजनैव; किन्तु वयं चतुरस्रं तत् प्रयोजनमाकलयितुं न प्रभवामः। अत एवाद्यतनीसु क्रियासु भाविक्रियाणां प्रभावो नितान्तं सञ्जायते। इयं पूर्वकल्पिता योजना सामूहिकचैतन्यरूपेणोपलभ्यते। सेयं विश्वजनीना योजना केनापि मानवेनैकेन न निर्म्मिता, नापि कादाचित्की हि सा। केषाञ्चन मते ईश्वरनिर्म्मिता हि सा योजना भवति। तदुक्तं ह्युदयनाचार्य्यैर्न्यायकुसुमाञ्जलौ—

कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः।
वाक्यात् सङ्ख्याविशेषाच्च साध्यो विश्वविदव्ययः॥ इति[5]।

---

१. तुलनार्थम्—'Aion' or self which is the inner centre of man.
२. तुलनार्थम्— Psyche, which represents the totality of consciausness.
३. तुलनार्थम्—Anima.
४. तुलनार्थम्—Animus.
५. द्रष्टव्यः—न्यायकुसुमाञ्जलिः ५।१

अन्येषां मते सप्रयोजनो विकास एवास्याः कारणम्। यतो हि खल्वियं समस्या दर्शनाङ्गभूता, अतो न मनोविज्ञानप्रतिपाद्यतां भजते।

युङ्गमहोदयप्रतिपादितं स्वच्छन्दप्रत्ययसम्बन्धपरीक्षणं नैवात्र सविस्तरं वर्ण्यते। पूर्वस्मात् प्रत्ययसम्बन्धविवेचनपराध्यायादेवेदमुन्नेयम्।

२१. सम्मोहनस्वरूपम्

फ्रायड-युङ्ग-एडलरप्रभृत्याचार्याणां मतानि संक्षेपतस्तुलनात्मकरीत्या वर्णितपूर्वाणि। अथातो वयं सूक्ष्मचैतन्यस्य तैजसाभिधस्य, यदर्वाचीना मनोवैज्ञानिका 'अज्ञातचैतन्यम्' 'उपचैतन्यम्[१]' इति वा व्यपदेशेन व्यवहरन्ति, क्रियाकलापं विक्षिप्तापस्मारोन्मादाद्यवस्थासु प्रवर्तमानं तन्मनोविश्लेषणाख्यचिकित्साप्रणालीं चानुव्याख्यास्यामः। फ्रायडमहाभागैः सर्वप्रथमं सम्मोहनविधिना चारकॉटमहोदयैरिव विक्षिप्ताद्यवस्थानां चिकित्सा समारब्धा। ननु किमिदं सम्मोहनं नाम? कश्चास्योपयोगः? अत्र वयं ब्रूमः—सम्मोहनं नामाज्ञातचैतन्यस्य परमं साधकम्। अनेन व्यक्तित्वद्वैधीभाव एकान्तरव्यक्तित्वस्वरूपं सौकर्य्येण प्रतिपादयितुं शक्यते। सम्मोहनं न केवलं रोगनिदानान्वेषणे सहायकं भवति, प्रत्युत रोगस्य चिकित्सायामपि तस्य नितान्तमुपयोगित्वं वर्तते।

सम्मोहनं नाम मनोऽवस्थाविशेषः, यस्मिन् सम्मोहनकर्त्ता सम्मोहितव्यक्तिमाज्ञासंकेतद्वारा यथेष्टक्रियां कर्तुमादिशति। जाग्रच्चैतन्यस्य प्रभावाऽभावात् सूक्ष्मचैतन्यस्य, अज्ञातचैतन्यस्येति वा क्रियाकारित्वात् सम्मोहनदशायां यथा आदेशः प्रदीयते, सम्मोहिता व्यक्तिस्तर्कं विनैव भयाद्वा श्रद्धया वा तथा तथाचरति। सेयमवस्था निद्रासङ्काशा भवति। सम्मोहितव्यक्तेर्व्यक्तित्वं जाग्रच्चैतन्यस्य वा व्यक्तित्वाद् भिद्यते, यतो हि तस्मिन्नज्ञातचैतन्यस्य सूक्ष्मचैतन्यस्य वा क्रियाकारित्वमनुस्यूतं भवति। सम्मोहनदशायां स्वप्नवदज्ञातचैतन्यस्याभिव्यञ्जनायानुकूल्यमुपलभ्यते। संकेतस्वरूपं वर्णितचरम्। अवितर्क्यैव श्रद्धया भयाद्वान्यस्य वाक्यग्रहणं यथेष्टक्रियाकारित्वं चेति संकेताख्या मानवमात्रोपलभ्यमाना सामान्यप्रवृत्तिः। अत्र संकेतपदार्थो न्यायशास्त्रप्रसिद्धव्याख्यातो विलक्षणोऽवगन्तव्यः। तथा हि—"अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसंकेतः शक्तिः" इति अन्नम्भट्टाः। इहेश्वरसंकेतो नामेश्वरेच्छा। सैव शक्तिः; किन्तु नहि मनोविज्ञाने प्रतिपाद्यमाने ईश्वरकृतसंकेतस्यावकाशः कुत्रचिदपि वर्तते। मानवीयः संकेत एवास्माकमत्राभिप्रेतः। सम्मोहनकर्तुरिच्छायाः परामर्शस्य वा बुद्धिप्रयोगं विनैव गुणावगुणचिन्तनादृते सम्मोहनीयव्यक्त्या ग्रहणमिति संकेतग्रहणम्। संकेतजन्यं सम्मोहनमित्यवधार्यम्।

कथं मेसमर-बर्नहीम-चारकॉट-जैनेट-फ्रायडमहोदयैः सम्मोहनविधिर्निरस्तसमस्तशङ्को वैज्ञानिकानां परमसन्तोषावहरूपेण सुविख्यातः, विज्ञानकक्षे च प्रतिष्ठापितः? इति सर्वं वर्णितपूर्वम्। वयमत्र संक्षेपतः सम्मोहनप्रकारविशेषमिदानीमनुव्याख्यास्यामः, येन तदन्तर्गतान्धविश्वासादिदैवीशक्तिभूतगणाद्याशङ्का दूरीभवेत्। सम्मोहनदशायां सम्मोहनकर्तुः सम्मोहनीयव्यक्त्या सह चित्तैकाग्र्यसमन्वितं भावनैक्यमवतिष्ठते। आङ्गलभाषायामिदं भावनैक्यं

---

१. तुलनार्थम्—Sub-concious

'रैपॉर्ट[1]' इत्युच्यते। भावनैक्यं हि सम्मोहनस्य गुरुलाघवाय कल्पते। भावनैक्ये प्रकर्षमुपगते यः कोऽपि संकेतः सम्मोहितव्यक्त्यै प्रदीयते, तदनुसारं सम्मोहिता व्यक्तिराचरितुमारभते। दुष्टं दुश्चरितं क्लेशप्रदमपि वा संकेतं सम्मोहिता व्यक्तिः सम्मोहनदशायां शृणुते, तथैव चाचरति। कदाचन जाग्रद्दशायां प्रतीयमानमसम्भाव्यमपि कार्यं सम्मोहिता व्यक्तिः कर्तुमारभते। यदि हि सम्मोहिता व्यक्तिः कुक्कुरवद् भाषितुं वानरवन्नर्तितुं वा आदिष्टा भवेत्, तर्हि सा तथैवाचरति। तस्या जाग्रच्चैतन्यं तदा नैवात्मनियन्त्रणं प्रयुङ्क्ते। यदि काचन सम्मोहिता व्यक्ती रक्तशिराच्छेदनायादिष्टा भवेत् सम्मोहनदशायाम्, तर्हि साऽचिरेण रक्तरञ्जिता भविष्यति। कदाचन सम्मोहनदशायां मूर्च्छादशावत् सर्वाङ्गशरीरं काष्ठवत् कार्कश्यम् (Rigidity) उपैति।

सम्मोहनं द्विधा सम्पादयितुं शक्यते—प्रथमं तावदातङ्कमयं सम्मोहनम्। प्रायस्तान्त्रिकैर्भूतगणादिविशेषज्ञैश्चेदं प्रयुज्यते। सम्मोहनकर्त्ताऽस्मिन् सिद्धपुरुषवदाचरति। सम्मोहनीया व्यक्तिश्च भयमन्वेति। सम्मोहनीये व्यक्तिविशेषे विनम्रभावम्, आत्मलाघवं चोत्पादयति। एवम्प्रकारेणातङ्कवशीभूता सम्मुग्धा व्यक्तिः सम्मोहनकर्त्रे खल्वात्मार्पणं कुरुते, तन्निर्देशाँश्चानुपालयति। द्वितीयः प्रकारो विश्वासोत्पादनात्मकः, येन मृदुशब्दैः हितकामैः सम्मोहनकर्त्ता सम्मोहनीयपुरुषस्य हृदयं स्नेहेन विजित्य तद्विश्वासार्हतामुपैति। तदनन्तरं यथा स सम्मोहितां व्यक्तिमादिशति, तथा सम्मोहिता व्यक्तिरनुपालयति। तदारम्भश्चेत्थं क्रियते—

सम्मोहनकर्त्ता—कोऽसि ?
सम्मोहिता व्यक्तिः—भावत्कोऽहम्।
सम्मोहनकर्त्ता—सुखेन तिष्ठ, शरीरं शिथिलीकुरु।
सम्मोहिता व्यक्तिः—ओम्।
सम्मोहनकर्त्ता (प्रयोक्ता)—कोऽसि ?
सम्मोहिता व्यक्तिः—भावत्कोऽहम्।
प्रयोक्ता—अस्मिन् बिन्दौ तारस्वरं पश्य।
सम्मोहिता व्यक्तिः—ओम्।
प्रयोक्ता—सम्प्रति क्लान्तोऽसि। निद्रामहं त्वां नेष्यामि। त्वच्चक्षुषी निमील्येते। इदानीं त्वं स्वपिषि। सुखेन तिष्ठ।
(सम्मोहिता व्यक्तिः सर्वथा सम्मोहनवशीभूताऽवतिष्ठते।)
सम्मोहिता व्यक्तिः—ओम्।
प्रयोक्ता—सव्यदक्षिणहस्ताभ्यां करतलवादनं कुरु।
सम्मोहिता व्यक्तिः—ओम्।
प्रयोक्ता—त्वदीयः सव्यो हस्तः करतलवादनं करोति। जलमानेतुं प्रसरति। प्रसारय। अस्य संज्ञाशून्यत्वमपास्तम्।
सम्मोहिता व्यक्तिः—ओम्।

---

1. तुलनार्थम्—Rapport.

प्रयोक्ता—कोऽसि ?

सम्मोहिता व्यक्तिः—भावत्कोऽहम् । इति ।

अहङ्कारनियन्त्रिता सम्मोहनदशा नैव भवति । तत्र अज्ञातचैतन्यं प्रबलं भवति । दृश्यते चावदमितप्रवृत्तीनामुद्घाटनं सम्मोहनदशायां सम्मोहनद्वारा प्रयुक्तसंकेते मदिरापानादि-दुराचरणप्रतीकारोऽपि कर्तुं शक्यते; किन्तु खल्वत्रेदं स्मर्त्तव्यं यद् दुर्व्यसनगभीरत्वापेक्षया वारं वारं संकेतसंक्रमणं सम्मोहनदशायां कर्तव्यम् । येषां प्रभाव आत्मबलप्रभवः, शारीरिक-व्यक्तित्वसमुद्भवे दुरतिक्रमश्च भवति, तेषां सम्मोहनद्वारा साफल्यमवश्यं भाव्यम् । अतः कुशलैरेव सम्मोहनविधिः प्रयोक्तव्यः । यदि कस्यचिन्नाम्नो विस्मृतिः सम्मोहनसंकेतेन इष्यते, तर्हि सम्मोहिता व्यक्तिरादेशानुपालनफलस्वरूपमवबुद्धदशायां तन्नाम स्मर्तुं न प्रभविष्यति । व्यवधानं हि खलु जाग्रच्चैतन्याज्ञातचैतन्ययोरन्तरालेऽवतिष्ठते । यज्जाग्रद्दशायां वयमज्ञातचैतन्यमिति ब्रूमः, तत् सम्मोहनदशायां स्वप्ने स्वप्नविहारे मनोविश्लेषणकाले चाभिव्यक्तिं लभते । अवदमितमनोवृत्तीनां स्वरूपावधारणात् तन्निर्वहणाय संकेतविशेषा आदिश्यन्ते । अथ च विस्मृतविषयाणां सम्मोहनदशायामवबोधः सम्पाद्यते । किञ्च यदि तान् विसर्तुं पुनरप्यादेशो भवेत्, तर्हि तत्संकेतेन विस्मरणं सौकर्य्येण सम्पादयितुं शक्यते । उपर्युक्तेन सम्मोहनोदाहरणेन सव्यहस्तार्धाङ्गस्य चिकित्साप्रकारो वर्णितः ।

मनोविकारांश्चिकित्सितुं सम्मोहनं कुशलैर्मनोवैज्ञानिकैरेव विधेयम् । अद्यतना मनो-वैज्ञानिकाः सम्मोहनविधेराश्रयणं कादाचित्कत्वेनैव कुर्वन्ति । यतो हि सम्मोहनं दुष्करं भवति । फ्रायडमहाशयेन प्रथमं सम्मोहनद्वारैवापस्मारोन्मादादिविकाराणां चिकित्सा सम्पादिता; किन्तु कियत्कालानन्तरं तेन स्वकीयो मनोविश्लेषणाभिधो विशिष्टो विधिराविष्कृतः । तेन मनोविकाराणां निदानान्वेषणं तच्चिकित्सितं च सौकर्य्येणाभिनिर्वर्तते । तद्वयं सविस्तर-मनुव्याख्यास्यामः ।

२२. फ्रायडोक्तं साधनतन्त्रम्

फ्रायडमहोदयानां मतानुसारं प्रत्येकं पुरुषो वास्तविकसामाजिकपरिस्थित्या सह पशुवदात्माहङ्कारस्य विरोधमपाकर्तुमानुकूल्यं च स्थापयितुं किञ्चन साधनतन्त्रं प्रयुङ्क्ते । 'अवदमनं' हि साधारणं साधनम्, अनेनानभिवाञ्छनीयविचारा जाग्रच्चैतन्ये प्रविशन्तो निवार्यन्ते । मूलप्रवृत्त्युन्नयनमन्यत् साधनम्, येनोद्दामप्रवृत्तिः समाजहितोपयोगि मार्गं नीयते, सामाजिकनीतिमर्यादानुपालनं च क्रियते । व्यावसायिकरुचिविशेषाः, मनोरञ्जकाभ्यासाः, साहित्यसङ्गीतकलाभ्यासाः, धर्मानुष्ठानादिकं च कामप्रवृत्तेरुन्नयनस्य विविधानि रूपाणि । 'हेत्वारोपणं[1]' नाम साधनमहङ्कारम् 'ईगो' इति नामधेयं चैतन्यं जाग्रदवस्थाभिमानि लोकापवदाद् गोपयति संरक्षति, यतो ह्यनेन लोकेन विगर्हितान्याचरणकारणानि गोप्यसमाजो-पयुक्तानि भद्राणि सद्भिः सम्मतानि शास्त्रविहितानि चाचरणकारणानि प्रतिपाद्यन्ते । यथा च धनिकवञ्चको वदति—"नाहं धनलोलुपः । अयं धनिकः क्रूरः, दीनानां श्रमिकाणां शोषकः ; अतः सामाजिकव्यवस्थायामार्थिकसाम्यमुपस्थापयितुं मया तद्धनापहरणं कर्त्तव्यम्" इति । एवं स्वार्थे परार्थारोपणं 'हेत्वारोपणम्' इत्युच्यते । 'प्रत्याक्षेपणं[2]' नाम स्वात्मविगर्हितमिच्छा-

---

१. तुलनार्थम्—Rationalisation.
२ तुलनार्थम्—Projection.

प्रवृत्तिवेगादिकमन्यपुरुषचरित्रेष्वाक्षेपणम् । यद्यपि तास्तास्तुट्यो विगर्हितप्रवृत्तयो वास्माकं चरित्राङ्गभूताः, तथापि वयं स्वाभिमाननैतिकमर्यादानामनुपालनार्थमन्येषु पुरुषेषु तासां प्रत्याक्षेपणं दूषणरूपेण पुरस्कुर्मः । एतादृगाचरणमेव प्रत्याक्षेपणम् । "प्रत्यावर्तनम्[1]" नाम बाल्यकालिकेच्छापूर्त्यनुकूलव्यवहारानुशीलनम् । अर्थात् स्वकीयावस्थाविशेषानुकूलमाचरणं विहाय प्रौढे वयस्यपि बाल्योचितेच्छाप्रवृत्त्याद्याचरणानां पुनः सन्धारणमिति प्रत्यावर्तनम् । 'शारीरिकोपलक्षणसंक्रमणम्[2]' नाम मानसिकभावग्रन्थिजन्यसङ्घर्षस्य शारीरिकोपलक्षणविशेषेण परिणाम इति । विशेषत इदं साधनमपस्माराख्ये मानसिकविकारे समुपलभ्यते । अज्ञाततया प्रयुक्तमिदं साधनतन्त्रं जीवात्मनोऽहङ्कारस्य वा मानसिकसङ्घर्षविमोचनाय प्रयतनं भवतीति । एतैः साधनैः, केनाप्येकेन वा साधनविशेषेण सूच्यते—'कीदृशो हि खलु विक्षिप्तस्य मानसिकसङ्घर्षो विद्यते ?' इति ।

२३. मानसिकविकाराणां मूलकारणम्

अपस्मारोन्मादाद्यवस्थानां मूलकारणं द्विविधं भवति—

(१) आराद्‌ुपकारकं कारणम्[3] ।

(२) साक्षादुपकारकं कारणम्[4] ।

आरादुपकारकं कारणं तद्भवति येनापस्मारादिरोगानुकूला परिस्थितिर्जन्यते, येनायं पुरुषो रोगाभिमुखो जायते । दूराद् येन रोगाभिमुखं प्रवर्त्यते, तदारादुपकारकं कारणं बोद्धव्यम् । साक्षादुपकारकं कारणं पूर्ववर्ति कारणम्, येनाक्षेपीय एव अपस्मारोन्मादादिविकारपाशैर्बध्यतेऽयं मानवः । वयमेते अनुपदं व्याख्यास्यामः ।

(अ) आरादुपकारकं कारणम्—स्मरणीयं यदेकमेव कारणं सर्वेषां रोगिणां कृते आरादुपकारकं कारणं न भवति । यदेकस्य रोगोत्पत्तेः कृते आरादुपकारकं कारणम्, तदन्यस्य कृते साक्षादुपकारकं कारणमपि भवितुमर्हति । अन्यच्च, कदाचन बहूनामारादुपकारकाणां कारणानां प्रभावातिशयात्, लघ्वपि पूर्ववर्ति साक्षादुपकारकं कारणमपस्मारोन्मादादिरोगोत्पत्तये कल्पते । अपि च, अन्यत्र आरादुपकारकाणां कारणानां दृश्यानामभावेऽपि गुरुतरमेकमेव साक्षादुपकारकं पूर्ववर्तिकारणं व्यक्तित्वं विशृङ्खलीकर्तुं प्रभवति । रोगोत्पत्तेः प्राग्बाल्यादेव यानि कारणानि सक्रियाणि जातानि वा भवन्ति, तानि ह्यारादुपकारकाणि कारणानीति बोद्धव्यम् ।

आरादुपकारकेषु कारणेषु—(क) वंशानुक्रमायत्तं मानसिकोन्मादादिरोगाभिमुख्यम्, (ख) मस्तुलुङ्गीयाघातः, (ग) शारीरिकधातूनां रासायनिकपरिणामेनोत्पद्यमानानि विषाक्तद्रव्याणि, यानि आङ्गलभाषायां 'टॉक्सिन[5]' इत्यभिधीयन्ते, (घ) मानसिककारणानि येषु बालकस्य मनसि आत्मदैन्यम्, पापभावना, विरोधिभावादिभावग्रन्थयोऽङ्गानि भवन्ति ।

---

१. तुलनार्थम्—Regression.

२. तुलनार्थम्—Conversion.

३. तुलनार्थम्—Pre-disposing causes.

४. तुलनार्थम्—Precipitating causes.

५. तुलनार्थम्—Toxins.

किं तावद् वंशानुक्रमायत्ता अपस्मारोन्मादादिमानसिकविकारोत्पत्तिर्भवति ? अत्रोच्यते—वंशपारम्पर्याद् रोगानुकूल्यं शारीरिकसंस्थानविशेषस्य भवतीति विभावनीयम्। यदि मानसिकरोगाः सर्वांशत एव प्रतिसङ्क्रमन्ते, तर्हि जन्मतः प्रभृत्येव रोगोत्पत्तिर्भवितुमुचिता ; परन्तु त्रिंशद्वर्षानन्तरं चत्वारिंशद्वर्षानन्तरं वा वंशपारम्पर्यायत्तं मानसिकविकारादिकमभिनिर्वर्तत इति वक्तुं नोपपद्यते। मानसिकदौर्बल्यं हि खलु वंशपारम्पर्यायत्तं भवतीति समीचीनम्। मानसिकदौर्बल्ये सति मानसिकविकाराणां जायमानानां कृते उर्वरा भूमिरुपलभ्यते। मानसिकाराद्दुपकारकाणि साक्षादुपकारकाणि च कारणानि यदा सम्भवन्ति, तदा व्यक्तित्वविशरणमुन्मादादिद्वारेणाचिरेणाभिनिर्वर्तते, शारीरिकरचनासंस्थानस्यानुकूल्योपलब्धेः। सुतरां यद्वंशानुक्रमायत्तं तत्तु आराद्दुपकारकं कारणम्, न तु साक्षादुपकारकं कारणम्।

अन्यच्च, फ्रायडमहोदयानां मतानुसारमाशैशवं बालकस्य जीवने विरोधिभावस्य[1], आत्मदैन्यस्य[2], आत्मग्लानेर्वा, पापभावनाया[3] वा बीजवपनं जायते। एतावता, वयसि सम्प्राप्ते साक्षाच्च घोरं कारणमासाद्य व्यक्तित्वविभाजनमभिनिर्वर्तते, विक्षिप्तावस्था चायाति। यथा हि—बालिकाया बालकस्य वान्यस्य सम्बन्धिनः कृते मरणाभिलाषः। यदि बालकस्य हेतोर्बालिकायाः परिवारे नादरो जायते, तर्हि बालिका तस्माद् विरोधिभावमत्युग्रं सन्धारयति। यदि वा पिता बालकमत्यर्थं ताडयति, तर्हि बालकः पितुः कृते विरोधिभावमनुभवति। आत्मदैन्यानुभवाच्च तस्य चेतो भृशं दूयते। सुतरां तर्हि बालिका गृहस्य चित्रनिर्माणं करोति, तत्र भ्रातृमूर्तिस्थापनं विस्मरति। चित्रेऽपि सा भ्रातुश्चित्रं नैव निर्मिमीते। कस्मात् ? विरोधिभावस्य हेतोः। तस्या उन्मुक्तकल्पनास्वपि यदि भ्रातुरवकाशो न भवेत्तर्हि किमाश्चर्यम्! पृच्छयमाना सा ब्रूते—'मृतो हि सः' इति। किन्तु क्रोधाभिभवे, विरोधिभावोपशमे सा भ्रातरं दृष्ट्वा 'ममैव भ्राता' इति मन्यते। या विमाता—पितुः प्रथमभार्यातः पुत्री जाता, द्वितीयभार्यातश्च पुत्रः—पुत्रीं त्रासयति, अवगणयति, पुत्रं लालयति, पुत्रीं च तिरस्करोति, तया पुत्र्याश्चित्ते विरोधिभावना जायते, आत्मग्लानिश्च तस्याः चेतसि समुत्पद्यते। तस्या अभिलाषो जायते—'विमाता म्रियेत' इति। सा नूनमेवम्भूतं स्वप्नमपि पश्यति, तद्विषये उन्मुक्तकल्पनास्वप्येवंविधविरोधिभाव एव दृश्यते। तदनन्तरं पारिवारिकपरिस्थितिर्यदि विषमा भवेत्, तर्हि नूनमिमे विकाराः संवर्धन्ते। शैशवोपात्तरूपाणि आत्मदैन्यविरोधिभावपापभावनादिपूर्वलक्षणानि तदौत्तरकालिकप्रौढजीवने उन्मादप्रकारविशेषोत्पादनाय कल्पन्ते। यदि बालिकाया माता ईदृशी भवेत्, यस्या जीवनं दाम्पत्यसुखविहीनं भवेत्, पत्या सहानुकूल्याभावादविश्वासकलहदौर्मनस्याकुलितमेव भवेत्; तर्हि सा स्वबालिकां प्रति कार्कश्यमापन्ना जायते, पुत्रबालिकादिसन्तानं भृशं ताडयति, वयःसन्धिकाले सम्प्राप्ते बालिकाविषये सहिष्णुर्भवति। स्मरणीयमस्मिन् विषये यच्छिक्षाया इदं परममुद्देश्यं भवति यद्बालकस्य मूलप्रवृत्तीनां सन्मार्गेषु सामजिककल्याणावहेषु प्रवर्तनं सम्पाद्येत, तासामुन्नयनं जायेत। प्रायः सुव्यवस्थिते परिवारे बालकस्य चारित्र्यविकासः सम्यक्तया

---

१. तुलनार्थम्—Reaction of Aggression.

२. तुलनार्थम्—Reaction of inferiority.

३. तुलनार्थम्—Reaction of giult.

सम्पाद्यते; किन्तु यदि परिवारोचितमातापित्रोः सौमनस्यजनितविश्वाससहिष्णुतानुकूल्यादिकमुपलब्धं न भवेत्, तह्र्यसामान्यमनोविकाराणां प्रादुर्भावो जायते। यत्र मातापित्रोः दौर्मनस्यं विद्यते, बालकोऽपि पितुः पक्षं समर्थयति, बालिका च मातुरेव पक्षमनुमोदते। निरस्तसमस्तशङ्कं बालकस्य मनसि संरक्षणविश्वासोत्पादनमतीवावश्यकम्। तच्चाऽत्यर्थं चरित्रोत्कर्षाय कल्पते। यत्र मातापित्रोर्दाम्पत्यसम्बन्धविघटनाशङ्का विद्यते, नहि तेषां सन्तानस्य चरित्रं सम्यग् विकसति। असामान्यमनोविकाराणां मूलं परिवारजन्यावदमनहीनभाव विरोधिभाव-प्रायश्चित्ताविश्वासभयादिकं भवति।

यदि बालकस्य व्यवहारः सर्वैर्विगर्हितो भवेत्, तदा तस्य पापभावना प्रायश्चित्तरूपा जायते। स्मर्तव्यमत्र यद् बालकस्य किमपि कार्यमेव निन्दनीयम्, येन शुभमार्गे तस्य प्रवर्तनं सम्भाव्यं भवेत्। न च तस्य मूलप्रवृत्तिरेव निन्द्या। यदि तस्य निसर्गजन्या मूलप्रवृत्तय एव निन्दिता भवेयुः, तासां स्वरूपतः पापमयत्वं प्रतिपाद्येत, तर्हि बालकस्य पापभावना तत्सम्बन्धिनी विचिकित्सा च तं गभीरं मानसिकसङ्घर्षमभि नेनीयते।

अस्मिन् विषये खल्वेतदपि स्मरणीयं यच्छैशवे शिशोरनुभूतिरूममिलाषेच्छाविचारादिकमपरिपक्वत्वात् प्रौढवन्नावधार्यम्; किन्तु तस्य महनीयः प्रभावोऽज्ञातचैतन्येऽज्ञात इवावतिष्ठते। कुशलैः परीक्षकैर्मनोविश्लेषणद्वारैव तदुद्घाटयितुं शक्यते।

आ) साक्षादुपकारकं कारणम्—शैशवे बाल्ये च बालकस्यासामान्यपरिस्थितिकारणानि चोद्भाव्य वयमिदानीं साक्षादुपकारकाणि पूर्ववर्तीनि कारणान्यनुव्याख्यास्यामः। यदि कैश्चन कारणविशेषैरसह्यो मानसिकसङ्घर्षजन्यचिन्ताभार आपतेत्, तदा स मानसिकशक्तिक्षयाय कल्पते। यथा आर्थिकक्षतिदारिद्र्यपदच्युतिव्यावसायिकाकर्मण्यतादिजन्यचिन्ताभारोऽकस्मान्मानसिकविघटनमापादयति। पतिपुत्रादिप्रियतमव्यक्तिनिधने, विश्वासघाते, पतिपत्नीकलहे वा सञ्जाते यः संवेगानुभूत्यतिशयान्मानसिकभारो जायते, तेनाप्यसह्येनापरिहार्य्येण मनोव्यापाराणां विघटनमापद्यते। एवम्प्रकारेण एकान्तरव्यक्तित्वं व्यक्तित्वद्वैधीभावो वाऽसह्यमानसिकसङ्घर्षविमोचनाय प्रकृतिप्रदत्तं सुलभमौषधम्।

२४. व्यक्तित्वद्वैधीभावः[1]

ननु कीदृशं विच्छिन्नं व्यक्तित्वम्? कीदृशो वा व्यक्तित्वद्वैधीभावो भवति? एकान्तरं व्यक्तित्वमसामान्यमनोविकाररूपमेवेति वर्णितचरम्। तदेकेन प्राध्यापकजेनेटमहोदयविवृतेनोदाहरणेन वयं सुव्यक्तं कर्तुमभिलषामः। जेनेटमहोदयेन 'आइरीन' व्यपदेशेनेदमुदाहरणमनुव्याख्यातम्।

'आइरीन' इतिसंज्ञिका एका बालिकासीत्। सा चिरकालं यावद् रुग्णायाः स्वमातुः शुश्रूषां कृतवती। तदनन्तरं तस्या माता पञ्चत्वमापन्ना। तन्मृत्युविषयकघटना अतिकष्टप्रदा आसीत्। तद्वेदनयाऽसह्यया बालिकायाश्चित्ते घोरो मानसिक आघातः सम्प्राप्तः; असामान्यमनोविकाराश्च तस्याः प्रादुर्भूताः। वार्तालापं कुर्वती, सूचीद्वारा सीवनकर्मण्यभिरता वा सा सहसा स्वकार्यं त्यक्त्वा मातुर्मृत्युविषयकघटनानां कुशलाभिनेत्रीसदृशं पुनराचरणं कर्तुमारभते स्म। यदा सा ईदृश्यामवस्थायामासीत्, तदा तया वास्तविकजगद्विषयकं किमपि वृत्तं न स्मृतम्। तदा सा कमप्यन्यं शब्दमुच्चार्यमाणं श्रोतुं न प्रभवति स्म, तदा सा किमपि वस्तुभूतजगद्दृश्यं द्रष्टुमसमर्थासीत्; तदा यद् द्रष्टुं साऽशक्नोत्, तत्तु तात्कालिकोन्मुक्तकल्पनाप्रभवं मातृमृत्यु-

1. तुलनार्थम्—Double personality.

विषयकं वृत्तमेव, नेतरत्। तदनन्तरं सा पूर्वावस्थायां पुनरागच्छति स्म। जाग्रदवस्थायां सा तदभिनयसङ्काशाया अवस्थायाः किमपि स्मर्तुं न प्राभवत्। अन्यच, तस्यामवस्थायां जाग्रदवस्थायाः किमपि वृत्तम्, का च साऽस्तीति नं स्मर्तुमशक्नोत्। जाग्रदवस्थायां पृच्छ्यमाना सा मातुर्मृत्युविषयकं वृत्तान्तं न स्मर्तुमशक्नोत्, किञ्चोदासीनवदेव मातृनिधनवृत्तान्तं श्रुत्वा साऽवतिष्ठते स्म। कोऽपि हर्षविषादादिभावस्तदा तया नानुभूतः। तस्याः परिजना ईदृशमाचरणं ज्ञात्वा तामनिन्दन्, ते तामभर्त्सयन्नपि।

एवम्प्रकारकं विच्छिन्नव्यक्तित्वमेकान्तरं व्यक्तित्वम्, व्यक्तित्वद्वैधीभावो 'निद्राविहारः[१]' इतिसंज्ञको मन्यते मनोविज्ञानविशारदैः। सामान्यासामान्यमानसिकावस्थयोर्मध्येऽवतिष्ठत इयमवस्था। अत्र द्वे व्यक्तित्वे असंश्लिष्टे एकस्या एव व्यक्तेर्भवत इति बोद्धव्यम्। निद्राविहारं व्यक्तित्वाङ्गभूतघटकविशेषस्य विचारेच्छानिकायरूपस्य मूलव्यक्तित्वधारायाः सम्बन्धव्यवच्छेदो जायते। स च सम्बन्धविच्छेदोऽल्पकालिक एव निद्राविहारे, परं तदधिकतरोऽपस्मारे, तदधिकतमश्चोन्मादे। व्यक्तित्वविस्फोटसङ्काश उन्मादो भवति। यथा, ज्वालामुखीविस्फोटे भूम्यन्तःस्थाग्निद्रवीभूतधातवो बहिर्निक्षिप्यन्ते; एवमेव या या वासना अवदमनवशादज्ञातचैतन्ये तिरोहिता जाताः, ताः सर्वा उन्माददशायामपस्मारदशायां वा स्वैरं विहरन्ति। तच्च स्वैरं विहरणं तावन्न सम्भाव्यते, यावन्न व्यक्तित्वावयवस्य विचारेच्छानिकायस्य संस्थानविशेषस्य सम्बन्धविच्छेदो जायेत।

२५. निद्राविहारः

आसीदस्माकं मित्रं गौरीशंकरसेनो नाम वङ्गदेशीयः। काशिकहिन्दूविश्वविद्यालयीयच्छात्रावासान्निद्रायामेवोत्थाय रात्रौ स विश्वविद्यालयाद् बहिर्गन्तुकामो मुख्यद्वारं यदा पिहितं पश्यति, दौवारिकेण च विज्ञाप्यते तस्मै "सार्धद्विवादनं निशीथसमय इदानीं वर्तते, कुलपत्यादेशानुसारमुत्कपाटं द्वारं स तदा कर्तुं न प्रभवति" इति; तदा तस्य निद्रा विलीयते। आत्मानं च विजानीते 'कुतः सः, क्व च स समागतः' इति। पुनः स छात्रावासमभिगच्छति। सम्बन्धव्यवच्छेदस्य[२] निदर्शनभूतोऽयं निद्राविहारः। यावत्कालं निद्राविहारोऽनुभूयते, तावत्कालं वस्तुभूतजगत्परिस्थितिविषयकं किमपि नानुभूयते, स्मर्यते वा। किञ्च, निद्राविहारानन्तरं नहि निद्राविहारान्तर्भूतघटनाचक्रमपि स्मर्यते। घटकद्वये परस्परमसंश्लिष्टे विभक्तं व्यक्तित्वं व्यक्तित्वद्वैधीभावाय कल्पते।

'थियोफीलीजानीकॉड[३]'नामधेय एको बालक आसीत्। यदा स 'निकोले नॉरमल एट गुरेट[४]' नाम्न्यां पाठशालायामधीते स्म, तदाऽष्टमवर्षादेव स निद्राविहारमनुभवति स्म। कियत्कालपर्यन्तं तेन निद्राविहारो नानुभूतः; किन्त्वेकोनविंशतितमे वर्षे सम्प्राप्ते १८५६ खीष्टीयसंवत्सरस्य जून-जुलाईमासयोः प्रतिदिनं रात्रौ स निद्राविहारमनुभवति स्म। उद्याने छात्रावासे च कतिपयघटिका यावत् स निद्रायामेव विहरति स्म। एकस्यां रात्रौ तेन सञ्चालक-

१. तुलनार्थम्—Somnambulism.
२. तुलनार्थम्—Dissociatian.
३. द्रष्टव्यम्——Human personality by myers Val. I.
४. तुलनार्थम्—Ecole normale et Gueret.

महोदयो जागरितः। अयं समाचारोऽपि तस्मै प्रदत्तो यदहं वैण्डोमीनगरादागतोऽस्मि। सर्वे तत्र कुशलिनः सन्ति। तव पुत्रस्य दन्तचतुष्टयमाविर्भूतमिति। अत्रेदं स्मरणीयं वैण्डोमीनगरे सञ्चालकस्य भार्या आसीत् स्वपितृगृहे। बालकविषयकः संवादोऽपि सर्वथाऽविदित एव तदासीत्।

२६. स्वतो लेखनम्[1]

स्वतो लेखनेऽपि सम्बन्धव्यवच्छेदो जायते। प्राध्यापकप्रवरो जेम्समहोदयः साक्षीकरोति यच्चेतना द्वयोः कक्षयोर्विभक्ता कदाचन जायत इति प्रतीयते। जेम्समहोदयेनोक्तम्—"एकदा मया एका महिला दृष्टा। सा 'प्लेनचेट[2]' नामकेन पट्टिकायन्त्रसाहाय्येन स्वतो लेखनं कुर्वती आसीत्। तदा सा मयैकं नाम लिखितुं प्रार्थिता; किन्तु तस्य पुरुषस्य नाम सा पूर्णतः स्मर्तुं न प्राभवत्। केवलं नाम्नः प्रथमार्धमेव सा स्मर्तुमशक्नोत्। एतस्मिन्नेवान्तराले हस्तगृहीतसीसकलेखन्या तया स्वत एव सम्पूर्णं नामोल्लिखितम्" इति[3]।

दृश्यते च बहुवारमपस्माररोगिणोऽङ्गुलिमध्ये सीसकलेखनी यदि प्रविष्टा भवेत्, तर्हि स स्वत एव कागदपत्रे कान्यप्यक्षराणि लिखति, येषां स्मृतिरपि स कर्तुं न प्रभवति। अपस्माररोगिणः कदाचन रक्तान्धदोषग्रस्ता जायन्ते; किन्तु तेऽजानन्तोऽपि अपश्यन्तोऽपि तान् वर्णविशेषान् स्वतो लेखनेन लिखितुं प्रभवन्ति, येषां ज्ञानं प्रत्यक्षप्रभवं तेषु न जायते। विश्वविश्रुतेन फ्रांसदेशीयविनेमहोदयेन केषाञ्चनैवंविधापस्माररोगिणां वर्णनं कृतमुपलभ्यते।

२७. एकान्तरं व्यक्तित्वम्

व्यक्तित्वद्वैधीभावस्यैकान्तरव्यक्तित्वस्य जेम्समहोदयेनैकं वृत्तं सर्वोपरि समुद्घाटितम्। पुरोहितप्रवर एन्सैलबोर्नमहोदयः[4] खीष्टीयः पादरिरासीत्।

१८८७ खीष्टीयसंवत्सरस्य जनवरीमासस्य सप्तदश-(१७) तारिकायां प्राविडेंसस्थानीयवैङ्कधनागारात् पर्याप्तं धनमादाय ट्रामसंज्ञकवैद्युतशकटेऽरोहत्। इदं तु अन्तिमं वृत्तं यत्तस्य स्मृतिपथमवतरति। तद्दिने स गृहं न प्रत्यागच्छत्। मासद्वयं यावत् तस्य किमपि वृत्तं न श्रुतिगोचरं जातम्। खीष्टीयसंवत्सरस्य मार्चमासस्य चतुर्दश-(१४)तारिकायाममेरिकादेशीयपेन्सिलवानियाप्रदेशस्थितनारिसटाउननामके नगरे एकः पुरुषः प्रातःकाले भयान्वित उत्थायान्यान् पुरुषान् स्वगृहे आहूयापृच्छत्—'कुत्र सोऽवतिष्ठते' इति। तेन पुरुषेण स्वकीयं नाम तत्र 'ए० जे० ब्राउन' इति सुप्रचारितम्, षट्सप्ताहपूर्वं चैकमापणं मासिकार्थवृत्त्यादाय तस्मिन् फललघुवस्तुजातलेखनसामग्रीमिष्टान्नादिकं संगृहीतम्। न कथमपि सोऽकृत्रिमव्यवहारं प्रदर्शयति स्म, यतो हि स शान्तमुद्रयापणिकीं वृत्तिं कृतवान्। समागतान् पुरुषान् प्रति स उवाच—"मदीयं नाम ऐन्सेलबोर्न इति। न हि खल्वहमापणिकीं वृत्तिं जानामि। विगते दिने घटितमिव यच्च वृत्तं स्मर्यते मया, तत्तु नूनमिदमेव यन्मया प्रॉविडेंसस्थितधनागाराद् धनमादत्तम्" इति।

---

१. तुलनार्थम्—Automatic Writing.

२. तुलनार्थम्—Planchet.

३. तुलनार्थम्—Principles of psychology by W. James. Val. I.

४. तुलनार्थम्—Ancel Borne.

अनेनेदं विस्पष्टं जायते यदत्र व्यक्तित्वावयवेषु सम्बन्धव्यवच्छेदो गभीरः सञ्जातः, विपुलश्च। अत एवेदम् 'एकान्तरं व्यक्तित्वम्' इति, 'व्यक्तित्वद्वैधीभाव' इति वा निगद्यते। मासद्वयं यावदयं सम्बन्धविच्छेदो व्यक्तित्वान्तर्गतः प्रचलति। अयं खलु व्यक्तित्वविस्फोटः प्रादुर्भवति, आपाततश्च विलुप्तो जायते। उन्माददशायां व्यक्तित्वव्यवच्छेदः सुगभीरो जटिलश्च भवति।

२८. उन्माददशालक्षणानि

अथातो वयमुन्मत्तदशालक्षणान्यनुव्याख्यास्यामः—

(क) मानसिकव्यापारक्षमता—प्रथमं तावदुन्मत्तस्यैषा क्षीयते। स स्वस्थदशायामिवोन्मादरोगदशायां चिन्तनस्मृतिप्रयत्नादिकं सम्यङ् न सम्पादयितुं प्रभवति। तस्य मानसिकशक्तिः सामान्यबुद्धिलब्ध्यङ्कादपि न्यूना भवति। प्रायेण जडबुद्धिर्हि स भवति यथा विचारे तथैव स्मृतौ, यथा स्मृतौ तथैवेच्छिकप्रयतने तस्य कार्यक्षमताह्रासः परिलक्ष्यते, चित्तानैकाग्र्यं च दिनानुदिनं वर्धते। मानसिकः परिमाणात्मकोऽयं दोषो द्विधा विभक्तुं शक्यते—सांसिद्धिकम्, जन्मायत्तमिति यावद्, अनुभवोपार्जितश्चेति। अथवा जन्मायत्तम्, उपार्जितं चेति। आङ्गलभाषायामेते क्रमशो मनोदौर्बल्यम्[1], जाड्यं[2] चेति प्रथेते। बुद्धिह्रासाद् ह्युन्मादग्रस्तः सर्वदा बालकवदपरिपक्वबुद्धिरवतिष्ठते। तदर्थं मातृपितृवत् संरक्षणं लालनं पालनं च सर्वदावश्यकं भवति। स स्वकीयचिन्तां न कर्तुमर्हति। 'जाड्यम्' नाम मूढबुद्धित्वम्। मनोदौर्बल्ये जाड्ये च मनोविकासोऽप्रतिहतगतिर्नैव भवति।

(ख) वार्धक्यप्रभवं बुद्धिमान्द्यम्[3]—जाड्यं बुद्धिमान्द्ये चेत्यनर्थान्तरम्। यदा चेदं वार्धक्यवशादापद्यते, तदा स्मृतिविभ्रंशो जायते। दृश्यते च वार्धक्ये बालानामिव बुद्धिवैभवह्रासस्तेषामपि, ये यौवनावस्थायां प्रौढावस्थायां च कुशला व्यावसायिका आसन्। आङ्गलदेशीयमहाकविशेक्सपियरमहाभागेन वार्धक्यस्य निम्नलिखितं कियत्सजीवं चित्रमुपस्थापितम्! तथा हि—"गौरवान्वितस्यास्य जीवनस्यान्तिमं दृश्यमपरं वात्सल्यमेव भवति विस्मृतिमात्रम्, दन्तविहीनम्, चक्षुर्विहीनम्, स्वादविहीनम्, निखिलवस्तुविहीनम्" इति[4]। न केवलं वार्धक्ये, अपि तु विक्षिप्ताद्यवस्थासु बुद्धिमान्द्यं तत्पूर्वमपि प्रादुर्भवति। स्मरणीयमर्जितेन बुद्धिमान्द्येन सह मस्तुलुङ्गीयसंस्थानरचनायामपि दृश्यं परिवर्तनमापद्यते।

---

१. तुलनार्थम्—Mental Deficiency.

२. तुलनार्थम्—Dementia.

३. तुलनार्थम्—Sevile Dementia.

४. द्रष्टव्यम्—शेक्सपियररचितम्—"As you like it." cp. "Last scene of all, that ends strange eventful history, Is second childishness and mere oblivion, Sans teeth, sans eyes. sans taste, sans everything."

(ग) सङ्क्षोभः[1]—प्रायः सामान्यास्ववस्थास्वपि वयं सङ्क्षोभं हर्षातिरेकमनुभवामः, किन्तु नूनमस्योन्माददशासु विक्षिप्ताद्यवस्थासु चैको विशेषो भवति। तदा रोगी अकारणमुल्लासमनुभवति, अथ चोल्लासस्याभिव्यञ्जनामस्याधिकसंरम्भेण वेगेन करोति, यस्य सामञ्जस्यं तस्य परिस्थित्या सह कथमपि नोपपद्यते।

उल्लासस्य संरम्भस्य वा विविधा भेदा सन्ति—कदाचन रोगी एकं कार्यमन्तराले विहायान्यदारभते, बहु भाषते, तस्य भाषणमक्रममसम्बद्धं च भवति। कदाचनायं सङ्क्षोभः क्रोधरूपः, कदाचन हर्षातिरेकरूपः, कदाचनोत्तेजनारूपश्चेति। तस्य ध्यानं क्षुद्रमपि वस्तु सहसा समाकर्षति, क्षणानन्तरं चास्य ध्यानं तस्माद् विचलति। तस्याकारणं हर्षातिरेको जायते।

(घ) अवसादः[2]—सङ्क्षोभविपरीतरूपोऽवसादो भवति। तत्र रोगी सर्वक्रियासु दीर्घसूत्री भवति। तस्य मानसिकविचारादिकमपि कृच्छ्रेणाभिनिर्वर्तते। दुःखितो म्लानश्च स भवति।

(ङ) औदासीन्यम्[3]—उन्माददशाया अयं चतुर्थो विशेषः। रोगी अत्र न संक्षुब्धो न चावसन्नो दृश्यते, अपि तु स उदासीनोऽवतिष्ठते। नहि तस्य कस्मिंश्चिदपि कर्मणि रुचिर्भवति। आतुरालये समागता बहुसङ्ख्यका रोगिण औदासीन्ययुक्ता भवन्ति। ते आतुरालयस्यैकस्मिन् प्रदेशे एकाकिनो नीचैर्मुखं कृत्वा तिष्ठन्ति। आहूयमाना अपि प्रत्युत्तरं न ददति, नापि गच्छन्त्येव। ते कस्मिन्नपि कार्ये सँल्लग्ना भवितुं नेच्छन्ति।

(च) निद्राविहारः[4]—अयं विक्षिप्तस्यावस्थाविशेषो वर्णितचरः। अपस्मारोन्मादाद्यभिमुखो रोगी 'विक्षिप्तः'। 'आइरीन'वृत्तान्तस्तस्य चरमं निदर्शनम्।

(छ) विभ्रमः[5]—विभ्रमस्वरूपं वर्णितचरम्। अस्माभिः पूर्वमुक्तं यद् विषयाभावेऽपि यत् प्रत्यक्षं समुत्पद्यते तज्ज्ञानं 'विभ्रमः' इति निगद्यते। इन्द्रियभेदेन प्रत्यक्षवद् विभ्रमाणामपि चाक्षुषघ्राणजशब्दजादिभेदा अभिनिर्वर्तन्ते। यदि चाक्षुषप्रत्यक्षविषयाभावेऽपि चाक्षुषप्रत्यक्षं जायेत, तर्हि स 'विभ्रमः' इत्याचक्षते। यदि शुक्तौ रजतभानं जायेत, तर्हि तद्रजतज्ञानं 'भ्रमः' इतीर्यते। सुतरां दुष्टं प्रत्यक्षं द्विविधं भवति—भ्रमविभ्रमभेदात्। उन्मादग्रस्ताः पुरुषाः प्राय आकाशवाणीं शृण्वन्ति। तैर्विविधप्रकारका ध्वनिविशेषा उत्तेजकशब्दाभावेऽपि श्रूयन्ते। स शब्दविभ्रमः कदाचन प्रियः, कदाचनाप्रियश्च दृश्यते। एता आकाशवाण्य उन्मादरोगिणो नितान्त-

---

१. तुलनार्थम्—Excitement.
२. तुलनार्थम्—Depression.
३. तुलनार्थम्—Apathy.
४. तुलनार्थम्—Somnambulism.
५. तुलनार्थम्—Hallucination.

रहस्यमयजीवनसम्बन्धिघटनानां विषये भर्त्सनां श्रावयन्ति। उदाहरणतया, उन्मादपीडितः कदाचन शृणोति—"एते पापानि त्वत्कृतानि, अचिरेण त्वां मृत्युमुखं नेष्यन्ति" इति। अथवा, "अचिरात्तव वधो भविष्यति" इति। आत्मपरितोषाय उन्मत्तो रोगी प्रायः कल्पनाविशेषनिर्म्माणं प्रकुरुते; यथा—"स्वर्गस्था मे पितरो भाविनं मद्वधं सूचयन्ति" इति, अथवा "दैवी इयं वाग् मां पूर्वमेव सूचयति पापफलम्" इत्यादि।

(ज) मूढविश्वासः[1]—उन्मादरोगिणां मूढविश्वासा अपि विभ्रमसहकृता अभिनिवर्तन्ते। विभ्रमाणामयमेको विशेषोऽवगन्तव्यो यत् ते मिथ्याप्रत्यक्षजन्याः, किन्तु मूढविश्वासास्तु मिथ्याविश्वासा एव। यथा यदि कश्चन शूद्रोऽभिमन्यतेऽहं भारतगणतन्त्रस्य राष्ट्रपतिः, यद्यपि सोऽकिञ्चनो राजमार्गं मार्ष्टि, तर्हि तस्यायं मूढविश्वास एव। उन्मत्तस्यासम्बद्धप्रलापस्येमे मूढविश्वासा साग्रहं प्रतिपाद्यन्ते। काचन शूद्रा मन्यते स यत् सा आङ्गलदेशीयसम्राट्जार्जपञ्चमस्य सम्राज्ञीति। कारणं विना मूढविश्वासा उन्मादरोगिणां समुत्पद्यन्ते। अत्रेदं प्रतिपत्तव्यं यत्तेषां विश्वासा अकारणमभिनिर्वर्तन्त इत्यस्माकं वचनं जाग्रच्चैतन्यापेक्षयैवोपपद्यते। वस्तुत उन्मत्तानां विश्वासा गभीरतरमज्ञातचैतन्यस्य क्रियाकारित्वं द्योतयन्ति। एवमेव विभ्रमा अपि भावग्रन्थिप्रभावं निर्दिशन्ति। मनोवैज्ञानिक एव, मनोविश्लेषणविशारद एव जानाति यत्ते ते विश्वासाः कस्माद् हेतोर्जायन्त इति।

सुतरामेते मूढविश्वासा विशेषेण द्विविधा भवन्ति—गौरवानुबन्धिमूढविश्वासाः[2], त्रासानुबन्धिमूढविश्वासाश्चेति[3]। तत्राद्यो मूढविश्वासस्तदा जायते यदा रोगी आत्मानं सर्वश्रेष्ठं काव्यकर्माभिमन्यते, यस्य काव्यवैभवं लोकोऽवमन्यते। अथवा "अहं सर्वाधिकसुन्दरोऽस्मि" इति, अथवा "अहं लक्षाधिपतिः", "अहं राष्ट्रपतिरस्मि" इति।

द्वितीयप्रकारको मूढविश्वासस्त्रासमयो भवति। यथा—"मदीयं धनवैभवमपहर्तुकामाः सर्वे मद्वधाय षड्यन्त्रं रचयन्ति" इति। "न ते मदीयं काव्ययशःप्रकर्षं चिकीर्षन्ति, अत एव ते निन्दां कुर्वन्ति। भोजनार्थमामन्त्रणेन ते मह्यं विषपानं प्रदास्यन्ति" इति। सर्वत्र त्रासावपीडाद्याशङ्कासमन्वितोऽयं मूढविश्वासः। प्राय इमौ मूढविश्वासौ युगपदुपलभ्येते। यथा—"मदीयं राज्योत्तराधिकारं वञ्चितुकामा इमे सम्बन्धिनो मन्त्रिणश्च मम वधाय षड्यन्त्रं कुर्वन्ति" इति।

अस्ति हि तृतीयप्रकारकोऽपि मूढविश्वासः[4]। तस्मिन् समुत्पद्यमाने

---

१. तुलनार्थम्—Delusion.

२. तुलनार्थम्—Delusion of grandeur (grandiose).

३. तुलनार्थम्—Delusion of persecution.

४. तुलनार्थम्—Delusion of reference.

रोगी सर्वदा शङ्कितो भवति, मन्यते च यत्सर्वे जनास्तमभिप्रेत्यैव वार्तालापं कुर्वन्ति। तद्विषये एव हसन्ति। तं त्रासयितुं विविधानि षड्यन्त्राणि च रचयन्तीति।

अत्रेदं स्मरणीयं यदुन्मत्तो गौरवविषयकेण मूढविश्वासेन प्रभावितो भूत्वा स्वकीयगमनविधौ वार्तालापादिषु वस्त्रादिधारणे च किञ्चिद् वैलक्षण्यं वैचित्र्यं वा प्रदर्शयति। तेनेदमनुमातुं शक्यते यदयं गौरवविषयकमूढविश्वासान्वितोऽस्ति ? किमुत त्रासान्वितमूढविश्वासान्वितो वा ? इति।

(झ) भावाभिनिवेशः[1]—नहि भावाभिनिवेशः सर्वदा उन्माददशायामुपलभ्यते, तथापि नूनमयं विक्षिप्तावस्थाभिमुखो भवति। यद्यपि रोगी जानाति यदहमुपदंशरोगग्रस्तो नास्मीति, तथापि स उपदंशरोगसम्बन्धिदृढविश्वासं परित्यक्तुं नार्हति। एवम्भूतायां दशायां वयं ब्रूमः—अयं भावाभिनिवेश इति। कश्चन रोगी यदा वारं वारं हस्तौ मार्ष्टि, तदायं 'मार्जनमयो भावाभिनिवेशः' इत्युच्यते। 'इदं मार्जनकर्म मुधैव मया क्रियते' इति जानन्नपि रोगी तद्विषयकं भावाभिनिवेशमाभ्यन्तरवेगरूपं परित्यक्तुं न शक्नोति। एवम्प्रकारेण उन्मत्तः शतवारं द्विशतवारं हस्तौ प्रक्षालयति। कदाचन रोगी मन्यते यत्तस्य पुरीषं निर्गतम्, किन्तु निरीक्षणं तन्न समर्थयति। तथापि स भावाभिनिवेशाभिमतो वारं वारं गुदमार्जनं प्रकुरुते। काचिदन्या उन्मादरोगिणी आसीद् यस्या वृत्तं फ्रायडमहाभागेन वर्णितम्। सा कर्गदमुद्रामयं प्रत्येकं पत्रं धनागारादागतं ('बैङ्क नोट' इति आङ्गलभाषायाम्) मत्वा, सावहिता भूत्वा परिगणयति स्म।

नहि वर्णितचरे मूढविश्वासे रोगी स्वविश्वासस्यानर्हतां विजानीते। तत्रापि मूढग्राहो भवति, साग्रहोऽन्तर्वेगरूपो विश्वासो भवति। केचन वारं वारं स्नात्वापि खल्वात्मानमस्वच्छं मन्यन्ते।

(ञ) अपरिवर्त्यं निरर्थकं कार्यम्[2]—उन्मादरोगिणः क्रियाः प्रायो निरर्थिका भवन्ति, अकारणाः प्रतीयन्ते। वर्षारम्भाद्वर्षपर्यन्तं रूढिङ्गतः परिवर्त्यरूपेण क्रियाम्, अङ्गुलीर्वा भुग्नीकृत्य हस्तपरिचालनप्रकारविशेषम्, अथवा शून्ये आकाशेऽङ्गुल्या लेखनम्, पादप्रक्षेपणं वा भूमौ करोति। एका उन्मत्ता स्त्री सततं तन्तुवायवत् तन्तुचक्रं हस्तगत्या अहर्निशं भ्रामयति स्म। क्रियासातत्यं सरभसं व्यर्थक्रियानुष्ठानं वोन्मत्तस्य परमं लक्षणम्।

(ट) वाक्यप्रौढिः[3]—कदाचनोन्मत्तः क्लिष्टपदावलीं प्रयुङ्क्ते। अबद्धवाक्यत्वम्, क्लिष्टपदयोजना, सततं भाषणमित्यादीनि नूनमुन्मादस्य लक्षणानि। रोगिणो वार्तालापे पूर्वापरसम्बन्धाभावो दृश्यते। एकेनोन्मादरोगिणा सहास्माकं यो

---

१. तुलनार्थम्—Obsession.

२. तुलनार्थम्—Stereotyped action.

३. तुलनार्थम्—Pedantic Phraseology.

वार्तालापो हिन्दूविश्वविद्यालयीयातुरालये १९९९ वैक्रमाब्दे सञ्जातः, तस्यैकमंशं वयमत्र पुरस्कुर्मः। तथा हि—(संस्कृतच्छाया)

"इन्दिरे! इन्दिरे! नहि त्वद्विना जीवितुमुत्सहे! एहि, एहि, भोः श्याल! लम्पट! जार!! (पाषाणखण्डेन ताडयति) मामस्माद् गृहाद् बहिर्नय। देहि मे एकं रोटिकाखण्डम्। भोः भोः! एकां धूम्रपानवर्तिं मे देहि" (तदनन्तरं स गीतमारभते। मध्ये मध्ये शतानि कुत्सितानपशब्दाँश्च भाषते। क्षणानन्तरं तद्गीतं परित्यज्य रोदितुं प्रवर्तते) इति।

अथ वयमुन्मत्तलक्षणान्युपसंहरामः। तथा हि—

धीविभ्रमः सत्त्वपरिप्लवश्च पर्याकुला दृष्टिरधीरता च।
अबद्धवाक्त्वं हृदयं च शून्यं सामान्यमुन्मादगदस्य लिङ्गम्॥ इति[1]।

२६. भावग्रन्थिस्वरूपम्

भावग्रन्थिरिति आङ्गलभाषायां 'कम्प्लैक्स[2]' इति पदेन व्यपदिश्यते। सर्वप्रथममस्य प्रयोगं श्रीयुङ्गमहोदयः कृतवान्। तदनुसारं भावग्रन्थिपदार्थस्तु प्रागुक्तस्य मैकडूगल-शैण्डप्रतिपादितस्य स्थायिभावस्य सदृश एव; किन्त्वर्वाचीनमनोविज्ञानेऽस्य विशिष्टेऽर्थे प्रयोगोऽधुना दृश्यते। भावग्रन्थिस्तर्हि भावातिशयोपेतं वस्तुविशेषोऽभिमुखं विचारनिकायसङ्घटनम्, यदवदमनेन तिरोहितं यस्य क्रियाकारित्वं चाज्ञातमिवावतिष्ठते[1]। उदाहरणस्वरूपम्—यो युवा काञ्चन स्त्रीं प्रेयसीमभिमन्यते, लघुमपि प्रत्ययसम्बन्धमवाप्य तस्य प्रेमभावो जागरितो जायते, तां रमणीं चिन्तयतस्तस्योर्वरा कल्पनाऽपि मनोरमं वितानं वितनुते। अहर्निशं स तामेवानुचिन्तयति। तां विना निखिलं जगत् तस्मै शून्यमेव। एतादृशी प्रगाढप्रेमावस्था भावग्रन्थिरूपतामाधत्ते।

ये ये भावा विचाराश्च आयान्ति, यदि ते भावग्रन्थिविशेषेण सहानुकूल्यं भजन्ते, ते संरक्षिताः संवर्धिताश्च क्रियन्ते। ये च भावास्तया भावग्रन्थ्या सहानुकूल्यं न प्राप्तुमर्हन्ति, ते खल्ववदमनविषयीभवन्ति, तेषां शक्तिरपि क्षीयते। भावग्रन्थिविशेषाः सामान्यतः स्वस्थपुरुषेष्वपि जायन्ते। यथा राजनीतिकदलानुबन्धिभावग्रन्थिः, लोभभावग्रन्थिश्चेति। नहि भावग्रन्थिविषया युक्तिसङ्गता भवितुमर्हन्ति। भावग्रन्थिप्रकर्षेण व्यक्तिचरिते पक्षपातोऽनुप्रविशति। तस्या व्यक्तेः सर्वे व्यापारास्तत्तद्भावग्रन्थिविशेषानुकूल्येन प्रवर्तन्ते। यथा स्त्रीप्रणयभावग्रन्थिजन्यपक्षपातेन पुरुषस्तस्याः स्त्रिया दोषावगाहनं नैव करोति। तस्या दोषा अपि तद्गुणोपोद्बलकाः प्रतीयन्ते।

---

१ द्रष्टव्यम्—माधवनिदानम्, पृ० १८० (नि० प्रे० सं०)

२. तुलनार्थम्—Complex—

"A complex is a system of emotionally toned ideas and tendecies grouped round a particular object and which have been repressed and are therefore more or less of a morbed charactr i, e, unconscious."

अथ च राजनीतिदलगतभावग्रन्थिविशेषो यस्य विद्यते स साम्यवादी भारतीयराष्ट्रियकाँग्रेसनिर्वाचनघोषणापत्रं समाजवादाभिमतसमाजरचनाधारशिलाभूतमपि खल्ववमन्यते, किं तस्य दुराग्रहस्य कारणम्? अत्र वयं ब्रूमः—राजनीतिदलगतभावग्रन्थिरिति।

भावग्रन्थिप्रभावो निम्नलिखितविशेषानाधत्ते। यथा हि—

(अ) भावग्रन्थिप्रभावं कर्त्ता ज्ञातुं न प्रभवति। अज्ञाततयैव भावग्रन्थिः सामान्यकार्येषु प्रभावमुत्पादयति। एष प्रथमो विशेषः।

(आ) भावग्रन्थिप्रभावः साधारणतया प्रतीयमानकारणेभ्यो व्यतिरिक्तो भवति। स तु लाक्षणिकरूपैरभिव्यज्यते। प्रायो विविधान् प्रतीकानुपादाय भावग्रन्थ्यभिव्यक्तिर्जायते। यथा स्वप्नेषु विविधाः प्रतीका मनोगतभावग्रन्थिप्रभावतिरोहितेच्छाभिरभिनिर्वर्तन्ते। एष द्वितीयो विशेषः।

(इ) मानवो भावग्रन्थिप्रभावाद् वास्तविकं स्वाचरणकारणं नाभिजानाति, प्रत्युत हेत्वारोपणसमुत्थितं कारणमेव स्वाचरणं साधु साधयितुं प्रकटीकरोति। तच्च हेत्वारोपणं स्वमानप्रतिरक्षार्थं कार्यारम्भानन्तरं प्रयुज्यते।

भावग्रन्थिद्वयजन्यः सङ्घर्ष एवावदमनस्य मूलमदम्यं कारणं भवति। तदुत्थमेव हेत्वारोपणं भवति। वस्तुत उन्मादरोगिणां यानि यानि स्वप्नमूढविश्वासाङ्गचेष्टाप्रभृतीनि पूर्वलक्षणानि लिङ्गानि च भवन्ति, नहि तेष्वेकमप्यकारणं भवति। भावग्रन्थिजन्यान्तर्वेगानां दुर्धर्षत्वादेवाऽबद्धवाक्त्वचित्तचाञ्चल्यादीनि लक्षणानि विक्षिप्तदशायामाविर्भवन्ति। यदि वयं विक्षिप्तस्य क्रियाणां मूलकारणं भावग्रन्थिसङ्घटने परमजटिलेऽन्वेष्टुं धैर्येण प्रयतामहे, तर्हि तासामुपहासास्पदत्वमकारणत्वं वा नूनमचिरेण दूरीभवेत्। नह्युन्मत्तस्य क्रियाकलापेऽस्तव्यस्तता, असङ्गतिर्वा कुत्रचिदस्ति। यदस्ति तत्तु केवलमस्माकीनं तद्विषयकमज्ञानमेव। जटिलां परिस्थितिं प्राप्योन्मत्तोऽपि मानसिकसङ्घर्षं प्रति युद्धं करोति। यदि तस्याभ्यन्तरिकमानसिकावस्थामीषत्सहानुभूत्या सह वयं ज्ञातुं प्रभवेम, अथ च यदि वयं भावग्रन्थिजन्यलाक्षणिकप्रतीकहेत्वारोपणावदमनोन्मुक्तकल्पनाप्रभृतिरूपाणि अपस्मारोन्मादलिङ्गानि तलावगाहिविधिना गवेषयितुं प्रभवेम, तर्हि नूनं विभिन्नानि लिङ्गानि एकस्य सामञ्जस्यपूर्णजटिलव्यक्तित्वस्याङ्गभूतानि प्रतीयेरन्।

३०. उन्मुक्तकल्पना[1]

ननु किमुन्मादावस्थायामपि खलून्मुक्तकल्पना अभिनिर्वर्तन्ते? अत्रोच्यते—कल्पनाप्रकरणेऽस्माभिरुन्मुक्तकल्पनास्वरूपं संक्षेपेण स्फोरितम्; किन्तु स्वस्थो मानव उन्मुक्तकल्पनाभ्यो दिवास्वप्नाख्याभ्योऽचिरादेव प्रकृतिं वस्तुभूतजगद्व्यापारानुगतामवाप्नोति; परन्तु मानसिकविकृतिमुपगतो मानवो जटिलमानसिकसङ्घर्षे समुपस्थिते यदि सङ्घर्षापनोदाय किञ्चित् कर्तुमसमर्थो भवति, तर्हि स उन्मुक्तकल्पनाभिः प्रचुराभिरात्मानं परितोषयति। उन्मत्तजीवने उन्मत्तकल्पनानां प्राचुर्य्यमहर्निशमनुभूयते। या या इच्छा जाग्रज्जीवने परितोषमवाप्तुमसमर्था जाताः, ताः सर्वा भावग्रन्थिसङ्घटनेन तिरोधीयन्ते। यथावसरं ता अज्ञातचैतन्यक्षेत्राज्जाग्रच्चैतन्यक्षेत्रं स्वप्नद्वारेणोन्मुक्तकल्पनाद्वारेण वानुप्रविशन्ति। अवसादोन्माददशायां[2] यदा रोगी उदासीनो भूत्वा

---

१. तुलनार्थम्—Phantasies.

२. तुलनार्थम्—Melancholia.

सामाजिकजीवनादुपरमते, कक्षस्य दूरस्थे कोणेऽवतिष्ठते, प्रतीयते चेदं यत् स जडबुद्धिर्वा मूर्खो वा अस्तीति, तदापि स कुशाग्रबुद्धिरात्मनात्मानमनुप्रविश्य महोन्मुक्तकल्पनाजालप्रसरं वितनोति। तासु तासु कल्पनासु सोऽलब्धपूर्वं शौर्यं कीर्तिं धनं प्रेयसीकृपाकटाक्षमवाप्नोतीति कल्पते। एतावता आत्मदैन्यजन्यदौर्बल्यापनोदं जाग्रदवस्थादुर्लभं स सुविस्तीर्णे कल्पनाक्षेत्रे उर्वराभूमिसम्पन्ने स्वैरं कर्तुमर्हति। एतावता तस्य स्वाभिमानाख्यस्थायिभावस्य पूर्त्तिर्यदि स्वस्थदशायां विषमपरिस्थितिसामाजिकमर्यादावशान्न सम्भाव्यते, तर्हि सोऽनायासमुन्मुक्तकल्पनाद्वाराऽवाप्यते। अत एवोन्मत्तस्योन्मुक्तकल्पनाश्रयणमपि नूनमात्मप्रकाशनसाधनम्। 'आत्मप्रकाशनम्' नाम सजातीयेषु स्वबन्धुबान्धवादिष्वात्मगौरवातिशयाभिव्यक्त्या अदम्याकाङ्क्षामुखेन वैशिष्ट्योपपादनमिति।

उन्मादरोगी उन्मुक्तकल्पनासु एतादृशमानन्दमुपैति यत्तस्य ताभ्य उन्मुक्तकल्पनाभ्यः पुनरावर्तनमेव दुष्करम्, अत एव पुनः स बाह्यजगतो वातावरणेन सार्धं सामञ्जस्यं स्थापयितुं न प्रभवति। उन्मादस्य उन्मुक्तकल्पनानुरोधाद् द्वैविध्यं तु साधयितुं शक्यते। प्रथमं तावत् सावस्था, यस्यां रोगी बाह्यजगतो व्यापारेषु किमपि सारवत्तत्त्वं नहि पश्यति। द्वितीयं चोन्मुक्तकल्पनारूपं प्रकर्षमुपगतं भवति, यस्मिन् नूनमुन्मादरोगी स्वीयोन्मुक्तकल्पनानुगतविषयान् वास्तविकान् मन्यते। अत्र दिवास्वप्नानुगतोन्मुक्तकल्पना-स्वप्नानुगतोन्मुक्तकल्पनयोर्यदन्तरं स्वस्थं मानवमस्वस्थात् पुरुषात् किं वा सामान्यजनमसामान्यजनाद् व्यावृत्तं करोति, तदपि सर्वथा विलुप्तं जायते। उदाहरणस्वरूपम्, अवदमनविषयीभूतेच्छाभिव्यक्तिरूपाणामुन्मुक्तकल्पनानां निदर्शनरूपतया 'विवाहप्रतिश्रुतिमयं प्रलपनम्[1]' इति। रोगिण्या विवाहप्रस्ताव एकेन युवकेन सह निश्चितो जातः। तदनु स प्रस्तावो वरपक्षीयैस्तिरस्कृतः। सुतरामेवंविधा रोगिणी उन्मादग्रस्ता मन्यते स्वकीयोन्मुक्तकल्पनाद्वारेण यत्तस्याः प्रियतमः पुनस्तां परिणेतुं समुत्सुको जातः, अथवा तया सह विवाहकाले वेदीं परितः साप्तपदीनमाचरतीत्यादिकम्। उन्मुक्तकल्पनायां भाविजीवनस्य दाम्पत्यप्रणयपराकाष्ठारूपस्य चरमा परिणती रोगिण्या वस्तुभूतत्वेन हि खल्वनुभूयते।

३१. स्वप्नानुगतं प्रतीकाभिव्यञ्जनम्

फ्रायडमहाभागैः स्वच्छन्दप्रत्ययसम्बन्धप्रयोगेषु दृष्टं यद्रोगिणः प्रायः कष्टप्रदानि चिन्ताजनकानि वस्तुजातानि पूर्वानुभूतानि स्मर्तुमभिव्यञ्जयितुं वा न प्रभवन्ति, अथवा तदभिव्यक्तौ सङ्कोचविशेषानुभवं कुर्वन्तीति। शतस्तैरवदमनविवेचनीयं मतं प्रतिपादितम्। तद्यथा — अहङ्कारचैतन्यम् 'ईगो' इति संज्ञकं स्मृतिविचारेच्छादिकमनभीष्टमप्रियमज्ञातचैतन्येऽवदमनविधिना प्रेषयति प्रचोदयतीति वा। यदा च मनोविश्लेषणविशारदस्तं जाग्रच्चैतन्यक्षेत्रस्तरमानेतुं प्रयतते, तदा तदेवाहङ्कारचैतन्यं तस्य प्रयत्नान् विफलीकरोति। अवदमनविषयीभूताः पदार्थाः प्रायः कामप्रवृत्तिमूलका भवन्ति, ते च सततमात्मनो बहिः प्रकाशमिच्छन्ति। तेषां भावग्रन्थिप्रभावायत्तावदमनानां पदार्थानामाकलनम्, इदमित्थन्तयावधारणं रोगिणः स्वप्नविमर्शमुखेन कर्तुं शक्यत इति फ्रायडमहोदयानामभिसन्धिः। अत्रेदं प्रतिपत्तव्यं यद्धि ये ये तिरोभूता भावा बहिर्गन्तुमिच्छन्ति; परन्तु अहङ्कारचैतन्येनान्तराले बाध्यन्ते, तेषामभिव्यक्तिरेकेनाऽपरोक्ष-

१. तुलनार्थम्—Betrothal delirium.

प्रकारेण सौकर्य्येणापादयितुं शक्यते। यदा रोगी नूनमतिविस्रब्धं सहृदयं सहानुभूतिमयं हितैषिणं मनोविश्लेषणविशेषज्ञं विन्दति, तदा स तस्मै स्नेहात् गोप्यानपि स्वमनोगतभावान् क्रमबद्धतया, अक्रमबद्धतया वा प्रकटीकरोति। एवम्प्रकारेणाहङ्कारासादितः प्रतिरोधः[1] कालक्रमेण क्षीयते।

अथ च स्वप्नानुव्याख्यानं दुष्करमापादनीयम्। नहि मनोऽन्तर्निहितावदमनविषयीभूता इच्छाः साक्षात् प्राकट्यं लभन्ते; प्रत्युत प्रतीकाधानेन लक्षणाशक्तिमार्गेण तेषामभिव्यञ्जनं निष्पद्यते। स्वप्नगतदृश्यानि ह्यवदमनगतकल्पनाप्रतिमानां स्थानं गृह्णन्ति। अतः स्वप्नानुव्याख्यानं तदैव सौकर्य्येणाभिसम्पद्यते, यदा वयमिदं ज्ञातुं प्रभवामः—किं दृश्यं कस्य कल्पनाप्रतिमाविशेषस्य प्रतीकविशेषत्वेन प्रयुज्यते ? इति। एतस्यां दिश्येका सुविधा विद्यते, यतो हि व्यक्तिगतमानवस्य जीवने सामूहिकरूपेण मानवजातेश्च जीवने प्रतीकाधानं प्रायः साम्येन प्रसरति। तच्च ग्रामकथासु, लोकगीतेषु, पौराणिकसाहित्ये च सर्वदेशेषु प्रकाममुपलभ्यते।

वयमत्र संक्षेपत एकं स्वप्नं निदर्शनरूपेणानुव्याख्यास्यामः। एकया स्त्रिया कदाचित् स्वप्ने दृष्टं यत्तस्याः पृष्ठत एकोऽश्वोऽनुधावति। अयमश्वः सा चैकस्मिन् सागरे पतितौ जातौ। तौ च नीलचित्रितजलपोतमभितर्तुमुपक्रमेते स्म इति। इयं महिला स्वकार्येऽतीवानुरक्तासीत्। सा च विवाहमप्यनावश्यकमभिमन्यते स्म। कथं तर्हि उपरतायास्तस्या अयं स्वप्न उपपद्यते ? अत्रोच्यते—गवेषणानन्तरमिदं प्रकटीभूतं यत् तामेको नवयुवकः प्रीणाति स्म। यद्यपि सान्येषां समक्षं तं सततमनिन्दयदेव। स पुरुष एकस्य द्वीपस्याधिवासी आसीत्। तस्य विशेषाभिरुचिः पोलोसंज्ञकाश्ववारक्रीडायामासीत्। सोऽश्वानामवचयनविशेषज्ञोऽप्यासीत्। तेन स्वस्थानं 'नीलं द्वीपम्' इति प्रकटितम्। स उपनिवेशेष्वाङ्गलदेशीयेष्वेकः पदाधिकारी आसीत्। तस्येयं प्रकृष्टेच्छा जाता यत्तां परिणीयोपनिवेशविशेषं नयेयमिति।

अत्रेदं वक्तव्यं भवति—सागरे पतनं जलपोतमभितरणं च द्योतयति यत् सा तेन युवकेन सार्धं जलपोतद्वारा गमनमभिकाङ्क्षति। यद्यं साक्षात् स्पष्टतया वक्तुमभिव्यञ्जयितुं वा नाभिकाङ्क्षामहे, तत् प्रच्छन्नरूपेण स्वप्नानुगतदृश्येषु प्रतीकाधानेनाभिव्यज्यते। अथ च यथा संकेतभाषया रहस्यगर्भितसूचनाः प्रेष्यन्ते, तथैव स्वप्नानुगतदृश्येषु सूक्ष्मचैतन्येन, अज्ञातचैतन्येन वा तिरोहितकल्पनाप्रतिमा, भुग्नीकृताः प्राकट्यं लभन्ते; यतो हि स्वप्ने उन्मुक्तकल्पनासु चाहङ्कारनियन्त्रणं नोपलभ्यते। किञ्च स्वप्नानुगतनीलवहित्रवर्णनेन 'नीलं द्वीपम्' इति लक्षितम्। स्वप्नदर्शनेनेदं स्फुटं जातं यत्सा रमणी यावत्तं पुरुषं प्रीणाति, तद्विषये चिन्तयति च, तावन्नहि सा जाग्रदवस्थायामनुभवति प्रकटीकरोति चेति।

ननु किम्प्रकारकमिदं प्रतीकाधानम्[2] ? फ्रायडमहाभागा मन्यन्ते यद् मानवशरीरस्य प्रतीकरूपं गृहं भवति। शिश्नस्य प्रतीकभूतानि यष्टिस्तम्भवृक्षसीसकलेखनी(पेंसिल इत्यार्यभाषायाम्)प्रभृतीनि भवन्ति। दाडिमसेवकलशादयः कुचप्रतीकाः। व्यवायश्च नर्तनवृक्षाधिरोहणाऽभिमर्शनादिबलप्रयोगादिभिः प्रतीकैः संसूच्यते। जलान्तर्गमनं प्रसूतिकार्यप्रतीकरूपम्।

१. तुलनार्थम्—Resistence.
२. तुलनार्थम्—Symbolism.

स विविधपुराणेतिहासप्रमाणैः स्वमतोपपादनं प्रकुरुते । यथा स्त्रीविषये खीस्तकृत-'बाइबिल'नामकपुस्तिकायामुदाहृतं 'दुर्बलतरं पात्रम्' इति तस्या अबलात्वस्य प्रतीकरूपम् ।

अत्रेदमस्माभिर्वक्तव्यम्—प्रतीकाधानं व्यक्तिज्ञानादिकमपेक्षते । अत एव मनोविश्लेषण-विशारदेन रोगिणो मानसिकावस्थापारिवारिकवातावरणानुशीलनपूर्वकमेव प्रतीकानुव्याख्यान-मापादनीयमिति ।

३२. स्वच्छन्दप्रत्ययसम्बन्धपरीक्षणम्

स्वच्छन्दप्रत्ययसम्बन्धप्रयोगो युङ्गमहोदयेनाऽतीव साफल्येन भावग्रन्थिविशेषस्वरूपान्वे-षणाय प्रतिपादितः । तद्विधिस्तु प्रत्ययसम्बन्धविवेचनावसरे प्राग्वर्णितः । अत्र वयमेकं युङ्ग-पीटर्सन-प्रयुक्तं प्रयोगविशेषमुदाहरामः, येन भावग्रन्थिक्रियारूपं स्फुटं जायेत ।

	उत्तेजकः शब्दः	प्रतिक्रियाकालः	सेकण्डाख्यं प्रतिक्रियाकालखण्डम्
१–	शिरः	केशः	१. ४
२–	हरितम्	शाद्वलम्	१. ६
३–	जलम्	गभीरम्	५. ७
४–	यष्टिः	क्षुरम्	१. ६
५–	दीर्घः	चतुष्पादपीठः[१]	१. २
६–	वहित्रम्	(जले) निमज्जति	३. ४
७–	पृच्छ	उत्तरम्	१. ६
८–	ऊर्णा	सीवनम्	१. ६
९–	ईर्ष्यामयः	मित्रम्, मैत्रीभावयुक्तः ।	१. ४
१०–	दीर्घिका	जलम्	४. ०
११–	रुग्णः	अनामयम्	१. ८
१२–	मसिः	कृष्णा	१. २
१३–	तरतु	तर्तुं शक्नोमि	३. ८

यस्येयमुपरिनिर्दिष्टा तालिका प्रस्तुता, तेन रोगिणा अवसादोन्मादावस्थायां किञ्चित्पूर्वं जलप्लावनेनात्महत्यां कर्तुं व्यवसितम् । इदं भावग्रन्थिरूपमुपर्युक्तेष्वधस्ताद्रेखाङ्कितेषु ३, ६, १०, १३, सङ्ख्याविशेषेषु प्रत्युत्तरप्रत्ययसम्बन्धेषु स्फुटं जायते । स्मरणीयमस्मिन् विषये यदत्राधिकतरकालोऽप्यपेक्षितः । त्रयोदशे चोत्तरे तु प्रतिक्रियाशब्दः किञ्चिद्भावग्रन्थ्यभिमुखं वैलक्षण्यमादधाति ।

एवम्प्रकारेण शब्दशतमुच्चार्य्य प्रतिक्रियाकालं चावधार्य कश्चन भावग्रन्थिविशेष इति मनोविश्लेषणपारङ्गतेनावधारणीयम् ।

३३. मनोविश्लेषणम्

सम्मोहनस्य स्वच्छन्दप्रत्ययसम्बन्धस्य च भावग्रन्थिक्रियाकलापाकलनार्थं सपरिकरं विवेचनं सम्प्रस्तुतचरम् । कश्च सम्मोहनोपयोगः सामान्यमानसिकरोगाणां चिकित्सायै

१. तुलनार्थम्—'मेज' इत्यार्यभाषायाम् ।

भवतीत्यपि वर्णितचरम्। सम्मोहनविधिर्जटिलो दुःसाध्यश्च भवति। कदाचनायमकुशलेन प्रयुक्तः प्राणसङ्कटमप्यभिनिर्वर्तयति। अतएव फ्रायडमहाशयेनैकः स्वतन्त्रो विधिराविष्कृतः। स विधिरसामान्यमनोविज्ञाने मनोविश्लेषणवादनाम्ना प्रथते। 'मनोविश्लेषणम्' इति पदं सूचयति यदस्मिन् विधौ मनोव्यापाराणां विश्लेषणं कृत्वा मनोवैज्ञानिकोऽसामान्यमनोविकारविशेषस्य चिकित्सां सम्पादयति, उन्मत्तपुरुषाय विलुप्तं व्यक्तित्वसन्तुलनं पुनरनेन विधिना सुलभं करोति। कश्चासौ विधिः? अत्रोच्यते—मनोविश्लेषणं नाम फ्रायडप्रतिपादितस्य राद्धान्तस्याधारशिलेत्यवद्यम्। अनेन तिरोभूतानामवदमनविषयीभूतानां भावग्रन्थिप्रभावायत्तस्वरूपाणामज्ञातचैतन्यगर्भीकृतानामपूर्णेच्छानां मनोविश्लेषणविदोद्घाटनं क्रियते। नहि तत् साधारणदशायां सौकर्य्येण कर्तुं शक्यते, नापि सामान्यजनेनैव। अतः फ्रायडमहाशयेन चतुरस्रमेतन्मनोविश्लेषणं नाम तन्त्रं पल्लवितम्। मनोविश्लेषणे हि खलु रोगिणा सार्धं चिकित्सकः स्वैरं वार्तालापं कुरुते। रोगी स्वैरं स्वतन्त्रो भूत्वा स्वमनोगतभावान् मनोविश्लेषणविशारदसम्मुखं कथयति, तस्य वार्तालापो निर्बन्धो भवति। प्रारम्भे यावन्न रोगिणा सङ्कोचो दूरीक्रियेत, तावन्न तस्यावदमनतिरोहितेच्छानामज्ञातचैतन्यवर्तिनां सम्यगवधारणं कर्तुं शक्यते। कियत्कालानन्तरं रोगी विशेषज्ञं मित्रमिव निरापदं मन्तुमारभते, ततश्च स तस्मै निःसङ्कोचं स्वमनोभावान् प्रकटयितुमारभते। निर्गलितलोकमर्यादाबन्धेन वार्तालापेनानेन विशेषज्ञस्तांस्तान् मनोविकारानपि ज्ञातुमर्हति, यान् स रोगी स्वयमपि नावबुध्यते। फ्रायडमहाशयो निश्चप्रचं निर्णीतवान् यद्यदा रोगी स्वविचारधारां मार्गविशेषे नहि प्रवर्तयितुं यतते, तां वा यदा लोकमर्यादाभयेन नियन्त्रयितुं नहि प्रयतते, तदानायासमज्ञातचैतन्येन प्रेरितः क्रियाकलापस्तस्य वार्तालापेऽभिव्यज्यते, कुशलश्च मनोविश्लेषणविशारदः स्वप्नविश्लेषणसाहाय्येन स्वतन्त्रप्रत्ययसम्बन्धप्रयोगेण च रोगिणो भावग्रन्थिसङ्घटनस्य तलावगाह्यध्ययनं कर्तुमर्हति, यच्च भावग्रन्थिसङ्घटनं कारणरूपतयोपादाय विविधानि विक्षिप्ताद्यवस्थानामपस्मारोन्मादीनां लक्षणानि पूर्वलक्षणानि वाविर्भावयति। अनेन विधिना फ्रायडमहोदयोऽवदमनगर्भीकृतानामिच्छानामुद्घाटनं कर्तुं प्रभवति स्म। तेन च सहस्रशो रोगिणामपस्मारजन्यार्धाङ्ग[1]ऽङ्गसंज्ञाशून्यत्व[2]विक्षिप्तभय[3]-त्रासावदमन[4]प्रभृतिरोगाणां सफला चिकित्सा सम्पादिता। कदाचन त्वेवं जातं यदेकदा चिकित्सिता रोगिणी पुनस्तदितरव्याधिविशेषेण पीडिता सती पुनरागता। तदा फ्रायडमहोदयेनाऽनुमितं यत्तेन यच्चिकित्सितं तत्तु कश्चिदभिनवभावग्रन्थिजन्यविक्षिप्तावस्थाक्रियाकलाप एव, न तु तत्पूर्ववर्तिभाववेदनाविशेषः[5] (संवेगजन्याकस्मिकवेदनेति यावत्)। ततश्च स तदन्वेषणे संलग्नो जातः। स्वप्नविश्लेषणेन काश्चन रोगिण्यो महिला बाल्यकालिकसंवेगजन्याकस्मिकवेदनाविशेषानस्मरन्। ताभिः स्मृतं यत्ताः पित्रा, पितृव्येण, अग्रजेन, भ्रात्रा वाऽभिमर्शिता इति। फ्रायडमहोदयेनाऽध्यवसितं यद्यत् ताभ्यः स्मृतं तत्तु स्मर्तुः बाल्यकालिको दिवास्वप्नः, बाल्यकालिकी उन्मुक्तकल्पना वेति, यच्चाऽतिशैशवानुभूतबाल्यसुलभाभिलाषविशेषस्य मूर्त्तं रूप-

१. तुलनार्थम्—Paralysis.

२. तुलनार्थम्—Anaesthesias.

३. तुलनार्थम्—Neurotic fears or phobias.

४. तुलनार्थम्—Inhibitions.

५. तुलार्थम्—Emotional shock.

मिति। अतिशैशवस्यापूर्णाभिलाषस्याभिव्यक्तिरूपो हि तदुत्तरकालिको दिवास्वप्न उन्मुक्तकल्पना वेति। मनोविश्लेषणद्वाराऽतिशैशवोचितभावसङ्घटनस्य स्वरूपस्य तलस्पर्शिना प्रत्युद्बोधनेन स्वतन्त्रप्रत्ययसम्बन्धप्रयोगोपात्तेन तदुत्तरकालिकविक्षिप्तावस्थालक्षणानां कारणविशेषावधारणेनापाकरणं कर्तुं शक्यत इति तेषामाकूतम्।

मनोविश्लेषणविधिनेदमुद्घाट्यते यद् विक्षिप्तावस्थालक्षणानि नूनमवदमनविषयीभूतमनोवेगानां प्रतिक्रियाजन्यविरूपमात्राणि। यथा—हीनताभावजन्यावदमनेन तदनुवर्तिस्वगौरवोत्कर्षेच्छावदमनेन च रोगिणोऽयं मूढविश्वासो जायते यत्स राष्ट्रस्य समग्रराजपुरुषैः गुप्तचरैश्च सकलैरहर्निशमनुक्षियते। अत्र नूनं रोगी जाग्रद्दशायामस्य राजपुरुषातिक्रमणस्य साग्रहं सक्रोधञ्च विरोधं कर्तुमभिवाञ्छति, तथा तेनाज्ञाततया किमप्यनिर्वचनीयं सन्तोषमनुभूयते यत्स सकलजनानामीर्ष्याजनकं गौरवं बिभर्तीति। विपुलधनैश्वर्यविषयकमूढविश्वासैर्गौरवान्वितोच्चपदविषयकमूढविश्वासैर्वा सदृशं ह्याकाशवाणीश्रवणसमुत्थानां विभ्रमाणामप्युपेयं प्रतिपत्तव्यम्। या स्त्री उच्चैरुपालभते यद्रात्रौ पुरुषाः पुरुषविशेषो वा तस्याः कक्षं प्रविशति, सा नूनममुमुपालम्भं वास्तविकमेव मन्यमाना ब्रूते। अत्रापि तया कश्चनाभ्यन्तरनिर्वृत्तिविशेष एवानुभूयते; यं सा कदापि जाग्रद्दशायां नैव विन्दते, ज्ञात्वा वा जाग्रद्दशायां कदाप्यवाप्तुं नार्हतीति। या च स्त्री सर्वदा उपालभते यत्तस्यामेव सर्वे जना अनुरक्ता भवन्तीति, तस्या अयं मूढविश्वासोऽपि नूनं प्रत्याक्षेपस्य चरमं निदर्शनम्। प्रत्याक्षेपो नाम मनोव्यापारविशेषः फ्रायडमहोदयस्य साधनतन्त्रविवेचनावसरे[1] वर्णितचरः। प्रत्याक्षेपाख्ये[2] मनोव्यापारे स्वाभिमतोद्देश्यानामन्येष्वारोपणमभिसम्पाद्यते। यथा कश्चन स्वीयं सामाजिकहीनताभावमसहमानोऽन्येषां समेषां सामाजिकमाभिजात्यं पदगौरवं वा सन्देग्धि, एवम्भूतमेव प्रत्याक्षेपरूपं तस्याः स्त्रियाः खल्विदमुपालम्भनमिति।

ननु कथं मनोविश्लेषणविशेषज्ञेन तेन विक्षिप्तावस्थारूपविशेषा अपाक्रियन्ते, निवार्यन्ते, चिकित्स्यन्त इति? अत्रोच्यते—मानसिको व्याधिर्मानसिकमुपचारमपेक्षते, यथा चास्य मानसिकमेव कारणमन्विष्यते मनोविश्लेषणविशारदैः, तथैवास्यौषधमपि मनोवैज्ञानिकमेव भवितुमुचितमिति सर्वोपरि चिकित्सकेन निश्चप्रचमभ्युपेतव्यम्। इयं प्राथमिकी मौलिकी चावश्यकता।

द्वितीयावश्यकता चेयमस्ति यद्धि रोगिण आनुकूल्यं चिकित्सकेन सार्धं भवेदिति। नहि रोगिणः सहयोगमन्तरा तस्य मनोविश्लेषणं कर्तुं शक्यते। किं तावन्मनोविश्लेषणं नाम, रोगिसहयोगादृत्ते तेन सह वार्तालापोऽपि न सम्भाव्यते! अथ चेदमानुकूल्यं तावन्न सम्पादयितुं शक्यते यावन्न चिकित्सकः परमः श्रद्धेयः, हिताकाङ्क्षी, विश्वास्यश्च भवेत्, तथा च रोगिणा ज्ञायेत प्रतीयेतापि च।

तृतीयावश्यकता खल्वियं वर्तते यच्चिकित्सको लोकलज्जां स्वीयमानमर्यादां शिष्टाचारविचारविवेकं त्यक्त्वा विशिष्टरोगिहिताकाङ्क्षया तद्भावविचारकल्पनाभूमिमवतीर्य तदनुकूलमनोविश्लेषणोपयोगिप्रष्टव्यानि स्वच्छन्दप्रत्ययसम्बन्धमन्विष्यन् प्रष्टुमभिप्रवर्तेत। यदि मनागप्यन्तरं चिकित्सकविक्षिप्तरोगिणोर्मानसिकस्तरयोर्विद्यते, नूनं तर्हि मनोविश्लेषणमसाध्यम्; सम्पन्नं वा विप्रदुष्टं भविष्यति।

---

१. तुलनार्थम्—Freuds mechainism.
२. तुलनार्थम्—Cooperation.

ननु कथङ्कारं मनोविश्लेषणं विप्रदुष्टं जायते ? अत्र वयं ब्रूमः—तलावगाहनराहित्यं नाम मनोविश्लेषणस्य विप्रदुष्टत्वमिति । अतश्चिकित्सकरोगिणोर्मानसिकभूमिसाम्यं नितरामपेक्ष्यते ।

सुतरां तावत् खल्विदं विनिश्चित्य यदसामान्यासु विक्षिप्ताद्यपस्मारोन्मादादिरोगावस्थासु सर्वाणि लक्षणानि चावदमनविषयीभूतानामज्ञातचैतन्यगर्भीकृतानामिच्छानामसामान्यविरूपाभिव्यञ्जनरूपाण्येवेति । मनोविश्लेषणात्मकचिकित्सापद्धतेर्हृदयसर्वस्वं तु तथाभूतानामिच्छानां जाग्रच्चैतन्यक्षेत्रे पुनरावर्तनं पुनरुद्बोधनं पुनः स्वीकरणं चेति । योऽवस्थाविशेषः पूर्वमवदमनविषयीभूतत्वात्तिरोहितो जातः, यदि स पुनरुद्बोधयितुं पुनरावर्तयितुं शक्यते, तदनन्तरं च यदि स न तिरोधत्ते, तर्हि किं तेनासामान्यावस्थापूर्वलक्षणविशेषेण, यद्ययं तदन्यप्यवशिष्यते ! यतो हि विक्षिप्तावस्थायाः पूर्वलक्षणं नाम अस्माभिस्तिरस्क्रियमाणप्रवृत्तीनामभिव्यञ्जनम्, यथाऽन्ये जनास्तास्तथाभूतत्वेन नावगाढुं शक्नुवन्ति । अत एव यदा वयं ताः प्रवृत्तीस्तिरस्कर्तुं न प्रयतामहे, तत्सम्बन्धीनि तानि तानि पूर्वलक्षणानि[1] अप्यचिरेण दूरीभवन्ति । ननु वर्णितपूर्वविक्षिप्ताद्यवस्थानां मूलं कारणन्तु भावग्रन्थिद्वन्द्वसमुत्थम्, तत्तु सम्प्रत्यप्यवतिष्ठते ? बाढम्, भावग्रन्थिद्वन्द्वं तु साम्प्रतमप्यवतिष्ठते; किन्तु तं मानसिकसङ्घर्षमपनेतुं वयमधुना जाग्रद्दशाया मवबोधदशायामेव शक्नुमः । मानसिकद्वन्द्वविस्रंसनं चाध्यवसायेन सुदृढेन, किं वा भावग्रन्थिविशेषयोर्द्वयोर्मध्ये सामञ्जस्यस्थापनेन गुणावगुण-शक्याशक्य-हिताहितविवेकपुरस्सरमुपात्तरूपेणानुकूल्येन च जाग्रद्दशायामेव रोगिणा कर्तुं शक्यत इति निष्प्रत्यूहम् । अवदमनं तु मानसिकसङ्घर्षापनयनस्यातीव विगर्हितं साधनम् । तस्य परिणामरूपाण्यस्माकं स्वकीयं नियन्त्रणमतिक्रामन्ति । अवाञ्छनीयानामस्माकं प्रवृत्तीनामवदमनेन, अथ च तिरोधानेन वयं तासां नितरां वशवर्तिनो भवेम । यादृशी परिक्लृप्ता, दुःसह्या, पूर्णा चास्माकं विवशतावदमनेनासाद्यते, नहि तादृशीं विवशतां वयं तदानुभवामो यदा तासां स्पष्टं ज्ञानं जाग्रद्दशायामेव, अवबोधदशायामेवानुवर्तेत । यदि च वयं तादृशीनां प्रवृत्तीनामुन्नयनं मार्गान्तरीकरणं वा कर्तुं प्रभवेम, तर्हि तत्तु नितरां समीचीनमेव । तत्र तु विवशताया वार्तैव कुतः !

अत्रेदं स्मर्तव्यं यद् यावद्रोगिणो भावसङ्घटनं मनोविश्लेषणविशेषज्ञो जानाति, तावत्कोऽपि न जानाति, न ज्ञातुमर्हत्येव । अत आनुकूल्यमुपस्थापयितुं भावग्रन्थिसङ्घर्षमपाकर्तुमवाञ्छनीयमनःप्रवृत्तीनामुन्नयनं मार्गान्तरीकरणं सम्पादयितुं च तस्य सहयोगः, दूरदर्शिता, सौजन्यम्, पथप्रदर्शनं च सर्वदा पदे पदे रोगिणाऽपेक्ष्यते । तत्तथैव करणीयम्, यथानुकूल्यापादने मनागपि वैषम्यं रोगिणं न प्रतीयेत ।

अपि चेदं स्मर्तव्यम् – रोगिणो भावेच्छाविचारप्रवृत्तीनामुन्नयनं तदनुकूलत्वेनैवापादनीयम्, न तु मनोविश्लेषणवेत्तुर्विचारादिदिशा तत् सौकर्येण सम्पादयितुं शक्यते । यादृशा रोगिणो धार्मिकनैतिकसामाजिकाचारविचारानुबन्धिविश्वासा भवेयुः, तादृशा एव समुचिता इति वाचोयुक्तिमेव श्रद्दधानेन मनोविश्लेषणविशारदेन रोगिपथप्रदर्शनरूपं स्वकार्यं परिपालनीयम् । आनन्दकन्दश्रीकृष्णचन्द्रस्येयमुक्तिर्हि खल्वसामान्यमनोविकारग्रस्तस्यावस्थाविशेषमुद्दिश्यात्यर्थं सङ्गच्छते—

१. तुलनार्थम्—Symptoms.

श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ इति[1] ।

किञ्च—

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।
जोषयेत् सर्वकर्माणि विद्वान् युक्तः समाचरन् ॥ इति[2] ।

बुद्धिदौर्बल्याद्धि विक्षिप्ताद्यवस्थाग्रस्तानां रोगिणामभिनवेन विचारसरणिविशेषेण नूनमुन्नयनं मार्गान्तरीकरणं वानुकूल्योपस्थापनं वा दुष्करं भवतीति प्रतिपत्तव्यम् । अतस्तेषां मनोविश्लेषणानन्तरं पथप्रदर्शनं तत्प्रवृत्तिविचारधार्भिकास्थानुरोधादेवापादनीयम् ।

३४. मानसिकरोगविशेषाः

फ्रायडमहोदयानां तदनुयायिनां च मतानुशीलनान्तरं पञ्चविधा असामान्यमनोविकाराणां विक्षिप्तावस्थाविशेषा[3] अवधार्यन्ते । ता यथा—

१—अपस्मारः[4]—मानसिकद्वन्द्वजन्यत्वम्, पक्षाघातयुक्तत्वम्, शरीरावयवविशेषसंज्ञाशून्यत्वं चास्य लक्षणानि । आङ्गलभाषायामयं 'हिस्टीरिया', इत्युच्यते ।

२—अन्तर्वेगोन्मादः[5]—अस्य विविधा भेदा अभिनिर्वर्तन्ते । यथा—

(अ) भयोन्मादः—उच्चस्थानतो दुर्गवच्चतुरस्रं पिनद्धद्वारस्थानतश्च भयमस्य लक्षणम् ।

(आ) मूढाभिनिवेशः[6] ।

(इ) अन्तर्वेगाभिनिवेशः[7]—यथा स्तैयान्तर्वेगाभिनिवेशः[8], यदा रोगी प्रसभं चौर्यकर्मणि प्रवृत्तो जायते ।

३—मानसिकदौर्बल्योन्मादः[9] असामान्यमानसिकदौर्बल्यम्, क्लान्तिः, स्नायुसन्धिवेदनाश्चेति ।

४—चिन्तोन्मादः[10]—दुर्धर्षा चिन्ता अस्य लक्षणम् ।

५—स्वास्थ्यचिन्तोन्मादः[11]-अस्मिन् सति रोगी स्वकीयस्वास्थ्यचिन्तां विशेषतः कुरुते ।

---

१. द्रष्टव्या—श्रीमद्भगवद्गीता ३।३५
२. द्रष्टव्या—श्रीमद्भगवद्गीता ३।२५
३. तुलनार्थम्—Neuroses.
४. तुलनार्थम्—Hysteira.
५. तुलनार्थम्—Psychasthenia.
६. तुलनार्थम्—Obsessions.
७. तुलनार्थम्—Compulsions.
८. तुलनार्थम्—Kleptomania.
९. तुलनार्थम्—Neurasthenia.
१०. तुलनार्थम्—Anxiety Neuroses.
११. तुलनार्थम्—Hypochondria.

किन्तु १९९० वैक्रमाब्दे अमेरिकनदेशीयमनोवैज्ञानिकचिकित्साप्रणालीविशेषज्ञपरिषदा एका सुविस्तृता सामान्यमानसिकविकाराणां सूची स्वीकृता । अस्यां द्वाविंशतिर्मानसिकविकाराणां प्रधानभेदाः षट्त्रिंशच्च गौणभेदा वर्णिताः । मार्गनमहोदयेन[1] तेषां संक्षिप्तं वर्गीकरणं द्वादशविकारेषूपनिबद्धम् । विस्तारभयात् तन्नात्र प्रपञ्च्यते । अलमतिविस्तरेण ।

३५. अपस्मारलक्षणम्

अथातो वयमपस्मारोन्मादयोर्लक्षणानि प्राचीनभारतीयायुर्वेदमतानुसारमनुव्याख्यास्यामः । अस्माँस्त्विदं प्रतिभाति यत्प्राचीनैरप्यस्माकं महर्षिभिरेते रोगविशेषा मनोवैज्ञानिककारणजन्या एवेति मतं निर्धारितम् । तथा च सुश्रुतेनोक्तम्—

स्मृतिभूतार्थविज्ञानमपस्तत्परिवर्जनम् ।
अपस्मार इति प्रोक्तस्ततोऽयं व्याधिरन्तकृत् ॥ इति[2] ।

किं च माधवकरेणोक्तम्—

चिन्ताशोकादिभिर्दोषाः क्रुद्धा हृत्स्रोतसि स्थिताः ।
कृत्वा स्मृतेरपध्वंसमपस्मारं प्रकुर्वते ॥
तमःप्रवेशः संरम्भो दोषोद्रेकहतस्मृतेः ।
अपस्मार इति ज्ञेयो गदो घोरश्चतुर्विधः ॥
हृत्कम्पः शून्यता स्वेदो ध्यानं मूर्च्छा प्रमूढता ।
निद्रानाशश्च तस्मिँश्च भविष्यति भवत्यथ ॥
कम्पते प्रदशेद् दन्तान् फेनोद्वामी श्वसित्यपि ।
परुषारुणकृष्णानि पश्येद्रूपाणि चानिलात् ॥ इति[3] ।

अत्र 'संरम्भः' नेत्रविकृतिः, हस्तपादादिक्षेपणादिकं चेति । 'श्वसिति' इति खरश्वासो भवतीत्यवधेयम् । रूपाणि—तद्यथा सुश्रुतेनोक्तम्—नीलो मामनुधावति नीलः पुरुष इत्यभिप्रेतम् । 'रूपाणि' इति प्राणिनोऽवसेयाः । नीलादिदर्शनं वातिकापस्मारे जायते । पैत्तिकापस्मारे च पीतो मामनुधावति । श्लैष्मिकेऽपस्मारे च श्वेतो मामनुधावतीति सुश्रुतवचनानुसारमूह्यम् ।

अथापस्मारनिदानं सुश्रुतवचनानुसारम्—

मिथ्यादियोगेन्द्रियार्थकर्मणामभिसेवनात् ।
विरुद्धमलिनाहारविहारकुपितैर्मलैः ॥
वेगनिग्रहशीलानामहिताशुचिभोजिनाम् ।
रजस्तमोऽभिभूतानां गच्छतां वा रजस्वलाम् ॥
तथा कामभयोद्वेगशोकमोहादिभिर्भृशम् ।
चेतस्यभिहते पुंसामपस्मारोऽभिजायते ॥ इति[4] ।

---

१. तुलनार्थम्—J. B. morgan.
२. द्रष्टव्या—सुश्रुतसंहिता, उ० त०, अ० ६१
३. द्रष्टव्यम्—माधवनिदानम्, पृ० १८३–१९० श्लो० १।१–४ (नि० सा० सं०)
४. द्रष्टव्या—सुश्रुतसंहिता ।

उपर्युद्धृताभ्यां माधवसुश्रुतोक्तलक्षणाभ्यां स्फुटमिदं दृश्यते यद्धि मनोवैज्ञानिककारणैक्य एवापस्मार इति रोगोऽभिजायते। चरकेण तु अपस्मारपरिभाषायां मनोवैज्ञानिकी दृष्टिरतिस्फुटतया विवृता। तथा हि—"अपस्मारं पुनः स्मृतिबुद्धिसत्त्वसंप्लवाद्बीभत्सचेष्टमावस्थिकं तमःप्रवेशमाचक्षते" इति[1]। स च बहुविधः। स एव च 'हिस्टीरिया' इत्याङ्गलभाषायां प्रथितरोगविशेषः। केवलं सान्निपातिकोऽपस्मारो मस्तुलुङ्गीयायतनविशेषाघातजन्यो वाऽपस्मार एव शरीररचनानुबन्धित्वेनावसेयः। उपर्युद्धृते सुश्रुतवचने 'चेतस्यभिहते' इति तु भावग्रन्थिजन्यमानसिकाघातविशेष एवाभिप्रेतः, न तु तद्व्यतिरिक्तं किञ्चिदन्यत्। शरीरसम्बन्धीनि पूर्वलक्षणानि वस्तुतो मानसिककारणविशेषेषूपरिनिर्दिष्टेषु सम्भूतेष्वभिनिर्वर्तन्ते, तत्पूरकत्वेनेत्यध्यवसेयम्।

'मिथ्यादियोग' इति इन्द्रियाणां श्रवणस्पर्शनदर्शनरसनघ्राणानामर्था विषयाः शब्दस्पर्शरूपरसगन्धाः, तेषां मिथ्यादिसेवनात्। तत्र पुरुषस्येष्टविनाशादिश्रवणं 'मिथ्यायोगः'। पटहादीनां अतिशब्दश्रवणम् 'अतियोगः'। सर्वशोऽश्रवणम् 'अयोगः'। अयं मिथ्यायोगोऽस्माभिरुपरि वर्णितेषु विभ्रमाख्येष्वसामान्यमानसिकविकारभूतेष्वन्तर्भावित इत्यवगन्तव्यम्। तत्रैव 'आकाशवाणी'नामकशब्दश्रवणस्य कारणमनुव्याख्यातम्, भावग्रन्थिविशेषस्य क्रियाकलापानुरोधात्।

'आध्यानं' नाम जिह्मानम्। 'मूर्च्छा' नाम मनोमोहः। 'प्रमूढता' नाम इन्द्रियमोहः।

ननु किं 'हिस्टीरिया' संज्ञकव्याधिविशेषोऽपतन्त्रकवातव्याधिरेवेति? एवम्प्राप्तायामाशङ्कायां वयं ब्रूमः—नह्यपतन्त्रकवातव्याधिरेव 'हिस्टीरिया' इत्यभिधो गदो भवितुमर्हति; लक्षणभेदात्।

> क्रुद्धः स्वैः कोपनैर्वायुः स्थानादूर्ध्वं प्रपद्यते॥
> पीडयन् हृदयं गत्वा शिरः शङ्खौ च पीडयन्।
> धनुर्वन्नमयेद् गात्राण्याक्षिपेन्मोहयेत्तदा॥
> स कृच्छ्रादुच्छ्वसंश्चापि स्तब्धाक्षोऽथ निमीलकः।
> कपोत इव कूजेच्च निःसंज्ञः सोऽपतन्त्रकः॥ इति[2]।

'अपस्मार' इति शब्दस्य निरुक्तिरेव 'हिस्टीरिया'संज्ञकस्य रोगस्य मानसिकारणजन्यस्य सारूप्यमावहतीति बोद्धव्यम्। नहि मानसिकाघात एव मस्तिष्काघातो मस्तुलुङ्गीयायतनविशेषघातो वेति सर्वदा स्मर्त्तव्यम्।

२६. उन्मादगदस्य लक्षणम्

अपस्माररोग इव उन्मादस्य कारणमप्यस्माकमृषीणामायुर्वेदाचार्य्याणां च मते मनोवैज्ञानिकमेवेति निश्चप्रचम्। तथा हि—

> मदयन्त्युद्गता दोषा यस्मादुन्मार्गमागताः।
> मानसोऽयमतो व्याधिरुन्माद इति कीर्तितः॥
> एकैकशः सर्वशश्च दोषैरत्यर्थमूर्च्छितैः।
> मानसेन च दुःखेन स च पञ्चविधः स्मृतः॥

१. द्रष्टव्या—चरकसंहिता, पृ० २२४ (नि० सा० सं०)

२. द्रष्टव्यम्—माधवनिदानम् पृ० २०० (नि० सा० सं०)

विषाद्भवति षष्ठश्च यथास्वं तत्र भेषजम् ।
स चाप्रवृद्धस्तरुणो मदसंज्ञां बिभर्ति च ॥ इति[1] ।

वातजपित्तजकफजसन्निपातजादिभेदेन षड्विधस्योन्मादस्य सामान्यलक्षणान्युदाहरति—

विरुद्धदुष्टाशुचिभोजनानि प्रधर्षणं देवगुरुद्विजानाम् ।
उन्मादहेतुर्भयहर्षपूर्वो मनोऽभिघातो विषमाश्च चेष्टाः ॥ इति[2] ।

नहि विषमाश्चेष्टाः कारणानि भवितुमर्हन्ति; तासां तु पूर्वलक्षणादिष्वन्तर्भावितत्वात् । मनोविकारजन्यास्ता भवन्ति; पूर्वोक्तहेतुत्वात् ।

'प्रधर्षणम्' इति अभिभवस्तिरस्कारो वेति ।

'भयहर्षपूर्वो मनोभिघात उन्मादहेतुः' इति नैव विजयरक्षितेन मधुकोशव्याख्याकारेण, न चापि वाचस्पतिमिश्रेण आतङ्कदर्पणाख्यव्याख्याकारेणैव सम्यगनुव्याख्यातम् । भयं हर्षश्च उन्मादगदस्य लक्षणं पूर्वलक्षणं च भवतः, न तु तत्कारणम् । उन्मादगदस्यात्र निर्दिष्टं कारणं तु मनोऽभिघात एव भवतीति प्रतिपत्तव्यम् । नहि पूर्वमिति पदं कारणवाचकत्वेन योजनीयम्, अपि तु 'युक्तम्' इत्यर्थे नूनमिदं योज्यम् । भयं हर्षश्च द्वे भावग्रन्थिसङ्घर्षजे अभिघातस्यानुपूरकत्वेन पूर्वलक्षणेषु शेषत्वमापद्येते । अस्थाने भयानुभवनं हर्षातिशयानुभवनं वा नूनमुन्मादगदस्य परमं लक्षणं भवतीति निरस्तसमस्तशङ्कम् । अतो भयहर्षपूर्वो भयहर्षयुक्तो मनोऽभिघातो मानसिकद्वन्द्वजन्याघातविशेष उन्मादहेतुरिति पदयोजना युक्ता ।

अपि चाहुः—

तैरल्पसत्त्वस्य मलाः प्रदुष्टा बुद्धेर्निवासं हृदयं प्रदूष्य ।
स्रोतांस्यधिष्ठाय मनोवहानि प्रमोहयन्त्याशु नरस्य चेतः ॥ इति[3] ।

"बुद्धेर्निवासो हृदयम्" इति मतं द्वितीयाध्यायेऽस्माभिर्बहुयुक्तिप्रपञ्चपूर्वकं निराकृतम् । स्यादेतद् यदुपासनायां ध्यानस्य हृदयस्थानीये कमलदले समवधानादेव हृदयं चेतनास्थानमिति मतं स्वीकृतम् । अथवा मृत्युर्हृदयस्पन्दनाभावाज्जायते, अत एव हृदयं बुद्धेर्निवासो भवतीति मतवमलम्बितम् । कारणं नाम किमपि भवत्वस्या मान्यतायाः, नेयं परीक्षकैः प्रत्यक्षशारीरोपबृंहित-नाडीतन्त्रविज्ञानविशारदैरनुमोद्यते । प्रत्यक्षं हि विज्ञानस्य परमं शरणम् । प्रत्यक्षोपमर्देन काऽपि वाचोयुक्तिर्वैज्ञानिकपदाभिधेया भवितुं नार्हतीति विशेषः । बुद्धिनिवासस्तु सविशेषं मस्तुलुङ्गमेवेति बोद्धव्यम् ।

किञ्च—

धीविभ्रमः सत्त्वपरिप्लवश्च पर्याकुला दृष्टिरधीरता च ।
अबद्धवाक्त्वं हृदयं च शून्यं सामान्यमुन्मादगदस्य लिङ्गम् ॥
रूक्षाल्पशीतान्नविरेकधातुक्षयोपवासैरनिलोऽतिवृद्धः ।
चिन्तादिदुष्टं हृदयं प्रदूष्य बुद्धिं स्मृतिं चाप्यपहन्ति शीघ्रम् ॥

---

१. द्रष्टव्यम्—माधवनिदानम्, पृ० १७८-१७९
२. द्रष्टव्यम्— " श्लो० १-२
३. द्रष्टव्यम्— " श्लो० ४, पृ० १७९

अस्थानहासस्मितनृत्यगीतवागङ्गविक्षेपणरोदनानि ।
पारुष्यकार्श्यारुणवर्णताश्च जीर्णे बले चानिलजस्य रूपम् ॥ इति[1] ।

एवम्प्रकारेण पञ्चोन्मादा भवन्ति—वातोन्मादः, पित्तोन्मादः, कफोन्मादः, सन्निपातजोन्मादः, आगन्तुकोन्मादश्चेति । "उन्मादं पुनर्मनोबुद्धिसंज्ञाज्ञानस्मृतिभक्तिशीलचेष्टाचारविभ्रमं विद्यात्" इति[2] । अतिस्फुटं हि खल्वसामान्यनोविज्ञानाभिमतमिदं मतम्; किन्तु खलु चरकाचार्यप्रभृतिप्रतिपादितो यो देवर्षिपितृगन्धर्वयक्षराक्षसपिशाचादिनिमित्तक आगन्तुक उन्मादविशेषः, सोऽर्वाचीनमनोवैज्ञानिकशैल्योपपद्यते ? किं तावदिदं विज्ञानेन सहानुकूल्यं भजते ? अत्र वयं ब्रूमः—प्राचीनानामयमन्धविश्वासो नैवास्माभिरनुमोद्यते; नेदं विचारनिकषं सहते ।

अत्रेदं स्मर्त्तव्यं यत् प्राचीनानां सर्वेषामयमन्धविश्वासः समानरूपेणाद्दतो नैवासीत् । यतो हि—

न ते मनुष्यैः सह संविशन्ति
न वा मनुष्यान् क्वचिदाविशन्ति ।
ये त्वाविशन्तीति वदन्ति मोहात्
ते भूतविद्याविषयादपोह्याः ॥ इति[3] ।

अत्रोक्तं यद्धि देवादयो नहि कथञ्चन मनुष्यैः सह विशन्ति, नैकीभवन्तीत्यर्थः । न चापि ते देवगन्धर्वयक्षराक्षसादयो मनुष्यान् मानुषदेहान् क्वचिदपि कथमप्यनुप्रविशन्ति । ये पुनर्वैद्या आविशन्तीति मोहादज्ञानाभिनिवेशात् प्रवदन्ति, ते वैद्या भूतविद्याविषयात् तज्ज्ञानादपोह्या अपसारणीयास्त्याज्या इत्यर्थः । अलमतिविस्तरेण ।

४८. उपसंहारः

फ्रायडमहोदयानां मनोविश्लेषणवादः, एडलरमहोदयानां व्यक्तिगतं मनोविज्ञानम्, युङ्गमहोदयानां विश्लेषणात्मकं मनोविज्ञानम्, तदितरेषां केषाञ्चन मनोवैज्ञानिकानां भारतीयायुर्वेदस्य प्राचीनाचार्याणाञ्च मतान्यस्माभिरुपरि संक्षेपतोऽनुव्याख्यातानि । सङ्क्षिप्तमपि सपरिकरमिदमनुव्याख्यानम् । एतेषामाचार्याणां गवेषणाभिर्मानवजातेर्नूनमसामान्यमनोविकाराणां स्वरूपसङ्घटनचिकित्सादिविषये दृष्टिकोणमामूलचूडं परिवर्तितं जातम् । विक्षिप्तो वोन्मत्तो वा नहि सम्प्रति दण्ड्यः, अपि तु दयनीयः, सहानुभूत्या चिकित्स्यः । असामान्यमनोविकाराणां प्राचुर्यं नूनं जटिलसामाजिकसम्बन्धार्थिकवैषम्यधार्मिकादर्शाऽस्थैर्यसभ्यताजन्यसङ्घर्षेणाहर्निशं वर्धिष्णु दृश्यते । अतः सामान्यमनोविकाराणां कारणविशेषाणामुद्घाटनेन विज्ञानेन च 'कथं ते निवारयितुं शक्यन्ते ?' इति सुकरं जातम् । न केवलं रोगाणां चिकित्सा, प्रत्युत 'कथं रोगोत्पत्तेः प्राक् तन्निवारणं कर्तुं शक्यते ?' इति नूनमस्माकं गम्भीरश्चिन्ताविषयः । यथा शारीरिकी स्वास्थ्यरक्षा[4] अपि व्यक्तेः

---

१. द्रष्टव्यम्—माधवनिदानम्, पृ० १८० श्लो० ६-७-८
२. द्रष्टव्या—चरकसंहिता, पृ० २४१
३. द्रष्टव्यम्—माधवनिदानम्
४. तुलनार्थम्—Mental hygeine.

सामाजिकवातावरणसमुत्कर्षेण पारिवारिकपरिस्थितेश्च समुन्नयनेन परिष्कारेण वा करणीया, येन स्वस्थसन्तुलितव्यक्तित्वोन्मेषोपयोग्यवसराः प्राचुर्येणोपलभ्यमाना भवेयुः। असामान्यमनोविज्ञानस्यैतादृशश्चतुरस्रो विकासः सञ्जातो यदस्योपयोगित्वं शिशूनां लालनपालने जटिलबालकानाम्[1] अपराधोन्मुखप्रवृत्तीनामुन्नयने[2] निरस्तसमस्तशङ्कं साधितम्। चिकित्साविज्ञाने, शिक्षाविज्ञाने, औद्योगिकसंस्थानेष्वपराधिनां परिशोधाय राजपुरुषैः सर्वत्र असामान्यमनोविज्ञानस्यानुसन्धानजातस्य फलवत्ताया आवितथ्यमुररीक्रियते। मानवमात्रस्य कल्याणावहमिदमसामान्यमनोविज्ञानं सर्वेषामेवाभिनन्दनीयम्।

इति अर्वाचीने मनोविज्ञाने व्यक्तित्वविवेचनीयः षोडशोऽध्यायः ॥

१. तुलनार्थम्—Problem Child.

२. तुलनार्थम्—Delinquent.

* ग्रन्थश्चायं समाप्तः *